पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन-
राष्ट्रियसंस्कृतसंस्थानेन सम्मानितम्

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

श्रीमद्ब्रह्मसूत्रभाष्यम्

श्रीजगन्नाथयतिविरचितभाष्यदीपिका-सूत्रदीपिकासहितम्

(प्रथमोऽध्यायः)

सम्पादकः
विद्वान् के. शङ्करनारायण अडिगः एम्.ए.एम्.फिल्
उपनिदेशकः, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु-२८

प्रकाशनम्
पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु-२८

२००८

पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन
राष्ट्रियसंस्कृतसंस्थानेन सम्मानितम्

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

श्रीमद्ब्रह्मसूत्रभाष्यम्

श्रीजगन्नाथयतिविरचितभाष्यदीपिका-सूत्रदीपिकासहितम्

(प्रथमाध्यायः)

सम्पादकः

विद्वान् के. शङ्करनारायण अडिगः एम्.ए. एम्.फिल्

उपनिदेशकः , पूर्णप्रज्ञसंशोधनमन्दिरम् बेङ्गलूरु - २८

प्रकाशनम्

पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - २८
२००८

पूर्णप्रज्ञसंशोधनमन्दिरग्रन्थमाला – ४८

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम् **श्रीमद् ब्रह्मसूत्रभाष्यम्**

श्रीजगन्नाथयतिविरचितभाष्यदीपिका-सूत्रदीपिकासहितम् **(प्रथमाध्यायः)**

सम्पादकः

पं. शङ्करनारायण अडिगः एम्.ए. एम्.फिल्

उपनिदेशकः, पूर्णप्रज्ञसंशोधनमन्दिरम् बेङ्गलूरु - २८

This Publication is brought out by the generous financial help of

Rashtriya Sanskrit Samsthan,
(Deemed University),
New Delhi

प्रकाशनम् -

पूर्णप्रज्ञसंशोधनमन्दिरम्

पूर्णप्रज्ञविद्यापीठम्, कत्तरिगुप्पा मेन्रोड्, बेङ्गलूरु - २८

पुटानि	: ५७ + ६६६
प्रथममुद्रणम्	: २००८
मुद्रितपुस्तकसङ्ख्या	: १०००
मूल्यम्	: २४० रूप्यकाणि
मुद्रणालयः	: राष्ट्रोत्थान मुद्रण

POORNAPRAJNA SAMSHODHANA MANDIRAM

Recognised by Rashtriya Sanskrit Samsthan, (Deemed University)
Ministry of H.R.D., Govt. of India, New Delhi

ŚRIMAD BRAHMASŪTRA BHĀṢYAM

of

Sri Madhwacharya

with Bhashyadeepika and Sutradeepika of

Sri Jagannathatirtha

(Chapter 1)

Editor :

Pt. K. Shankaranarayana Adiga

Deputy Director, Poornaprajna Samshodhana Mandiram,
Bangalore-28

Publisher :
Poornaprajna Samshodhana Mandiram,
Poornaprajna Vidyapeetha, Bangalore -560 028

2008

Poornaprajna Samshodhana Mandiram Series No. 48

Srimad Brahma Sutra Bhashyam of Sri Madhwacharya

with Bhashyadeepika and Sutradeepika of Sri Jagannathathirtha

(Chapter 1)

Editor :

Pt. K. Shankaranarayana Adiga

Deputy Director, Poornaprajna Samshodhana Mandiram,
Bangalore-28

Published by :

Poornaprajna Samshodhana Mandiram

Poornaprajna Vidyapeetha, Katriguppa Main Road,
Bangalore -560 028

This Publication is brought out by the generous financial help of

Rashtriya Sanskrit Samsthan,
(Deemed University),
New Delhi

Pages	: 57+666
First Edition	: 2008
Copies	: 1000
Price	: 240/=
Printed by	: Rashtrotthana Mudrana

अनुग्रहसन्देशः

हनुमद्भाष्यस्य गाम्भीर्यं देवोत्तमैर्गेगीयमानं नाल्पप्रज्ञैर्विज्ञेयमिति च विद्यावृद्धानां शास्त्रपारावारपारङ्गतानां महातपस्विनां दृढोक्तिः । यथाऽऽहुः– 'सहस्रार्थस्य भाष्यस्य' इति 'आनन्दतीर्थभगवद्वचसां विशिष्टव्याख्यानकर्मणि सुरा ह्यधिकारिणोऽत्र' इति च ।

यद्यपि श्रीमज्जयतीर्थपूज्यचरणैः तत्त्वप्रकाशिकायां हृद्यया ऽनवद्यया च शैल्या भाष्यव्याख्यानं व्यधायि । तथाऽप्यध्येतॄणां विदुषामपि भगवत्पादाचार्योल्लिखितश्रुतिस्मृतीनां प्रतिपदार्थविज्ञानं क्लेशावहं भवति । जगन्नाथतीर्थप्रणीतेयं भाष्यदीपिका अन्वर्थनामिका भाष्योदाहृतश्रुतिस्मृतिव्याख्यानपरा तत्रतत्र व्याख्यानान्तर-विमर्शनदक्षा च राजतेतमाम् । यद्यप्ययं ग्रन्थः पञ्चाशद्वर्षेभ्यः प्राग् व्यासराजमठाधीशैः विद्यापयोनिधितीर्थस्वामिभिः मुद्रापित आसीत् । अध्येतॄणामिदानीं मुद्रितग्रन्थानामनुपलब्धत्वात् पुनर्मुद्रणार्थमादेशः प्रादायि । पूर्णप्रज्ञसंशोधनमन्दिरोपनिदेशकः, अस्मत्प्रियच्छात्रः शङ्करनारायण अडिगः इत्युपाह्वय प्रथमाध्यायस्य नैकमातृकास्थपाठान्तरोल्लेखनपुरस्सरं महता यत्नेन शुद्धपाठं निर्धार्य ग्रन्थमेतं समर्पितवान् । अस्येमां शास्त्रसेवां वयं सानन्दमभिनन्दामः ॥

इत्यनेकनारायणस्मरणानि

दि.१-२-२००८ **श्रीश्रीविश्वेशतीर्थश्रीपादाः**

पूर्णप्रज्ञविद्यापीठम् , बेङ्गळूरु श्रीपेजावराधोक्षजमठः,उडुपि

Director's Note

In the lineage of Sri Vyasaraja Matha,many stalwarts have made luxurious contributions to the Madhva School of thought. Among them Sri Jagannatha Yati stands out as a champion. He is more known by his work and rightly called Bhashya Deepikacharya than by his Ashrama name as Sri Jagannatha Yati.

This Speaks of the uniqueness of the work he has given to the scholarly world. In Tatwa Prakashika teeka on Brahma Sutra Bhashya, all the valid references quoted by Sri Madhvacharya have not been explained. There was an absolute need for clarifications and explanations even for scholars who had made in depth, study of Vedas and Upanishads. Sri Jagannatha Yati thus has helped the genuine seekers by giving lucid and straight forward notes on such references and his own point of view, strengthening by understanding Tatwa Prakashika, While appreciating and admiring the earlier works of his seniors. He thus brings and the perfect unity and of thought and logic in the works of Sri Madhvacharya where, in some places, the chances of misreading and disjoints are there if not read between lines. He shows how superficial readings contd., me misleading. He stresses that not only a through study with devotion to the supreme could lead to the correct understanding of the interpretation of Sri Madhvacharya, paying glorious tributes to him.

Like Brahmasutra Bhashya, this great work, on the same line is unique in style and presentation of the valuable content. The very little is quite apt and befitting, giving many dimensions to the subject.

This great work was published some 80-Years ago, for the first time. During the reign of Sri Vidyapayonidhitirtha of Sri Vyasaraj matha, the second Edition was brought out.

They are out-of-stock now. As many genuine seekers were asking for it, we have undertaken this Publication.

The source of inspiration behind this useful venture is our founder H.H. SriSri Vishveshatirtha Swamiji. We express our gratitude and Pranamas.

We express our gratitude to Prof. V. Kutumba Sastry, Vice-chancellor of Rashtriya Sanskrit Sansthan, New Delhi and Sri C.S. Kaniyal, Finance Officer, Rashtriya Sanskrit Sansthan, New Delhi, for giving all-round support in academic activities.

Going through the manuscriple given by the well-known scholar of Dharwad Sri Govinda Rao Navalgundkar and the manuscripts of Research Institute, Vidwan Shankara narayana Adiga has taken a lot of effort to specify the textual differences. He has been able to fix the correct texts at places which highlights and supports the utility.

I heartily congratulate Vidwan Shankaranarayana Adiga for this useful work.

I thank the Rashtrotthana Mudrana, for their co-operation and for the neat get up.

Sujanavidheya

Dr. A.V. Nagasampige

Director

Poornaprajna Samshodhana Mandhiram

ಉಪೋದ್ಘಾತ

ವೇದಪ್ರವೃತ್ತಿ :–

ಭಗವಂತ ಸ್ವತಃ ಸಚ್ಚಿದಾನಂದರೂಪ. ಅವನ ಪ್ರತಿಬಿಂಬನಾದ ಜೀವನು ಸಚ್ಚಿದಾನಂದ ರೂಪನೇ. ಇಂತಹ ಜೀವನಿಗೆ ತನ್ನದೆ ಆದ ಆನಂದಾದಿಗಳ ಅನುಭವಕ್ಕೆ ಸಂಸಾರದ ಬಂಧ ಅಡ್ಡಿಯಾಗಿದೆ. ಅನಾದಿಕಾಲದಿಂದಲೂ ಜೀವನೊಂದಿಗೆ ಸೇರಿಕೊಂಡ ಭಾವರೂಪ ಅಜ್ಞಾನ, ಕಾಮ, ಪ್ರಾರಬ್ಧಕರ್ಮ, ಲಿಂಗದೇಹ, ಸ್ವಗುಣಾಚ್ಛಾದಿಕಾ, ಪರಮಾಚ್ಛಾದಿಕಾ, ಈಶ್ವರೇಚ್ಛಾಗಳೆಂಬ ಜೀವಸ್ವರೂಪಕ್ಕೆ ಇರುವ ಏಳು ಆವರಣಗಳಿಂದಾಗಿ ಜೀವನಿಗೆ ಈ ಸಾಂಸಾರಿಕ ಬಂಧ ಪ್ರಾಪ್ತವಾಗಿದೆ. ಈ ಬಂಧವನ್ನು ಪರಿಹರಿಸಲು ಸಕಲ ಸದಾಗಮಗಳು ಪ್ರವೃತ್ತವಾಗಿವೆ. ಸದಾಗಮಗಳಾದರೂ ಸಮಸ್ತ ಜೀವಜಡಾತ್ಮಕವಾದ ಪ್ರಪಂಚದಿಂದ ವಿಷ್ಣುವು ಪಾರಮಾರ್ಥಿಕವಾಗಿ ಅತ್ಯಂತಭಿನ್ನ, ಹಾಗು ಅನಂತಕಲ್ಯಾಣಗುಣಪರಿಪೂರ್ಣ ಮತ್ತು ಸಕಲದೋಷರಹಿತ-ನಾಗಿದ್ದಾನೆಂದು ಪ್ರತಿಪಾದಿಸುವ ಮೂಲಕ ಜೀವರಿಗೆ ಒದಗಿಬಂದ ದುಃಖವನ್ನು ನಿವೃತ್ತಿಗೊಳಿಸುತ್ತವೆ.

ಇದನ್ನೇ ಶ್ರುತಿ ಹೇಳುತ್ತಿದೆ –

'ಅದುಃಖಮಿತರತ್ ಸರ್ವಂ ಜೀವಾ ಏವ ತು ದುಃಖಿನಃ ।
ತೇಷಾಂ ದುಃಖ ಪ್ರಹಾಣಾಯ ಶ್ರುತಿರೇಷಾ ಪ್ರವರ್ತತೇ ॥'

(ಭಾಷ್ಯದೀಪಿಕೋದಾಹೃತಶ್ರುತಿಃ – 1-1-1)

ಜಡಗಳಿಗೆ ದುಃಖವಿಲ್ಲ. ಜೀವರೆ ದುಃಖಿಗಳು . ಇವರ ದುಃಖನಿವಾರಣೆಗಾಗಿ ಶ್ರುತಿಗಳು ದುಃಖನಿವೃತ್ತಿ ಸಾಧನನೆನಿಸಿದ ಭಗವಂತನನ್ನು ಪ್ರತಿಪಾದಿಸುತ್ತವೆ. ವೇದಗಳಿಂದ ಭಗವಂತನ ಸರಿಯಾದ ಜ್ಞಾನವನ್ನು ಜೀವರು ಪಡೆದಾಗ ಭಗವಂತ ಪ್ರಸನ್ನನಾಗಿ ಜೀವರ ಬಂಧವಿಮೋಚನೆ ಮಾಡುತ್ತಾನೆ. ಇದು ವೇದಗಳಿಂದ ಆಗುವ ಮುಖ್ಯ ಉದ್ದೇಶಸಿದ್ಧಿ.

ಅಪೌರುಷೇಯ ವೇದಗಳಿಂದಲೆ ಧರ್ಮಾದಿಗಳ ಸಿದ್ಧಿ :–

ಇಂದ್ರಿಯಕ್ಕೆ ಅಗೋಚರಗಳಾದ ಧರ್ಮ–ಅಧರ್ಮ, ಸ್ವರ್ಗ–ನರಕ, ಮುಂತಾದ ಅತೀಂದ್ರಿಯ ವಸ್ತುಗಳ ಸಿದ್ಧಿ ವೇದಗಳಿಂದಲೇ ಆಗುವುದು. ಅದಕ್ಕಾಗಿ ಅಪೌರುಷೇಯ ಆಗಮಗಳನ್ನು ಪ್ರತಿಯೊಬ್ಬ ದಾರ್ಶನಿಕನು ಒಪ್ಪಬೇಕು.

ಇದನ್ನೇ ಆಚಾರ್ಯರು ಅನುವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಹೇಳಿದ್ದಾರೆ –

'ನ ಹಿ ಧರ್ಮಾದಿಸಿದ್ಧಿಃ ಸ್ಯಾನ್ನಿತ್ಯವಾಕ್ಯಂ ವಿನಾ ಕ್ವಚಿತ್'

(ಅನುವ್ಯಾಖ್ಯಾನ : 1–1–1 ಶ್ಲೋಕ – 68)

ಧರ್ಮಾದಿಗಳನ್ನು ಪೌರುಷೇಯ ಆಗಮಗಳಿಂದ ಸಾಧಿಸಲು ಸಾಧ್ಯವಿಲ್ಲ. **'ಪುಂವಾಕ್ಯಂ ಜ್ಞಾಪಕಂ ನ ತತ್ '** *(ಅನು :1–1–1,ಶ್ಲೋಕ – 69)*.

ಪ್ರತಿಯೊಂದು ದರ್ಶನದವರು ತಮ್ಮ ದರ್ಶನಪ್ರವರ್ತಕ ಮತಾಚಾರ್ಯನೇ ಸರ್ವಜ್ಞನೆಂದು ಅವನು ರಚಿಸಿದ ಆಗಮವೇ ಪ್ರಮಾಣವೆಂದು ಹೇಳುತ್ತಾರೆ. ಆದರೆ ಅವುಗಳು ಪರಸ್ಪರ ವಿರುದ್ಧಗಳಾಗಿವೆ. ಅವುಗಳಲ್ಲಿ ಪುರುಷದೋಷ ಪ್ರಯುಕ್ತಗಳಾದ ಅಬೋಧಕತ್ವ, ವಿಪರೀತಬೋಧಕತ್ವ ಮುಂತಾದ ದೋಷಗಳು ಬರಲು ಸಾಧ್ಯ. ಪುರುಷವಾಕ್ಯಗಳು ಪರಸ್ಪರ ವಿರುದ್ಧವಾದವುಗಳಾಗಿವೆ. ಅವುಗಳಿಂದ ಯಾವುದೇ ವಿಷಯ ಸಿದ್ಧಿಯಾಗಲಾರದು. ಅದಕ್ಕಾಗಿ ಅಪೌರುಷೇಯವಾದ ವೇದಗಳನ್ನು ಒಪ್ಪುವುದು ಆವಶ್ಯಕ. ವೇದಗಳು ಅಪೌರುಷೇಯ ಎಂಬ ವಿಷಯದಲ್ಲಿ **'ವೇದಾಂತಕೃದ್ ವೇದವಿದೇವ ಚಾಹಂ'** (ಭ.ಗೀ.15–15) ಎಂಬ ಗೀತಾವಾಕ್ಯವೇ ಪ್ರಮಾಣ. ಇಲ್ಲಿ 'ನಾನು ವ್ಯಾಸರೂಪದಿಂದ ಬ್ರಹ್ಮಸೂತ್ರಗಳನ್ನು ರಚನೆ ಮಾಡಿದವನು' ಎಂದು ಹೇಳಿದ ಶ್ರೀಕೃಷ್ಣ ತಾನು ವೇದವನ್ನು ಬಲ್ಲವನಾಗಿದ್ದೇನೆಯೇ ಹೊರತು ಅದನ್ನು ರಚಿಸಿದವನಲ್ಲ ಎಂದು ನುಡಿದಿದ್ದಾನೆ. ಆದ್ದರಿಂದ ವೇದಗಳನ್ನು ರಚಿಸಿದ ವ್ಯಕ್ತಿಯ ಪ್ರಸಿದ್ಧಿ ಇಲ್ಲದಿರುವುದರಿಂದ ಅವು ಅಪೌರುಷೇಯಗಳೆಂದೇ ದರ್ಶನತ್ರಯಾಚಾರ್ಯರು ನಂಬಿಕೊಂಡು ಬಂದಿದ್ದಾರೆ.

ವಿಷ್ಣುವೇ ಸಕಲವೇದದಿಂದ ಮುಖ್ಯಪ್ರತಿಪಾದ್ಯ :–

ಸಕಲ ವೇದಗಳು ಪರಮಮುಖ್ಯವೃತ್ತಿಯಿಂದ ವಿಷ್ಣುವನ್ನೇ ಪ್ರತಿಪಾದಿಸುತ್ತವೆ. ವೇದಗಳಲ್ಲಿ ಹೇಳಿರುವ ಅಗ್ನಿ ಮುಂತಾದ ಸಕಲ ನಾಮಗಳು ವಿಷ್ಣುವನ್ನೇ ವಾಚ್ಯನನ್ನಾಗಿ ಪ್ರತಿಪಾದಿಸುವ ಮೂಲಕ ಅವನನ್ನೇ ಪ್ರವೇಶಿಸುತ್ತಿವೆ ಎಂದು ಭಾಲ್ಲವೇಯ ಶ್ರುತಿ ಹೇಳುತ್ತಿದೆ –

ಉಪೋದ್ಘಾತ

ವೇದಪ್ರವೃತ್ತಿ :–

ಭಗವಂತ ಸ್ವತಃ ಸಚ್ಚಿದಾನಂದರೂಪ. ಅವನ ಪ್ರತಿಬಿಂಬನಾದ ಜೀವನು ಸಚ್ಚಿದಾನಂದ ರೂಪನೇ. ಇಂತಹ ಜೀವನಿಗೆ ತನ್ನದೆ ಆದ ಆನಂದಾದಿಗಳ ಅನುಭವಕ್ಕೆ ಸಂಸಾರದ ಬಂಧ ಅಡ್ಡಿಯಾಗಿದೆ. ಅನಾದಿಕಾಲದಿಂದಲೂ ಜೀವನೊಂದಿಗೆ ಸೇರಿಕೊಂಡ ಭಾವರೂಪ ಅಜ್ಞಾನ, ಕಾಮ, ಪ್ರಾರಬ್ಧಕರ್ಮ, ಲಿಂಗದೇಹ, ಸ್ವಗುಣಾಚ್ಛಾದಿಕಾ, ಪರಮಾಚ್ಛಾದಿಕಾ, ಈಶ್ವರೇಚ್ಛಾಗಳೆಂಬ ಜೀವಸ್ವರೂಪಕ್ಕೆ ಇರುವ ಏಳು ಆವರಣಗಳಿಂದಾಗಿ ಜೀವನಿಗೆ ಈ ಸಾಂಸಾರಿಕ ಬಂಧ ಪ್ರಾಪ್ತವಾಗಿದೆ. ಈ ಬಂಧವನ್ನು ಪರಿಹರಿಸಲು ಸಕಲ ಸದಾಗಮಗಳು ಪ್ರವೃತ್ತವಾಗಿವೆ. ಸದಾಗಮಗಳಾದರೂ ಸಮಸ್ತ ಜೀವಜಡಾತ್ಮಕವಾದ ಪ್ರಪಂಚದಿಂದ ವಿಷ್ಣುವು ಪಾರಮಾರ್ಥಿಕವಾಗಿ ಅತ್ಯಂತಭಿನ್ನ, ಹಾಗು ಅನಂತಕಲ್ಯಾಣಗುಣಪರಿಪೂರ್ಣ ಮತ್ತು ಸಕಲದೋಷರಹಿತ-ನಾಗಿದ್ದಾನೆಂದು ಪ್ರತಿಪಾದಿಸುವ ಮೂಲಕ ಜೀವರಿಗೆ ಒದಗಿಬಂದ ದುಃಖವನ್ನು ನಿವೃತ್ತಿಗೊಳಿಸುತ್ತವೆ.

ಇದನ್ನೇ ಶ್ರುತಿ ಹೇಳುತ್ತಿದೆ –

'ಅದುಃಖಮಿತರತ್ ಸರ್ವಂ ಜೀವಾ ಏವ ತು ದುಃಖಿನಃ ।
ತೇಷಾಂ ದುಃಖ ಪ್ರಹಾಣಾಯ ಶ್ರುತಿರೇಷಾ ಪ್ರವರ್ತತೇ ॥'

(ಭಾಷ್ಯ ದೀಪಿಕೋದಾಹೃತಶ್ರುತಿಃ – 1-1-1)

ಜಡಗಳಿಗೆ ದುಃಖವಿಲ್ಲ. ಜೀವರೆ ದುಃಖಿಗಳು . ಇವರ ದುಃಖನಿವಾರಣೆಗಾಗಿ ಶ್ರುತಿಗಳು ದುಃಖನಿವೃತ್ತಿ ಸಾಧನನೆನಿಸಿದ ಭಗವಂತನನ್ನು ಪ್ರತಿಪಾದಿಸುತ್ತವೆ. ವೇದಗಳಿಂದ ಭಗವಂತನ ಸರಿಯಾದ ಜ್ಞಾನವನ್ನು ಜೀವರು ಪಡೆದಾಗ ಭಗವಂತ ಪ್ರಸನ್ನನಾಗಿ ಜೀವರ ಬಂಧವಿಮೋಚನೆ ಮಾಡುತ್ತಾನೆ. ಇದು ವೇದಗಳಿಂದ ಆಗುವ ಮುಖ್ಯ ಉದ್ದೇಶಸಿದ್ಧಿ.

ಅಪೌರುಷೇಯ ವೇದಗಳಿಂದಲೆ ಧರ್ಮಾದಿಗಳ ಸಿದ್ಧಿ :–

ಇಂದ್ರಿಯಕ್ಕೆ ಅಗೋಚರಗಳಾದ ಧರ್ಮ–ಅಧರ್ಮ, ಸ್ವರ್ಗ–ನರಕ, ಮುಂತಾದ ಅತೀಂದ್ರಿಯ ವಸ್ತುಗಳ ಸಿದ್ಧಿ ವೇದಗಳಿಂದಲೇ ಆಗುವುದು. ಅದಕ್ಕಾಗಿ ಅಪೌರುಷೇಯ ಆಗಮಗಳನ್ನು ಪ್ರತಿಯೊಬ್ಬ ದಾರ್ಶನಿಕನು ಒಪ್ಪಬೇಕು.

ಇದನ್ನೇ ಆಚಾರ್ಯರು ಅನುವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಹೇಳಿದ್ದಾರೆ –

'ನ ಹಿ ಧರ್ಮಾದಿಸಿದ್ಧಿಃ ಸ್ಯಾನ್ನಿತ್ಯವಾಕ್ಯಂ ವಿನಾ ಕ್ವಚಿತ್'

(ಅನುವ್ಯಾಖ್ಯಾನ : 1–1–1 ಶ್ಲೋಕ – 68)

ಧರ್ಮಾದಿಗಳನ್ನು ಪೌರುಷೇಯ ಆಗಮಗಳಿಂದ ಸಾಧಿಸಲು ಸಾಧ್ಯವಿಲ್ಲ. **'ಪುಂವಾಕ್ಯಂ ಜ್ಞಾಪಕಂ ನ ತತ್ '** *(ಅನು :1–1–1, ಶ್ಲೋಕ – 69).*

ಪ್ರತಿಯೊಂದು ದರ್ಶನದವರು ತಮ್ಮ ದರ್ಶನಪ್ರವರ್ತಕ ಮತಾಚಾರ್ಯನೇ ಸರ್ವಜ್ಞನೆಂದು ಅವನು ರಚಿಸಿದ ಆಗಮವೇ ಪ್ರಮಾಣವೆಂದು ಹೇಳುತ್ತಾರೆ. ಆದರೆ ಅವುಗಳು ಪರಸ್ಪರ ವಿರುದ್ಧಗಳಾಗಿವೆ. ಅವುಗಳಲ್ಲಿ ಪುರುಷದೋಷ ಪ್ರಯುಕ್ತಗಳಾದ ಅಬೋಧಕತ್ವ, ವಿಪರೀತಬೋಧಕತ್ವ ಮುಂತಾದ ದೋಷಗಳು ಬರಲು ಸಾಧ್ಯ. ಪುರುಷವಾಕ್ಯಗಳು ಪರಸ್ಪರ ವಿರುದ್ಧವಾದವುಗಳಾಗಿವೆ. ಅವುಗಳಿಂದ ಯಾವುದೇ ವಿಷಯ ಸಿದ್ಧಿಯಾಗಲಾರದು. ಅದಕ್ಕಾಗಿ ಅಪೌರುಷೇಯವಾದ ವೇದಗಳನ್ನು ಒಪ್ಪುವುದು ಆವಶ್ಯಕ. ವೇದಗಳು ಅಪೌರುಷೇಯ ಎಂಬ ವಿಷಯದಲ್ಲಿ **'ವೇದಾಂತಕೃದ್ ವೇದವಿದೇವ ಚಾಹಂ'** (ಭ.ಗೀ.15–15) ಎಂಬ ಗೀತಾವಾಕ್ಯವೇ ಪ್ರಮಾಣ. ಇಲ್ಲಿ, 'ನಾನು ವ್ಯಾಸರೂಪದಿಂದ ಬ್ರಹ್ಮಸೂತ್ರಗಳನ್ನು ರಚನೆ ಮಾಡಿದವನು' ಎಂದು ಹೇಳಿದ ಶ್ರೀಕೃಷ್ಣ ತಾನು ವೇದವನ್ನು ಬಲ್ಲವನಾಗಿದ್ದೇನೆಯೇ ಹೊರತು ಅದನ್ನು ರಚಿಸಿದವನಲ್ಲ ಎಂದು ನುಡಿದಿದ್ದಾನೆ. ಆದ್ದರಿಂದ ವೇದಗಳನ್ನು ರಚಿಸಿದ ವ್ಯಕ್ತಿಯ ಪ್ರಸಿದ್ಧಿ ಇಲ್ಲದಿರುವುದರಿಂದ ಅವು ಅಪೌರುಷೇಯಗಳೆಂದೇ ದರ್ಶನತ್ರಯಾಚಾರ್ಯರು ನಂಬಿಕೊಂಡು ಬಂದಿದ್ದಾರೆ.

ವಿಷ್ಣುವೇ ಸಕಲವೇದದಿಂದ ಮುಖ್ಯಪ್ರತಿಪಾದ್ಯ :–

ಸಕಲ ವೇದಗಳು ಪರಮಮುಖ್ಯವೃತ್ತಿಯಿಂದ ವಿಷ್ಣುವನ್ನೇ ಪ್ರತಿಪಾದಿಸುತ್ತವೆ. ವೇದಗಳಲ್ಲಿ ಹೇಳಿರುವ ಅಗ್ನಿ ಮುಂತಾದ ಸಕಲ ನಾಮಗಳು ವಿಷ್ಣುವನ್ನೇ ವಾಚ್ಯನನ್ನಾಗಿ ಪ್ರತಿಪಾದಿಸುವ ಮೂಲಕ ಅವನನ್ನೇ ಪ್ರವೇಶಿಸುತ್ತಿವೆ ಎಂದು ಭಾಲ್ಲವೇಯ ಶ್ರುತಿ ಹೇಳುತ್ತಿದೆ –

'ನಾಮಾನಿ ಸರ್ವಾಣಿ ಯಮಾವಿಶಂತಿ ತಂ ವೈ ವಿಷ್ಣುಂ ಪರಮಮುದಾಹರಂತಿ'

(ಬ್ರ.ಸೂ.ಭಾ. ಉದಾ : ಭಾಲ್ಲವೇಯಶ್ರುತಿ – 1-1-1)

ಶ್ರೀಕೃಷ್ಣನೂ ಗೀತೆಯಲ್ಲಿ ಸಕಲವೇದಗಳ ಅರ್ಥತಾನೇ ಎಂದು ತಿಳಿಸಿದ್ದಾನೆ – **'ವೇದೈಶ್ಚ ಸರ್ವೈರಹಮೇವ ವೇದ್ಯಃ'** (ಭ.ಗೀ.15-15) ಕಾಠಕೋಪನಿಷತ್ತು ಸಕಲ ವೇದಗಳು ಓಂಕಾರವಾಚ್ಯನಾದ ವಿಷ್ಣುವಿನ ಸ್ವರೂಪವನ್ನು ಪ್ರತಿಪಾದಿಸುತ್ತವೆ ಎಂದು ಹೇಳಿದೆ – **'ಸರ್ವೇ ವೇದಾ ಯತ್ಪದಮಾಮನಂತಿ'** (ಕಠ.2.15).

ಪರಮ ಮುಖ್ಯವೃತ್ತಿಯಿಂದ ಇಂದ್ರಾದಿಶಬ್ದಗಳು ಇಂದ್ರಾದಿದೇವತೆಗಳನ್ನು ಹೇಳುವುದೇ ಇಲ್ಲವೆಂದು ಭಾಲ್ಲವೇಯಶ್ರುತಿ ಹೇಳಿದೆ –

'ನಾಮಾನಿ ವಿಶ್ವಾನಭಿ ನ ಸಂತಿ ಲೋಕೇ'

(ಬ್ರ.ಸೂ.ಭಾ. ಉದಾ – ಭಾಲ್ಲವೇಯಶ್ರುತಿಃ 1-1-1)

ಇಂದ್ರಾದಿ ಪದಗಳು ಇಂದ್ರಾದಿದೇವತೆಗಳನ್ನು ಬೋಧಿಸದೇ ವಿಷ್ಣುವನ್ನೇ ಹೇಳುವುದಾದರೆ ಸಮಸ್ತ ಸೂಕ್ತಗಳು ವಿಷ್ಣುಸೂಕ್ತವೆಂದಾಗುತ್ತವೆ . ಹೀಗಾದರೆ ವೇದದಲ್ಲಿ ಇಂದ್ರಸೂಕ್ತ , ಅಗ್ನಿಸೂಕ್ತ , ವಾಯುಸೂಕ್ತ ಮೊದಲಾದ ಸೂಕ್ತಭೇದ ವ್ಯವಸ್ಥೆಯು ಇರದೇ ಹೋಗಬೇಕಾದೀತು ಎಂಬ ಆಕ್ಷೇಪ ಬರಬಹುದು. ಆದರೆ ಇಂದ್ರಾದಿಶಬ್ದಗಳು ಪರಮಮುಖ್ಯವೃತ್ತಿಯಿಂದ ವಿಷ್ಣುವಾಚಕಗಳಾಗಿದ್ದರೂ ಮುಖ್ಯವೃತ್ತಿಯಿಂದ ಇಂದ್ರಾದಿದೇವತೆಗಳನ್ನೂ ಪ್ರತಿಪಾದಿಸುತ್ತವೆ. ಹೀಗಾಗಿ ಇಂದ್ರ ಸೂಕ್ತ – ಅಗ್ನಿಸೂಕ್ತ ಮುಂತಾದ ಸೂಕ್ತವ್ಯವಸ್ಥೆಯು ಸರಿಹೊಂದುತ್ತದೆ . ಇದನ್ನೇ ಪೈಂಗಿಶ್ರುತಿ ಪ್ರಚುರ ಪಡಿಸಿದೆ.

'ಸರ್ವೋತ್ಕರ್ಷೇ ದೇವದೇವಸ್ಯ ವಿಷ್ಣೋ-
ರ್ಮಹಾತಾತ್ಪರ್ಯಂ ನೈವ ಚಾನ್ಯತ್ರ ಸತ್ಯಮ್ ।
ಅವಾಂತರಂ ತತ್ಪರತ್ವಂ ತದನ್ಯತ್
ಸರ್ವಾಗಮಾನಾಂ ಪುರುಷಾರ್ಥಸ್ತತೋಽತಃ ॥'

(ವಿ.ತ. ವಿನಿರ್ಣಯ. ಉದಾಹೃತ . ಪರಿಚ್ಛೇದ - 1)

ಅಥವಾ ಅಗ್ನಿಮುಂತಾದ ದೇವತೆಗಳಲ್ಲಿ ಇರುವ ಅದೇ ಹೆಸರಿನ ಭಗವಂತನ ರೂಪಗಳು ಅಗ್ನಿಸೂಕ್ತ , ಇಂದ್ರಸೂಕ್ತ ಮುಂತಾದ ಸೂಕ್ತಗಳಿಂದ ಪ್ರತಿಪಾದಿತಗಳಾಗಿವೆ. ಹೀಗೆ ಭಗವಂತನದ್ದೇ ಆದ ಅಗ್ನಿ – ಇಂದ್ರಮುಂತಾದ ನಾಮಭೇದದಿಂದ ಅಗ್ನ್ಯಾದಿ ಸೂಕ್ತ ವ್ಯವಸ್ಥೆಯು ವೇದದಲ್ಲಿ ಆಗುತ್ತದೆ .

'ಪೃಥಗ್ ರೂಪಾಣಿ ವಿಷ್ಣೋಸ್ತು ದೇವತಾಂತರಗಾಣಿ ಚ ।
ಅಗ್ನ್ಯಾದಿಸೂಕ್ತವಾಚ್ಯಾನಿ ನಾಮ್ನಾ ಸೂಕ್ತಾಭಿಧಾ ಭವೇತ್ ॥'

(ಋಗ್ಭಾಷ್ಯಂ - ಅಧ್ಯಾಯ -1)

ಆದ್ದರಿಂದ ಸರ್ವೋತ್ತಮನಾದ ವಿಷ್ಣುವೇ ಸಮಸ್ತವೇದಗಳಿಂದ ಪ್ರತಿಪಾದ್ಯನೆಂದು ಸಿದ್ಧವಾಗುವುದು.

ಬ್ರಹ್ಮಸೂತ್ರಗಳ ಮಹತ್ವ :-

ಹೀಗೆ 'ವಿಷ್ಣುವು ಸಕಲವೇದ ಪ್ರತಿಪಾದ್ಯ ' ಎಂದು ಯಥಾರ್ಥನಿಶ್ಚಯ ಉಂಟಾಗುವುದು ಬ್ರಹ್ಮಸೂತ್ರಗಳ ಸಹಾಯದಿಂದಲೇ. ವೇದವಾಕ್ಯಗಳು ಆಪಾತತಃ ಪರಸ್ಪರ ವಿರುದ್ಧವಾದ ಅರ್ಥವನ್ನು ಕೆಲವುಕಡೆ ಪ್ರತಿಪಾದಿಸುತ್ತಿವೆ . ಕೆಲವು ಕಡೆ ಸಂಶಯ , ಇನ್ನು ಕೆಲವು ಕಡೆ ವಿಪರೀತ ಜ್ಞಾನ ಅವುಗಳಿಂದ ಉಂಟಾಗುವುದರಿಂದ ಅದರ ನಿವಾರಣೆಗಾಗಿ ದ್ವಾಪರಯುಗದ ಅಂತ್ಯಭಾಗದಲ್ಲಿ ಅವತರಿಸಿದ ವೇದವ್ಯಾಸರು ಬ್ರಹ್ಮಸೂತ್ರಗಳನ್ನು ರಚಿಸಿದರು.

ಬ್ರಹ್ಮಸೂತ್ರಗಳು ಶ್ರುತ್ಯರ್ಥನಿರ್ಣಯಿಸಲು ಉಪಯುಕ್ತಗಳಾದ ನ್ಯಾಯಗಳ ನಿಬಂಧನ ರೂಪವಾಗಿರುವುದರಿಂದ ಇವುಗಳ ಸಹಾಯದಿಂದ ವೇದಗಳಿಂದ ಯಥಾರ್ಥಜ್ಞಾನ ಉಂಟಾಗುತ್ತದೆ. **ಬ್ರಹ್ಮ** ಅಂದರೆ ವೇದ. **ತಸ್ಯ ಸೂತ್ರಾಣಿ**– ವೇದಾರ್ಥ ನಿರ್ಣಾಯಕ ಸೂತ್ರವಾದ್ದರಿಂದ ಇವು ಬ್ರಹ್ಮಸೂತ್ರಗಳೆನಿಸಿವೆ. ಅಥವಾ ಬ್ರಹ್ಮ ಅಂದರೆ ವೇದಾರ್ಥನಾದ ಪರಬ್ರಹ್ಮ. ಅವನ ಸೂತ್ರಗಳು ಅಂದರೆ ಅವನ ಸ್ವರೂಪ ನಿರ್ಣಯಿಸುವ ಸೂತ್ರಗಳೇ ಬ್ರಹ್ಮಸೂತ್ರಗಳೆನಿಸಿವೆ.

ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರ ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯ :–

ಸೂತ್ರಾರೂಢವಾದ ಸಿದ್ಧಾಂತಕ್ಕೆ ಮನ್ನಣೆ. ಭಾರತೀಯ ದರ್ಶನಪ್ರಪಂಚದಲ್ಲಿ ಪ್ರತಿಯೊಬ್ಬ ಆಚಾರ್ಯರೂ ಭಗವದ್ಗೀತೆ, ಉಪನಿಷತ್, ಬ್ರಹ್ಮಸೂತ್ರ ಈ ಮೂರು ಪದ್ಧತಿಯಲ್ಲಿ ವಿಭಕ್ತಗಳಾದ ಗ್ರಂಥಗಳ ಮೇಲೆ ಭಾಷ್ಯ ಬರೆಯುವ ಮೂಲಕ ತಮ್ಮ ದರ್ಶನವನ್ನು ಪ್ರಚುರ ಪಡಿಸಬೇಕಿತ್ತು . ಹೀಗಾಗಿ ಈ ಮೂರು ಪದ್ಧತಿಗಳನ್ನು ಪ್ರಸ್ಥಾನತ್ರಯವೆಂದು ಕರೆಯುವ ಸಂಪ್ರದಾಯ ಬಂದಿದೆ.

ಸೂತ್ರ ಪ್ರಸ್ಥಾನಕ್ಕೆ ಆಚಾರ್ಯತ್ರಯರು ಭಾಷ್ಯ ಬರೆದಿದ್ದಾರೆ. ಅವುಗಳಲ್ಲಿ ಶಂಕರ – ರಾಮಾನುಜಭಾಷ್ಯಗಳು ಬಹಳ ವಿಸ್ತಾರವಾಗಿವೆ. ಆದರೆ ಆಚಾರ್ಯ ಮಧ್ವರ ಭಾಷ್ಯ ಸೂತ್ರಪ್ರಾಯವಾಗಿದ್ದರಿಂದ ಟೀಕಾ-ಟಿಪ್ಪಣಿಗಳ ಸಹಾಯವಿಲ್ಲದೇ ಪಂಡಿತಪಾಮರಾದಿಗಳಿಂದ ಅರ್ಥ ಮಾಡಿಕೊಳ್ಳಲು ಅಸಾಧ್ಯವಾಗಿದೆ. ಇದನ್ನೇ ನಾರಾಯಣ ಪಂಡಿತಾಚಾರ್ಯರು ಹೇಳಿದ್ದಾರೆ.

'ನಾಮಾನಿ ಸರ್ವಾಣಿ ಯಮಾವಿಶಂತಿ ತಂ ವೈ ವಿಷ್ಣುಂ ಪರಮಮುದಾಹರಂತಿ'

(ಬ್ರ.ಸೂ.ಭಾ. ಉದಾ : ಭಾಲ್ಲವೇಯಶ್ರುತಿ – 1-1-1)

ಶ್ರೀಕೃಷ್ಣನೂ ಗೀತೆಯಲ್ಲಿ ಸಕಲವೇದಗಳ ಅರ್ಥತಾನೇ ಎಂದು ತಿಳಿಸಿದ್ದಾನೆ – **'ವೇದೈಶ್ಚ ಸರ್ವೈರಹಮೇವ ವೇದ್ಯಃ'** (ಭ.ಗೀ.15-15) ಕಾಠಕೋಪನಿಷತ್ತು ಸಕಲ ವೇದಗಳು ಓಂಕಾರವಾಚ್ಯನಾದ ವಿಷ್ಣುವಿನ ಸ್ವರೂಪವನ್ನು ಪ್ರತಿಪಾದಿಸುತ್ತವೆ ಎಂದು ಹೇಳಿದೆ – **'ಸರ್ವೇ ವೇದಾ ಯತ್ಪದಮಾಮನಂತಿ'** (ಕಠ.2.15).

ಪರಮ ಮುಖ್ಯವೃತ್ತಿಯಿಂದ ಇಂದ್ರಾದಿಶಬ್ದಗಳು ಇಂದ್ರಾದಿದೇವತೆಗಳನ್ನು ಹೇಳುವುದೇ ಇಲ್ಲವೆಂದು ಭಾಲ್ಲವೇಯಶ್ರುತಿ ಹೇಳಿದೆ –

'ನಾಮಾನಿ ವಿಶ್ವಾಽಭ ನ ಸಂತಿ ಲೋಕೇ'

(ಬ್ರ.ಸೂ.ಭಾ. ಉದಾ – ಭಾಲ್ಲವೇಯಶ್ರುತಿಃ 1-1-1)

ಇಂದ್ರಾದಿ ಪದಗಳು ಇಂದ್ರಾದಿದೇವತೆಗಳನ್ನು ಬೋಧಿಸದೇ ವಿಷ್ಣುವನ್ನೇ ಹೇಳುವುದಾದರೆ ಸಮಸ್ತ ಸೂಕ್ತಗಳು ವಿಷ್ಣುಸೂಕ್ತವೆಂದಾಗುತ್ತವೆ . ಹೀಗಾದರೆ ವೇದದಲ್ಲಿ ಇಂದ್ರಸೂಕ್ತ , ಅಗ್ನಿಸೂಕ್ತ , ವಾಯುಸೂಕ್ತ ಮೊದಲಾದ ಸೂಕ್ತಭೇದ ವ್ಯವಸ್ಥೆಯು ಇರದೇ ಹೋಗಬೇಕಾದೀತು ಎಂಬ ಆಕ್ಷೇಪ ಬರಬಹುದು. ಆದರೆ ಇಂದ್ರಾದಿಶಬ್ದಗಳು ಪರಮಮುಖ್ಯವೃತ್ತಿಯಿಂದ ವಿಷ್ಣುವಾಚಕಗಳಾಗಿದ್ದರೂ ಮುಖ್ಯವೃತ್ತಿಯಿಂದ ಇಂದ್ರಾದಿದೇವತೆಗಳನ್ನೂ ಪ್ರತಿಪಾದಿಸುತ್ತವೆ. ಹೀಗಾಗಿ ಇಂದ್ರ ಸೂಕ್ತ – ಅಗ್ನಿಸೂಕ್ತ ಮುಂತಾದ ಸೂಕ್ತವ್ಯವಸ್ಥೆಯು ಸರಿಹೊಂದುತ್ತದೆ . ಇದನ್ನೇ ಪೈಂಗಿಶ್ರುತಿ ಪ್ರಚುರ ಪಡಿಸಿದೆ.

'ಸರ್ವೋತ್ಕರ್ಷೇ ದೇವದೇವಸ್ಯ ವಿಷ್ಣೋ-
ರ್ಮಹಾತಾತ್ಪರ್ಯಂ ನೈವ ಚಾನ್ಯತ್ರ ಸತ್ಯಮ್ ।
ಅವಾಂತರಂ ತತ್ಪರತ್ವಂ ತದನ್ಯತ್
ಸರ್ವಾಗಮಾನಾಂ ಪುರುಷಾರ್ಥಸ್ತತೋಽತಃ ॥'

(ವಿ.ತ. ವಿನಿರ್ಣಯ. ಉದಾಹೃತ . ಪರಿಚ್ಛೇದ - 1)

ಅಥವಾ ಅಗ್ನಿ ಮುಂತಾದ ದೇವತೆಗಳಲ್ಲಿ ಇರುವ ಅದೇ ಹೆಸರಿನ ಭಗವಂತನ ರೂಪಗಳು ಅಗ್ನಿಸೂಕ್ತ , ಇಂದ್ರಸೂಕ್ತ ಮುಂತಾದ ಸೂಕ್ತಗಳಿಂದ ಪ್ರತಿಪಾದಿತಗಳಾಗಿವೆ. ಹೀಗೆ ಭಗವಂತನದ್ದೇ ಆದ ಅಗ್ನಿ – ಇಂದ್ರಮುಂತಾದ ನಾಮಭೇದದಿಂದ ಅಗ್ನ್ಯಾದಿ ಸೂಕ್ತ ವ್ಯವಸ್ಥೆಯು ವೇದದಲ್ಲಿ ಆಗುತ್ತದೆ .

'ಪೃಥಗ್ ರೂಪಾಣಿ ವಿಷ್ಣೋಸ್ತು ದೇವತಾಂತರಗಾಣಿ ಚ ।
ಅಗ್ನ್ಯಾದಿಸೂಕ್ತವಾಚ್ಯಾನಿ ನಾಮ್ನಾ ಸೂಕ್ತಾಭಿಧಾ ಭವೇತ್ ॥'

(ಋಗ್ಭಾಷ್ಯಂ - ಅಧ್ಯಾಯ -1)

ಆದ್ದರಿಂದ ಸರ್ವೋತ್ತಮನಾದ ವಿಷ್ಣುವೇ ಸಮಸ್ತವೇದಗಳಿಂದ ಪ್ರತಿಪಾದ್ಯನೆಂದು ಸಿದ್ಧವಾಗುವುದು.

ಬ್ರಹ್ಮಸೂತ್ರಗಳ ಮಹತ್ವ :-

ಹೀಗೆ 'ವಿಷ್ಣುವು ಸಕಲವೇದ ಪ್ರತಿಪಾದ್ಯ ' ಎಂದು ಯಥಾರ್ಥನಿಶ್ಚಯ ಉಂಟಾಗುವುದು ಬ್ರಹ್ಮಸೂತ್ರಗಳ ಸಹಾಯದಿಂದಲೇ. ವೇದವಾಕ್ಯಗಳು ಆಪಾತತಃ ಪರಸ್ಪರ ವಿರುದ್ಧವಾದ ಅರ್ಥವನ್ನು ಕೆಲವುಕಡೆ ಪ್ರತಿಪಾದಿಸುತ್ತಿವೆ . ಕೆಲವು ಕಡೆ ಸಂಶಯ , ಇನ್ನು ಕೆಲವು ಕಡೆ ವಿಪರೀತ ಜ್ಞಾನ ಅವುಗಳಿಂದ ಉಂಟಾಗುವುದರಿಂದ ಅದರ ನಿವಾರಣೆಗಾಗಿ ದ್ವಾಪರಯುಗದ ಅಂತ್ಯಭಾಗದಲ್ಲಿ ಅವತರಿಸಿದ ವೇದವ್ಯಾಸರು ಬ್ರಹ್ಮಸೂತ್ರಗಳನ್ನು ರಚಿಸಿದರು.

ಬ್ರಹ್ಮಸೂತ್ರಗಳು ಶ್ರುತ್ಯರ್ಥನಿರ್ಣಯಿಸಲು ಉಪಯುಕ್ತಗಳಾದ ನ್ಯಾಯಗಳ ನಿಬಂಧನ ರೂಪವಾಗಿರುವುದರಿಂದ ಇವುಗಳ ಸಹಾಯದಿಂದ ವೇದಗಳಿಂದ ಯಥಾರ್ಥಜ್ಞಾನ ಉಂಟಾಗುತ್ತದೆ. **ಬ್ರಹ್ಮ** ಅಂದರೆ ವೇದ. **ತಸ್ಯ ಸೂತ್ರಾಣಿ**– ವೇದಾರ್ಥ ನಿರ್ಣಾಯಕ ಸೂತ್ರವಾದ್ದರಿಂದ ಇವು ಬ್ರಹ್ಮಸೂತ್ರಗಳೆನಿಸಿವೆ. ಅಥವಾ ಬ್ರಹ್ಮ ಅಂದರೆ ವೇದಾರ್ಥನಾದ ಪರಬ್ರಹ್ಮ . ಅವನ ಸೂತ್ರಗಳು ಅಂದರೆ ಅವನ ಸ್ವರೂಪ ನಿರ್ಣಯಿಸುವ ಸೂತ್ರಗಳೇ ಬ್ರಹ್ಮಸೂತ್ರಗಳೆನಿಸಿವೆ.

ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರ ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯ :–

ಸೂತ್ರಾರೂಢವಾದ ಸಿದ್ಧಾಂತಕ್ಕೆ ಮನ್ನಣೆ. ಭಾರತೀಯ ದರ್ಶನಪ್ರಪಂಚದಲ್ಲಿ ಪ್ರತಿಯೊಬ್ಬ ಆಚಾರ್ಯರೂ ಭಗವದ್ಗೀತೆ, ಉಪನಿಷತ್, ಬ್ರಹ್ಮಸೂತ್ರ ಈ ಮೂರು ಪದ್ಧತಿಯಲ್ಲಿ ವಿಭಕ್ತಗಳಾದ ಗ್ರಂಥಗಳ ಮೇಲೆ ಭಾಷ್ಯ ಬರೆಯುವ ಮೂಲಕ ತಮ್ಮ ದರ್ಶನವನ್ನು ಪ್ರಚುರ ಪಡಿಸಬೇಕಿತ್ತು . ಹೀಗಾಗಿ ಈ ಮೂರು ಪದ್ಧತಿಗಳನ್ನು ಪ್ರಸ್ಥಾನತ್ರಯವೆಂದು ಕರೆಯುವ ಸಂಪ್ರದಾಯ ಬಂದಿದೆ.

ಸೂತ್ರ ಪ್ರಸ್ಥಾನಕ್ಕೆ ಆಚಾರ್ಯತ್ರಯರು ಭಾಷ್ಯ ಬರೆದಿದ್ದಾರೆ. ಅವುಗಳಲ್ಲಿ ಶಂಕರ – ರಾಮಾನುಜಭಾಷ್ಯಗಳು ಬಹಳ ವಿಸ್ತಾರವಾಗಿವೆ. ಆದರೆ ಆಚಾರ್ಯ ಮಧ್ವರ ಭಾಷ್ಯ ಸೂತ್ರಪ್ರಾಯವಾಗಿದ್ದರಿಂದ ಟೀಕಾ-ಟಿಪ್ಪಣಿಗಳ ಸಹಾಯವಿಲ್ಲದೇ ಪಂಡಿತಪಾಮರಾದಿಗಳಿಂದ ಅರ್ಥ ಮಾಡಿಕೊಳ್ಳಲು ಅಸಾಧ್ಯವಾಗಿದೆ. ಇದನ್ನೇ ನಾರಾಯಣ ಪಂಡಿತಾಚಾರ್ಯರು ಹೇಳಿದ್ದಾರೆ.

'ನಾಮಾನಿ ಸರ್ವಾಣಿ ಯಮಾವಿಶಂತಿ ತಂ ವೈ ವಿಷ್ಣುಂ ಪರಮಮುದಾಹರಂತಿ'

(ಬ್ರ.ಸೂ.ಭಾ. ಉದಾ : ಭಾಲ್ಲವೇಯಶ್ರುತಿ – 1-1-1)

ಶ್ರೀಕೃಷ್ಣನೂ ಗೀತೆಯಲ್ಲಿ ಸಕಲವೇದಗಳ ಅರ್ಥತಾನೇ ಎಂದು ತಿಳಿಸಿದ್ದಾನೆ – **'ವೇದೈಶ್ಚ ಸರ್ವೈರಹಮೇವ ವೇದ್ಯಃ'** (ಭ.ಗೀ.15-15) ಕಾಠಕೋಪನಿಷತ್ತು ಸಕಲ ವೇದಗಳು ಓಂಕಾರವಾಚ್ಯನಾದ ವಿಷ್ಣುವಿನ ಸ್ವರೂಪವನ್ನು ಪ್ರತಿಪಾದಿಸುತ್ತವೆ ಎಂದು ಹೇಳಿದೆ – **'ಸರ್ವೇ ವೇದಾ ಯತ್ಪದಮಾಮನಂತಿ'** (ಕಠ.2.15).

ಪರಮ ಮುಖ್ಯವೃತ್ತಿಯಿಂದ ಇಂದ್ರಾದಿಶಬ್ದಗಳು ಇಂದ್ರಾದಿದೇವತೆಗಳನ್ನು ಹೇಳುವುದೇ ಇಲ್ಲವೆಂದು ಭಾಲ್ಲವೇಯಶ್ರುತಿ ಹೇಳಿದೆ –

'ನಾಮಾನಿ ವಿಶ್ವಾಽಭಿ ನ ಸಂತಿ ಲೋಕೇ'

(ಬ್ರ.ಸೂ.ಭಾ. ಉದಾ – ಭಾಲ್ಲವೇಯಶ್ರುತಿಃ 1-1-1)

ಇಂದ್ರಾದಿ ಪದಗಳು ಇಂದ್ರಾದಿದೇವತೆಗಳನ್ನು ಬೋಧಿಸದೇ ವಿಷ್ಣುವನ್ನೇ ಹೇಳುವುದಾದರೆ ಸಮಸ್ತ ಸೂಕ್ತಗಳು ವಿಷ್ಣುಸೂಕ್ತವೆಂದಾಗುತ್ತವೆ . ಹೀಗಾದರೆ ವೇದದಲ್ಲಿ ಇಂದ್ರಸೂಕ್ತ , ಅಗ್ನಿಸೂಕ್ತ , ವಾಯುಸೂಕ್ತ ಮೊದಲಾದ ಸೂಕ್ತಭೇದ ವ್ಯವಸ್ಥೆಯು ಇರದೇ ಹೋಗಬೇಕಾದೀತು ಎಂಬ ಆಕ್ಷೇಪ ಬರಬಹುದು. ಆದರೆ ಇಂದ್ರಾದಿಶಬ್ದಗಳು ಪರಮಮುಖ್ಯವೃತ್ತಿಯಿಂದ ವಿಷ್ಣುವಾಚಕಗಳಾಗಿದ್ದರೂ ಮುಖ್ಯವೃತ್ತಿಯಿಂದ ಇಂದ್ರಾದಿದೇವತೆಗಳನ್ನೂ ಪ್ರತಿಪಾದಿಸುತ್ತವೆ. ಹೀಗಾಗಿ ಇಂದ್ರ ಸೂಕ್ತ – ಅಗ್ನಿಸೂಕ್ತ ಮುಂತಾದ ಸೂಕ್ತವ್ಯವಸ್ಥೆಯು ಸರಿಹೊಂದುತ್ತದೆ . ಇದನ್ನೇ ಪೈಂಗಿಶ್ರುತಿ ಪ್ರಚುರ ಪಡಿಸಿದೆ.

'ಸರ್ವೋತ್ಕರ್ಷೇ ದೇವದೇವಸ್ಯ ವಿಷ್ಣೋ-
ರ್ಮಹಾತಾತ್ಪರ್ಯಂ ನೈವ ಚಾನ್ಯತ್ರ ಸತ್ಯಮ್ ।
ಅವಾಂತರಂ ತತ್ಪರತ್ವಂ ತದನ್ಯತ್
ಸರ್ವಾಗಮಾನಾಂ ಪುರುಷಾರ್ಥಸ್ತತೋಽತಃ ॥'

(ವಿ.ತ. ವಿನಿರ್ಣಯ. ಉದಾಹೃತ . ಪರಿಚ್ಛೇದ - 1)

ಅಥವಾ ಅಗ್ನಿ ಮುಂತಾದ ದೇವತೆಗಳಲ್ಲಿ ಇರುವ ಅದೇ ಹೆಸರಿನ ಭಗವಂತನ ರೂಪಗಳು ಅಗ್ನಿಸೂಕ್ತ , ಇಂದ್ರಸೂಕ್ತ ಮುಂತಾದ ಸೂಕ್ತಗಳಿಂದ ಪ್ರತಿಪಾದಿತಗಳಾಗಿವೆ. ಹೀಗೆ ಭಗವಂತನದ್ದೇ ಆದ ಅಗ್ನಿ – ಇಂದ್ರಮುಂತಾದ ನಾಮಭೇದದಿಂದ ಅಗ್ನ್ಯಾದಿ ಸೂಕ್ತ ವ್ಯವಸ್ಥೆಯು ವೇದದಲ್ಲಿ ಆಗುತ್ತದೆ .

'ಪೃಥಗ್ ರೂಪಾಣಿ ವಿಷ್ಣೋಸ್ತು ದೇವತಾಂತರಗಾಣಿ ಚ ।
ಅಗ್ನ್ಯಾದಿಸೂಕ್ತವಾಚ್ಯಾನಿ ನಾಮ್ನಾ ಸೂಕ್ತಾಭಿಧಾ ಭವೇತ್ ॥'

(ಋಗ್ಭಾಷ್ಯಂ - ಅಧ್ಯಾಯ -1)

ಆದ್ದರಿಂದ ಸರ್ವೋತ್ತಮನಾದ ವಿಷ್ಣುವೇ ಸಮಸ್ತವೇದಗಳಿಂದ ಪ್ರತಿಪಾದ್ಯನೆಂದು ಸಿದ್ಧವಾಗುವುದು.

ಬ್ರಹ್ಮಸೂತ್ರಗಳ ಮಹತ್ವ :-

ಹೀಗೆ 'ವಿಷ್ಣುವು ಸಕಲವೇದ ಪ್ರತಿಪಾದ್ಯ ' ಎಂದು ಯಥಾರ್ಥನಿಶ್ಚಯ ಉಂಟಾಗುವುದು ಬ್ರಹ್ಮಸೂತ್ರಗಳ ಸಹಾಯದಿಂದಲೇ. ವೇದವಾಕ್ಯಗಳು ಆಪಾತತಃ ಪರಸ್ಪರ ವಿರುದ್ಧವಾದ ಅರ್ಥವನ್ನು ಕೆಲವುಕಡೆ ಪ್ರತಿಪಾದಿಸುತ್ತಿವೆ . ಕೆಲವು ಕಡೆ ಸಂಶಯ , ಇನ್ನು ಕೆಲವು ಕಡೆ ವಿಪರೀತ ಜ್ಞಾನ ಅವುಗಳಿಂದ ಉಂಟಾಗುವುದರಿಂದ ಅದರ ನಿವಾರಣೆಗಾಗಿ ದ್ವಾಪರಯುಗದ ಅಂತ್ಯಭಾಗದಲ್ಲಿ ಅವತರಿಸಿದ ವೇದವ್ಯಾಸರು ಬ್ರಹ್ಮಸೂತ್ರಗಳನ್ನು ರಚಿಸಿದರು.

ಬ್ರಹ್ಮಸೂತ್ರಗಳು ಶ್ರುತ್ಯರ್ಥನಿರ್ಣಯಿಸಲು ಉಪಯುಕ್ತಗಳಾದ ನ್ಯಾಯಗಳ ನಿಬಂಧನ ರೂಪವಾಗಿರುವುದರಿಂದ ಇವುಗಳ ಸಹಾಯದಿಂದ ವೇದಗಳಿಂದ ಯಥಾರ್ಥಜ್ಞಾನ ಉಂಟಾಗುತ್ತದೆ. **ಬ್ರಹ್ಮ** ಅಂದರೆ ವೇದ. **ತಸ್ಯ ಸೂತ್ರಾಣಿ**– ವೇದಾರ್ಥ ನಿರ್ಣಾಯಕ ಸೂತ್ರವಾದ್ದರಿಂದ ಇವು ಬ್ರಹ್ಮಸೂತ್ರಗಳೆನಿಸಿವೆ. ಅಥವಾ ಬ್ರಹ್ಮ ಅಂದರೆ ವೇದಾರ್ಥನಾದ ಪರಬ್ರಹ್ಮ . ಅವನ ಸೂತ್ರಗಳು ಅಂದರೆ ಅವನ ಸ್ವರೂಪ ನಿರ್ಣಯಿಸುವ ಸೂತ್ರಗಳೇ ಬ್ರಹ್ಮಸೂತ್ರಗಳೆನಿಸಿವೆ.

ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರ ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯ :–

ಸೂತ್ರಾರೂಢವಾದ ಸಿದ್ಧಾಂತಕ್ಕೆ ಮನ್ನಣೆ. ಭಾರತೀಯ ದರ್ಶನಪ್ರಪಂಚದಲ್ಲಿ ಪ್ರತಿಯೊಬ್ಬ ಆಚಾರ್ಯರೂ ಭಗವದ್ಗೀತೆ, ಉಪನಿಷತ್, ಬ್ರಹ್ಮಸೂತ್ರ ಈ ಮೂರು ಪದ್ಧತಿಯಲ್ಲಿ ವಿಭಕ್ತಗಳಾದ ಗ್ರಂಥಗಳ ಮೇಲೆ ಭಾಷ್ಯ ಬರೆಯುವ ಮೂಲಕ ತಮ್ಮ ದರ್ಶನವನ್ನು ಪ್ರಚುರ ಪಡಿಸಬೇಕಿತ್ತು . ಹೀಗಾಗಿ ಈ ಮೂರು ಪದ್ಧತಿಗಳನ್ನು ಪ್ರಸ್ಥಾನತ್ರಯವೆಂದು ಕರೆಯುವ ಸಂಪ್ರದಾಯ ಬಂದಿದೆ.

ಸೂತ್ರ ಪ್ರಸ್ಥಾನಕ್ಕೆ ಆಚಾರ್ಯತ್ರಯರು ಭಾಷ್ಯ ಬರೆದಿದ್ದಾರೆ. ಅವುಗಳಲ್ಲಿ ಶಂಕರ - ರಾಮಾನುಜಭಾಷ್ಯಗಳು ಬಹಳ ವಿಸ್ತಾರವಾಗಿವೆ. ಆದರೆ ಆಚಾರ್ಯ ಮಧ್ವರ ಭಾಷ್ಯ ಸೂತ್ರಪ್ರಾಯವಾಗಿದ್ದರಿಂದ ಟೀಕಾ-ಟಿಪ್ಪಣಿಗಳ ಸಹಾಯವಿಲ್ಲದೇ ಪಂಡಿತಪಾಮರಾದಿಗಳಿಂದ ಅರ್ಥ ಮಾಡಿಕೊಳ್ಳಲು ಅಸಾಧ್ಯವಾಗಿದೆ. ಇದನ್ನೇ ನಾರಾಯಣ ಪಂಡಿತಾಚಾರ್ಯರು ಹೇಳಿದ್ದಾರೆ.

'ಬಾಲ ಸಂಘಮುಪಿ ಬೋಧಯದ್ ಭೃಶಂ
ದುರ್ನಿರೂಪ ವಚನಂ ಚ ಪಂಡಿತೈಃ ।'

(ಶ್ರೀಮಧ್ವವಿಜಯ - 9- 10)

ಆಚಾರ್ಯರ ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯದ ವೈಶಿಷ್ಟ್ಯವೇನೆಂದರೆ ಅವರು ತಾವು ಹೇಳಿದ ಪ್ರತಿಯೊಂದು ವಿಷಯಕ್ಕೂ ಪ್ರಮಾಣಸಂವಾದ ತೋರಿಸುತ್ತಾರೆ. ಉದಾಹರಣೆಗೆ ಭಾಷ್ಯದ ಪ್ರಾರಂಭದಲ್ಲಿಯೇ, ದ್ವಾಪರಯುಗದಲ್ಲಿ ತತ್ವಜ್ಞಾನ ಹ್ರಾಸಹೊಂದಿದಾಗ ವ್ಯಾಸರು ಅವತರಿಸಿ ವೇದ ವಿಭಾಗಮಾಡಿ ವೇದಾರ್ಥನಿರ್ಣಯಕ್ಕಾಗಿ ಬ್ರಹ್ಮಸೂತ್ರಗಳನ್ನು ರಚಿಸಿದರು - ಎಂದು ಹೇಳಿ ಈ ವಿಷಯದಲ್ಲಿ ಸ್ಕಾಂದಪುರಾಣ ಪ್ರಮಾಣದ ಉಲ್ಲೇಖ ಮಾಡಿದ್ದಾರೆ.

ವಾಸ್ತವಿಕವಾಗಿ ತಾವು ಹೇಳಿದ ವಿಷಯದಲ್ಲಿ ಆಚಾರ್ಯರು ತಾವೇ ಪ್ರಮಾಣ. ಅವರು ಸರ್ವಜ್ಞರಾಗಿದ್ದಾರೆ ಹಾಗು ಮೋಸಮಾಡುವ ಸ್ವಭಾವ ಅವರಿಗಿಲ್ಲ. ಆದರೂ ಆಚಾರ್ಯರು ಪ್ರಮಾಣಸಂವಾದ ತೋರಿಸುವುದು ಹಿರಿಯರು ಅನುಸರಿಸುವ ಮಾರ್ಗ ಪ್ರದರ್ಶನಕ್ಕಾಗಿ - ಎಂದು ತ್ರಿವಿಕ್ರಮ ಪಂಡಿತಾಚಾರ್ಯರು ತತ್ವಪ್ರದೀಪದಲ್ಲಿ ಹೇಳಿದ್ದಾರೆ. **'ಯದ್ಯಪಿ ಆಚಾರ್ಯಃ ಸ್ವೋಕ್ತಾರ್ಥೇ ಸ್ವಯಮೇವ ಪ್ರಮಾಣಂ, ಸರ್ವಜ್ಞತ್ವಾದವಿಪ್ರಲಂಭಕತ್ವಾಚ್ಚ । ತಥಾಪಿ ಸ್ಕಾಂದೇ ಚೋಕ್ತಮಿತಿ ಪ್ರೌಢವಾದಂ ಕರೋತಿ'** ಎಂದು . ಇದು ಆಚಾರ್ಯರ ಔದಾರ್ಯವನ್ನು ತೋರಿಸುತ್ತದೆ.

ಅಧ್ಯಾಯ ಪಾದಾರ್ಥ :-

ಬ್ರಹ್ಮಸೂತ್ರಗಳಲ್ಲಿ ಸಮನ್ವಯ, ಅವಿರೋಧ, ಸಾಧನ, ಫಲಗಳೆಂಬ ನಾಲ್ಕು ಅಧ್ಯಾಯಗಳಿದ್ದು ಪ್ರತಿಯೊಂದು ಅಧ್ಯಾಯವು ನಾಲ್ಕು ಪಾದಗಳನ್ನು ಹೊಂದಿದೆ. ಮೊದಲನೆಯ ಸಮನ್ವಯಾಧ್ಯಾಯದ ನಾಲ್ಕು ಪಾದಗಳ ಅರ್ಥವನ್ನು ಆಚಾರ್ಯರು ವಿವರಿಸಿದ ಬಗೆ ಹೀಗಿದೆ.

1. ಅನ್ಯತ್ರ ಪ್ರಸಿದ್ಧ ನಾಮಪಾದ.
2. ಅನ್ಯತ್ರಪ್ರಸಿದ್ಧ ಲಿಂಗಪಾದ,
3. ಉಭಯತ್ರ ಪ್ರಸಿದ್ಧ ನಾಮ-ಲಿಂಗ ಪಾದ.
4. ಅನ್ಯತ್ಕೈವ ಪ್ರಸಿದ್ಧ ಶಬ್ದ ಪಾದ.

ಭಾಷ್ಯದೀಪಿಕಾಕಾರರು – ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳು :-

ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರ ಮೂಲಮಹಾಸಂಸ್ಥಾನ, ಶ್ರೀರಾಜೇಂದ್ರತೀರ್ಥರ (ಕ್ರಿ.ಶ. 1444) ಕಾಲದಲ್ಲಿ ಪೂರ್ವಾದಿಮಠವೆಂದು ವ್ಯಾಸರಾಜರ (ಕ್ರಿ.ಶ. 1539) ಅನಂತರ

ಶ್ರೀವ್ಯಾಸರಾಜಮಠವೆಂದು ಕರೆಯಲ್ಪಡುವ ದಿವ್ಯ-ಭವ್ಯ ಪರಂಪರೆಯಲ್ಲಿ ಅನೇಕಾನೇಕ ತಪಸ್ವಿಗಳು ಯತಿವರೇಣ್ಯರು ಈ ಪೀಠವನ್ನು ಅಲಂಕರಿಸಿ ತಮ್ಮದೇ ಆದ ಕೊಡುಗೆಗಳನ್ನು ದ್ವೈತಸಿದ್ಧಾಂತಕ್ಕೆ ನೀಡಿರುವರು.

ಅವರಲ್ಲಿ ವ್ಯಾಸರಾಯರ ಅನಂತರ 10ನೇ ಯತಿವರರಾಗಿ ಪೀಠವನ್ನು ಅಲಂಕರಿಸಿದವರು ಶೇಷಚಂದ್ರಿಕಾಚಾರ್ಯರೆಂದು ಪ್ರಸಿದ್ಧರಾದ ಶ್ರೀರಘುನಾಥತೀರ್ಥರು (ಕ್ರಿ.ಶ. 1700-1755). ಅವರ ಶಿಷ್ಯರೇ ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳು. ಇವರು ತಮ್ಮ ಗುರುಗಳಾದ ಶ್ರೀರಘುನಾಥತೀರ್ಥರಿಂದ ಉತ್ತರಾಧಿಕಾರಿಯಾಗಿ ಸನ್ನ್ಯಾಸ ಸ್ವೀಕಾರ ಮಾಡಿ ಬಹುಕಾಲದ ಅನಂತರ ಪೀಠಾಧಿಪತಿಗಳಾಗಿ (ಕ್ರಿ.ಶ. 1755-1770) ಮಧ್ವಮತ ಪ್ರಚಾರ ಮಾಡಿದರು. ಸಂಪ್ರದಾಯದಲ್ಲಿ ಬಂದ ನಂಬಿಕೆಯಂತೆ ಇವರು ಸರಿಸುಮಾರು 70ವರ್ಷಕ್ಕೂ ಹೆಚ್ಚುಕಾಲ ಬಾಳಿದವರು. ಇವರ ವೃಂದಾವನ ಕುಂಭಕೋಣಕ್ಷೇತ್ರದಲ್ಲಿದೆ.

ಗ್ರಂಥಗಳು :-

ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳು ಮೂರು ಗ್ರಂಥಗಳನ್ನು ರಚಿಸಿದ್ದಾರೆ. ಮೂರನೆಯದಾದ ಋಗ್ಭಾಷ್ಯ ಟೀಕಾಟಿಪ್ಪಣಿ ಇನ್ನೂ ಉಪಲಬ್ಧವಾಗಿಲ್ಲ . ಉಳಿದೆರಡು ಕೃತಿಗಳು ಮುದ್ರಿತವಾಗಿವೆ. ಮೊದಲನೆಯದು ಸೂತ್ರದೀಪಿಕಾ. ಇದು ಚಿಕ್ಕ ಕೃತಿ. ಬ್ರಹ್ಮಸೂತ್ರಗಳಿಗೆ ಬರೆದ ನೇರ ವ್ಯಾಖ್ಯಾನ. ಇಲ್ಲಿ ಮಧ್ವಮತಕ್ಕೆ ಅನುಸಾರವಾಗಿ ಸೂತ್ರಾರ್ಥವನ್ನು ನಿರೂಪಿಸಲಾಗಿದೆ.

ಎರಡನೆಯದು ಪ್ರಕೃತ ಗ್ರಂಥವಾದ ಭಾಷ್ಯದೀಪಿಕಾ. ಇದು ಅರ್ಥದಲ್ಲಿಯೂ ಆಕಾರದಲ್ಲಿಯೂ ಬೃಹತ್ತಾದ ಮೇರುಕೃತಿ. ಮಧ್ವಭಾಷ್ಯದ ಮೇಲೆ ಅವರು ಬರೆದ ವಿಸ್ತಾರವಾದ ವ್ಯಾಖ್ಯಾನ.

ಭಾಷ್ಯದೀಪಿಕಾದ ವೈಶಿಷ್ಟ್ಯ :-

1. ಭಾಷ್ಯದ ಪ್ರತಿಯೊಂದು ಪದಗಳ ಹಾಗೂ ವಾಕ್ಯಗಳ ಅರ್ಥವನ್ನು, ಅಭಿಪ್ರಾಯವನ್ನು ಆವಿಷ್ಕರಿಸುವುದು.

2. ತಮಗಿಂತ ಹಿಂದಿನವರು ಸೂತ್ರಗಳಿಗೆ ಮತ್ತು ಭಾಷ್ಯಕ್ಕೆ ಬರೆದಿರುವ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಬರುವ ವಾಕ್ಯಗಳನ್ನು ಉದ್ಧಾರ ಮಾಡಿ ವಿಮರ್ಶಿಸುವುದು, ಶ್ರೀವಾದಿರಾಜರು, ಶ್ರೀರಘೂತ್ತಮರು, ಶ್ರೀರಾಘವೇಂದ್ರತೀರ್ಥರು ಮುಂತಾದ ಪ್ರಸಿದ್ಧ ವ್ಯಕ್ತಿಗಳ ಗ್ರಂಥಗಳ ಉಲ್ಲೇಖ.

3. ವಿಶೇಷವಾಗಿ ಶ್ರೀತ್ರಿವಿಕ್ರಮಪಂಡಿತಾಚಾರ್ಯರ ತತ್ವಪ್ರದೀಪ, ಶ್ರೀಪದ್ಮನಾಭತೀರ್ಥರ ಸತ್ತರ್ಕದೀಪಾವಲಿಯ ವಾಕ್ಯಗಳ ಉದಾಹರಣೆ.

4. ಭಾಷ್ಯದಲ್ಲಿ ಉದಾಹರಿಸಲಾದ ಎಲ್ಲ ಶ್ರುತಿವಾಕ್ಯಗಳ ಸಮಗ್ರ ಅರ್ಥ ವಿವರಣೆ.

5. ಶ್ರೀಜಯತೀರ್ಥರ ಹಾಗು ಶ್ರೀತ್ರಿವಿಕ್ರಮಪಂಡಿತಾಚಾರ್ಯರ ವ್ಯಾಖ್ಯಾನಗಳಲ್ಲಿ ಆಪಾತತಃ ತೋರಿಬರುವ ವಿರೋಧದ ಪರಿಹಾರ.

6. ಶ್ರುತ್ಯರ್ಥ ವಿವರಣೆಯಲ್ಲಿ ಆಚಾರ್ಯರು ತಮ್ಮ ಬೇರೆ ಬೇರೆ ಭಾಷ್ಯಾದಿಗ್ರಂಥಗಳಲ್ಲಿ ಹೇಳಿರುವ ಅರ್ಥಗಳ ಒಂದೆಡೆ ಕ್ರೋಡೀಕರಣ.

ಈ ಎಲ್ಲ ದೃಷ್ಟಿಯಿಂದ ಶ್ರೀಜಗನ್ನಾಥತೀರ್ಥರ ಭಾಷ್ಯದೀಪಿಕಾ ಕೃತಿಯನ್ನು ಹೊರತು ಪಡಿಸಿದರೆ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರ ಸೂತ್ರಭಾಷ್ಯದ ಸ್ಪಷ್ಟ ಹಾಗೂ ಪರಿಪೂರ್ಣ ವಿವರಣೆಗಳನ್ನು ಅರಿಯಲು ಉಪಯುಕ್ತವಾದ ಇನ್ನೊಂದು ಗ್ರಂಥ ಜಿಜ್ಞಾಸುಗಳಿಗೆ ಇಂದು ಉಪಲಬ್ಧವಾಗಿಲ್ಲ ಎಂದರೆ ಅತಿಶಯೋಕ್ತಿಯಾಗಲಾರದು.

ಭಾಷ್ಯದೀಪಿಕಾದಲ್ಲಿ ಬರುವ ಕೆಲವೊಂದು ವಿಚಾರಗಳ ವಿವರಣೆ

1. ವೇದ ವಿಭಾಗ :–

ದ್ವಾಪರಯುಗದಲ್ಲಿ ತತ್ತ್ವಜ್ಞಾನ ನಶಿಸಿ ಹೋದಾಗ ವ್ಯಾಸರು ಅವತಾರಮಾಡಿ ಅಪಪಾಠಾದಿಗಳಿಂದ ಕಣ್ಮರೆಯಾದ ಶುದ್ಧವೇದ ಭಾಗವನ್ನು ಉಚ್ಚಾರಣೆಯಿಂದ ಅಭಿವ್ಯಕ್ತಗೊಳಿಸಿ ವೇದವಿಭಾಗ ಮಾಡಿದರು.

ಕೃತಯುಗದಲ್ಲಿ ಋಗ್ವೇದ – ಯಜುರ್ವೇದ – ಮುಂತಾದ ವಿಭಾಗಗಳಿಲ್ಲದೆ ವೇದವು ಅಖಂಡವಾಗಿತ್ತು. ಒಟ್ಟಿಗೆ ಸೇರಿರುವ ಈ ವೇದರಾಶಿಯನ್ನೇ 'ಮೂಲವೇದ' ಎಂದು ಕರೆಯಲಾಗಿದೆ. ಮುಂದೆ ತ್ರೇತಾಯುಗದಲ್ಲಿ ಹಯಗ್ರೀವ ರೂಪಿ ಭಗವಂತನಿಂದ ಇದು 'ಋಕ್, ನಿಗದ, ಸಾಮ' ಎಂದು ಮೂರು ರೀತಿಯಾಗಿ ವಿಭಾಗ ಮಾಡಲ್ಪಟ್ಟಿತು. ಇವುಗಳಿಗೆ ಉಪವೇದವೆಂದು ಹೆಸರು. ವೈವಸ್ವತ ಮನ್ವಂತರದಲ್ಲಿ ಚತುರ್ಮುಖ ಬ್ರಹ್ಮನ ಮಗನಾಗಿ ಜನಿಸಿದ ಅಥರ್ವ ಋಷಿಯು ನಿಗದದಲ್ಲಿಯೇ ಸೇರಿಕೊಂಡ ವೇದಭಾಗವನ್ನು ತನ್ನ ಹೆಸರಿನಿಂದ ಕಂಡುಕೊಂಡ. ಈ ವೇದಭಾಗಕ್ಕೆ ಅಥರ್ವವೇದ ಎಂದು ಹೆಸರು. ದ್ವಾಪರಯುಗದ ಕೊನೆಯಲ್ಲಿ ಅವತರಿಸಿದ ವೇದವ್ಯಾಸರು ಈ ನಾಲ್ಕು ವೇದಭಾಗಗಳಿಂದ ಒಂದೊಂದು ಅಂಶಗಳನ್ನು ಸಂಗ್ರಹಿಸಿ ಋಗ್ವೇದ, ಯಜುರ್ವೇದ, ಸಾಮವೇದ, ಅಥರ್ವವೇದ ಎಂದು ನೂತನವಾಗಿ ನಾಲ್ಕು ಪ್ರಕಾರಗಳಿಂದ ವೇದಗಳನ್ನು ವಿಭಾಗ ಮಾಡಿದರು. ಇದೇ ಅವಾಂತರ ವೇದ ಎನಿಸಿತು. ಈ ವಿಷಯವನ್ನು ಋಗ್ಭಾಷ್ಯದಲ್ಲಿ ಆಚಾರ್ಯರು ತಿಳಿಸಿದ್ದಾರೆ –

'ಋಚಃ ಸ ಋಚ ಉದ್ಧೃತ್ಯ ಋಗ್ವೇದಂ ಕೃತವಾನ್ ಪ್ರಭುಃ ।
ಯಜೂಂಷಿ ನಿಗದಾಚ್ಚೈವ ತಥಾ ಸಾಮಾನಿ ಸಾಮತಃ ॥'

ವೇದವ್ಯಾಸರು ಮತ್ತೆ ಋಗ್ವೇದವನ್ನು 24 ಶಾಖೆಗಳನ್ನಾಗಿ, ಯಜುರ್ವೇದವನ್ನು 101 ಶಾಖೆಗಳನ್ನಾಗಿ, ಸಾಮವೇದವನ್ನು 1000 ಶಾಖೆಗಳನ್ನಾಗಿ ಅಥರ್ವವೇದವನ್ನು 12 ಶಾಖೆಗಳನ್ನಾಗಿ ವಿಭಾಗ ಮಾಡಿದರು.

ಈ ಸಂದರ್ಭದಲ್ಲಿ ಜಗನ್ನಾಥಯತಿಗಳು ಭಾಷ್ಯದೀಪಿಕಾದಲ್ಲಿ ಎರಡು ವಿಚಾರಗಳನ್ನು ಪ್ರಸ್ತುತ ಪಡಿಸಿದ್ದಾರೆ. ಮೊದಲನೆಯದಾಗಿ ಪ್ರಕೃತ ದ್ವಾಪರ ಯುಗದಲ್ಲಿ ಉಪವೇದವಿಭಾಗ, ಅವಾಂತರವೇದವಿಭಾಗ, ಶಾಖೋಪಶಾಖೆಯಾಗಿ ವಿಂಗಡನೆ ಮುಂತಾದವುಗಳನ್ನು ಭಾಷ್ಯದಲ್ಲಿ ವಿವರಿಸಿರುವುದು ಆ ಕಾಲದಲ್ಲಿ ತತ್ವಜ್ಞಾನ ಹ್ರಾಸವಾಗಿದೆ – ಎಂಬ ವಿಷಯವನ್ನು ತಿಳಿಸುವುದಕ್ಕಾಗಿ. ದ್ವಾಪರವೆಂದರೆ **'ದ್ವಾವೇವ ಧರ್ಮಪಾದೌ ಯಸ್ಮಿನ್ '** ಎರಡು ಧರ್ಮಪಾದಗಳು ಮಾತ್ರ ಉಳಿದಿರುವ ಯುಗ . ಆದ್ದರಿಂದ ಕಾಲದ ಪ್ರಭಾವದಿಂದ ತತ್ವಜ್ಞಾನ ನಶಿಸಿದೆ. ಹಾಗು ಜನರಿಗೆ ವೇದದ ಆಯಾಯ ಶಾಖೆಯ ಪರಿಜ್ಞಾನವೂ ಇರಲಿಲ್ಲ. ಇದರಿಂದಾಗಿ ಜನರಲ್ಲಿ ವ್ಯಾಕುಲತೆ ಉಂಟಾಗಿತ್ತು . ಇದನ್ನೇ ಭಾಗವತದಲ್ಲಿ ಹೇಳಲಾಗಿದೆ.

'ಚಕ್ರೇ ವೇದತರೋಃ ಶಾಖಾಃ ದೃಷ್ಟ್ವಾ ಪುಂಸೋऽಲ್ಪಮೇಧಸಃ'

(ಭಾಗವತಂ – 1-3-21.)

ಹೀಗೆ ಆ ಕಾಲದಲ್ಲಿ ಉಂಟಾಗಿದ್ದ ಜನರ ಜ್ಞಾನಹ್ರಾಸವನ್ನು ಪರಿಹರಿಸಲು ವೇದವ್ಯಾಸರು ವೇದವಿಭಾಗ ಮಾಡಿದರು.

ಎರಡನೆಯದಾಗಿ ಆಚಾರ್ಯರು ಆಥರ್ವಣಭಾಷ್ಯದಲ್ಲಿ ಉದಾಹರಿಸಿದ ಸ್ಮೃತಿಯಲ್ಲಿ ವೇದವ್ಯಾಸರು ಮಾಡಿದ ವೇದವಿಭಾಗದ ಪ್ರಕಾರವನ್ನು ವ್ಯತ್ಯಾಸವಾಗಿ ಹೇಳಲಾಗಿದೆ.

'ಏಕೋ ವೇದಃ ಕೃತೇ ಹ್ಯಾಸೀತ್ ತ್ರೇತಾಯಾಂ ಸ ತ್ರಿಧಾऽಭವತ್ ।
ಸ ಏವ ಪಂಚಧಾ ಜಾತೋ ದ್ವಾಪರಂ ಪ್ರಾಪ್ಯ ವೈ ಯುಗಮ್ ।
ಉತ್ಸನ್ನಃ ಸ ಕಲಿಂ ಪ್ರಾಪ್ಯ ವೇದಃ ಪ್ರಾಯೇಣ ಸರ್ವಶಃ ॥'

ಕೃತಯುಗದಲ್ಲಿ ಒಂದೇ ವೇದವಿತ್ತು . ತ್ರೇತಾಯುಗದಲ್ಲಿ ಅದು ಮೂರಾಯಿತು. ದ್ವಾಪರದಲ್ಲಿ ಅದೇ ವೇದ ಐದು ಪ್ರಭೇದಗಳನ್ನು ಪಡೆಯಿತು. ಕಲಿಯುಗದಲ್ಲಿ ವೇದವು ಪೂರ್ಣವಾಗಿ ನಾಶಹೊಂದಿತು ಎಂದು.

ಈ ಸ್ಮೃತಿಯಲ್ಲಿ ವೇದವು ತ್ರೇತಾಯುಗದಲ್ಲಿ ಋಕ್, ನಿಗದ, ಸಾಮ ಎಂಬ ಮೂರು ಪ್ರಕಾರವಾಗಿತ್ತು ಎಂದು ಹೇಳಲಾಗಿದೆ. ಆದರೆ ಆಗಲೇ ಅಥರ್ವ ಋಷಿ ಕಂಡುಹಿಡಿದ ಅಥರ್ವವೇದವೂ ಇದ್ದಿತ್ತು . ಹಾಗೆ ದ್ವಾಪರಯುಗದಲ್ಲಿ ವೇದವು ಐದಾಗಿ ಕವಲೊಡೆಯಿತು, ಹಾಗು ವೇದವು ಪೂರ್ಣವಾಗಿ ಕಣ್ಮರೆಯಾಗಿದ್ದು ಕಲಿಯುಗದಲ್ಲೇ ಎಂದು ಹೇಳಲಾಗಿದೆ. ಆದರೆ ಭಾಷ್ಯದಲ್ಲಿ '**ವೇದಂ ಉತ್ಸನ್ನಂ ವ್ಯಂಜಯನ್ ಚತುರ್ಧಾ ವ್ಯಭಜತ್**' ಎಂದು ತ್ರೇತಾಯುಗದಲ್ಲಿ ಋಕ್, ನಿಗದ, ಸಾಮ, ಅಥರ್ವರೂಪದಿಂದ ಹಯಗ್ರೀವ ರೂಪಿ ಭಗವಂತ ವಿಂಗಡಿಸಿದ ವೇದವು ದ್ವಾಪರಯುಗದಲ್ಲಿ ಪೂರ್ಣವಾಗಿ ನಾಶಹೊಂದಿತ್ತು ; ಅದನ್ನು ವೇದವ್ಯಾಸರು ಉಚ್ಚಾರಣೆಯಿಂದ ಅಭಿವ್ಯಕ್ತಗೊಳಿಸಿ ನಾಲ್ಕು ಪ್ರಕಾರಗಳಿಂದ ವಿಭಾಗ ಮಾಡಿದರು ಎಂದು ಹೇಳಲಾಗಿದೆ.

ಹೀಗೆ ಭಾಷ್ಯಕ್ಕೆ ಆಪಾತವಾಗಿ ಮೇಲ್ನೋಟದಿಂದ ಅಥರ್ವಣಭಾಷ್ಯದಲ್ಲಿ ಉದಾಹರಿಸಿದ ಸ್ಮೃತಿ ವಿರೋಧವನ್ನು ಜಗನ್ನಾಥಯತಿಗಳು ತಮ್ಮ ಭಾಷ್ಯದೀಪಿಕೆಯಲ್ಲಿ ಪರಿಹರಿಸಿದ್ದಾರೆ. ತ್ರೇತಾಯುಗದಲ್ಲಿ ಭಗವತ್ಪೂಜಾಸಾಧನವಾದ ವೇದದ ಮೂರು ಪ್ರಕಾರಗಳನ್ನು ಸ್ಮೃತಿಯಲ್ಲಿ ಉಲ್ಲೇಖ ಮಾಡಿದ್ದರೂ ಅಥರ್ವವೇದ ಎಂಬ ನಾಲ್ಕನೇ ಪ್ರಕಾರವನ್ನು ನಿಷೇಧಿಸದಿರುವುದರಿಂದ ಭಾಷ್ಯಕ್ಕೆ ಸ್ಮೃತಿ ವಿರೋಧವಿಲ್ಲ. ಹಾಗೆಯೇ ದ್ವಾಪರದಲ್ಲಿ ಅಪೌರುಷೇಯರೂಪವಾದ ವೇದವು ನಾಲ್ಕು ವಿಧವಾಗಿದ್ದರೂ , ಪೌರುಷೇಯಗಳೆನಿಸಿದ ಇತಿಹಾಸ ಪುರಾಣಾದಿರೂಪವಾದ ಐದನೆಯ ವೇದದ ಪ್ರಕಾರವನ್ನು ಸ್ಮೃತಿಯು ಉಲ್ಲೇಖಿಸಿರುವುದು ಅಸಂಗತವೇನಲ್ಲ. ಮತ್ತು ವೇದವು ಪೂರ್ಣವಾಗಿ ಕಲಿಯುಗದಲ್ಲಿ ನಶಿಸಿದರೂ ವ್ಯಾಸಾವತಾರಕ್ಕಿಂತ ಮೊದಲು ದ್ವಾಪರಯುಗದಲ್ಲಿ ಅಪಪಾಠಾದಿಗಳ ಮೂಲಕ ಸ್ವಲ್ಪಪ್ರಮಾಣದಿಂದ ಹ್ರಾಸವಾಗುವ ಸಂಭವವೂ ಇರುವುದರಿಂದ ಅಥರ್ವಣಭಾಷ್ಯೋಕ್ತ ಸ್ಮೃತಿಯಿಂದ ಪ್ರಕೃತಭಾಷ್ಯದಲ್ಲಿ ಹೇಳಿರುವ ವಿಷಯಕ್ಕೆ ವಿರೋಧವಿಲ್ಲ.

2. ಬ್ರಹ್ಮವಿದ್ಯೆಯಲ್ಲಿ ಅಧಿಕಾರ ವಿವೇಚನೆ.

'**ಓಂ ಓಂ ಅಥಾತೋ ಬ್ರಹ್ಮಜಿಜ್ಞಾಸಾ ಓಂ**' ಎಂಬ ಮೊದಲನೆ ಸೂತ್ರಕ್ಕೆ **ಅಥ** = ಅಧಿಕಾರಸಂಪಾದನೆ ಅನಂತರ **ಅತಃ** = ಮೋಕ್ಷರೂಪ ಪ್ರಯೋಜನ ಇರುವುದರಿಂದ **ಬ್ರಹ್ಮಜಿಜ್ಞಾಸಾ** = ಗುಣಪೂರ್ಣನಾದ ವಿಷ್ಣುವಿನ ಶ್ರವಣ ಮನನ ನಿದಿಧ್ಯಾಸನ ರೂಪವಾದ ವಿಚಾರವನ್ನು ಮಾಡಬೇಕು ಎಂದು ಅರ್ಥ.

ಇಲ್ಲಿ ಅಥಶಬ್ದಾರ್ಥದಲ್ಲಿ ಸೇರಿರುವ ಅಧಿಕಾರಯಾವುದು ? ಹಾಗು ಎಷ್ಟು ವಿಧ ? ಎಂಬ ಪ್ರಶ್ನೆ ಬಂದರೆ ಆಚಾರ್ಯರು ಭಾಗವತ ತಂತ್ರ ಪ್ರಮಾಣದ ಮೂಲಕ ವೈದಿಕವಿದ್ಯಾಧಿಕಾರದ ವಿವೇಚನೆ ಮಾಡಿದ್ದಾರೆ.

'ಮಂದ ಮಧ್ಯೋತ್ತಮತ್ವೇನ ತ್ರಿವಿಧಾ ಹ್ಯಧಿಕಾರಿಣಃ ।
ತತ್ರ ಮಂದಾ ಮನುಷ್ಯೇಷು ಯ ಉತ್ತಮಗಣಾ ಮತಾಃ ॥

ಮಧ್ಯಮಾ ಋಷಿಗಂಧರ್ವಾ ದೇವಾಸ್ತತ್ರೋತ್ತಮಾ ಮತಾಃ ।
ಇತಿ ಜಾತಿಕೃತೋ ಭೇದಸ್ತಥಾऽನ್ಯೋ ಗುಣಪೂರ್ವಕಃ ॥

ಭಕ್ತಿಮಾನ್ ಪರಮೇ ವಿಷ್ಣೌ ಯಸ್ತ್ವಧ್ಯಯನವಾನ್ ನರಃ ।
ಅಧಮಃ ಶಮಾದಿ ಸಂಯುಕ್ತೋ ಮಧ್ಯಮಃ ಸಮುದಾಹೃತಃ ॥

ಆಬ್ರಹ್ಮಸ್ತಂಬಪರ್ಯಂತಮಸಾರಂ ಚಾಪ್ಯನಿತ್ಯಕಮ್ ।
ವಿಜ್ಞಾಯ ಜಾತವೈರಾಗ್ಯೋ ವಿಷ್ಣುಪಾದೈಕಸಂಶ್ರಯಃ ।
ಸ ಉತ್ತಮೋऽಧಿಕಾರೀ ಸ್ಯಾತ್ ಸನ್ನ್ಯಸ್ತಾಖಿಲ ಕರ್ಮವಾನ್ ॥'

ಮಂದ, ಮಧ್ಯಮ, ಉತ್ತಮ – ಎಂದು ಅಧಿಕಾರಿಗಳು ಮೂರುವಿಧ. ಅವರಲ್ಲಿ ಮನುಷ್ಯೋತ್ತಮರು ಮಂದಾಧಿಕಾರಿಗಳು. ಋಷಿಗಳು, ಗಂಧರ್ವರು, ಪಿತೃಗಳು, ಚಕ್ರವರ್ತಿಗಳು ಮಧ್ಯಮಾಧಿಕಾರಿಗಳು. ದೇವತೆಗಳು ಬ್ರಹ್ಮವಿದ್ಯಾಧ್ಯಯನಕ್ಕೆ ಉತ್ತಮಾಕಾರಿಗಳು. ಇದು ಮನುಷ್ಯೋತ್ತಮತ್ವ, ಋಷಿತ್ವ, ದೇವತ್ವಾದಿಜಾತಿನಿಮಿತ್ತವಾಗಿ ಅಥವಾ ಕುಲಜನ್ಮನಿಮಿತ್ತವಾಗಿ ಮಾಡಿರುವ ವಿಂಗಡನೆ.

ವಿಷ್ಣುಭಕ್ತಿಪೂರ್ವಕವಾಗಿ ಅಧ್ಯಯನ ಮಾಡುವವನು ಬ್ರಹ್ಮವಿದ್ಯೆಗೆ ಅಧಮಾಧಿಕಾರಿ . ಶಮದಮಾದಿಗಳುಳ್ಳವ ಮಧ್ಯಮಾಧಿಕಾರಿ. ಚತುರ್ಮುಖನಿಂದ ಆರಂಭಿಸಿ ತೃಣಜೀವಿಯವರೆಗೆ ಇರುವ ಜೀವಗಣ ಎಲ್ಲವೂ ಅಸರ್ವೋತ್ತಮ ಹಾಗು ಅವರ ಸ್ಥಾನವಾದ ಸತ್ಯಲೋಕಾದಿಗಳು ಮೋಕ್ಷಸ್ಥಾನಕ್ಕಿಂತ ಅವರ ,ಅನಿತ್ಯ ಎಂದು ತಿಳಿಯುವ ಮೂಲಕ ನಿತ್ಯಾನಿತ್ಯ ವಿವೇಕವಿರುವವನು , ವೈರಾಗ್ಯ ಶಾಲಿಯಾಗಿ ವಿಷ್ಣುಪಾದವನ್ನೇ ಯಾರು ಆಶ್ರಯಿಸಿದ್ದಾನೋ ಹಾಗು ಫಲಾಪೇಕ್ಷೆ ಇಲ್ಲದೆ ಕರ್ಮ ಮಾಡಿ ಅವೆಲ್ಲವನ್ನೂ ಭಗವಂತನಲ್ಲಿ ಸಮರ್ಪಿಸಿದ್ದಾನೋ ಅವನು ಉತ್ತಮಾಧಿಕಾರಿ ಎನಿಸಿದ್ದಾನೆ.

ಇಲ್ಲಿ ಮೊದಲು ಹೇಳಿದ ದೇವತ್ವಾದಿ ಜಾತಿಪ್ರಧಾನವಾದ ಅಧಿಕಾರವಿಭಾಗವನ್ನು ಹೇಳಿದ ಮೇಲೆ ಗುಣಪೂರ್ವಕವಾದ ಅಧಿಕಾರಿ ಭೇದವನ್ನು ಹೇಳಿದ್ದು ವ್ಯರ್ಥವಲ್ಲವೇ

ಎಂಬ ಆಕ್ಷೇಪಕ್ಕೆ ಜಗನ್ನಾಥ ಯತಿಗಳು ಭಾಷ್ಯದೀಪಿಕಾದಲ್ಲಿ ಹೀಗೆ ಉತ್ತರ ನೀಡಿದ್ದಾರೆ. ಜಾತಿಪ್ರಧಾನವಾದ ಅಧಿಕಾರ ವಿಭಾಗವನ್ನು ಹೇಳಿದಾಗ '**ಮುಕ್ತಿಯೋಗ್ಯತ್ವ**'ವು ಉತ್ತಮ-ಮಧ್ಯಮ-ಅಧಮಾಧಿಕಾರಿಗಳಲ್ಲಿ ಬರುವ ವೈದಿಕ ಬ್ರಹ್ಮವಿದ್ಯಾಧಿಕಾರದ ಸಾಮಾನ್ಯಲಕ್ಷಣವೆಂದು ಹೇಳಿದಂತೆ ಆಗುತ್ತದೆ.

ಆದರೆ ಈ ಲಕ್ಷಣವು ಸಚ್ಛೂದ್ರಾದಿಗಳಲ್ಲಿ ಬರುವುದರಿಂದ ಅತಿವ್ಯಾಪ್ತಿದೋಷ ಉಳ್ಳದ್ದಾಗಿದೆ. ಹಾಗೆ ಅನಧಿಕಾರಿಗಳಾದ (ಅಸಮರ್ಥ-ಅನರ್ಥಿ) ಪಶು ಪಕ್ಷಿ-ಮುಂತಾದವುಗಳಲ್ಲಿಯೂ ಇದೆ. ಅವರಿಗೆ ಬ್ರಾಹ್ಮಣಾದಿ ದೇಹಾಂತರದಲ್ಲಿ ಬ್ರಹ್ಮವಿದ್ಯಾಧಿಕಾರ ಇದ್ದರೂ ಈ ದೇಹದಲ್ಲಿ ಅಧಿಕಾರ ಇಲ್ಲ. ಹಾಗು ದೇಹಾಂತರದಲ್ಲಿ ಇರುವ ಅಧಿಕಾರ ಈ ದೇಹದಲ್ಲಿ ಈ ಕಾಲದಲ್ಲಿ ವೈದಿಕವಿದ್ಯಾಧ್ಯಯನದ ಪ್ರವೃತ್ತಿಗೆ ಅನುಪಯುಕ್ತವಾಗುತ್ತದೆ. ಅದಕ್ಕಾಗಿ ಗುಣಪೂರ್ವಕವಾದ ಅಧಿಕಾರ ನಿರೂಪಣೆಯನ್ನು ಆಚಾರ್ಯರು ಭಾಗವತ ತಂತ್ರಪ್ರಮಾಣದ ಮೂಲಕ ತಿಳಿಸಿ ಕೊಟ್ಟಿದ್ದಾರೆ.

ಜಾತಿಪ್ರಧಾನವಾದ ಅಧಿಕಾರವಿಭಾಗವನ್ನು ಬಿಟ್ಟು ಗುಣಪ್ರಧಾನವಾದ ಅಧಿಕಾರ ನಿರೂಪಿಸಲು ಮತ್ತೊಂದು ಕಾರಣವೂ ಇದೆ. ಶಿವಾರ್ಕಮಣಿದೀಪಿಕಾಕಾರರು ಹೀಗೊಂದು ಆಕ್ಷೇಪಮಾಡಿದ್ದಾರೆ. '**ಮುಕ್ತಿಯೋಗ್ಯತ್ವ**'ವನ್ನೆ ಅಧಿಕಾರಿ ಲಕ್ಷಣವೆಂದು ಹೇಳಬಹುದು. ಅಪಶೂದ್ರಾಧಿಕರಣ (1-3-9 ಸೂತ್ರ 34) ನ್ಯಾಯದಿಂದ ತ್ರೈವರ್ಣಿಕೇತರರಲ್ಲಿ ವೈದಿಕಬ್ರಹ್ಮವಿದ್ಯಾಧ್ಯಯನದ ಅಧಿಕಾರವನ್ನು ವ್ಯಾವೃತ್ತಿಗೊಳಿಸಿ ತ್ರೈವರ್ಣಿಕರಲ್ಲೇ ಅದನ್ನು ಸೀಮಿತಗೊಳಿಸಬಹುದು ಎಂದು.

ಹಾಗು ಪ್ರಥಮಸೂತ್ರದಲ್ಲಿ ಅಥಶಬ್ದವ್ಯರ್ಥ. ಸೂತ್ರದಲ್ಲಿರುವ 'ಅತಃ' ಶಬ್ದದಿಂದಲೇ ಮುಮುಕ್ಷುರೂಪ ಅಧಿಕಾರಿಯ ಲಾಭವಾಗುವುದು. ಅಪಶೂದ್ರಾಧಿಕರಣನ್ಯಾಯದಿಂದ ತ್ರೈವರ್ಣಿಕೇತರರನ್ನು ವ್ಯಾವೃತ್ತಿಗೊಳಿಸಬಹುದು. ಹೀಗೆ ಬರುವ ಈ ಎರಡು ಆಕ್ಷೇಪದ ನಿವಾರಣೆಗಾಗಿ ಗುಣಪೂರ್ವಕವಾದ ಅಧಿಕಾರಿವಿಭಾಗವನ್ನು ಹೇಳಿರುವುದು.

'ಅವೈಷ್ಣವಸ್ಯ ವೇದೇऽಪಿ ಹ್ಯಧಿಕಾರೋ ನ ವಿದ್ಯತೇ ।
ಗುರುಭಕ್ತಿವಿಹೀನಸ್ಯ ಶಮಾದಿರಹಿತಸ್ಯ ಚ ॥'

ತ್ರೈವರ್ಣಿಕರಲ್ಲೆ ವಿಷ್ಣುಭಕ್ತಿ-ಗುರುಭಕ್ತಿ ಇಲ್ಲದಿರುವ, ಶಮದಮಾದಿ ಗುಣರಹಿತನಾಗಿರುವ ವ್ಯಕ್ತಿಗೆ ವೈದಿಕ ಬ್ರಹ್ಮವಿದ್ಯಾಧಿಕಾರ ಇಲ್ಲ- ಎಂದು ಪ್ರಮಾಣವಚನವಿದೆ. ಒಂದು ಪಕ್ಷ ಗುಣಪ್ರಧಾನವಾದ ಅಧಿಕಾರ ಭೇದವನ್ನು ನಿರೂಪಿಸದೇ, ಅಪಶೂದ್ರಾಧಿಕರಣ ನ್ಯಾಯದ ಸಹಕಾರದಿಂದ ತ್ರೈವರ್ಣಿಕರಲ್ಲಿ ವೈದಿಕಬ್ರಹ್ಮವಿದ್ಯಾಧಿಕಾರವನ್ನು ಸೀಮಿತಗೊಳಿಸಿದರೂ ಅದು ಸಿದ್ಧಾಂತಾನುಗುಣವಾಗುವುದಿಲ್ಲ.

ತ್ರೈವರ್ಣಿಕರಲ್ಲಿ ವಿಷ್ಣುಭಕ್ತಿ-ಗುರುಭಕ್ತಿ ಇಲ್ಲದಿರುವವರು ಬ್ರಹ್ಮವಿದ್ಯೆಗೆ ಅನಧಿಕಾರಿಗಳಾಗಿದ್ದಾರೆ. ಅವರನ್ನು ವ್ಯಾವೃತ್ತಿಗೊಳಿಸುವುದಕ್ಕಾಗಿ ಗುಣಪ್ರಧಾನವಾದ ಅಧಿಕಾರ ನಿರೂಪಣೆಯನ್ನು ಮಾಡಲಾಗಿದೆ – ಎಂದು ಜಗನ್ನಾಥಯತಿಗಳು ಅಭಿಪ್ರಾಯಪಟ್ಟಿದ್ದಾರೆ —

'ಅಧ್ಯಯನಲಬ್ಧಾಽಪಿ ವಿಷ್ಣುಭಕ್ತಿಃ ಶಮಾದಿಕಂ ಚಾಭಕ್ತಾನಧಿಕಾರಿಕೃತಾಧ್ಯಯನ ಶಮಾದಿವ್ಯಾವೃತ್ತ್ಯರ್ಥಂ ಪೃಥಗುಕ್ತಮ್'

ಗುಣಪ್ರಧಾನವಾದ ಅಧಿಕಾರಪ್ರಭೇದವನ್ನು ಹೇಳಿದಾಗ ಅಧಿಕಾರಿ ಸಾಮಾನ್ಯಲಕ್ಷಣವೆನೆಂದು ತಿಳಿಯುವುದಿಲ್ಲ. ಈ ಸಂದರ್ಭದಲ್ಲಿ ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳು ಅಧಿಕಾರಿಸಾಮಾನ್ಯ ಲಕ್ಷಣವನ್ನು ಹೇಳಿ ಅದನ್ನು ಸಮನ್ವಯಗೊಳಿಸಿದ ಬಗೆ ಅನನ್ಯಸಾಧಾರಣವಾದುದು.

ಅ. ಮೇಲೆ ಹೇಳಿದ ಅಧಿಕಾರಿತ್ರಯ ವಿಶೇಷಣಗಳನ್ನೆಲ್ಲ ಒಟ್ಟಿಗೆ ಸೇರಿಸಿದರೆ ಅಧಿಕಾರಿ ಸಾಮಾನ್ಯಲಕ್ಷಣ ಸಿಗುತ್ತದೆ. ಮೂರು ಲಕ್ಷಣಗಳು ಮೂವರಲ್ಲಿ ಸಾಮಾನ್ಯವಾಗಿ ಇರುವುದರಿಂದ ಸಾಮಾನ್ಯಲಕ್ಷಣಕ್ಕೆ ಅಸಂಭವ-ಅವ್ಯಾಪ್ತಿ ದೋಷವಿಲ್ಲ. ಈ ಲಕ್ಷಣವು ಆಯಾಯ ಅಧಿಕಾರಿಗಳಲ್ಲಿ ವಿಶೇಷವಾಗಿ ಇರುವುದರಿಂದ ಅಧಿಕಾರಿಪ್ರಭೇದವನ್ನು ಗುರುತಿಸಬಹುದು. ಇದರ ತಾತ್ಪರ್ಯವನ್ನು ಹೀಗೆ ಅರಿಯಬಹುದು . ವಿಷ್ಣುಭಕ್ತಿಪೂರ್ವಕವಾದ ಶಾಸ್ತ್ರಾಧ್ಯಯನ, ಶಮದಮಾದಿಗುಣಗಳು ಮತ್ತು ವಿಷಯ ವೈರಾಗ್ಯಪೂರ್ವಕವಾದ ವಿಷ್ಣುಪಾದಾಸಕ್ತಿ – ಈ ಮೂರು ಗುಣಗಳು ಮಂದ – ಮಧ್ಯಮ – ಉತ್ತಮ ಎಂಬ ಈ ಮೂವರು ಅಧಿಕಾರಿಗಳಲ್ಲಿ ಸಾಮಾನ್ಯವಾಗಿ ಇರಬೇಕು . ಇವುಗಳಲ್ಲಿ ಹರಿಭಕ್ತಿ ಪುರಸ್ಸರವಾಗಿ ಶಾಸ್ತ್ರಾಧ್ಯಯನ ಪ್ರಧಾನವಾಗಿದ್ದು ಉಳಿದೆರಡು ಅಪ್ರಧಾನವಾಗಿದ್ದರೆ ಅವನು ಅಧಮಾಧಿಕಾರಿ. ಶಮದಮಾದಿಗಳು ಪ್ರಧಾನವಾಗಿದ್ದು, ವಿಷ್ಣುಭಕ್ತಿಪೂರ್ವಕವಾದ ಅಧ್ಯಯನ ಹಾಗು ವಿಷಯವೈರಾಗ್ಯ ಗೌಣವಾಗಿದ್ದರೆ ಅವನು ಮಧ್ಯಮಾಧಿಕಾರಿ. ಇವೆರಡು ಅಪ್ರಧಾನವಾಗಿದ್ದು ವಿಷಯವೈರಾಗ್ಯ ಹರಿಪಾದಾಸಕ್ತಿಗಳು ಪ್ರಧಾನವಾಗಿದ್ದರೆ ಅವನು ಉತ್ತಮಾಧಿಕಾರಿ ಎನಿಸುತ್ತಾನೆ.

ಆ. ಅಥವಾ '**ಪ್ರಚುರತಮಾಧ್ಯಯನಾದಿಗುಣತ್ರಯವತ್ತ್ವಂ**' ಉತ್ತಮಾಧಿಕಾರಿಯ ಲಕ್ಷಣ. '**ಪ್ರಚುರತರಾಧ್ಯಯನಾದಿ ಗುಣತ್ರಯವತ್ತ್ವಂ**'– ಮಧ್ಯಮಾಧಿಕಾರಿಯ ಲಕ್ಷಣ. ' **ಕೇವಲ ಗುಣತ್ರಯವತ್ತ್ವಂ**' ಅಧಮಾಧಿಕಾರಿಯ ಲಕ್ಷಣ. ಮೂರು ಗುಣಗಳು ಸಾಮಾನ್ಯವಾಗಿ ಇರುವವ ಅಧಮಾಧಿಕಾರಿ. ಹೆಚ್ಚಿನ ಮಟ್ಟದಲ್ಲಿರುವವ

ಎಂಬ ಆಕ್ಷೇಪಕ್ಕೆ ಜಗನ್ನಾಥ ಯತಿಗಳು ಭಾಷ್ಯದೀಪಿಕಾದಲ್ಲಿ ಹೀಗೆ ಉತ್ತರ ನೀಡಿದ್ದಾರೆ. ಜಾತಿಪ್ರಧಾನವಾದ ಅಧಿಕಾರ ವಿಭಾಗವನ್ನು ಹೇಳಿದಾಗ '**ಮುಕ್ತಿಯೋಗ್ಯತ್ವ**'ವು ಉತ್ತಮ-ಮಧ್ಯಮ-ಅಧಮಾಧಿಕಾರಿಗಳಲ್ಲಿ ಬರುವ ವೈದಿಕ ಬ್ರಹ್ಮವಿದ್ಯಾಧಿಕಾರದ ಸಾಮಾನ್ಯಲಕ್ಷಣವೆಂದು ಹೇಳಿದಂತೆ ಆಗುತ್ತದೆ.

ಆದರೆ ಈ ಲಕ್ಷಣವು ಸಚ್ಛೂದ್ರಾದಿಗಳಲ್ಲಿ ಬರುವುದರಿಂದ ಅತಿವ್ಯಾಪ್ತಿದೋಷ ಉಳ್ಳದ್ದಾಗಿದೆ. ಹಾಗೆ ಅನಧಿಕಾರಿಗಳಾದ (ಅಸಮರ್ಥ-ಅನರ್ಥಿ) ಪಶು ಪಕ್ಷಿ-ಮುಂತಾದವುಗಳಲ್ಲಿಯೂ ಇದೆ. ಅವರಿಗೆ ಬ್ರಾಹ್ಮಣಾದಿ ದೇಹಾಂತರದಲ್ಲಿ ಬ್ರಹ್ಮವಿದ್ಯಾಧಿಕಾರ ಇದ್ದರೂ ಈ ದೇಹದಲ್ಲಿ ಅಧಿಕಾರ ಇಲ್ಲ. ಹಾಗು ದೇಹಾಂತರದಲ್ಲಿ ಇರುವ ಅಧಿಕಾರ ಈ ದೇಹದಲ್ಲಿ ಈ ಕಾಲದಲ್ಲಿ ವೈದಿಕವಿದ್ಯಾಧ್ಯಯನದ ಪ್ರವೃತ್ತಿಗೆ ಅನುಪಯುಕ್ತವಾಗುತ್ತದೆ. ಅದಕ್ಕಾಗಿ ಗುಣಪೂರ್ವಕವಾದ ಅಧಿಕಾರ ನಿರೂಪಣೆಯನ್ನು ಆಚಾರ್ಯರು ಭಾಗವತ ತಂತ್ರಪ್ರಮಾಣದ ಮೂಲಕ ತಿಳಿಸಿ ಕೊಟ್ಟಿದ್ದಾರೆ.

ಜಾತಿಪ್ರಧಾನವಾದ ಅಧಿಕಾರವಿಭಾಗವನ್ನು ಬಿಟ್ಟು ಗುಣಪ್ರಧಾನವಾದ ಅಧಿಕಾರ ನಿರೂಪಿಸಲು ಮತ್ತೊಂದು ಕಾರಣವೂ ಇದೆ. ಶಿವಾರ್ಕಮಣಿದೀಪಿಕಾಕಾರರು ಹೀಗೊಂದು ಆಕ್ಷೇಪಮಾಡಿದ್ದಾರೆ. '**ಮುಕ್ತಿಯೋಗ್ಯತ್ವ**'ವನ್ನೆ ಅಧಿಕಾರಿ ಲಕ್ಷಣವೆಂದು ಹೇಳಬಹುದು. ಅಪಶೂದ್ರಾಧಿಕರಣ (1-3-9 ಸೂತ್ರ 34) ನ್ಯಾಯದಿಂದ ತ್ರೈವರ್ಣಿಕೇತರರಲ್ಲಿ ವೈದಿಕಬ್ರಹ್ಮವಿದ್ಯಾಧ್ಯಯನದ ಅಧಿಕಾರವನ್ನು ವ್ಯಾವೃತ್ತಿಗೊಳಿಸಿ ತ್ರೈವರ್ಣಿಕರಲ್ಲೇ ಅದನ್ನು ಸೀಮಿತಗೊಳಿಸಬಹುದು ಎಂದು.

ಹಾಗು ಪ್ರಥಮಸೂತ್ರದಲ್ಲಿ ಅಥಶಬ್ದ ವ್ಯರ್ಥ. ಸೂತ್ರದಲ್ಲಿರುವ 'ಅತಃ' ಶಬ್ದದಿಂದಲೇ ಮುಮುಕ್ಷುರೂಪ ಅಧಿಕಾರಿಯ ಲಾಭವಾಗುವುದು. ಅಪಶೂದ್ರಾಧಿಕರಣನ್ಯಾಯದಿಂದ ತ್ರೈವರ್ಣಿಕೇತರರನ್ನು ವ್ಯಾವೃತ್ತಿಗೊಳಿಸಬಹುದು. ಹೀಗೆ ಬರುವ ಈ ಎರಡು ಆಕ್ಷೇಪದ ನಿವಾರಣೆಗಾಗಿ ಗುಣಪೂರ್ವಕವಾದ ಅಧಿಕಾರಿವಿಭಾಗವನ್ನು ಹೇಳಿರುವುದು.

'ಅವೈಷ್ಣವಸ್ಯ ವೇದೇऽಪಿ ಹ್ಯಧಿಕಾರೋ ನ ವಿದ್ಯತೇ ।
ಗುರುಭಕ್ತಿವಿಹೀನಸ್ಯ ಶಮಾದಿರಹಿತಸ್ಯ ಚ ॥'

ತ್ರೈವರ್ಣಿಕರಲ್ಲೆ ವಿಷ್ಣುಭಕ್ತಿ-ಗುರುಭಕ್ತಿ ಇಲ್ಲದಿರುವ, ಶಮದಮಾದಿ ಗುಣರಹಿತನಾಗಿರುವ ವ್ಯಕ್ತಿಗೆ ವೈದಿಕ ಬ್ರಹ್ಮವಿದ್ಯಾಧಿಕಾರ ಇಲ್ಲ- ಎಂದು ಪ್ರಮಾಣವಚನವಿದೆ. ಒಂದು ಪಕ್ಷ ಗುಣಪ್ರಧಾನವಾದ ಅಧಿಕಾರ ಭೇದವನ್ನು ನಿರೂಪಿಸದೇ, ಅಪಶೂದ್ರಾಧಿಕರಣ ನ್ಯಾಯದ ಸಹಕಾರದಿಂದ ತ್ರೈವರ್ಣಿಕರಲ್ಲಿ ವೈದಿಕಬ್ರಹ್ಮವಿದ್ಯಾಧಿಕಾರವನ್ನು ಸೀಮಿತಗೊಳಿಸಿದರೂ ಅದು ಸಿದ್ಧಾಂತಾನುಗುಣವಾಗುವುದಿಲ್ಲ.

ತ್ರೈವರ್ಣಿಕರಲ್ಲಿ ವಿಷ್ಣುಭಕ್ತಿ-ಗುರುಭಕ್ತಿ ಇಲ್ಲದಿರುವವರು ಬ್ರಹ್ಮವಿದ್ಯೆಗೆ ಅನಧಿಕಾರಿಗಳಾಗಿದ್ದಾರೆ. ಅವರನ್ನು ವ್ಯಾವೃತ್ತಿಗೊಳಿಸುವುದಕ್ಕಾಗಿ ಗುಣಪ್ರಧಾನವಾದ ಅಧಿಕಾರ ನಿರೂಪಣೆಯನ್ನು ಮಾಡಲಾಗಿದೆ – ಎಂದು ಜಗನ್ನಾಥಯತಿಗಳು ಅಭಿಪ್ರಾಯಪಟ್ಟಿದ್ದಾರೆ —

'ಅಧ್ಯಯನಲಬ್ಧಾऽಪಿ ವಿಷ್ಣುಭಕ್ತಿಃ ಶಮಾದಿಕಂ ಚಾಭಕ್ತಾನಧಿಕಾರಿಕೃತಾಧ್ಯಯನ ಶಮಾದಿವ್ಯಾವೃತ್ತ್ಯರ್ಥಂ ಪೃಥಗುಕ್ತಮ್'

ಗುಣಪ್ರಧಾನವಾದ ಅಧಿಕಾರಪ್ರಭೇದವನ್ನು ಹೇಳಿದಾಗ ಅಧಿಕಾರಿ ಸಾಮಾನ್ಯಲಕ್ಷಣವೆನೆಂದು ತಿಳಿಯುವುದಿಲ್ಲ. ಈ ಸಂದರ್ಭದಲ್ಲಿ ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳು ಅಧಿಕಾರಿಸಾಮಾನ್ಯ ಲಕ್ಷಣವನ್ನು ಹೇಳಿ ಅದನ್ನು ಸಮನ್ವಯಗೊಳಿಸಿದ ಬಗೆ ಅನನ್ಯಸಾಧಾರಣವಾದುದು.

ಅ. ಮೇಲೆ ಹೇಳಿದ ಅಧಿಕಾರಿತ್ರಯ ವಿಶೇಷಣಗಳನ್ನೆಲ್ಲ ಒಟ್ಟಿಗೆ ಸೇರಿಸಿದರೆ ಅಧಿಕಾರಿ ಸಾಮಾನ್ಯಲಕ್ಷಣ ಸಿಗುತ್ತದೆ. ಮೂರು ಲಕ್ಷಣಗಳು ಮೂವರಲ್ಲಿ ಸಾಮಾನ್ಯವಾಗಿ ಇರುವುದರಿಂದ ಸಾಮಾನ್ಯಲಕ್ಷಣಕ್ಕೆ ಅಸಂಭವ-ಅವ್ಯಾಪ್ತಿ ದೋಷವಿಲ್ಲ. ಈ ಲಕ್ಷಣವು ಆಯಾಯ ಅಧಿಕಾರಿಗಳಲ್ಲಿ ವಿಶೇಷವಾಗಿ ಇರುವುದರಿಂದ ಅಧಿಕಾರಿಪ್ರಭೇದವನ್ನು ಗುರುತಿಸಬಹುದು. ಇದರ ತಾತ್ಪರ್ಯವನ್ನು ಹೀಗೆ ಅರಿಯಬಹುದು . ವಿಷ್ಣುಭಕ್ತಿಪೂರ್ವಕವಾದ ಶಾಸ್ತ್ರಾಧ್ಯಯನ, ಶಮದಮಾದಿಗುಣಗಳು ಮತ್ತು ವಿಷಯ ವೈರಾಗ್ಯಪೂರ್ವಕವಾದ ವಿಷ್ಣುಪಾದಾಸಕ್ತಿ – ಈ ಮೂರು ಗುಣಗಳು ಮಂದ – ಮಧ್ಯಮ – ಉತ್ತಮ ಎಂಬ ಈ ಮೂವರು ಅಧಿಕಾರಿಗಳಲ್ಲಿ ಸಾಮಾನ್ಯವಾಗಿ ಇರಬೇಕು . ಇವುಗಳಲ್ಲಿ ಹರಿಭಕ್ತಿ ಪುರಸ್ಸರವಾಗಿ ಶಾಸ್ತ್ರಾಧ್ಯಯನ ಪ್ರಧಾನವಾಗಿದ್ದು ಉಳಿದೆರಡು ಅಪ್ರಧಾನವಾಗಿದ್ದರೆ ಅವನು ಅಧಮಾಧಿಕಾರಿ. ಶಮದಮಾದಿಗಳು ಪ್ರಧಾನವಾಗಿದ್ದು, ವಿಷ್ಣು ಭಕ್ತಿಪೂರ್ವಕವಾದ ಅಧ್ಯಯನ ಹಾಗು ವಿಷಯವೈರಾಗ್ಯ ಗೌಣವಾಗಿದ್ದರೆ ಅವನು ಮಧ್ಯಮಾಧಿಕಾರಿ. ಇವೆರಡು ಅಪ್ರಧಾನವಾಗಿದ್ದು ವಿಷಯವೈರಾಗ್ಯ ಹರಿಪಾದಾಸಕ್ತಿಗಳು ಪ್ರಧಾನವಾಗಿದ್ದರೆ ಅವನು ಉತ್ತಮಾಧಿಕಾರಿ ಎನಿಸುತ್ತಾನೆ.

ಆ. ಅಥವಾ '**ಪ್ರಚುರತಮಾಧ್ಯಯನಾದಿಗುಣತ್ರಯವತ್ತ್ವಂ**' ಉತ್ತಮಾಧಿಕಾರಿಯ ಲಕ್ಷಣ. '**ಪ್ರಚುರತರಾಧ್ಯಯನಾದಿ ಗುಣತ್ರಯವತ್ತ್ವಂ**'– ಮಧ್ಯಮಾಧಿಕಾರಿಯ ಲಕ್ಷಣ. ' **ಕೇವಲ ಗುಣತ್ರಯವತ್ತ್ವಂ**' ಅಧಮಾಧಿಕಾರಿಯ ಲಕ್ಷಣ. ಮೂರು ಗುಣಗಳು ಸಾಮಾನ್ಯವಾಗಿ ಇರುವವ ಅಧಮಾಧಿಕಾರಿ. ಹೆಚ್ಚಿನ ಮಟ್ಟದಲ್ಲಿರುವವ

ಮಧ್ಯಮಾಧಿಕಾರಿ. ಅದಕ್ಕಿಂತಲೂ ಉಚ್ಚಮಟ್ಟದಲ್ಲಿರುವವ ಉತ್ತಮಾಧಿಕಾರಿ ಎನಿಸುತ್ತಾನೆ.

3. ಶ್ರುತ್ಯರ್ಥ ನಿರೂಪಣೆ –

ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳ ಭಾಷ್ಯದೀಪಿಕಾದ ಸಹಾಯವಿಲ್ಲದಿದ್ದರೆ ಭಾಷ್ಯದಲ್ಲಿ ಬರುವ ಶ್ರುತ್ಯರ್ಥವನ್ನು ಪೂರ್ಣವಾಗಿ ತಿಳಿದುಕೊಳ್ಳುವ ಬಗೆ ಗಗನಕುಸುಮದಂತಾಗುತ್ತಿತ್ತು. ಈ ವಿಷಯದಲ್ಲಿ ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳ ಉಪಕಾರವನ್ನು ಎಷ್ಟು ನೆನೆದರೂ ಅಲ್ಪವೇ. ಶ್ರುತಿಯ ಅರ್ಥವನ್ನು ವಿವರಿಸುವಾಗ ಶ್ರೀಜಗನ್ನಾಥ ಯತಿಗಳು ಕೆಲವೊಂದು ಕಡೆ ಅದರ ಆಕರಗ್ರಂಥವನ್ನು ಉಲ್ಲೇಖಿಸುತ್ತಾರೆ. ಕೆಲವುಕಡೆ ಭಾಷ್ಯದಲ್ಲಿ ಶ್ರುತಿಯ ಅಲ್ಪಭಾಗದ ಉಲ್ಲೇಖ ಮಾತ್ರವಿದ್ದಾಗ ಅದರ ಪೂರ್ಣ ಪಾಠವನ್ನು ನಮಗೆ ಒದಗಿಸಿ ಅದರ ಅರ್ಥವನ್ನು ತಮ್ಮ ಭಾಷ್ಯದೀಪಿಕೆಯಲ್ಲಿ ಉಲ್ಲೇಖಿಸುತ್ತಾರೆ. ಈ ನಿಟ್ಟಿನಲ್ಲಿ ಅವರ ಶ್ರುತ್ಯರ್ಥ ನಿರೂಪಣೆಯ ಚಾತುರ್ಯವನ್ನು ಕೆಳಕಂಡಂತೆ ವಿವರಿಸಬಹುದು.

ಪರೀಕ್ಷ್ಯ ಲೋಕಾನ್ ಕರ್ಮಚಿತಾನ್ ಬ್ರಾಹ್ಮಣೋ ನಿರ್ವೇದ-ಮಾಯಾತ್ । ನಾಸ್ತ್ಯಕೃತಃ ಕೃತೇನ । ತದ್ವಿಜ್ಞಾನಾರ್ಥಂ ಸ ಗುರು-ಮೇವಾಭಿಗಚ್ಛೇತ್ ಸಮಿತ್ಪಾಣಿಃ ಶ್ರೋತ್ರಿಯಂ ಬ್ರಹ್ಮನಿಷ್ಠಮ್ ॥

(ಮು. ಉ.1-12-12 – ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯಂ, ಉಪೋದ್ಘಾತಭಾಷ್ಯಮ್)

ಸಾರಾಸಾರ ನಿತ್ಯಾನಿತ್ಯ ವಿವೇಕ, ವೈರಾಗ್ಯ ಮುಂತಾದವು ವೈದಿಕ ಬ್ರಹ್ಮವಿದ್ಯೆಯಲ್ಲಿ ಅಧಿಕಾರ ಎಂಬ ವಿಷಯದ ಸಮರ್ಥನೆಗಾಗಿ ಈ ಆಥರ್ವಣ ಶ್ರುತಿ ಬಂದಿದೆ ಎನ್ನುತ್ತಾ ಭಾಷ್ಯದೀಪಿಕಾಕಾರರು ಶ್ರುತ್ಯರ್ಥವಿವರಣೆಯನ್ನು ಹೀಗೆ ನೀಡಿದ್ದಾರೆ.

ಬ್ರಹ್ಮಜ್ಞಾನಯೋಗ್ಯನಾದವನು ಸ್ವರ್ಗಾದಿಲೋಕಗಳನ್ನು ಕಾಮ್ಯ ಕರ್ಮಗಳಿಂದ ಲಭ್ಯವಾದವುಗಳಾದ್ದರಿಂದ ನಿಕೃಷ್ಟವಾದವುಗಳು ಹಾಗು ಅನಿತ್ಯವಾದವುಗಳೆಂದು ಬಗೆದು ಕಾಮ್ಯಕರ್ಮಗಳಲ್ಲಿಯೂ ಅವುಗಳ ಫಲವಾದ ಸ್ವರ್ಗಾದಿಗಳಲ್ಲಿಯೂ ವೈರಾಗ್ಯವನ್ನು ತಾಳಬೇಕು. ಏಕೆಂದರೆ ನಿತ್ಯಪುರುಷಾರ್ಥರೂಪವಾದ ಮೋಕ್ಷವು ಕಾಮ್ಯಕರ್ಮಗಳಿಂದ ಸಿಗದು. ಆದ್ದರಿಂದ ಬ್ರಹ್ಮನ ವಿಶೇಷಜ್ಞಾನ ಸಂಪಾದನೆಗಾಗಿ ವಿರಾಗಿಯು ಕೈಯಲ್ಲಿ ಸಮಿಧೆ ಯನ್ನು ಹಿಡಿದು (**ಸಮಿತ್ಪಾಣಿಃ**) ವೇದಾಧ್ಯಯನ ಪೂರ್ವಕವಾಗಿ ಕರ್ಮಾನುಷ್ಠಾನ ಮಾಡುವ ಬ್ರಹ್ಮನಿಷ್ಠನಾದ ಗುರುವಿನ ಬಳಿಗೆ ಹೋಗಬೇಕು. ಈ ಶ್ರುತಿಯನ್ನು ವ್ಯಾಖ್ಯಾನ ಮಾಡುತ್ತಾ ಭಾಷ್ಯದೀಪಿಕಾಚಾರ್ಯರು '**ಸಮಿತ್ಪಾಣಿಃ**' ಎಂಬ ಪದಕ್ಕೆ 'ಕೈಯಲ್ಲಿ ಸಮಿಧೆ ಹಿಡಿದುಕೊಂಡು' ಎಂಬ ಅರ್ಥವನ್ನು ಹೇಳುವುದರ ಜೊತೆಗೆ '**ಸಂಪ್ರಾಪ್ತೌ ಸಂಪುಟೀಕೃತೌ, ಅರಿಕ್ತೌ ವಾ ಪಾಣೀ**

ಯಸ್ಯ ಸಃ' – ಕೈಜೋಡಿಸಿಕೊಂಡು, ಅಥವಾ ಕೈಗಳನ್ನು ಖಾಲಿ ಬಿಡದೇ ಗುರುವಿಗೆ ನೀಡಲು ಫಲತಾಂಬೂಲಾದಿಗಳನ್ನು ಹಿಡಿದುಕೊಂಡು ಗುರುವಿನ ಉಪಸತ್ತಿ ಮಾಡಬೇಕು ಎಂಬ ಸಂಪ್ರದಾಯಸಿದ್ಧವಾದ ಅರ್ಥವನ್ನು ಹೇಳಿದ್ದಾರೆ.

ಶ್ರುತಿಯಲ್ಲಿ ವಿಶೇಷಜ್ಞಾನವನ್ನು ತಿಳಿಸುವ ವಿಜ್ಞಾನಪದದಿಂದ ಹಾಗು ಬ್ರಹ್ಮಜ್ಞಾನಿವಾಚಕ ಬ್ರಾಹ್ಮಣ ಶಬ್ದದಿಂದ ಉತ್ತಮಾಧಿಕಾರಿಗಳಾದ ದೇವತೆಗಳ ಲಕ್ಷಣವನ್ನುಹೇಳಲಾಗಿದೆ. ಏಕೆಂದರೆ ದೇವತೆಗಳ ಜ್ಞಾನವೇ ವಿಜ್ಞಾನ, ಬ್ರಹ್ಮಾಪರೋಕ್ಷಜ್ಞಾನ ರಹಿತರು ದೇವತಾಪದವಿಯನ್ನು ಹೊಂದಲಾರರು ಎಂದು ಪ್ರಮಾಣಗಳಿವೆ.

'ದೇವಾದೀನಾಂ ತು ತಜ್ಜ್ಞಾನಂ ವಿಜ್ಞಾನಮಿತಿ ಕೀರ್ತಿತಮ್'

(ಗೀತಾಭಾಷ್ಯ ಉದಾಹೃತ ಪ್ರಮಾಣ ವಚನ - 6-8),

'ನೈವ ದೇವಪದಂ ಪ್ರಾಪ್ತಾ ಬ್ರಹ್ಮದರ್ಶನವರ್ಜಿತಾಃ'

(ಗೀತಾತಾತ್ಪರ್ಯ ಉದಾಹೃತ ಪ್ರಮಾಣವಚನಮ್) .

ಈ ರೀತಿಯಾಗಿ ಭಾಷ್ಯದೀಪಿಕಾಕಾರರು ಶ್ರುತ್ಯರ್ಥನಿರೂಪಣೆ ಮಾಡುವಾಗ ಅಲ್ಲಿರುವ ಪದಗಳಿಗೆ ವಿಶೇಷಾರ್ಥಗಳನ್ನು ಹೇಳುತ್ತಾರೆ.

4. ಕರ್ಮದಿಂದಾಗುವ ಭಗವತ್ಪ್ರಸಾದ

ಪ್ರಥಮ ಸೂತ್ರದಲ್ಲಿರುವ '**ಅತಃ**' ಶಬ್ದದ ಅರ್ಥವನ್ನು ಭಾಷ್ಯದಲ್ಲಿ ಹೀಗೆ ವಿವರಿಸಲಾಗಿದೆ.

'ಯತೋ ನಾರಾಯಣಪ್ರಸಾದಮೃತೇ ನ ಮೋಕ್ಷಃ , ನ ಚ ಜ್ಞಾನಂವಿನಾ ಅತ್ಯರ್ಥಪ್ರಸಾದಃ, ಅತೋ ಬ್ರಹ್ಮಜಿಜ್ಞಾಸಾ ಕರ್ತವ್ಯಾ' – ನಾರಾಯಣನ ಪ್ರಸಾದವಿಲ್ಲದೇ ಮೋಕ್ಷವಿಲ್ಲ . ಅವನ ಅಪರೋಕ್ಷಜ್ಞಾನವಿಲ್ಲವೇ ಅವನ ಅನುಗ್ರಹವಾಗಲಾರದು. ಆದ್ದರಿಂದ ಬ್ರಹ್ಮವಿಚಾರ ಮಾಡಬೇಕು.'

ಪ್ರಕೃತದಲ್ಲಿ ಜ್ಞಾನದಿಂದ ಭಗವತ್ಪ್ರಸಾದ, ಭಗವತ್ಪ್ರಸಾದದಿಂದ ಮೋಕ್ಷ ಎಂದು ಹೇಳಲಾಗಿದೆ . ಆದರೆ **'ತತ್ ಕರ್ಮ ಹರಿತೋಷಂ ಯತ್ '** (ಭಾಗ.4-29-53) ಭಗವಂತನಿಗೆ ಯಾವುದು ಸಂತೋಷವನ್ನು ಉಂಟು ಮಾಡುವುದೋ ಅದು ಕರ್ಮವೆನಿಸುತ್ತದೆ,

'ಯ ಇದಂ ಪರಮಂ ಗುಹ್ಯಂ ಮದ್ಭಕ್ತೇಷ್ವಭಿಧಾಸ್ಯತಿ ।
ಭಕ್ತಿಂ ಮಯಿ ಪರಾಂ ಕೃತ್ವಾ ಮಾಮೇವೈಷ್ಯತ್ಯಸಂಶಯಃ ॥'

(ಭ.ಗೀತಾ. 18-62)

'ಯಾರು ಶ್ರೇಷ್ಠವಾದ ಅತಿಗೋಪ್ಯವಾದ ಈ ಗೀತಾಶಾಸ್ತ್ರವನ್ನು ನನ್ನ ಭಕ್ತರಿಗೆ ಉಪದೇಶಮಾಡುವನೋ ಅವನು ನನ್ನಲ್ಲಿ ಉತ್ತಮವಾದ ಭಕ್ತಿಯನ್ನು ಮಾಡಿ ನನ್ನನ್ನೇ ಹೊಂದುತ್ತಾನೆ. ಈ ವಿಷಯದಲ್ಲಿ ಸಂಶಯವಿಲ್ಲ. ' ಇವೆ ಮುಂತಾದ ಪ್ರಮಾಣಗಳು ಕರ್ಮದಿಂದಲೂ ಭಗವತ್ಪ್ರಸಾದ ಉಂಟಾಗುವುದೆಂದು ತಿಳಿಸುತ್ತಿವೆ. ಆದ್ದರಿಂದ ಭಗವತ್ಪ್ರಸಾದಕ್ಕೆ ಅಪರೋಕ್ಷಜ್ಞಾನದ ಅವಶ್ಯಕತೆ ಇಲ್ಲ. ಅದಕ್ಕಾಗಿ ಬ್ರಹ್ಮವಿಚಾರ ಮಾಡಬೇಕು ಎಂದು ಸೂತ್ರದಲ್ಲಿ ಇರುವ **'ಅತಃ'** ಶಬ್ದದ ಅರ್ಥವು ಸರಿಹೊಂದಲಾರದು ಎಂಬ ಆಕ್ಷೇಪ ಬಂದಾಗ ಆಚಾರ್ಯರು ಭಾಷ್ಯದಲ್ಲಿ ನಾರದೀಯಪುರಾಣ ಪ್ರಮಾಣವನ್ನು ಉಲ್ಲೇಖಿಸುವುದರ ಮೂಲಕ ಅದನ್ನು ಪರಿಹರಿಸಿದ್ದಾರೆ.

'ಕರ್ಮಣಾ ತ್ವಧಮಃ ಪ್ರೋಕ್ತಃ ಪ್ರಸಾದಃ ಶ್ರವಣಾದಿಭಃ ।
ಮಧ್ಯಮೋ ಜ್ಞಾನಸಂಪತ್ಯಾ ಪ್ರಸಾದಸ್ತೂತ್ತಮೋ ಮತಃ ॥

ಪ್ರಸಾದಾತ್ ತ್ವಧಮಾದ್ ವಿಷ್ಣೋಃ ಸ್ವರ್ಗಲೋಕಃ ಪ್ರಕೀರ್ತಿತಃ ।
ಮಧ್ಯಮಾಜ್ಜನಲೋಕಾದಿರುತ್ತಮಸ್ತ್ವೇವ ಮುಕ್ತಿದಃ ॥'

ಕಾಮ್ಯಾಕಾಮ್ಯ ಉಭಯ ಕರ್ಮಾಚರಣೆಯಿಂದ ಉಂಟಾಗುವ ಭಗವತ್ತುಷ್ಟಿ **'ಅಧಮ'** ಎನಿಸಿದೆ. ಶ್ರವಣ, ಮನನ, ನಿದಿಧ್ಯಾಸನಗಳಿಂದ ಉಂಟಾಗುದ ಭಗವತ್ಪ್ರಸಾದ **ಮಧ್ಯಮ**. ಅಪರೋಕ್ಷಜ್ಞಾನದಿಂದಾಗುವ ಪ್ರಸಾದ **ಉತ್ತಮ**ವಾದುದು. ಅಧಮ-ಪ್ರಸಾದದಿಂದ ಸ್ವರ್ಗಲೋಕವು, ಮಧ್ಯಮಪ್ರಸಾದದಿಂದ ಜನೋಲೋಕ, ತಪೋಲೋಕ, ಸತ್ಯಲೋಕಗಳೂ ಸಿಗುತ್ತವೆ. ಉತ್ತಮಪ್ರಸಾದವು ಮಾತ್ರ ಮೋಕ್ಷವನ್ನು ಕೊಡಬಲ್ಲದು.

ಈ ಸಂದರ್ಭದಲ್ಲಿ ಭಾಷ್ಯದೀಪಿಕಾಚಾರ್ಯರು ಕರ್ಮದಿಂದಾಗುವ ಪ್ರಸಾದವನ್ನು ವಿಶ್ಲೇಷಿಸುತ್ತಾರೆ. ಕಾಮ್ಯಕರ್ಮದಿಂದಾಗುವ ಭಗವತ್ಪ್ರಸಾದವು ಸ್ವರ್ಗಲೋಕಕ್ಕೆ ಕಾರಣವಾಗುವಂತೆ ಕಾಮ್ಯಕರ್ಮಗಳು ವೈರಾಗ್ಯ ಹುಟ್ಟಿಸುವ ಮೂಲಕ ಮೋಕ್ಷಪ್ರಾಪ್ತಿಗೂ ಉಪಯುಕ್ತವಾಗಿವೆ . ಹಾಗೆ ನಿಷ್ಕಾಮ ಕರ್ಮದಿಂದ ಉಂಟಾಗುವ ಅಧಮ ಪ್ರಸಾದದಿಂದ ಅಂತಃಕರಣಶುದ್ಧಿ ಆಗುವ ಮೂಲಕ ಮೋಕ್ಷವೂ ಆಗುತ್ತದೆ. ಒಟ್ಟಾರೆ ನಾರದೀಯ ಪ್ರಮಾಣವಾಕ್ಯದಲ್ಲಿ ಅಧಮಭಗವತ್ಪ್ರಸಾದದಿಂದ ಸ್ವರ್ಗಲೋಕದ ಪ್ರಾಪ್ತಿಯಾಗುವುದೆಂದು ತಿಳಿಸಲಾಗಿದೆ. ಆದರೆ ಭಗವದ್ದ್ವೇಷಿಗಳಾದ ದುರ್ಯೋಧನಾದಿಗಳಿಗೆ ಅಧಮ ಭಗವತ್ಪ್ರಸಾದವು ಇಲ್ಲದಿದ್ದರೂ ಮರಣವಾದ ಮೇಲೆ ಸ್ವರ್ಗಲೋಕ ಪ್ರಾಪ್ತಿ ಹೇಗೆ ಆಯಿತು? ದುರ್ಯೋಧನಾದಿಗಳಿಗೆ ಮರಣವಾದ ಮೇಲೆ ಸ್ವರ್ಗಪ್ರಾಪ್ತಿಯಾಗಿರುವುದಾಗಿ ಮಹಾಭಾರತದಲ್ಲಿ ಹೇಳಲಾಗಿದೆ [೧]. ಸಶರೀರನಾಗಿ ಸ್ವರ್ಗಕ್ಕೆ ಹೋದ ಯುಧಿಷ್ಠಿರ ಸ್ವರ್ಗದಲ್ಲಿ ದುರ್ಯೋಧನಾದಿಗಳನ್ನು

ನೋಡಿದ ಎಂದಿದೆ.

ಇದು ಹೇಗೆ ಸಂಗತವಾಗುತ್ತದೆ ಎಂದು ಭಾಷ್ಯದೀಪಿಕಾದಲ್ಲಿ ಪ್ರಶ್ನೆಮಾಡಿ ಸಮಾಧಾನಿಸಲಾಗಿದೆ. ಶ್ರೀಮಹಾಭಾರತ ತಾತ್ಪರ್ಯ ನಿರ್ಣಯದಲ್ಲಿ ದೇವೇಂದ್ರ ಸಶರೀರವಾಗಿ ಸ್ವರ್ಗ ಪ್ರವೇಶಿಸಿದ ಯುಧಿಷ್ಠಿರನನ್ನು ಕರೆದೊಯ್ದದ್ದು ಸ್ವರ್ಗಲೋಕದ ಆನಂತರ ಬರುವ ತನ್ನ ಲೀಲೆಗಾಗಿ ಇಂದ್ರ ನಿರ್ಮಿಸಿದ್ದ ಸಾಂಕಲ್ಪಿಕ ಸ್ವರ್ಗದ ಇಂದ್ರ ಭವನಕ್ಕೆ. ಯುಧಿಷ್ಠಿರ ದುರ್ಯೋಧನಾದಿಗಳನ್ನು ನೋಡಿದ್ದು ಸ್ವರ್ಗದಲ್ಲಿ ಅಲ್ಲ; ಸಾಂಕಲ್ಪಿಕ ಸ್ವರ್ಗದಲ್ಲಿ ಎಂದು ತಾತ್ಪರ್ಯ ನಿರ್ಣಯದಲ್ಲಿ ಹೇಳಲಾಗಿದೆ.

'ಸರ್ವೇಷಾಮುತ್ತರಂ ಲೋಕಮೈಂದ್ರಂ ಪ್ರಾಪ್ಯೇದಮೇವ ತೇ ।
ಸ್ಥಾನಮಿತ್ಯುದಿತೋ ದೇವೈರ್ದುರ್ಯೋಧನಮವೈಕ್ಷತ ॥ '

(ಮ.ಭಾ.ತಾತ್ಪರ್ಯನಿರ್ಣಯ. ಅಧ್ಯಾಯ. 32. ಶ್ಲೋಕ-91)

ದುರ್ಯೋಧನ ಮುಂತಾದ ಅಸುರರಿಗೆ ಯಾಗ ಮಾಡಿಸಿದ ಋಷಿ ಮುನಿಗಳ ಪ್ರಭಾವದಿಂದ ಸಾಂಕಲ್ಪಿಕಸ್ವರ್ಗದ ಪ್ರಾಪ್ತಿಯಾಗಿದ್ದರೂ ಸ್ವಲ್ಪ ಕಾಲ ಮಾತ್ರ ಅವರು ಅಲ್ಲಿ ಇದ್ದು ಮುಂದೆ ಕೂಡಲೇ ಅಂಧಂತಮಸ್ಸನ್ನು ಹೊಂದುತ್ತಾರೆ. ಆದರೆ ಉಳಿದ ಅಸುರರಿಗೆ ಭಾಗವತಾಚಾರ್ಯರಾದ ಋಷಿಮುನಿಗಳ ಆಶೀರ್ವಾದ ಇಲ್ಲದಿರುವುದರಿಂದ ಈ ಸ್ವರ್ಗವೂ ಇಲ್ಲ.

ಇಲ್ಲಿ ದುರ್ಯೋಧನ ಮುಂತಾದವರು ಹೊಂದಿದ ಸಾಂಕಲ್ಪಿಕ ಸ್ವರ್ಗವೆಂದರೆ ಸ್ವರ್ಗಸಮೀಪದ ಪ್ರದೇಶವೇ ಹೊರತು ಸ್ವರ್ಗವಲ್ಲ. ಏಕೆಂದರೆ ಬಹಳವಾಗಿ ಶ್ರೀಕೃಷ್ಣನ ದ್ವೇಷಮಾಡಿದ ದುರ್ಯೋಧನಾದಿಗಳಿಗೆ ಸಾಕ್ಷಾತ್ ಸ್ವರ್ಗವಿಲ್ಲ. ಅವರು ಹೊಂದಿದ ಸ್ವರ್ಗವೆಂದರೆ ಸ್ವರ್ಗದಿಂದ ಕೆಳಗೆ ಸ್ವರ್ಗಕ್ಕೆ ಅಯೋಗ್ಯರಾದ ಅಸುರ ಮುಂತಾದವರಿಗೆಂದೇ ನಿರ್ಮಿತವಾದ ಉಪಸ್ವರ್ಗ. ಇದನ್ನೇ ಆಚಾರ್ಯರು ಗೀತಾತಾತ್ಪರ್ಯದಲ್ಲಿ – **'ಮೋಕ್ಷಃ ಸಾಂಕಲ್ಪಿಕಃ ಸ್ವರ್ಗಃ ಭೂತಾದಿತ್ವಂ ಫಲಂ ಕ್ರಮಾತ್'** ಎಂದು ತಿಳಿಸಿದ್ದಾರೆ. ಈ ಸ್ವರ್ಗವನ್ನೆ ನಿತ್ಯಸಂಸಾರಿಗಳಾದ ರಾಜಸ-ರಾಜಸರು , ರಾಜಸತಾಮಸರು ಪಡೆಯುವರು. ಈ ಸಾಂಕಲ್ಪಿಕ ಸ್ವರ್ಗವು ಸಾಮಾನ್ಯಸ್ವರ್ಗಕ್ಕೆ ಸದೃಶವಾಗಿದ್ದು ಭಾಗವತಾಚಾರ್ಯ ಪ್ರಭಾವದಿಂದ ಸ್ವರ್ಗಕ್ಕೆ ಬರುವ ದುರ್ಯೋಧನ ಮುಂತಾದ ದೈತ್ಯಶ್ರೇಷ್ಠರಿಗೆಂದೇ ನಿರ್ಮಿತವಾದದ್ದಾಗಿದೆ.

೧. **ಸ್ವರ್ಗಂ ತ್ರಿವಿಷ್ಟಪಂ ಪ್ರಾಪ್ಯ ಧರ್ಮರಾಜೋ ಯುಧಿಷ್ಠಿರಃ ।**
ದುರ್ಯೋಧನಂ ಶ್ರಿಯಾ ಜುಷ್ಟಂ ದದರ್ಶಾऽಸೀನಮಾಸನೇ ॥
ಭ್ರಾಜಮಾನಮಿವಾದಿತ್ಯಂ ಧೀರಲಕ್ಷ್ಯೈಃ ಸಭಾ ಸಂವೃತಮ್ ।
ದೇವೈರ್ಭ್ರಾಜಿಷ್ಣುಭಿಃ ಸಾಧ್ಯೈಃ ಸಹಿತಂ ಪುಣ್ಯಕರ್ಮಭಿಃ ॥ *(ಮ.ಭಾ.– 18.1.4,5)*

ಆದರೆ ಪ್ರಕೃತ ಅಧಮ ಭಗವತ್ಪ್ರಸಾದದಿಂದ ಪ್ರಾಪ್ಯವಾದ ಸ್ವರ್ಗವು ಭೂಃ, ಭುವಃ, ಸ್ವಃ, ಮುಂತಾದ ಸಪ್ತಲೋಕದಲ್ಲಿ ಸೇರಿರುವ ರಾಜಸಸಾತ್ವಿಕರು ಪಡೆಯುವ ಸ್ವರ್ಗಲೋಕವೆಂದು ತಿಳಿಯಬೇಕು. ಅದನ್ನೇ ಪ್ರಕೃತ ಪ್ರಮಾಣವಚನದಲ್ಲಿ ಹೇಳಲಾಗಿದೆ ಎಂದು ಭಾಷ್ಯದೀಪಿಕಾದಲ್ಲಿ ವಿವರಿಸಲಾಗಿದೆ.

ಹೀಗೆ ಭಾಷ್ಯದೀಪಿಕಾದಲ್ಲಿ ಪುಟಪುಟಗಳಲ್ಲಿ, ವಾಕ್ಯವಾಕ್ಯಗಳಲ್ಲಿ ಪದಪದಗಳಲ್ಲಿ ವಿಶಿಷ್ಟವಿಚಾರಗಳನ್ನು ಕಾಣಬಹುದು. ವಿಸ್ತಾರಭಯದಿಂದ ಒಂದೆರಡನ್ನು ಮಾತ್ರ ಇಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

ಕೃತಜ್ಞತಾಸಮರ್ಪಣೆ

ಪರಮಪೂಜ್ಯ ಗುರುಗಳಾದ **ಶ್ರೀಶ್ರೀವಿಶ್ವೇಶತೀರ್ಥ ಶ್ರೀಚರಣರ ಪಾದಾರವಿಂದಗಳಲ್ಲಿ** ಭಕ್ತಿಪೂರ್ವಕ ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳನ್ನು ಸಮರ್ಪಿಸುವೆ. ಶ್ರೀಶ್ರೀಪಾದಂಗಳವರು ಅನ್ನದಾನ-ವಿದ್ಯಾದಾನಾದಿಗಳನ್ನು ಮಾಡಿ ನಮ್ಮಸ್ವರೂಪೋದ್ಧಾರ ಮಾಡಿದ ಪರಮಮಹನೀಯರು.

ಈ ಪುಸ್ತಕದ ಮುದ್ರಣವೆಚ್ಚ ಭರಿಸಲು ಉದಾರ ಮನಸ್ಸಿನಿಂದ ಸಹಕರಿಸಿದ ರಾಷ್ಟ್ರೀಯ ಸಂಸ್ಕೃತಸಂಸ್ಥಾನದ ಕುಲಪತಿಗಳಾದ **ಪ್ರೋ. ವೆಂ. ಕುಟುಂಬಶಾಸ್ತ್ರಿ**ಗಳಿಗೆ ಋಣಿಯಾಗಿದ್ದೇನೆ.

ಅಮೂಲ್ಯ ಸಲಹೆ ನೀಡಿ ಮಾರ್ಗದರ್ಶನ ಮಾಡಿದ ತಿರುಪತಿ ರಾಷ್ಟ್ರೀಯ ಸಂಸ್ಕೃತ ವಿದ್ಯಾಪೀಠದ ವಿಶ್ರಾಂತ ಕುಲಪತಿಗಳು ಪೂರ್ಣಪ್ರಜ್ಞ ಸಂಶೋಧನ ಮಂದಿರದ ಅಧ್ಯಕ್ಷರೂ ಆದ ಪ್ರೊ. ಡಿ. ಪ್ರಹ್ಲಾದಾಚಾರ್ಯರಿಗೆ ಆದರದ ಕೃತಜ್ಞತೆಗಳು.

ಈ ಗ್ರಂಥದ ಸಂಪಾದನೆಯಲ್ಲಿ ತೊಡಗಿಸಿ ಅದರ ಪ್ರಕಾಶನಕ್ಕೆ ಬೇಕಾದ ಬಾಹ್ಯವಿತ್ತವನ್ನು ವ್ಯವಸ್ಥಾಪನೆ ಮಾಡಿ ಮಾರ್ಗದರ್ಶನ ಮಾಡಿದ ಪೂರ್ಣಪ್ರಜ್ಞ ಸಂಶೋಧನ ಮಂದಿರದ ನಿರ್ದೇಶಕರಾದ **ಡಾ. ಎ.ವಿ. ನಾಗಸಂಪಿಗೆ**ಯವರಿಗೆ ಹಾರ್ದಿಕವಾದ ಕೃತಜ್ಞತೆಗಳನ್ನು ವ್ಯಕ್ತಪಡಿಸುತ್ತೇನೆ.

ಹಾಗೆಯೇ ಗ್ರಂಥಸಂಶೋಧನೆಗೆ ಉಪಯುಕ್ತ ಸಲಹೆನೀಡಿ ಉಪಕರಿಸಿದ ವಿದ್ಯಾಪೀಠದ ನಿವೃತ್ತ ಅಲಂಕಾರ ಪ್ರಾಧ್ಯಾಪಕರಾದ ಎ.ಅನಂತತಂತ್ರಿಗಳಿಗೆ ಹೃತ್ಪೂರ್ವಕ ಕತಜ್ಞತೆಗಳು.

ಸಂಶೋಧನ ಮಂದಿರದ ಉಪನಿರ್ದೇಶಕರಾದ ಶ್ರೀರಂಗನಾಥ ಕಟ್ಟಿಯವರಿಗೆ ಹಾಗು ಎಲ್ಲಾ ಹಿರಿಯ ವಿದ್ವಾಂಸರಿಗೂ ಕೃತಜ್ಞತೆಯನ್ನು ಸಲ್ಲಿಸುತ್ತೇನೆ.

ಉಪೋದ್ಘಾತದ ಭಾಗವನ್ನು ಇಂಗ್ಲೀಷ್ ಭಾಷೆಗೆ ತರ್ಜುಮೆ ಮಾಡಿದ ಪಂ. ಯು. ಬಿ. ಗುರುರಾಜಾಚಾರ್ಯರಿಗೆ ಹಾರ್ದಿಕ ಕೃತಜ್ಞತೆಗಳು.

'ಸೂತ್ರದೀಪಿಕಾ'ದ ಶುದ್ಧಪ್ರತಿಯನ್ನು ನೀಡಿ ಸಹಕರಿಸಿದ ವಿದ್ವಾನ್.ಕಡ್ಡಿ ಬದರೀನಾರಾಯಣಾಚಾರ್ಯರಿಗೆ, ಪುಟವಿನ್ಯಾಸ ಮಾಡಿದ ಪಂ.ಪ್ರದೀಪಸಿಂಹ ಇವರಿಗೂ ಹೃತ್ಪೂರ್ವಕ ಕೃತಜ್ಞತೆಗಳು.

ಕರಡಚ್ಚುತಿದ್ದುವಲ್ಲಿ ಸಹಕರಿಸಿದ ಯುವ ವಿದ್ವಾಂಸರಾದ ಭೀಮಸೇನ ಹಾಗೂ ರಾಮಚಂದ್ರ ಇವರಿಬ್ಬರೂ ಅಭಿನಂದನೆಗೆ ಅರ್ಹರಾಗಿದ್ದಾರೆ.

ಇತಿ ಸುಜನ ವಿಧೇಯ,

ಪಂ. ಶಂಕರನಾರಾಯಣ ಅಡಿಗ. ಕೆ.

ಪ್ರಕೃತ ಮುದ್ರಣದ ಬಗೆಗೆ :–

ಈ ಭಾಷ್ಯದೀಪಿಕಾ ಗ್ರಂಥವು ಕ್ರಿ.ಶ. 1964ನೇ ಇಸ್ವಿಯಲ್ಲಿ ಬೆಂಗಳೂರಿನ ಶ್ರೀವ್ಯಾಸರಾಜ ಮಠಾಧೀಶರಾದ ಶ್ರೀಶ್ರೀವಿದ್ಯಾಪ್ರಸನ್ನತೀರ್ಥಶ್ರೀಪಾದರ ಆಜ್ಞಾನುಸಾರವಾಗಿ ಶ್ರೇಷ್ಠ ಪಂಡಿತರಾದ ಮಾಗಡಿ ಶ್ರೀರಂಗನಾಥಾಚಾರ್ಯರಿಂದ ಸಂಪಾದಿಸಲ್ಪಟ್ಟು ಶ್ರೀ ಡಿ.ಎಸ್. ಕೃಷ್ಣಾಚಾರ್ಯರಿಂದ ಮುದ್ರಿಸಲ್ಪಟ್ಟಿತ್ತು. ಅವರು ಮಾಡಿದ ಉಪಕಾರವನ್ನು, ಪಟ್ಟ ಶ್ರಮವನ್ನು ಜಿಜ್ಞಾಸುಗಳು ಮರೆಯುವಂತಿಲ್ಲ. ಯಾವ ಸೌಲಭ್ಯವೂ ಇಲ್ಲದ ಆಕಾಲದಲ್ಲಿ ಸಿಕ್ಕ ಕೆಲವೇ ಹಸ್ತಪ್ರತಿಗಳು ಹಾಗು ಪಂಡಿತರ ಸಹಾಯದಿಂದ ಇವರು ಮಾಡಿದ ಉಪಕಾರಕ್ಕೆ ನಾವೆಲ್ಲ ಇಂದು ಆದರ ಪೂರ್ವಕವಾಗಿ ಕೃತಜ್ಞತೆಯನ್ನು ವ್ಯಕ್ತಪಡಿಸುತ್ತಿದ್ದೇವೆ.

ಪ್ರಕೃತ ಈ ಕೃತಿಯ ಮುದ್ರಣಕ್ಕೆ ಸಿಕ್ಕಿದ ನಾಲ್ಕು ಹಸ್ತ ಪ್ರತಿಗಳನ್ನು ಉಪಯೋಗಿಸಿ–ಕೊಂಡು ಹೆಚ್ಚಿನ ಶುದ್ಧ ಪಾಠವನ್ನು ನೀಡಲು ಇಲ್ಲಿ ಪ್ರಯತ್ನ ಮಾಡಲಾಗಿದೆ. ನಾಲ್ಕು ಹಸ್ತಪ್ರತಿಗಳ ಸಹಾಯದಿಂದ ಹಿಂದಿನ ಮುದ್ರಿತಪಾಠಗಳನ್ನು ತುಲನೆ ಮಾಡಿ ಹಲವಾರು ಪಾಠಾಂತರಗಳನ್ನು ಇಲ್ಲಿ ನೀಡಲಾಗಿದೆ. ಮುದ್ರಿತ ಪಾಠದಲ್ಲಿ ಲುಪ್ತಗಳಾದ ಹಲವಾರು ವಾಕ್ಯಗಳು ಹಸ್ತಪ್ರತಿಗಳಲ್ಲಿ ಕಂಡುಬಂದಿರುವುದರಿಂದ ಅವುಗಳನ್ನು ಕೆಳಗೆ ಅವಗಾಹನೆಗಾಗಿ ನೀಡಲಾಗಿದೆ. ಈ ಪ್ರಯತ್ನವನ್ನು ವಿದ್ವಾಂಸರು ವಾತ್ಸಲ್ಯ ಪೂರಿತ ದೃಷ್ಟಿಯಿಂದ ಕಂಡು ಹರಿಸಬೇಕೆಂದು ವಿನಂತಿ.

ಧಾರವಾಡದ **ಪಂ.ಶ್ರೀಯುತ ಗೋವಿಂದರಾವ್ ನವಲಗುಂದ್** ಅವರು ಭಾಷ್ಯದೀಪಿಕಾದ ಹಸ್ತಪ್ರತಿಯೊಂದನ್ನು ನೀಡಿದ್ದಾರೆ. ಅವರಿಗೆ ಹಾರ್ದಿಕವಾದ ಕೃತಜ್ಞತೆಗಳು. ಅವರು ನೀಡಿದ ಈ ಹಸ್ತಪ್ರತಿಯನ್ನು **'ಗ'** ಎಂದು ಇಲ್ಲಿ ನಮೂದಿಸಲಾಗಿದೆ. ಉಳಿದ **ಕ,ಗ,ಧ** ಹಸ್ತಪ್ರತಿಗಳು ಸಂಶೋಧನಮಂದಿರದ ಗ್ರಂಥಾಲಯದಲ್ಲಿ ದೊರೆತಿರುವುದು. **'ಕ'**,**'ಗ'** ಹಸ್ತಪ್ರತಿಗಳು ಮೊದಲನೇ ಅಧ್ಯಾಯದ ಎರಡನೇ ಪಾದಕ್ಕೆ ಮಾತ್ರ ಸಿಕ್ಕಿದ್ದು, **'ಧ'** ಹಸ್ತಪ್ರತಿಯು ಮೂರು, ನಾಲ್ಕನೇ ಪಾದಗಳಿಗೆ ಮಾತ್ರ ದೊರೆತಿದೆ. ಪ್ರಚಲಿತ ಪಾಠಕ್ಕೆ ಅನುಸಾರವಾಗಿ ಭಾಷ್ಯಪಾಠವನ್ನು ಕೊಡಲಾಗಿದೆ. ಹೃಷೀಕೇಶೀಯ ಪಾಠಾಂತರಗಳನ್ನು **'ಹೃ'** ಎಂದು ಸೂಚಿಸಲಾಗಿದೆ. ಹೀಗೆ ಪ್ರಕೃತ ಮೊದಲನೇ ಅಧ್ಯಾಯದ ಭಾಷ್ಯದೀಪಿಕಾದ ಪ್ರಕೃತ ಮುದ್ರಣವು ಸಂಶೋಧಿತ ಅತಿಸೂಕ್ಷ್ಮ ಆವೃತ್ತಿಯಾಗಿದ್ದು ಹಲವಾರು ಶುದ್ಧ ಪಾಠಾಂತರಗಳಿಂದ ಕೂಡಿದೆ.

'ಸ್ಥಾಲೀ ಪುಲಾಕ' ನ್ಯಾಯದಿಂದ ಮುದ್ರಿತ ಪಾಠಕ್ಕೂ ಸಂಶೋಧಿತಪಾಠಕ್ಕೂ ಇರುವ ವ್ಯತ್ಯಾಸವನ್ನು ಹಾಗು ಕೆಲವು ಲುಪ್ತವಾಕ್ಯಗಳನ್ನು ಇಲ್ಲಿ ಸಂಗ್ರಹಿಸಲಾಗಿದೆ.

मुद्रितपाठः	संशोधितपाठः	पृष्ठसङ्ख्या
१. कलावेवोत्सादोक्तेः	कालादेवोत्सादोक्तेः (म.)	७
२. 'सम्यञ्चं'	स च	३६
३. प्रसिद्धादिः	प्रसिद्धादित्यः (क.)	२०९
४. सर्वत्र	सर्वगतः (क.)	२०९
५. तुरीयोक्तचक्षुर्मयत्वादि-बाधकेन	तुरीयोक्तानुपपत्तिः, चक्षुर्मय- (क.)	२११
६. श्लक्ष्णकेशेति	दलरक्तश्लक्ष्णकेशेति	२१३
७. सर्वहृदयस्थित	सर्वप्राणिहृदयस्थित- (क.)	२१३
८. तदित्यस्येह	तत्त्वित्यस्येह (क.)	२१५
९. आवृत्तिं	अनुवृत्तिं (क.)	२१५
१०. प्रतिज्ञाय	ज्ञापनाय (क.)	२१७
११. न, कुतः।	न विष्णौ सर्वगतत्वाभावो वाच्यः। कुतः (क.)	२१७
१२. तस्यैव	तथा च तस्यैव विष्णोः (क.)	२१८
१३. तदुक्तिसार्थक्यात्	उपासनार्था तदुक्तिरिति न वैय्यर्थ्यमिति भावः। (क.)	२१८
१४. सहैकशरीरस्थत्वप्राप्तेरिति	सहैव सर्वशरीर- (क.)	२१८
१५. समान	जीवसमान- (क.)	२१९
१६. जन्मेति ॥ जन्मादिसूत्रे जन्मादिकर्तृत्वं विष्णोरुक्तमित्यर्थः।	जन्मेति ॥ 'सूत्रे' इति 'जन्मादिकर्तृत्वं विष्णोः' इति च शेषः। (क.)	२२१
१७. ऊर्णनाभ्यादिवदत्तृत्वम्	ऊर्णनाभ्यादिवद्यदत्तृत्वं	२२१

१८. श्रुत्यनन्तरम्	श्रुतिरित्यनन्तरं (क.)	२२५
१९. भयाद् विष्णुदीस्याऽनन्द-	भाणं विष्णुदीक्षानन्द.... (क.)	२२७
२०. प्रभुर्विष्णुरात्मनो	आत्मनः सकाशात् – (क.)	२२८
२१. पिबन्तौ किं जीवपरौ उत परस्पे एवेति संशयः सूचितो भवति।	पिबन्तौ किं भगवद्रूपविशेषौ, उतान्याविति संशयः। (क.)	२३२
२२. तद्दर्शनादिति	प्रवृत्ततद्दर्शनादिति (क.)	२३३
२३. सङ्कोचकाविति वा	संहारकाविति वा (क.)	२३३
२४. स्वीकारमात्राभ्युपगमेन	जीवसमवेतभोगस्वीकार-मात्राभ्युपगमेन (क.)	२३६
२५. तच्छब्दस्य विपरिणामेन	तच्छब्दस्य अन्तर्यामिण इति प्रकृतेरिति तत्तज्जीवस्येति च विपरिणामेन (क.)	२७०
२६. सर्वाश्रयत्वादपहत-पाप्मत्वादिप्रकारः	सर्वाश्रयत्वापहतपाप्मत्वादिप्रकारः (प.)	३७०
२७. सुधासरसी वा	सुधासरसी वा सुधासमुद्रौ अमृतसरसी वा (प.)	३७७

लुप्तवाक्यसङ्ग्रहः		पृष्ठसङ्ख्या
१. मुद्रितपाठः	देवतां स्तोत्रे मीमांसन्ते।	
संशोधितपाठः	महाव्रते तदाख्यकर्माङ्गभूते देवतास्तोत्रे मीमांसन्ते, विषयतयेति शेषः। (-क)	२०३
२. मुद्रितपाठः	सूत्रपदेनान्वयः।	
संशोधितपाठः	इतः परं **'इत्यादिवाक्यविवक्षितानां तत्तात्पर्यविषयीभूतानामिति वाऽन्वयः'** इत्यधिकः पाठः क.पुस्तके।	२०६

३. **मुद्रितपाठः**	भावः ।	
संशोधितपाठः	इतः परं **'तस्मान्न व्याप्त्यभाव इति वाक्यशेषः'** इति क. पुस्तकेऽधिकः पाठः ।	२०८
४. **मुद्रितपाठः**	अदितिशब्दवाच्यत्वमन्यथा	
संशोधितपाठः	अदितिशब्दवाच्यत्वं ब्रह्मणः श्रुत्यन्तरगतादितिशब्दवाच्यत्वे निमित्तमिति । अन्यथा (क.)	२२२
५. **मुद्रितपाठः**	हिशब्दः प्रसिद्धौ ।	
संशोधितपाठः	हिशब्दस्तथा प्रमितत्वादिति हेतौ । तस्माल्लिङ्गं निरवकाशमिति भावः । (क.)	२२४
६. **संशोधितपाठः**	सिद्धमिति शेषः ।	२२४
मुद्रितपाठः	इदं वाक्यं मुद्रितपुस्तके नास्ति ।	
७. **मुद्रितपाठः**	उक्तत्वादिति वाक्यशेषः ।	
संशोधितपाठः	उक्तत्वाद् विष्णोस्तु सिद्धमिति वाक्यशेषः । अत्र सर्वस्यात्तृत्वमित्यनुषज्यते (क.)	२२४
८. **मुद्रितपाठः**	भाष्यश्रुतिस्थाक्ष्यादित्यपदयोश्च यथाश्रुत एवार्थः । मण्डलपरत्वे तद्भाष्यस्थादित्यपदं	
संशोधितपाठः	भाष्यस्य यथाश्रुत एवार्थः । श्रुतिस्थाक्ष्यादित्यपदयोर्मण्डलपरत्वे चैतद्भाष्यस्थादित्यपदं- (क.)	२४७
९. **मुद्रितपाठः**	प्रयुज्यन्ते । कथम् ? यतोऽन्तर्यामिणमपेक्ष्यैव	
संशोधितपाठः	प्रयुज्यन्ते । नैतावताऽभेदो मन्तव्यः । कुतः ? यतः ईशेशमन्तर्यामिणं विष्णुं मुख्यतो वाच्यमपेक्ष्यैव (क.)	२५४

१०. **मुद्रितपाठः** न कुर्वन्ति । अर्चिषम्

संशोधितपाठः न कुर्वन्ति सर्वथा ते ज्ञानिनः
स्वज्ञानप्रसन्नभगवत्सामर्थ्यात्
कर्मक्षयोत्क्रान्तियुता अर्चिषम् (क.) २६४

११. **मुद्रितपाठः** मुद्रितपाठे नास्ति ।

संशोधितपाठः (क.पाठे एवं वाक्यविन्यासो विद्यते):– 'जीवानां
नीचोच्चभाववन्नियम्यनियामकभावसम्भवः किं न
स्यादित्यत आह – नियमेति ॥ पूर्वव्याख्यानवन्नात्र
सप्तमीतत्पुरुषः । किन्तु कर्मधारयः । नियम्यते
व्यवस्थाप्यतेऽर्थोऽनेनेति नियमो नियामकम् ।
तथा च नियामकविशेषप्रमाणाभावादित्यर्थः । तथा
च न दृष्टान्तमात्रेण नियम्यनियामकभावसम्भव इति
भावः । ननु सिद्धान्तिनाऽप्यग्न्यादितत्तज्जीवानां
जीवान्तरनियामकत्वाभ्युपगमात्-' – (क.) २६६

१२. **मुद्रितपाठः** चशब्दो हेतुसमुच्चये । आदिपदेन

संशोधितपाठः चोऽवधारणे । पूर्वपक्षे श्रौतशरीरशब्दः 'इदं
पूर्वपक्षशरीरम्' इत्यादाविव स्वरूपार्थोऽपि
भवति । आदिपदेन' (क.) २७०

१३. **मुद्रितपाठः** कुतः ? श्रौतशरीरशब्दस्य इदं पूर्वपक्षशरीर-
मित्यादाविव स्वरूपार्थत्वात् । जडप्रकृतेश्च

संशोधितपाठः कुतः ? यस्येत्यादिना वाक्येनान्तर्यामिणः
पृथिव्यादिसर्वशरीरत्वश्रवणात् । तेनैव
सर्वात्मकत्वावगमात् । जडप्रकृतेश्च- (क.) २७०

१४. **मुद्रितपाठः** -शरीरत्वादिति हिशब्दाभिप्रायः । तथा च

संशोधितपाठः -शरीरत्वाङ्गीकारादिति हिशब्दाभिप्रायः । न हीत्यस्य तस्मात् स न विष्णुरित्यावृत्त्यनुवृत्ति-

लभ्यसाध्येनान्वयः । तथा च (क.) २७०

१५. **मुद्रितपाठः** नानुमानात्मकेति ॥ 'अनुमानप्राप्तप्रामाण्या-सदागमोऽनुमात्मकः' इति तत्त्वप्रदीपोक्ते-रनुमानात्मकेऽनुमानसिद्धप्रामाण्यके

संशोधितपाठः नानुमानात्मकेति ॥ अनुमानप्रधानकागमसिद्धेत्यर्थः । यद्वा, प्रमाणत्वेन अनुमीयत इत्यनुमानमागमः । तथा चानुमानात्मके उक्तव्युत्पत्त्या अनुमानशब्द-वाच्येऽनुमानसिद्धप्रामाण्यके (प.) ३२७

१६. **मुद्रितपाठः** सा चेति ॥ 'सा च' सर्वधृतिरपि इत्यादिना प्रशासनादुच्यते यतोऽतोऽपि ब्रह्माक्षरमित्यन्वयः । आदिशब्देनैवं

संशोधितपाठः सा चेति ॥ न केवलं सर्वधृतिरेव । किन्त्वाज्ञामात्राधृतिरपि – इति युक्तिसमुच्चयेऽवधारणे कैमुत्येनोच्यत इति सूत्रशेषोक्तिः । इत्यादिनाऽन्वयो यत इति विशेषोऽस्यापि ब्रह्मैवाक्षरमिति प्रधानसाध्येनान्वयः । आदिपदेनैवं' (प.) ३५३

१७. **मुद्रितपाठः** सुषिरश्रुतेः इति सुषिरपदघटितश्रुतेः ।

संशोधितपाठः सुषिरश्रुतेः सुषिरस्याऽकाशस्यैव साक्षात् सर्वाधारत्वप्रतिपादिकायास्तस्यान्त इति सुषिरपदघटितश्रुतेः (प.) ३८५

१८. मुद्रितपाठः प्रबलाद् वामनशब्दादेवेशानो विष्णुरेवेत्यर्थः । कुतो

संशोधितपाठः प्रबलाद् अन्यत्र निरवकाशाद् वामनशब्दादेवेशानो विष्णुरित्येव प्रमितो न लिङ्गाद् वायुरिति योजना । अनेन सूत्रे शब्दादित्यस्य आवृत्तिः । तत्रैकस्य विपरिणामः । सौत्रेशानशब्दो वाऽनुषञ्जनीयः । इतिशब्दोऽध्याहार्यस्तत्त्विति चानुवर्तते । तथा च शब्दादेव लिङ्गात् प्रबलादन्यत्र निरवकाशाद् वामनशब्दादेव ईशानशब्दस्तत्त्विति प्रमितो विष्णुवाचित्वेनैव निश्चितः । न तु दुर्बलाल्लिङ्गाद् वायुवाचित्वेनेति वा ईशानशब्दो विष्णुरित्येव प्रमित इति वा सूत्रार्थ उक्तो भवति ।
कुतो (प.) ४१३

१९. मुद्रितपाठः अत एवेति ॥ तथा च धाता यथा पूर्वकल्पे सूर्याचन्द्रमसावकल्पयत् तथाऽस्मिन् कल्पेऽपीति प्रतिकल्पं श्रुत्या कथने देवानां सर्वकल्पेषु प्रजननाख्यसद्भावसिद्धेरध्याहारं विना अतएवशब्दाद् बुद्धिस्थाद् यथैवेति स्पष्टश्रुत्यन्तराच्च तेषां सर्वकल्पेषु

संशोधितपाठः अत एवेति ॥ श्रुतौ तथाऽस्मिन् कालेऽपीत्यध्याहारेऽनयैव तेषां तेषां प्रभवनियमावगमात् । देवानां सर्वकल्पेषु प्रजननाख्यसद्भावसिद्धेरध्याहारापेक्षां विनाऽपि अतएवशब्दाद् बुद्धिस्थाद् यथैवेति स्पष्टश्रुत्यन्तरात् तेषां सर्वकल्पेषु प्रभवसिद्धेरित्यर्थः । (प.) ४३८

२०. मुद्रितपाठः कश्चित् असाधारणः इतरशूद्रादिभ्यो व्यावृत्तो विशेषः तेष्वस्तीत्यर्थः । यत इति शेषः । अतो न 'नाग्निः' इत्यादिनिषेधविषयत्वं तेषां, किन्तु अपवादविषयत्वमेवेति

न तत्प्रतिबन्धेतरशूद्राणां वेदाधिकारः शङ्कच इति भावः।

संशोधितपाठः कश्चिद् वेदार्थावधारणनिषेधाविषयताप्रयोजक इतरशूद्रादिभ्यो व्यावर्तको विशेषस्तेष्वस्तीत्यर्थः। स चोत्पन्नापरोक्षज्ञानित्वकृतः विदुरादीनां शूद्रत्वेऽपि उत्पन्नापरोक्षज्ञानत्वेन ''नाग्निः'' इत्यादिनिषेधाविषयत्वादनिषिद्धाध्ययनानां तेषामप्यपवादविषयत्वमेवेति न तत्प्रतिबन्धा इतरशूद्राणां वेदाधिकारः शङ्कच इति भावः। (प.) ४७२

२१. मुद्रितपाठः प्रधानादिगतधर्माणां तदधीनत्वादीशाधीनत्वाच्च न केवलं गुणवाचिशब्दजातमर्थवत्, किन्तु तत्प्रातिपदिकादिरूपं वा पञ्चमीविभक्त्यादिरूपं वाऽवरदुःखिबद्धत्वादिदोषवाच्येऽपि तस्मिन्नीश्वरे वाच्यतया गृहीते सत्येवार्थवदेव न निरर्थकम्।

संशोधितपाठः प्रधानादिगताव्यक्तत्वपरत्वापरत्वादिधर्माणां तदधीनत्वाद् ईशाधीनत्वाच्च तदव्यक्तत्वादिधर्मजातं तस्यैवातस्तस्मिन्नेवाव्यक्तपरावरत्वादिगुणदोषोभय-वाचिशब्दजातमस्ति चेदर्थवदव्यक्तत्वादि-प्रवृत्तिनिमित्ताभिधेयवदेव न निरर्थकमिति योजना॥ (प.) ५१२

२२. मुद्रितपाठः सूचिता। इतिशब्दात्

संशोधितपाठः सूचिता। तेनापिर्यद्यपितथापीत्यर्थतयाऽपि योजनीयः।

तेन सौत्रस्तुशब्दोऽप्यर्थतयाऽपि व्याख्यातः ।
कुतो हरिरेवेत्यतः प्रवृत्तं यथेत्यादिहेत्वंशं
व्याचष्टे – ता वा इत्यादिना ॥ तत्त्विति
विपरिणतमत्रापि सम्बध्यते । अध्याहृतेन
हरिमित्यनेनैवार्थतुशब्दान्वय इति केचित् ।
इतिशब्दात् । (प.) ५२८

INTRODUCTION

INITIATION TO VEDAS :-

The Bhagavan is by Himself , the embodiment of Sat-Chit-Ananda. (flawless wisdom and bliss). His reflexion, the soul (Jeeva) is also an embodiment of Sat-Chit-Ananda. For such a soul, to realise his own ananda etc., the worldly and family attachment acts an impediment. From the time immemorial besieged by with seven enclousers around viz. the Positive ignorance , the desire, the karma-lot begun for consumption, the body specific to the particular soul (linga Deha), the screen covering self attributes, (Swagunacchadika) the screen-ultimate covering self realisation (Paramacchadika) and the will of ultimate absolute controller (EiShwareccha) this jeeva is tied up with the samsara.

In order to help deshackle this attitude of worldly attachment of the soul the entire vaidik literature is propounded.

The real right vaidik classics profess Lord Vishnu as totally truely ever different and distinct from the entire universe comprising different and distinct animates and inanimates. And He is fully wholly an embodiment of infinite, glorious(kalyana) attributes without any embellishment or flaws. In this way vaidik shastras help the jeeva in eradicating the befallen misery.

This is what the Shrutis say ,

'अदुःखमितरत् सर्वं जीवा एव तु दुःखिनः ।
तेषां दुःखप्रहाणाय श्रुतिरेषा प्रवर्तते ॥' *(भा.दी.उदा-श्रुतिः, पृ.२)*

Inanimates have no misseries . Only the jeevas are sorrowful. For eradication of their sorrows these shrutis propound the Bhagavan who is the cause for liberation from miseries.When jeevas acquire the right knowledge and perception of the Bhagavan, He would liberate such souls from the worldly shackles. This is the main purpose achieved from vedas.

Uncomposed (unauthored) Vedas alone establish Dharma etc.,

The existance of the Dharma, the Adharma, the heaven, the

hell and such other entities, not perceivable through the organs can be established only by the vedas. For this purpose all the visioneries should accept the vedas which are uncomposed (unauthored) by anyone.

This fact is enunciated by Acharya Madhwa in his Anuvyakhyana

'न हि धर्मादिसिद्धिः स्यान्नित्यवाक्यं विना क्वचित्।
पुंवाक्यं ज्ञापकं न तत्।' (अनुव्या.१-१-१. श्लो.६८-६९)

To establish the presence of Dharma and the likes no man-composed scriptures (Pourusheya Agama) are capable.

Followers of every Darshana (cult) claim that their propounder of Darshana is omnicient, the all-knower and hence his scriptures are only believable. But, if we look at them critically, one opposes the other. The reason is that since all of them are man-propounded scriptures and there in them, we can be sure of the possibilities of creeping in of the flaws such as non-importation of true knowledge or importation of non-real knowledge. No conclusive realities can be established through such contradicting scriptures.

For this to be avoided, it becomes essential to accept the Apourusheya Vedas - ie. "statements not composed by any one".

To conclude that Vedas are Apourusheya we have the Geeta statement as

'वेदान्तकृद् वेदविदेव चाहम्' (भ.गी.१५-१५)

Shri Krishna while declaring that He, in Vyasa manifestation is composer of ब्रह्मसूत्रS (वेदान्तकृत्) says He knows what vedas profess but simultaneously clarifies the fact that He is not the composer of Vedas.

So that, all the three Darshana Propounders (Shankara, Ramanuja and Madhwa) rightly believe that the Vedas are Apourusheya as no one is known as the composer of them. (Bhagavan Krishna Himself says He is not the composer.)

Shri Vishnu is the main Import of Vedas :

The Primary gamut of the entire vedas is Vishnu alone.

The Bhallaveya Shruti declares, "All the words, Agni and the like, primarily describe Vishnu and hence enter Him as His names'

'नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति'

(ब्र.सू.भा.उदा- भा.श्रुति१-१-१)

Shri Krishna in Geeta says 'I alone am knowable from all the vedas'

'वेदैश्च सर्वैरहमेव वेद्यः' *(भ.गी.१५-१५)*

Kathakopanishat puts it like "Entire Vaidik literature describes the form of Vishnu who is designated by the Omkara.

'सर्वे वेदाः यत्पदमामनन्ति' *(कठ.उ. २-१५)*

Bhallaveya Shruti declares "The words such as Indra would never designate the divinities such as Indra as their ultimate sole meaning.

'नामानि विश्वाऽभि न सन्ति लोके' *(ब्र.सू.भा.उदा .भाल्लवेयश्रुतिः १.१.१)*

When it is said as above, an objection may arise like,

"If, in case the Indra and all such other words do not mean to address Indra and such other divinites and are meant to depict Vishnu alone all the Suktaas in Vedas are required to be named as Vishnu Sukta. If so, in vedas, the distinctions like Indrasukta, Agni sukta, Vaayusuktha cannot be said to exist.

In this regard, it is to be said that though the ultimate, absolute meaning of the words Indra etc., is Vishnu, as a secondary important meaning the divinities Indra etc., are also given to them. Hence, naming of the suktas like Indra Sukta, Agnisukta, Vaayusukha etc., is quite in order.

The samething is said in Paingi Shruti as,

'सर्वोत्कर्षे देवदेवस्य विष्णोर्महातात्पर्यं नैव चान्यत्र सत्यम्।

अवान्तरं तत्परत्वं तदन्यत् सर्वागमानां पुरुषार्थस्ततोऽतः॥'

(वि.त.नि.उदा- परिच्छेदः १)

Or to put it, yet in another way,

Agni Sukta and such other suktas elucidate the forms of Bhagavan designated by the similar names. Thus on the basis of the names like Agni, Indra and so on of the Bhagavan Himself the system of naming the suktas under such name is also quite (most) relevent.

'पृथग् रूपाणि विष्णोस्तु देवतान्तरगाणि च ।
अग्न्यादिसूक्तवाच्यानि नाम्ना सूक्ताभिधा भवेत् ॥' *(ऋग्.भा. अ.-१)*

With this it is established that Vishnu, the greatest of all is the main entity elucidated by the Vedas.

THE GREATNESS OF BRAHMASUTRAS :-

To rightly and doubtlessly establish that "Vishnu is pronounced by the entire Vedas" Brahmasutras come to our help.

In some places, on the surface of some of the statements in Vedas they look like conveying opposing meanings .

In some other places they seem to generate doubts and contradictions or at times they even can cause wrong impressions. In order to eradicate such possibilities, during the last part of Dwaparayuga Shri Vedavyasa took birth and formulated the Brahmasutras.

Brahmasutras are the formulae (structured logical) useful in assigning proper and definite meaning to the Shrutis/Vedas. With their guidance real meanings of the shrutis can be derived. Brahma means Vedas. Sutras that are the guiding directive formulae for obtaining the decisive meaning of Vedas are Brahmasutras.

Alternatively, Brahma means the ultimate God (Para Brahma). Which lead us to decisively comprehend the form of ParaBrahma are the BrahmaSutras.

ACHARYA MADHWA'S BRAHMASUTRA BHASHYA

Doctorines based on the Sutras are recognised and accepted. In Indian philosophical Darshanas (Doctorines) founders of such Doctorines require necessarily to write their commentaries (Bhashyas) on Bhagavad geeta, Upanishads and Brahmasutras so as to establish their tenets and thereupon propogate their

doctorines. Thus, traditionally the above three philosophical components are termed as Prasthana Traya.

Acharya Trio has written Bhasya to this Prasthana Trio. Out of the three, Shankara and Ramanuja Bhashyas are very elaborate. On the other hand , Acharya Madhwa's Bhashya is short and crisp like sutra. Hence, without the help of Teekas and Tippanis, to understand the Bhashya by laymen and even ordinary scholars is difficult.

This fact is stated by Narayana Panditacharya as :

'बालसङ्गमपि बोधयद् भृशं दुर्निरूपवचनं च पण्डितैः'

(श्रीमध्वविजयम् - ९-१०)

The excellence of Acharya Madhwa's Bhashya is in his quoting Pramanas to espouse his every statement. To cite an example to this, at the very outset of his Bhashya Shri Madhwa States, "In the Dwapara Era, at the time when the Tatvajnana was diwindling, Shri Vedavyasa took incarnation , Segregated the Vedas and wrote Bhramasutra to fecilitate deciphering the real import of Vedas. Shri Madhwa refers, in this context, in support to this Statement, shlokas of Skandapurana.

'Matter of factly, Acharya's words themselves are proof for whatever he pronounces. He is a Sarvajna (all-knower); He has no intention of deceipt . Even then, to uphold the guiding tradition of greatmen to the followers, Acharya quotes testimonial words of proof.' This is declared by Trivikrama Panditacharya in his Tatwa pradeepa (a treatise on Madhwa's Bhashya)

'यद्यपि आचार्यः स्वोक्तार्थे स्वयमेव प्रमाणं सर्वज्ञत्वादविप्रलम्भकत्वाच्च ।
तथाऽपि स्कान्दे चोक्तमिति प्रौढवादं करोति'

This is Acharya Madhwa's compassion towards his followers.

IMPORT OF ADHYAYAS AND PADAS

In Brahmasutras, there are four Adhyayas viz., Samanvaya, Avirodha, Sadhana and Phala. Each Adhyaya has four Padas.

To give a sample, the following is how Acharya has explained the imports of first Chapter, i.e, Samanvayadhyaya.

1. Anyatra prasiddha nama pada.
2. Anyatra prasiddha linga pada.
3. Ubhayatraprasiddha nama-lingapada
4. Anyatraiva prasiddha Shabda pada.

BHASHYADEEPIKA OF SHRI JAGANNATHAYATI

In the auspicious heritage dynasty of Shri Madhwacharya Mula MahaSamsthan which was being refered as Purvadi Matha till shri Rajendrateertha (1444 AD) and later to Shri Vyasarajayati (1539 AD) which came to be known as Shri Vyasarajamatha many eminent monks brought grandeur to the peetha by many unique contributions to the Dwaita Siddhanta in their own style.

As a tenth successor to Shri Vayasaraja, Shri Raghunatha Teertha renowned as Sheshachandrikacharya beautified the peetham. Shri Jagannathayati was the Shishya of him.

After many years of initiation into Sanyasa by Shri Raghunatha Teertha as his successor Shri Jagannathayati took the reigns of the Samsthana (1755-1770) and propogated Madhwamata. As traditionally believed he has lived for more than 70 years. His vrundavana is in Kumbhakonam kshetra.

HIS WRITINGS

Shri Jagannatha yati has written three Granthas. But the treatise on Rugbhashya Teeka, his third work is not available yet. The other two have already been published. The first one known as SutraDeepika is small work ; a straight commentary on Brahmasutras. Here the import of Sutras is explained in accordance to Madhwasiddhanta.

The Second one is the subject work known as Bhashya deepika. In its volume and import it is a great work; It is written as an extensive commentary on MadhwaBhashya.

BHASHYA DEEPIKA'S DISTINCTIVE SPECIALITIES

1. To bring out the import of Acharya Madhwa's every word of Bhashya.
2. To view critically the other earlier commentaries written on the Bhashya by quoting those sentences. To refer to the

other famous Vyakhyanas like those of Shri Vadiraja, Shri Raghoottama Teertha, Shri RaghavendraTeertha etc.

3. Extensive references quoted from Tatvapradeepa of TrivikramaPandita and Padmanabhateertha's Sattarka-Deepavali.

4. Total unravelling of meanings of all shrutivakyas refered in the Bhashya.

5. Superfluously observed controversies between the commentaries of Trivikrama Panditacharya and Sri Jayateertha are cleared.

6. Collects and assembles here various imports of Shrutis refered and explained by Acharya Madhwa in his various works like Bhashyas.

This being the case, it does not amount to be an exaggeration if it is stated that no other work except Shri Jagannathayati's Bhashya Deepika can be found to furnish and make us understand explicit and entire imports of SutraBhashya of Acharya Madhwa.

EXPLANATIONS ON SOME SNIPPETS DRAWN FROM BHASHYADEEPIKA

1. VEDIC BRANCHES :–

In Dwaparayuga, when Tatvajnana was lost, Shri Vedavyasa took manifestation, revived the pure form of Vedas that suffered their proper pronounciation form and classified them.

In Krutayuga, vedas were in undivided form unlike as they are now , like Rugveda Yajurveda and so on. Mula veda was that one stock of Vedas congregated together.

Later in Krutayuga, this Mulaveda got divided into three viz. Ruk, Nigada and Sama by the Bhagavan in His Hayagreeva Rupa. These are called Upavedas.

In Vaivaswata Manvantara, Sage Atharva, born as the son of ChaturmukhaBrahma, visioned a part which was already in the Nigada sector became baptised as Atharva in relation to his own name.

At the end of Dwaparayuga, Bhagavan Vedavyasa, extracted some sections from each of the above Ruk, Nigada, Sama and Atharva seperately and presented them newly in four forms as

Rugveda, Yajurveda, Samaveda and Atharvaveda. These came to be called as Avantaravedas. Acharya Madhwa has stated this in his Rugbhashya.

'ऋचः स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ।
यजूंषि निगदाच्चैव तथा सामानि सामतः ॥' *(ऋ.भा. – १)*

Bhagavan Vedavyasa further divided Rugveda into 24, Yajurveda into 101, Samaveda into 1000 and Atharvaveda into 12 branches.

In this context, Jagannathayati in his BhashyaDeepika, presents two things.

In the Bhashya, the intention to convey that during the last part of Dwapara the Tatvajnana has started dwindling was the reason behind the presentation of the details of Upavedas, Avantara vedas and their branches.

Dwapara word indicates, 'द्वावेव धर्मपादौ यस्मिन्' This means only two parts (out of four) of Dharma remained on the earth (the other two parts of Dharma are lost indicating the flourishment of Adharma). Thus, due to the influence of bad time Tatwajnana was vanishing and hence the people were not even aware of the branches of vedas. As such they were worried and disturbed. This situation is picturised in Bhagavata as ,

'चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ।' *(भागवतम् १-३-२१)*

So that, Vyasa Bhagavan, to elevate the people from the gloomy situation of prevailing loss of true jnana divided the vedas for their benefit .

Secondly, there is yet another point requiring clarification.

Acharya Madhwa has quoted another Smruti in his Atharvana Bhashya. In that Smruti the mode of segregation of Vedas as done by Vedavyasa is differently stated.

'एको वेदः कृते ह्यासीत् त्रेतायां स त्रिधाऽभवत् ।
स एव पञ्चधा जातो द्वापरं प्राप्य वै युगम् ।
उत्सन्नः स कलिं प्राप्य वेदः प्रायेण सर्वशः ॥' *(आथर्वणभा. १)*

There was only one veda in Krutayuga. In Tretayuga it became three. In Dwapara the same branched into five. In Kaliyuga the whole veda was lost.

So, this Smruti says that in Tretayuga Veda was of three forms - Viz , Ruk, Nigada and Sama, But, it is also true that at that period there was even Atharvaveda as visioned by sage Atharva.

The same smruti states, " In Dwapara Veda branched out into five. And in kali yuga alone the entire veda vanished"

On the other hand, the Sutrabhashya States,

'वेदम् उत्सन्नं व्यञ्जयन् चतुर्धा व्यभजत्'

This means "In Tretayuga, the HayagreevaRupa of the Bhagavan classified the vedas into Ruk,Nigada, Sama and Atharva. The same classification was lost in the end period of Dwapara. The same vedas Vedavyasa evolved into four forms by way of His pronuncements.

The following can be seen from the above analysis of statements available in SutraBhashya and Atharvana Bhashya. "One seemingly opposes the other Smruti refered in Atharvana Bhashya". This apparent, that is seeming rather than real, (Superficial) controversy is cleared in his Bhashya Deepika by Jagannathayati.

In the Smruthi, though the mention of the three Vedic divisions as the main tools for Bhagavatpuja is made it does not rule out the existance of Atharva veda as another device during Treta yuga. Hence, there is no objection by the Smruti to Acharya's Sutra Bhashya.

In the same manner, it can be infered that it is not out of place for Smruti to mention the Itihasa Puranas, the pourusheya veda, as the fifth division of veda along with other four Apourusheya veda divisions. Also, as regards the times of loss of vedic knowledge there is no controversy between the Smruti refered in Atharvana Bhashya and the Sutra Bhasya. Surely, even during the end period of Dwapara yuga due to the wrong texts, faulty interpretations and such man made anamolies on vedas the Jnanahrasa (deterioration of wisdom) can be said to have been making its way into the minds of people just before the Vyasaavatara. But, after the advent of Kaliyuga the total destruction or deterioration of Vedic Jnana occured.

2. AUTHORITY - DISCUSSION ON TAKING UP STUDY OF BRAHMAVIDYA :–

Acharya Madhwa has dealt with the topic of Vaidikastudies in the context of writing Bhashya on the first Sutra , 'ॐ ॐ अथातो ब्रह्मजिज्ञासा ॐ' . As a derivative of main topic, in this Sutra the question as to who is authorised to study Brahmavidya came up for discussion. Acharya Madhwa quoting extensively from Bhagavata Tantra says

'मन्दमध्योत्तमत्वेन त्रिविधा ह्यधिकारिणः ।
तत्र मन्दा मनुष्येषु य उत्तमगणा मताः ॥
मध्यमा ऋषिगन्धर्वा देवास्तत्रोत्तमा मताः ।
इति जातिकृतो भेदस्तथाऽन्यो गुणपूर्वकः ॥
भक्तिमान् परमे विष्णौ यस्त्वध्ययनवान् नरः ।
अधमः शमादिसंयुक्तो मध्यमः समुदाहृतः ॥
आब्रह्मस्तम्बपर्यन्तमसारं चाप्यनित्यकम् ।
विज्ञाय जातवैराग्यो विष्णुपादैकसंश्रयः ।
स उत्तमोऽधिकारी स्यात् सन्यस्ताखिलकर्मवान् ॥'

(ब्र.सू.भा.उदा– भागवततन्त्रवचनम्-१.१.१)

Three sections of rightful (authenticated) persons (adhikaris) for Brahma Vidya are - Manda , Madhyama and Uttama. Greatest of human beings (to be reckoned with on top) are Mandadhikaris. Rushis, Gandharvas, Pitrus and Chakravartis are Madhyamadhikaris. Devatas are the higest ranking Adhikaris . The above categorisation is on the basis of Jaati (the birth).

On the basis of Qualities possesed also three categories are made.

One who studies out of devotion to Vishnu is Adhamadhikari.

Possessor of the top qualities like Shama-Dama and so on is the Madhyamadhikari. (devout devotion to God is Shama and tamed organs is Dama.)

The Uttamadhikari should possess the following qualities. He should believe that

1. The entire lot of souls, Jeevagana, from Chaturmukha to TrunaJeeva (grass) is under the absolute control of the Sarvottama Tatva, the Bhagavan.
2. Satyaloka, Swarga and all such Lokas are Anithya (tentative) and only Moksha loka is eternal (place of no return, final abode).
3. Every karma (act) should be performed shunning the desire of any fruit except as an offering to Bhagavan.

An objection here can be raised. Is it not unwanted and contradictory to give the classification of Adhikaris on the basis of qualities possessed when already it is given on the basis of birth (Jaati) .

To this, in Bhashyadeepika , Shri Jagannathayati gives replies as ;

General qualifying factor for VaidikaBrahmavidya for all the catagories is deservance to salvation. But this factor can be even possessed by a person other than of Trivarna. It can be even with a soul born as a beast or a bird. But such souls have no use of such qualification since they cannot go for Brahmavidya having born with such unintellegent material bodies.

In order to avoid such descripencies in deciding qualification due to birth conditions, Acharya Madhwa took up to present the theory of qualification for Brahmavidya on the basis of Guna, the inherent qualities of the jeeva quoting Bhagavata Tantra . This explanation avoids two more objections raised by Shivarkamani Deepikakara.

Jagannathayati also adds here one more justification.

The above statement disqualifies the person , even among the Trivarnikas (belonging to first three varnas), who is not devoted to vishnu , not devoted to the Guru and not possessing shama Dama and such other qualities. Thus it becomes untenable if the qualification is restricted to Trivarnas. Hence the qualification on the basis of qualities (Guna pradhana) is necessary to be explained as Sri Madhwa did.

Sri Jagannathayati has added his unique contribution to this concept of Gunapradhana Adhikara (Authority based on intrinsic qualities of jeeva) by giving a common definition for three categories of adhikaris. He summerises it as -

1. Study of Shastras with devotion to Vishnu,
2. Possession of Shama-Dama etc, qualities and
3. detatchment to wordly things with attachment to Vishnu.

These three qualities should be common to these categories of Adhikaris Viz Manda, Madhyama and Uttama. But in the above three qualities if the first is very prominent but the other two are not so he is AdhamaAdhikari. If the second is prominent and the rest are not so he is madhyama and if the third is strong though other two are weak he is Uttama Adhikari.

In yet another way this gradation can be identified as suggested by Jagannathayati . If all the three qualities are at a low degree or level he is Adhamadhikari, if they are at a higher degree he is Madhyama and if they are at the very highest optimum degree he is the Uttama.

3. DECIPHERING SHRUTI'S IMPORT

It could be realised that without the help of Bhashya Deepika, the complete import of the Shrutis refered in Sutrabhashya would have been far from our reach. We should be immensely greatful to Shri Jagannathayati for this.

In some cases Shri Jagannathayati gives the origin of such Shruti while explaining the meaning.

In some other cases he gives the entire text of such shrutis of which Shri Madhwa would have quoted a bit.

In this respect, we can cite examples to his mastery in explaining shrutis' meanings. One such example is :

'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्। नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥'

(मु.उ. १-१२-१२ ब्रह्मसूत्र - उपोद्घातभाष्यम्)

To give an introduction to this Shruti, the author says, "This

shruti refered to establishes that to be prequalified to study Brahmavidhya one must have the intrinsic sense to discriminate Sara and Asaara, Nitya and Anithya and must be unattached to worldly things."Then he explains the shruti's import.

To be qualified to gain Bhramhajnaana, one must realise from his close study of scriptures that the performing good acts (कर्म) desiring the pleasure of heaven and such non-permanent places are to be abandoned. It is because, the eternal Moksha cannot be attained by resorting to Kamya karma (Acts with desire.). Hence , to earn the exclusive and specific knowledge of Brahma, such ascetic person should approach with humility and with respectful offerings a guru who is totally attached to Brahma. Bhashya Deepika's Author gives a beautiful explanation to the word 'Samitpanih'. It not only indicates, the seeker of Brahmajnana should carry samits to offer to guru, but also carry fruits etc to offer with folded hands. All this is stressed to signify the tradition that the seeker is required to be in total surrender to Guru to achieve his goal of acquiring Brahmajnana.

Shruti uses the word Vijnana to imply the specific meaning of explicit knowledge (Vijnana) and also yet another word Brahmana to mean "the knower of Brahma' . Both these words qualify and define the Devathas who are the Uttamadhikaris of Brahmavidya. It is so because the knowledge acquired of only Devathas is termed as Vijnana and the status as a Devata is attainable only by the Brahma Aparoksha Jnani (Perceiver of ParaBrahma) To quote proofs for this inference,

'देवादीनां तु तज्ज्ञानं विज्ञानमिति कीर्तितम् ।'

(गीताभाष्योदाहृतप्रमाणवचनम् - ६-८)

'नैव देवपदं प्राप्ताः ब्रह्मदर्शनवर्जिताः' *(गीतातात्पर्योदाहृतम्)*

This is how Bhashyadeepika Author relates the special meanings to significant words seen in the Shrutis.

4. Bhagavan's benevolence begotten through good acts.

Sutra Bhashya explains the word अतः appearing in the first sutra.

यतो नारायणप्रसादमृते न मोक्षः , न च ज्ञानं विना अत्यर्थप्रसादः,
अतो ब्रह्मजिज्ञासा कर्तव्या ।

Without the benevolence (प्रसादः) of Narayana no liberation/ salvation and the benevolence is not accomplished without the perception of Him. Hence the debate inquest to know Him (ब्रह्मविचारः) to be resorted to .

The above statement on one side, we have yet another statement like,

'तत् कर्म हरितोषं यत्' *(भागवतम् ४-२९-५३)*

which means "That act which keeps Shri Hari pleased is termed as (good) Act (कर्म).

One more Statement of Shri Krishna in Bhagavadgeeta promises

'य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥' *(भ.गी. १८-६२)*

"He who preaches this very secret classic of Geeta to my devotees, acquires and practices exceptional devotion himself reaches Me without any apprehension". Viewing such statements we are given to understand that even through Karma one could earn benevolence of Bhagavan. As such, it may be deduced that the perception of Brahma (Brahma aparoksha Jnana) is not inevitably required to get Bhagavatprasada. So, the word in Sutra need not be said to mean as above.

This sort of objection, Acharya Madhwa has referred to Naradiya purana's words in the Bhashya and cleared it.

'कर्मणा त्वधमः प्रोक्तः प्रसादः श्रवणादिभिः ।
मध्यमो ज्ञानसम्पत्त्या प्रसादस्तूत्तमो मतः ॥
प्रसादात् त्वधमाद् विष्णोः स्वर्गलोकः प्रकीर्तितः ।
मध्यमाज्जनलोकादिरुत्तमस्त्वेव मुक्तिदः ॥'

The import of these shlokas goes as —

The Bhagavatprasada begotten from Acts with desire or no-desire is categorised as Adhama (lowest category.). It is Madhyama (Middle category) when it is from Shravana, Manana and Nididhyasana (hearing, digesting and contemplation) of Shatstras. And it is of the ultimaetly top most category, Uttama, when it is achieved by Aparokshajnana'.

"The Adhamaprasada of Vishnu gets you to swargaloka (one has to come back from there to samsara) , the Madhyamaprasada brings you to Janaloka , Tapoloka and Satyaloka. And only the Uttama prasada makes you eligible for ultimate salvation.

At this juncture, Bhashyadeepika Acharya analyses the concept of Prasada acquired from karma.

"Karma with desire results in Bhagavatprasada which in turn results in swarga attainment. Likewise it would also cause generation of detachment to material world and successively helps in Moksha attainment.

Similarly , Karma without any desire also causes Adhamaprasada which in turn catalyses purification of Antahkarana and through this clears the way for Moksha.

Here, Bhashyadeepikacharya raises a question and satisfies it as below -

The Naradiya purana states, "In general, Swarga is attained through Adhama category of Bhagavatprasada. But, Duryodhana and the like, even without this AdhamaBhagavatprasada, are said to have attained swarga. This is stated in Mahabharata[1]. Dharmaraja, when he went to swarga met Duryodhana and others there. The question here is how could this happen.

Bhashyadeepika raises this and answers on the basis of clarification appearing in Mahabharata Tatparya Nirnaya of Acharya Madhwa.

१. स्वर्गं त्रिविष्टपं प्राप्य धर्मराजो युधिष्ठिरः ।
दुर्योधनं श्रिया जुष्टं ददर्शाऽसीनमासने ।।

भ्राजमानमिवाऽदित्यं धीरलक्ष्म्याऽभिसंवृतम् ।
देवैर्भ्राजिष्णुभिः साध्यैः सहितं पुण्यकर्मभिः ।। *(म.भा.१८.१.४,५)*

"Devendra took Dharmaraja who bodily entered Swarga, the Indra Bhavana called Saankalpika swarga which was next to swarga loka. This Saankalpika swarga was built by Indra for his leela purpose. It was here in Sankalpikaswarga of Indra where Yudhisthira saw Duryodhana and others and not in the real swarga loka of Devendra.

'सर्वेषामुत्तरं लोकमैन्द्रं प्राप्येदमेव ते ।
स्थानमित्युदितो देवैर्दुर्योधनमवैक्षत ॥' *(म.भा.ता.नि.३२.९१)*

By the yogik capacity of the sages who get performed yaga under their leadership through Duryodhana and such other Asuras, they (such asuras) chanced to be present in only Saankalpikaswarga of Indra for a short spell of time and not in real Swarga. Duryodhana and others would have fallen to Andhantamas from Saankalpika swarga soon after that shortspell. There were other Asuras too who got performed such yagas but not under the leadership of such Bhagavata sages/Yagnik (Acharyas). Hence they were not preveleged to visit even such Saankalpikaswarga.

So , by this it becomes settled now that Duryodhana and others who staunchly envied and hated Shri Krishna are never ever entitled to enter real swarga but the artificial swarga called Upaswarga built below the real swarga for the purpose of such Asuras.

The same is stated in Geeta Tatparya by Shri Madhwa,

'मोक्षः साङ्कल्पिकः स्वर्गः भूतादित्वं फलं क्रमात् '

The very same Saankalpika swarga is obtained by the Nityasamsaris ie.Rajasarajasa and Rajasa tamasa category of jeevas. This swarga is similar to the actual real swarga. It is built for accomodating Daitya Shreshthas such as Duryodhana who are chanced to get Bhagavatha sages to perform yagas.

But the real swarga which is obtainable by the Adhama category Bhagavatprasada is the one which is included in the list of seven lokas contained in the batch of Bhuh, Bhuvah, Swah and so on. This swarga ie., Swarloka is attainable only by the Rajasasatwika category of jeevas.

This is how Bhashyadeepika explains the whole issue refered to in the Naradiyapurana quotation.

The above are of a few examples to show as to how Shri Jagannathayati's Bhashaydeepika treats some such important issues explicitly in its every page, every para and every word. Out of fear of increasing the volume, one or two only are presented as a sample.

A FEW WORDS ABOUT THIS PUBLICATION

This Bhashyadeepika was published in 1964 A.D. As ordered by His Holiness Shri Vidyaprasannatheerta Shripada of Sri Vyasaraja Mutt the then great scholar Late.Shri Magadi Ranganathacharya edited and Shri D. S. Krishnacharya published it. It was printed by the Bhashyadeepika Prakashanasamiti, Bangalore. It was not an easy task in those days when the present days of modern technologies and facilities were absent . It was very commendable work of Late. Shri Magadi Ranganathacharya to have edited the book with the help of Vidwans with the available manuscripts. We are indebted to him in our hearts.

We are bringing out this critical edition by comparing four hand written manuscripts. All efforts are made to give almost immaculable text. On comparing these manuscripts and the two printed editions we have appended the various texts. Some sentences which are not found in printed texts but are found in the manuscripts are also included . We hope the sadhakas appreciate and bless this effort of ours.

Shri GovindaRao Navalagund has furnished us with one hand written Manuscprit. It is designated as 'म'. क,ग,प are the other three manuscripts available from Samshodhana mandira treasure. क and ग manuscripts are available for only second pada of 1st Chapter . In 'प' manuscript are found only 3rd and 4th padas. While Hrishikeshiya text is furnished under 'ह' the Bhashya text used here is of most used contemporary version. In total, this first Chapter of Bhashyadeepika which we are now presenting is a very carefully edited version using various faultless versions of text. We hope this meticulously edited publication with useful appendices would be received well by the sadhakas.

OFFER OF THANKS —

To Paramapujya Guruji **Shri Vishweshateertha swamiji** who has nursed imparting Vidya and food to me I offer my sincere pranamas for his guidance.

I am indebted to Prof. Vem.Kutumba Shastriji the Chancellor, RastriyaSamskruta Samsthana for his generous concurrence to meet the expenses of the Publications of this book.

It will be a lapse if we fail to offer our sincere gratitude to Prof. D. Prahladacharya, former Kulapati of Tirupati Rashtriya Samskruta Vidhyapeeta and Chairman Poornaprajna Samshodhana Mandira for his valuable guidance and suggestions.

Heartfelt thanks are also due to Dr. A.V. Nagasampige, Director, PoornaPrajna Samshodhana Mandiram for his motivation and guidance in editing this work and for arranging external source of funds for the publication.

Shri Anantha Tantry, Retd. Professor of AlankaraShastra of Vidyapeetha has to be heartily thanked for his useful suggestion in editing this book.

My Sincere thanks are recorded to Shri Ranganatha Katti, Deputy Director of Samshodhanamandiram and other elderly Vidwans.

Sincere thanks are offered to Vidwan Kaddi Badari Narayanacharya for having made available the manuscript of SutraDeepika.

Thanks are also due to Shri U.B. (Bham) Gururaj Acharya for rendering this Upodghata in English (Forewords).

My thanks are also extended to Pt. Pradeepasimachar for making the pagelayout of the text.

I thank young Vidwans Shri Bheemasena and Shri Ramachandra for their proof correction efforts for some portions.

Sujana Vidheya

Pt. Shankaranarayana Adiga.

विषयानुक्रमणिका

प्रथमाध्यायस्य प्रथमः पादः — पृ.सं.

१. जिज्ञासाधिकरणम्

मङ्गलाचरणम् ०१
सूत्ररचनानुकूलप्रसङ्गः ०४
सूत्रलक्षणम् १२
अथ ब्रह्मजिज्ञासायाः कर्तव्यत्वसाधकं जिज्ञासाधिकरणम् १९
अधिकारस्वरूपकथनम् २९
मोक्षस्य भगवत्प्रसादजत्वसमर्थनम् ४१
ब्रह्मशब्दार्थो विष्णुरेव ४५

२. जन्माधिकरणम्

परब्रह्मणो लक्षणकथनम् ६१

३. शास्त्रयोनित्वाधिकरणम्

परब्रह्मलक्षणस्यान्यत्राविद्यमानत्वसमर्थनम् ६७
अनुमानप्रामाण्यविमर्शः ६९
नास्तिक्यवादनिरासः ७२
सच्छास्त्राणि ७४

४. समन्वयाधिकरणम्

उपक्रमादितात्पर्यलिङ्गैः परब्रह्मण एव जगत्कारणत्वसमर्थनम् ७८
उपपत्त्यादिलिङ्गस्वरूपकीर्तनम् ७९

५. ईक्षत्यधिकरणम्

परब्रह्मणः साकल्येनावाच्यत्वेऽपि यत्किञ्चिद्रूपेण वाच्यत्वोपपादनम् ८४

६. आनन्दमयाधिकरणम्

आनन्दमयस्य ब्रह्मत्वसमर्थनम् १०६
सङ्गतिप्रदर्शनम् १०८
पूर्वपक्षः ११२
सिद्धान्तः ११५

७. अन्तस्स्थत्वाधिकरणम्

श्रुत्युक्तो देहान्तःस्थो विष्णुरेव १५०

८. आकाशाधिकरणम्

कतिपयश्रुत्युक्ताकाशशब्दवाच्यो भगवानेवेति समर्थनम् १५८

८. प्राणाधिकरणम्

कतिपयश्रुत्युक्तप्राणशब्दवाच्यो भगवानेवेति समर्थनम् १६३

९. ज्योतिरधिकरणम्

कतिपयश्रुत्युदाहृतज्योतिःशब्दः परमात्मवाचक इत्युपपादनम् १६६

१०. छन्दोऽभिधानाधिकरणम्

भगवतः गायत्रीशब्दवाच्यत्वसमर्थनम् १७०

११. पादान्त्यप्राणाधिकरणम्

ऐतरेयश्रुत्युक्तः प्राणो विष्णुरेवेति समर्थनम् १८४

द्वितीयः पादः

१. सर्वगतत्वाधिकरणम्

आदित्ये विद्यमानतया प्रतीतस्य सर्वगतत्वस्य
भगवत्येव समर्थनम् २०१

२. अत्तृत्वाधिकरणम्

सर्वात्तृत्वं परमात्मन एव नेतरस्येति प्रतिपादनम् २२१

३. गुहाधिकरणम्

कर्मफलभोक्तृत्वमेकस्यैव हरेरिति समर्थनम् २३०

४. अन्तराधिकरणम्

चक्षुरन्तःस्थो विष्णुरेव २४५

५. अन्तर्याम्याधिकरणम्

सर्वान्तर्यामी विष्णुरेव २६८

६. अदृश्यत्वाधिकरणम्

विष्णोरदृश्यत्वादिगुणवत्त्वप्रतिपादनम् २७९

७. वैश्वानराधिकरणम्

विष्णौ वैश्वानरशब्दसमन्वयः २९४

तृतीयः पादः

१. द्युभ्वाधिकरणम्

विष्णौ द्युभ्वाद्यायतनत्वसमर्थनम् ३२०

२. भूमाधिकरणम्

हरेरेव भूमशब्दवाच्यत्वम् ३३९

३. अक्षराधिकरणम्

विष्णावक्षरशब्दसमन्वयः ३४६

४. सदधिकरणम्

सच्छब्दवाच्यो विष्णुः, न प्रकृतिः ३६०

५. दहराधिकरणम्

हृत्पद्मस्थितिर्नाऽकाशस्य, परमात्मन एव ३६६

६. अनुकृत्यधिकरणम्

ज्ञानार्थमपेक्षितो भगवानेव, न ज्ञानिसुखम् ३९६

७. वामनाधिकरणम्

ईशानशब्दवाच्यः परमात्मैव न वायुः ४०८

८. देवताधिकरणम्

देवानां वेदविद्याधिकारप्रतिपादनम् ४२४

९. अपशूद्राधिकरणम्

त्रैवर्णिकेतराणां वेदविद्याधिकारनिराकरणम् ४५४

१०. कम्पनाधिकरणम्

भगवति वज्रशब्दसमन्वयः ४७४

११. ज्योतिरधिकरणम्

हरौ ज्योतिःशब्दसमन्वयः ४७९

१२. आकाशाधिकरणम्

भगवत्याकाशशब्दसमन्वयः ४८३

१३. सुषुप्त्यधिकरणम्

स्वप्नादिदर्शनं विष्णोरेव ४८७

१४. ब्राह्मणाधिकरणम्

श्रुत्युक्तो ब्राह्मणो विष्णुरेव न चतुर्मुखः ४९१

चतुर्थः पादः

१.आनुमानिकाधिकरणम्

परमात्मनः श्रुत्युक्ताव्यक्तादिशब्दवाच्यत्वसमर्थनम् ४९६

२. ज्योतिरुपक्रमाधिकरणम्

भगवतः श्रुत्युक्तज्योतिष्टोमादिकर्माभिधायकशब्दवाच्यत्व-
समर्थनम् ५२५

३. नसङ्ख्योपसङ्ग्रहाधिकरणम्

भगवतः पञ्चजनादिशब्दवाच्यत्वसमर्थनम् ५३२

४. आकाशाधिकरणम्

परमात्मनः श्रुत्युक्ताकाशशब्दवाच्यत्वप्रतिपादनम् ५३९

५. समाकर्षाधिकरणम्

वस्तुतः सर्वशब्दानां भगवन्मात्रवाचकत्वेऽपि जगति

समाकर्षाद् व्यवहारः ५४४

६. प्रकृत्यधिकरणम्

प्रकृत्यादिस्त्रीलिङ्गशब्दैः परमात्मन एव वाच्यत्वसमर्थनम् ५६६

७. एतेनसर्वेव्याख्याताधिकरणम्

भगवतो निषेधादिवाचकशब्दबोध्यत्वप्रतिपादनम् ५८३

अथ जगन्नाथयतिविरचिता सूत्रदीपिका ५८९

परिशिष्टम् – १ – ब्रह्मसूत्रानुक्रमणिका ६२५

परिशिष्टम् – २

द्वैतविशिष्टाद्वैताद्वैतदर्शनानुसारेणाधिकरणसूत्रसङ्गत्यासूचिका ६३३

परिशिष्टम् – ३ – श्रीविजयीन्द्रतीर्थकृतब्रह्मसूत्रन्यायसङ्ग्रहः ६३८

परिशिष्टम् – ४ – श्रीधीरेन्द्रयतिविरचितः विषयवाक्यसङ्ग्रहः ६४१

परिशिष्टम् – ५ –

श्री सुधीन्द्रतीर्थविरचिता श्रीमद्ब्रह्मसूत्राधिकरणरत्नमाला ६४४

परिशिष्टम् – ६ –

ब्रह्मसूत्रभाष्योदाहृतप्रमाणवचनानां वर्णानुक्रमसूचिका ६४९

****



॥ भाष्यदीपिकासहितम् ॥

॥ श्रीगुरुभ्यो नमः ॥

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतराम-कृष्ण-वेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं ब्रह्मसूत्रभाष्यम्

॥ अथ प्रथमाध्याये प्रथमः पादः ॥

(मङ्गलाचरणम्)

नारायणं गुणैः सर्वैरुदीर्णं दोषवर्जितम् ।
ज्ञेयं गम्यं गुरूंश्चापि नत्वा सूत्रार्थ उच्यते ॥

अथ श्रीजगन्नाथयतिविरचिता भाष्यदीपिका

जिज्ञास्यं जन्मरक्षालयनियतिमतिप्रत्यगज्ञानबन्ध-
श्रेयोदं शास्त्रगम्यं [1]श्रुतिगतवचनैर्मुख्यवृत्त्याऽभिधेयम् ।
भैष्मीसत्यासमेतं बहुगुणवपुषं भीतिपूर्वारदूरं
भक्तिश्रुत्यादिचिन्त्यं भजनपरगतिं भावये वेणुकृष्णम् ॥ १ ॥

आम्रस्तम्भात् समागत्य ताम्रतुण्डान् निहत्य यः ।
नम्रं नौमि जगन्नाथं [2]कम्रोपात्तं नृकेसरी ॥ २ ॥

अनधीत्य महाभाष्यं यस्य व्याकृष्यनुग्रहात् ।
तमुपासे नृसिंहार्कं प्रत्यूहतिमिरापहम् ॥ ३ ॥

पूर्णबोधगुरून् वन्दे जयार्यान् व्यासदेशिकान् ।
रामचन्द्रगुरूनार्यान् लक्ष्मीकान्तगुरूनपि ॥ ४ ॥

---

१. श्रुतिकृतिवचनैः' – म.

२. 'नम्रोपात्तं' – म.

येनायं निरणायि मध्वगुरुसद्भाष्यप्रकाशाशयः
प्राखण्डि प्रतिवादिदर्शनगणः प्राबन्धि गुर्वर्णवः ।
शिष्येभ्यः समदायि वित्तमुभयं प्रालम्भि विद्यासनं
सोऽयं श्रीरघुनाथतीर्थगुरुराट् शुद्धिं विदध्यान्मतेः ॥ ५ ॥

जयार्यरचितां टीकामनुसृत्य यथामति ।
जगन्नाथाख्ययतिना क्रियते भाष्यदीपिका ॥ ६ ॥

क्वचिद् भाष्यविवृत्यैव टीकार्थोऽपि विविच्यते ।
तत्त्वप्रदीपतात्पर्यचन्द्रिकाद्युक्तमार्गतः ॥ ७ ॥

परमानन्दाद्यात्मकस्य परमात्मनः प्रतिबिम्बतया स्वतश्चिदानन्दाद्यात्मकस्य जीवस्य अनाद्यविद्याकामकर्मादिनिमित्तबन्धध्वंसाय निखिलजीवजडात्मकात् प्रपञ्चात् परमार्थतोऽत्यन्तभिन्नतया निखिलगुणोदारतया निरस्तसमस्तदोषतया परमपुरुषमवगमयितुं सकलसदागमानां प्रवृत्तिरिति तत्त्वम् । यदाहुः -

'अदुःखमितरत् सर्वं जीवा एव तु दुःखिनः ।
तेषां दुःखप्रहाणाय श्रुतिरेषा प्रवर्तते ॥' इति ॥

प्रवर्तते दुःखप्रहाणसाधनं परमात्मानं प्रतिपादयतीत्यर्थः । तेषां चार्थनिर्णयाय ब्रह्मसूत्राणि चकार भगवान् बादरायणः । तानि च पटलपिहितनयनवद् यथावदर्थवित्तृभिरविद्याख्यपटलपिहितनयनपदोक्तसदर्थैरन्यैरन्यथाव्याख्यातानि यथावद् व्याचिख्यासुर्भगवानानन्दतीर्थाचार्यः समङ्गलस्यैव सफलत्वात् प्रारिप्सितभाष्यस्य कैवल्याद्यखिलफलसाधनतासिद्ध्यर्थं निरन्तरायपरिसमाप्त्यार्थं च नारायणप्रणामरूपं मङ्गलमाचरन् शिष्यशिक्षार्थं ग्रथयति[१] चिकीर्षितं च प्रतिजानीते – **नारायणम्** इति ॥ **सर्वैर्गुणैरुदीर्ण्णम्**

१. 'ग्रन्थयति' – म.

उदारम् उत्कृष्टम् । **दोषवर्जितं** दोषरहितम् । **ज्ञेयं** परोक्षापरोक्षाख्योभयविध-ज्ञानविषयीकरणीयम् । **गम्यं** प्राप्यम् । उभयत्र सद्भिरिति शेषः । नारायणं **नत्वा गुरूंश्च** इति चकारार्थः समुच्चयः[१] । तथा च गुरूंश्च नत्वा साष्टाङ्गं नमस्कृत्य **सूत्रार्थः** समस्तवेदतदुपबृंहणेतिहासपुराणादिशब्दराश्यर्थभूतो नारायणाख्यो ब्रह्मसूत्रार्थो मया **'उच्यते'** भाष्यत इति योजना ॥

अत्र गुणैरुदीर्णम् इत्यनेन प्रथमाध्यायस्य, दोषवर्जितम् इत्यनेन [२]द्वितीयाध्यायस्य, ज्ञेयम् इत्यनेन तृतीयाध्यायस्य[३], गम्यम् इत्यनेन चतुर्थाध्यायस्यार्थः[४] शिष्यहिततयाऽऽदौ सङ्गृहीत इति ज्ञातव्यम् ॥

अनेनैव विशेषणचतुष्टयेन विशेष्यवाचकनारायणशब्दः न डित्थादि-शब्दवत् साङ्केतिकः; किन्तु अराः दोषाः तद्विरुद्धाः नाराः गुणाः तेषामाश्रय इति वा, अराणाम् आश्रयो न भवतीति वा, विषयतया नरविशेषसम्बन्धि-ज्ञानाश्रय इति वा, अरविधुरमुक्ताश्रय इति वा योगेनोत्कृष्टगुणवाचक इत्युक्तं भवति । तेन नारायण एव शास्त्रार्थ इति प्रदर्शितम् ॥ अनेनैव विशेषणचतुष्टयेन वन्द्यताप्रयोजकानि बहुगुणत्वनिर्दोषत्वशास्त्रज्ञेयत्वशास्त्र-गम्यत्वानि चोक्तानि ॥

यद्वा – अत्र नारायणमित्यादिपदपञ्चकेन समुद्रशायित्वसर्ववसनोत्कर्ष-क्रीडाज्ञानादिगुणैरुच्चत्वसम्यग्दोषकर्षणप्रकृष्टद्युतिमेयत्वज्ञानिनः प्रति प्राप्ति-निरोधरहितत्वाख्यनिमित्तपञ्चकयुतेन नारायणवासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धा-ख्यमूर्तय उच्यन्ते; तासामेतच्छास्त्राध्यायपादेषु प्रतिपिपादयिषितत्वात् । तथा च **'नारायणं नत्वा गुणैरुदीर्णं नत्वा दोषवर्जितं नत्वा'** इत्यादिका तत्त्वप्रदीपिकोक्तयोजना द्रष्टव्या ॥

---

१. 'समुच्चये' – म. २. 'द्वितीयस्य' म.
३ . 'तृतीयस्य' – म. ४. 'चतुर्थस्यार्थः' – म

'गुरोर्नाम न गृह्णीयाच्छिष्यो भार्या पतेरपि' इति वचनाद् गुरोर्नाम नाग्रहीदाचार्यः । न च 'गुरून् नारायणशब्दवाच्यान् नारायणपदेनैव गुरुनाम चोवाच, आ समन्ताद् विशिष्टः स एव हि व्यासोऽपि' इति तत्त्वप्रदीपिका-विरोध इति वाच्यम्; गुरुदेवतयोर्वास्तवाभेदविवक्षया तदुपपत्तेः । योगरूढ-व्यासकृष्णाद्यसाधारणनामविवक्षया एवमुक्तत्वात् । गुरुत्वनिमित्तशास्त्र-प्रभवत्वशास्त्रसम्प्रदायप्रवर्तकत्वसाक्षादुपदेशकत्वाख्यप्रकारबाहुल्याद् गौरवाद्वा बहुमानार्थं वा बहुवचनप्रयोगः । यद्यपि गुरुर्व्यासः, इष्टदेवताऽपि स एवेति न तयोर्भेदः, तथाऽपि विशेषानुग्रहार्थं पृथङ्नतिरिति । एवं स्वस्य गुरुदेवतयो-र्भेदेऽरुचिसूचनार्थोऽपिशब्दः । तथा च – **'अपि'** तथाऽपि गुरुदेवता-भेदाभावेऽपीत्यर्थः । तत्त्वप्रदीपकृत्तु अपिशब्दात् सूत्रकारमपीत्याह । तस्यापि विशेषानुग्रहार्थं पृथङ्नतिरित्येवाभिप्रायः ॥ यद्वा – 'अपिशब्दः विशेषणान्तरसमुच्चयार्थः, तद्विवरणमस्येत्यादि' इति **सुधोक्तरीत्या** गुणपूर्णत्वा-पपादकजगज्जन्मादिकारणत्वादिरूपानुक्तविशेषणान्तरसमुच्चयार्थोऽपिशब्दः ॥

अनेनैव श्लोकेन श्रोतृप्रवृत्त्यङ्गभूताः शास्त्राधिकारिविषयप्रयोजन-सम्बन्धाश्च शिष्यशिक्षार्थं सूचिता भवन्ति ॥

(उपोद्घातभाष्यम्)

(सूत्ररचनानुकूलप्रसङ्गः)

द्वापरे सर्वत्र ज्ञान आकुलीभूते तन्निर्णयाय ब्रह्मरुद्रेन्द्रादिभिरर्थितो भगवान्नारायणो व्यासत्वेनावततार ॥

ननु ब्रह्मसूत्राणां प्रामाण्ये सत्येव प्रेक्षावदुपादेयत्वम्, प्रायोऽस्य प्रामाण्य-प्रयोज्यत्वात् । सत्येव तस्मिन् प्रातीतिकार्थनिरासेन यथावद् व्याख्येयत्वं सम्भवति । प्रामाण्यमेव कथमित्याशङ्क्य, आप्तिमूलत्वादिनैवेति परिहार-

मभिप्रेत्य वक्तृश्रोतृप्रसङ्गदोषाभावरूपाप्तिमूलत्वोपपादनाय सूत्रागतिक्रममाह **'द्वापरे' इत्यादिना** ॥ द्वावेव धर्मपादौ परावशिष्टौ यस्मिन् युगे, द्वाभ्यां युगाभ्यां परस्मिन्नुत्तरस्मिन् युगे इति वा, वैवस्वतमन्वन्तरे महायुगेषु प्रथमद्वापरापेक्षयाऽष्टाविंशे धर्मपादद्वययुतत्वाद् द्वापराख्ये युगे । **'सर्वत्र' 'मनुष्याणाम् ऋषीणां देवानां च'** इति तत्त्वप्रदीपोक्तेः **'लोक इति सज्ज्ञनो विवक्षितः'** इति प्रमेयदीपोक्तेश्च सर्वेषां देवऋष्यादीनां सतां **'ज्ञाने'** सम्यग्ज्ञाने **'आकुलीभूते'** सम्यग्ज्ञानं सगुणत्वादिज्ञानं, उत निर्गुणत्वादिज्ञानमिति विप्रतिपत्तिजन्यसन्देहविषयतां निर्गुणत्वादिज्ञानमेव न त्वन्यदिति मिथ्याज्ञानविषयतां च प्राप्ते सति, तज्ज्ञानविषयीभूतं सगुणत्वादिकं तत्त्वमन्यद् वेति सन्देहे तादृग्विपर्यये च सतीति यावत् । **'तन्निर्णयाय'** तस्मिन् सगुणत्वादिज्ञाने तस्य सम्यग्ज्ञानत्वस्य निश्चयार्थं, इदमेव तत्त्वं नान्यदिति विषये सम्यक्त्वनिश्चयार्थमिति यावत् । **'ब्रह्मरुद्रेन्द्रादिभिः'** देवैरिति शेषः । **'अर्थितः'** उपयाचितः । अन्यपदार्थानां देवानां ब्रह्मरुद्रेन्द्रादिभिरिति यद् विशेषणं तत् प्रसिद्धप्रभावानामपि भगवदितरेषामशक्यमिदं कार्यमिति प्रदर्शनार्थम् । **'भगवान्'** समग्रैश्वर्यवैराग्यादिगुणसम्पन्नो **'नारायणः'** तन्निर्णयाय **'व्यासत्वेन'** व्यासभावेन **'शुभमरकतवर्णम्'** इत्युक्तव्यासरूपेण **'अवततार'** आविर्बभूवेति ॥

तन्निर्णायेत्यस्याऽवृत्त्या योजना । तन्निर्णायेन्द्रादिभिरर्थितो रुद्रो ब्रह्मा च ततः तैः सर्वैरुपगम्योत्तमाधिकारिभिरर्थितो भगवानिति बुद्ध्या विवेकेनान्वयः ॥

अथेष्टानिष्टप्राप्तिपरिहारेच्छूनां तद्योगमविजानतां तज्ज्ञापनार्थं वेदमुत्सन्नं व्यञ्जयंश्चतुर्धा व्यभजत्, चतुर्विंशतिधैकशतधा सहस्रधा द्वादशधा च ॥

'गुरोर्नाम न गृह्णीयाच्छिष्यो भार्या पतेरपि' इति वचनाद् गुरोर्नाम नाग्रहीदाचार्यः । न च 'गुरून् नारायणशब्दवाच्यान् नारायणपदेनैव गुरुनाम चोवाच, आ समन्ताद् विशिष्टः स एव हि व्यासोऽपि' इति तत्त्वप्रदीपिका-विरोध इति वाच्यम्; गुरुदेवतयोर्वास्तवाभेदविवक्षया तदुपपत्तेः । योगरूढ-व्यासकृष्णाद्यसाधारणनामविवक्षया एवमुक्तत्वात् । गुरुत्वनिमित्तशास्त्र-प्रभवत्वशास्त्रसम्प्रदायप्रवर्तकत्वसाक्षादुपदेशकत्वाख्यप्रकारबाहुल्याद् गौरवाद्वा बहुमानार्थं वा बहुवचनप्रयोगः । यद्यपि गुरुर्व्यासः, इष्टदेवताऽपि स एवेति न तयोर्भेदः, तथाऽपि विशेषानुग्रहार्थं पृथङ्नतिरिति । एवं स्वस्य गुरुदेवतयो-र्भेदेऽरुचिसूचनार्थोऽपिशब्दः । तथा च – **'अपि'** तथाऽपि गुरुदेवता-भेदाभावेऽपीत्यर्थः । तत्त्वप्रदीपकृत्तु अपिशब्दात् सूत्रकारमपीत्याह । तस्यापि विशेषानुग्रहार्थं पृथङ्नतिरित्येवाभिप्रायः ॥ यद्वा – 'अपिशब्दः विशेषणान्तरसमुच्चयार्थः, तद्विवरणमस्येत्यादि' इति **सुधोक्तरीत्या** गुणपूर्णत्वा-पपादकजगज्जन्मादिकारणत्वादिरूपानुक्तविशेषणान्तरसमुच्चयार्थोऽपिशब्दः ॥

अनेनैव श्लोकेन श्रोतृप्रवृत्त्यङ्गभूताः शास्त्राधिकारिविषयप्रयोजन-सम्बन्धाश्च शिष्यशिक्षार्थं सूचिता भवन्ति ॥

(उपोद्घातभाष्यम्)

(सूत्ररचनानुकूलप्रसङ्गः)

द्वापरे सर्वत्र ज्ञान आकुलीभूते तन्निर्णयाय ब्रह्मरुद्रेन्द्रादिभिरर्थितो भगवान्नारायणो व्यासत्वेनावततार ॥

ननु ब्रह्मसूत्राणां प्रामाण्ये सत्येव प्रेक्षावदुपादेयत्वम्, प्रायोऽस्य प्रामाण्य-प्रयोज्यत्वात् । सत्येव तस्मिन् प्रातीतिकार्थनिरासेन यथावद् व्याख्येयत्वं सम्भवति । प्रामाण्यमेव कथमित्याशङ्क्य, आप्तिमूलत्वादिनैवेति परिहार-

मभिप्रेत्य वक्तृश्रोतृप्रसङ्गदोषाभावरूपाप्तिमूलत्वोपपादनाय सूत्रागतिक्रममाह **'द्वापरे' इत्यादिना** ॥ द्वावेव धर्मपादौ परावशिष्टौ यस्मिन् युगे, द्वाभ्यां युगाभ्यां परस्मिन्नुत्तरस्मिन् युगे इति वा, वैवस्वतमन्वन्तरे महायुगेषु प्रथमद्वापरापेक्षयाऽष्टाविंशे धर्मपादद्वययुतत्वाद् द्वापराख्ये युगे । **'सर्वत्र' 'मनुष्याणाम् ऋषीणां देवानां च'** इति तत्त्वप्रदीपोक्तेः **'लोक इति सज्ज्ञनो विवक्षितः'** इति प्रमेयदीपोक्तेश्च सर्वेषां देवऋष्यादीनां सतां **'ज्ञाने'** सम्यग्ज्ञाने **'आकुलीभूते'** सम्यग्ज्ञानं सगुणत्वादिज्ञानं, उत निर्गुणत्वादिज्ञानमिति विप्रतिपत्तिजन्यसन्देहविषयतां निर्गुणत्वादिज्ञानमेव न त्वन्यदिति मिथ्याज्ञानविषयतां च प्राप्ते सति, तज्ज्ञानविषयीभूतं सगुणत्वादिकं तत्त्वमन्यद् वेति सन्देहे तादृग्विपर्यये च सतीति यावत् । **'तन्निर्णयाय'** तस्मिन् सगुणत्वादिज्ञाने तस्य सम्यग्ज्ञानत्वस्य निश्चयार्थं, इदमेव तत्त्वं नान्यदिति विषये सम्यक्त्वनिश्चयार्थमिति यावत् । **'ब्रह्मरुद्रेन्द्रादिभिः'** देवैरिति शेषः । **'अर्थितः'** उपयाचितः । अन्यपदार्थानां देवानां ब्रह्मरुद्रेन्द्रादिभिरिति यद् विशेषणं तत् प्रसिद्धप्रभावानामपि भगवदितरेषामशक्यमिदं कार्यमिति प्रदर्शनार्थम् । **'भगवान्'** समग्रैश्वर्यवैराग्यादिगुणसम्पन्नो **'नारायणः'** तन्निर्णयाय **'व्यासत्वेन'** व्यासभावेन **'शुभमरकतवर्णम्'** इत्युक्तव्यासरूपेण **'अवततार'** आविर्बभूवेति ॥

तन्निर्णयायेत्यस्याऽवृत्त्या योजना । तन्निर्णयायेन्द्रादिभिरर्थितो रुद्रो ब्रह्मा च ततः तैः सर्वैरुपगम्योत्तमाधिकारिभिरर्थितो भगवानिति बुद्ध्या विवेकेनान्वयः ॥

अथेष्टानिष्टप्राप्तिपरिहारेच्छूनां तद्योगमविजानतां तज्ज्ञापनार्थं वेदमुत्सन्नं व्यञ्जयंश्चतुर्धा व्यभजत्, चतुर्विंशतिधैकशतधा सहस्रधा द्वादशधा च ॥

ततः किं प्रकृते, इत्यत आह – **अथेति** ॥ **'अथ'** तस्मात् तन्निर्णयायावतीर्णत्वाद् अवतारानन्तरमेव[१] तत्त्वज्ञाननुकूलविजातीय-व्यापारव्यवधानमकृत्वेति यावत्, नं तु परोपदेशमपेक्ष्येति वा । **'इष्टानिष्ट-प्राप्तिपरिहारेच्छूनाम्'** इष्टप्राप्तिश्चानिष्टपरिहारश्च ताविच्छूनाम् । तत्त्वप्रदीप-रीत्या अप्राप्तसुखप्राप्तिदुःखपरिहारेच्छावतामिति[२] वा । मोक्षस्य पुरुषार्थता-समर्थनार्थं वादिविप्रतिपत्तेः तत्स्वरूपनिरूपणार्थं चैवमुक्तम् । अन्यथा मुमुक्षूणामित्येव ब्रूयात् । नैतावताऽलम् **'आत्यन्तिक'** इति चोपस्कर्तव्यम् । **'तद्योगं'** तयोरुपायविशेषं निवृत्तधर्मपरापरतत्त्वज्ञानरूपं **'अविजानताम्'** अजानानां सज्ज्ञनानां **'तज्ज्ञापनार्थम्'** इष्टानिष्टप्राप्तिपरिहारोपायज्ञापनार्थम् । **'उत्सन्नम्'** [३]अपपाठादिना तिरोहितं **'वेदं चतुर्धा'** **'व्यभजत्'** इत्यावर्तते, **'ततः प्रागेव विभक्तम्'** इति **'पुनरेकैकम्'** इति च शेषः । तथा च अवान्तरवेदविभागात् प्रागेव ततः स्वत एव चतुर्धा विभक्ताद् ऋगादिरूपान्मूलवेदाच्च चतुर्धा विभक्तं वेदम् ऋङ्निगदादिरूपमुपवेदं व्यञ्जयन् अध्यापनेनाभिव्यज्य ततस्तस्मादेकैकस्मादेकैको भाग इति चतुर्धा व्यभजत् ॥

ऋचो ऋच उद्धृत्याभिव्यज्य ततो ऋग्वेदं, निगदाद् यजुर्वेदम्, साम्नः सामवेदम्, अथर्वणादथर्वणवेदं कृतवानित्यर्थः । पुनरेकैकं च वेदम् ऋग्वेदादिरूपावान्तरभेदं वेदम् अध्येतॄणामल्पशक्तिं वीक्ष्य चतुर्विंशतिधा एकशतधा एकोत्तरशताख्यप्रकारेण सहस्रधा द्वादशधा च व्यभजदित्यर्थः ॥

तदुक्तम् ऋग्भाष्ये —

---

१. 'तत्वज्ञानानुकूल-' – म.

२ -परिहारेच्छूनामिति' – म.

३ .'अपाठादिना' – म.

'ऋचः स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ।
यजूंषि निगदाञ्चैव तथा सामानि सामतः ॥'

इत्यादिना । स्वत एव चतुर्धा विभक्तान्मूलवेदाद् [१]ऋगादिरूपोपवेद-मुद्धृत्याभिव्यज्य तस्मादवान्तरम् ऋग्वेदादि कृतवानित्यर्थः । अत्र पूर्वं द्वापरग्रहणं महावेदाद् उद्धृतस्य उपवेदस्य अवान्तरवेदत्वेन अवान्तरवेदस्य च चतुर्विंशत्यादित्वेन विभागकथनं चाखिलज्ञानाकुलीभावसमर्थनार्थम् । कालतो विभागात् पूर्वं तत्तच्छाखाऽपरिज्ञानाच्च भवति ह्याकुलीभावः । तदुक्तं – **'चक्रे वेदतरोः'** (भाग.१.३.२१) इत्यादिना । **'अल्पमेधसः'** आकुलीभूतज्ञानान्[२], तन्निवारणार्थमिति शेषः ॥

यद्यपि –
'एको वेदः कृते ह्यासीत् त्रेतायां स त्रिधाऽभवत् ।
स एव पञ्चधा जातो द्वापरं प्राप्य वै युगम् ॥
उत्सन्नः स कलिं प्राप्य वेदः प्रायेण सर्वशः ॥'

इत्याथर्वणभाष्योदाहृतस्मृतौ कृतयुगे वेदैकत्वस्य त्रेतायां त्रैविध्यमात्रस्य द्वापरे पञ्चविधत्वस्य चोक्तेः, तथा सर्वस्यापि वेदस्य [३]कलावेवोत्सादोक्तेः, अत्र तु **'वेदमुत्सन्नम्'** इत्यनेन त्रेतायुगे चतुर्धा विभागस्य द्वापर एवोत्सादस्य चोक्तेर्विरोधो भाति । तथाऽप्यव्यक्तमूलराश्यपेक्षया वेदैक्योक्तेः सम्भवात् [४], त्रेतायुगे प्राचुर्येण भगवदिज्यासाधनत्वविवक्षया त्रैविध्योक्तावपि वस्तुत अथर्वणाख्यप्रकारान्तरसत्त्वस्यानिषेधेन विधान्तरस्यापि सत्त्वसम्भवात्, द्वापरेऽपौरुषेयस्य वेदस्य चतुर्विधत्वेऽपि पौरुषेयैरितिहासपुराणादिभिः सह पञ्चविधत्वस्यापि सम्भवात्, बाहुल्येन सर्वैः प्रकारैर्वेदस्य कलावुत्सादेऽपि व्यासावतारात् पूर्वं द्वापरेऽप्यपपाठादिरूपोत्सादस्य सम्भवाद् अविरोधः ॥

---

१. 'ऋगादिरूपेण वेदम्' – म.
२. 'आकुलीभूतान्' –म.
३ 'कालादेवोत्सादोक्तेः' – म
४. 'वेदैक्योक्तिसम्भवात्' – म.

तदर्थनिर्णयाय ब्रह्मसूत्राणि चकार ।

एवमुपोद्घातमुक्त्वा प्रकृतमाह – **'तदर्थनिर्णयाय'** इति ॥ तेषां सर्वेषाम् [१]अर्थः तम् उपक्रमादियुक्तिभिर्निर्णेतुमित्यर्थः । **'ब्रह्मसूत्राणि'** ब्रह्म वेदः, तदर्थः परब्रह्म वा, तस्य सूत्राणि तत्स्वरूपनिर्णायकानीत्यर्थः । गीताभाष्ये तु **'ब्रह्मसूत्राणि शारीरकसूत्राणि'** इति रूढिरप्युक्ता । अत्र द्वापर इत्यादिना **'ब्रह्मसूत्राणि चकार'** इत्यन्तेन वक्तुर्व्यासस्य नारायणावतारत्वोक्त्या प्रमादाज्ञानादिदोषाभावसाधनात्, तत्राप्रयोजकत्वशङ्कायाश्च भगवत्त्वोक्त्या परिहृतत्वात्, ब्रह्मादीनामर्थित्वोक्त्या च श्रोतृदोषाभावस्य वक्तरि तन्निमित्त-विप्रलम्भाभावस्य चोक्तत्वात्, **'ज्ञान आकुलीभूते तन्निर्णयाय'** इत्यनेनाज्ञान-निर्हरणस्य प्रसक्तत्वेन प्रसङ्गदोषाभावस्य तत एवानपहासस्य चोक्तत्वादाप्तिमूलता दर्शिता भवति । **'ब्रह्मसूत्राणि'** इत्यनेन ब्रह्मपरश्रुति-व्याख्यान-रूपत्वाच्छ्रुतिमूलत्वं,न्यायव्युत्पादकत्वाद् युक्तिमूलत्वं च सूचितम् । तथा च सिद्धं ब्रह्मसूत्राणां प्रामाण्यमिति भावः ॥

तच्चोक्तं स्कान्दे-
'नारायणाद् विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् ।
किञ्चित् तदन्यथा जातं त्रेतायां द्वापरेऽखिलम् ॥

उक्तमेवार्थं प्रमाणेन [२]स्थापयति - **'तच्च'** इति । चशब्द एवार्थे । तथा च यदस्माभिः **'द्वापरे'** इत्यादिनोक्तं तत् स्कान्दपुराणोक्तमेवेति भावः । न केवलमस्माभिः, किन्तु स्कान्दे चोक्तमिति समुच्चये वा चशब्दः । तथोक्तं **तत्त्वप्रदीपे** - **'यद्यप्याचार्यः स्वोक्तार्थे स्वयमेव प्रमाणं, सर्वज्ञत्वाद-विप्रलम्भकत्वाच्च । तथाऽपि स्कान्दे चोक्तमिति प्रौढवादं करोति'** इति । 'न केवलमस्माभिः' इति प्रमेयदीपेऽपि ॥

---

१. 'अर्थः तन्निर्णायायोपक्रमा-' म. २. 'प्रमाणे' – म.

किमुक्तमित्यतस्तत् पठति - **'नारायणात्'** इति । तदुपदेशादित्यर्थः । **'ब्रह्मादिद्वारा'** इति शेषः । यद्वा - उत्पत्त्याद्यष्टके ज्ञानस्य प्रविष्टत्वात् तस्य नारायणजन्यत्वोपपत्तिः । **'निष्पन्नम्'** उत्पन्नं **'अखिलं'** सगुणत्वादि-सर्वविषयकमित्यत्रापि सम्बद्ध्यते । **'ज्ञानं'** सम्यग्ज्ञानं **'स्थितं'** यथोत्पन्नं तथैव संशयाद्यनास्कन्दितमेव[1] स्थितम् । **'सत्सु'** इति शेषः । ज्ञानविषये संशयादिकं नाभूदिति फलितार्थः । **'त्रेतायां'** युगे **'तत्'** ज्ञानं **'किञ्चित्'** विषये **'अन्यथाजातम्'** इदमदो वेति पूर्वोक्तसंशयविषयताम् अन्यदेवेति मिथ्याज्ञानविषयतां च प्राप्तमित्यर्थः । अत्र द्वापरवत् त्रेतादिरप्यष्टाविंशो ग्राह्यः । द्वापरे युगे अखिलं सर्वविषयं तदन्यथा जातमित्यन्वयः ॥

गौतमस्य ऋषेः शापाज्ज्ञाने त्वज्ञानतां गते ।
सङ्कीर्णबुद्धयो देवा ब्रह्मरुद्रपुरस्सराः ।
शरण्यं शरणं जग्मुर्नारायणमनामयम् ॥

ननु कालप्रयुक्तमन्यथात्वं चेद् द्वापरयुगे भागद्वयस्यैवान्यथात्वं युक्तं, न तु सर्वस्येत्यतो विशेषकारणं चाऽह - **'गौतमस्य'** इति । तुशब्दश्चार्थः शापे विशेषकारणत्वस्य ज्ञाने वा सम्यक्त्वस्य द्योतकः । तथा च गौतमस्य ऋषेः शापाच्च ज्ञाने गुणपूर्णत्वादिसम्यग्ज्ञानेऽज्ञानतां नेदं तत्त्वज्ञानमिति तत्त्वज्ञानभिन्नत्वप्रकारकप्रतीतिविषयतां सन्देहविषयतां च गते प्राप्ते सति, ज्ञानविषये सम्यग्ज्ञानविरुद्धसंशयविपर्ययविषयतां गते सतीति यावत् । **'ब्रह्मरुद्रपुरस्सराः'** तदादयो **'देवाः'** **'सङ्कीर्णबुद्धयः'** अज्ञानादिमिश्रज्ञानिनः यद्विषये ज्ञानं जातं पुनस्तद्विषयगतप्रकारेष्वज्ञानसंशयादिमन्तः सन्तः **'शरण्यं'** तत्र साधुं शरणेषु रक्षकेष्वग्र्यम् 'अनामयं' प्रमाणलक्षणटीकोक्तरीत्याऽत्र

---

१. **'-स्कन्दितत्वेनैव'** – म.

आमयपदं रोगवाचकं दोषान्तरोपलक्षकम् । तथा च निर्दोषं **'नारायणं' 'सर्वोत्तमत्वविज्ञानपूर्वं तत्र मनः सदा'** इत्याद्युक्तप्रकारेण **'शरणं जग्मुः'** शरणं गता इत्यर्थः । तं प्रार्थयन् स्वकार्यं च व्यज्ञापयन्निति च द्रष्टव्यम् । अत्र ब्रह्मादिबुद्धीनां सङ्कीर्णत्वं नाम सङ्कीर्णबुद्धिषु सज्जनेषु दयायुक्तत्वमेव, न त्वितरेषां बुद्धीना-मिवाज्ञानादिमिश्रत्वम्, अज्ञानसंशयादिविषयविषयकत्वं स्वहतगोनिर्मातृमात्रविषयकगौतमशापकालनिमित्ताभिभवपदोक्ततिरोधानयोर्देवेष्वसम्भवात्[1] । ब्रह्मादिदेवगोनिर्मातृव्यतिरिक्तलोकस्य तु गौतमहतगोनिर्मातृत्वाभावेऽपि सम्प्रदायप्रवर्तकाभावात् कालतश्चाज्ञानप्राप्तिरिति द्रष्टव्यम् ॥

गौतमशापागमप्रकारस्तु इत्थम् – पूर्वं हि द्वादशवार्षिक्यामनावृष्टौ सत्यां तया पीडिता ऋषयो गौतमाश्रममन्नवन्तम् अध्यूषुः । तत्रैव बहुकालं तेनाऽदृताः स्वस्वविहितकर्माणः समवर्तन्त । अथानावृष्टौ शान्तायां तेषां स्वस्वाश्रमगमनेच्छा समजनि । तदर्थं गौतममनुज्ञां ययाचिरे । तथाऽपि स्वाश्रमाशून्यतालोभान्न तदनुज्ञामलम्भिषत । तस्मिन्नेवावसरे हरशिरस्स्थसुरसरितं सपत्नीं मत्वा तां निश्चिकासयिषन्त्या पार्वत्या प्रेषितो विनायको ब्रह्मचारिवेषेण प्रच्छन्नस्तानृषीनुपससार, अब्रवीच्च - हे तत्रभवन्तः ! किमर्थमिममाश्रममधिवसथ? चिरकालमेकपरान्नाशनेन युष्मत्तपो विनङ्क्ष्यति । तस्मात् स्वंस्वमाश्रमं व्रजत । तत्र च मयोच्यमानमुपायमाकर्णयत । यूयं ज्ञानतपोबलात् काञ्चन मायामयीं माहेयीं निर्मिमीध्वम् । तां गौतमतपोबलाकृष्टबलाहकावलीविगलितसलिलवर्धितसस्यादौ प्रवेशयत । अथ सस्यग्रासिनीं तामपक्रामयितुं प्रयतिष्यते गौतमः । ततः सहसा तत्कमण्डलूदकसंस्पर्शमात्रेण सा निपतिष्यति । तदा ब्राह्मणास्तं प्रतिब्रूत यावदिमामशेषमातरं गां

१. **'-सम्भवात् । इतरेषां तु कालतश्चाज्ञानप्राप्तिरिति'** – म.

नोत्थापयिष्यति भवान् तावन्न भोज्यान्नः । ततो हरशिरस्स्थद्युसरितमवतार्य तद्धारिणाऽभिषिच्य तामुज्जीवयतु भवान् इत्येवमनुतापिनं तमभिलप्या-पसरतेत्युक्त्वा हेरम्बोऽम्बिकां जगाम । अथ ते विनायकेन प्रणिगदितं प्रयाणोपायमुपसृत्य अन्वतिष्ठन् । तेनैवोपायेन प्रातिष्ठन्त । ततस्तावद् गौतमः तपसा त्र्यम्बकमाराध्य मन्दाकिनीमनुसमानीय तद्धारिणा सुरभिमभिषिषेच । ततः सोत्तस्थौ मुनिस्तद्धत्याऽघाद् विमुक्तश्च । अत एव गोदावरीति तस्याः सञ्ज्ञा समजनि । अथ विनायकचेष्टितं प्रतिबुध्य ऋषिभ्यश्चुक्रोध, अशपच्च गौतमः यदस्मदन्ननिमित्तज्ञानबलादेते गां निरमंस्त तद्ज्ञानमपैत्विति ॥

तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः ।
अवतीर्णो महायोगी सत्यवत्यां पराशरात् ॥
उत्सन्नान् भगवान् वेदानुज्जहार हरिः स्वयम् ।
चतुर्धा व्यभजत् तांश्च चतुर्विंशतिधा पुनः ॥
शतधा चैकधा चैव तथैव च सहस्रधा ।
कृष्णो द्वादशधा चैव .....

देवैः प्रार्थितो भगवान् किमकरोदित्यत आह – **तैरिति** ॥ **'तुः'** अवधारणे । **'महायोगी'** मुनिरूपः महाशक्तिर्वा । **'पुरुषोत्तमः'** क्षराक्षरचेतनाभ्यामुत्तमो **'भगवान्'** नारायणः **'तैः'** स्वशरणागतिं प्राप्तैरेव देवैः **'विज्ञापितकार्यः'** सन्, विज्ञापितं = प्रतिपादितम् अवतारादिरूपं कार्यं यस्य सः, रूपेण **'महायोगी'**, नाम्ना कृष्णः **'पराशरात् सत्यवत्यामवतीर्णः'** इत्यन्वयः । अवतारानन्तरिकप्रयोजनमाह - **'उत्सन्नान्'** इति । **'स्वयं'** साक्षात् **'हरिः'** **'भगवान्'** ज्ञानादिगुणशाली व्यासः **'उत्सन्नान्'** अपपाठादिना तिरोहितान् **'वेदान्'** **'स्वयमेव'** अन्योपदेशमन्तरेण **'उज्जहार'** उच्चारणेन व्यक्तीचकार । तांश्च प्रागेव चतुर्धा विभक्तान् वेदान् पुनः **'चतुर्धा व्यभजत्'** चतुर्भागानकरोत् । एकैकं च भागं **'पुनः'** चतुर्विंशत्यादिशाखारूपेण ऋग्वेदं

'चतुर्विंशतिधा', यजुर्वेदं **'एकशतधा'** एकोत्तरशताख्यैकप्रकारेण, सामवेदं **'सहस्रधा'** अथर्वणवेदं **'द्वादशधा च'** व्यभजदित्यर्थः। भगवत्त्वस्य[1] मुख्यत्वज्ञापनाय **'भगवान्'** इति पुनरुक्तिः । एवशब्दाः प्रकाराधिक्य-व्यवच्छेदकाः । चशब्दाः प्रकाराणां परस्परसमुच्चायकाः ॥

..... **पुनस्तस्यार्थवित्तये ।**
चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा ॥

प्रकृतमाह – **पुनरिति** ॥ पूर्वेणैवास्यान्वयः । यद्वा, उत्तरेणाप्यन्वयः । वेदविभागानन्तरमित्यर्थः । **'तस्य'** वेदस्य **'अर्थवित्तये'** अर्थज्ञानाय । वेदानां बहुत्वेऽप्यर्थस्यैकत्वात् तद्विवक्षया तान् वेदानिति बहुवचननिर्दिष्टानामपि वेदानां तस्येत्येकवचनेन निर्देशो नानुपपन्नः,तस्येत्यस्य समुदायैकवचनत्वात् । नित्यसापेक्षत्वात् **'अर्थवित्तये'** इति समासः साधुः । पुनश्शब्दस्याऽनन्तर्यार्थत्वं च **'पुनरप्रथमे भेदे'** इत्यमरोक्त्या **'पुनरेव समभ्यसेत्'** इत्यत्र, पुनः = निद्रापगमानन्तरम्, इति सुधोक्त्या **'तृतीये पुनरेव च'** इत्यत्र वरत्रयानन्तरमिति विश्वेशतीर्थोक्त्या च सिद्धम् । **'चकार'** इत्यत्रापि **'कृष्णो व्यासः'** इत्यनुषज्यते । ननु सूत्रान्तरैरेव वेदार्थनिर्णयसम्भवात् किं ब्रह्मसूत्रैरिति गतार्थताशङ्कापरिहारायाऽह – **येषाम् इति** ॥ **'सूत्रत्वं'** सूत्रशब्दप्रवृत्तिनिमित्तम् **'अञ्जसा'** मुख्यतोऽस्तीत्यर्थः । अस्य तानि **'चकार'** इति पूर्वेण **'एवंविधानि'** इत्युत्तरेण वाऽन्वयः ॥

(सूत्रलक्षणम्)

अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥

---

१. 'भगत्वस्य' – म.

किं तत् सूत्रत्वं यदाञ्जस्यं ब्रह्मसूत्राणामित्यत आह – **अल्पेति** ॥ यावदक्षरतां विना श्रुत्यर्थाभ्यां विवक्षितार्थसिद्धिर्नास्ति तदर्थप्रतिपादनाय तावन्मात्राक्षरमसति नियामके ततोऽधिकाक्षररहितम् **'अल्पाक्षरम्'** ॥

केचित्तु- अल्पाक्षरबह्वक्षरयुक्तपर्यायपदयोर्मध्ये अल्पाक्षरपदोपेतत्वम् अल्पाक्षरत्वमित्याहुः। तट्टीकाननुगुणम् ॥

एवं च भवितुमर्हतीत्यनुच्यमानार्थम् **'असन्दिग्धम्'** । **'असन्दिग्धार्थं निर्णीतार्थम्'** इति तत्त्वप्रदीपोक्तेः । अनन्यलभ्योत्तमार्थयुक्तं **'सारवत्'** । बहुशाखागतपदवाक्यार्थनिर्णायकं **'विश्वतोमुखम्'** । तत्त्वप्रदीपे तु, एकं प्रयोजनं प्रत्यपेक्षितार्थस्य कृत्स्नस्य प्रतिपादकं **'विश्वतोमुखम्'** इत्युक्तम् । अर्थज्ञानमन्तरेण गानभागपूरणादिप्रयोजनान्तरार्थाक्षररहितम् **'अस्तोभम्'** । शब्दार्थदोषविधुरम् **'अनवद्यम्'** । यदेतावद्विशेषणयुतं तदेव **'सूत्रम्'** इति **'सूत्रविदः'** सूत्रलक्षणज्ञाः **'विदुः'** अभ्युपयन्तीत्यर्थः ॥

अत्र भाष्यनिर्णयहेतुशून्यवाक्यं कुशलपुरुषोक्तलौकिकवार्तादिकं भगवन्नाममन्त्रादिकम् अर्थाप्रतिपादकत्वेऽपि ऋगक्षराव्याप्तगानभागपरिपूरक-सामगतस्तोभाक्षराण्यपशब्दोपेततादृशवाक्यं च व्यावर्तयितुं क्रमेण विशेषणानीति पदप्रयोजनं **तत्त्वप्रदीपोक्तमनुसन्धेयम्** ॥

अत्र सर्वत्र धर्मिकथनेऽपि तद्द्वारा सूत्रपदप्रवृत्तिनिमित्तमप्युक्तमिति नासङ्गतिः ॥

निर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यतः ।
यथा व्यासत्वमेकस्य कृष्णस्यान्ये विशेषणात् ॥

नन्वेतत् सूत्रत्वं कुतो ब्रह्मसूत्राणामाञ्जस्येनेत्यत आह – **निर्विशेषितेति** ॥ **'ब्रह्मसूत्रस्य'** इति समुदायैकवचनम् । चोऽवधारणे यत इत्यर्थे च । **अपि**शब्दो मुख्यसूत्रत्वसमुच्चये । तथा च यतो ब्रह्मसूत्राणां

'चतुर्विंशतिधा', यजुर्वेदं **'एकशतधा'** एकोत्तरशताख्यैकप्रकारेण, सामवेदं **'सहस्रधा'** अथर्वणवेदं **'द्वादशधा च'** व्यभजदित्यर्थः। भगवत्त्वस्य[1] मुख्यत्वज्ञापनाय **'भगवान्'** इति पुनरुक्तिः । एवशब्दाः प्रकाराधिक्य-व्यवच्छेदकाः । चशब्दाः प्रकाराणां परस्परसमुच्चायकाः ॥

..... **पुनस्तस्यार्थवित्तये ।**
चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा ॥

प्रकृतमाह – **पुनरिति** ॥ पूर्वेणैवास्यान्वयः । यद्वा, उत्तरेणाप्यन्वयः । वेदविभागानन्तरमित्यर्थः । **'तस्य'** वेदस्य **'अर्थवित्तये'** अर्थज्ञानाय । वेदानां बहुत्वेऽप्यर्थस्यैकत्वात् तद्विवक्षया तान् वेदानिति बहुवचननिर्दिष्टानामपि वेदानां तस्येत्येकवचनेन निर्देशो नानुपपन्नः,तस्येत्यस्य समुदायैकवचनत्वात् । नित्यसापेक्षत्वात् **'अर्थवित्तये'** इति समासः साधुः । पुनश्शब्दस्याऽनन्तर्यार्थत्वं च **'पुनरप्रथमे भेदे'** इत्यमरोक्त्या **'पुनरेव समभ्यसेत्'** इत्यत्र, पुनः = निद्रापगमानन्तरम्, इति सुधोक्त्या **'तृतीये पुनरेव च'** इत्यत्र वरत्रयानन्तरमिति विश्वेशतीर्थोक्त्या च सिद्धम् । **'चकार'** इत्यत्रापि **'कृष्णो व्यासः'** इत्यनुषज्यते । ननु सूत्रान्तरैरेव वेदार्थनिर्णयसम्भवात् किं ब्रह्मसूत्रैरिति गतार्थताशङ्कापरिहारायाऽह – **येषाम् इति** ॥ **'सूत्रत्वं'** सूत्रशब्दप्रवृत्तिनिमित्तम् **'अञ्जसा'** मुख्यतोऽस्तीत्यर्थः । अस्य तानि **'चकार'** इति पूर्वेण **'एवंविधानि'** इत्युत्तरेण वाऽन्वयः ॥

(सूत्रलक्षणम्)

अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥

---

१. 'भगत्वस्य' – म.

किं तत् सूत्रत्वं यदाञ्जस्यं ब्रह्मसूत्राणामित्यत आह – **अल्पेति** ॥ यावदक्षरतां विना श्रुत्यर्थाभ्यां विवक्षितार्थसिद्धिर्नास्ति तदर्थप्रतिपादनाय तावन्मात्राक्षरमसति नियामके ततोऽधिकाक्षररहितम् **'अल्पाक्षरम्'** ॥

केचित्तु- अल्पाक्षरबह्वक्षरयुक्तपर्यायपदयोर्मध्ये अल्पाक्षरपदोपेतत्वम् अल्पाक्षरत्वमित्याहुः। तट्टीकाननुगुणम् ॥

एवं च भवितुमर्हतीत्यनुच्यमानार्थम् **'असन्दिग्धम्'** । **'असन्दिग्धार्थं निर्णीतार्थम्'** इति तत्त्वप्रदीपोक्तेः । अनन्यलभ्योत्तमार्थयुक्तं **'सारवत्'** । बहुशाखागतपदवाक्यार्थनिर्णायकं **'विश्वतोमुखम्'** । तत्त्वप्रदीपे तु, एकं प्रयोजनं प्रत्यपेक्षितार्थस्य कृत्स्नस्य प्रतिपादकं **'विश्वतोमुखम्'** इत्युक्तम् । अर्थज्ञानमन्तरेण गानभागपूरणादिप्रयोजनान्तरार्थाक्षररहितम् **'अस्तोभम्'** । शब्दार्थदोषविधुरम् **'अनवद्यम्'** । यदेतावद्विशेषणयुतं तदेव **'सूत्रम्'** इति **'सूत्रविदः'** सूत्रलक्षणज्ञाः **'विदुः'** अभ्युपयन्तीत्यर्थः ॥

अत्र भाष्यनिर्णयहेतुशून्यवाक्यं कुशलपुरुषोक्तलौकिकवार्तादिकं भगवन्नाममन्त्रादिकम् अर्थाप्रतिपादकत्वेऽपि ऋगक्षराव्याप्तगानभागपरिपूरक-सामगतस्तोभाक्षराण्यपशब्दोपेततादृशवाक्यं च व्यावर्तयितुं क्रमेण विशेषणानीति पदप्रयोजनं **तत्त्वप्रदीपोक्तमनुसन्धेयम्** ॥

अत्र सर्वत्र धर्मिकथनेऽपि तद्द्वारा सूत्रपदप्रवृत्तिनिमित्तमप्युक्तमिति नासङ्गतिः ॥

निर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यतः ।
यथा व्यासत्वमेकस्य कृष्णस्यान्ये विशेषणात् ॥

नन्वेतत् सूत्रत्वं कुतो ब्रह्मसूत्राणामाञ्जस्येनेत्यत आह – **निर्विशेषितेति** ॥ **'ब्रह्मसूत्रस्य'** इति समुदायैकवचनम् । चोऽवधारणे यत इत्यर्थे च । **अपि**शब्दो मुख्यसूत्रत्वसमुच्चये । तथा च यतो ब्रह्मसूत्राणां

मुख्यसूत्रत्वमस्ति अत एव हि **'निर्विशेषितसूत्रत्वं'** निर्गता विशेषा यस्मात् तन्निर्विशेषं तथाख्यातं निर्विशेषितं तादृशं सूत्रपदं यस्य तस्य भावः । यद्वा - विशेषो विशेषणं, तस्याभावोऽस्य सञ्जातस्तादृशः सूत्रशब्दो यस्य तस्य भावो निर्विशेषितसूत्रत्वम् । विशेषणरहितकेवलसूत्रपदवाच्यत्वमस्ति पुराणादावुक्तम् । अन्यथा तन्न स्यात्, व्यापकाभावे व्याप्याभावनियमादित्यर्थः । अत्राऽद्यपक्षे तथाऽऽख्यातमित्यर्थे ण्यन्तात् कर्मणि क्तः, द्वितीये तद्धितः **'इतच्'** इति विवेकः । अनेन ब्रह्मसूत्राणां मुख्यसूत्रत्वे निर्विशेषितशब्दवाच्यत्वादिति हेतुरुक्तो भवति ॥

अत्र हेतोरप्रयोजकत्वमाशङ्क्य व्याप्तिवचनेन तां परिहर्तुं तत्र प्रथमं यद् यन्न निर्विशेषितं तत्तन्न मुख्यमित्यन्वयव्याप्तिमभिप्रेत्य तत्र दृष्टान्तमाह– **यथेति** ॥ **'एव'** इत्यनुवर्तते । तेनैकशब्दार्थस्य मुख्यत्वस्य व्यापकता लभ्यते । तथा च यथैकस्यैव सतः कृष्णस्य वेदव्यासस्य व्यासत्वं निर्विशेषितव्यासपदवाच्यत्वमस्तीत्यर्थः । तथा च निर्विशेषितत्वान्मुख्यसूत्रत्वं ब्रह्मसूत्राणामिति वाक्यशेषः ॥

इदानीं येऽमुख्याः न ते निर्विशेषपदवाच्याः, किन्तु सविशेषपदवाच्याः, इति व्यतिरेकव्याप्तिमभिप्रेत्य तत्र दृष्टान्तमाह – **'अन्ये'** इति ॥ **'यथा'** इत्यनुवर्तते । पूर्वमेकशब्दश्रवणादत्रामुख्या इति लभ्यते । **'व्यासाः'** इति शेषः। तथा च – यथा कृष्णात् **'अन्ये'** द्वैपायनादयो येऽमुख्यास्ते **'विशेषणात्'** एव विशेषणमपेक्ष्यैव व्यासाः, न तन्नैरपेक्ष्येण । तृतीयार्थे वा पञ्चमी, सविशेषणव्यासपदवाच्या एवेति योजना ॥

सविशेषणसूत्राणि ह्यपराणि विदो विदुः ।
मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषतः ॥

नन्वस्तु ब्रह्मसूत्राणां मुख्यत्वं, तथाऽपि तदन्येषामप्यस्ति, न तेषामेव, इतरेषाममुख्यत्वे कारणाभावादित्याशङ्क्य, तत्र निर्विशेषितत्वहेतोः समव्याप्तिपरेण तदर्थमेव प्रागुक्तव्यतिरेकव्याप्तिदृष्टान्तवचनेनोपपादितान्वय-व्याप्तिकमनुमानं नियामकत्वेनाऽह – **'सविशेषण'** इति ॥ **'अतः'** इत्यनुवर्तते । अपराणीति चाऽवर्तते । **'हि'** शब्दो हेत्वर्थे । तथा च - यतः **'अपराणि'** ब्रह्मसूत्रेभ्योऽन्यानि सूत्राणि **'अपराणि'** अमुख्यानि, अत एव **'विदः'** ज्ञानिनः **'अपराणि' 'सविशेषणसूत्राणि'** विशेषणसहित-सूत्रपदवाच्यानीति **'विदुः'** उपजानन्तीत्यर्थः । तथा च अन्यसूत्राणां सविशेषणसूत्रत्वाद् अमुख्यत्वमेव, न मुख्यत्वमिति भावः ॥

निर्विशेषितत्वमुख्यत्वयोः सविशेषणत्वामुख्यत्वयोश्च दृष्टान्तमुखेनो-पपादितां व्याप्तिं दृष्टान्ते मुख्यत्वामुख्यत्वयोः [१]वेदविभागग्रन्थविस्तरकर्तृत्व-तत्सादृश्यादिरूपान्यकारणप्रयोज्यत्वसम्भवादसिद्धा व्याप्तिरित्याशङ्कापरिहा-राय प्रमाणेन साधयति - **'मुख्यस्य'** इति । सावधारणमेतत् । एवम् **'अन्येषाम्'** इत्यपि । तेन मुख्यत्वामुख्यत्वयोर्व्यापकतासिद्धिः । वाचकत्वं षष्ठ्यर्थः । तथा च यतो मुख्यस्यैव **'निर्विशेषेण'** विशेषणाभावेन **'वाचकशब्दोऽस्ति'** निर्विशेषितशब्दवाच्यत्वमस्तीति यावत् । **'अन्येषाम्'** अमुख्यानामेव **'विशेषतः'** विशेषणमपेक्ष्य, विशेषणेनेति वा, **'शब्दो'** वाचकः । सविशेषणपदवाच्यत्वमिति यावत् ॥

इति वेदविदः प्राहुः शब्दतत्त्वार्थवेदिनः ।
सूत्रेषु येषु सर्वेऽपि निर्णयाः समुदीरिताः ॥

'इति' एवम्प्रकारेण **'शब्दतत्त्वार्थवेदिनः'** शब्दस्य यथाभूतार्थज्ञानिनः

---

१. **'मुख्यत्वामुख्यत्वयोः सविशेषणत्वामुख्यत्वयोश्च वेदविभाग' – म.**

'वेदविदो' वेदार्थज्ञाः वृद्धाः **'प्राहुः'** वदन्तीत्यर्थः । अस्य "**अतः 'येषां सूत्रत्वमञ्जसा' 'सविशेषणसूत्राणि अपराणि अमुख्यानि'** इत्युक्तं युक्तम्" इति वाक्यशेषेणान्वयः । **'विशेषितः'** इति क्वचित् पाठः । विशेषणं प्राप्त इति तस्यार्थः । तथा च मुख्यामुख्ययोर्निर्विशेषणसविशेषणशब्दवाच्यत्वे वेदो वृद्धव्यवहारश्च प्रमाणमित्युक्तत्वान्न तयोः कारणान्तरं शङ्क्यमिति भावः ॥

अस्त्वेतत्सूत्रत्वमञ्जसा ब्रह्मसूत्राणाम् । तथाऽपि वेदार्थनिर्णयस्य सूत्रान्तरैरेव सम्भवात् किं ब्रह्मसूत्रैरिति चोद्यस्य कथं **'येषाम्'** इत्यनेन परिहार उक्त इत्यतस्तद्वाक्योक्तं विवृणोति – **'सूत्रेषु'** इति । निमित्तसप्तमीयम् । अपिरभिव्याप्तौ सङ्कोचनिवर्तकः । निर्णयस्य सर्वत्वं विषयद्वारा, तस्य च शब्दद्वारा बोध्यम् । तथा च येभ्यः सूत्रेभ्यः सर्वे निर्णयाः सर्वशाखार्थनिर्णया भाव्यतया समुदीरिताः, येषां सर्वशाखानिर्णायकत्वमुक्तं प्रमाण इत्यर्थः । यद्वा निर्णीयन्त इति निर्णयाः निर्णेतव्यार्थाः ॥

अयं भावः–**'येषाम्'** इति वाक्ये तावद् ब्रह्मसूत्राणामेवाञ्जसा सूत्रत्वमित्युक्तम् । सति चैवं तदन्तर्गतं सूत्रधर्मतयोक्तं विश्वतोमुखत्वमपि तेषामेवाञ्जसा भवति । यदा चैवं तदा तेषामसङ्कुचितसर्वशाखा-निर्णायकत्वमुक्तं भवेत्, कतिपयशाखानिर्णायकत्वे आञ्जस्यानुपपत्तेः[१]। यत एवमतः सर्ववेदशाखार्थनिर्णायकानां ब्रह्मसूत्राणाम् असर्वनिर्णायकेभ्योऽ-न्यसूत्रेभ्योऽतिशयेन निर्णायकत्वाद् युक्तं **'तस्यार्थवित्तये ब्रह्मसूत्राणि चकार'** इति । तच्छब्दघटितं तद्वचनं तादर्थ्येन सूत्रकरणवचनमिति भवति तेन शङ्कापरिहार इति ॥

शब्दजातस्य सर्वस्य यत्प्रमाणश्च निर्णयः ।
एवंविधानि सूत्राणि कृत्वा व्यासो महायशाः ॥

---

१. आञ्जस्यानुपपत्तिः' – म.

अन्येषामपि [१]द्वित्रशाखानिर्णायकत्वात् कथमेतेषामेव सर्वशाखा-निर्णायकत्वमित्युच्यते अन्यथा तद्वैयर्थ्यप्रसङ्गात् । तथा चांशे गतार्थतेत्याशङ्कापरिहारायाऽऽस्योक्त्या सूचितमन्यच्चाऽह –**'शब्दजातस्य'** इति ॥ पूर्वमीमांसादिरूपस्येत्यर्थः । अत एवोक्तं **सुधायाम् 'एतन्मीमांसोपजीविनी खलु सेति पुराणे पठ्यते शब्दजातस्येति'** इति । कर्तरि षष्ठीयं न कर्मणि । अत एव **टीकायां** शब्दसमूहैरिति तृतीया । कर्तृत्वं च करणीभूतवेदेतिकर्तव्यतया । इतिकर्तव्यत्वं च मीमांसाद्वारा उपकारकत्वाद् भवति । शब्दजातपदं शब्दप्रमाणमात्रपरमित्याशयेन सम्बन्धषष्ठीयम्, सम्बन्धश्च जन्यजनकभाव इति केचित् । यत्प्रमाणं मूलं यस्य स तथोक्तः । चशब्दः समुच्चये, **'समुदाहृतः'** इत्यस्यानुकर्षकश्च । इतिशब्दोऽध्याहार्यः । तथा च अन्येषां [२]द्वित्रशाखानिर्णायकत्वेऽपि भवत्येव ब्रह्मसूत्राणामेवानन्यापेक्षा-सङ्कुचितसर्वशाखानिर्णायकत्वम्, अन्यकर्तृक [३]द्वित्रशाखार्थनिर्णयस्य ब्रह्मसूत्र-मूलत्वेन तज्जन्यनिर्णयोपजीवित्वेनान्येषां श्रुतिव्याख्यानरूपत्वात् । यथा श्रुतिमूलकस्मृतेरवैयर्थ्यं तद्वदवैयर्थ्योपपत्तेर्मूलेन मूलिनो वैयर्थ्याभावादिति भावः ॥

'एवंविधानि' इति । अञ्जसा विश्वतोमुखत्वाद्युपेतानीत्यर्थः । अस्योपसंहाररूपत्वान्न 'तानि चकार' इत्यनेन पुनरुक्तिः ॥

ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु ।
ज्ञानं संस्थाप्य भगवान् क्रीडते पुरुषोत्तमः[४] ॥ इत्यादि ।

'देवेषु' इत्यनेन कर्मजाजानजदेवदेवगन्धर्वा अपि सङ्गृहीताः । मनुष्यपदं **'निवीतं मनुष्याणाम्'** (तै.सं.२-५-११) इत्यादाविव मननशीलर्षिपरम् । पान्तीति पाः चक्रवर्तिनः । क्षीति क्षयार्थस्य क्षेः रूपं मनुष्योत्तमवाचकम्,

---

१. २,३, 'द्वित्रिशाखा-' – म. ४. 'परमेश्वरः' ह.

तेषामितरापेक्षयाऽत्यल्पायुष्ट्वात् ।मनुष्यगन्धर्वाणामप्युपलक्षकमेतत् । मनुष्याश्च पितरश्च पाश्च क्षयश्चेति विग्रहः । अनेन **'देवर्षिपितृपनराः'** इत्युक्ताः पञ्चविधा अपि मुक्तियोग्याः सङ्गृहीता भवन्ति । पक्षीत्यस्याखण्डत्वे पक्षिशब्दो [१]जरितार्यादियोग्यतिर्यक्परः ॥ **'ज्ञानं'** सम्यग्ज्ञानं विशेषज्ञानं **'संस्थाप्य'** उत्पाद्य दृढीकृत्वेति वा । दृढीकरणं नाम ज्ञानविषये संशयविपर्ययनिरासः ॥

तथा च पुरुषोत्तमो महायशाः उत्तमश्लोको भगवान् व्यासो येषु सूत्रेषु सर्वे निर्णयाः समुदीरिताः, येषां सर्वशाखानिर्णायकत्वमुक्तम्, तथा सर्वैः शब्दसमूहैः जैमिन्यादिसूत्रान्तरात्मकैर्निर्णायकैः स्मृत्यादिभिश्च क्रियमाणो लोककर्तृकवेदैकदेशावान्तरतात्पर्यनिर्णयो यन्मूलको यज्जन्यसर्ववेदमहा-तात्पर्यनिर्णयमूलकः तदुपजीवी तं विनाऽवान्तरतात्पर्यज्ञानमात्रेण मुक्तिफलासिद्धेरिति चोक्तं **'येषां'** इति पूर्ववाक्ये प्रमाणे च – एवंविधानि एतादृक्प्रकाराणि सूत्राणि कृत्वा ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु ज्ञानं संस्थाप्य क्रीडत इति महावाक्ययोजना ॥

'क्रीडते परमेश्वरः' इति पाठे ऐश्वर्यम् एवंविधसूत्रकरणेऽसामर्थ्य-शङ्कानिरासकतयोक्तमिति ध्येयम् ॥

अत्र ब्रह्मादिषु ज्ञानसंस्थापनं नाम पूर्वं स्थितस्यैव ज्ञानस्य विशेषयुक्त्यादिभिः दृढीकरणं किञ्चिदप्राप्तलाभश्चोच्यते, **'जानन्तोऽपि विशेषार्थज्ञानाय स्थापनाय वा'** इति गीतातात्पर्योदाहृतवचनात् । न च **'एवं ज्ञानं पुनः प्रापुर्देवाश्च ऋषयस्तथा'** इति भारततात्पर्यनिर्णयविरोधः, अत्र पुनश्शब्दात् सर्वदेवादीनाम् अज्ञातविस्मृतार्थज्ञानप्राप्तेरुक्तत्वादिति वाच्यम्, तस्याप्युक्तार्थत्वात् । विरिञ्चेतरेषां तिरोहितार्थज्ञानलाभो वाऽत्रोच्यते, यत आहुर्गीतातात्पर्ये आचार्याः – **'ब्रह्मणस्तु प्रायो नाप्रतिभासितम्'** इति ॥

---

१. **'जरितर्यादि-' म.**

'इत्यादि' इत्यस्य 'तच्चोक्तम्' इत्यनेनान्वयः । लुप्तविभक्तिकोऽयं निर्देशः ॥

(अथ ब्रह्मजिज्ञासायाः कर्तव्यत्वसाधकं जिज्ञासाधिकरणम्)

सू- ॐ॥ ॐ अथातो ब्रह्मजिज्ञासा ॥ ॐ ॥ १ ॥

प्रमाणाभावेन जीवचैतन्यातिरिक्तब्रह्मणोऽभावात्, जीवस्य च स्वप्रकाशत्वेनासन्दिग्धत्वात्, तथा च विषयाभावात् प्रत्यग्रूपे ब्रह्मण्यहमिति प्रतीयमानेऽपि मोक्षानुपलम्भेन प्रयोजनाभावात् तत एव तत्प्रतिबद्धाधिकार्यभावाच्च न ब्रह्मजिज्ञासा कर्तव्येति प्राप्ते सिद्धान्तितं भगवता सूत्रकारेण **ॐ अथातो ब्रह्मजिज्ञासा ॐ** इति ॥ इदमेकं सूत्रमेकमधिकरणम् । अधिकरणं नाम विषयसंशयपूर्वपक्षसिद्धान्त-प्रयोजनरूपपञ्चाङ्गसमुदायः । यथाऽत्रैव जिज्ञासाधिकरणे **'तद्विजिज्ञासस्व'** इति जिज्ञासाभिधायकवाक्यविहिता श्रवणादिरूपा जिज्ञासा विषयः । कर्तव्या न वेति सन्देहः । न कर्तव्येति पूर्वः पक्षः । अस्मिन् पक्षे च शास्त्रस्यानारम्भणीयत्वनिश्चयः फलम् । कर्तव्येति सिद्धान्तः । तत्र वाऽरम्भणीयत्वनिर्णयः फलं, न्यायानुसन्धानात्मकमीमांसारूपजिज्ञासायाः अकर्तव्यत्वे न्यायग्रथनात्मकमीमांसाशास्त्रस्यानारम्भणीयत्वावश्यम्भावात् । एवमन्यत्रापि ।

अथशब्दो मङ्गलार्थोऽधिकारानन्तर्यार्थश्च । अतश्शब्दो हेत्वर्थः।

एकस्याधिकरणस्य सङ्गतिपञ्चकम् । तच्च - शास्त्रसङ्गतिः, अध्यायसङ्गतिः, पादसङ्गतिः, पूर्वाधिकरणसङ्गतिः, तद्विषयवाक्यसङ्गतिश्चेत्येवंरूपम् । सङ्गतिरपि सामान्यतो द्विविधा, अन्तर्भावरूपा आनन्तर्यलक्षणा चेति । तत्र शास्त्राध्यायपादैरन्तर्भावरूपा सङ्गतिः ।

पूर्वाधिकरणतद्विषयवाक्याभ्यां त्वानन्तर्यरूपा । साऽपि, आक्षेपिकी आतिदेशिकी औपोद्घातिकी आपवादिकी प्रासङ्गिकीत्यादिरूपेण बहुविधा । तत्र पञ्चाधिकरणीपर्यन्तं शास्त्रसङ्गतिमात्रं, नाध्यायपादसङ्गती । समन्वयेक्षत्योरध्यायेन सङ्गतिसत्त्वेऽपि पादेनाभावात् सङ्गत्योरभावः पञ्चाधिकरणीसाधारणः । तथा पूर्वाधिकरणतद्विषयसङ्गती अपि नैतदधिकरणस्य भवतः, अस्यैवाऽद्याधिकरणत्वाच्छ्रुतिविचारस्याद्याप्यनारब्धत्वाच्च; किन्त्वितरेषां चतुर्णामिति ध्येयम् ॥

अत्र सूत्रे आद्यन्तयोरोङ्कारः उच्चारणीयः । तत्राऽद्य एक एव दृष्टादृष्टोभयार्थः, अत एव सूत्रावयवः सर्वसूत्रेषु अनुवृत्त्यर्थमसंहिततयोच्चार्यते । अथवा - आदौ ॐकारद्वयम् अदृष्टार्थो दृष्टार्थश्चेति । अन्ते तु पक्षद्वयेऽपि अदृष्टार्थ एक एवोङ्कारः । अदृष्टार्थत्वं नाम केवलं स्रवणविशरणरूपदोषपरिहारार्थत्वम् । दृष्टार्थत्वं त्वन्वेतव्यपदार्थप्रतिपादकत्वम् । तत्राऽदिसूत्रावयवभूतं **'ओं'** इत्येतद् अव्ययं ब्रह्मशब्दविशेषणं गुणपूर्णत्ववाचि । ब्रह्मशब्दोऽपि विद्वद्रूढ्या महायोगेन च विष्णुवाची । **'अथ'** शब्द आनन्तर्यार्थः । योग्यतया **'अधिकारात्'** इति सम्बध्यते । कर्तव्येति शेषः ॥ तथा च **'अथ'** अध्ययनशमदमादिरूपाधिकारानन्तरम् **'अतः'** स्वजन्यज्ञानजन्यप्रसादजन्यमोक्षाख्यफलयुक्तत्वात् **'ओं'** गुणपूर्णस्य **'ब्रह्मणः'** विष्णोः **'जिज्ञासा'** श्रवणादिरूपो विचारः कर्तव्य इति सूत्रार्थः । विष्णोः प्रसादादिति **'अतः'** शब्दस्यार्थान्तरम् ।अस्य जिज्ञासादिकार्यं भवेदिति वाक्यशेषेणान्वयः । ॐ ब्रह्मशब्दयोरुभयोर्यौगिकत्वेऽपि एकस्य रूढत्वेन विशेष्यवाचित्वं, अन्यस्य यौगिकत्वेन विशेषणवाचित्वमाश्रित्यान्वयाङ्गीकारान्नान्यतरवैयर्थ्यम् । **'ओमित्येतदक्षरमुद्गीथमुपासीत'**, **'तद्विजिज्ञासस्व । तद्ब्रह्मेति'** इत्याद्यनेकविषयवाक्यसङ्ग्रहाय चोभयोः प्रयोगः ॥

ग्रन्थादौ मङ्गलाचरणस्यावश्यं कर्तव्यत्वेन मङ्गलप्रयोजकतया अथशब्दं व्याचष्टे – **'अथ'** इति ॥ मङ्गलं विघ्नोत्सारणासाधारणकारणानुष्ठेय-विष्णुस्मरणाथशब्दोच्चारणरूपमर्थः प्रयोजनं यस्य, तथा प्रशस्तरूपा-नुष्ठेयमङ्गलात्मको विष्णुः तद्गुणो वाऽभिधेयो यस्य स तथोक्तः । अथशब्दस्य मङ्गलफलकत्वं तु -

'ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥'

इति मनुस्मृतिसिद्धम् । मुक्त्यर्थिमात्रस्य ब्रह्मजिज्ञासायां प्रवृत्तिनिरसनतात्पर्येणापि प्रयुक्तस्याखण्डाथशब्दस्य वाच्यमर्थमाह – **'अधिकार'** इति ॥ चशब्दोऽनुष्ठेयाननुष्ठेयाक्षरार्थविवक्षया समुच्चये, न केवलं मङ्गलप्रयोजनकः किन्त्वानन्तर्याभिधायकश्चेति विषयसमुच्चये वा । यद्वा - अवधारणे चशब्दः । तेनानुष्ठेयमङ्गलारम्भप्रश्नकात्सर्च्यार्थनिरासः । तत्प्रकारस्तु चन्द्रिकायामुक्तः । तथा चाधिकारानन्तर्यमर्थोऽभिधेयो यस्य स तथोक्तः । अथशब्दस्यानन्तर्यमात्रार्थत्वेऽपि अधिकारेतिपदस्य योग्यतया सम्बन्धाद् एवमुक्तिः । अनेनानधिकारिणो मुक्त्यर्थिमात्रस्य ब्रह्मविचारे प्रवृत्तिर्निरस्ता भवति । ब्रह्मजिज्ञासायाः प्रयोजनकारणशून्यता-शङ्कानिवर्तकतया अतःशब्दं व्याचष्टे - **'अतः'** इति । **'हेत्वर्थः'** इति । हेतुर्लिङ्गमर्थो यस्य, हेतुः कारणं प्रसादाख्यमर्थो यस्येति वा, स तथोक्तः ।

उक्तं च गारुडे –

नन्वथातःशब्दपूर्वकत्वं सूत्राणां किंनिमित्तम् ? विघ्ननिवर्तक-शब्दोच्चारणादेः **'मङ्गलं ततः'** इति शब्दान्तरोच्चारणेनापि सम्भवादित्याशङ्कां पुराणवचनेनैव निराकरोति – **'उक्तं च'** इति ॥ यदेतत् **'अथशब्दः'** इत्यादिनोक्तं तद् गारुडपुराणे उक्तमेवेत्यर्थः । न केवलमस्माभिः, किन्तु गारुडे चेति समुच्चये वा चशब्दः ॥

'अथातश्शब्दपूर्वाणि सूत्राणि निखिलान्यपि ।
प्रारभन्ते नियत्यैव तत् किमत्र नियामकम् ॥
कश्चार्थश्च [1]तयोर्विद्वन् कथमुत्तमता तयोः ।
एतदाख्याहि मे ब्रह्मन् यथा ज्ञास्यामि तत्त्वतः ॥

किमुक्तमित्यतस्तत् पठति - **'अथ'** इति ॥ यादृच्छिकत्वा-परपर्यायानियतत्वशङ्कावारणाय **'नियत्यैव'** इति ॥ **'निखिलानि'** इत्येतत् **'सूत्राणि'** इत्यस्य सङ्कोचवारकं विशेषणम् । अपिरभिव्याप्तौ । एवकारोऽनियमव्यावृत्त्यर्थः । भिन्नक्रमो वा । तथा च - हे **'विद्वन्'** आदिकवे **'ब्रह्मन्'** चतुर्मुख **'निखिलान्यपि'** व्यासजैमिन्यादिकृतानि सर्वाण्यप्यादिसूत्राणि **'नियत्यैव'** नियमेनैव कल्पान्तरेऽपि **'अथातश्शब्द-पूर्वाणि'** एव, अथातश्शब्दौ पूर्वौ प्रथमप्रयोज्यौ येषु तथाविधान्येव **'प्रारभन्ते'** सूत्रकाराः । **'अत्र'** प्रथमप्रयोज्यत्वे नियमेन प्रथमप्रयोगे केनचिन्नियामकेन भाव्यं, तन्नियामकं किमिति प्रश्नवाक्ययोजना ।

नन्ववश्यवक्तव्यार्थत्वं स्वरूपोत्तमत्वम् अर्थत आधिक्यं वा नियामकं भविष्यतीत्याशङ्क्याऽद्यपक्षे[2] पृच्छति - **'कश्च'** इति ॥ चः प्रश्नसमुच्चये, अवधारणे वा । द्वितीयस्तुशब्दार्थः अर्थस्यावश्यवक्तव्यत्वरूपविशेषमाह । तुशब्दपाठस्तु स्वरसः । तथा च – **'तयोः'** अथातःशब्दयोः कोऽसाववश्यवक्तव्यो[3]ऽर्थः येन प्राथम्यमित्यर्थः । द्वितीयमाक्षिपति – **'कथम्'** इति ॥ **'उत्तमता'** स्वरूपतश्चाऽधिक्यम् । न कथमपीत्यर्थः ॥ एवं कथंशब्दस्य प्रश्नपरत्वमङ्गीकृत्य तृतीयपक्षप्रश्नपरत्वेनापि कथमित्येतद् योजनीयम् । अर्थत इति शेषः । तथा च – तयोरथातःशब्दयोः अर्थतः उत्तमता आधिक्यं कथमित्यर्थः । अत्र आद्यतृतीयपक्षयोरवश्य-

---

१. 'कश्चार्थस्तु' ह. २. 'आद्यपक्षं' – म. ३'अवश्यं वक्तव्यः' – म.

वक्तव्यार्थतार्थाधिक्ययोस्तदभावयोश्च लोके शब्दान्तरेषु दर्शनाद् अथातश्शब्दयोस्तत्सन्देहात् प्रश्न एव, न त्वाक्षेपः । द्वितीयपक्षे तु, स्वरूपाधिक्यस्य शब्दान्तरेष्वदर्शनाद् आक्षेप एवेति ध्येयम् । अत्रोङ्कारस्य प्रश्नाद्यविषयत्वं सर्वशास्त्रादिसूत्रावयवत्वाभावात्, **'स्रवति'** इति श्रुत्या **'सिसृक्षोः'** इत्यादिस्मृत्या चैतच्छास्त्रमात्रमुख्यादित्वेन सिद्धत्वाच्चेत्यवधेयम् ॥

'एतत्' प्रश्नाक्षेपविषयीभूतं नियामकं **'अहं तत्त्वतो'** याथार्थ्येन **'यथा ज्ञास्यामि'** तथा **'मे'** मह्यं **'आख्याहि'** ब्रूहीति ॥

एवमुक्तो नारदेन ब्रह्मा प्रोवाच सत्तमः ।
आनन्तर्येऽधिकारस्य मङ्गलार्थे तथैव च ।
अथशब्दः

'एवं नारदेनोक्तः' पृष्टः आक्षिप्तश्च **'सत्तमः'** सज्जीवोत्तमः[1] **'ब्रह्मा'** प्रत्युवाचेत्यर्थः ॥

जिज्ञासाधिकारस्यावश्यवक्तव्यत्वेन तद्धेतुतासाधकानन्तर्यस्य जिज्ञासा-हेतोस्तत्कर्तव्यताहेतोश्चावश्यवक्तव्यत्वात् तदर्थकत्वात् तयोः प्रथमप्रयोग इति परिहारमभिप्रेत्यावश्यवक्तव्यार्थत्वम् अथातश्शब्दयोर्दर्शयति - **'आनन्तर्ये'** इति ॥ परस्परसमुच्चये तथाचशब्दौ । एवकारो भिन्नक्रमः; तेनाभिधेयान्तरं व्यावर्त्यते । तथा च – सौत्राथशब्दः **'अधिकारस्याऽनन्तर्ये'** अधिकारनिरूपितानन्तर्यरूपार्थे तद्विषये तन्मात्रवाचकत्वाभिप्रायेणैव सूत्रकारैः **'समुदीरितः'** प्रयुक्तो न मङ्गलादिवाचकत्वेनेत्यर्थः । अवश्यकर्तव्यप्रयोजनकत्वाच्च प्रथममथशब्दप्रयोग इति भावेनाथशब्दो मङ्गलार्थ इति स्वोक्तार्थे प्रमाणं दर्शयति – **'मङ्गलार्थे'** इति । चतुर्थ्यर्थे सप्तमीयं,

---

१. **'सर्वजीवोत्तमः'– म.**

अव्ययं वा । अर्थशब्दः प्रयोजनवाची । तथा च – मङ्गलरूपप्रयोजनार्थं चाथशब्दः सूत्रकारैः समुदीरितः प्रयुक्तो भवेदित्यर्थः । विष्णुवाचकाकार-घटिताथशब्दोच्चारणरूपमङ्गलस्य तत्साध्यत्वादिति भावः । आनन्तर्य इतिवत् **'मङ्गले'** इत्यनुक्त्वा **'अर्थ'** इति वचनं तद्वैषम्यसूचनार्थम् । स्ववाक्ये प्रमाणक्रमातिक्रमस्तु मङ्गलस्य प्रथममनुष्ठेयत्वात् कृतः ॥

त्वतश्शब्दो हेत्वर्थे समुदीरितः ।
परस्य ब्रह्मणो विष्णोः प्रसादादिति वा भवेत् ।

एवमथशब्दस्य अवश्यवक्तव्यार्थत्वरूपं प्रथमप्रयोगनियामकं प्रदर्श्य अतःशब्दस्यापि तद् दर्शयति - **'अतःशब्दस्तु हेत्वर्थे'** इति । तुशब्दो विशेषार्थः । हेतुर्लिङ्गं कारणं च स चासावर्थोऽभिधेयश्च तस्मिन् तद्विषये तद्वाचकतया सूत्रकृद्भिः **'समुदीरितः'** इत्यर्थः । गुर्वर्थदीपिकायां तु 'हेत्वर्थे इति स्ववाक्ये प्रमाणे च **'तद्धेतुत्वं वदन्'** इत्युत्तरवाक्यानुसाराद् भावप्रधानो निर्देशः' इत्युक्तम् । तन्निष्फलम् । तथा च व्याख्यास्यामः । हेताविति्यनुक्त्वा अर्थशब्दग्रहणं शब्दाधिक्यादर्थाधिक्यमिति न्यायेन प्रकृतेर्हेतुरर्थः प्रत्ययस्य तु हेतुत्वमर्थ इति प्रकृतिप्रत्ययोभयार्थकथनार्थम् । यद्वा - अर्थशब्दस्योभयत्र श्रवणात् स पूर्वत्राप्यनुषञ्जनीय इति ज्ञापनाय, तदर्थमात्रं भिन्नमिति ध्येयम् ।

अत्र अतश्शब्दस्यावश्यवक्तव्यमर्थान्तरं गचाऽह - **'परस्य'** इति । वाशब्दः समुच्चये । उक्तं हि प्रमेयदीपे **'वाशब्दश्चार्थः'** इति । उक्तं हि **'यदि वा भेदभिन्नयोः'** इति विष्णुतत्त्वनिर्णयटीकायां **'वाशब्दः समुच्चयार्थः'** इति । तथा तत्त्वप्रदीपेऽपि **'मुक्तौ मोक्षे वा'** इत्यत्र **'वाशब्दः समुच्चयार्थः'** इति । अनेन **'अतः'** इत्येतत् **'अ'** शब्दप्रकृतिकं तसिलन्तं पदम्, प्रकृत्यर्थो विष्णुः, **'प्रसादात्'** इति तु लब्धार्थकथनं, कारणत्वं प्रत्ययार्थ इत्युक्तं भवति । अपरव्यावृत्त्यर्थं **'परस्य'** इति । **'अ इति ब्रह्म'** (ऐ.आ.२-३-८-७) इति श्रुतिं

सूचयति परब्रह्मग्रहणेन । तत्स्थब्रह्मशब्दव्याख्यानाय परस्य ब्रह्मण इत्यनुवादेन विष्णोरित्युक्तम् । प्रसादादित्यनन्तरं तज्जिज्ञासादिरूपं कार्यमिति शेषः । भवेदित्यस्य इत्यर्थेऽप्यतःशब्द इत्यन्वयः । अतःशब्दप्रकृत्यर्थस्य फलस्य यथा जिज्ञासाकर्तव्यत्वे लिङ्गत्वं, न तथा तदर्थप्रसादस्य, किन्तु कर्तव्यजिज्ञासायां ज्ञानमोक्षयोरथशब्दार्थाध्ययनादौ च कारणत्वेनान्वय इत्याशयेन पृथगुक्तिः । यद्यपि हेत्वर्थे इत्यनेनैवायमर्थो लभ्येत, हेतुशब्दस्य लिङ्गकारणोभयार्थत्वात्; तथाऽप्यसाधारणसर्वनामप्रकृतिकशब्देन बोधनार्थमिदमित्यदोषः ॥

स हि सर्वमनोवृत्तिप्रेरकः समुदाहृतः ।

ननु जिज्ञासाद्यर्थं किं भगवत्प्रसादेन येनासाववश्यवक्तव्यार्थः स्यादित्यत आह – **'स हि'** इति ॥ **'हि'** यस्मात् **'सः'** विष्णुप्रसादः प्रसन्नो विष्णुरिति यावत् **'सर्वमनोवृत्तिप्रेरकः'** सर्वेषामधिकारिणां सर्वस्मिन् पूर्णे विष्णौ मनोवृत्तेः प्रेरकः प्रावण्यहेतुः **'समुदाहृतः'** प्रामाणिकैरित्यर्थः । जिज्ञासाऽपि साक्षात् प्रमाणद्वारा वा मनोवृत्तेः प्रावण्यमेव, **'जिज्ञासाऽपि सैव'** इति सुधोक्तेः । एवं सर्वासां मनोवृत्तीनां तत्प्रभेदानां टीकास्थादिपदगृहीतानां ज्ञानाध्ययनादीनां मनोवृत्तिसाध्यमोक्षादेश्च प्रेरकः सम्पादकः इत्यपि व्याख्येयम् । अस्य तस्मात् तदर्थेऽप्यतश्शब्दो भवेदिति पूर्वेणान्वयः ॥

सिसृक्षोः परमाद् विष्णोः प्रथमं द्वौ विनिस्मृतौ ।
ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात् ।

ननु मङ्गलाचरणादेः **'मङ्गलं ततः'** इति शब्दान्तरेणापि सम्भवात् किमेतत्प्रयोगनियत्येति कृतचोद्यस्य कः परिहार इत्यतो न केवलमवश्य-वक्तव्यार्थत्वादथातःशब्दयोः प्रथमप्रयोगः, किन्तु स्वरूपाधिक्याच्चेत्याशयेन **'कथमुत्तमता'** इत्यस्योत्तरत्वेन तयोः स्वरूपाधिक्यमाह – **'सिसृक्षोः'** इति ॥

शब्दयोः समुच्चये आद्यः चशब्दः । निमित्तसमुच्चये द्वितीयः । **'स्वरूपोत्तमौ'** इति शेषः । **'तस्मात्'** इत्यावर्तते । तथा च यस्मात् **'सिसृक्षोः'** स्रष्टुमिच्छोः **'परमात्'** सर्वोत्तमात् **'विष्णोः'** तन्मुखात् **'प्रथमं'** स्वसमानजातीय-शब्दान्तरोत्पत्तेः पूर्वम् ओङ्कारोऽथशब्दश्चेत्येतौ कण्ठं भित्त्वा **'विनिस्सृतौ'** विनिर्यातौ, तस्मात् स्वरूपोत्तमौ, तस्मात्स्वरूपोत्तमत्वादेव **'प्राथमिकौ'** प्रथमं प्रयोज्याविति योजना । अत्राऽक्षेपाविषयस्याप्योङ्कारस्य स्वरूपाधिक्योक्ति-र्ब्रह्ममीमांसाशास्त्रमात्रमुख्यामुख्यादित्वविवक्षया प्रवृत्तं **'सर्व एते'** इति वक्ष्यमाणमनुसृत्येति द्रष्टव्यम् । ननु द्वयोरेकविधं प्राथमिकत्वं विरुद्धमित्यत उक्तं **'क्रमात्'** इति । आदिमध्यक्रमादित्यर्थः । तत्रोङ्कारस्य मुख्यं प्राथमिकत्वं, अथशब्दस्य द्वितीयतया मुख्यमिति ध्येयम् ॥

तद्धेतुत्वं वदंश्चापि तृतीयोऽत उदाहृतः ।
अकारः सर्ववागात्मा परब्रह्माभिधायकः ॥

अथशब्दस्य ओङ्कारेण सह स्वरूपाधिक्यमभिधाय अतःशब्दस्यापि तदाह – **'तत्'** इति ॥ **'तद्धेतुत्वं वदन्'** इति **'हेत्वर्थे'** इत्यस्यानुवादः । स चोद्देश्यसमर्पकस्य अत इत्यस्य शब्दपरत्वज्ञापनद्वारा तृतीय-तयोक्तत्वादिविधानार्थः । अन्यथा स्वरूपाधिक्यकथनदशासङ्गतिः स्यात् । यद्यपि पुरोवादानुसारात् **'तद्धेतुत्वं वदन्'** इति सुवचम्; तथाऽपि हेतुशब्दस्य लिङ्गार्थत्वपक्षे तत्स्वरूपं विवरितुं कारणार्थत्वपक्षे तत्कार्यं तसिप्रत्ययार्थं च प्रदर्शयितुं **'तद्धेतुत्वं वदन्'** इत्युक्तम् । अत्रातःशब्दोऽसकृदावर्तते । तत्रैकश्शब्दपरः, अन्यो हेतौ, अपरो विष्णुपरः । [१]अत्र शब्दपरस्यातश्शब्दस्य समुच्चयार्थेन अपिशब्देनान्वयः । चो यत इत्यर्थे । **'तृतीयः उदाहृतः'** इत्यनयोरावृत्तिः । **'प्राथमिकौ'** इत्यस्य वचनव्यत्ययेनानुषङ्गः । तृतीयशब्दो

१. 'तत्र' – म.

भावप्रधानः, विभक्तिव्यत्ययश्च । तथा च, न केवलमोङ्काराथशब्दौ, किन्तु **'तद्धेतुत्वं'** तस्य प्रसन्नस्याकारवाच्यस्य विष्णोस्तत्र जिज्ञासादौ कारणत्वं तसिप्रत्ययेन वदन् प्रकृत्यैव तस्य जिज्ञासादेर्मोक्षहेतुत्वरूपं लिङ्गं वा वदन् **'अतः'** सर्वनामा सर्वनामप्रकृतिकोऽतश्शब्दोऽपि यतोऽतो विष्णोः **'तृतीयः'** तृतीयतया **'उदाहृतः'** उच्चारितः, अतः सोऽपि स्वरूपोत्तमः; यत एवमतोऽतश्शब्दोऽपि तृतीयतया प्राथमिक उदाहृत इति योजना । तथा च - मङ्गलशब्देन मङ्गलोक्तावपि तस्य स्वरूपाधिक्यानुक्तेः अथातःशब्दाभ्यामिवाधिकारप्रयोजनयोरनुक्तेश्च न तेन गतार्थता, अधिकारप्रयोजनसूचनार्थं तयोरवश्यापेक्षितत्वात् । अत एव टीकायां **'मङ्गलोक्त्यादेः'** इत्यादिशब्दः । ततश्शब्देन हेत्वानन्तर्यप्रतियोग्यधिकारसूचनेऽपि न तस्याऽदिसूत्रे निवेशो युक्तः, तस्य स्वरूपाधिक्यानुक्तेरेवेति भावः ॥

न केवलमवश्यवक्तव्यार्थत्वात्, नापि स्वरूपाधिक्याद् अथातश्शब्दयोः प्रथमप्रयोगः, किन्त्ववयवार्थतश्च । अतोऽपि प्रथमप्रयोग इति भावेन कथमिति तृतीयप्रश्नस्य प्रकारान्तरेणोत्तरमाह - **'अकारः'** इति ॥ तयोरित्यनुवर्तते । तथा च - अथातश्शब्दयोः सम्बन्धी **'अकारो'** यतः **'सर्ववागात्मा' 'तस्मात् सर्वगुणान् विष्णोरकारो वक्ति यत् प्रभोः'** इत्यैतरेयभाष्यदिशा सर्वासां वाचामर्थो यत् पूर्णत्वं तदभिधायकः, अतः परब्रह्माभिधायकः गुणपूर्णत्वधर्मिण एव परब्रह्मत्वात्, धर्मधर्मिणोरभेदाच्चेति भावः ॥

तथौ प्राणात्मकौ प्रोक्तौ व्याप्तिस्थितिविधायकौ ।

एवं तयोः **'तथौ'** तश्च थश्च वर्णौ **'प्राणात्मकौ'** प्राणौ, दोषात्मकः दोष इतिवत् । विशेषणयोः प्रत्येकमन्वयः । प्राणशब्दो वायुविष्णूभयवाची । **'महतश्चतुर्मुखात्'** इतिवद् अभिमान्यभिमन्यमानयोः, **'अयं वै लोकः प्रथमा महानाग्नी'** इतिवद् वाच्यवाचकयोः सामानाधिकरण्येनैक्यव्यपदेशः । अस्य

निरूढत्वज्ञापनाय **'आत्मक'** शब्दः । प्रोक्ताविति वाच्यत्वाभिमानित्वयोः प्रामाणिकत्वमाह । क्रमभङ्गस्तु वर्गक्रमानुसाराद् उच्चारणलाघवाच्च कृतः । परमात्मवाचित्वं च तद्गुणद्वारेत्याह - **'व्याप्ति'** इति ॥ तस्येति शेषः । तथा च तस्य अकारवाच्यस्य परब्रह्मणो व्याप्तिस्थित्यभिधायकौ इत्यर्थः । तथयोरेतत्क्रमेण योजनीयम् । अत्राकारार्थो गुणव्याप्तिः, तकारार्थो देशकालव्याप्तिः, थकारस्य त्वविकारेणावस्थितिरर्थ इत्यर्थभेदो ज्ञातव्यः । **तत्त्वप्रदीपे** तु – **'तथौ प्राणात्मकं प्राप्तौ'** इति पाठभेदमङ्गीकृत्य प्राणात्मकं प्राणप्रणेतारं विष्णुं वाचकत्वेन प्राप्ताविति व्याख्यातम् । यद्यपि सूत्रे प्रविष्टस्य सर्वनामप्रकृतिकस्यातश्शब्दस्य नैवमवयवार्थकथनं युज्यते, असर्वनाम-प्रकृतिकस्य तु **'परस्य'** इत्यनेनैवार्थत आधिक्यं चोक्तम् । तथाऽपि अथश्शब्दस्य अर्थत आधिक्यानुक्तेः तद्गतवर्णयोरसर्वनामप्रकृति-कातश्शब्दगतवर्णयोश्च वाक्यार्थाप्रविष्टातिशयितार्थान्तरोक्तिरियमित्यदोषः ॥

अतश्च पूर्वमुच्चार्याः सर्व एते सतां मताः ।
अथातश्शब्दयोरेवं वीर्यमाज्ञाय तत्त्वतः ।
सूत्रेषु तु महाप्राज्ञास्तावेवाऽदौ प्रयुञ्जते ॥' इति ।

अस्त्वेवं, ततः किमित्यत आह - **'अतश्च'** इति ॥ चोऽवधारणे समुच्चये च । तत्राथातश्शब्दविषये समुच्चयः, ओङ्कारविषये तु स्वरूपत आधिक्यादेवेत्यवधारणार्थंतेति ध्येयम् । **'एते'** इत्यस्य विवरणं **'सर्वे'** ओमथातश्शब्दा इति । **'अतः पूर्वं'** एतच्छास्त्रादाविति अतश्शब्दा-वृत्त्याऽन्वयः। **'क्रमात्'** इत्यत्रापि सम्बध्यते । **'उच्चार्याः'** इत्येवं **'सतां'** जनानां सम्मता इत्यर्थः ॥ यद्वा **'सतां'** मुख्यानां ब्रह्मसूत्राणां पूर्वम् आदिसूत्रे इत्यर्थः । न चात्र **'सकलसूत्रकारैरेवमेव प्रयुक्तत्वात्'** इति सुधाविरोधः, तस्याथातश्शब्दमात्रविषयत्वात् । अत एव 'एतौ' इति पूर्वमुक्त्वा

सकलसूत्रकारैरेवमेवेत्युक्तम्, क्रमान्तरं विहायाऽदावेवेत्यर्थः । अथशब्दस्य सूत्रकृतेति शेषः ॥

तत्किमत्रेत्यादिप्रश्नोत्तरमुपसंहरति - **'अथ'** इति ॥ तुशब्दोऽवधारणे विशेषे च । **'एवं'** इति उक्तप्रकारेण **'वीर्यं'** स्वरूपाधिक्यादिमाहात्म्यं 'आज्ञाय' तत्त्वतो विज्ञाय **'सूत्रेषु'** विचारशास्त्रादिषु सर्वेषु **'तौ'** अथातश्शब्दावेव नत्वन्यं **'आदौ'** प्रथममेव **'प्रयुञ्जते'** प्रयोगं कुर्वन्तीत्यर्थः । **'महाप्राज्ञाः'** इत्यनेन सूत्रकृतां शब्दमाहात्म्यतत्त्वज्ञानेऽसामर्थ्यं निवारयति । एवकारः सर्वशास्त्रादिसूत्रविवक्षयोङ्कारव्यवच्छेदकः । अत एव **'अतश्च'** इति त्रयाणां प्रकृतत्वेऽपि ओङ्कारवैषम्यज्ञापनायाथातश्शब्दयोरेवोक्तिः । अत एव अथातश्शब्दविषये उपक्रमोपसंहारयोः **'निखिलानि सूत्राणि' 'सूत्रेषु'** इति सर्वसूत्रोक्तिः, ओङ्कारविषये तु तदनुक्तिः । अथशब्दस्योङ्कारेण सह पाठेऽपि न सार्वत्रिकत्वं, उपक्रमोपसंहारविरोधात् । इतिशब्दस्य उक्तमित्यनेनान्वयः ॥

(अधिकारस्वरूपकथनम्)

अधिकारश्चोक्तो भागवततन्त्रे –

अथशब्दोऽधिकारानन्तर्यं वक्तीत्युक्तं; तत्र कोऽसावधिकारो ब्रह्मजिज्ञासायां, कतिविधश्च स इत्यत आह - **'अधिकारः'** इति ॥ चशब्दो न केवलमधिकारः, किन्तु तद्विभागश्च भागवततन्त्राख्यग्रन्थेऽभिहित इति समुच्चये । अत्र प्रमाणे अधिकारिकथनेऽपि तद्विशेषणतया देवत्वादि-रूपोऽप्यधिकार उक्तो भवतीति नासङ्गतिः ॥

'मन्दमध्योत्तमत्वेन त्रिविधा ह्यधिकारिणः ।
तत्र मन्दा मनुष्येषु य उत्तमगणा मताः ।
मध्यमा ऋषिगन्धर्वा देवास्तत्रोत्तमा मताः ।'

इति जातिकृतो भेदः

कथमित्यतस्तद्वाक्यं पठति - **'मन्द'** इति ॥ त्वः प्रत्येकं सम्बध्यते । इत्थम्भूतलक्षणे तृतीया । हिशब्दः प्रसिद्धौ । **'तत्र'** त्रिविधेषु मध्ये मनुष्येषु ये **उत्तमगणाः** ते मोक्षयोग्येषु मन्दाधिकारिण इत्युद्देश्यविधेयभावो द्रष्टव्यः । एवं उत्तरत्रापि । गणशब्देन पुरुषार्थनयोक्त-त्रिविधमनुष्योत्तमा गृहीताः । ऋषयश्च गन्धर्वाश्च **'ऋषिगन्धर्वाः'** । बहुवचनमाद्यर्थे । तेन पितृपयोर्ग्रहणम् । **'तत्र'** त्रिषु । पुनः **'तत्र'** इत्यस्य **'एवंविधानि'** इतिवदुपसंहाररूपत्वान्न पुनरुक्तिः । यद्वा, प्रथमस्य **'तत्र'** इत्यस्य ब्रह्मजिज्ञासायामित्यर्थः । अत एवोक्तं टीकायां **'ब्रह्मजिज्ञासायां'** इति । तथा च - **'तत्र'** ब्रह्मजिज्ञासायामधिकारिणस्त्रिविधाः, **'तत्र'** त्रिविधेष्वित्यन्वयः । अथवा **'इतिशब्दः प्रत्येकमभिसम्बध्यते, अत एव द्विर्ग्रहणं'** इति तत्वोद्योतटीकारीत्या मध्यमेष्वनुषङ्गसूचनायाऽद्यन्तयोस्तत्रेत्युक्तिः । 'तत्र' तेषामधिकारिणाम् ॥ **'इति'** एवं **'जातिकृतो'** मनुष्यर्षिदेवत्वादि-रूपसामान्यनिमित्तकः तत्तत्कुलजनिनिमित्तो वा **'भेदः'** अवान्तरविभागः अन्योन्याभावो वा ज्ञेय इत्यर्थः । अनेन मोक्षयोग्यत्वं वैदिकब्रह्मविद्या-धिकारिसामान्यलक्षणमभिप्रेतम् ॥

तथाऽन्यो गुणपूर्वक :।

नन्विदं लक्षणं सच्छूद्रादावतिव्याप्तम् । न च सच्छूद्रादेर्विप्रादिदेहान्तरे ब्रह्मविद्याधिकारित्वान्नातिव्याप्तिरिति वाच्यम्, देहान्तरे सतोऽप्यधि-कारस्येदानीन्तनप्रवृत्त्यनुपयोगित्वात्, तद्देहावच्छेदेन त्वनुत्पन्नब्रह्मापरोक्ष-ज्ञानित्वेनास्याभावनिश्चयात् । तथा च सच्छूद्रादावस्याधिकारस्य प्रायिकत्वाद् बाहुलकत्वात्, अत एवैतद्देहेऽभावाद् अत एवालक्ष्यत्वात्, अस्य च मोक्षयोग्यत्वस्य स्वरूपत्वेनानधिकारदशायामपि सत्त्वाद् व्याप्तेर्ध्रौव्यादित्यतः प्रकारान्तरेणाधिकारिणः स्वरूपमाह – **'तथा'** इति ॥ समुच्चयार्थोऽयम् । **'अन्यो'** जातिकृतभेदाद् भेद इत्यस्ति **'गुणपूर्वको'**

भक्त्यध्ययनादिशुभधर्मनिमित्तोऽस्तीति शेषः ॥

भक्तिमान् परमे विष्णौ यस्त्वध्ययनवान् नरः ।
अधमः शमादिसंयुक्तो मध्यमः समुदाहृतः[१] ॥
आब्रह्मस्तम्बपर्यन्तमसारं चाप्यनित्यकम् ।
विज्ञाय जातवैराग्यो विष्णुपादैकसंश्रयः ॥
स उत्तमोऽधिकारी स्यात् संन्यस्ताखिलकर्मवान् ॥' इति ॥

तमेव दर्शयति - **'भक्तिमान्'** इति ॥ पूर्वमुद्देशवाक्ये बहुवचननिर्देशेऽप्यत्र **'नरः'** इत्याद्येकवचननिर्देशो नानुपपन्नः, अस्य लक्षण-वाक्यत्वात्, **'प्रमाणानि'** इत्युद्देशवाक्ये बहुवचननिर्देशेऽपि **'प्रमाकरणं प्रमाणं'** इत्येकवचनेन लक्षणोक्तिवत् । अत्र –

'अवैष्णवस्य वेदेऽपि ह्यधिकारो न विद्यते ।
गुरुभक्तिविहीनस्य शमादिरहितस्य च ॥'

इत्युक्तेः, अध्ययनलब्धाऽपि विष्णुभक्तिः शमादिकं चाभक्तानधिकारिकृताध्ययनशमादिनिवृत्त्यर्थं पृथगुक्तम् । आदिशब्देन **'शान्तो दान्तः'** इत्युक्तानां ग्रहणम् । सारनित्यसमुच्चये चापिशब्दौ । **'इति'** इति शेषः । **'नरः'** भक्तजनः । अस्य सर्वत्र सम्बन्धः । तथा च – यो नरः परमे विष्णौ भक्तिमान् अध्ययनवान् च सोऽधमोऽधिकारीति प्रामाणिकैः समुदाहृतः । यः शमादिसंयुक्तो नरः स मध्यम इति प्रोक्तः ॥

यः **'आब्रह्मस्तम्बपर्यन्तं'** चतुर्मुखमारभ्य तृणजीवपर्यन्तं जीवजातं **'असारं'** असर्वोत्तमं, असारपदं मोक्षादवरपरं वा **'अनित्यकं'** अनित्यं ब्रह्मादिजीवानां देहनाशेऽपि स्वरूपनाशाभावात् कप्रत्ययः । परब्रह्म तु

१. 'स उदाहृतः' ह. ।

सर्वसारं सर्वथा नित्यं चेति । **'विज्ञाय'** ज्ञानवान् सन् सारासार-नित्यानित्यवस्तुविवेकवानिति यावत् । यश्च ततो विवेकात् **'जातवैराग्यः'** इति विज्ञाय जनितवैराग्य इति वा । यश्च **'विष्णुपादैकसंश्रयः'** विष्णुपाद एव एको मुख्यः संश्रयो मम शरणमिति ज्ञानं यस्य सः । यश्च **'सन्यस्ताखिलकर्मवान्'** सन्यस्तं भगवति समर्पितमखिलं यदकाम्यं कर्म तद्वान् **'सः'** नरः **'उत्तमोऽधिकारी'** स्यादिति योजना ॥

अत्र सन्यासो नाम भगवान् सर्वाणि कर्माणि करोति सर्वकर्माणि भगवत्पूजारूपाणीति च ज्ञात्वा भ्रान्त्या जीवकर्तृकत्वेन ज्ञातानां कर्मणां भगवति विसर्गः । यथोक्तं गीताभाष्ये - **'भगवानेव सर्वाणि कर्माणि करोति'** इत्यादिना । अनेन **'भक्तिमान् परमे विष्णौ'** इत्यादि **'सन्यस्ताखिलकर्मवान्'** इत्यन्तवाक्येन यान्यधिकारित्रयविशेषणान्युक्तानि तान्येव सर्वाणि मिलित्वाऽधिकारिसामान्यलक्षणभूतानीत्युक्तं भवति । न च मिलितानां त्रयाणां प्रत्येकं त्रिष्वभावादसम्भवः, भावे वाऽधमादिलक्षणस्य मध्यमादिष्वतिव्याप्त्यापत्तिरिति वाच्यम्, उत्तरवाक्ये पूर्वस्य, पूर्ववाक्ये चोत्तरस्यानुकर्षेण सर्वत्र सर्वस्य सत्त्वाभ्युपगमेनासम्भवाभावात् ॥

नन्वसङ्कीर्णविशेषलक्षणानुक्तेस्त्रैविध्यायोग इति चेत् - अत्र केचित् **'उत्तरोक्ताप्राचुर्येण'** इति टीकावाक्यस्योत्तरयोरधिकारिणोरुक्तानां गुणानां पूर्वस्मिन्नधमेऽप्राचुर्येणेत्यर्थमाश्रित्य प्रचुरतमाध्ययनादिगुणत्रयवत्त्वमुत्तमत्वं, प्रचुरताध्ययनादिगुणत्रयवत्त्वं मध्यमत्वं, तदुभयभिन्नकेवलगुणत्रयवत्त्वम् अधमत्वमित्यसाङ्कर्यमाहुः । त एवोत्तरत्र सङ्गृहीताः पूर्वत्रानुकृष्टाश्च गुणा उत्तरोक्तास्तेषां तत्रतत्र भक्तिमानित्यादियथास्थितमूलोक्तगुणा-पेक्षयाऽप्राचुर्येणेति पक्षान्तरमाहुः ॥

चन्द्रिकायां तु पूर्वपूर्वस्मिन् उत्तरोत्तरस्मिन्नुक्ताप्राचुर्येणेति टीकार्थमाश्रित्य समानाधिकरणानामध्ययनशमदमादिसम्पत्तिविष्णुपादैक-

संश्रयत्वादीनां मध्ये यः प्रचुराध्ययनवान् - इतरे त्वप्रचुरे - सोऽधमो - ऽधिकारी । यः प्रचुराध्ययनशमादिमान् अन्यदेकमेवाप्रचुरं - स मध्यमः । यः प्रचुरविष्णुपादैकसंश्रयत्वादिमान् - इतरे त्वप्रचुरे - स उत्तमाधिकारीति तल्लक्षणभेदात् त्रैविध्योपपत्तिरित्युक्तम् । 'इति' शब्दस्य **'भागवततन्त्रे'** इत्यनेनान्वयः ॥

'अध्ययनमात्रवतः',

'नाविशेषात्' *(ब्र. सू. ३-४-१२, १३.)* **इति चोपरि ।**

अध्ययनं ब्रह्मविद्याधिकार इत्युक्तम् । तत् कुतः ? उदाहृतप्रमाणे ब्रह्मविद्यायामिति कण्ठतोऽनुक्तेः । कुतश्च तत्राधिकारत्रैविध्यमित्यत आह - **'अध्ययन'** इति ॥ मात्रशब्दः कात्स्न्यर्थः । तथा च - यथाशक्तिसर्ववेदाध्ययनवतो ब्रह्मविद्याधिकारितेति सूत्रार्थः ॥

'नाविशेषात्' इत्यपरं सूत्रम् । देवादीनां ब्रह्मविद्याधिकारिता अविशेषात् सामान्यान्न, किन्तु तारतम्यादेवेत्यर्थः । **'उपरि'** तृतीये अधिकारस्तारतम्येन वक्ष्यते, सूत्रकृतेति शेषः । तदभिप्रेतस्मृतौ **'वेदोक्तब्रह्मविद्यायाम्'** इत्युक्तत्वात् तत्रोदाहृतश्रुतौ ज्ञानाधिकारि-त्रैविध्यस्याप्युक्तत्वादुक्तशङ्कापरिहार इति भावः । चशब्दः **'अध्ययनवान्'** इति प्रमाणसमुच्चये ॥

'शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽ-त्मानं पश्येत्', *(बृ-उ. ६-४-२३)*

शमादिकमपि ब्रह्मविद्यायाधिकार इत्यत्र काण्वश्रुतिमाह - **'शान्त'** इति ॥ अत्र 'आत्मनि' इत्युक्त्या मध्यमाधिकारी सूचितः, **'ऋषयोऽन्तः-प्रकाशाः'** (चतुर्वेदशिखा) इति श्रुतेः **'मध्यमा ऋषिगन्धर्वाः'** इत्युक्तेश्च ।

'शान्तः' भगवन्निष्ठबुद्धिः **'शमो मन्निष्ठता बुद्धेः'** इति भागवतोक्तेः । **तत्त्वप्रदीपे** तु - वैष्णवसिद्धान्तादचलनं शम इति पर्यवसितमुक्तम् । **'दान्तः'** निगृहीतमदः, इन्द्रियनिग्रहवानिति यावत् । **'उपरतः'** विषयालम्बुद्धिमान् । **बृहद्भाष्यरीत्या** - उप समीपे स्वहृदयस्थे विष्णौ सन्तोषवानिति वा । **'तितिक्षुः'** शीतोष्णादिद्वन्द्वसहिष्णुः । **'समाहितः'** समे सेन्दिरे हरौ चित्तवृत्तिमान् । यद्वा - **'यथावस्तु तथा ज्ञानं तत्साम्यात् सममीरितम्'** इति वचनात् समं यथार्थमाहितमाधानं मनोवत्तिरूपं ज्ञानम् इच्छा च यस्य स तथोक्तः । तथाच यथावस्तुज्ञानादिमानित्यर्थः । भूत्वेत्यस्य प्रत्येकं सम्बन्धः । स्थितमिति शेषः । तथा च - पूर्वं **'एवं'** विच्छब्देनोक्तो हरेः संसारमोचकत्वज्ञानी शान्त्यादिमान् **'भूत्वा'** **'आत्मनि'** स्वहृदये स्थितं **'आत्मानं'** परमात्मानं **'पश्येत्'** जानीयादित्यर्थः, विचारयेदिति लाक्षणिकार्थः । शान्तादिर्भूत्वाऽऽत्मानं विद्यादित्यनेन उपनयनस्याध्ययनार्थत्ववत् शान्त्यादेर्ब्रह्मविद्यार्थत्वमुक्तं भवति । यद्यपि पश्यतीति श्रुतिपाठः, तथाऽपि विष्णुतत्त्वनिर्णयटीकायां 'स तथा चकारेति क्वचित् पाठः स सदृशशाखान्तरगतो ज्ञातव्यः, एवमन्यत्रापि' इत्युक्तत्वात् तन्न्यायेनायमपि सदृशशाखान्तरगतो वा पश्यतीत्यस्यार्थानुवादो वेत्यदोषः ॥

'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो
निर्वेदमायान्नास्त्यकृतः कृतेन ।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् ।
समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥' *(मु.उ. १-२-१२)*

सारासारनित्यानित्यविवेकजन्यवैराग्याद्यपि ब्रह्मविद्यायामेवाधिकार इत्यत्राऽथर्वणश्रुतिमाह – **'परीक्ष्य'** इति ॥ **'ब्राह्मणः'** ब्रह्मज्ञानयोग्यः **'लोकान्'** विष्णुलोकेतरान् **'कर्मचितान्'** काम्यकर्मसम्पादितान् तत एवासारत्वेना-

नित्यत्वेन च **'परीक्ष्य'** विविच्य तेन विवेकेन **'निर्वेदं'** काम्यकर्मणि तत्फले च वैराग्यं **'आयात्'** प्राप्नुयात् । यस्मात् स्वरूपानन्दाविर्भावरूपत्वात् **'अकृतः'** नित्यपुमर्थरूपो मोक्षः **'कृतेन'** उत्पत्तिनाशवत्फलत्वेनावधृतकर्मणा **'नास्ति'**, किन्तु ज्ञानेन । **'तत्'** तस्मात् **'सः'** मोक्षादितरत्र विरक्तः **'विज्ञानार्थं'** ब्रह्मणो विशेषज्ञानाय । **'समित्पाणिः'** समिद्युक्तौ पाणी यस्य । यद्वा - सम्प्राप्तौ सम्पुटीकृतौ अरिक्तौ वा पाणी यस्य । स एवम्भूतः सन् **'श्रोत्रियं'** छन्दोध्येतारं ब्रह्मनिष्ठमेव गुरुम् **'अभिगच्छेत्'** उपसीदेदित्यर्थः । गुरुमेव न त्वन्यमिति वा एवशब्दान्वयः ॥

तत्त्वप्रदीपे तु - **'कर्मचितान्'** कर्मणा सञ्चितान् ऐहिकान् मन्दिरादीन् विनाशिनः **'परीक्ष्य'** परितो वीक्ष्य पारलौकिकत्वेन तद्विपरीतानपि कर्मभिश्चितान् स्वर्गादिलोकान् विनाशिन एव परीक्ष्य तेभ्यो **'निर्वेदमायात्'**। **'अकृतः'** ज्ञानिप्रियो भगवान् **'कृतेन'** कर्मणा **'न'** लभ्यते । ततः **'तद्विज्ञानार्थं'** तस्य ज्ञानिप्रियस्य विष्णोर्विज्ञानार्थं **'गुरुमभिगच्छेत्'** इति श्रुत्यर्थ उक्तः । अत्रापि विज्ञानपदेन ब्रह्मज्ञानिपरब्राह्मणपदेन चोत्तमाधिकारी सूचितः, **'देवादीनां तु तज्ज्ञानं विज्ञानमिति कीर्तितम्'** इति **गीताभाष्योक्तेः, 'नैव देवपदं प्राप्ताः ब्रह्मदर्शनवर्जिताः'** इति **तत्तात्पर्योक्तेश्च** ॥

'यमेवैष वृणुते तेन लभ्यः
तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥' *(कठोप. २-२३)*

विष्णुभक्तिरपि ब्रह्मविद्यायामधिकार इत्येतत् कठश्रुत्या दर्शयति - **यमिति** । आथर्वणेऽपीयं पठ्यते । (मुं. ३-२-३) **'एषः'** इच्छारूपः **'आत्मा'** विष्णुः **'यं'** अधिकारिणं **'वृणुते'** परिगृह्णाति **'तेन'** एव **'लभ्यः'** प्राप्यः तस्य प्रसन्नो भवति ॥ ततश्च **'तस्य'** अधिकारिणः **'एषः'** प्रसन्नः **'आत्मा स्वां तनूं'** रूपं **'विवृणुते'** प्रकाशयतीत्यर्थः । अत्र **'भक्तमेव च वृणुत इति प्रसिद्धः'** इति

प्रमेयदीपोक्तरीत्या वृणुत इत्यनेन भक्तत्वं सूचितम् । तत्त्वप्रदीपे तु - **'यमेवैषः'** परमात्मा भक्तिदानेन **'वृणुते'** स्वीकरोति **'तेन'** प्राप्यो यतस्तस्यैव **'स्वां तनुं'** प्रकाशयतीत्युक्तम् ॥

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥' *(श्वे.उ.६.२३)*
इत्यादिश्रुतिभ्यश्च[1] ।

सा च भक्तिः विष्णौ सर्वाधिका, अन्येष्वपि यथायोग्या ब्रह्मविद्योपयोगिनीत्यर्थे श्वेताश्वतराणां श्रुतिं (श्वे. ६-२३) दर्शयति - **यस्येति** ॥ **'यथा'** इत्यावर्तते । **'तथा'** इति समुच्चये । **'कथिताः' 'अकथिताः'** इति द्वेधा विच्छेदः । पूर्ववेदादिभिर्गुरुणेति च शेषः । तथाच – **'यस्य'** अधिकारिणो **'देवे'** द्योतनादिगुणे विष्णौ **'परा'** सर्वाधिका **'भक्तिः'** अस्ति **'तथा' 'देवे'** तदितरदेवेषु ब्रह्मादिषु **'यथा'** यथायोग्या भक्तिरस्ति, **'तथा गुरौ'** अन्येषु स्वोत्तमेषु च यथायोग्या भक्तिरस्ति । **'तस्य'** महात्मनः कर्तरि षष्ठीयम् । तेनाधिकारिणा पूर्वं वेदादिभिर्गुरुणा वा **'कथिताः' 'एते'** उक्ताः **'अर्थाः'** परापरतत्त्वरूपाः **'प्रकाश्यन्ते'** ज्ञायन्त इत्यर्थः । यद्वा -**'एते'** शमादिरूपा **'अर्थाः'** गुणास्तस्मिन् **'प्रकाश्यन्ते'** दृश्यन्त इत्यर्थः । अथवा - **'अकथिताः'** गुरुभिरनुपदिष्टाः **'अर्थाः'** अस्य भक्तिवशात् **'प्रकाश्यन्ते' 'हि'** प्रसिद्धमित्यर्थः । **'प्रकाशन्ते'** इति पाठे तत्कर्तृकज्ञानानुकूलभानकर्तारो भवन्तीत्यर्थः ॥

'इत्यादिश्रुतिभ्यश्च' इत्यस्य **'अधिकार उक्तः'** इत्यनेनान्वयः । न केवलमुक्तश्रुतिभिः, किन्तु **'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं** (भ.गी. ११-५४) इत्यादिस्मृतिभ्यश्चेति चशब्दार्थः ॥

---

१. **'इत्यादिश्रुतिश्च'** ह ।

व्योमसंहितायां च –

'अन्त्यजा अपि ये भक्ता नामज्ञानाधिकारिणः ।
स्त्रीशूद्रब्रह्मबन्धूनां [१]तन्त्रज्ञानेऽधिकारिता ॥

ननु यद्यध्ययनवतामेव ब्रह्मविद्याधिकारः तर्हि त्रिवर्णेतरेषामध्ययनाभावेनाधिकारो न स्यात् । ततश्च तेषां ब्रह्मज्ञानाभावेन मोक्षाभावः स्यादित्याशङ्कां स्मृत्या परिहरति - **'व्योमसंहितायां च'** इति । प्रकृतशङ्कानिरासपूर्वकमिति शेषः । पूर्वग्रन्थसमुच्चये चशब्दः । अस्यापि **'अधिकार उक्तः'** इत्यनेनान्वयः ॥

अन्ते भवाः अन्त्याः, तेषु जाताः **'अन्त्यजाः'** त्रिवर्णबाह्याः । अयं चार्थो **'विष्णुनामस्वाध्यायोऽन्त्यानां'** इत्येतदवतारिकारूपया **'नाग्निर्न यज्ञः शूद्रस्येत्यादेस्त्रिवर्णबाह्यानां'** इति न्यायदीपिकया सूचितः । **'भक्ताः'** इति भक्तिमानित्युक्तब्रह्मविद्याधिकारकथनम् । एवं **'भक्तिमतां'** इत्यपि । एतच्चोभयान्वयि । तथा च – न केवलं त्रैवर्णिकाः, किन्तु ये अन्त्यजाः त्रिवर्णबाह्याः शूद्रादयः पुल्कसान्ताः ते यद्यपि वैदिकब्रह्मज्ञानानधिकारिणः, तथाऽपि यतो भक्ताः अतो नामज्ञानाधिकारिणः विष्णुनामज्ञानतत्स्वाध्यायाधिकारिणः, अतस्ते ब्रह्मज्ञानमुक्त्यधिकारिण इति योजना ॥

त्रैवर्णिकेष्वपि वेदानधिकारिणां केषाञ्चित्, अन्त्यजेष्वपि केषाञ्चिद् भक्तिमतां, उक्तादन्यच्चाऽह – **'स्त्रीशूद्रब्रह्मबन्धूनाम्'** इति । स्त्रियश्च शूद्राश्च ब्रह्मबन्धवो ब्राह्मणाभासाश्च तेषामिति विग्रहः । **तन्त्रं** पञ्चरात्रादि, तज्ज्ञाने तदुक्तार्थज्ञाने, तन्त्रोत्पन्नब्रह्मविद्यायामिति यावत् । अपिशब्दोऽत्रापि सम्बध्यते । तथाच तेषां तद्ज्ञानद्वाराऽपि मोक्षोपपत्तिरिति भावः ॥

---

१. 'तत्र ज्ञाने' ह. ।

एकदेशे परोक्ते तु [१]न तु ग्रन्थपुरस्सरे ।
त्रैवर्णिकानां वेदोक्ते सम्यग् भक्तिमतां हरौ ॥
आहुरप्युत्तमस्त्रीणामधिकारं तु वैदिके ।
यथोर्वशी यमी चैव शच्याद्याश्च तथाऽपराः ॥' इति ॥

तन्त्रेऽपि न सर्वत्राधिकारः, किन्तु **एकदेशे** एव । तत्रापि **'न ग्रन्थपुरस्सरे'** न स्वप्राधान्येन ग्रन्थारम्भेऽधिकारः, किन्तु **परोक्ते** परेणान्येन परार्थं प्रोक्ते आरब्ध एवेत्याह – **'एकदेश'** इति ॥ अवधारणे तुशब्दः । तद्व्यावर्त्यमाह - **'न तु'** इति ॥ स्त्र्यादिमात्रपुरस्कारेण प्रारभ्यमाणतन्त्रग्रन्थादौ तेषां नाधिकारितेत्यर्थः । अनेन स्त्रीशूद्रादिमात्रं पुरस्कृत्य पुराणादि-ग्रन्थप्रवचनमपि न कार्यमित्युक्तं भवति । द्वितीयतुशब्दस्योत्तरत्रान्वयः । तर्हि वेदोत्पन्नब्रह्मविद्यायां केषामधिकारः ? परिशेषात् त्रैवर्णिकानां चेत् – तेषामपि किं सर्वेषामधिकारः ? न, किं तु केषाञ्चिदित्याह - **'त्रैवर्णिकानामिति** ॥ **'वेदोक्ते'** वेदोत्पन्नब्रह्मज्ञाने तु **'हरौ सम्यग्भक्तिमतां'** एव **'त्रैवर्णिकानां'** उक्तेतरब्रह्मक्षत्रियवैश्यानाम् अधिकारितेत्यर्थः । न केवलं नामादिज्ञानाधिकार इत्यर्थेऽपि तुशब्दः ॥

'सपत्नीं मे पराधम पतिं मे केवलं कुरु ' (मं-प्र-१६-२) इत्यादौ स्त्रीणामपि वेदाधिकारदर्शनात् कथं तासामनधिकार इत्यत उक्तस्यापवादमाह– **'आहुः'** इति ॥ तुरप्यर्थेऽपि । **'वैदिके'** इत्यस्य विपरिणामेनाऽवृत्तिः । **'उत्तमस्त्रीणाम्'** इति तत्पुरुषकर्मधारयौ । तथाच - न केवलमुत्तमानां देवानां स्त्रीणां नामादिज्ञानेऽधिकारः, किन्तु वैदिकेऽपि ज्ञाने वेदोत्पन्नब्रह्मविद्यायामपि वैदिका अधिकारमाहुरिति योजना । ता

---

१. .'न च' ह.।

उदाहरति – **'यथा'** इति ॥ **'एव'** एवं **'यमी'** यमस्य भार्या श्यामला । चशब्द उक्तसमुच्चये । आद्यशब्देन उमारत्यादि गृह्यते । अनुक्तसमुच्चये द्वितीयश्चः, तेन मनुष्यादिकुलोत्पन्नदेवस्त्रियो गृह्यन्ते । तथाशब्द उपमायां उक्तसमुच्चये वा । अपरा उत्तमस्त्रीभ्यो अन्या ऋषिपत्न्यः । अवरा इति वा, उत्तमदेवस्त्र्यपेक्षया मध्यमऋषिपत्नीनां अवरत्वादिति । **'व्योमसंहितायाम्'** इति इतिशब्दान्वयः ॥

यतो नारायणप्रसादमृते न मोक्षः, न च ज्ञानं विनाऽत्यर्थ-प्रसादः। अतो ब्रह्मजिज्ञासा कर्तव्या ॥

एवं प्रतिज्ञाप्रमाणोपन्यासाभ्यां आनन्तर्यप्रतियोग्यधिकारविवरण-मुखेनाथशब्दं सङ्क्षेपविस्ताराभ्यां व्याख्याय सूत्रे **'कर्तव्या'** इति पदम् अतश्शब्दपरामर्शनीयसमर्पकं **'यतः'** इत्यादिकं चाध्याहार्यमिति दर्शयन् **'अतश्शब्दो हेत्वर्थे'** इति सङ्क्षेपेणोक्तमर्थं विशदयति - **'यतः'** इति । **'यतः'** इत्यावर्तते । तथाच - यतः सुखमेव मे स्यात् दुःखमीषदपि माभूदिति सर्वाभिमतो **'मोक्षः'** स च [१] **'नारायणप्रसादमृते'** विना नास्ति, स च **'अत्यर्थप्रसादः'** अतिमात्रप्रसादश्च नापरोक्षज्ञानं विना, तच्च न ब्रह्मजिज्ञासां विना, **'अतो ब्रह्मजिज्ञासा कर्तव्या'** इत्यर्थः । उक्तं हि शब्दाधिकरणे तत्त्वप्रदीपे 'मोक्षस्यैव परमपुरुषार्थत्वात् तस्य च समीचो विना विष्णुप्रसादाद् अलभ्यत्वात् तस्य च अतिमात्रस्यापरोक्षज्ञानप्रसाध्यत्वाद् तस्य चापरोक्षस्य जिज्ञासासमायत्तत्वाद् विष्णुरेव जिज्ञास्य इत्युक्तम्' इति । सावधारणान्वयस्याप्युपलक्षकमेतत् । तस्यातश्शब्देन परामर्शान्नानुपपत्तिः । अनेन सूत्रे यतो नारायणप्रसादमृते न मोक्षः, किन्तु प्रसादेनैव, न च ज्ञानं

१. **'सम्यञ्चं'** इति मुद्रितपुस्तकपाठः, म. पुस्तकपाठश्च । स च **'स च'** इति परिवर्तितः ।

विनाऽत्यर्थप्रसादः, किन्तु ज्ञानेनैव, न च जिज्ञासां विना ज्ञानं, किन्तु जिज्ञासयैव, अतो ब्रह्मजिज्ञासा कर्तव्येत्यन्वयप्रदर्शनमुखेनातश्शब्दस्य मोक्षसाधनप्रसादसाधनज्ञान-साधनत्वादिति हेतुरर्थ इत्येतद् विवृतं भवति । एवं यतो नारायणप्रसादमृते न ज्ञानं न जिज्ञासा किन्तु प्रसादेनैवेति योजनायामतःशब्दस्यार्थान्तरमपि विवृतं भवति । नारायणशब्दप्रयोगेण सौत्रब्रह्मशब्दोऽपि व्याख्यातो भवति ॥

'यत्रानवसरोऽन्यत्र पदं तत्र प्रतिष्ठितम् ॥
वाक्यं वेति सतां नीतिः सावकाशे न तद् भवेत् ॥'
इति बृहत्संहितायाम् [१] ॥

ननु सूत्रे **'कर्तव्या'** इति पदस्यैवाध्याहारः कुतः ? अध्याहारस्य निरङ्कुशत्वेन **'न कर्तव्या'** इति वाक्यस्यैवाध्याहारः किं न स्यादित्यत आह - **'यत्र'** इति ॥ अत्र यत्रेति तत्रेति पदमिति चाऽवर्तते, तथा वाक्यमित्यपि, विनेत्यध्याह्रियते । तथा च - **'यत्र'** अवान्तरवाक्ये यत् **'पदं'** विना **'अन्यत्र'** अर्थान्तरे **'अनवसरः'** अघटना **'तत्र'** वाक्ये तदेव **'पदं'** **'प्रतिष्ठितं'** प्राप्तं भवेत्, नान्यदिति **'सतां'** न्यायः, यत्र वाक्ये यस्मिन् वाक्ये सावकाशेऽर्थान्तरे घटनावति सति तदेव पदं नियमेन प्रतिष्ठितं प्राप्तं न भवेत् । एवं यत्र महावाक्ये यदवान्तरवाक्यं विनाऽन्यत्रानवसरः तत्र महावाक्ये तदेव वाक्यं प्रतिष्ठितं, यत्र यस्मिन् महावाक्ये सावकाशे सति तदवान्तरवाक्यं नियमेन प्रतिष्ठितं न भवेदित्यर्थः । यत्र वाक्ये यत्पदं वाक्यं वाऽपेक्षितमन्यत्रान्यस्यानवसर इति वा । इति बृहत्संहितायामुक्तत्वात् **'कर्तव्या'** इति पदमेवावश्यमध्याहर्तव्यमिति वाक्यशेषेणास्यान्वयः । **'न कर्तव्या'** इत्यध्याहारे अथातश्शब्दार्थाधिकारादेरत्रान्वयायोगादिति भावः । एवं चन्द्रिकोक्तरीत्या

---

१. **'ब्रह्मसंहितायाम्'** ह. ।

'यत्र' इति श्लोको **'यतः'** इत्याद्यध्याहारसमर्थनपरतयाऽपि व्याख्येयः ॥

(मोक्षस्य भगवत्प्रसादजत्वसमर्थनम्)

'तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते' *(तै.आ. ३-१२.)*

यदुक्तं **'यतो नारायणप्रसादं'** इत्यनेन प्रसादस्य मोक्षसाधनत्वं तत् कुत इत्यतस्तत्र श्रुतिं प्रमाणयति – **तमिति** ॥ **'इह'** अधिकारिवर्गे प्रकृतपुरुषशब्दितं **'तं'** परमात्मानं **'एवं'** सहस्रशीर्षत्वाद्युक्तप्रकारेण **'इह'** लोके **'विद्वान्'** परोक्षज्ञानद्वाराऽपरोक्षतो जानन्नेवान्ते **'अमृतः'** मुक्तो भवति, यतो नारायणायनाय तत्प्राप्तिरूपमोक्षार्थं **'अन्यः'** परमपुरुषज्ञानात् **'पन्थाः'** उपायो **'न विद्यते'** नास्ति अत इत्यर्थः ।अत्र ज्ञानस्य मोक्षसाधनत्वं साक्षाद् ज्ञायते । प्रसादस्य मोक्षसाधनत्वं तु टीकासुधोक्तरीत्या प्रसादं विना विद्वत्पद-लक्ष्यापरोक्षज्ञानमात्रेण मोक्षो न भवतीत्यन्यथानुपपत्त्यैव, न तु साक्षात् । निमित्तेन नैमित्तिकोपलक्षणा वेत्यवगन्तव्यम् ॥

'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।' *(भ.गी.७-१७)*

'न च ज्ञानं विना' इति यदपरोक्षज्ञानस्य प्रसादसाधनत्वमुक्तं तत् कुत इत्यतस्तत्र गीतास्मृतिमाह **'प्रियो हि'** इति ॥ **'अहं ज्ञानिनोऽत्यर्थं'** अत्यन्तं **'प्रियः'** । **'हि'** प्रसिद्धम् । **'स च सोऽप्यपरोक्षज्ञानी मम प्रियः'** इत्यर्थः । कृष्णवाक्यमेतत् ॥

'यमेवैष वृणुते तेन लभ्यः' *(कठ. २-२३.)*

प्रसादस्य मोक्षसाधनत्वं न केवलमर्थाद् ज्ञायते, किन्तु श्रुत्या चेत्याशयेन तत्र कठश्रुतिमाह **यमिति** ॥ अत्रैवकारो भिन्नक्रमः । तथा च **'एषः'** परमात्मा **'एषः'** इच्छारूपः प्रसन्नः सन् **'यं'** अधिकारिणं **'वृणुते'** अनुगृह्णाति **'तेन'** एव **'लभ्यः'** प्राप्यः, न त्वन्येन कर्मणेत्यर्थः । अत एव विष्णुतत्त्वनिर्णयटीकायाम्

'एष परमात्मा यं वृणुते यस्य प्रसीदति तेनैव लभ्यः । कथम् ? यतस्तस्य स्वां तनुं विवृणुते प्रकाशयति, ततश्चास्य स्वां तनुम् अविद्यावृतस्वरूपां विवृणुते आविर्भावयति' इति प्रकृतानुकूलतया समग्रवाक्यार्थ उक्तः ॥

'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' *(बृ.उ.६-५-६.)* **इत्यादिश्रुतिस्मृतिभ्यः ।**

यत्पूर्वं जिज्ञासाया अपरोक्षज्ञानसाधनत्वमुपस्कृतवाक्येनोक्तं तत्र प्रमाणत्वेन श्रुतिमाह **'आत्मा'** इति ॥ वा अर इति विश्लिष्टपाठः वैशब्दोऽवधारणे । **'अरे'** इति याज्ञवल्क्यकर्तृकमैत्रेयीसम्बोधनम् । तथा च **'अरे'** मैत्रेयि ! अमृतत्वमिष्यते चेत् तर्हि **'आत्मा'** परमात्मा त्वया **'द्रष्टव्यो'** दर्शनेन विषयीकर्तव्य इत्यर्थः । दर्शनं केन स्यादित्याकाङ्क्षायामाह - **'श्रोतव्यः'** इत्यादि ॥ दर्शनार्थं निदिध्यासितव्यः । तदर्थं **'श्रोतव्यः'** गुरूपदेशमुखेन अयमस्य वाक्यस्यार्थ इत्युपनिषद्वाक्यार्थग्रहणरूपश्रवणेन विषयीकर्तव्यः, तथा **'मन्तव्यः'** युक्त्यनुसन्धानरूपमननेन विषयीकर्तव्यश्चेत्यर्थः । अनेन श्रवणमननिदिध्यासनात्मकजिज्ञासाया अङ्गाङ्गिरूपाया ज्ञानसाधनत्वमुक्तं भवति । **'श्रुतिस्मृतिभ्यः'** इति ॥ श्रुतयश्च स्मृतिश्च ताभ्य इति विग्रहः । अस्य **'यतो नारायण'** इत्यादिनोक्तं सिद्धमित्यन्वयः ॥

'कर्मणा त्वधमः प्रोक्तः प्रसादः श्रवणादिभिः ।
मध्यमो ज्ञानसम्पत्त्या प्रसादस्तूत्तमो मतः ॥
प्रसादात् त्वधमाद् विष्णोः स्वर्गलोकः प्रकीर्तितः ।
मध्यमाज्जनलोकादिरुत्तमस्त्वेव मुक्तिदः ॥

ननु **'तत्कर्म हरितोषं'** **'य इमं परमं गुह्यं'** (भ.गी.१८-६८.) इत्यादेः कर्मादिनाऽपि भगवत्प्रसादसिद्धेः किं ज्ञानेन ? प्रसादस्य मोक्षसाधनताबोधके

'तमेवं विद्वान्' 'यमेवैष वृणुते' इत्यादाविव **'प्रियो हि'** इति वाक्येऽन्यनिषेधाभावादित्याशङ्कां स्मृत्या परिहरति - **'कर्मणा'** इति ॥ काम्याकाम्योभयकर्मणेति यावत् । तथा च **'कर्मणा'** जन्यो यः **'प्रसादः'** स **'अधमः'** एव **'प्रोक्तः'** प्रामाणिकैः । एवं **'श्रवणादिभिः'** यः प्रसादो भवति । स **'मध्यमः'** । **'ज्ञानसम्पत्त्या'** अपरोक्षज्ञानपरिपाकेन जन्यो यः **'प्रसादः'** स एव **'उत्तमो मतः'** उत्कृष्टतया प्रमित इत्यर्थः । अवधारणार्थकतुशब्दस्य द्विर्ग्रहणं त्रिष्वप्यन्वयसूचनार्थम् ॥ किमतो यद्येवमित्यत आह – **'प्रसादादिति ॥** तुर्विशेषे । तथाच 'अधमाद् विष्णोः प्रसादात्' काम्यकर्मसाध्यात् **'स्वर्गलोकः'** भाव्यतया वृद्धैः **'प्रकीर्तितः'** इत्यर्थः । काम्यफलमात्रोपलक्षकमेतत् **'परीक्ष्य लोकान्'** (मु.उ. १-२-१२) इति श्रुतेः काम्यकर्मणां वैराग्यजननद्वारा मोक्षेऽप्युपयोगोऽस्तीति ज्ञातव्यम् । एवमकाम्यकर्मसाध्याद् अधमप्रसादाद् अन्तःकरणशुद्ध्यादिद्वारा मोक्षो भवतीत्यपि ज्ञातव्यम् ॥

न चाधमप्रसादशून्यानामतिद्वेषिणां दुर्योधनादीनां कथं स्वर्गप्राप्तिरिति वाच्यम्, भागवताचार्यरहितानां तदभावोक्तावपि तद्वतां तत्सम्भवात् ॥ यथोक्तं गीतातात्पर्ये -

'..... आचार्याणां तु तेजसा ।
यान्ति स्वर्गं ततः क्षिप्रं तमोऽन्धं प्राप्नुवन्ति च ॥
तदन्ये नैव च स्वर्गम् ॥' इति ॥

स्वर्गलोक इत्युक्त्या तत्रैव – **'मोक्षः साङ्कल्पिकः स्वर्गः भूतादित्वं फलं क्रमात्'** इति वचनोक्तो यो नित्यसंसारिभी राजसराजसै राजस-तामसैश्च प्राप्यस्वर्गप्रतिनिधित्वेन कल्पितो दैत्येन्द्रलोकः साङ्कल्पिकः स्वर्गः स इह न विवक्षितः, किन्तु सप्तलोकान्तर्गतो राजससात्त्विकैः प्राप्यः स्वर्गलोक एवेति सूचितम् ॥

'जनलोकादिः' इत्यत्र तु जनत्यागेन जनाख्यलोकस्यैव प्रतिपत्त्यर्थं लोकशब्दप्रयोग इति ज्ञेयम् । जनलोकादिरित्यत्र तत्पुरुषो बहुव्रीहिश्च विवक्षितः । तुशब्दो विशेषार्थः । तथा च **'मध्यमात्'** विष्णोः प्रसादाद् जनलोकस्याऽदिर्महर्लोकः जनतपोलोकादिरेव वा भवति, न मुक्तिः । **'मुक्तिदस्तु'** उत्तमप्रसाद एव प्रकीर्तितो वृद्धैः, न त्वन्याविति योजना । तथा च कर्मादिना भगवत्प्रसादसिद्धावपि तस्यानुत्तमत्वाद् ज्ञान-साध्यस्यैवोत्तमत्वाद् अनुत्तमेन स्वर्गादिमात्रसिद्धावपि मोक्षासिद्धेः तत्साधनप्रसादाय ज्ञानमपेक्षितमिति भावः । न चात्र **'ईयुस्त्रीन् कर्मणा लोकान् ज्ञानेनैव तदुत्तरान्'** इति वाक्यविरोधः शङ्क्यः, तस्य महर्लोकस्थाकृतकभागविषयत्वात्, अस्य च पुनरावर्त्यभागविषयत्वात्, **'सामान्यदर्शनाल्लोकाः'** इति प्रमाणबलेन ज्ञानशब्दस्य स्वबिम्ब-विषययोग्यापरोक्षव्यतिरिक्तसामान्यावताराद्यपरोक्षविषयत्वात्, तस्य च श्रवणादिभिरित्यत्र ह्यादिपदेन ग्रहणाद्वा; न्यायामृतोक्तरीत्या ज्ञानद्वारेति शेषकरणाद्वा; एवकारस्यायोगव्यवच्छेदार्थत्वाद्वा न विरोधः ॥

श्रवणं मननं चैव ध्यानं भक्तिस्तथैव च ।
साधनं ज्ञानसम्पत्तौ प्रधानं नान्यदिष्यते ॥
न चैतानि विना कश्चिद् ज्ञानमाप कुतश्चन ॥' इति नारदीये ॥

नन्वस्तूत्तमप्रसादाय ज्ञानापेक्षा, तथाऽपि **'कर्मणा ज्ञानमातनोति'** इत्यादेः कर्मादिनाऽपि ज्ञानं भवतीति न तदर्थं जिज्ञासा कर्तव्या **'आत्मा'** इति वाक्येऽन्यनिषेधाभावादित्याशङ्कां प्रकृतप्रमाणशेषेण परिहरति - **श्रवणमिति ॥** अत्र एवकारस्य द्विर्ग्रहणं सर्वत्र सम्बन्धज्ञापनाय । ते च श्रवणादीनां कार्यसाधनेऽन्यसाहित्यनिरासकाः, **'नरं च नारायणमेव'** इत्यादाविवानभिमतकर्मादिव्यावर्तकाश्च । द्वयोर्द्वयोः समुच्चये **'च'** शब्दौ ।

'तथा' शब्द उपमायाम् । **'तथैव च'** इति निपातसमुदायो वा । भक्तिग्रहणं प्रसङ्गाद् दृष्टान्तार्थं वा । तथा च **'ज्ञानसम्पत्तौ'** अपरोक्षज्ञानप्राप्तौ यथा भक्तिस्तथा श्रवणाद्येव साधनं, नान्यत् कर्मादीत्यर्थः । का गतिस्तर्हि **'कर्मणा ज्ञानमातनोति'** इत्यादिवचनस्येत्यत आह - **प्रधानमिति** ॥ श्रवणादि प्रधानं साधनं **'अन्यत्'** अप्रधानमित्येव **'इष्यते'** अभ्युपेयते प्रामाणिकैः, न त्वन्यत् साधनमेव नेति योजना । अप्रधानसाधनविषयं कर्मादिवचनमिति भावः । विपरीतं किं न स्यादित्यत आह - **नचेति** ॥ चशब्दोऽप्यर्थः । तथा च **'एतानि'** श्रवणादीनि **'विना कश्चित्'** अपि अधिकारी **'कुतश्चन'** कर्मादेः सतः **'ज्ञानं नाऽप'** एवमेतानि श्रवणादीनि सन्ति चेत् कुतश्च कर्मादेर्विना ज्ञानं नाऽपेति नेति योजना । तथा च निरपेक्षान्वयव्यतिरेकाभ्यां श्रवणाद्येव ज्ञाने प्रधानं साक्षात् साधनं, कर्मादि तु तदभावात् पारम्पर्येण साधनमिति न वैपरीत्यमिति भावः ॥

'नारदीये' 'यत उक्तं' इति शेषः । अस्य 'अतो **"यतो नारायण"** इत्यादिनोक्तं युक्तं' इत्युपस्कृतवाक्येनान्वयः । **'यतो नारायण'** इत्यनेन जिज्ञासायाः निर्विषयत्वशङ्कानिरासाय प्रयुक्तः सौत्रो ब्रह्मशब्दो नारायणपर इति व्याख्यातः ॥

(ब्रह्मशब्दार्थो विष्णुरेव)

ब्रह्मशब्दश्च विष्णावेव ।

ननु नारायणप्रसादमृते न मोक्षश्चेत् तर्हि तज्जिज्ञासैव कर्तव्या न ब्रह्मजिज्ञासा । न च वाच्यं नारायण एव ब्रह्मपदेन विवक्षितः सूत्रकृतेति, ब्रह्मशब्दस्य बह्वर्थत्वेन सूत्रकारविवक्षाविशेषस्य दुर्ज्ञेयत्वादित्यत आह - **'ब्रह्म'** इति ॥ मुख्य इति शेषः । चः **'अनेकार्थोऽपि ब्रह्मशब्दः'** इति अप्यर्थे, यत इत्यर्थे च । तथा च ब्रह्मशब्दस्यानेकार्थत्वेऽपि यतः सः विष्णावेव मुख्योऽतो

मुख्यामुख्ययोर्मुख्यस्यैव ग्राह्यत्वात् स एव सूत्रकारविवक्षितो ज्ञायत इति योजना । अत्र शब्दान्तरं विहाय विष्णुशब्दप्रयोगेण तच्छब्दगतानां वर्गपञ्चम-षष्ठचतुर्थानां णषवानां सङ्ख्चारेखालेखनेन सूत्राणां चतुष्षष्ट्युत्तर-पञ्चशतसङ्ख्योक्ता भवति । यद्वा –

'देशतः कालतश्चैव गुणतश्चापि पूर्तितः ।
विष्णौ ब्रह्मेति नामैतन्मुख्यतोऽन्यत्र न क्वचित् ॥'

इत्यैतरेयभाष्योक्तेः देशकालगुणापरिच्छेदरूपत्रिविधपूर्तिवाचकब्रह्म-शब्दव्याख्यानाय तादृशविष्णुशब्दप्रयोगः ॥

टीकायां तु - अत्र विष्णुग्रहणेन **'स विष्णुराह हि । तं ब्रह्मेत्याचक्षते'** इत्यन्योन्याव्यवहितसूत्रद्वयकरणानन्तरमेव ब्रह्ममीमांसायाः व्यासेनाऽ-रब्धत्वादेतदव्यवहितदेवमीमांसान्त्यसूत्रद्वये ब्रह्मत्वेन नारायणस्यैव प्रकृतत्वं सूचयतीति प्रयोजनान्तरमुक्तम् । **तत्त्वप्रदीपेऽ**प्येतदेव 'यश्च देवतामीमांसान्ते **"विष्णुरेव हि तच्छुतेस्तं ब्रह्मेत्याचक्षते'** इति सर्वदेवोत्तमत्वेन प्रतिज्ञातो ब्रह्मत्वेन चोक्तः, स एव ब्रह्मशब्देनोत्तरमीमांसायां विचार्यत्वेनोच्यते' इति पाठभेदेनोक्तम् ॥

'यमन्तः समुद्रे कवयोऽवयन्ति तदक्षरे परमे प्रजाः ।
यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्याम्॥'
(महाना. १.३) **इत्याद्युक्त्वा 'तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्'** *(महाना. १.६)* **इति हि श्रुतिः ॥**

ब्रह्मशब्दस्यान्यत्रापि रूढत्वाद् रूढेरेव मुख्यवृत्तित्वात् कुतोऽसौ विष्णावेव मुख्य इत्यत आह - **यमिति ॥ 'ब्रह्मशब्दश्च'** इत्यादि अत्रापि सम्बध्यते । चो यद्यपीत्याद्यर्थे । हिशब्दो यत इत्यर्थे । श्रुतिराहेति शेषः । तथा

च यद्यपि ब्रह्मशब्दोऽन्यत्र रूढः, तथाऽपि **'श्रुतिः' 'यमन्तः'** इत्यादिका यतः कवीनां मते **'तदेव परमं ब्रह्म'** इत्याहुरिति प्रयोगबाहुल्यरूपां रूढिमाह, अतो ब्रह्मशब्दो विष्णावेव परममुख्य इत्यर्थः । अन्यत्राज्ञरूढेः विद्वद्रूढेरति-मुख्यत्वादिति भावः ॥

'यमन्तः समुद्रे' इति वाक्यम् -

'यदोषधीभिः पुरुषान् पशूंश्च विवेश भूतानि चराचराणि ।
अतः परं नान्यदणीयसं हि परात् परं यन्महतो महान्तम् ॥
यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् ॥'

इति वाक्येन सह व्याख्यातं **विष्णुतत्त्वनिर्णयटीकायाम्** । तथा हि - **'यमन्तस्समुद्रे'** विभक्त्यर्थेऽव्ययीभावः समुद्रस्यान्तस्स्थितं **'कवयः'** ज्ञानिनः **'अवयन्ति'** ईषदेव जानन्ति, यस्मिन् **'तदक्षरे'** अविज्ञेयत्व-रूपपूर्वविशेषणविशिष्टे प्रसिद्धे वाऽविनाशिनि **'परमे'** प्रजा अधीनाः सन्ति । **'जगतः प्रसूती'** प्रसूतिर्जनयित्री मूलप्रकृतिर्लक्ष्मीः **'यतः'** यस्मात् प्रसूता उत्पन्ना, सृष्टौ अभिमुखीबभूवेति वा, यच्च यद् वस्तु **'तोयेन'** तत्तज्जीवकर्मणा स्ववीर्येण वा, तोयशब्दोक्ताम्बूपलक्षितैर्भूतैर्वा **'भूम्यां'** पृथिव्यादिषु लोकेषु **'जीवान् व्यससर्ज'** विविधं ससर्ज । यच्च **'ओषधीभिः'** सहितान् **'पुरुषान् पशूंश्च चराचराणि भूतानि'** प्रेरणाय **'विवेश'** । **'चराचराणि भूतानि'** इत्यनेनैव सिद्धे यज्ञाङ्गत्वादिना विशिष्टानां व्रीह्योषधीनां ग्रहणाय पुनर्वचनम् । **'अतः'** यस्मात् **'परं'** अतिशयेन **'अन्यत्'** वस्तु **'अणीयसं'** अणीयो नास्ति, यच्च **'परात्परं'** उत्कृष्टादुत्कृष्टं **'महतः'** महत्परिमाणादपि **'महान्तं'** महत्, **'यदेकं'** केवलं **'अव्यक्तं'** स्वप्रसादं विनाऽतीन्द्रियं **'विश्वं पूर्णं तमसः'** प्रकृतेरज्ञानाद्वा **'परस्तात्'** अतिक्रम्य स्थितं **'तदेवर्तं'** यथार्थज्ञानरूपं **'तदु'** तदेव **'सत्यं'** ज्ञानपूर्वक्रियावत् **'तदेव कवीनां'** मते **'परमं'** मुख्यं **'ब्रह्म'** इत्याहुरिति ॥

अत्र **'तदक्षरे'** इति श्रुतिपाठः । **'यदक्षरे'** इति क्वचित्पाठे यस्मिन्नित्यध्याहारो न कार्यः । **'व्यससर्ज'** इति प्रायिकः श्रुतिपाठः । **'व्यचसर्ज'** इत्यपि क्वचित् पठन्ति । अत्र सकारस्य चकारादेशः छान्दसः । आद्यपक्षेऽपि वि आ ससर्जेत्यवयवविभागः । तत्राऽङो ह्रस्वत्वं छान्दसं बहुलग्रहणात् । **'इन्द्रा वरुण वामहम्'** इति श्रुतौ णकारात् परस्याकारस्य यथा ह्रस्वत्वं तद्वदिति नारायणपण्डिताचार्योक्तिः । **'व्यससर्ज विससर्ज बहुलग्रहणात्'** इति प्रमेयदीपोक्तिरपि ह्रस्वाभिप्रायिकैव ॥

केचित्तु लिट्यडागमः छान्दसो बहुलग्रहणादिति प्रमेयदीपार्थमाहुः । तदाचार्योक्तात् पक्षान्तरम् । पद्मनाभतीर्थकृततत्त्वनिर्णयटीकायां न्यायरत्नावल्यां तु **'वयन्ति'** इति विच्छिद्य **'तदक्षरे'** इत्येव च पठित्वा, 'यं पुरुषं समुद्रेऽन्तः कवयो वयन्ति वाञ्छन्ति तदक्षरे यस्मिन् तस्मिन् अक्षरे नाशवर्जिते परमे प्रजास्तदाधाराः तिष्ठन्ति, जगतः प्रसूती जगज्जनयित्री प्रकृतिः यतः प्रसूता प्रादुर्भूता सती तोयेन इतरमिश्रितेन जीवान् देहवत्त्वेन व्यससर्ज विसृष्टवती' इत्येकान्वयेन 'तदेव तात्पर्यविषयीभूतत्वादृतं तदेवाबाधितरूपत्वात् सत्यं तदेव कवीनामभिमतं परं ब्रह्म' इत्यर्थ उक्तः ॥

नारायणपण्डिताचार्यकृतौ तत्त्वमञ्जर्यामपि **'तदक्षरे'** इति पठित्वा 'यमवयन्ति अवगच्छन्ति यस्मिन् तस्मिन् अक्षरे प्रजाः सन्ति यतः प्रसूता पराधीनविशेषं प्राप्ता श्रीः तोयेन कर्मणा जीवान् भूम्यां प्रकृत्यां व्यससर्ज' इत्यन्वयेन 'तदेवर्तं शश्वदेकप्रकारं सत्यं साधु गुणपूर्णं' इत्यर्थ उक्तः ॥

'तन्नो विष्णुः' *(महाना.३-१६)*
इति वचनाद् विष्णुरेव हि तत्रोच्यते ॥

ननु **'तदेव'** इति वाक्ये तच्छब्देन कुतो विष्णुनिश्चयः

समुद्रस्थत्वलिङ्गादिति चेत् - न, तस्य रुद्रादावपि कथञ्चित् सम्भवादित्यतो निरवकाशविष्णुश्रुतेरेवेत्याह - **'तन्नः'** इति । **'इति वचनाद् विष्णुरेव' 'तत्र' 'तदेव'** इति श्रुतौ तच्छब्देन **'उच्यते'** इति निश्चीयत इत्यर्थः । हिशब्दः प्रसिद्धौ । अत्र **'तन्नः'** इत्येकदेशग्रहणेन **'नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात्'** इति समग्रवाक्यं गृह्यते । द्वितीयार्थे चतुर्थ्यौ । तथा च यस्माद् वयं नारायणं **'विद्महे'** जानीमहे यतश्च तं वासुदेवं **'धीमहि'** ध्यायेमहि **'तत्'** तस्मात् **'नः'** अस्मान् **'तत्'** शुभं प्रति **'विष्णुः प्रचोदयात्'** प्रेरयत्विति श्रुत्यर्थः ॥

न चेतरशब्दात् तत्प्राप्तिः ।

यद्युत्तरवाक्ये विष्णुशब्दश्रवणाद् विष्णुरेवात्रोक्तं ब्रह्म, तर्हि **'तन्नो रुद्रः'** इत्यादीतरशब्दश्रवणाद् रुद्रादेरपि मुख्यब्रह्मता प्राप्तेत्यत आह – **नचेति** ॥ चशब्दः समुच्चये । तथा च **'इतरशब्दात्'** रुद्रादिवाचकशब्दबलात् तस्य रुद्रादेरपि तस्य मुख्यब्रह्मत्वस्य **'प्राप्तिर्न'** इत्यर्थः ॥

'नामानि विश्वाऽभि न सन्ति लोके यदाविरासीदनृतस्य सर्वम् ।
नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति ॥'
इति भाल्लवेयश्रुतिः[१] ।

कुत इत्यतस्तत्प्रापकशब्दानां विष्णावेव मुख्यत्वादिति हेतूपस्कारमभिप्रेत्य तस्यासिद्धिपरिहाराय विष्णोर्मुख्यतः सर्वनामवाच्यत्वे श्रुतिमाह - **'नामानि'** इति ॥ **'श्रुतेः'** इति क्वचित् पञ्चम्यन्तपाठः । प्रथमान्तपाठे यतोऽत इति शेषः । अस्य **'न च'** इत्यनेनान्वयः । **'यत्'** यस्मात्

१. .'इति भाल्लवेयश्रुतेः' ह.

'अनृतस्य' ऋतभिन्नस्य विष्णिवतरस्य लोकस्य जगतः **'सर्वं'** नामप्रवृत्तिनिमित्तं **'आविरासीत्'** अभूत् तस्मादुत्पत्तिमत्प्रवृत्तिनिमित्तवत्त्वात् **'विश्वा'** विश्वानि सर्वाणि **'नामानि' 'लोके'** रुद्रादिजगति **'अभि'** मुख्यतः वाचकतया **'न सन्ति'** इत्यर्थः । तर्हि कस्मिन् तानि मुख्यानीत्यत आह **'नामानि'** इति ॥ वैशब्दोऽवधारणे । परममिति हेतुगर्भविशेषणम् । तथा च **'सर्वाणि नामानि' 'यं' 'आ'** मुख्यतो वाचकत्वेन **'विशन्ति' 'तं परमं'** देशकालाभ्याम-परिच्छिन्नप्रवृत्तिनिमित्तं **'विष्णुं वै'** वदन्ति विद्वांस इत्यर्थः । तत्त्वप्रदीपे तु - **'विश्वा'** विश्वानि **'नामानि लोके'** अभितो **'न सन्ति'** मुख्यतो न सन्ति मुख्यतो न लोकवाचकानि **'यत्'** यस्मात्, यतः पुरुषात् **'अनृतस्य'** विष्णवन्यस्य जगतो जन्मलयादिकं सर्वं **'आविरासीत्'**, यं च वाचकत्वेन **'नामानि आ'** समन्तात् **'विशन्ति', 'तं'** ह **'विष्णुं'** उत्तमं वदन्तीत्यर्थ उक्तः । एतत्पक्षे यच्छब्दस्याऽवृत्तिः । द्वितीयादिपादत्रयस्य हेतुसमर्पकत्वम् । पक्षद्वयेऽपि विष्णुशब्दो भिन्नक्रमः ॥

'यो देवानां नामधा एक एव तं सम्प्रश्नं भुवना यन्त्यन्या'
(ऋ.सं.१०-८२-३) [१]**इत्येवशब्दान्नान्येषां** [२] **सर्वनामता ।**

ननु यथा विष्णोः श्रुत्यन्तरसिद्धसर्वनामत्वेनात्रोक्तं ब्रह्मत्वं सिद्धचति तथा रुद्रादीनामपि विष्ण्वादिशब्दवाच्यत्वेनात्रोक्तं ब्रह्मत्वं किं न स्यादित्यत आह - **य इति ॥ 'इत्येवशब्दात्'** इति इतिवाक्यस्थैवशब्दात् **'अन्येषां'** रुद्रादीनां **'सर्वनामता'** विष्ण्वादिसर्वशब्दवाच्यत्वं नेत्यर्थः । सर्वनामतेत्यनन्तरं यत एवमतः **'तन्नो विष्णुः'** (महाना.३-१६) इत्यादौ नान्येषां प्राप्तिः, अत एव न ब्रह्मत्वं तेषामिति वाक्यशेषः ॥

---

१. 'इति चैवशब्दात्' ह.। २. 'न चान्येषां' ह.।

'यः' भगवान् '**एक एव देवानां**' ब्रह्मादीनां '**नामधाः**' विश्वपाशब्दवदयं शब्दः । नामधारकः न त्वन्येऽपि '**तं प्रश्नं**' प्रष्टारं '**अन्या**' अन्यानि 'भुवना' भुवनानि लोकाः 'संयन्ति' संयान्ति मोक्षे प्रलये चेति श्रुत्यर्थः ॥

'अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः'। *(ऋ.सं.१०-८२-६)* इति हि विष्णोर्लिङ्गम् [१]**।**

नन्वत्रापि यच्छब्देन विष्णुरिति कुतः ? विश्वकर्मेति श्रुतिबलादस्य सूक्ताख्यप्रकरणस्य विश्वकर्माद्यन्यपरतया तद्गतयच्छब्दस्यापि तत्परत्वौचित्यादित्यत आह – '**अजस्य**' इति ॥ '**हि**' यस्मात् इति वाक्ये '**विष्णोः लिङ्गं**' पद्मनाभत्वाख्यमसाधारणो धर्मः श्रुतः तस्माद् यच्छब्दोदितो विष्णुरेवेत्यन्वयः । उत्सर्गतो लिङ्गाच्छ्रुतेः प्राबल्येऽपि सावकाशाया विश्वकर्मश्रुतेः निरवकाशलिङ्गेन बाधोपपत्तेरिति भावः ॥ श्रुत्यर्थस्तु - '**अजस्य**' अजन्यस्य पुरुषस्य '**नाभौ एकं**' वस्तु '**अर्पितं**' उद्भूतम् । '**यस्मिन् विश्वानि भुवनानि**' सर्वे चतुर्दशलोकाः '**अधितस्थुः**' अधिष्ठिता इति ॥

न च प्रसिद्धार्थं विनाऽन्योऽर्थो युज्यते[२] **।**

नाभ्यर्पितं पद्मादन्यत् किं न स्यादित्यत आह - '**न च**' इति ॥ चः समुच्चये । प्रसिद्धं विष्णुनाभिस्थत्वेन प्रसिद्धं पद्माख्यार्थं '**विनाऽन्योऽर्थो**' न युज्यते, प्रसिद्धिबाधादित्यर्थः । विश्वकर्मश्रुतिवत् पद्मनाभत्वलिङ्ग-मप्यन्यस्य किं न स्यादित्यतो वाऽऽह - '**न च**' इति । पद्मनाभत्वेन प्रसिद्धपदार्थं भगवन्तं विना '**अन्यः**' पद्मनाभो न युज्यते प्रसिद्धिबाधादित्यर्थः ॥

---

१. 'इति तस्य हि लिङ्गम्' -ह.

२ 'अन्यो युज्यते' ह.

'अजस्य नाभाविति यस्य नाभेरभूच्छुतेः पुष्करं लोकसारम् ।
तस्मै नमो व्यस्तसमस्तविश्वविभूतये विष्णवे लोककर्त्रे ॥'
इति च स्कान्दे ।

न केवलं प्रसिद्धिबलादेवैतच्छ्रुत्युक्तं पद्मं पद्मनाभश्च हरिरित्यवसीयते, किन्तु **'अजस्य'** इति श्रुतेस्तदुभयबोधकत्वेन स्मृत्यनुगृहीतत्वाच्चेत्याह - **'अजस्य'** इति ॥ इति श्रुतेरित्यन्वयः । तथा च **'अजस्य नाभाविति श्रुतेः'** सकाशात् **'लोकसारं'** लोकाधारभूतं **'पुष्करं'** पद्मं **'अभूत्'** इति ज्ञायते । **'तस्मै व्यस्तसमस्तविश्वविभूतये'** विश्वस्य जगतो विभूतयः सृष्ट्याद्यष्टकं जीवादौ व्यस्ताः विस्तृताः जडादौ समस्ताः सङ्क्षिप्ताः विश्वविभूतयो येनासौ व्यस्तसमस्तविश्वविभूतिस्तस्मै **'लोककर्त्रे'** लोकस्वामिने **'विष्णवे नमः'** इत्यर्थः । **तत्त्वप्रदीपे** तु - समस्तविश्वविभूतयो येन व्यस्ता स व्यस्तसमस्तविश्वविभूतिः । अथ वा व्यस्ताः समस्ता विश्वविभूतयो येनेति द्वेधा व्याख्यातम् । तत्र द्वितीयं टीकायां विवृतम् । पूर्वार्धे विष्णुवाचक-शब्दाभावादुत्तरार्धोदाहरणम् । **'इति च स्कान्दे'** इति चशब्दो भिन्नक्रमेण **'उक्तम्'** इत्यध्याहृतपदेन सम्बध्यते । यत एवमतः 'अजस्य' इत्युक्तं पद्ममेव, पद्मनाभश्च हरिरेवेति वाक्यशेषः । न केवलं प्रसिद्धिबाधादिति चार्थः ॥

'परो दिवा पर एना पृथिव्या' *(ऋ.सं. १०-८२-५)* **इति समाख्याश्रुतौ ।**

यदा निरवकाशलिङ्गमात्रं श्रुतिबाधकं तदा किमु वाच्यं समाख्यायुक्तं तदिति भावेनाऽह – **पर इति** ॥ इदं चाऽवर्तते, **'विष्णुरेव'** इत्यादिकमत्रापि सम्बध्यते । तथा च यतः विश्वकर्मसूक्ते **'परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति'** इति या आख्या उक्तिः तस्याः समा समाना **'परो दिवा'** इत्येवंरूपश्रुतौ आम्भ्रिणीसूक्तेऽस्ति अतोऽपि **'विष्णुरेव'** विश्वकर्मसूक्तोदित इत्यर्थः ॥

'यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्' *(ऋ.सं. १०-१२५-५.)* **इत्युक्त्वा - 'मम योनिरप्स्वन्तः समुद्रे'** *(ऋ.सं.१०-१२५-७)* **इत्याह ।**

ननु समाख्याश्रुतावपि विष्णुः कुतो वाच्य इत्यत आह - **यमिति** ॥ इतीत्यनन्तरं वाक्येनेत्युभयत्र शेषः । **'परो दिवा'** इत्येतत् समस्तमनेनापि योज्यम् । अत्र समाख्याश्रुताविति्येकं पदम् । तथा च यस्मात् **'परो दिवा'** इति समाख्याश्रुतौ मेत्याख्या माख्या तया सहिता समाख्या **'प्रकृतिर्वाव समासमा'** (माध्यन्दिनश्रुतिः) इति श्रुतौ समासमत्वोक्तेः **'नामैकदेशे'** इति न्यायेन समाभिधा वा, अहमिति प्रकृता लक्ष्मीः **'यं'** इत्यादिवाक्येन ब्रह्मादीनां स्वाधीनत्वमुक्त्वा **'मम योनिरप्स्वन्तः समुद्रे'** इति वाक्येन **'परो दिवा'** इत्युक्तं विष्णुं स्वकारणत्वेन समुद्रस्थत्वेन चाऽह, तस्माद् विष्णुरेव समाख्याश्रुतिप्रतिपाद्य इत्यर्थः । उक्त्वेत्यनेन लक्ष्मीकारणं ब्रह्माद्यन्यतमं किं न स्यादिति शङ्का वारिता । श्रुतौ **'दिवा'** इत्यादितृतीया पञ्चम्यर्थे । तथा च - **'दिवः'** **'श्रियः'** **'परः'** **'एना'** एतस्याः भूम्याश्च **'परः'** उत्तमः । **'देवेभिः'** **'देवेभ्यः'** **'असुरैः'** असुरेभ्यश्च **'परः'** उत्तमः । किं बहुना ? **'यदस्ति'** तस्मात् सर्वस्मादपि परः । स विष्णुः द्यावापृथिवीभ्यां परः । अहं तु **'महिना'** महिम्ना **'एतावती'** परिमिता बभूव । अहमेतावती यथोक्तप्रकारा महिम्ना नातोऽधिकेति वा श्रुत्यर्थः । अहमिति लब्धपदेन लक्ष्मीरुच्यते, एतत्सूक्तप्रवर्तिकायाः अम्भ्रिण्याः लक्ष्मीरूपत्वात् । तथा च - अहं **'यं यं'** रुद्रपदयोग्यं जीवं **'उग्रं'** रुद्रं कर्तुं **'कामये'** इच्छेयं **'तं तं'** उग्रं कृणोमि करोमि । एवं तत्तत्पदयोग्यं यं यं **'ब्रह्माणं'** **'ऋषिं'** **'सुमेधां'** सुमेधसं वा कर्तुं कामये तं तं तथा करोमीत्यर्थः । शिष्टवाक्यार्थः **'पत्युरसामञ्जस्यात्'** (ब्र.सू. २-२-३७) इत्यधिकरणे वक्ष्यते । तथाऽपि मम न स्वातन्त्र्यमित्याह - **'मम'** इति ॥ **'मम'** **'योनिः'** कारणं

'समुद्रे अप्सु' अपाम् **'अन्तः'** तिष्ठति । तस्याऽधिक्यं कम्पस्वरार्थः । पतिनाम न ग्राह्यमिति भावेन नारायण इत्यनुक्त्वा तदर्थबोधनायैवमुक्तिः ।।

उग्रो रुद्रः, समुद्रेऽन्तर्नारायणः । प्रसिद्धत्वात् सूचितत्वाच्चा-स्यार्थस्य [१] ।

नन्वत्र समुद्रस्थो रुद्रः किं न स्यात् **'तप्यमानाय सलिले'** इति भारतोक्तेः । न च रमाधीनतोक्तिविरोधः, उग्रशब्देन कस्यचित् क्रूरस्य ग्रहणसम्भवादित्यत आह – **'उग्र'** इति ॥ भवेदित्युभयत्र शेषः । तथा च अत्रोग्र इत्युक्तो रुद्र एव भवेत्, तथा समुद्रेऽन्तस्स्थितो नारायण एव भवेत्, इति प्रतिज्ञावाक्यद्वयार्थः । तत्र हेतुमाह – **'प्रसिद्धत्वात्'** इति ॥ **'अस्यार्थस्य'** रुद्रे उग्रशब्दवाच्यत्वरूपार्थस्य प्रसिद्धत्वात्, **'उग्रः कपर्दी'** इत्यादि-कोशप्रसिद्धत्वात्, उग्रशब्देन रुद्रशब्दार्थस्य क्रौर्यस्य ज्ञापितत्वाच्चेत्यर्थः । रुद्रो रौद्र उग्र इत्येतेषामेकार्थत्वादिति भावः । एवं समुद्रशायित्वरूपार्थस्य **'महोदधिशयोऽन्तकः'** इत्यादि**विष्णुसहस्रनाम**प्रसिद्धत्वात् समुद्रेऽन्तःस्थत्व-कथनेन **'आपो नाराः'** इति स्मृतिसिद्धनारशब्दोदितोदकाश्रयत्व-रूपनारायणशब्दार्थस्य **'सूचितत्वाच्च'** इत्यर्थः ॥

न चाविरोधे प्रसिद्धः परित्यज्यते । उक्तन्यायेन च श्रुतय एतमेव वदन्ति ।

ननु प्रसिद्ध्यादिसद्भावेऽपि तत्परित्यागेनान्यस्वीकारे किं बाधकमित्यत आह - **'न च'** इति ॥ अर्थस्येत्येतद् विपरिणामेनात्र सम्बध्यते । तथा च यतोऽयमर्थः **'प्रसिद्धः'** अतो 'अविरोधे' प्रमाणविरोधाभावे **'न परित्यज्यते'** न त्यज्यत इत्यर्थः, प्रसिद्धार्थस्य विरोधैकापोद्यत्वात्, अन्यथा प्रसिद्धिबाधादिति

---

१. **'सूचितत्वाच्चार्थस्य'** ह. ।

भावः । **'आकाशादेव समुत्पद्यन्ते'** (छां. उ. १-९-१.) **'जनितोत विष्णोः'** (ऋ.सं. ९-९७-५.) **'नकिरिन्द्रत्वदुत्तरः'** (ऋ.सं. ४-३०-१.) इत्यादौ व्यभिचारवारणायाविरोध इति । ननु विरोधाभावोऽसिद्धः, यतोऽत्र यदि रुद्रो लक्ष्म्यधीनतयोग्रपदेनोच्यते तर्हि **'विश्वाधिको रुद्रः'** इत्यादिश्रुतिविरोधः स्यात् । अतोऽत्र तत्परित्यागो युक्त इत्यत आह - **'उक्त'** इति । करणव्युत्पत्त्या न्यायः प्रमाणम् ॥

तथा च - यतो **'नामानि विश्वा'** (भाल्लवेयश्रुतिः) इत्याद्युक्तागमेन, तदुक्तोत्पत्तिमत्प्रवृत्तिनिमित्तवत्त्वाद्यनुमानेन, चशब्दसमुच्चितैः **'वेदे रामायणे चैव'** इति वक्ष्यमाणप्रमाणैश्च साधकैः **'श्रुतयो' 'विश्वाधिको रुद्रः'** (महाना. १०-३.) इत्याद्यागमाः रुद्रादिपदानां विष्णुवाचित्वमाश्रित्य वा, विश्वो वायुः अधिको यस्माद् विश्वाधिक इत्यर्थाश्रयणेन वा **'एतमेव'** विष्णुमेव **'वदन्ति'** तात्पर्यतः प्राधान्येन बोधयन्ति इत्यवगम्यते । अतो न **'विश्वाधिकः'** इत्यादिश्रुतिविरोध इति योजना ॥

'वेदे रामायणे चैव पुराणे भारते तथा ।
आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते ॥'

इति हरिवंशेषु ।

किं बहुना ? **'सर्वत्र'** सर्वग्रन्थेषु **'गीयते'** प्रतिपाद्यते । तेष्वपि न भागे, किन्त्वादौ, मध्ये, अन्ते च, कर्मादिकाण्डत्रयेऽपि, उपक्रमोपसंहारयोरवान्तरप्रकरणेषु च, सर्वत्र प्रतिवाक्यं प्रतिपदं प्रत्यक्षरं च मुख्यतः प्रतिपाद्यत इत्यर्थः । **'वेदे'** इति वचनस्य खिलाखिलपारिजाताख्यहरिवंशभागत्रयगतत्वसूचनाय **'हरिवंशेषु'** इति बहुवचनम् । हरिवंशेष्वित्यनन्तरं 'यदुक्तं' इति शेषः, तस्यातो न विरोध इति, हरिवंशेषूक्तन्यायेन उक्तरीत्या इति वाऽन्वयः ॥

न चेतरग्रन्थविरोधः[१],

ननु प्रमाणविरोधाभावोऽसिद्धः, यतः श्रुतिविरोधाभावेऽप्यस्ति पाशुपतादिशास्त्रविरोधः, तत्र रुद्रादीनां सर्वोत्तमत्वस्य सर्वकारणत्वस्य चोक्तेरित्यत आह – **'न च'** इति । चोऽप्यर्थः । न केवलं श्रुतिविरोधाभावः, अपि तर्हीतरविरोधोऽपि नेति । **'अस्यार्थस्य'** इति वर्तते ।

'एष मोहं सृजाम्याशु यो जनान् मोहयिष्यति ।
त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय ।
अतथ्यानि वितथ्यानि दर्शयस्व महाभुज ।
प्रकाशं कुरु चाऽत्मानमप्रकाशं च मां कुरु ॥'
इति वाराहवचनात् ।

कुत इत्यत तेषां मोहार्थं कृतत्वादिति हेत्वध्याहारमभिप्रेत्य तस्यासिद्धिं प्रमाणोदाहरणेन निराह - **'एष'** इति ॥ रुद्रं प्रति विष्णुवाक्यमेतत् । मुह्यतेऽनेन जन इति **'मोहो'** नटनं वञ्चनं वा । **'मोहो'** मोहकारणमनादिकर्मवासनारूपमिति तत्त्वप्रदीपोक्तेरप्ययमेवार्थः, मोहकशास्त्रमिति व्यासतीर्थीयोक्तेः । न चास्य **'न मोहशास्त्रस्य वक्ता विष्णुराशङ्क्यः, 'अजस्यावक्रचेतसः (क.उ. ५-१.) इति हि श्रुतिः'** इति तत्त्वप्रदीपविरोधः शङ्क्यः । असतामित्यभिप्रायात् । विद्यमानाकाराच्छादनेनाविद्यमानाकारप्रदर्शनं नटनम् । अविद्यमानकथनं वञ्चनम् । सृजामीत्युत्तमपुरुषप्रयोगादहमिति कर्ता लभ्यते । चशब्दः क्रियाकर्तृ-समुच्चये । **'पूर्वश्रुतस्यैतच्छब्दस्य पश्राच्छ्रुतो यच्छब्दो विशेषणम्'** इति न्यायदीपोक्तेः, य एष इति योजना । तथा चाहं **'मोहं सृजामि'** करोमि । **'य एषः'** मोहः

१. **'इतरग्रन्थैर्विरोधः' ह ।**

'जनान् मोहयिष्यति' अज्ञानमिथ्याज्ञानादिकं प्रापयिष्यति । परबाधकत्वाद् बाहुः प्राण्यङ्गं, महान् बाहुर्यस्य सः, तस्य सम्बुद्धिः हे **'महाबाहो'** शत्रुबाधकाङ्गयुक्त **'रुद्र' 'त्वं च'** मोहं सृज **'मोहशास्त्राणि'** च **'कारय'** कुरु, दधीच्यादिभिश्च कारय ।

हे 'महाभुज' महाभक्षक महाकुटिलेति वा हे रुद्र ! तेष्विति शेषः । तथा च - **'तेषु'** मोहशास्त्रेषु **'अतथ्यानि'** काप्यविद्यमानानि लिङ्गमूलान्वेषणादीनि **'वितथ्यानि'** व्यधिकरणत्वेन विद्यमानानि विष्णुनिष्ठानि वायुनिष्ठानि वा रुद्रादिनिष्ठतयोच्यमानानि सर्वोत्तमत्वसर्वस्वातन्त्र्यविषभक्षणादीनि **'दर्शयस्व'** प्रतिपादयेति यावत् । 'माम् आत्मानम्' इत्युद्देश्यद्वितीयान्तम् । परस्परसमुच्चये चशब्दौ । तथा च लोकेषु **'आत्मानं'** स्वात्मानमुद्दिश्य **'प्रकाशं'** प्रसिद्धिं **'कुरु'** । न केवलमेतावत्, किन्तु **'माम्'** उद्दिश्य **'अप्रकाशम्'** अप्रसिद्धिं च कुर्वित्यर्थः ॥

केचित्तु - प्रकाशोऽस्यास्तीति प्रकाशमिति अर्शआद्यजन्तत्वमाश्रित्य उद्देश्यद्वितीयानाश्रयणेन प्रकाशं प्रसिद्धमिति व्याचक्षते ।**'वाराहवचनात्'** इत्यस्येतरेषां मोहार्थं कृतत्वावगमादिति हेतुमुखेन **'न चेतर'** इति प्रतिज्ञावाक्येनान्वयः ॥

लिङ्गमूलान्वेषणकथा तु – पूर्वं जगत्कर्तृत्वविषये विष्णुविरिञ्चयोर्विवादोऽभूद् अहमेव जगतः कर्ता न मत्तोऽन्य इति । एतस्मिन्नन्तरे तयोर्गर्वविनाशाय तन्मध्ये किञ्चन लिङ्गमुदभूत् । तौ तद् दृष्ट्वा सर्वदेवसन्निधौ परस्परं समयं चक्रतुः । तत्र ब्रह्मा विष्णुमाह – आवयोर्मध्येऽस्य लिङ्गस्य योऽन्तमादिं च गच्छति स भवेदधिको लोके, लोककर्ता च स प्रभुः । तस्माद्धे विष्णो त्वं लिङ्गस्य मूलगवेषणायाधस्ताद् व्रज, अहमन्तगवेषणायोर्ध्वं गमिष्यामीति । एवं तौ समयं कृत्वा मार्गमाणौ निर्गतौ । तत्र

विष्णुर्वराहरूपेणाधस्ताद् गवेषितुं ययौ । वाणीजानिस्तु हंसरूपेणोर्ध्वं ययौ । अथ पुनर्विष्णुः स्वस्थानं समागत्य सर्वदेवसन्निधौ अहं लिङ्गस्याऽदिमद्राक्षमिति सत्यम् आह । ब्रह्माऽपि समागत्य अहमन्तमद्राक्षमिति छद्मना मृषा आह । अथ लिङ्गरूपी महेश्वरः तयोर्वचः श्रुत्वा हे विष्णो ! यतस्त्वं सत्यमेवावोचोऽतः तव लोके मत्समा पूजा भविष्यति । ब्रह्मणस्तु नेत्युवाच । ततो ब्रह्मा हे रुद्र ! ममानृतोक्तिकृतापराधस्त्वया क्षन्तव्य इत्याह । ततो रुद्रो न मम वचो मिथ्या भविष्यति । तथाऽपि त्वं मिथ्योक्तिकृतदोषपरिहारार्थं गन्धमादनगिरिं व्रज । तत्र क्रतून् कुरुष्व । ततस्तव श्रौतस्मार्तकर्मस्वेव पूजा भविष्यति । न तु देवालयादिष्वित्युक्त्वाऽन्तरधीयतेत्यादिरूपा स्कान्दपुराणस्था ॥

शैवे च स्कान्दे -

'श्वपचादपि कष्टत्वं ब्रह्मेशानादयः सुराः ।
तदैवाच्युत यान्त्येव यदैव त्वं पराङ्मुखः ॥' इति ॥

ननु तथाऽप्यस्यार्थस्य स्कान्दब्रह्मवैवर्तादिपुराणविरोधः स्यात्, तेषां शिवब्रह्मादिपारम्यविषयत्वादित्यत आह - **'शैवे च'** इति । चशब्दोऽप्यर्थः समुच्चये, यद्यपीत्याद्यर्थे च - **'शैवे'** शिवोत्कर्षपरेऽपीति **'स्कान्दे'** वचनादित्यनुषङ्गद्योतकश्च । एवमुत्तरत्रापि ।

हे **'अच्युत'** **'यदैव'** यदि च त्वमेव सर्वथा **'पराङ्मुखः'** भवसि अनुग्रहं च करोषि **'तदा'** तर्हि **'ब्रह्मेशानादयः सुराः'** श्वपचादपि श्वानं पचतीति श्वपचो नीचः तस्मादपि **'कष्टत्वं'** क्लेशयुक्तत्वं कष्टं वा 'यान्त्येव' इत्यर्थः । अस्य तर्कत्वात् तस्य विपर्ययपर्यवसाने ब्रह्मादीनां विष्ण्वधीनत्वम् अत्यन्ततदनुग्रहपात्रत्वं च सिद्ध्यतीति न प्रमाणविरोधः । इतिशब्दस्य **'इति स्कान्दे'** इत्यन्वयः ॥

ब्राह्मे च ब्रह्मवैवर्ते -

'नाहं न च शिवोऽन्ये च तच्छक्त्येकांशभागिनः ।
बालः क्रीडनकैर्यद्वत् क्रीडतेऽस्माभिरच्युतः ॥' इति ॥

'ब्राह्मे' ब्रह्मविषये । अत्र **'अहम्'** इति चतुर्मुख उच्यते । **'यद्वत्'** इति श्रवणात् **'तद्वत्'** इति लभ्यते । चशब्दौ समुच्चयार्थौ । **'अस्माभिः'** इत्यत्र शिवश्चान्ये च अहं च वयं तैरित्येकशेषः । तथा च यद्यपि वयं **'तच्छक्त्येकांशभागिनः'** तस्याच्युतस्य या शक्तिः सामर्थ्यं तस्यैकांशभागिनो न भवामः । तथाऽपि **'यद्वत्'** यथा **'बालः क्रीडनकैः'** क्रीडासाधनपदार्थैः **'क्रीडते'** **'तद्वत्'** तथा **'अच्युतो'** हरिरपि **'अस्माभिः'** करणैः **'क्रीडते'** सृष्ट्यादिक्रीडां करोतीत्यर्थः । पुनर्न चेत्युक्तिः तात्पर्यार्था, **'ना'** पुरुष इति वा । इतिशब्दस्य इति ब्रह्मवैवर्ते इत्यन्वयः । **'स्कान्दे'** **'ब्रह्मवैवर्ते'** इत्यनयोः **'वचनात्'** इति पदद्वारा **'न चेतरग्रन्थविरोधः'** इत्यनेनान्वयः । तथा च तेषां शैवादित्वेऽपि न विरोधित्वम्, तत्राऽपि विष्णूत्तमत्वादेरप्युक्त्या स्वविरोधेन शिवाद्युत्कर्षेऽप्रामाण्यात् । न च विपरीतं किं न स्यादिति वाच्यम्, शिवाद्युत्कर्षादेः शैवादिपुराणेष्वेवासाधारण्येन प्राप्तत्वात्, तत्रैव विष्णूत्कर्षोक्तौ तत्र प्रामाण्यस्य शिवाद्युत्कर्षादावप्रामाण्यस्य च निश्चयेन वैपरीत्यायोगात् । तस्मात् पाशुपतादिपरिकल्पितशिवाद्युत्तमत्वपरिपाटी दर्शनभाषया तेषूपन्यस्यत इति न तद्विरोध इति भावः ॥

न च वैष्णवेषु तथा । तच्च 'एष मोहं' इत्युक्तम् ॥

॥ इति जिज्ञासाधिकरणम् ॥१॥

तथाऽपि विष्णूत्तमत्वरुद्राधमत्वयोर्वैष्णवग्रन्थविरोधोऽस्तीत्यत आह – **'न च'** इति ॥ समुच्चये चशब्दः । तथा न - **'वैष्णवेषु'** विष्णुविषयपुराणादिष्वपि **'तथा'** विष्णोरन्यस्योत्तमत्वमुक्तं न, अत एव **'तथा'**

शैववत् सर्वोत्तमत्वाधमत्वविषये विरोधो नेत्यर्थः, येन स्वविरोधेन स्वविषयेऽप्रामाण्यं स्यादिति भावः । तर्हि वैष्णवेषु रामकृष्णादि-विष्णुकर्तृकशिवस्तुत्यादि कथमुच्यत इत्यत आह - **'तच्च'** इति । चस्त्वर्थः । वचनादित्यनुवर्तते । तदित्यस्याऽवृत्तिः । तथा च - चो यतो वैष्णवेषु यच्छिवस्तुत्याद्युच्यते तत्तु **'एष मोहम्'** इति वचनाज्ज्ञातेन तेन मोहार्थत्वेन **'उक्तं'** प्रत्युक्तं समाहितम् इत्युक्तमित्यर्थः । अस्य **'अतो न तद्विरोधः'** इत्यध्याहृतेनान्वयः ।

॥ इति जिज्ञासाधिकरणम् ॥

॥ २. अथ जन्माधिकरणम् ॥

(परब्रह्मणो लक्षणकथनम्)

ब्रह्मणो लक्षणमाह —

सू - ॐ ॥ जन्माद्यस्य यतः ॥ ॐ ॥ २ ॥

सृष्टिस्थितिसंहारनियमनज्ञानाज्ञानबन्धमोक्षा यतः ।

एतदधिकरणप्रतिपाद्यं दर्शयति - **ब्रह्मण इति** ॥ निर्बाधरूढिबलाद् जीव एवेदं ब्रह्म, तस्य चासन्दिग्धत्वान्न जिज्ञास्यत्वमिति प्राप्ते तन्निराकर्तुं ब्रह्मशब्देन जीवग्रहणे बाधकरूपं श्रुत्युक्तं जिज्ञास्यब्रह्मणो लक्षणमाह सूत्रकार इत्यर्थः । **'श्रुत्युक्तं लक्षणमाह'** इति टीकया **'सा विष्णोर्ब्रह्मत्वविधात्री तैत्तिरीयश्रुतिर्यानि तस्य लक्षणान्याह तान्यनेन सूत्रेण भगवानाह'** इति **तत्त्वप्रदीपोक्तेः** तच्छब्दाध्याहारेण भाष्यार्थ उक्तः । अत एव लक्षणमिति समुदायैकवचनमिति ज्ञातव्यम् । अनेन पूर्वत्र विवक्षितब्रह्मजिज्ञासाक्षेपेणेह पूर्वपक्षोत्थानात् पूर्वाधिकरणेनास्याऽक्षेपिकी सङ्गतिरुक्ता भवति । ब्रह्मविषयत्वाच्छास्त्रसङ्गतिः सिद्धैव । यद्यपि **'ब्रह्मशब्दश्च विष्णावेव'** इत्यनेन ब्रह्मशब्दो विष्णावेव मुख्य इत्युक्तम् । तथाऽपि भाष्यकारैरुक्तत्वेऽपि सूत्रकृताऽनुक्तत्वाद् ब्रह्म किं जीव उत विष्णुरिति भवत्येव सन्देहः । सूत्रं पठति - **'जन्म'** इति । यत इत्युक्तेस्तद्ब्रह्मेति प्रकृतं भवतीति शेषः । यद्वा - **'जन्माद्यस्य यत इति सूत्रे श्रुतमिति वाक्यशेषः'** इति सुधोक्तेः श्रुतमिति वाक्यशेषः । जन्म आदिर्यस्य सृष्ट्यादिसमुदायस्य तज्जन्मादीति तद्गुणसंविज्ञानबहुव्रीहिः, तस्य समासार्थैकदेशस्य जन्मनो गुणत्वेन विशेषणत्वेन संविज्ञानात् । तथा च **'अस्य'** प्रमितस्य जगतो **'जन्मादि यतः'** भवति श्रुतमिति वा तद्ब्रह्मेति सूत्रार्थ इत्यभिप्रेत्य अस्य जगतो जन्म,

आदिपदोक्ते स्थितिसंहृती यतस्तद्ब्रह्मेत्याद्यन्यथाप्रतीतिवारणाय सूत्रं यथावद् व्याचष्टे - **'सृष्टि'** इति ॥

अत्र प्रयोजकव्यापारवाचिसृष्टिसंहारनियमनशब्दैर्लक्षणया प्रपञ्चनिष्ठ-जन्मनाशनियम्यत्वरूपप्रयोज्यव्यापाराः प्रतिपाद्यन्ते । लक्षणाप्रयोजनं ब्रह्मण उपादानत्वाभावप्रदर्शनमिति चन्द्रिकोक्तिः । सृष्ट्यादीनामष्टानां च प्रत्येकं लक्षणत्वं, न तु समुदितवेषेण, अतिव्याप्त्याद्यभावात् । एतच्च लक्षणमनन्तगुणपूर्णत्वस्याप्युपलक्षकम् । एकेनोपलक्षणसम्भवेऽपि मुमुक्षुज्ञेयत्वात् सार्थकमष्टानां वचनम् । यथोक्तं **श्रीमन्महाभारत-तात्पर्यनिर्णये** -

'सृष्टिरक्षाहृतिज्ञाननियत्यज्ञानबन्धनान् ।
मोक्षं च विष्णुतश्चैव ज्ञात्वा मुक्तिर्न चान्यथा ॥' इति ।

यत इत्यनन्तरं **'श्रुताः' 'भवन्ति'** इति वा शेषः । अस्य तद्ब्रह्मेत्युपस्कृतेनान्वयः ॥

'उत्पत्तिस्थितिसंहारा नियतिर्ज्ञानमावृतिः ।
बन्धमोक्षौ च पुरुषाद् यस्मात् स हरिरेकराट् ॥'इति स्कान्दे ॥

ननु जगज्जन्मादिकर्तृत्वं यदि विष्ण्वेकनिष्ठं भवेत् तदा ब्रह्मशब्देन जीवग्रहणे बाधकरूपं स्यात्; तस्य विष्ण्वेकनिष्ठत्वमेव कुतो ज्ञायत इत्यत आह- **'उत्पत्ति'** इति । अस्य जगतो **'यस्मात्'** पुरुषात् **'उत्पत्तिस्थितिसंहाराः'** भवन्ति **'नियतिः'** नियमनम् **'आवृतिः ज्ञानं'** च यस्माद् भवति **'बन्धमोक्षौ च'** यस्माद् भवतः **'सः एकराट्'** स्वतन्त्रो **'हरिः'** एव इत्यर्थः । विरिञ्चादिष्वतिव्याप्तिपरिहारार्थम् **'एकराट्'** इति । **'इति स्कान्दे'** इत्यनन्तरं **'वचनात् सृष्ट्यादिकर्ता हरिरेव'** इति वाक्यशेषः ॥

'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति ।
यत् प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व तद्ब्रह्मेति'॥

(तै.उ.३.१)

जिज्ञास्यं ब्रह्म विष्णुरेव भवेद् जन्मादिकर्तृत्वाद् इत्यनुमाने हेत्वसिद्धिं जिज्ञास्यब्रह्मलक्षणस्य तत्रानुपलम्भकृतासम्भवं वा निराकर्तुं जगत्कारणत्वलक्षणं जिज्ञास्ये ब्रह्मणि **'तद्विजिज्ञासस्व'** इत्यतः पूर्ववाक्ये कथितमित्याह - **'यतः'** इति ॥ वैशब्दः प्रसिद्धौ । भूतशब्दः **'अस्तित्वाद् भूतनामभ्यः सर्वजीवेभ्य एव यत्'** इति गीतातात्पर्यनिर्णयवचनाज्जीववाची तदुपलक्षितसर्वजगत्परः । तथा च – **'इमानि भूतानि यतो जायन्ते येन जातानि'** उत्पन्नानि **'जीवन्ति'** प्राणं दधति **'यत्'** च प्रलये **'प्रयन्ति'** प्रविशन्ति यच्च **'अभि'** स्वेच्छया सम्यक् **'विशन्ति'** मुक्तौ **'तत्'** तदेव **'ब्रह्म'** नान्यत् । मुख्यतः तज्ज्ञानाय वेदार्थभूतं **'तद्विजिज्ञासस्व'** तद्विषयकविचारं कुर्वित्यर्थः । इतिशब्दः श्रुतिस्थ एव । तस्य **'इति वरुणो भृगुमुवाच'** इति क्रियापदेनान्वयः ॥

'य उ त्रिधातु पृथिवीमुत द्यां एको दाधार भुवनानि
विश्वा ।' *(ऋ.सं.१-१५४-५.)*

लक्षणस्यातिव्याप्तिशङ्कां उक्तानुमानस्य व्यभिचारशङ्कां वा परिहर्तुं स्पष्टार्थत्वात् प्रथमं स्मृतिमुपन्यस्येदानीं सृष्ट्यादिकर्तृत्वं प्रत्येकमपि विष्ण्वेकनिष्ठं किमु सर्वमिति भावेन स्थितिकर्तृत्वस्य विष्ण्वेकनिष्ठत्वे श्रुतिमाह – **'यः'** इति ॥ उशब्द एवार्थः, त्रिधात्वित्येकं पदं, उतशब्दः समुच्चये । तथा च –**'यो'** विष्णुः **'एकः'** एव **'त्रिधातु'** प्रकृतिपुरुषकालधारकः **'पृथिवीं'** भूमिं **'द्यां'** श्रियं च **'विश्वा'** विश्वानि सर्वाणि च **'भुवनानि'** **'दाधार'** दधारेत्यर्थः ॥

'चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीꣳरवी-विपत् ॥' *(ऋ.सं.१-१५५-६.)*

नियमनस्यापि विष्ण्वेककर्तृत्वे श्रुतिमाह - **'चतुर्भिः'** इति ॥ स इति शेषः, नशब्दं इवार्थः, चशब्दो मात्रार्थः । तथा च - स बृहच्छरीरो मूलरूपी विष्णुः **'नामभिश्च'** नाममात्रैः स्वरूपभेदशून्यैः **'चतुर्भिः'** वासुदेव-सङ्कर्षणप्रद्युम्नानिरुद्धैः **'साकं नवतिं'** नवतिसङ्ख्याकान् **'व्यतीन्'** देवेषु यौगिकोऽयं शब्दः । विशेषेणाधिकान् देवान् किमुतान्यान् **'वृत्तं चक्रं न'** वर्तुलं रथाङ्गमिव युगपत् **'अवीविपत्'**, विप परिवर्तन इति धातुः, पर्यवर्तयदित्यर्थः । अष्टौ वसवः, एकादश रुद्राः, विष्णुव्यति-रिक्तैकादशाऽदित्याः, हिरण्यगर्भेण सह दश प्रजेश्वराः, प्रधानेन पञ्चाशन्मरुत इति नवतिः ।

तत्त्वप्रदीपे तु - प्रथमं टीकोक्तार्थमभिधाय-

'आदित्या वसवो रुद्रा मरुतश्चाश्विनावपि ।
बृहस्पतिश्च कामश्च मनुर्दक्षो विनायकः ॥
भृगुश्चैवानिरुद्धश्च धर्मो निर्ऋतिरेव च ।
कुबेरसहिता देवाः नवतिः सम्प्रकीर्तिताः ।
अनन्तो गरुडो वायुः चत्वारो ब्रह्मणा सह ॥'

इति प्रमाणानुसारेण प्रकारान्तरेण चतुरुत्तरनवतिरुक्ता । तत्रैव नामवद्भिः कीर्तिमद्भिरिति च व्याख्यातम् ॥

'परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।',
'न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप ॥ '
(ऋ.सं.७-९९-१.)

एतेषां लक्षणानामतिव्याप्तिं विष्ण्वेकनिष्ठत्वोक्त्या स्मृत्या चार्थात्

परिहृतामपि साक्षादन्यत्र लक्षणाभावं प्रतिपादयन्त्या श्रुत्या निराह – **पर इति** ॥ विष्णावित्याकृष्यते । तत्त्वोद्योतटीकोक्तरीत्या मुक्ता अमुक्ताश्चेति शेषः । अत एव टीकायां क इत्युक्तम् । तथा च - **'तन्वा'** स्वमूर्त्यैव न तु कीर्तिमात्रेण **'वृधान'** अपरिच्छिन्न हे विष्णो त्वं यतो **'मात्रया'** मितेः **'परः'** विलक्षणोऽसि अपरिमितोऽसीति यावत् । अत एवम्भूतस्य **'ते महित्वं'** जगत्सृष्ट्यादिरूपं महिमानम् **'अनु'** अपि केऽपि मुक्ता अमुक्ताश्च **'नाश्नुवन्ति'** न प्राप्नुवन्तीत्यर्थः । यद्वा - **'नाश्नुवन्ति'** नानुभवन्तीत्यर्थः । नाश्नुवन्तीति वर्तमाननिषेधात् स्यादुत्तरत्रेत्यत आह – **'न'** इति ॥ प्राप्नोतीति शेषः । तथा च – हे **'विष्णो'** **'देवमहिम्नः'** रमादिमहिम्नः **'परम् अन्तं'** सीमानं महिमतारतम्यपरावधिभूतं **'ते महित्वं'** महिमानं **'जायमानः'** न प्राप्नोति, जातो **'नाऽप'** इत्यर्थः । उपलक्षणं चैतद् जनिष्यमाणो न प्राप्स्यतीत्यपि द्रष्टव्यम् ॥

अत एव **तत्त्वप्रदीपे** –

'परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।
उभे ते विद्म रजसी पृथिव्या विष्णो देवत्वं परमस्य वित्से ।
न ते विष्णो जायमानो न जातो देवमहिम्नः परमन्तमाप ।
उदस्तभ्ना नाकमृष्वं बृहन्तं दाधर्थ प्राचीं ककुभं पृथिव्याः'

इति ऋग्द्वयमेवमेव व्याख्यातम् । तथा हि – मात्रायाः परः परिमाणातीतः, तन्वा वृधानः तन्वा वर्धमानः, देहेन पूर्णः – इत्थम्भावे तृतीया । देहरूपेण पूर्ण इत्यर्थः । यतश्चिदानन्दाद्यात्मको विष्णोरभिन्नश्च देहः । ते महित्वं महिमानं नानुभवन्ति न प्राप्नुवन्ति च । ते त्वदीयायाः पृथिव्याः प्रकृतेः रजसी रजोगुणकार्ये उभे पुण्यपापे वयं विद्मः । प्रकृतेः रजसा हि पुण्यपापे सृज्येते । परमस्य ते महिमानं त्वमेव वित्से । त्वमेव महिम्नः

महिमसमुदायस्यान्तं ब्रह्मणः श्रियो वा महिमानमतिशयितो हि विष्णुमहिमा अन्यमहिम्नां परम् अन्तं ते महिमानं न कश्चिदाप । यत्राकं नास्ति तन्नाकम् । ऋष्वं प्रकाशरूपम् । बृहन्तं पूर्णं लोकम् उदस्तभ्नाः उदस्तभ्नः उच्चैरस्तम्भयः । पृथिव्याः पृथिव्यात्मकस्य ब्रह्माण्डस्य प्राचीं ककुभं दिशम् इन्द्रस्थापनेन दाधर्थ धृतवानसि । सर्वधारणोपलक्षणमेतदिति ॥

'यो नः पिता जनिता यो विधाता धामानि वेद
भुवनानि विश्वा ॥' *(ऋ.सं. १०-८२-३.)* **इत्यादि च ॥ २ ॥**

॥ इति जन्माधिकरणम् ॥

जगत्कारणत्वं च ब्रह्मणो न विकारित्वेन, किन्तु पितृवन्निमित्तत्वेनैवेति श्रुत्या दर्शयति - **य इति** ॥ **'यः'** एक एव **'नः'** अस्मदादिसर्वेषां **'जनिता'** जनयितैव **'पिता'** न दत्तपुत्रपितृवत् पालकपितृमात्रम् । यद्वा - **'स एव पितृसंस्थस्तु पातृत्वात् पितृनामकः'** इत्यैतरेयभाष्यदिशा **'पिता पाता'** इति तत्त्वप्रदीपोक्तेः **'जनिता'** जनकः **'पिता'** पाता चेत्यर्थः । **'यो विधाता'** विशेषेण धारकः पोषकः, **'मुक्तानां पोषणं च ज्ञानमोक्षदानेन'** इति तत्त्वप्रदीपोक्तेः । **'विधाता कर्ता'** इति प्रमेयदीपोक्तिः । तस्य धारणपोषणयोरिति भावः । यो **'विश्वा'** विश्वानि सर्वाणि भुवनानि तद्वत **'धामानि'** गृहाणि जीवादिस्वरूपाणि च **'वेद'** जानातीत्यर्थः । **'इत्यादि'** इति वाक्यम् **'उक्तार्थे प्रमाणम्'** इति शेषः । आदिशब्देन एतज्जातीयकश्रुत्यन्तरं **'द्यावाभूमी जनयन्'** इति च गृह्यते ॥ २ ॥

॥ इति जन्माधिकरणम् ॥

॥ ३. अथ शास्त्रयोनित्वाधिकरणम् ॥

(परब्रह्मलक्षणस्यान्यत्राविद्यमानत्वसमर्थनम्)

अनुमानतोऽन्ये न कल्पनीयाः ।

सू - ॐ ॥ शास्त्रयोनित्वात् ॥ ॐ ॥ ३ ॥

अत्राधिकरणे पूर्वोक्तजगज्जन्मादिकारणत्वरूपब्रह्मलक्षणस्य रुद्रादिष्वतिव्याप्तिपरिहाराय जगत्कारणे प्रमाणमुच्यते । सिद्धान्तप्रतिज्ञामुपस्कृत्य दर्शयति - **अनुमानत इति** ॥ कारणत्वेनेति शेषः । तथा च - शिवो जगज्जन्मादिकर्ता सर्वज्ञत्वाद् व्यतिरेकेण यज्ञदत्तवद् इत्याद्यनुमानाद् विष्णोः **'अन्ये'** रुद्रादयोऽपि जगत्कारणत्वेन **'न कल्पनीयाः'** न शङ्क्या इत्यर्थः । कुत इत्यतस्तत्र हेत्वाकाङ्क्षायां सूत्रमुपन्यस्यति – **शास्त्रयोनित्वादिति** ॥ जगत्कारणस्येति शेषः । **'तन्निर्धारितयुक्तिर्वा'** इत्यनुव्याख्यापदे **'तन्निर्धारितेत्यतः परं व्याप्तिशब्दोऽध्याहार्यः'** इति सुधोक्तेर्यथा तत्र मध्येऽध्याहारः, यथा वा **'सर्वेन्द्रियविवर्जितत्वाद्यर्थ उक्तः'** इति **गीताभाष्यप्रमेयदीपे** आदीत्यतः परं शब्दशब्दोऽध्याहार्य इत्युक्तेस्तत्र यथा मध्येऽध्याहारः, यथा वा **'पुरुषाद् वधविकारसमूहतेनकृतेषु'** इति **महाभाष्यवाक्ये** समासमध्ये तेनेति पदाध्याहारः, तथाऽत्रापि शास्त्रशब्दात् परमेकशब्दोऽध्याहार्यः योनिशब्दात् प्राग् ज्ञप्तिशब्दश्च । तथा च ऋगादिरूपं शास्त्रं च तदेकमसहायं च ज्ञप्तियोनिर्ज्ञप्तिकारणं यस्य वस्तुनः तत् तथोक्तं तस्य भावस्तत्त्वं तस्मादिति सूत्रार्थः । अनेन न जगत्कारणमानुमानिकं तस्य शास्त्रैकसमधिगम्यत्वाद् धर्मादिवद् इत्यनुमानमुक्तं भवति । न च दृष्टान्ते साध्यवैकल्यम् । न हि धर्मादिनिश्चयोऽनुमानेन भवति । तथा च – अनुमानादन्येषां जगत्कारणतासाधनमयुक्तमिति न तेषु लक्षणस्यातिव्याप्तिरिति भावः ॥

'नावेदविन्मनुते तं बृहन्तम् । सर्वानुभुमात्मान ँ साम्पराये'

(तै. ब्रा. ३-१२-९)

'औपनिषदः पुरुषः' इत्यादिश्रुतिभ्यश्च [१] ।

कारणस्य शास्त्रैकवेद्यत्वं कुत इत्यत आह – **नेति** ॥ तैत्तिरीयवाक्यमिदम् । अत्र ह्रस्वोकारपाठः । **'औपनिषदः'** इति श्रुत्यन्तरम् । अत्राऽडः प्रश्लेषः कार्यः । आदिशब्देन **'सर्वे वेदा यत्पदं'** (कठ.उ.२-१५) **'वेदा ह्येवैनं'** (भाल्लवेयश्रुतिः) **'तं त्वौपनिषदं पुरुषं पृच्छामि'** (बृ. उ.५-९-२६) इति वाक्यं च गृह्यते । **'तं'** पूर्वप्रकृतं **'बृहन्तं'** पूर्णं **'सर्वानुभुं'** सर्वमनुभवतीति सर्वानुभूः तं सर्वज्ञम् । यद्वा – सर्वमनुभावयतीति सर्वानुभुस्तमात्मानं सर्वजगत्कर्तारं सर्वस्वामिनं वा । **'साम्पराये'** सम्यक्परस्याऽयः प्राप्तिः सम्परायः, स एव साम्परायः, तादर्थ्ये सप्तमी, तथा च मोक्षाय **'अवेदवित्'** - **विष्णुतत्त्वनिर्णयटीकोक्त**-रीत्याऽत्र वेदशब्देन सदागमा गृह्यन्ते । तथा च सदागमतदर्थाज्ञानी वेदविरुद्धज्ञानी वा **'न मनुते'** न जानाति, वेदादन्यद् जगत्कर्तारं न प्रमापयतीति यावत् । किन्तु वेदविदेव जानाति, वेद एव प्रमापयतीति प्रथमश्रुत्यर्थः ॥

पुरुषो जगत्कर्ता आ औपनिषदः उपनिषदेकसमधिगम्य इत्यन्य-श्रुत्यर्थः । गम्यत्वं ग्राह्यत्वं तद्धितार्थः । आदिशब्दोपात्तश्रुत्यपेक्षया **'श्रुतिभ्यश्च'** इति बहुवचनम् । चशब्दोऽध्याहृतसाध्यसमुच्चये, स्वोक्तिसमुच्चये वा । अस्य शास्त्रयोनित्वादित्यनेनान्वयः । कारणस्येति शेषः । तथा चैवमादिश्रुतिभ्यः कारणस्य शास्त्रैकयोनित्वावगमान्नासिद्धिरिति भावः । नञ्द्वयाङ्घटितश्रुत्युदाहरणेन सूत्र एकशब्दोऽध्याहार्य इति सूचितम् ॥

---

१. **'इत्यादिश्रुतिभ्यः' ह.** ।

(अनुमानप्रामाण्यविमर्शः)

न चानुमानस्य नियतप्रामाण्यम् ।

'श्रुतिसाहाय्यरहितमनुमानं न कुत्रचित् ।
निश्चयात् साधयेदर्थं प्रमाणान्तरमेव च ॥

औपनिषदस्यापि कारणस्यानुमानेन सिद्धिः किं न स्यादित्यत आह - **नचेति** ॥ चोऽवधारणे । तथा च - **'अनुमानस्य'** अनुमानमात्रस्य **'प्रामाण्यम्'** अतीन्द्रियार्थप्रमापकत्वं नेत्यर्थः । तथा च – न तेनान्यस्य जगत्कर्तृतासाधनं युक्तमिति भावः । ननु कथमेतत् **'सर्वधर्मोपपत्तेश्च'** (सू. २-१-३८) इत्यधिकरणे स्वातन्त्र्यादिहेतुना विष्णोः पूर्णत्वादिसिद्धय-ङ्गीकारादित्यत उक्तम् – **'नियत'** इति । इदं च स्वातन्त्र्यार्थकं प्रमाणरूपप्रकृत्यर्थविशेषणम् । अनुमानस्येति हेतुगर्भम् । तथा च - अनुमानत्वादेव न तस्य स्वातन्त्र्येणादृष्टार्थनिश्चायकत्वं, प्रतिपक्षादि-सम्भवात्, किन्त्वस्वातन्त्र्येण । स्वातन्त्र्यं च सहायराहित्यम् । तच्च न स्वातन्त्र्यादिहेतावस्ति श्रुतिसहितत्वात् । पूर्वपक्ष्याशङ्कितसर्वज्ञत्वकार्यत्वा-द्यनुमानस्य तु श्रुतिसाहाय्यरहितत्वेन स्वतन्त्रत्वान्न प्रमाणत्वमिति भावः ॥

कुतो नानुमानस्य नियतप्रामाण्यमित्यत आह – **'श्रुति'** इति । स्मृतेरप्युपलक्षकमेतत् । अत्र सहायशब्दो मूलवाची । तस्मात् स्वार्थे ष्यञ् । श्रुतिश्च तत्साहाय्यं चेति कर्मधारयः, ततस्तेन रहितमिति तत्पुरुषः । श्रुत्यनुग्राह्यत्वरहितमिति यावत् । चः समुच्चये । एवशब्दो भिन्नक्रमः । तथा च- **'कुत्रचित्'** अस्मादाद्यदृष्टे श्रौतेऽर्थे **'श्रुतिसाहाय्यरहितमनुमानम्'** ईश्वरो न स्वतन्त्रः चेतनत्वादित्यादि लिङ्गम्, तथा यज्ञहिंसाऽधर्मत्वानुमानं च तथा **'प्रमाणान्तरम्'** अनुमानादन्यद् रामकृष्णादिदोषग्राहि मानुषत्व-ग्राहि च

प्रत्यक्षं **'निश्चयात्'** स्फुटमतीन्द्रियार्थं **'न साधयेत्'** इति योजना ॥

यद्वा - अर्थं निश्चयान्न साधयेन्न साधयेदेवेत्यर्थः । उक्तं हि गीताभाष्ये **'स निश्चयेन योक्तव्यः योक्तव्य एव बुभूषुणेत्यर्थः'** इति । उक्तं हि प्रमेयदीपिकायाम् - **'अयोगव्यवच्छेदे निश्चयशब्दः'** इति ॥

श्रुतिस्मृतिसहायं यत् प्रमाणान्तरमुत्तमम् ।
प्रमाणपदवीं गच्छेन्नात्र कार्या विचारणा ॥

तर्हि कीदृशस्य प्रत्यक्षादेरदृष्टार्थनिश्चायकत्वमित्यत आह **'श्रुति'** इति ॥ बहुव्रीहिरयम् । तथा च - श्रुतिस्मृतिरूपसहकारियुक्तं **'यत् प्रमाणान्तरं'** यशोदादिप्रत्यक्षं तत् **'उत्तमम्'** । अतः तत् **'प्रमाणपदवीम्'** अनुप्रमाणस्य प्रमाकरणत्वरूपां पद्धतिं **'गच्छेत्'** प्राप्नुयादित्यन्वयः । तदिति पाठेऽप्येवमेव योजना । एवं श्रुतिस्मृतिसहायो यस्तर्कः - विष्णुः स्वतन्त्रः पूर्णत्वादिति समव्याप्तिकानुमानं सोऽपि प्रमाणपदवीं गच्छेदित्यन्वयः । **'अत्र'** अस्मिन् विषये **'विचारणा'** संशयो **'न'** कार्य इत्यर्थः । नात्रेत्यनेन स्वोक्तार्थेऽप्रामाण्यशङ्का निराकृता ॥

पूर्वोत्तराविरोधेन कोऽत्रार्थोऽभिमतो भवेत् ।
इत्याद्यमूहनं तर्कः शुष्कतर्कं तु वर्जयेत् ॥' इत्यादि महाकौर्मे[1] ।

तर्कपदस्य व्याप्यारोपेणेत्याद्यन्यथाप्रतीतिनिरासाय तर्कस्वरूपमाह - **'पूर्व'** इति ॥ **'अत्र'** विप्रतिपन्ने वाक्ये **'कोऽर्थोऽभिमतः'** तात्पर्यविषयो **'भवेदित्याद्यम्'** एवम्भूतविमर्शपूर्वकं **'पूर्वोत्तराविरोधेन'** उपक्रमोपसंहाराविरोधेन तदैकरूप्येण लिङ्गान्तरस्याप्युपलक्षणमेतत् । तथा च – उपक्रमादितात्पर्यलिङ्गैरत्र तात्पर्यविषयार्थोऽयमेव भवेदित्याद्यं यत् **'ऊहनं'**

---

१. **'कौर्मे'** ह ।

यत्प्रमाज्ञानं तत्साधनं लिङ्गं स एव **'तर्कः'** अत्राभिमतः । **'शुष्कतर्कं'** श्रुतिस्मृतिसहायरहितं तन्निरपेक्षं चेतनत्वादितर्कं तु वर्जयेत्, तेनातीन्द्रियार्थनिश्चयो न कार्य इत्यर्थः ॥

केचित्तु क इत्यस्योभयार्थत्वमाश्रिस्य **'कश्छन्दसाम्'** (ऋ. १०-११५-९) इति वाक्यम् **'अत्र'** इत्यनेन परामृश्यते । अत एव **'इत्याद्यम्'** इत्यपि युक्तमित्याहुः । **'कौर्मे'** इत्यनन्तरं पुराणे यत उक्तमिति शेषः । अस्य **'न च'** इत्यनेनान्वयः ॥

शक्यत्वाच्चानुमानां सर्वत्र ।

न केवलं श्रुत्यादिसाहित्यहीनानुमानस्य प्रामाण्याभावे साधकसद्भावः, अपि तु तत्प्रामाण्याभ्युपगमे बाधकं चास्तीत्याह - **'शक्यत्वात्'** इति ॥ प्रयोक्तुमिति शेषः । **'अनुमानाम्'** इति कर्मणि षष्ठी । चशब्दो न केवलमित्युक्तसमुच्चयार्थः । तथा च श्रुत्यादिसाहित्यहीनानाम् **'अनुमानां'** चेतनत्ववस्तुत्वादिरूपकेवलहेतूनां **'सर्वत्र'** रुद्रादेर्जगत्कारणत्वाभावादौ शशादेः शृङ्गित्वादौ साध्येऽपि प्रयोक्तुं **'शक्यत्वात्'** नानुमानस्य नियतप्रामाण्यमिति योजना ॥

'सर्वत्र शक्यते कर्तुमागमं हि विनाऽनुमा ।
तस्मान्न सा शक्तिमती विनाऽऽगममुदीक्षितुम् ॥' इति वाराहे ।

अत्रैव प्रमाणमाह - **सर्वत्रेति** ॥ **'हि'** यस्मात् **'आगमं विना'** तद्धीना **'अनुमा'** **'सर्वत्र'** ईश्वरकारणत्वाभावादौ **'कर्तुं'** प्रयोक्तुं **'शक्यते'** **'तस्मात्'** अनुमा **'आगमं विना उदीक्षितुम्'** उदीक्षयितुं ज्ञापयितुम् अर्थमिति शेषः । **'शक्तिमती'** सामर्थ्ययुता नेत्यर्थः । **'वाराहे'** इत्यस्यापि **'कौर्मे'** इतिवदन्वयः । तस्मात् केवलानुमानस्यानिर्णायकत्वाच्छास्त्रेणैव कर्तृत्वनिश्चय इति स्थितम् ॥

(नास्तिक्यवादनिरासः)

रेतो धातुर्वटकणिका घृतधूमाधिवासनम् ।
जातिस्मृतिरयस्कान्तः सूर्यकान्तोऽम्बुभक्षणम् ।
प्रेत्यं भूताप्ययश्चैव देवताऽभ्युपयाचनम् ।
मृते कर्मनिवृत्तिश्च प्रमाणमिति निश्चयः ॥'
इति मोक्षधर्मवचनान्न नास्तिक्यवादो युज्यते ॥

नन्वतीन्द्रियार्थाभावेन प्रत्यक्षेतरस्याप्रामाण्यात् कथं शास्त्रादीश्वर-सिद्धिरिति नास्तिक्यवादं मोक्षधर्मवचनेन निराचष्टे – **रेत इति** ॥ रेत इत्यादिप्रथमैकवचनान्तानां पदानां प्रत्येकं प्रमाणमिति पदेनान्वयः । **'अत्रार्थे'** इति शेषः । तथा च रेतोधात्वादि **'अत्रार्थे'** अतीन्द्रियार्थसत्त्वे अनुमानादिप्रामाण्ये च प्रमाणं प्रमापकं भवतीत्यर्थः । भाष्यकारीय-द्वितीयेतिशब्दस्य एवं मोक्षधर्मवचनात् प्रतीतैर्हेतुभिर्नास्तिक्यवादो न युज्यत इति योजना । नास्तिका एव नास्तिक्यं, नास्तिकसमुदायो वा नास्तिक्यम् । तथा च - नास्ति परलोकः, धर्मो नास्ति, अधर्मो नास्तीति धिया वाद इत्यर्थः ॥

यद्वा – **न्यायदीपिको**क्तरीत्या – आस्तिक्यं धर्मादावस्त्यनेन प्रयोजनमिति भावो बुद्धिः तत्पूर्वको वादः, तदन्यो नास्तिक्यवाद इत्यर्थः ॥

रेतोधात्वादीनामनुमापकत्वप्रकारस्त्वित्थम् - रेतश्शब्दितचरमधातु-शरीरयोः कार्यकारणभावो न प्रत्यक्षः, किन्त्वन्वयव्यतिरेकाख्यानुमानगम्य इति तत्प्रामाण्यसिद्धिः । मृतशरीरे सिक्तस्य रेतसः शरीराकारणत्वेन यदधिष्ठिते शरीरे सिक्तं रेतः शरीरात्मना परिणमति तज्जीवसिद्धिः। वन्ध्यादिसर्वशरीरे सिक्तस्य रेतसः कार्याकरत्वेन यत्प्रेरितं रेतः कार्यकरं तदीश्वरादृष्टसिद्धिः ।

तत एव तत्प्रतिपादकागमप्रामाण्यसिद्धिः । एवं वातपित्तादिधातुरपथ्यादिना जीवच्छरीरे क्वचिदेव विक्रियते, न मृतशरीरे, नापि जीवत्सर्वशरीरेषु । ततो जीवेश्वरतद्बोधकागमप्रामाण्यादिसिद्धिः । वटकणिकापदोक्तवटबीजाद् वट उत्पद्यत इति सुप्रसिद्धम्, न च भर्जितायास्तस्याः, नाप्यभर्जिताभ्यः सर्वाभ्य इति तत्प्रेरकेश्वरादृष्टसिद्धिः । घृतेन जीवच्छरीर एव पीनता जायते, न मृतशरीरे क्षिप्तेन नापि जीवत्सर्वशरीरेषु । **'धूमाधिवासनं'** नाम पुष्पादिसम्पत्त्यर्थः धूमेन वृक्षस्य संस्कारः । तेनाशुष्कवृक्षेष्वेव पुष्पादिसम्पत्तिः, न शुष्के, नाप्यशुष्केषु सर्वेषु । एताभ्यामपि लिङ्गाभ्यां जीवेश्वरादृष्टादि-सिद्धिः । केषाञ्चित् साधनविशेषात् **'जातिस्मृतिः'** पूर्वजन्मस्मृतिर्भवति अनेनैव पुण्येन एवं स्वर्गोऽनुभूतः, अनेन पापेनेत्थं नरकमनुभूतमिति । सा च कस्यचिदेव, न सर्वस्य, न चेतनाद्यभावे सा युक्तेत्यतोऽपि चेतनादृष्टादिसिद्धिः ॥

अयस्कान्ताख्यशिलाविशेषेणायो भ्रमति, न चाचेतने चेष्टकत्वं दृष्टं, नापि सर्वचेतनानामित्येतस्मादपि तत्प्रेरकेश्वरादृष्टादिसिद्धिः । सूर्यकान्ताख्य-शिलाविशेषेणाग्निर्जायते, न चासौ शक्तिरचेतने युक्ता । अतोऽपि प्रेरकेश्वरादृष्टादिसिद्धिः । अम्बुभक्षणेन जीवच्छरीर एव तृष्णा निवर्तते, न च तन्मृतशरीरे, पात्रान्तरे वा निहितं पच्यते । नापि जीवत्सर्वशरीरेषु । तस्मादपि जीवेश्वरादिसिद्धिः । प्रेत्येत्यनन्तरं स्थितस्येति शेषः । **'प्रेत्य'** जीवं विहाय स्थितस्य देहस्य **'भूताप्ययः'** भूतेषु लय इत्यर्थः । तथा च - मरणेन देहस्य पृथिव्यादिपञ्चभूतेषु लयो भवति, न जीवतो, न चेच्छयेत्यतोऽपि तन्नियामकेश्वरादिसिद्धिः । एवं देवताऽभ्युपयाचनेन केषाञ्चिदेव सम्पदादिकं भवति, एवं मृते देहे चेष्टानिवृत्तिर्भवति, न पुरा, न स्वेच्छया । अतोऽपि जीवेश्वरादृष्टादिसिद्धिरिति ॥

दर्शनाच्च तप आदिफलस्य ।

युक्त्यन्तरेणापि नास्तिक्यवादं दूषयति – **दर्शनाच्चेति** ॥ चो युक्तिसमुच्चये । आदिशब्देन पापं गृह्यते ॥ तथा च स्वाध्याय-ब्रह्मचर्यादिरूपात्युत्कटतपआदिफलस्य तेजस्वित्वादेः प्रत्यक्षत एव दर्शनाच्च न नास्तिक्यवादो युज्यत इत्यर्थः । पुण्यपापाख्यातीन्द्रिय-वस्तुनस्तत्साधकानुमानागमप्रामाण्यस्य चाङ्गीकार्यत्वादिति भावः ॥

(सच्छास्त्राणि)

'ऋग्यजुस्सामाथर्वाश्च भारतं पञ्चरात्रकम् ।
मूलरामायणं चैव शास्त्रमित्यभिधीयते ॥
यच्चानुकूलमेतस्य तच्च शास्त्रं प्रकीर्तितम् ।
अतोऽन्यो ग्रन्थविस्तारो नैव शास्त्रं कुवर्त्म तत् ॥'

इति स्कान्दे ।

ननु यद्यनुमानस्यानिश्चायकत्वेन शास्त्रादेव कारणत्वसिद्धिः, तर्हि पाशुपतादिशास्त्रेण रुद्रादेर्जगत्कारणत्वसिद्धिः स्यादित्यत आह – **ऋगिति** ॥ अकारान्तोऽयमथर्वशब्दः । ऋक्च यजुश्च साम चाथर्वश्चेति तथोक्ताः । एवशब्दस्य ऋगादिकमेवेति सम्बन्धः । **'मूलरामायणमेवेत्य-वान्तररामायणव्युदासः'** इति **सुधोक्तिः** । चशब्दौ समुच्चये ॥

तर्हि मानवाद्यशास्त्रं स्यादित्यत आह – **यच्चेति** ॥ चोऽवधारणे, द्वितीयोऽप्यर्थे । तथा च **'एतस्य'** ऋगादेः **'यत्'** यदेव **'अनुकूलम्'** अविरुद्धार्थप्रतिपादकं मानवादि पुराणादिकं वा **'तत्'** सर्वमपि **'शास्त्रं प्रकीर्तितं'** प्रामाणिकैः **'अतः'** एतस्माद् वेदात् तदनुकूलाच्च **'अन्यः'** विरुद्धः उदासीनश्च यो **'ग्रन्थविस्तारः'** पाशुपतादिरूपग्रन्थविस्तरः **'तन्नैव शास्त्रम्'**,

किन्तु **'कुवर्त्म'** कुत्सितमार्गः, मार्ग इव मार्गः, कुत्सितज्ञानोपायोऽमानमित्यर्थः । ऋगादिकमेवेत्येवकारस्तु विरुद्धादिविषय इति भावः । स्कान्दे पुराणे इत्युक्तमित्यन्वयः । पाशुपतादेः कुवर्त्मत्वमिति शब्दार्थः ॥

'साङ्ख्यं योगः पाशुपतं वेदारण्यकमेव च ।' इत्यारभ्य वेदपञ्चरात्रयोरैक्याभिप्रायेण पञ्चरात्रस्यैव प्रामाण्यमुक्तमितरेषां भिन्नमतत्वं प्रदर्श्य मोक्षधर्मेष्वपि ॥

इतोऽपि पाशुपतादिकं कुवर्त्मेत्याह - **साङ्ख्यमिति ॥** अत्रैवं योजना - न केवलं स्कान्दे, किन्तु मोक्षधर्मेष्वपि । **'साङ्ख्यं योगः पाशुपतं वेदारण्यकमेव च' 'इत्यारभ्य'** उपक्रम्याधीतेन –

'पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम् ।
ज्ञानेष्वेतेषु राजेन्द्र सर्वेष्वेतद् विशिष्यते ॥'

इत्युत्तरवाक्येन साङ्ख्यादिषु प्रकृतेष्वपि तत्परित्यागेन पञ्चरात्रस्यैव प्रामाण्यरूपमाधिक्यमुक्तं यतोऽतः पाशुपतादिकं कुवर्त्म अमानमेवेति । नन्वनेन पञ्चरात्रप्रामाण्यमेव भवेन्नान्याप्रामाण्यमित्यत आह – **इतरेषामिति ॥** वेदपञ्चरात्रयोरन्येषां साङ्ख्यादीनामित्यर्थः। **'भिन्नमतत्वम्'** विरुद्धदर्शनत्वं **'प्रदर्श्य'** ज्ञापयित्वा प्रतिपाद्येति यावत् ॥

'साङ्ख्यं योगः पाशुपतं वेदारण्यकमेव च ।
ज्ञानान्येतानि भिन्नानि नात्र कार्या विचारणा ॥'

इति वाक्यशेषेणेति शेषः । प्रदर्श्येत्यस्य पञ्चरात्रस्यैव प्रामाण्यमुक्तमित्यनेनान्वयः। परस्परविरुद्धानामेकप्रामाण्योक्तावन्याप्रामाण्यलाभादिति भावः । तर्हि वेदारण्यकस्याप्यप्रामाण्यं स्यादित्यत आह – **वेदेति ॥ 'ऐक्याभिप्रायेण'** इति । एकार्थत्वरूपमूलमूलिभावाभिप्रायेणेत्यर्थः । तथा च

पञ्चरात्रस्य वेदसमानार्थत्वेन तत्प्रामाण्योक्तौ वेदप्रामाण्यमेवोक्तं भवतीति न तस्याप्रामाण्यमिति भावः । न चैक्याभिप्रायः कुतः कल्प्यत इति वाच्यम्, यतोऽदृष्टविषयस्य पौरुषेयस्य पञ्चरात्रस्य निर्मूलत्वेऽप्रामाण्यादाधिक्य-कथनमसङ्गतं स्यात् ॥

'सांङ्ख्यम्' ईश्वरावतारान्यकपिलोक्तं शास्त्रम् ।

'कपिलो वासुदेवाख्यः तन्त्रं साङ्ख्यं जगाद ह ।
सर्वागमविरुद्धं च कपिलोऽन्यो जगाद ह ॥' इत्युक्तत्वात् ॥

'योगः' हिरण्यगर्भोक्तं पातञ्जलम् । **'पाशुपतं'** पशुपतिना प्रोक्तम् । अरण्ये निर्जने देशे अध्येतव्यत्वादारण्यकमित्युपनिषदुच्यते । वेदाश्चाऽरण्यकानि च, तेषां समाहारः वेदारण्यकं, द्वन्द्वैकवद्भावो वा । वर्णाश्रम-राजदानधर्मादिप्रतिपाद्यधर्मबहुत्वात् मोक्षधर्माणां भेदाद् वा मोक्षधर्मेष्विति बहुवचनम् । अत एव **तत्त्वप्रदीपे** – मोक्षधर्मेष्विति बहुवचनं धर्मभेदादित्युक्तम् ॥

मोक्षधर्मे हि -

'साङ्ख्यं योगः पाशुपतं वेदारण्यकमेव च ।
ज्ञानान्येतानि भिन्नानि उताहो नेति चोच्यताम् ॥'

इति वैशम्पायनं प्रति जनमेजयप्रश्नः । तस्य -

'साङ्ख्यं योगः पाशुपतं वेदारण्यकमेव च ।
ज्ञानान्येतानि भिन्नानि नात्र कार्या विचारणा ॥'

इति वैशम्पायनोक्तं प्रतिवचनं चास्ति । इमे युधिष्ठिरभीष्मकर्तृके च । भगवतः ज्ञानानि ज्ञानसाधनानि भिन्नानि भिन्नमतानि । विरुद्धानामपि मतानां न सर्वेषां प्रामाण्यं सम्भवति । वस्तुनो बहुरूपत्वाभावात् । किन्त्वेक-स्यात्र प्रामाण्यमितरेषामप्रामाण्यं वाच्यम् । तत्र कस्य प्रामाण्यं कस्य वाऽप्रामाण्यमिति पुनर्युधिष्ठिरजनमेजयहार्दप्रश्नोत्तरमाह भीष्मो वैशम्पायनश्च।

'साङ्ख्यस्य वक्ता कपिलः' इत्यारभ्य **'पञ्चरात्रस्य कृत्स्नस्य'** इत्यनेन ज्ञानेषु ज्ञानसाधनेषु एतत्पञ्चरात्रम् । अभिप्रायस्तु परमाप्ततमेन नारायणेन सर्वस्य पञ्चरात्रस्य कृतत्वात् प्रामाण्यं तावत् सिद्धम्, विरुद्धानां चैकप्रामाण्येऽन्याप्रामाण्यं च । एतच्चाऽद्यवाक्यस्थवेदारण्यकपदेन वेदमूलक-पञ्चरात्रस्योत्तरवाक्यस्थपञ्चरात्रपदेन च मूलभूतवेदारण्यकस्योपलक्षणामङ्गी-कृत्योभयोरेकवाक्यतायामेव सम्भवति । अन्यथा पञ्चरात्रस्य पूर्वमप्रकृतत्वेन पूर्वोत्तरवाक्ययोरसङ्गतत्वापातः । उपलक्षणामङ्गीकृत्यैकवाक्यतायां च स्वीकृतायां वेदपञ्चरात्रयोरेव प्रामाण्यं सिद्ध्यति । न तद्विरुद्ध-पाशुपतादीनामिति तेषामप्रामाण्यमेवेति ॥

शास्त्रं योनिः प्रमाणमस्येति शास्त्रयोनि ॥ ३ ॥

॥ इति शास्त्रयोनित्वाधिकरणम् ॥

एवं सूत्रं व्याख्याय यत्परेणोक्तं शास्त्रस्य योनिरिति तदयुक्तमिति भावेन स्वाभिमतार्थं दर्शयति – **शास्त्रमिति ॥** कारणार्थकेन योनिशब्देन योग्यतया ज्ञप्तेः सम्बन्धे प्रमाणमिति पर्यवस्यतीत्यभिप्रायेण **'योनिः प्रमाणम्'** इति व्याख्यातम् । **'अस्य'** जगत्कारणस्य **'इति शास्त्रयोनि'** इत्यनन्तरं तुशब्दोऽध्याहार्यः । अत एव गीताभाष्ये **'इति तु शास्त्रयोनित्वम्'** इत्युक्तम् । तुरेवार्थः । तथा च - शास्त्रं योनिः प्रमाणं यस्य तच्छास्त्रयोनीत्येव शास्त्रयोनिपदार्थो ब्रह्म, न तु शास्त्रस्य योनीत्यर्थः । परव्याख्यानं तूक्तानुपयुक्तमयुक्तं चेति टीकायामेव दूषितम् ॥ ३ ॥

॥ इति शास्त्रयोनित्वाधिकरणम् ॥

॥ ४. अथ समन्वयाधिकरणम् ॥

(उपक्रमादितात्पर्यलिङ्गैः परब्रह्मण एव जगत्कारणत्वसमर्थनम्)

अज्ञानां प्रतीयमानमपि नेतरेषां शास्त्रयोनित्वम् । कुतः ?

सू - ॐ ॥ तत्तु समन्वयात् ॥ ॐ ॥ ४ ॥

अत्राधिकरणे जगत्कारणस्य शास्त्रयोनित्वान्न लक्षणातिव्याप्तिरिति पूर्वाधिकरणफलाक्षेपपरिहारमुखेन तस्य लक्षणत्वसिद्धये विष्णोरेव जगत्कारणत्वेन शास्त्रगम्यत्वं नेतरेषामपीति समर्थ्यते । पूर्वपक्षसूचनपूर्वकं सिद्धान्तमाह - **अज्ञानामिति** ॥ कर्तरि षष्ठीयम् । इतरेषाम् इति सम्बन्धे । समुच्चयार्थस्यापेरुभयत्रान्वयः । प्रतीत्या आगमोपलक्षणा वा । तथा च - न केवलं पाशुपताद्युक्तम्, किन्तु **'अज्ञानां'** श्रुतितात्पर्यार्थाज्ञानिभिरापाततः ज्ञायमानमपि न केवलं विष्णोः किन्तु **'इतरेषां'** रुद्रादीनामपि शास्त्रयोनित्वं, जगत्कारणत्वेन शास्त्रगम्यत्वं नेत्यर्थः । ननु प्रतीत्यादे-रज्ञानमूलत्वादिकं परिकल्प्यान्येषां कारणतया शास्त्रयोनित्वाग्रहणे को हेतुरिति पृच्छति – **कुत इति** ॥ प्रतीयमानमपीत्यनेनास्यान्वयः । तत्र हेतुकथनाय सूत्रमुपन्यस्यति – **तत्त्विति** ॥ यत इत्यादौ ग्राह्यम् ॥

अन्वय उपपत्त्यादिलिङ्गम् ।

सूत्राक्षराणि व्याचष्टे – **अन्वय इति** ॥ अन्वीयते स्वार्थेन सम्बध्यते तत्परतया ज्ञायते शास्त्रं शब्दो वाऽनेनेत्यन्वयः उपपत्त्यादितात्पर्यलिङ्ग-मित्यर्थः । सूत्रानुसारादेकवचनं समुदायाभिप्रायम् । तेन चोपक्रमादीनां क्वचिदविरोधं सूचयति । आदिपदं श्रुतिलिङ्गवाक्यप्रकरणस्थान-समाख्यानामपि ग्राहकम् ॥

अत्र श्रुत्यादिषट्कं च ग्राह्यमिति टीकोक्तेः । अत्र वाक्ये श्रुत्यादिषट्कमप्यादिपदेन ग्राह्यमिति हि तस्यार्थः । परन्तु श्रुत्यादीनामुपक्रमादिवत् तात्पर्यग्राहकत्वाभावादागमार्थमात्रनिर्णायकत्वान्नात्र तन्निदर्शकप्रमाणोक्तिः । अत एवोत्तरत्र -

'श्रुतिर्लिङ्गं समाख्या च वाक्यं प्रकरणं तथा ।
पूर्वं पूर्वं बलीयः स्यादेवमागमनिर्णये ॥'

इति तत्रापि प्रमाणं वक्ष्यति । उक्तं हि प्रमाणलक्षणटीकायाम् **'उपक्रमादीनां तात्पर्यलिङ्गत्वमेतेषां पुनरर्थ एवेति विशेषज्ञापनार्थो योगविभागः'** इति । न चैवम् **'अत्र श्रुत्यादिषट्कं च ग्राह्यम्'** इति **टीकायां** तात्पर्यग्राहकेष्वन्तर्भावोक्तिरयुक्तेति वाच्यम्, यतोऽत्रेत्यस्य समन्वयशब्दार्थ इत्येवार्थो न तात्पर्यग्राहकेष्विति, **'आकाशस्तल्लिङ्गात्'**, **'शब्दादेव प्रमितः'** (ब्र.सू.१-१-२२,३-२४)इत्यादौ श्रुतिलिङ्गादिभिरागमार्थनिर्णयदर्शनेन तेषामपि अन्वीयते शक्तिरूपसम्बन्धवत्तया ज्ञायते पदजातमेभिरिति व्युत्पत्त्या अन्वयशब्दार्थत्वौचित्यात् । न चोपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्तयः श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याश्च तात्पर्यलिङ्गानीति ज्ञानपादीयसुधाविरोध इति वाच्यम्, अत्र शक्तेरपि संयोजनात् । अत एव चन्द्रिकायामुपक्रमादिप्रमाणकः शक्तितात्पर्यलक्षणःसम्बन्धः समन्वय इत्युक्तम् । अत्राऽदिपदं श्रुत्यादीनामपि ग्राहकम् । व्युत्क्रमेणान्वयः । अनेनात्र बृहत्संहितावचनोदाहरणं वक्ष्यमाणस्य श्रुतिर्लिङ्गमिति वचनस्योपलक्षकमिति सूचितम् ॥

(उपपत्त्यादिलिङ्गस्वरूपकीर्तनम्)

उक्तं च बृहत्संहितायाम् –

'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥' इति ।

कानि तान्युपपत्त्यादीनि ? कुत्र च लिङ्गानि ? इत्यत आह – **उक्तं चेति** ॥ उपपत्त्यादीत्यनुषज्यते । न केवलमुपपत्त्याद्युक्तं निर्दिष्टं, किन्तु तज्ज्ञाप्यं चोक्तमिति चार्थः । अस्मदुक्तमुपपत्त्यादिलिङ्गं बृहत्संहितायामप्युक्तमिति वा । किमुक्तमित्यतस्तत् पठति – **उपक्रमेति** ॥ प्रकरणादि**रुपक्रमः**, तदन्त **उपसंहारः** । उपक्रमोपसंहारश्च तौ तथोक्तौ । अत्रोपक्रमोप-संहारतदैकरूप्याभ्यासापूर्वताफलार्थवादाश्चेतिप्रमाणलक्षणोक्तेः प्रत्येकविवक्षया विशकलितावुपक्रमोपसंहारौ द्वौ समुदायविवक्षया उभयाविरोधलक्षणं एकार्थत्वलक्षणं वा तदैकरूप्यमपि पृथक् तात्पर्यग्राहकमनुसन्धेयम् । अत एव द्विवचनप्रयोगः । एकप्रकारासकृदुक्ति**रभ्यासः** । प्राचुर्येण प्रमाणान्तरासिद्धार्थबोधकता **अपूर्वता** । फलवदर्थप्रतिपादकं **फलम्** । स्तुतिः, निन्दा, एककर्तृकोपाख्यानरूपा **परकृतिः**, अनेककर्तृकोपाख्यानरूपः **पुराकल्पश्च, अर्थवादः** । **उपपत्तिः** युक्तिः । **'तात्पर्यनिर्णये'** वाक्यतात्पर्यनिश्चये **'लिङ्गं'** साधनमित्यर्थः । यद्वा – निर्णेतव्ये तात्पर्ये साध्ये **'लिङ्गं'** हेतुरित्यर्थः । लिङ्गमित्यस्य उपक्रमादिपदैः यथायोग्यं प्रत्येकं सम्बन्धः । स्मृतेरुपक्रमादित्वेऽपि विरोधे उत्तरोत्तरप्राबल्यसूचनाय भाष्ये उपपत्त्यादीति व्यत्यस्योक्तिः । सामान्यविशेषभावेन उपपत्तेरुपक्रमादिभ्यः पृथगुक्तिः ॥

यद्वा - एतच्चोपक्रमादि स्वार्थे शब्दात्मकमपि इदमेतत्परम् अबाधे सत्येतदुपक्रमत्वाद् इत्यादिरूपेण वाक्यतात्पर्ये लिङ्गं च भवति । उपपत्तिस्तु यथाऽग्न्यादिरूपस्वार्थे तथा तात्पर्येऽपि अयमेतत्तात्पर्यविषयः उपपन्नत्वाद् इति प्रकारेण लिङ्गरूपेति पृथगुक्तिः ॥

उपक्रमादितात्पर्यलिङ्गैः सम्यङ् निरूप्यमाणे तदेव शास्त्रगम्यम् ।

सूत्रं योजयति - **उपक्रमादीति** ॥ **'शास्त्रे'** इति शेषः । समित्यस्यार्थः

सम्यगिति ॥ सर्वस्मिन्नित्यपि द्रष्टव्यम् । **'निरूप्यमाणे'** इत्यनेन संशब्दार्थस्याध्याहृतक्रिययाऽन्वयो दर्शितः । तुशब्दस्यार्थ एवेति । **'शास्त्र-योनि'** इत्यनुषक्तपदस्यार्थः शास्त्रगम्यमिति । तथा च यतोऽत्रान्वयपदोक्तैः श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्योपक्रमादिभिः शक्तितात्पर्यलिङ्गैः **'सं सम्यक्'** बलाबलविमर्शपूर्वकं **'सर्वस्मिन्'** शास्त्रे ऋगादिरूपे **'निरूप्यमाणे'** विचार्यमाणे एकार्थे शक्तितात्पर्यरूपव्यापकधर्मवत्तयाऽवगम्यमाने **'तदेव'** विष्ण्वाख्यं ब्रह्मैव **'शास्त्रगम्यं'** तत्प्रमाणकं प्रतीयते, न रुद्रादि, अतोऽज्ञानां प्रतीयमानमपि नेतरेषां शास्त्रयोनित्वमिति योजना । लिङ्गैरिति तृतीयया, निरूप्यमाणे इति सप्तमीप्रयोगे च उपक्रमादिकं तात्पर्यहेतुः । तात्पर्यं च शास्त्रप्रमाणकत्वे हेतुरिति सूचितं भवति । न केवलमुपपत्त्यादिकं समन्वयशब्दार्थः, किन्तु तद्धेतुकः शास्त्रजन्यप्रमागोचरत्वरूपः शास्त्रयोनित्वे हेतुभूतः । **'तत्परत्वसम्बन्धोऽपि'** इति सुधोक्तेः । अनेन **'समन्वयात्'** सावकाशत्वनिरवकाशत्वादिना बलाबलनिश्चयपुरस्सरम् अन्यतरबाधया वाक्यार्थविमर्शरूपसम्यग्विचारितत्वलक्षणसम्यक्त्वयुक्तादुपक्रमादिशक्ति-तात्पर्य-लिङ्गसमुदायात् समन्वयात् सर्वशास्त्रस्य भगवत्येव सम्यग्वचनवृत्त्या शक्तितात्पर्याख्यसम्बन्धावगमात् तद्विष्ण्वाख्यं ब्रह्मैव जगत्कारणतया शास्त्रयोनि न रुद्रादीति **'समन्वयात्'** इत्यस्याऽवृत्त्या सूत्रयोजना दर्शिता भवति ॥

'मां विधत्तेऽभिधत्ते मां विकल्प्योऽपोह्य इत्यहम्[१] **।**
इत्यस्या हृदयं साक्षान्नान्यो मद् वेद कश्चन ॥' *(११.२१.४३)*

इति हि भागवते ॥ ४ ॥

॥ इति समन्वयाधिकरणम् ॥

---

१. 'विकल्प्यापोह्य इत्यहम्' ह ।

ननु कर्मविधानादिरूपशास्त्रस्य कथं ब्रह्मपरतेत्याशङ्कां भगवद्वाक्येन प्रतिषेधति – **मामिति** ॥ यद्यपि भागवते **'इत्यस्या हृदयं लोके'** इति पाठः, तथा पूर्वोत्तरार्धयोर्व्युत्क्रमेण पाठश्च दृश्यते । तथाऽप्याचार्योक्तेरन्यकल्पीयोऽयमित्यदोषः । एकादशस्कन्धे उद्धवं प्रति कृष्णवचनमेतत् । अत्रास्मच्छब्देन कृष्ण उच्यते । तथा च **'वसन्ते वसन्ते'** इत्यादिकर्मविधात्री श्रुतिः **'माम्'** उद्दिश्यैव मत्पूजात्वेन कर्म विधत्ते । इन्द्राद्यभिधात्री **'मामभिधत्ते'** मद्गुणानैश्वर्यादीनभिधत्ते । **'अहं विकल्प्यः'** कल्पनं विधानम् ॥

तथा च -

'चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥'

(ऋ. १-१६४-४५)

इति श्रुत्या या वाग् वक्तृत्वान्निमित्ताद् वाक्शब्दितो हरिः तस्या यानि स्थानापेक्षया **'परिमितानि'** परिच्छिन्नानि **'चत्वारि पदानि'** वासुदेवादिरूपाणि तानि ये मनीषिणः ब्राह्मणाः त एव विदुः । तत्र वाचो हृदयगुहायां निहितानि वासुदेवादित्रीणि रूपाणि **'मनुष्याः'** साधारणाः **'नेङ्गयन्ति'** न जानन्ति । **'तुरीयम्'** अनिरुद्धाख्यं तु **'वदन्ति'** जानन्तीत्येवंरूपेण अहमेव चतुष्ट्वसङ्ख्याविशिष्टवासुदेवादिविविधरूपतया बहुत्वेन विधेय इत्यर्थः । **'अहमपोह्यः'** **'न सुरां पिबेत्'** (मनु. ११-९४) इत्यादिवाक्येनाप्रियादिति शेषः । तथा च **'निषेधबुद्धिविषयमप्रियं हि हरेः स्मृतम्'** इति भागवततात्पर्योक्तेः सुरापानादिकं मदप्रीतिसाधनत्वान्निषिध्यते इत्यप्रियद्वारा **'न सुरां पिबेत्'** इत्यादिना अहमेव निषेध्य इत्यर्थः ॥

अथवा - अहमप्रियादपोह्यः ममाप्रीतिकरात् सुरापानशब्दितात् **'सुरा हरेर्गुणा मे स्युः'** इति चिन्तनात् तदपेक्ष्य अपोह्यो निषेध्य इत्यर्थः । तदुक्तं

भागवततात्पर्ये – विधिरूपत्वेन कल्पनं विकल्पः चत्वारि वागित्यादि । तत्र वागित्यनुवादः ।

'विधिभागे हरेः पूजैवाभिधाने च तद्गुणाः ।
विकल्पे तद्बहुत्वं चाप्यपोहे तु तदप्रियम् ।
उच्यते सर्ववेदेषु तच्च वेद स एव हि ॥' इति ॥ तथा -

'सुरा हरेर्गुणाः प्रोक्तास्ते मे स्युरिति चिन्तनम् ।
सुरापानमिति प्रोक्तं तन्न कुर्यात् कथञ्चन ॥' इति ।

तत्त्वप्रदीपे तु - **'द्वे वा व ब्रह्मणो रूपे'** इति विकल्प्य विविधं कल्पयित्वा **'तत्र यः स आत्मा'** (तलवकारब्राह्मणम्) इति सदोषादपोह्यो निर्दोषत्वेन विधेयोऽप्यहमेवेत्यर्थ उक्तः । अत्र तत्त्वप्रदीपपक्षे विकल्प्येति ल्यप् । टीकाकृत्पक्षे तु विकल्प्यशब्दः समासान्तर्गतो व्यस्तो वेति विशेषः । इयं च भगवति वाक्यसमन्वयरीतिः – आद्यस्य इतिशब्दस्य प्रकारार्थस्य हृदयमित्यनेनान्वयः । द्वितीयस्य एवम्भूताया इत्यर्थः । तथा च ह्येवम्भूताया विधिनिषेधादिरूपाया अन्यपरत्वेन प्रतीतायाश्चास्याः श्रुतेरिति **'मां विधत्ते'** इत्याद्युक्तप्रकारेण **'हृदयं'** तात्पर्यम् **'अहमेव वेद'** जानामि **'मदन्यः कश्चन'** कोऽपि विशेषतः प्रायः न वेद न जानातीत्यर्थः । भागवत इत्यनन्तरं तदेव शास्त्रगम्यमित्युक्तत्वान्न कथमिति शङ्कावकाश इति वाक्यशेषः ॥ ४ ॥

॥ इति समन्वयाधिकरणम् ॥

॥ ५. अथ ईक्षत्यधिकरणम् ॥

(परब्रह्मणः साकल्येनावाच्यत्वेऽपि यत्किञ्चिद्रूपेण वाच्यत्वोपपादनम्)

ननु 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह ।'

(तै.उ.२-४-२२)

अत्राधिकरणे संशब्दोक्तं वाच्यत्वं कात्स्न्र्यं चाऽक्षिप्य समाधीयते । पूर्वपक्षयति – **नन्विति** ॥ **'इत्यादिभिः श्रुतिभिः'** इति तृतीया पञ्चम्यर्थे । नेत्याद्यावर्तते । तथा च **'तत्'** पूर्वसूत्रे तच्छब्दोक्तं ब्रह्म शब्दगोचरं शास्त्रोक्तं कारणं न, कुतः ? यतो न शब्दगोचरं शास्त्रमुख्यार्थः न, तदपि कुतः ? यतो न शब्दगोचरं शब्दावाच्यं, न चेक्षणीयत्वविरोधः तदसिद्धेः । कुतः ? यतो न तद्गोचरं ज्ञानविषयः न, अज्ञेयमिति यावत् । न चावाच्यत्वाज्ञेयत्वयोरसिद्धिः । **'यतो वाचो निवर्तन्ते'** इत्यादिश्रुतेरिति योजना । **'यतो वाचः'** इति वाक्येऽवाच्यत्वस्य **'अप्राप्य मनसा सह'** इत्यज्ञेयत्वस्य चोक्तत्वादिति भावः । **'त्रयी न श्रुतिगोचरा'** इत्यत्र गोचरशब्दस्य विशेष्यलिङ्गतया प्रयोगात् **'न तच्छब्दगोचरम्'** इति साधु । सुधायां तु शब्दानां गवां ज्ञानानां चरश्चरणं वृत्तिर्यस्मिन् तच्छब्दगोचरमिति व्यधिकरणबहुव्रीहिं चरश्चरणमस्यास्तीति मत्वर्थीयाच्प्रत्ययान्तत्वं चाऽश्रित्य शब्दगोचरमित्यस्य साधुत्वमुक्तम् । **'यतः'** इति तैत्तिरीयवाक्यम् । यतो **'वाचः'** वेदा वागिन्द्रियाणि च 'मनसा' मनोरूपेन्द्रियेण सह **'तमप्राप्य'** तद्विषयकवृत्तिज्ञानमजानन्त्य एव निवर्तन्ते । तं ब्रह्मण आनन्दं विद्वान्न बिभेतीत्यर्थः । गुणगुणिनोरभेदाश्रयेणैतदुदाहृतम् ॥

'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्'।

(कठ.१.३.१५)

'अशब्दम्' इति काठकवाक्यम् । अत्र सर्वत्र यच्छब्दो योज्यः । न विद्यते

शब्दो गुणः प्रमाणं वा यस्मिन् तत् तथोक्तम् । प्राकृतशब्दगुणशून्यं शब्दप्रमाणाविषयः शब्दभिन्नं चेत्यर्थः । **'अस्पर्शं'** स्पर्शगुणशून्यं तत एव स्पर्शलिङ्गाविषयः तद्भिन्नं च, **'अरूपं'** रूपरहितम् अत एव चाक्षुष-प्रत्यक्षाविषयस्तद्भिन्नं च । **'अरसं'** रसगुणशून्यं रसभिन्नं च । अगन्धमित्यस्याप्युपलक्षकमेतत् । अनेन पञ्चमात्राविलक्षणत्वमप्युक्तम् । **'अव्ययं नित्यम्'** इत्याभ्यां स्वरूपतो देहतश्च नाशशून्यत्वमुच्यते । अगन्धवदित्यनेन गन्धवत्पृथिवीविलक्षणत्वमुक्तम् । अनेनोपलक्षणया पञ्चमहाभूतविलक्षणत्वमप्युक्तं भवति । अस्य **'निचाय्य तं मृत्युमुखात् प्रमुच्यते'** इत्यनेनान्वयः ॥

'अवचनेनैव प्रोवाच' (बाष्कलश्रुतिः)

'अवचनेन' इत्यन्यच्छ्रुतिवाक्यम् । **'अवचनेन'** वचनवृत्तिं विनैव लक्षणया **'प्रोवाच ब्रह्म गुरुः'** शिष्यायोपदिदेशेति परीत्याऽर्थः ॥

'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते ... यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम्' *(के.उ.१.)* **इत्यादिभिश्श्रुतिभिर्[१] तच्छब्दगोचरम् ।**

'यद्वाचा' इत्यन्यत् तलवकारवाक्यम् । **'वाचा'** तदुच्चार्येण शब्देन यत् **'अनभ्युदितम्'** अनुक्तम् । येन वाक् **'अभ्युद्यते'** उच्यते । श्रोत्रेन्द्रियेण न शृणोति पुरुषः । येनेदं श्रोत्रं श्रुतं तदेव ब्रह्म त्वं विद्धीत्यर्थः । अत्र पूर्वपक्षरीत्या वचनवृत्तिनिषेधः । आदिपदेनैवञ्जातीयका श्रुतिर्गृह्यते ॥

नेत्याह -

सू - ॐ ॥ ईक्षतेर्नाशब्दम् ॥ ॐ ॥ ५ ॥

---

१. 'इत्यादिभिर्न' ह. ।

'स एतस्माज्जीवघनात् परात् परं पुरिशयं पुरुषमीक्षते' *(प्र.उ.५.५);* **'आत्मन्येवाऽत्मानं पश्येत्'** *(बृ.६-४-२३.)* **'विज्ञाय प्रज्ञां कुर्वीत'** *(बृ. ६-४-२१.)* **इत्यादिवचनैरीक्षणीयत्वाद् वाच्यमेव ।**

सिद्धान्तयत् सूत्रमवतारयति – **नेति ॥** इतिशब्द आवर्तते । तथा चात्र सूत्रकार इति पूर्वपक्ष्युक्तं श्रुतितात्पर्यापरिज्ञानप्राप्तं ब्रह्मणोऽवाच्यत्वं नेति निषेधतीत्यर्थः । सूत्रं पठति – **ईक्षतेरिति ॥** अत्र तदित्यनुवर्तते । तच्च आऽध्यायपरिसमाप्तेः विधेयसमर्पकमपीहोद्देश्यसमर्पकम् । न .विद्यते शब्दो वाचको यस्य तदशब्दम् । तथा च **'तत्'** ब्रह्म **'अशब्दं'** शब्दावाच्यं न, किन्तु वाच्यमेव । कुतः ? ईक्षतेः । धातुनिर्देशोऽयं, तथैव सुधोक्तेः । तथाऽपि शब्दमात्रस्यासाधकतया तेन तदर्थो लक्ष्यते । तेन प्रकृतानुकूलतयेक्षणीयत्वं विवक्ष्यते । तथा च **'ईक्षतेः'** ईक्षणीयत्वाद् ज्ञानविषयत्वादित्यर्थः इत्याशयेन सूत्रं व्याचष्टे – **स इति ॥**

इदं च षट्प्रश्नवाक्यम् । अत्र **'यः पुनरेतं त्रिमात्रेणौमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यते एवं हवै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकम्'** इति पूर्ववाक्ये प्रकृतो यः अकारोकारमकाराख्यांशत्रययुक्तप्रणवोक्तप्रकारेण परमात्मानमभिध्याय तमपरोक्षीकृत्य च तेजोरूपे सूर्ये सम्पन्नत्वग्विनिर्मुक्तसर्पवद् विधूतपापः सामाभिमानिदेवैः सत्याख्यं ब्रह्मलोकं प्राप्तः प्रणवोपासको जीवः सः **'जीवघनात्'** जीवसारात्तच्छ्रेष्ठात् **'एतस्मात्'** चतुर्मुखात् तदुपदेशेन **'परात् परम्'** उत्तमादुत्तमं **'पुरिशयं'** सकलदेहान्तर्गतं **'पुरुषं'** पूर्णं वासुदेवं परमात्मानं **'ईक्षते'** जानातीत्यर्थः ॥

यद्यपि षट्प्रश्नटीकायां **'जीवघनाद् विरिञ्चात् तदुपासनयेति यावत्, ईक्षते पुनरभिवृद्धज्ञानो भवति । ईक्षित्वा च तं प्राप्नोति'** इत्युक्तेरीक्षतेरपरोक्षज्ञानार्थत्वं प्रतीयते । तथाऽपि मूले ज्ञानसामान्य-विषयत्वरूपेक्षणीयत्वहेतोरसिद्धिपरिहारायास्याः श्रुतेरुपन्यस्तत्वात् **'हिरण्य-गर्भोपदेशेन'** इति टीकोक्तेश्चेह प्रकृतानुगुण्यादीक्षतिः परोक्षज्ञानार्थो व्याख्येयः । **'आत्मनि'** इत्यपरं काण्ववाक्यं जिज्ञासानये व्याकृतम् । **'विज्ञाय'** इत्यन्यद् वाजसनेयवाक्यम् । **'ब्राह्मणो'** ब्रह्मनिष्ठो धीरः **'तं'** परमात्मानमेवं शास्त्रेणाऽचार्याद् वा **'विज्ञाय'** परोक्षतो ज्ञात्वा **'प्रज्ञां'** प्रकृष्टमपरोक्षज्ञानं **'कुर्वीत'** सम्पादयेदित्यर्थः । **इत्यादीति ॥** एवमादिवाक्यैरित्यर्थः । आदि-शब्देन **'आत्मा वा अरे द्रष्टव्यः'** (बृ.उ. ४-४-५.) **'अज आत्मा महान् ध्रुवः'** (बृ.उ. ६-४-२०.) **'तमेव धीरो विज्ञाय'** (बृ.उ. ६-४-२१.) इत्यादिकं गृह्यते । ईक्षणीयत्वात् । अवगमोपलक्षकमेतत् । अन्यथाऽनन्वयात् । अनेनासिद्धिः परिहृता । तदन्यथाऽनुपपत्तेरिति शेषः । वाच्यमेवेति सौत्रनञ्द्वयलब्धा-र्थोक्तिः । न त्ववाच्यं नापि लक्ष्यमिति एवशब्दार्थः । तदित्यनेनास्यान्वयः । अनियमसूचनाय सूत्रभाष्ययोः प्रतिज्ञाहेत्वोर्व्युत्क्रमेणोक्तिः ॥

औपनिषदत्वान्नावचनेनेक्षणम् ।

नन्वस्त्वीक्षणीयत्वं ब्रह्मणः, तथाऽपि न तदन्यथानुपपत्त्या तस्य वाच्यत्वं वाच्यं प्रत्यक्षादिनाऽपीक्षणीयत्वोपपत्तेरित्यत आह – **औपनिषदत्वादिति ॥** तदित्येतद् विपरिणम्यानुवर्तते । तथा च **'तस्य'** ब्रह्मणः **'औपनिषदत्वात्'** उपनिषदेकसमधिगम्यत्वात् **'अवचनेन'** वचनेतरप्रमाणेन **'ईक्षणं'** ज्ञानं नेत्यर्थः। तथा च श्रुतिस्मृतिसाहाय्यरहितप्रत्यक्षाद्यवेद्यत्वविशिष्टेक्षणीयत्वान्यथानु-पपत्त्या ब्रह्मणो वाच्यत्वं सिद्ध्यत्येवेति भावः ॥

परिशेषप्रमाणपरतया वा इदमावृत्त्य व्याख्येयम् । योजना तु ब्रह्मणः

श्रुतिषूक्तमीक्षणं प्रमाणेनैव हि भवेत् । प्रसक्तप्रमाणेषु च **'नावचनेन'** वचनेतरप्रमाणेनेक्षणं सम्भवति । औपनिषदत्वाद् वचनेनैव भवदीक्षणं नावचनेन वचनवृत्त्यन्यलक्षणादिना सम्भवति । कुतः ? **'अवचनेन'** । भावप्रधानो बहुव्रीहिः । अवचनत्वेनावाच्यत्वेन निमित्तेन । अतः परिशेषादीक्षणं वाच्यत्वमेव साधयतीति ॥

'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद् वदन्ति'। *(कठ. २-१५)* **'वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद् वेदविदेव चाहम् ।'** *(भ.गी. १५-१५.)* **इत्यादिश्रुतिस्मृतिभ्यश्च** [१] ।

ननु श्रुतिसिद्धमवाच्यत्वं कथमीक्षणीयत्वयुक्तिमात्रेण दूष्यते **'प्रावल्यमागमस्यैव'** इति युक्तितः श्रुतेः प्राबल्योक्तेरित्यतः सौत्रो हेतुरागमोपलक्षक इति भावेन वाच्यत्वे श्रुतिस्मृती चाऽह – **सर्व इति ॥** कठानामियं श्रुतिः । सर्वे वेदा **'यत्पदं'** यस्य ब्रह्मणः स्वरूपम् **'आमनन्ति'** मुख्यवृत्त्या सतात्पर्यं प्रतिपादयन्ति । सर्वे वेदाः सर्वाणि तपांसि प्रसिद्धानि **'यत्'** ब्रह्म प्रति **'वदन्ति'** यदुद्देशेन कर्तव्यानीति बोधयन्तीत्यर्थः । तत्त्वप्रदीपरीत्या **'तपांसि'** आलोचनरूपा युक्तय इति वा ॥

सर्वैर्वेदैरहमेव **'वेद्यः'** मुख्यतः प्रतिपाद्यः । अहं **'वेदान्तकृत्'** ब्रह्मसूत्रकृत् **'वेदवित्'** वेदार्थज्ञानी चेति गीतास्मृत्यर्थः । आदिपदात् **'अथ कस्मादुच्यते' 'नामानि सर्वाणि' 'वचसां वाच्यमुत्तमम्'** इत्यादेः सङ्ग्रहः । तथा च श्रुतौ **'आमनन्ति'** इति साक्षाद् वाच्यत्वोक्तेः, स्मृतौ च **'अहमेव'** इत्यवधारणोपपत्तये मुख्यतया वेद्यत्वस्य विवक्षणीयत्वात्, तस्य च वाच्यत्वं विनाऽयोगात् सर्वशब्दलक्षणायाश्चासम्भवाद् वाच्यत्वमेवाऽभ्यां सिद्ध्यतीति

---

१. **'इत्यादिभ्यश्च'** ह.

भावः । स्मृतिभ्यश्चेत्यस्य वाच्यमेवेत्यनेनान्वयः । आदिशब्दोपात्त-श्रुतिस्मृत्यपेक्षया बहुवचनम् । न केवलमीक्षणीयत्वहेतोरिति चार्थः ॥

अवाच्यत्वादिकं त्वप्रसिद्धत्वात् ।

नन्वेवं वाच्यत्वस्य युक्त्यादिसिद्धत्वेऽवाच्यत्वाज्ञेयत्वाभिधायकोदाहृतश्रुतेः **'यतो वाचः'** इत्यादिरूपायाः का गतिरित्यत आह – **अवाच्यत्वादिकमिति** ॥ अज्ञेयत्वमतर्क्यत्वं चाऽदिशब्दार्थः । तुशब्दः शङ्काव्यावर्तकः, भिन्नक्रमेणावधारणे वा । तथा च **'अप्रसिद्धत्वात्'** साकल्येन अगोचरत्वान्निमित्तादेव ब्रह्मणि **'अवाच्यत्वादिकम्'** अवाच्यत्वादिव्यपदेशो युज्यत इति न तद्विरोध इति भावः । अनेन सिद्धान्ते **'अशब्दम्'** इत्यादेरप्रसिद्धत्वात् साकल्येन वाचकशब्दशून्यमित्यादिरर्थः । **'अवचनेन'** इत्यस्य तु साकल्येन वचनमन्तरेणेत्यर्थ इत्युक्तं भवति ॥

'न तदीदृगिति ज्ञेयं न वाच्यं न च तर्क्यते ।
पश्यन्तोऽपि न पश्यन्ति [१] मेरो रूपं विपश्चितः ॥' इतिवत् ॥

नन्वप्रसिद्धिनिमित्तकोऽवाच्यत्वादिव्यपदेशः क्व दृष्ट इत्यत आह – न **तदिति** ॥ यस्मात् **'विपश्चितः'** ज्ञानिनो मेरो रूपं पश्यन्तोऽपि **'ईदृगिति'** साकल्येन **'न पश्यन्ति'** न जानन्ति । अनेनाप्रसिद्धत्वहेतुः सूचितः । तस्मान्मेरो रूपं न ज्ञेयं प्रत्यक्षेण । न वाच्यं शब्देन । **'न तर्क्यते'** नानुमीयते च लिङ्गेनेत्युच्यत इत्यर्थः । **इतिवदिति** ॥ इति वाक्य इवेत्यर्थः । अस्यावाच्यत्वादिकमिति पूर्वेणान्वयः । तथा च यथा मेरुरूपेऽप्रसिद्धि-निमित्तकावाच्यत्वादिव्यपदेशस्तथा ब्रह्मण्यपीति भावः ॥

---

१. 'न जानन्ति' ह.।

'अप्रसिद्धेरवाच्यं तद् वाच्यं सर्वागमोक्तितः ।
अतर्क्यं तर्क्यमज्ञेयं ज्ञेयमेवं परं स्मृतम् ॥'इति गारुडे ॥

न केवलं **'पश्यन्तः'** इत्युक्त्यन्यथाऽनुपपत्तिमात्रेणैवाप्रसिद्धेरज्ञेयत्वातर्क्यत्वावाच्यत्वव्यपदेश इति व्यवस्था सिद्धा, अपि तु स्मृतिसिद्धा चेति भावेनाऽह – **अप्रसिद्धेरिति** ॥ तद् ब्रह्म यतः **'परं'** पूर्णम् अतः साकल्येनाप्रसिद्धत्वादवाच्यमुच्यते । सर्वसदागमोक्तत्वाद् तत्प्रसिद्धत्वाद् वाच्यं च भवतीत्यर्थः । एवमप्रसिद्धिप्रसिद्धिभ्यां तद् अतर्क्यम् अनुमेयं च, अज्ञेयं ज्ञेयं ज्ञानिप्रत्यक्षगम्यं च **'स्मृतं'** स्मृतिकारैरुक्तमित्यर्थः ॥

गारुडे इत्यनन्तरम् उक्तमिति शेषः । अस्याप्यवाच्यत्वादिकमित्यनेनान्वयः ॥

न चाशब्दत्वमितरसिद्धम् ॥

एवं **'यतो वाचः'** इत्यादिश्रुतीनां युक्त्यादिबलादर्थान्तरोपपत्तेर्न तद्बलाच्छब्दावाच्यं ब्रह्मेति सूत्रं व्याख्यायापव्याख्यां प्रत्याख्याति – **न चेति** ॥ चशब्दः स्वसिद्धमपि नेति समुच्चये । तथा च जगत्कारणं **'अशब्दं'** प्रधानं न, कुतः ? अशब्दं हि तत् । **'अशब्दं'** प्रधानं कारणं नेति वा, कुतः ? **'ईक्षतेः' 'तदैक्षत'** इति जगत्कारणस्येक्षणकर्तृत्वश्रवणात् प्रधानस्य चाचेतनत्वेन तदसम्भवादिति साङ्ख्यमतनिराकरणपरतया व्याख्याने प्रथमप्रतिज्ञायां हेतूकृतम् **'अशब्दत्वम्'** अश्रौतत्वम् 'इतरसिद्धं' स्वेतरसाङ्ख्यसिद्धं न, न केवलमेतावत्, किन्तु स्वसिद्धमपि न, साङ्ख्येन वैदिकत्वाभ्युपगतेः । सूत्रकारेण **'अजामेकाम्'** (तै.आ. १०-१०-१) इत्यादिश्रुत्युक्तत्वाङ्गीकारात् ॥

यद्वा - **तत्त्वप्रदीप**रीत्या मायिना साङ्ख्यं प्रति हेतुत्वेनोपन्यस्तमशब्दत्वं मायीतरस्य साङ्ख्यस्य न सिद्धं, नापि साङ्ख्येतरमायिसिद्धमुक्तहेतुभ्यामेव । तथा चासिद्धिरिति न तद्व्याख्यानं युक्तमिति भावः । एवमशब्दत्वं श्रौतत्वं ब्रह्मणः साङ्ख्येतरमायिसिद्धं न, तन्मते

अवाच्यत्वात् । चकारादीक्षितृत्वमपि सिद्धं न, तस्येक्षतिस्वरूपत्वादित्यपि व्याख्येयम् । तथा च हेतुद्वयमपि स्वपक्षप्रतिकूलमिति न परव्याख्या युक्तेति भावः । तत्त्वप्रदीपे तु **'न च'** इत्यादिभाष्यं **'इतरसिद्धं'** मायिसिद्धमशब्दत्वं न श्रुत्यर्थः । उक्तन्यायेन ब्रह्मणो वाच्यत्वात् । एवम् **'अशब्दत्वम्'** अवाच्यत्वं ब्रह्मण इतरस्य मायिनोऽपि न सिद्धम् । ब्रह्मणि व्यवहाराभावप्रसङ्गाद् इति द्वेधा व्याख्याय परतव्याख्याप्रत्याख्यानाय परोक्तहेतोष्टीकारीत्याऽसिद्ध्युक्तिपरतयाऽपि व्याख्यातम् ॥ ५ ॥

सू - ॐ ॥ गौणश्चेन्नाऽत्मशब्दात् ॥ ॐ ॥ ६ ॥

ईक्षणीयत्वस्य हेतोर्व्यधिकरणासिद्धिमाक्षिप्य समाधातुं सूत्रम् - **'ओं गौणश्चेन्नाऽत्मशब्दात्'** इति । अस्यार्थः - यतः **'आत्मन्येवाऽत्मानं पश्येत्'** इत्यादिश्रुत्युक्त आत्मा **'गौणः'** सत्त्वादिगुणबद्धो जीव एवातस्तदन्यथाऽनुपपत्त्या वाच्योऽपि स एव स्यान्न निर्गुणः परमात्मेति चेत् – न, कुतः ? **'आत्मानं पश्येत्'** इतीक्षणीये तस्मिन्नात्मशब्दश्रवणादिति । आत्मपदसामानाधिकरण्याय पुल्लिङ्गनिर्देशः ॥

न च गौण आत्मा दृश्यो वाच्यश्च न निर्गुण इति युक्तम् । आत्मशब्दात् ।

सूत्रं व्याचष्टे – **न चेति ॥** अत्र यतो 'दृश्यः' ईक्षतिश्रुतौ दृश्यतयोक्तः **'आत्मा'** जीवाख्यो गौण एव अतस्तदन्यथानुपपत्त्या वाच्योऽपि स एव स्यात् **'न निर्गुणः'** गुणातीतो विष्णुः **'दृश्यः'** ईक्षतिश्रुत्युक्तः । गौणग्रहणे बाधकस्येतरज्ञापकस्य चाभावादिति भावः । अतो न स वाच्यः इति चोद्यं न युक्तम् । कुतः ? **'आत्मशब्दात्'** **'आत्मन्येव'** इति वाक्ये ईक्षणीये तस्मिन् आत्मशब्दश्रवणाद् दृश्यो निर्गुण एव, अत एवेक्षत्या लिङ्गेन वाच्योऽपि स एव भवेदिति योजना ॥

यद्यपि सुधायां गौणपदं मायाशबलितैश्वर्यादिधर्मयुक्तसगुणब्रह्मपरतया व्याख्यातम् । तथाऽपि पूर्वपक्षिणो मायाशबलितं वा गुणबद्धा जीवा वा दृश्या वाच्याश्च, न सर्वथा निर्गुणं ब्रह्मेत्याशयेन्न विरोधः ॥

'यो गुणैः सर्वतो हीनो यश्च दोषविवर्जितः ।
हेयोपादेयरहितः स आत्मेत्यभिधीयते ।
एतदन्यस्वभावो यः सोऽनात्मेति सतां मतम्[1]।
अनात्मन्यात्मशब्दस्तु सोपचारः प्रयुज्यते' ॥ इति वामने ॥

नन्वात्मशब्दसद्भावे कुतोऽयं निर्गुणो न गौण इत्यत आह – **य इति ॥** यः **'सर्वतः'** प्रकारेण **'गुणैः'** सत्त्वादिभिः शून्यः, यश्च दुःखादिदोषरहितः, यश्च हेयोपादेयरहितः । भावप्रधानोऽयम् । हेयत्वसहितोपादेयत्वरहित इति । उपादेय एवेत्यर्थः । तत्त्वप्रदीपरीत्या स्वाभाविकदोषरहितो गुणपूर्णत्वेनाऽप्तकामत्वादुपादेयरहित इति वा । तत्त्वोद्योतटीकारीत्या दोषाभावाद् धातुरभावाद् वा हेयत्वरहितः, लौकिकगुणाभावादुपादातुरन्यस्य स्वतन्त्रस्याभावाद् वा उपादेयत्वरहितः, अनिष्टाभावाद्धेयं नास्ति, अपूर्त्यभावादुपादेयमस्य नास्तीति वा तथोक्तः । य एवम्भूतः स आत्मेत्यभिधीयते । य एतद्विरुद्धस्वभाववान् सोऽनात्मेति सतां मतं सम्मतमित्यर्थः । क्वचित् **'हृदि ह्येष आत्मा'** इत्यादावेतदन्यस्वभावेऽप्यात्मपदप्रयोगात् कथं सोऽनात्मेत्यत आह - **अनात्मनीति ॥** **'अनात्मनि'** आत्मशब्दमुख्यार्थभिन्ने जीवे **'आत्मशब्दः'** **'सोपचारः'** उपचारः परममुख्यवृत्त्यन्यमुख्यवृत्तिः तत्सहितस्तद्वृत्तिक इत्यर्थः । तुशब्दो विशेषार्थः । **'वामने'** इत्यनन्तरं **'निर्गुणैकनिष्ठत्वेनोक्तात्'** इति शेषः । अस्य नायं दृश्यो वाच्यश्च गौणः, किन्तु निर्गुण एवेत्यनेनान्वयः ॥

---

१. 'मतः' ह. ।

'द्वे वाव ब्रह्मणो रूपे आत्मा चैवानात्मा च। तत्र यः स आत्मा स नित्यः शुद्धः केवलो निर्गुणश्च। अथ ह योऽनीदृशः सोऽनात्मा' इति तलवकारब्राह्मणम् ॥

अत्रैव प्रमाणान्तरमाह – **द्वे वावेति** ॥ **'ब्रह्मणः'** परब्रह्मणः रूपं च रूपं च रूपे । तत्राऽद्यो रूपशब्दः स्वरूपपरः । द्वितीयो रूप्यते ज्ञायते ब्रह्माख्यमिति व्युत्पत्त्या प्रतिमापरः । वावेति निपातसमुदायः प्रसिद्धिद्योतकः । ते रूपे दर्शयति – **आत्मेति** ॥ आत्मशब्दमुख्यवाच्यस्तदवाच्यश्चेत्यर्थः । **'तत्र'** आत्मानात्मनोर्मध्ये **'स यः'** इत्यन्वयः । अन्यथा पौनरुक्त्यात् । तथा च **'सः'** प्रसिद्धो **'यः'** आत्मा आत्मशब्दमुख्यार्थो विष्णुः **'सः नित्यः'** देहहान्यादिरहितः **'शुद्धः'** कर्मलेपविधुरः **'केवलः'** जडामिश्रः **'निर्गुणः'** सत्त्वादिगुणाबद्ध इत्यर्थः । चो विशेषणसमुच्चये । एवं प्रथमोद्दिष्टात्मशब्दार्थं लक्षणमुखेन प्रदर्श्य अथानात्मानमुक्तलक्षणव्यतिरेकमुखेन दर्शयति – **अथेति** ॥ यस्मादात्मा एवम्भूतः **'अथ'** तस्मात् **'योऽनीदृशः'** नित्यत्वादिरहितः ह प्रसिद्धः । **'सोऽनात्मेति'** सतां सम्मतमित्यर्थः । **'ब्राह्मणम्'** इत्यनन्तरं यतो निर्गुणस्य विष्णोरेवाऽत्मत्वं वक्तीति शेषः । अस्यापि **'वामने'** इतिवदन्वयः ॥

न च मुख्ये सत्यमुख्यं युज्यते।

ननूपचारेणाप्यात्मशब्दस्य गौणे प्रयोगसद्भावात् स एव श्रुत्युक्तो दृश्य आत्मा किं न स्यादित्यत आह – **न चेति** ॥ **'मुख्ये'** आत्मपदमुख्यार्थे निर्गुणे दृश्यतयेक्षतिश्रुतिप्रतिपाद्ये सम्भवति सत्यमुख्यार्थगौणग्रहणं न युज्यत इत्यर्थः । अत्र सतीत्यनेन मुख्यसम्भवाख्यो हेतुरुक्तः । अमुख्यं न युज्यत इत्यनेन साध्यम् । उभयसमुच्चये शङ्कापरिहारसमुच्चये वा चशब्दः ॥ १६ ॥

सू - ॐ ॥ तन्निष्ठस्य मोक्षोपदेशात् ॥ ॐ ॥ ७ ॥

ननु आत्मशब्दो मुख्यत एव गौणात्मपरः किं न स्यात् । न चोक्तश्रुतिस्मृतिविरोधः, तत्राऽत्मशब्दो निर्गुणे विष्णौ मुख्यो जीवेष्वमुख्य इत्यनुक्तेः आत्मानात्मशब्दयोश्चेतनाचेतनविषयत्वसम्भवात् । किञ्च - आत्मानात्मशब्दयोः प्रसिद्धचेतनाचेतनपरत्वे श्रुतेरार्जवं, प्रसिद्धार्था-परित्यागात्, रूपशब्दस्यानेकार्थाकल्पनाच्च । न च जीवे निर्दोषत्वाद्ययोगः, दुःखादिदोषस्यौपाधिकत्वेन जीवस्यापि स्वभावतो निर्दोषतया श्रुतेः स्वभावविषयत्वोपपत्तेरित्याशङ्कां परिहर्तुं सूत्रं पठति – **ओं तन्निष्ठस्येति ॥** नेति वर्तते । तथा च - **'तन्निष्ठस्य'** अस्य आत्मज्ञानिनः **'मोक्षोपदेशात्'** नाऽत्मशब्दमुख्यवाच्यो गौण इति सूत्रार्थः ॥

न हि गौणात्मनिष्ठस्य मोक्षः ।

तन्निष्ठस्य मोक्षोपदेशेऽपि कुतोऽयमात्मा न गौण इत्य-प्रयोजकत्वमाशङ्क्याऽह - **न हीति ॥** गौणमोक्षपदसमभिव्याहृतो हिशब्दो विरोधाख्यहेतुसूचकः । तथा च – **'हि'** यस्मात् **'गौणात्मनिष्ठस्य'** गुणबद्धजीवज्ञानिनः तज्ज्ञानाद् गुणबन्धनिवृत्तिरूपो **'मोक्षः'** न सम्भवति, विरोधात् । तस्मात् **'न हि'** नाप्रयोजकता शङ्क्येत्यर्थः ॥

'यस्यानुवित्तः प्रतिबुद्ध आत्मा
अस्मिन् सन्दोहे[1] गहने प्रविष्टः ।
स विश्वकृत् स हि सर्वस्य
कर्ता तस्य लोकः स उ लोक एव ॥' *(बृ.उ. ६-४-१३.)*
इत्यात्मनिष्ठस्य मोक्ष उपदिश्यते ।

---

१. 'सन्दोघे' ह. ।

असिद्धिशङ्कां परिहर्तुं कोऽसावात्मनिष्ठस्य मोक्षोपदेश इत्यतस्तं दर्शयति – **यस्येति** ॥ अत्र श्रुतिः स्वप्रयुक्तमुशब्दम् एवेति व्याचष्टे । **'उ'** एकः प्रधान इति वा । तच्छब्दो विष्णुतज्ज्ञानिपरः । तथा च - **'हि'** यस्मात् **'सः'** विष्णुः **'सर्वस्य कर्ता'** तस्मादेव **'विश्वकृत्'** वायुकर्ता **'प्रतिबुद्धः'** स्वतः सर्वज्ञः **'अस्मिन् सन्दोहे'** सन्दुह्यते पुरुषार्थोऽनेनेति वा कार्यकारणसङ्घातरूपत्वाद्वा भूतसमुदायरूपत्वाद्वा सन्दोहनामके मध्यदेहे स्थिते 'गहने' गम्भीरे हृदयगुहास्थाने **'प्रविष्टः'** सः **'आत्मा'** विष्णुः **'यस्य'** येनोपासकेन **'अनुवित्तः'** सम्यग्ज्ञातः **'तस्य'** अधिकारिणः **'उ'** प्रधानः तस्य विष्णोर्यो **'लोकः'** स एव लोकः स्थानं भवतीत्यर्थः । **'सन्दोघे'** इति पाठेऽप्ययमेवार्थः **'सन्देहे'** इति पाठेऽनेकार्थसङ्कट इत्यर्थः । **तत्त्वप्रदीपे** तु – स विश्वकृत् कृतकृत्यः । कुतः ? यतः स हि परमात्मा प्रसन्नः सर्वशक्तिः सर्वमस्य ज्ञानिनः कार्यं करोतीत्युक्तम् । अस्मिन् पक्षे प्रथमः प्रथमान्त-तच्छब्दो विष्णुज्ञानिपरः, विश्वशब्दः कृत्यपरः, सर्वशब्दो ज्ञानिकार्यपरः ॥

टीकाकृत्पक्षे तु - प्रथमः प्रकृतविष्णुपरः, विश्वशब्दो वायुपरः, सर्वशब्दो जगत्पर इति भेदः । पक्षद्वयेऽपि द्वितीयतृतीयौ विष्णुतल्लोकपरौ । 'इति' इत्येवंरूपे बृहदारण्यके **'आत्मनिष्ठस्य'** तज्ज्ञानिनः **'मोक्ष उपदिश्यते'** । अस्य यत इत्युपदिश्यते अतो **'न गौण आत्मा'** इति वक्ष्यमाणप्रतिज्ञयाऽन्वयः । सूत्रस्य तु न गौण आत्मशब्द इति पूर्वेणान्वयः । आत्मेत्यनेन सौत्रतच्छब्दो नाऽत्मशब्दपरः, किन्त्वर्थतः प्रधानात्मपर इत्युक्तं भवति ॥

'अयमात्मा ब्रह्म' *(मा.उ. १-२, बृ.उ. ४-५-१९.)*

आत्मशब्दो विष्णावेव मुख्यः न जीवेष्वित्यत्र न केवलं तन्निष्ठस्येत्यादिनोक्तमनुमानं मानम्, किन्तु सूत्रकृदभिप्रेताः स्पष्टश्रुति-स्मृतयश्चेति भावेन तां ताश्चाऽह – **अयमिति** ॥ ब्रह्मेत्यन्तस्य उपदिश्यत इति

पूर्वेणान्वयः । **'अयमात्मा'** रमाब्रह्मादिष्वादानादिकर्तृत्वेन स्थितः आत्मा **'ब्रह्म'** विष्णुरेवेति माण्डूकश्रुत्यर्थः –

'सोऽयं विष्णू रमाब्रह्मरुद्रानन्तादिगः सदा ।

आदानादनकर्तृत्वादात्मा' इति माण्डूकभाष्योक्तः ।

'ब्रह्मेति परमात्मेति भगवानिति शब्यते ॥' *(भाग.१.२.११)*

'दत्तं दुर्वाससं सोममात्मेशब्रह्मसम्भवान् ॥' *(भाग.३.१.१५)*

'वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्म .....'

इत्यपरं भागवतवाक्यम् । अद्वयं समाधिकशून्यं ज्ञानस्वरूपं यत्तत्त्वं वदन्ति ज्ञानिनः तद् देशकालादिषु बृंहितत्वात् सर्वान्तर्यामित्वा-द्यैश्वर्यादिगुणवत्त्वाच्च निमित्तात् **'ब्रह्मेति परमात्मेति भगवानिति शब्यते'** अभिधीयत इत्यर्थः । अस्यापि पूर्वेण सम्बन्धः ॥

तत्रैव चतुर्थस्कन्धे **'दत्तम्'** इत्यन्यद् वाक्यम् । एतच्च **'अनसूया तथैवात्रेर्जज्ञे पुत्रानकल्मषान्'** इति पूर्वार्धेनैवान्वेतव्यम् ॥

'पत्नी मरीचेः सुकला सुषुवे कर्दमात्मजा ।
काश्यपं पूर्णिमानं च ययोरापूरितं जगत् ॥'

इति प्रकृतेन समुच्चयार्थस्तथाशब्दः । तथा च – अनसूयाख्या अत्रिभार्या अत्रेः सकाशात् **'आत्मेशब्रह्मसम्भवान्'** आत्मा विष्णुरीशो रुद्रः, ब्रह्मा चतुर्मुखः, आत्मा चेशश्च ब्रह्मा च ते तथोक्ताः तैः सह भवन्तीत्यात्मेशब्रह्मसम्भवाः तान् **'अकल्मषान्'** अपापान् यो दत्तः दुर्वासाः सोमश्चैतान् पुत्रान् **'जज्ञे'** जनयामासेत्यर्थः । यद्वा – अनसूया अत्रेर्दत्तादीन् जनयामास, ते च आत्मेशब्रह्मसम्भवा इति विपरिणामेन व्याख्येयम् । अत्र

ब्रह्मावेशेन सहोत्पन्ने चन्द्रे निरुक्तसम्भवशब्दो मुख्यः । साक्षाद् विष्णु-रुद्रांशत्वेन तत्सम्भूतयोर्दत्तदुर्वाससोस्तु छत्रिन्यायेनामुख्य इति द्रष्टव्यम् ॥

यद्यपि **'अत्रेः पत्न्यनसूया त्रीन् जज्ञेऽतियशसः सुतान् । दत्तम्'** इति भागवतपाठः, तथाऽप्यनुव्याख्याने एवं पठितत्वात् तथैव सुधायां व्याख्यातत्वात् तदन्यकल्पीयं पाठान्तरं भविष्यतीत्यदोषः । अस्यापीत्युपदिश्यत इत्यनेनान्वयः ॥

'चेतनस्तु द्विधा प्रोक्तो जीव आत्मेति च प्रभो ।
जीवा ब्रह्मादयः प्रोक्ता आत्मैकस्तु जनार्दनः ॥
इतरेष्वात्मशब्दस्तु सोपचारः प्रयुज्यते[१] ।
तस्याऽत्मनो निर्गुणस्य ज्ञानान्मोक्ष उदाहृतः ॥
सगुणास्त्वपरे प्रोक्तास्तज्ज्ञानान्नैव मुच्यते ।
परो हि पुरुषो विष्णुस्तस्मान्मोक्षस्ततः स्मृतः ॥' इति पाद्मे ॥

चेतनस्त्विति पाद्मवाक्यम् । **'प्रभो'** इति कस्यचित् सम्बोधनम् । तत्रेति शेषः । आद्यस्तुशब्दो विशेषार्थः । द्वितीयोऽवधारणे । तथा च - **'जीवाः ब्रह्मादयः प्रोक्ताः आत्मा तु'** तच्छब्दमुख्यवाच्यस्तु **'जनार्दनः'** विष्णुः **'एकः'** एव प्रोक्तः प्रमाणेषु । **'इतरेषु'** ब्रह्मादिषु **'आत्मशब्दः सोपचारः'** परममुख्यवृत्त्यपेक्षया हीनवृत्तियुक्त इति ज्ञानिभिरभिधीयत इत्यर्थः । कुतस्तस्यैवाऽत्मत्वं नान्येषामित्यत आह – **तस्येति** ॥ यतः **'तस्य'** निर्गुणस्य आत्मनो **'ज्ञानान्मोक्षो'** भवतीति **'यस्यानुवित्तः'** (बृ.उ. ६-४-३१.) इत्यादौ **'उदाहृतः'** उक्तः अतोऽयमात्मा निर्गुणो विष्णुरेव नान्यः । कुतः ? तस्यैव विष्णोर्निर्गुणस्य मोक्षदातृत्वसम्भवात्, अन्येषां तदसम्भवादित्यर्थः । आत्म-

१. **'सोपचारोऽभिधीयते'** ह. ।

ज्ञानान्मोक्षोपदेशेऽपि कुतो नेतरेषामात्मत्वं तेषामपि मोक्षदातृत्व-सम्भवादित्यत आह - **सगुणा इति** ॥ तुरवधारणे । तथाच– **'अपरे'** विष्णोरन्ये ब्रह्मादयो यतः **'सगुणाः'** सत्त्वादिगुणबद्धा एव न स्वतस्तद्विधुराः अतः **'तज्ज्ञानान्नैव'** सर्वथा **'मुच्यते'** अधिकारीत्यर्थः । गुणबद्धात्मविज्ञानाद् गुणबन्धनिवृत्तिरूपमोक्षायोगादिति भावः । ननु विष्णावपि निर्गुणत्वेनास्तु मोक्षदातृत्वसम्भावना, तन्निश्चयस्तु कुत इत्यत आह – **परो हीति** ॥ **'हि'** यस्मात् **'विष्णुपरः'** स्वतन्त्रः । तत्त्वप्रदीपरीत्या सर्वोत्तम इति वा, **'पुरुषः'** पूर्णः **'तस्मान्मोक्षस्ततः'** विष्णोर्भवेदेवेति स्मृतः स्मृत्युक्त इत्यर्थः । **'इति पाद्मे'** इत्यस्यापि इत्युपदिश्यत इति पूर्वेणान्वयः ॥७ ॥

सू - ॥ ॐ ॥ हेयत्वावचनाच्च ॥ ॐ ॥ ८ ॥

'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ ।
अमृतस्यैष सेतुः' *(मुं. उ.२-२-५,)*
इत्यन्येषां हेयत्ववचनादस्याहेयत्ववचनान्न गौण आत्मा ॥

युक्त्यन्तरेणाऽत्मशब्दोदितो न गौण इत्याह सूत्रकृत् – **हेयत्वेति** ॥ अत्र हेयत्वं नाम मोक्षार्थं प्राधान्येन ज्ञेयत्वेनाविहितत्वम् । तथा च – न केवलं तन्निष्ठस्य मोक्षोपदेशात्, किन्तु **'तमेवैकम्'** इति श्रुतावात्मनो हेयत्वावचनात्, प्रत्युत **'जानथ'** इत्यहेयत्ववचनात्, जीवस्य च **'अन्या वाचो विमुञ्चथ'** इति मुमुक्षुभिर्हेयत्ववचनाच्चेति सूत्रवृत्तिमभिप्रेत्य सूत्रं व्याचष्टे – **तमिति** ॥ हे ऋषयः ! **'तम्'** आत्मानं विष्णुम् **'एव एकं'** प्रधानं **'जानथ'** जानीध्वम् । **'अन्याः'** जीवादिविषयिणीः **'वाचः विमुञ्चथ'** त्यजत, प्राधान्येन विष्णिवतरान् न जानीध्वमित्यर्थः । **'जानथ आत्मानम्'** इति विश्लेषो विष्णोः सर्वतो विलक्षणत्वप्रदर्शनार्थः । विकरणव्यत्ययस्तु छान्दसः । अमृतस्येत्येकवचनं

समुदायविवक्षया । तथा च - **'अमृतस्य'** मुक्तवर्गस्य **'एषः'** विष्णुः **'सेतुः'** मुख्याश्रय इत्यर्थः । **'इति'** इत्येवंरूपायां मुण्डकश्रुतौ **'अन्येषां'** जीवानां **'हेयत्ववचनात्'** इत्यनेन चशब्दसमुच्चेयं दर्शितम् । सौत्रनञो व्यत्यासेनान्वयमभिप्रेत्य समुच्चेयान्तरमाह – **अस्य विष्णोरहेयत्वेति ॥** चशब्दः समुच्चये । सूत्रे गौणसूत्रादनुवृत्तस्य **'न गौण आत्मशब्दः'** इत्यस्यार्थमाह – **नेति ॥** गौण आत्मशब्दमुख्यवाच्यो न, किन्तु निर्गुणो विष्णुरेवेत्यर्थः । तथा च – आत्मशब्दादीक्षतिश्रुत्युक्तोऽपि निर्गुण एवेति सिद्धम् । तस्येक्षत्यन्यथाऽनुपपत्त्या वाच्यत्वमिति भावः ॥ ८ ॥

सू - ॐ ॥ स्वाप्ययात् ॥ ॐ ॥ ९ ॥

'पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥' *(बृ. उ.५-१-१.)*
'स आत्मन आत्मानमुद्धृत्याऽत्मन्येव
[1]विलापयत्यथाऽत्मैव भवति'।

युक्त्यन्तरेणापि निर्गुणस्य विष्णोर्वाच्यत्वमुपपादयत् सूत्रमुपन्यस्यति- **स्वाप्ययादिति ॥** सूत्रं व्याचष्टे - **पूर्णमिति ॥ 'अदो'** मूलरूपं **'पूर्णम्'** 'इदम्' अवताररूपं च **'पूर्णम्'** । **'पूर्णम्'** अवताररूपं सृष्टिकाले **'पूर्णात्'** मूलरूपात् **'उदच्यते'** [2] उद्गच्छति । तत्त्वप्रदीपरीत्या अमुष्मादिदं सङ्ख्यामात्रेणोदच्यते एकमेव बहुसङ्ख्यं भवति विशेषादेवेति वा । प्रलये मूलरूपं **'पूर्णस्य'** स्वस्य **'पूर्णम्'** अवताररूपम् **'आदाय'** स्वीकृत्यैकीभूय **'पूर्णमेव'** अन्यत्रालीनं सदेव स्वयम् [3] **'अवशिष्यते'** इति बृहदारण्यकश्रुत्यर्थः ॥

---

१. 'विलाययति' ह.
२. 'उदच्यते उद्रिच्यते' – म. ३ 'स्वयमेव' – म

'स' इत्यन्या श्रुतिः । तदर्थस्तु - **'स'** विष्णुः **'आत्मनः'** स्वस्मात् मूलरूपात् **'आत्मानम्'** अवतारगतं स्वस्वरूपं **'उद्धृत्य'** सृष्टिकाले पृथग् व्यक्तीकृत्य प्रलये **'आत्मनि'** स्वस्मिन्नेव **'विलापयति'** एकीभावयति । **'अथ'** अनन्तरं स विष्णुः **'आत्मैव'** मूलरूप्येव **'भवति'** अवशिष्यत इति ॥

'स देवो बहुधा भूत्वा निर्गुणः पुरुषोत्तमः ।
एकीभूय पुनः शेते निर्दोषो हरिरादिकृत् ॥' इति[१]
स्वस्यैव स्वस्मिन्नप्ययवचनात् ।

'स देवः' इति स्कान्दस्मृतिः श्रौततच्छब्दार्थविवरणरूपा । **'देवः'** द्योतनादेः **'निर्गुणः'** सत्त्वादिगुणेभ्यो निष्क्रान्तः तत एव गुणकार्यदोषहीनः **'पुरुषोत्तमः'** क्षराक्षरचेतनोत्तमः **'आदिकृत्'** विश्वस्योत्पत्तिकर्ता प्रथमकर्ता वा **'सः'** श्वेतद्वीपगो **'हरिः'** आदिसृष्टौ **'बहुधा भूत्वा'** वराहादिबहुरूपाणि सृष्ट्वा **'पुनः'** अथ प्रलये **'एकीभूय'** मूलरूपेण तान्येकतां प्रापयित्वाऽहिपतौ **'शेते'** योगनिद्रां करोतीत्यर्थः । इतीत्यस्य इति श्रुत्युक्तत्वाच्चेत्यध्याहारेण **'वाच्यमेव तत्'** इति परमसाध्येनान्वयः ॥

एतच्छ्रुत्युक्तोऽपि निर्गुणः कुतः ? गौण एव किं न स्यादित्यतस्तत्र सौत्रं हेतुं सावधारणस्वशब्दावृत्त्या योजयति - **स्वस्यैवेति** ॥ एवकारो भिन्नक्रमः । इतिशब्द आवृत्तोऽत्रापि योज्यः । वचनादित्यावर्तते । न गौण इत्यनुवर्तते । अयमिति शेषः । स्वाप्ययपदं पूर्णत्वस्याप्युपलक्षकम् । तथा च पूर्णमिति श्रुतौ स्वाप्ययपदोपलक्षितपूर्णत्वस्य वचनात् स्वस्य स्वस्मिन्नेवाप्ययवचनाच्च, स इति स्पष्टश्रुतावपि आत्मन्येव विलापयतीति स्वस्य स्वस्मिन्नेवाप्ययवचनात्, तस्य च निर्गुणहरिनिष्ठतायाः स्मृतौ वचनाच्च अयं निर्गुण एव न गौण इति

१. 'इत्यादि' ह.

योजना । वाच्यत्वे स्वाप्ययस्य साक्षाद्धेतुत्वाभावात् सूत्रे भाष्ये च चशब्दाभावः । यद्यप्यत्रोपलक्षणाभिप्रायकटीकारीत्या पूर्णत्वहेतुसमुच्चायकश्च-शब्दोऽनुवर्तनीयः । तथाऽप्यस्य वाच्यत्वे साक्षादहेतुत्वात् तत्र [1]हेत्वन्तरस्य ज्ञापकचशब्दो नानुवर्तनीयः । न च श्रुत्युक्तत्वाच्चेत्यध्याहृतहेतौ चशब्दावश्यम्भावात् कथं तदभाव इति वाच्यम्, सूत्रश्रुतहेतौ चशब्दाभाव इत्यभिप्रायात् । अत एव टीकायां तत्रेत्युक्तम् ॥

तथा चायं सूत्रार्थः - न केवलं निर्गुणविष्ण्वाख्यं ब्रह्म ईक्षणीयत्वाद् वाच्यम्, किन्त्वेतच्छ्रुत्युक्तत्वाच्च । श्रुत्युक्तं निर्गुणमेव न गौणमिति कुतः ? पूर्णत्वात् स्वस्य स्वस्मिन्नप्ययाच्च, गौणस्यापूर्णत्वाद् अन्यस्मिन् लयेन स्वाप्ययशून्यत्वाच्चेति । श्रुत्युक्तस्वाप्ययपूर्णत्वयोरसिद्धिपरिहाराय हेतौ साध्यसामानाधिकरण्योपपादनाय च श्रुतिस्मृत्योर्वचनादित्युक्तं भाष्ये ॥

न हि गौणात्मनि निर्दोषस्य लयः ॥ ९ ॥

नन्वयं स्वाप्ययवान् अन्यत्रालीनश्च गौणः स्यात्, निर्गुणोऽन्योऽस्तीति चेत् - न, यद्ययं स्वाप्ययवान् गौणः तर्ह्ययं निर्गुणश्चोभौ प्रलयेऽन्यत्र लयहीनौ तिष्ठतः ? उत एकस्मिन्नन्यस्य लयो भवति । नाऽद्यः **'इदं वा अग्रे नैव किञ्चनाऽसीत्'** (तै.ब्रा. २-२-९-१.) इत्यादिश्रुतिविरोधात्, अत्र प्रलये द्वितीयमात्रनिषेधात् । द्वितीये न तावद् गौणस्य निर्गुणे लयः, तस्य स्वाप्ययवत्तयाऽवस्थानाभ्युपगमात् । तथा च निर्गुणस्य सगुणे लयो वाच्यः । स च न सम्भवतीत्याह - **न हीति** ॥ **'गौणात्मनि'** जीवे **'निर्दोषस्य'** सत्त्वादिगुणबन्धरूपदोषहीनस्य निर्गुणस्य विष्णोर्लयो नोपपद्यत इत्यर्थः । हिशब्देन **'यत् प्रयन्ति'** (तै.उ.३-१.) इत्यादिश्रुतिविरोधादिति हेतुः सूचितः । तस्मान्निर्गुणस्य स्वस्मिन्नेव लयो वाच्य इत्यतोऽयमनन्यलीनो निर्गुण एवेति

१. 'हेत्वन्तरत्वज्ञापक-' – म.

तस्यैव श्रुत्युक्तत्वाद् वाच्यत्वं सिद्धमिति भावः ॥

अत्र नये गौणादिव्यपदेशः सत्त्वादिगुणयुक्तत्वतदभावरूपधर्माश्रय-जीवपरमात्मविषयक एव, न तु मुख्यासम्भवे गौणाश्रयणादित्यत्रेव निर्गुणोऽयमित्यत्रेव वा मुख्यार्थगुणहीनविषय इति सूचनाय निर्गुणस्येति [१]वक्तव्यत्वेऽपि निर्दोषस्येत्युक्तम् ॥

न च कासुचिच्छाखास्वन्यथोच्यते ॥

नन्वस्तु निर्गुणस्य विष्णोर्वाच्यत्वोपपत्तौ सत्यां कारणत्वेन शास्त्रगम्यत्वम् । तच्चोपक्रमादिबलात् प्रसिद्धशाखास्वेव कारणत्वेन प्रतिपाद्यत्वपर्यवसितम् । अप्रसिद्धशाखासु पुनरन्योऽपि कारणत्वेनोच्यताम् । न च ता न सन्ति, तासामानन्त्येनेयत्ताऽनिश्चयादित्यत आह – **न चेति** ॥ चोऽप्यर्थः । तथा च – **'कासुचित्'** अप्रसिद्धशाखासु **'अन्यथा'** अन्यो निर्गुणात् सगुणोऽपि **'अन्यथा'** अकारणत्वादेः कारणत्वेन आत्मशब्द-मुख्यवाच्यत्वेन मोक्षजनकज्ञानविषयत्वेन च, निर्गुणो वा **'अन्यथा'** अकारणत्वादिना **'उच्यते'** उच्यतामिति **'न'** इति योजना । **'नान्यथा'** इत्यनेन सूत्रे गौणसूत्रान्नेत्यस्यानुवृत्तिः, अन्यथेत्यध्याहारश्च सूचितः । **'तत्तु'** इत्युक्तादन्यथा नेत्यर्थः ॥

सू - ॐ ॥ गतिसामान्यात् ॥ ॐ ॥ १० ॥

'सर्वे वेदा युक्तयः सुप्रमाणा ब्राह्मं ज्ञानं परमं त्वेकमेव ।
प्रकाशयन्ते न विरोधः कुतश्चिद् वेदेषु सर्वेषु तथेतिहासे ॥'
(पैङ्गिश्रुतिः) **इति पैङ्गिश्रुतेर्गतेर्ज्ञानस्य साम्यमेव ॥**

कुतो नेत्यतस्तत्र हेतुत्वेन सूत्रमुपन्यस्य व्याचष्टे – **गतीति** ॥

---

१. **'वक्तव्येऽपि'** – म.

उत्तरसूत्रपदाकर्षणेन सर्वाधिकारिसाधारणगतिसामान्यस्य श्रुतत्वादिति योजनामभिप्रेत्य असिद्धिपरिहाराय तत्सूत्रसूचितां श्रुतिमाह – **सर्व इति ॥** वेदा इत्यस्य विवरणं **'सर्वे'** इति । तथा च - **'सर्वे वेदाः'** तथा **'सुप्रमाणाः'** सुष्ठु प्रमाणं प्रमाणान्तरं मूलभूतं यासां ताः **'युक्तयः'** । **'तथेतिहासे'** इति वक्ष्यमाणानुरोधादत्रेतिहासा अप्युपलक्ष्याः । तथा चेतिहासाश्च । **'ब्राह्मं'** ब्रह्मैकविषयम् **'एकम्'** एकविधमेव परमार्थविषयकत्वात् **'परमम्'** उत्तमं **'ज्ञानं' 'प्रकाशन्ते'** उत्पादयन्ति, न पुनरनेकम् । अतः **'सर्वेषु वेदेषु'** तथा युक्तिषु **'तथेतिहासे'** इतिहासेषु **'कुतश्चित्'** कश्चिदपि विषयकृतो वा प्रकारकृतो वा **'विरोधो न'** इत्यर्थः । ज्ञानरूपमेकमेव ब्रह्मस्वरूपं ज्ञापयन्तीति वा । श्रुतेरिति पञ्चमी तृतीयार्थे । गतेरित्यस्य व्याख्या ज्ञानस्येति ॥

सामान्यादिति सौत्रपदे प्रातिपदिकार्थमाह – **साम्यमिति ॥** विषयगुणानामनन्यथोक्त्या साम्यमित्यर्थः । **'न ह्येकत्र ज्ञानानन्दादिकमुक्त्वाऽन्यत्राज्ञानादिरूपत्वं ब्रह्मण उच्यते'** इति तत्त्वप्रदीपोक्तेः कथ्यत इति शेषः । न तु विषमत्वमिति वा स्वयमेव साक्षान्न त्वन्यमुखेनेति वा एवशब्दार्थः ॥

तथा च – **'सर्वे वेदाः'** इति श्रुत्या स्वयमेव साक्षाद् गतेः सर्वशाखोत्पाद्यज्ञानस्य सामान्याद् एकविधत्वोक्तेः न कासुचिच्छाखास्वन्यथोच्यत इति सूत्रार्थः ॥

अत्र [१]भिन्नविषयप्रकारकेष्वपि ज्ञानेषु ज्ञानत्वेन साम्यसत्त्वात् साम्यादित्युक्तौ विषयप्रकारैक्यं न सिद्ध्यतीति सामान्यात् समानत्वाद् एकविधत्वाद् इत्युक्तं सूत्रे । भाष्यपदस्याप्ययमेवार्थ इति ध्येयम् ॥ १० ॥

सू - ॐ ॥ श्रुतत्वाच्च ॥ ॐ ॥ ११ ॥

---

१. **'भिन्नविषयकप्रकारके-'** – म.

'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च' ॥
(श्वे.उ.६-११) **इति ॥**

इतश्च निर्गुणं ब्रह्म वाच्यमित्याह सूत्रकृत् - **श्रुतत्वाच्चेति ॥** चो हेतुसमुच्चये । तदशब्दं नेति वर्तते । तथा च तद्विष्ण्वाख्यं निर्गुणं न केवलमीक्षत्यादिभिः नाशब्दं शब्दावाच्यम् । किन्तु **'एकः'** इति श्वेताश्वतरश्रुतौ **'श्रुतत्वाच्च'** स्ववाचकनाम्ना साक्षादुक्तत्वाच्चेत्यर्थ इत्याशयेन सूत्रोपात्तश्रुतिं पठति - **एक इति ॥** **'एकः'** प्रधानः स्वस्मिन् भेदशून्य इति वा **'देवः'** द्योतनादेः **'सर्वभूतेषु गूढः'** सर्वप्राणिषु गुप्ततयाऽवस्थितः । न केवलं भूतेषु स्थितः, किन्तु **'सर्वव्यापी'** च देशतः कालतो गुणतश्च सर्वं व्याप्नोतीत्यर्थः । न केवलं सर्वभूतेषु स्थितिमात्रं, किन्तु **'सर्वभूतान्तरात्मा'** सर्वप्राणिनां अन्तःस्थित्वा आ सम्यक् तन्नियन्ता च माता चेति वा । आदानादिकर्तृत्वाद् वा तथोक्तः । **'कर्माध्यक्षः'** कर्माधिपतिः, **'कर्मोपरि अस्याक्षाणीन्द्रियाणि वर्तन्त इत्यप्यध्यक्षः'** इति तत्त्वप्रदीपोक्तेः । **'सर्वभूताधिवासः'** सर्वप्राणिनामाश्रयः । सर्वं साक्षादीक्षते पश्यतीति **'साक्षी'** । ईक्षणं च न प्राकृतं, किन्तु चैतन्यस्वरूपमित्याह – **'चेता'** ज्ञानरूप इति । **'केवलः'** जडामिश्रः समाभ्यधिकशून्य इति वा **'केवलं तादृशाभावात्'** इति द्वितीयतात्पर्योक्तेः । केवलं चैतन्येनेक्षणमसम्प्रज्ञातसमाधिस्थस्य योगिनोऽपि भवतीति तद्व्यावर्तनायाऽह **निर्गुण** इति । सत्त्वादिगुणबन्धहीन इत्यर्थः । प्राकृतगुणहीन इति वा । इतिशब्दस्य **'श्रुतौ निर्गुणस्य'** इति पदद्वयाध्याहारेण श्रुतत्वादिति सूत्रेणान्वयः ॥

अत्र वाच्यत्वं प्रतिपादयत् सूत्रं तदुपात्तश्रुत्युदाहरणपूर्वकं पठति – **एक इति ॥** इति क्वाचित्कटीकापाठानुसारेण भाष्ये क्वचित् श्रुतिपाठानन्तरं सूत्रपाठो दृश्यते । तत्पक्षे त्वन्वयः सुलभ एवेति ध्येयम् ॥

न ह्यशब्दः श्रूयते । न चाप्रसिद्धं कल्प्यम् ।
सर्वशब्दावाच्यस्य लक्षणाऽयुक्तेः ॥ ५ ॥

॥ इतीक्षत्यधिकरणम् ॥

श्रुतत्वेऽप्यशब्दः किं न स्यादित्यप्रयोजकत्वशङ्कायामाह - **न हीति ॥** **'हि'** यतः **'अशब्दः'** अवाच्यः पदार्थो **'न श्रूयते'** न श्रुतिपदेनोच्यत इत्यर्थः । अतो नाप्रयोजकत्वं हेतोरिति वाक्यशेषः । विरोधादित्यपि हिशब्दार्थः ॥

नन्वशब्दस्यापि ब्रह्मणो लक्षणया श्रुतत्वं किं न स्यादित्यत आह - **न चेति ॥** **'अप्रसिद्धम्'** अवाच्यस्य ब्रह्मणो लक्ष्यत्वं न कल्प्यमित्यर्थः । कुतः ? यतोऽवाच्यस्य वस्तुनो लक्ष्यत्वमप्रसिद्धम् अत इति व्याप्तिपरत्वेनापीदं योजनीयम् । ननु कथमेतत् ? गङ्गापदावाच्यस्यापि तीरस्य तत्पदलक्ष्यत्वप्रसिद्धेरित्यत उक्तं – **सर्वेति ॥** **'सर्वशब्दावाच्यस्य'** ब्रह्मणो लक्षणायाः वेदपदलक्ष्यत्वस्यायुक्तेः [१]विप्रतिपन्नं न लक्ष्यं, केनापि पदेनावाच्यत्वाद् व्यतिरेकेण तीरवदिति युक्तिविरुद्धत्वादित्यर्थः । तथा च - नास्माभिः केवलावाच्यत्वेन लक्ष्यत्वाभावः साध्यते । येन तीरादौ व्यभिचारः शङ्क्येत, किन्तु सर्वशब्दावाच्यत्वेन । तच्च न तीरादिगतं, तस्य तीरादिपदवाच्यत्वात् । ब्रह्म तु न तथा, तस्य सर्वशब्दावाच्यतयैव परेणाङ्गीकृतत्वात् । अतो न व्यभिचार इति युक्तिविरोधो दुष्परिहर इति भावः । ननु लक्ष्यत्वाभाववति प्रवाहादौ हेत्वभावादसाधारणमिति चेत् - न । लक्षणायोग्यस्यैव लक्ष्यपदार्थत्वे सर्वपदार्थानामपि किञ्चित्पदलक्षणायोग्यत्वेन तदभावरूपसाध्यस्य कुत्राप्यभावेन सपक्षस्यैवाभावात् ॥ ११ ॥

॥ इतीक्षत्यधिकरणम् ॥

---

१. **'विप्रतिपन्नमलक्ष्यम्'** – म.

॥ ६. अथाऽनन्दमयाधिकरणम् ॥

(आनन्दमयस्य ब्रह्मत्वसमर्थनम्)

तमेव समन्वयं प्रकटयति 'आनन्दमयोऽभ्यासात्' इत्यादिना समस्तेनाध्यायेन प्रायेण [१] ॥

अथाध्यायपादयोरुपोद्घातत्वेन पीठरूपायामस्यां पञ्चाधिकरण्यां ब्रह्मस्वरूपनिरूपणेऽनवशेषात् किमध्यायात्मकशेषग्रन्थेनेत्यत आह - **तमेवेति ॥** तथाऽपीत्यादौ योज्यम् । समन्वयशब्दश्च विपरिणामेनाऽवर्तनीयः । तथा च – तथाऽपि प्रकटनं विनाऽध्यायाख्यशेषग्रन्थस्य कृत्यान्तराभावेऽपि **'तमेव' 'तत्तु समन्वयात्'** इत्यनेन हेतुतया सामान्यतः सिद्धवदुपन्यस्तमेव समन्वयात् **'समन्वयम्'** उपक्रमादिलिङ्गज्ञाप्यं सम्यग्वचनवृत्त्या सर्वशास्त्रीयवचनानां हरौ निरूपणं तत्परत्वं **'प्रकटयति'** प्रतिवाक्यग्रहणेन तद्धेतूपन्यासादिना प्रपञ्चयति **'आनन्दमयोऽभ्यासात्'** इत्यादिना अनेन प्रथमेनाध्यायेन सूत्रकार इत्यर्थः । अन्यथा प्रतिज्ञामात्रस्य **'तदेव शास्त्रयोनि, समन्वयात्'** इति सिद्धवदुपन्यासमात्रस्य [२]साधकत्वे 'विष्णोरन्यदेव शास्त्रयोनि, कुतः ? समन्वयात् सम्यक्तात्पर्यविषयत्वात्, तथा अन्यदेव तात्पर्यविषयः, कुतः ? उपक्रमादिलिङ्गात्'[३] इत्यपि [४]प्रतिवादी ब्रूयादिति भावः । यथोपक्रमादिकं तज्ज्ञाप्यं तात्पर्यं च समन्वयशब्दार्थः तथा भाष्यं योजितम् अधस्तात् ॥

यद्यप्यत्र सूत्रस्य प्रतीकत्वेनोत्तरत्रोदाहरिष्यमाणत्वान्नात्राप्युदाहर्तव्यता । तथाऽपि सूत्रानुदाहरणे आनन्दमयाख्यविषयापरिज्ञानात् तस्य विष्णुत्वसमर्थने का पूर्वसङ्गतिरित्येवं शङ्कानुदयात् तन्मूलप्रश्नानुदयाद् आनन्दमया-

१. **'प्रायेण'** इति ह. पाठे. नास्ति । २ .**'असाधकत्वेन'** – म.
३. **'समन्वयात्, उपक्रमादिलिङ्गात्'** – म. ४ **'वादी'** – म.

परिज्ञाने ब्रह्मणस्तदवयवत्वप्रतीतिमुखेनाऽक्षेपरूपशङ्कानुदयाच्च एतदाक्षेपरूपसङ्गतिप्रदर्शनाय [1]चाधिकरणसङ्गतिविषयकशङ्कोत्थापनायात्रापि सूत्रोदाहरणम्, उत्तरत्र तु प्रतीकत्वेनेति द्रष्टव्यम् ॥

अध्यायान्तरव्यावृत्त्यर्थमानन्दमयेत्यादि । प्रथमेनेत्यनुक्त्वा एवंवचनेन एतदधिकरणमारभ्याध्यायारम्भः, पञ्चाधिकरण्यास्तु नाध्यायान्तर्भाव इत्यपि सूचितम् । समन्वयाधिकरणमारभ्यैवाध्यायारम्भः । तस्यैतत्प्रपञ्चत्वादिति पक्षे **'अध्यायेन'** अध्यायशेषेणेत्यर्थः । टीकानुगुण्यं चात्र भवति । आद्यपक्षे त्वध्यायरूपेणेत्यर्थ इत्यविरोधः । चतुर्थपादे न समन्वयः क्रियत इति परमतनिरासाय **'समस्तेन'** समग्रेणेत्युक्तम् । देवतापशूद्राधिकरणयोः समन्वयाकरणात् समस्तेनेत्यनुपपन्नमित्याशङ्कानिराकरणाय **'प्रायेण'** प्राचुर्येणेति ॥

प्राय इति सकारान्ताव्ययपर्यायोऽयमकारान्तः प्रायशब्दः । तस्मात् प्रकृत्यादित्वात् तृतीयायां प्रायेणेति भवति । अत एव विष्णुतत्त्वनिर्णयटीकायां [2]भूमार्थे **'प्रायः'** इत्यव्ययमप्यस्ति इत्यपिशब्दः प्रायोजि । प्रमेयदीपेऽपि सान्तस्यैवाव्ययत्वमुक्तम् ॥

प्रायेणान्यत्रप्रसिद्धानां शब्दानां परमात्मनि समन्वयः प्रदर्श्यतेऽस्मिन् पादे । नान्यथा तदृष्टेः ।

तर्हि अध्यायस्यैकार्थत्वात् पादभेदः किन्निबन्धन इत्यतः समन्वेतव्यभेदात् समन्वयेऽप्यवान्तरभेद इति भावेन प्रथमाध्यायप्रथमपादप्रतिपाद्यं दर्शयति – **प्रायेणेति ॥** **'अस्मिन्'** प्रथमे पादे **'प्रायेण'** बाहुल्येन **'अन्यत्र'**

१. **'एतदधिकरण-' म.**

२. **.'भूमार्थं 'प्रायः' इत्यव्ययपर्यायोऽप्यस्ति' म.**

विष्णोरन्यत्र **'प्रसिद्धानां'** श्रुत्यादितो लोकतो वाऽपाततो रूढत्वेन प्रतीयमानानां नामात्मकानां **'शब्दानां' 'परमात्मनि'** विष्णौ निरुक्तः **'समन्वयः' 'प्रदर्श्यते'** प्रपञ्च्यत इत्यर्थः । अत्रापि अन्तरधिकरणे अन्तःस्थत्वलिङ्गसमन्वयप्रतिपादनाद् अव्याप्तिनिरासाय – **प्रायेणेति ॥** तत्त्वप्रदीपे तु, एक एव भाष्ये प्रायेणेति शब्दः । तस्यैवोत्तरत्रापि सम्बन्ध इत्याशयेन **'प्रायेणान्यत्र प्रसिद्धानां शब्दानामिति च सम्बन्धः'** इत्युक्तम् । तथा – आनन्दमयाधिकरणे लिङ्गविचारात् तदपि प्रायेणेति व्यावर्त्यमिति चोक्तम् । यद्वा – टीकायामप्यावृत्त्यभिप्रायेणैकस्यैव पुनरुत्तरत्राप्यन्वय-प्रदर्शनाय प्रतीकग्रहणं कृतमिति न ग्रन्थवैरूप्यं कल्प्यम् । अत एव तत्त्वप्रदीपानुसारेण 'आनन्दमयनाम्न इति टीकायामानन्दमयनामशब्दः आनन्दादिनामपरो वा योज्यः' इत्युक्तं चन्द्रिकायाम् ॥

अथ परोक्तं पादार्थं दूषयति – **नेति ॥ 'अन्यथा'** प्रथमे स्पष्टब्रह्मलिङ्गानां शब्दानां, द्वितीयतृतीययोरस्पष्टब्रह्मलिङ्गानां समन्वयः प्रतिपाद्यते । तयोस्तु सविशेषनिर्विशेषविषयतया भेदः । चतुर्थपादे तु प्रधानस्याशब्दत्वोक्तिरित्येवंरूपोऽस्मदुक्तादन्यप्रकारेण पादार्थो न वाच्य इत्यर्थः । कुतो नेत्यत आह - **तदिति ॥ 'तस्य'** परोक्तपादार्थनियमस्य **'अदृष्टेः'** एतदध्यायगतपादेष्वदर्शनादित्यर्थः । सर्वसाङ्कर्यादिति भावः । तच्च टीकादावुक्तम् ॥

(सङ्गतिप्रदर्शनम्)

ब्रह्मजिज्ञासा कर्तव्येत्युक्तम् । तच्च 'ब्रह्म पुच्छं प्रतिष्ठा' *(तै. २-५-२.)* **इत्यानन्दमयावयवरूपं प्रतीयते । न ह्यवयविनं विना अवयवमात्रस्य ज्ञेयतेत्यत आह -**

सू - ॐ ॥ आनन्दमयोऽभ्यासात् ॥ ॐ ॥ १२ ॥

नन्वानन्दमयाधिकरणमारभ्य सर्वेषामधिकरणानामवश्यवक्तव्ये सङ्गति-पञ्चकेऽस्मिन्नधिकरणे लोकतोऽन्यत्रप्रसिद्धानन्दमयशब्दोपलक्षितगुणिवाचि-शब्दानामानन्दादिगुणवाचिशब्दानां च ब्रह्मणि समन्वयकरणाद् अस्यास्तु शास्त्रेऽध्याये पादे चान्तर्भावरूपा सङ्गतिः । तथाऽप्यानन्दमयस्य विष्णुत्व-समर्थने का पूर्वसङ्गतिरित्यतोऽव्यवहितपूर्वाधिकरणेनैव सङ्गतिर्वक्तव्येति नियमाभावाद् व्यवहितपूर्वेण जिज्ञासाधिकरणेन तद्विषयेण चास्याऽनन्तर्य-लक्षणलक्षितामाक्षेपिकीं सङ्गतिं तावद् दर्शयति – **ब्रह्मेति ॥ 'उक्तं'** जिज्ञासाधिकरण इति शेषः । **तच्चेति ॥** यज्जिज्ञास्यतया प्रतिज्ञातं ब्रह्म तदेवेत्यर्थः । यद्वा – प्रकृतानुसन्धानार्थश्चशब्दः । इतीत्यनन्तरं **'श्रुतौ'** इति शेषः । **आनन्दमयावयवरूपमिति ॥** आनन्दमयाख्यस्य कस्यचित् पुच्छाख्यावयवभूतं प्रतीयत इत्यर्थः । ननु ब्रह्मणोऽवयवत्वोक्तावपि किमर्थमानन्दमयस्य विष्णुत्वसमर्थनमित्यत आह – **न हीति ॥ हिशब्दो हेतौ ॥ 'अत'** इत्यावर्तते । **'तच्च'** इत्यादि **'इत्यत आह'** इत्यन्तं सङ्गतिप्रयोजनोभयपरतया व्याख्येयम् । न हीत्येतत् तदुपपादकम् ॥

योजना तु – यतो **'ब्रह्म पुच्छं प्रतिष्ठा'** इति श्रुतौ जिज्ञास्यतयोक्तं ब्रह्म आनन्दमयाख्यस्य कस्यचिदवयवरूपं **'प्रतीयते'** उच्यते यतश्च अन्याङ्गतया जिज्ञास्यत्वेऽपि **'अवयविनम्'** आनन्दमयं विना **'अवयवमात्रस्य'** अवयवस्यैव केवलस्य ब्रह्मणो न पृथक् **'ज्ञेयता'** जिज्ञास्यता सम्भवति । अमुख्यत्वात् । नापि जिज्ञासाया एव त्यागो युज्यते । **'तद् विजिज्ञासस्व'** (तै. उ. ३-१.) इति श्रुतिविहितत्वादित्येवं शङ्का प्राप्ता । अतः शङ्कारूपसङ्गतिसद्भावाद् अत्राऽनन्दमयस्य विष्वन्यत्वपक्षे ब्रह्मजिज्ञासा-क्षेपाद् विष्णुत्वपक्षे च तत्समाधानाद् एवं च पूर्वपक्षसिद्धान्तयोः फलसद्भावाच्च **'अतो'** ब्रह्मजिज्ञासासिद्ध्यर्थम् **'आनन्दमयोऽभ्यासात्'** इत्यानन्दमयस्य विष्णुत्वम् **'आह'** समर्थयति सूत्रकार इति ॥

'तस्माद्वा एतस्माद् विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमयः। तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा' (तै.उ. २-५-२.) इति तैत्तिरीयवाक्यस्यायमर्थः । **'तस्मात्'** आत्मपदोदितात् **'एतस्मात्'** जीवशरीरगताद् विज्ञानपूर्णत्वाद् विज्ञानमयशब्दवाच्याद् विष्णोरनन्योऽप्यन्यशब्दोक्तः **'आनन्दमयः'** आनन्दपूर्णत्वादानन्दमयशब्दवाच्यः **'आत्मा'** नारायणः **'अन्तरः'** विज्ञानमयस्यान्तःस्थितः **'तेन'** आनन्दमयेन **'एषः'** विज्ञानमयशब्दवाच्यो वासुदेवः **'पूर्णः'** निश्छिद्रत्वेन पूरितः । वैशब्दः प्रसिद्धौ । **'स एष'** आनन्दमयः **'पुरुषविध एव'** पुरुषाकार एव । **'तस्य'** आनन्दमयस्य शरीरस्थानीयस्य पुरुषाकारताम् **'अनु'** अनुसृत्य **'अयं'** विज्ञानमयः शरीरस्थानीयः **'पुरुषविधः'** तस्मात् प्रादुर्भूतः,

'उत्तरैः पूरिताः पूर्वे निश्छिद्रत्वेन सर्वशः ।
सर्वेऽपि पुरुषाकारा उत्तरात् पूर्वसम्भवः ॥' इति तैत्तिरीयभाष्योक्तेः ॥

'तस्य' आनन्दमयस्य विष्णोरवयवभूतं **'परेयं प्रियनामकम्'** इति भाष्योक्तेः । परैरुत्तमैः देवैः प्राप्यत्वात्प्रियशब्दवाच्यं यत् सुखं तत् तस्य 'शिरः' तदेवाऽनन्दमयाख्यस्य जीवशरीरस्य परैरन्यैरुपकर्तृभिः प्राप्यत्वात् प्रियनामकमुपकारजन्यवैषयिकसुखाख्यं यच्छिरः तत्स्थं च । एवमानन्दमयाख्यस्य विष्णोः ये दक्षिणोत्तरबाहुमध्यदेहाः मोदप्रमोदकारित्वानन्दत्वनिमित्तैर्मोदप्रमोदानन्दनामानस्ते आनन्दमयाख्यजीवशरीरस्य दक्षिणोत्तरपक्षात्मनामानो दक्षिणसव्यबाहुमध्यदेहाः । **'मोदो'** भोगनिमित्तकः **'प्रमोदः'** 'तद्विशेषोत्थः' इत्यैतरेयभाष्योक्तेः ॥

'मुन्नाम विषयोत्थं यत् प्रकृष्टविषयात् प्रमुत् ।
सुखं स्वरूपभूतं यदानन्द इति कथ्यते ॥'

इति बृहद्भाष्योक्तेश्च । अपकृष्टविषयोद्भूतत्वप्रकृष्टविषयोत्थत्वजीवस्वरूपानन्दत्वनिमित्तैर्मोदप्रमोदानन्दनामानस्तेषु स्थिताश्च ॥

एवमानन्दमयाख्यस्य विष्णोः **'पुच्छं'** प्रतिष्ठति गच्छति लोक आभ्यामिति व्युत्पत्त्या प्रतिष्ठापदोक्तो यः पादाख्योऽवयवः तद् ब्रह्म **'ब्रह्मसृष्ट्या तु बृंहयेत्'** इति तैत्तिरीयभाष्योक्तरीत्या सृष्ट्यादिक्रियया विश्वगुणवृद्धिकरत्वाद् ब्रह्मशब्दवाच्यः स एवाऽनन्दमयाख्यजीवशरीरस्य यत् पुच्छं यः पादाख्योऽवयवः तत्स्थिते ब्रह्माख्ये प्रधानवायौ स्थितः ॥ [१]अनेन कोशावयवस्य ब्रह्मशब्दवाच्यत्वं ब्रह्मशब्दवाच्यप्रधानवाय्वधिष्ठानत्वनिमित्तं, प्रधानवायोर्ब्रह्मशब्दवाच्यत्वं तु परब्रह्माधिष्ठानत्वादित्युक्तं भवति ॥

अनेनाऽनन्दमयादिशब्दवाच्यस्य विष्णोरवयवभूता ये प्रियादयस्ते विष्ण्वभिन्नाः ये चाऽनन्दमयादिजीवकोशावयवाः प्रियादयस्ते प्रतिशरीरं भिन्ना इति द्विविधाः प्रियादय इत्युक्तं भवति । यथोक्तं चन्द्रिकायाम् – ये जीवाभिमन्यमानानन्दमयादिकोशावयवाः प्रियादयस्ते प्रतिशरीरं भिन्नाः, न ते आनन्दमयाद्याख्यस्य विष्णोरवयवाः । ये च भगवतोऽवयवाः प्रियादयो न ते प्रतिशरीरं भिन्नाः किन्त्वभिन्ना इति जीवस्वरूपस्याऽनन्दस्य हृदयाख्यमध्यगतत्वात् कोशमध्यदेहत्वं स्वरूपदेहस्य जडावयवत्वं चामुख्यं युज्यते ॥

यद्यपि भाष्ये 'शिरो नारायणः' इत्युदाहरिष्यमाणवचनपर्यालोचनयाऽऽनन्दमयाख्यो नारायणः पुनर्नारायणादिरूपेण पञ्चधा भिन्नः शिरःप्रभृत्यवयवात्मना तिष्ठतीति प्रतीयते । तैत्तिरीयभाष्ये तु – प्रियादीनामानन्दमयावयवत्वम् । तथाऽपि प्रियादिसुखविशेषदेहस्थितब्रह्माख्यप्रधानवायुगतानां नारायणादिरूपाणामेवाऽनन्दमयाख्यविष्णववयवत्वसम्भवात् तेषामेव–

'परेयं प्रियनामकम् ।

---

१. 'तेन कोशा-' म.

मोदप्रमोदनामानौ मोदनाच्च प्रमोदनात् ।
देहस्थवायुसंस्थं च ब्रह्म सृष्ट्या तु बृंहयेत् ॥'
इति तैत्तिरीयभाष्योक्तरीत्या प्रियादिशब्दवाच्यत्वस्यापि सम्भवान्न विरोधः ॥

तत्त्वप्रदीपे तु – प्रियशिरस्त्वादिनये **'श्रवणोत्थं प्रियं, दर्शनोत्थो मोदः, भोगोत्थः प्रमोदः'** इति पदत्रयस्यार्थान्तरमुक्तम् । तथा तत्रैव **'अभावं बादरिः'** इति सूत्रेण **'प्रियाप्रिये'** (छां.८-१२-१) इति श्रुतिस्थप्रियशब्देन **'परेयं प्रियनामकम्** इति तैत्तिरीयछान्दोग्यभाष्ययोरुक्तत्वात् परप्राप्यसुखसामान्यवाचकेन प्राकृतं सुखं ग्राह्यमिति सूचितम्' इति चोक्तम् ॥

इदं त्ववधेयम् – परिदृश्यमानमन्नमयं शरीरम् । तदन्तः प्राणमयो देहः । तदन्तर्मनोमयो देहः । तदन्तर्विज्ञानमयो देहः । तदन्तरानन्दमयोऽस्ति । एतेषु पञ्चसु देहाख्यकोशेषु तत्तच्छब्दवाच्यानि पुरुषाकाराण्यनिरुद्धप्रद्युम्नसङ्कर्षणवासुदेवनारायणरूपाणि देहदेहिभावेन वर्तन्त इति ॥

(पूर्वपक्षः)

आनन्दमयो ब्रह्मादिः प्रकृतिर्विष्णुर्वा । ब्रह्मशब्दाद्धिरण्यगर्भस्य प्राप्तिः । शतानन्दनाम्ना च ॥

अत्र सयुक्तिकं पूर्वपक्षानाह – **ब्रह्मशब्दादिति** ॥ आनन्दमयमधिकृत्योदाहृते **'अस्ति ब्रह्मेति चेद् वेद'** (तै.उ. २-६-१.) इत्यादौ श्रुताद् ब्रह्मशब्दादित्यर्थः । ब्रह्मशब्दस्यान्यत्रापि वृत्तेः कथं तेन चतुर्मुखस्याऽनन्दमयत्वनिश्चय इत्यतो युक्त्यन्तरमाह – **शतेति** ॥ चोऽप्यर्थे समुच्चये । **'ते ये शतं प्रजापतेरानन्दाः, स एको ब्रह्मण आनन्दः'** (तै.उ. २-८-४.) इति वाक्यादर्थात् सूचितेन शतानन्दनाम्नेत्यर्थः । यद्वा – आनन्दमयशब्दसमानार्थकेन हिरण्यगर्भे विद्यमानेन शतानन्दनाम्नेत्यर्थः । **'प्राप्तिः'** आनन्दमयत्वस्येति शेषः । तथा च – हिरण्यगर्भस्याऽनन्दमयत्वस्य प्राप्तिरित्यन्वयः ॥

एवं सङ्गतिं फलं चोक्त्वा विषयसंशयौ दर्शयति – **आनन्दमय इति ॥** आनन्दमय इत्युपलक्षकपदेन विषयो दर्शितः । ब्रह्मादिरित्यत्र ब्रह्मा आदिर्यस्य जीवसङ्घस्येति विग्रहः । ब्रह्मा चतुर्मुखः, आदिशब्देन रुद्रेन्द्रबृहस्पतिमुखा देवास्तत्तद्देहगतजीवाश्च गृह्यन्ते । प्रकृतिशब्देन च चित्प्रकृतिः । **'इति संशयः'** इति शेषः ॥

अष्टमूर्तित्वात् सूर्ये प्रोक्तत्वाच्च रुद्रस्य । एवमन्येषामपि ॥ [१]

एवमेकं पूर्वपक्षमभिधाय अन्यमाह – **अष्टमूर्तित्वादिति ॥** चशब्दो रुद्रस्य चेति सम्बध्यते । प्राप्तिरित्यस्यानुकर्षणार्थो वा । तथा च - रुद्रस्य चाऽनन्दमयत्वप्राप्तिः । कुतः ? सूर्ये प्रोक्तत्वात् । **'यश्चासावादित्ये'** (तै.उ. २-८-५) इत्यानन्दमयस्य सूर्ये स्थितेरुक्तत्वाद् रुद्रस्य च सूर्याद्यष्टशरीरत्वादित्यर्थः । तथा च – रुद्रलिङ्गस्य आनन्दमये श्रुतत्वाद् आनन्दमयो रुद्र एवेति भावः । रुद्रस्य सूर्याद्यष्टप्रतिमत्वं च –

'सूर्यो जलं मही वह्निर्वायुराकाश एव च ।
दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात् ॥' इति विष्णुपुराणवाक्यात् सिद्धम् ॥

पूर्वपक्षान्तरं दर्शयति – **एवमिति ॥** उक्ताभ्याम् **'अन्येषाम्'** इन्द्रबृहस्पत्यादीनामपि **'एवम्'** उक्तप्रकारेण स्वावरसूर्याद्यधिष्ठातृत्वादिनाऽऽनन्दमयत्वप्राप्तिरित्यर्थः ॥

'मम योनिर्महद् ब्रह्म' *(भ. गी. १४-३.)*
इति ब्रह्मशब्दात्, बहुभावाच्च प्रकृतेः ॥

---

१. **'अपि'** इति शब्दः ह. पाठे नास्ति ।

सयुक्तिकं पूर्वपक्षान्तरमाह – **ममेति** ॥ योजना तु चित्प्रकृते-र्वाऽनन्दमयत्वप्राप्तिः । कुतः ? ब्रह्मशब्दात् । आनन्दमये श्रुतस्य ब्रह्मशब्दस्य **'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्'** इति गीतायां चित्प्रकृतौ प्रयोगादिति । स्मृतौ – महद् ब्रह्मेति भिन्ने पदे । तथा च महद्ब्रह्मशब्दवाच्या लक्ष्मीः मम योनिः गर्भाधानार्थं भार्या । तस्मिन् ब्रह्मणि प्रकृतावहं गर्भं दधामि दध इत्यर्थः । अर्जुनं प्रति कृष्णवाक्यमेतत् ॥

कथं सावकाशेन ब्रह्मशब्देन प्रकृतेरानन्दमयत्वनिश्चय इत्यतो हेत्वन्तरमाह – **'बहुभावात्'** बहुरूपत्वाच्चेति । चो हेतुसमुच्चये । तथा च **'सोऽकामयत । बहु स्याम्'** (तै.उ.२-६-२) इत्यानन्दमयस्य **'बहुभावात्'** बहुभावश्रवणात् तदभिमानित्वाच्चित्प्रकृतेः स्वाभिमन्यमानविकारिजडद्वारा बहुभावसम्भवादित्यर्थः । एवं प्रकृतेरित्यस्य जडप्रकृतेरित्यर्थाश्रयेण पूर्वपक्षान्तरमपि द्रष्टव्यम् । योजना तु जडप्रकृतेर्वाऽनन्दमयत्वप्राप्तिः । कुतः ? अभिमानित्वेन विना साक्षाद् बहुभावादेवेति ॥

'बृह जातिजीवकमलासनशब्दराशिषु' इति ब्रह्मशब्दादेव सर्वजीवानाम्, अन्नमयत्वादेश्च ॥

सयुक्तिकं पूर्वपक्षान्तरमाह – **बृह जातीति** ॥ तत्तद्देहगतसर्वजीवानां वाऽऽनन्दमयत्वप्राप्तिः । कुतः ? जीवानां ब्रह्मशब्दात् । जीववाचि-ब्रह्मशब्दादित्यर्थः । न तत्र पृथग्घेतुर्गवेषणीय इत्येवशब्दार्थः । कुतो ब्रह्म-शब्दस्य जीववाचित्वमित्यत उक्तम् – **बृह जातीति** ॥ बृहधातुः जात्यादिषु वर्तत इत्यर्थः । इतीत्यनन्तरं धातुव्याख्यानादिति शेषः । ब्रह्मशब्दस्य साधारणत्वादनिश्चायकत्वमित्यत आह – **अन्नमयत्वादेश्चेति** ॥ इदं चाऽवर्तते, तत्र द्वितीयो विपरिणम्यते । आदिशब्दो भिन्नक्रमः । तेन प्राणादिकं गृह्यते । यथाक्रमश्च चशब्द उक्तानुक्तहेतुसमुच्चये । तथा च – न

केवलं ब्रह्मशब्दात्, किन्तु, यतो जीवानाम् **'अन्नरसमयः' 'प्राणमयः'** इत्युक्तान्नादिमयत्वाद् अन्नादिविकारदेहाद्यभिमानित्वादन्नमयत्वादि प्राप्तम् । अतस्तत्प्रायपठितत्वाच्चाऽनन्दमयत्वप्राप्तिरिति योजना । अत्र हिरण्यगर्भादीनां जीवत्वेऽपि देवत्वविवक्षया पृथगुक्तिः । अत एव तत्त्वप्रदीपे– **'ब्रह्मादिर्यस्य देवतासङ्घस्य'** इत्यपि ब्रह्मादिरित्यस्य विग्रहो दर्शितः । तत्रापि हिरण्यगर्भरुद्रयोरतिप्रसिद्धत्वाद् वक्ष्यमाणक्रमेण पृथगुक्तिः । अथेन्द्रादीनां **'ब्रह्मा शिवः सुरेशाद्याः'** इति वचनोक्तक्रमेण क्षरदेवोक्त्यनन्तरमक्षरायाः प्रकृतेरुक्तिः। अथात्यल्पप्रतिभानत्वाद् दृश्यमानदेहाभिमानिजीवानामिति ध्येयम् ॥

(सिद्धान्तः)

तथाऽपि न त आनन्दमयशब्देनोच्यन्ते । किन्तु विष्णुरेव ।

'तदेव ब्रह्म परमं कवीनाम्' *(महाना. १-६.)*

'एतमेव ब्रह्मेत्याचक्षते' *(ऐ.आ. ३-२-३-१२.)*

सिद्धान्तयति – **तथाऽपीति** ॥ यद्यप्येवमन्येषां प्राप्तिः, तथाऽपि अत्र ये आनन्दमयशब्देनोच्यन्ते न ते हिरण्यगर्भादय इत्यर्थः । कस्तर्हीत्याशङ्कते- **किन्त्विति** ॥ उत्तरमाह – **विष्णुरेवेति** ॥ य उच्यते स विष्णुरेवेत्यन्वयः[1]। अनेनोदाहृतानन्दमय इति सूत्रप्रतिज्ञाभागस्य सङ्गत्यर्थमन्वयार्थं समन्वयसूत्रोदाहृतो विधेयसमर्पकः **'तत्तु'** इति प्रतिज्ञाभागो व्याख्यातो भवति । कुत आनन्दमयो विष्णुरेवेत्यतः प्रवृत्तं सौत्रं हेतुं व्याचष्टे – **तदेवेति** ॥ इत्यादिषु वाक्येषु तस्मिन् विष्णावेव प्रसिद्धस्य मुख्यार्थत्वेनोक्तस्य ब्रह्मशब्दस्य तस्मिन्नानन्दमये आनन्दमयं प्रत्युदाहृते **'असन्नेव'** इति श्लोके **'अभ्यासात्'** असकृच्छ्रवणादित्यर्थः । अभ्यासादित्यनन्तरं **'विष्णौ तात्पर्यावगमात्'** इति शेषः । अप्रयोजकत्वशङ्कावारणाय ब्रह्मशब्दस्यान्यत्र निरवकाशत्वज्ञापनाय

---

१. **'-रेवेत्यर्थः' - म.**

तस्मिन् प्रसिद्धेति एवेति चोक्तम् । आदिशब्देन **'परमं यो महद् ब्रह्म' 'वासुदेवात् परः को नु ब्रह्मशब्दोदितो भवेत्'** इति वाक्यं गृह्यते ॥

तदेवेति श्रुत्यर्थस्तु जिज्ञासानयेऽभिहितः ॥ **'एतमेव'** इति श्रुत्यर्थः सर्वत्राधिकरणे वक्ष्यते ॥

'ब्रह्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते ।
असम्पूर्णाः परे यस्मादुपचारेण वा भवेत् ॥',
'ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ।' *(भागवत १-२-११)*
'वासुदेवात्मकं ब्रह्म मूलमन्त्रेण वा यतिः ।' *(व्यासस्मृति)*
इत्यादिषु तस्मिन्नेव प्रसिद्धब्रह्मशब्दाभ्यासात् ।

'ब्रह्मशब्दः' इति स्मृतौ **'परे'** पूर्णे इति हेतुगर्भविशेषणम् । वाशब्दोऽवधारणे । तथा च यतो विष्णुः परः, अतः **'परे'** विष्णावेव ब्रह्मशब्दो मुख्यतया **'इष्यते'** अङ्गीक्रियते प्रामाणिकैः । न तु विष्णोः **'अन्यत्र'** हिरण्यगर्भादिष्वपीत्यर्थः । कुत इत्यतस्तेषां ब्रह्मशब्दमुख्यार्थत्वाभावे हेतुमाह – **'परे'** अन्ये यस्मादसम्पूर्णा इति । तर्हि **'तस्मादेतद्**[1] **ब्रह्म नाम रूपमन्नं च जायते'** (मु.१-१-९) **'द्वे ब्रह्मणी वेदितव्ये'** (मैत्रि.उ. ६-२२.) **'ब्रह्माणि जीवाः सर्वेऽपि'** इत्यादौ ब्रह्मशब्दस्तेषु कथमिष्यत इत्यत आह - क्वचिद-न्यत्रेष्टोऽपि ब्रह्मशब्दः **'उपचारेण'** परममुख्यवृत्त्यन्यमुख्यवृत्त्यैव भवेदिति ॥

'ब्रह्म' इति भागवतस्मृत्यर्थः प्रागेवोक्तः । मध्ये आत्मपदोपेतसाधारणस्मृत्युपादाननिमित्तं त्वभ्यासादित्यस्य **'अन्योऽन्तर आत्मा'** (तै.उ.२.२.१) इत्यादौ ब्रह्मवाचकात्मशब्दाभ्यासादित्यप्यर्थो वर्णनीय इति ज्ञापनमित्युक्तं चन्द्रिकायाम् ॥

---

१. 'तदेतद्' – म.

'वासुदेवात्मकम्' इति व्यासस्मृतिवाक्यं तु **'बुद्ध्याऽविहिंसन् पुष्पैर्वा प्रणवेन समर्चयेत्'** इति पूर्ववाक्येन सह योजनीयम् । अत्र हि वासुदेवात्मकं ब्रह्मेत्यादेर्भगवान् ब्रह्मेति प्रतीयत इति न्यायदीपोक्तेः । **'यतिः' 'वासुदेवात्मकं'** कृष्णाख्यं ब्रह्म **'बुद्ध्या'** मनसा समर्चयेदित्यनेन यतीनां मानसपूजोच्यते पुष्पाद्यैर्वा समर्चयेद् इत्यनेन कायिकपूजा । **'अविहिंसन्'** कस्यापि हिंसां हानिमकुर्वन्निति तेषां सामान्यधर्मोक्तिः । अनेन यतीनां वैष्णवत्वप्रयुक्तात् तुलसीपुष्पाद्याहरणरूपाद् वैशेषिकाद् धर्मादहिंसालक्षणः सामान्यधर्म एव बलवानित्युक्तं भवति । यथोक्तं बृहद्भाष्ये – **'सामान्यधर्मो बलवान् धर्माद्वैशेषिकाद्यतः'** इति । **'प्रणवेन'** ओङ्कारेण **'मूलमन्त्रेण'** अष्टाक्षरेण वा समर्चयेदित्यनेन वाचिकपूजोच्यत इति ज्ञातव्यम् ॥

ॐ ॥ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ॐ ॥१३ ॥

विकारात्मकत्वात् तदभिमानित्वाच्च युज्यते प्रकृत्यादीनां मयट्छब्दः । न तु परमात्मनः इति मा भूत् । प्रचुरानन्दत्वाद्ध्यानन्दमयः । न तु तद्विकारत्वात् ॥

उक्तमाक्षिप्य समादधत् सूत्रं पठित्वाऽऽक्षेपांशं व्याचष्टे –**विकारेति ॥** अत्र चो हेतुसमुच्चये । प्रकृतिशब्देन चिदचित्प्रकृती गृह्येते । आदिशब्देन जीवा गृह्यन्ते । प्रकृत्यादय इति च विपरिणम्यते । नञ् आवर्तते । आनन्दमय इत्यस्ति, किं तु विष्णुरिति च । तुशब्दो विशेषार्थोऽवधारणार्थे च । तथा च – आनन्दमयो न विष्णुः, किन्तु, प्रकृत्यादय एव । कुतः ? यतोऽत्र **'विकारशब्दो'** विकारार्थकमयट्छब्दो **'युज्यते'** प्रयुज्यते । स च यतो विकार-तदभिमानित्वाभ्यामेव **'युज्यते'** प्रवर्तते । अतः प्रकृत्यादीनामेव युज्यते । कुतः ? जडप्रकृतेर्विकारात्मकत्वाच्चेतनप्रकृत्यादीनां च विकाराभिमानित्वात् । न तु परमात्मनः, तस्याविकारित्वादनभिमानित्वाच्चेति योजना । **'इति चेन्न'** इत्यंशं व्याचष्टे – **इति मा भूदिति ॥** शङ्केति शेषः ॥

कुत इत्यतः प्रवृत्तं सौत्रं हेतुं व्याचष्टे – **प्रचुरेति** ॥ आनन्दमयः कथ्यत इति शेषः । हिशब्दो हेतौ । तुशब्दोऽवधारणार्थः । तथा च **'हि'** यतः **'आनन्दमयः'** पदार्थः **'प्रचुरानन्दत्वात्'** पूर्णानन्दत्वाच्च निमित्तादेवाऽनन्दमयपदेन कथ्यते **'न तद्विकारत्वात्'** आनन्दविकारत्वादत इति शङ्का मा भूदिति योजना । मयट्छब्दस्य प्राचुर्यरूपार्थान्तरमपेक्ष्य प्रवृत्तत्वेन तद्विरोधाभावादिति भावः । मयडित्याख्यप्रत्ययस्य प्राचुर्यार्थत्वं च **'तादात्म्यार्थे विकारार्थे प्राचुर्यार्थे मयट् त्रिधा'** इति वचनात् सिद्धमित्यपि हेरर्थः । यद्यपि श्रुतिसूत्रगतानन्दमय इति व्याख्येयपदस्य तद्धितान्तस्यार्थकथनाय तदनुकूलतया आनन्दः प्रचुरो यस्मिन् स आनन्दप्रचुरः इति समासः कार्यो न तद्विपरीतः प्रचुर आनन्दोऽस्मिन् स प्रचुरानन्द इति । तथाऽप्यानन्दमय इति तद्धितवृत्त्यननुगुणानन्दप्रचुर इति समासवाक्याभिधाने ब्राह्मणप्रचुरो ग्राम इतिवदनानन्दस्यापि प्राप्तेस्तद्वारणाय प्रचुरानन्द इति विपरीतसमासः कृतः ॥

केचित्तु - सूत्रे प्राचुर्यादित्युक्तत्वादानन्दस्येत्यर्थलब्धं, तथा चैतद्वाक्यानुसारेणाऽनन्दप्रचुरत्वादिति समासवाक्यप्रयोगः कार्यो यद्यपि, तथाऽपि उक्तप्रयोजनाभिप्रायेण प्रचुरानन्दत्वादिति सौत्रव्यासवाक्यविपरीतसमासः कृत इत्याहुः । तन्न,**'आनन्दप्रचुर इति यथास्थिताभिधाने'** इत्यादिटीकाविरोधात्। यद्यप्यानन्दमय इति श्रुतिसूत्रानुसारेण प्राचुर्यस्य विशेष्यत्वेनोक्तावपि नानानन्दप्राप्तिः, प्रकाशप्रचुरो रविरित्युक्तेऽपि सवितर्यन्धकारलेशाप्रतीतेः । तथाचाऽनन्दप्रचुरत्वादित्येव व्याख्यातुमुचितम् । प्राचुर्यस्य व्यधिकरणसजातीयजैवानन्दाल्पत्वेनापि निरूपयितुं शक्यत्वात् । तथाऽपि प्राचुर्यस्य विशेषणतायामनानन्दाप्राप्तेः परैरपि स्वीकृतत्वाद् विशेष्यतायां तु तस्य समानाधिकरणविजातीयाल्पत्वनिरूप्यत्वाद् ब्राह्मणप्रचुरो ग्राम इत्यादाविव तत्प्राप्तिरेवेत्यङ्गीकृतत्वादुभयवादिसिद्ध्यनुसारेणैव व्याख्यातव्यत्वात् तदभिप्रायेण प्रचुरानन्दत्वादिति व्याख्यातं भाष्ये इत्युक्तं चन्द्रिकायाम् ॥

अन्नादीनां च प्राचुर्यमेव । 'अद्यतेऽत्ति च' *(तै. उ.२-२.)*
इति व्याख्यानात् तत्प्राचुर्यं च युज्यते ।

ननु नायमानन्दमयशब्दः प्रचुरानन्दतामभिधत्ते । किन्तु विकारार्थत्वमेव। अन्नादिविकारार्थान्नमयादिशब्दैः सह पठितत्वादित्यत आह – **अन्नादीनां चेति ॥** इदं चाऽवर्तते । मयट्छब्द इति चानुवर्तते । तेन समुच्चयार्थचशब्दस्यान्वयः । वाच्यवाचकयोरभेदव्यपदेशः । तथा च न केवलमानन्दस्य मयट्छब्दः, किन्त्वन्नादीनां सम्बन्धिमयट्छब्दोऽप्यन्नादीनां प्राचुर्यमेव वक्तीत्यर्थः। एवशब्दो विकारार्थताव्यावृत्त्यर्थः । आदिशब्देन प्राणादयो गृह्यन्ते । पूर्वम् **'अन्नमयत्वादेश्च'** इति, अत्र च **'अन्नादीनाम्'** इति बहूनां ग्रहणात्, सौत्रानन्दमयशब्दोऽजंहत्स्वार्थलक्षणया समानन्यायशब्दान्तरोपलक्षक इति सूचितम् ॥

ननु कथमत्रान्नमयशब्दोऽन्नप्राचुर्यार्थः । औषधिजनितान्नप्राचुर्यस्यान्नोपजीविषु पार्थिवशरीरेषु सम्भवेऽपि अप्राकृतविग्रहे हरावसम्भवात् । अन्नप्राचुर्यकथनस्यात्यल्पत्वापादकत्वाच्चेत्यत आह - **अद्यत इति ॥ 'वाक्येन अन्नशब्दस्य'** इति शेषः। **'युज्यते'** इत्यनन्तरम् **'अन्नमयशब्दार्थः'** इत्यध्याहारः। **'परमात्मनः'** इत्यस्ति । न केवलं सहपाठविरोधाभाव इति चार्थः । तथा चेत्थं योजना - **'तत्प्राचुर्यम्'** अन्नप्राचुर्यमन्नमयशब्दार्थो युज्यते । कथम् ? यतस्तत् परमात्मनो युज्यते । न चाल्पार्थत्वेन माहात्म्यरूपत्वाभावात् स कथं हरौ युज्यत इति वाच्यम् ।यतोऽत्रान्नशब्देन सुधोक्तरीत्या भावप्रधानेन तत्तद्भूताद्यत्वभूतात्तृत्वरूपार्थद्वयमेव युज्यते,उच्यते न प्रसिद्धान्नम् । कुत एतज्ज्ञायते । **'अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति'** इति वाक्येनान्नशब्दस्य व्याख्यानात् । प्रसिद्धान्नस्य भूतात्तृत्वायोगेन तद्ग्रहणासम्भवादिति ॥

श्रुत्यर्थस्तु- यतो भूतैः प्राणिभिः **'अद्यते'** उपजीव्यते **'भूतान्यत्ति'** संहरति च । तस्मात् तद्विष्ण्वाख्यं ब्रह्मान्नमुच्यते वेदेष्विति । एवं प्राणमनश्शब्दयोः

प्रकृष्टचेष्टकत्वपूर्णाबोधार्थत्वेन श्वासवाय्वन्तःकरणबुद्धिप्राचुर्यार्थतायामल्पार्थता परिहरणीया ॥

उपजीव्यत्वमेवाद्यत्वम् ।

'स वा एषः' *(तै. २-२.)* **इत्यन्यप्रारम्भात् ।**

ननु तथाऽपि प्रचुरभूताद्यत्वं कथमभिसंहितं ब्रह्मणः, भक्ष्यत्वरूपाद्यत्वस्य तत्रायोगादित्यतोऽद्यत्वशब्दार्थमाह – **उपजीव्यत्वमिति** ॥ अत्र **'अतोऽद्यते'** इत्यनुव्याख्यानानुसारेणाद्यत्वमिति छेदः । तथा च सुधोक्तरीत्या गौण्या वृत्त्या उपजीव्यत्वमेवाद्यत्वं विवक्षितं, न तु चर्व्यत्वम् । तच्च ब्रह्मण्यविरुद्धमिति भावः । तत्त्वप्रदीपे तु – **'न चान्यान्नं** सर्वभूताद्यं, न च तत्कस्यापि मुख्याद्यम् । किन्तु तद्गतो विष्णुरेवादनफलभूततृप्तितुष्टिदातृत्वान्मुख्याद्यः, तस्मादुपजीव्यत्वमेवाद्यत्वम्,

'अत्तृत्वात् सर्वलोकानामन्नमित्युच्यते हरिः ।
उपजीव्यश्च भूतानामिति चान्नं जनार्दनः ॥

इत्युक्तेः' इत्युपजीव्यत्वस्य मुख्यार्थतैवोक्ता । न च विरोधः, कम्पनाधिकरणोक्तरीत्या समन्वयतात्पर्येण तत्त्वप्रदीपप्रवृत्तेः । **'वज्रवत्'** इत्यादाविव यथा कथञ्चिद् ब्रह्मपरत्वाभिप्रायेण सुधाप्रवृत्तेः ॥

ननु कथमन्नमयशब्दः तत्प्राचुर्यार्थो युज्यते । **'ओषधीभ्योऽन्नम् । अन्नात् पुरुषः'** (तै.उ.२.१.२) इति प्रसिद्धान्नविकारदेहमुक्त्वा **'स वा एष पुरुषोऽन्नरसमयः'** (तै.उ.२.१.३) इति य एव पुरुषः सोऽन्नरसमय इत्यन्नविकारपुरुषपरामर्शादनुवादात् । अन्यथा तद्विरोधः स्यादित्यत आह – **स इति** ॥ **'अविरोधः'** इत्याकृष्यते । तथाचेति वाक्येन यस्मादात्मन आकाशादिकमुत्पन्नं स एष पुरुष इति **'अन्यस्य'** देहादन्यस्याऽत्मनः **'प्रारम्भात्'** परामर्शात् **'अविरोधः'** न परामर्शविरोधः । किमर्थमसौ परामृश्यत इत्याशङ्कापनोदनाय परामर्शादिति वक्तव्ये प्रारम्भादित्याह । पूर्वमात्मन

आकाशादिकारणत्वमुक्त्वा तस्यैव **'अन्यार्थम्'** अन्यकार्यायान्नमयादिपञ्च-रूपत्वप्रदर्शनाय पुनः **'प्रारम्भात्'** प्रक्रान्तत्वादित्यर्थः । **'स वा'** इति श्रुतौ वैशब्दोऽवधारणे प्रसिद्धौ वा । अन्नशब्दो भावप्रधानः । रसत्वमुत्तमत्वं, तच्चा-न्नत्वविशेषणम् । तथाच यस्मात् सत्यत्वादिलक्षणोपेतादात्मन आकाशा-दिकमुत्पन्नं **'सः'** आत्मपदोदितो भूतादिस्रष्टा **'एषः'** जीवशरीरगः **'पुरुषः'** पूर्ण-षड्गुणः देहाख्यपुरिशयः भगवान् **'अन्नरसमयः'** उत्तमान्नत्वपूर्ण इत्यर्थः । तैत्तिरीयभाष्ये तु - **'अन्नस्यात्तृत्वादिरूपस्यान्नमयशरीरस्य यतः सारभूतो विष्णुः अतोऽन्नरसमयः'** इति अन्नशब्दस्याऽवृत्त्या रसशब्दस्य क्रमव्यत्यासेन च व्याख्यातम् ॥

'येऽन्नं ब्रह्मोपासते' *(तै. २-२.)* **इत्यादिब्रह्मशब्दाद् बहुरूप-त्वाच्च न [1]विकारित्वमविरोधश्च ।**

नन्वेवं मयट्छब्दस्योभयार्थे प्रयोगादत्राप्युभयपक्षे दोषदर्शनात् पञ्चानां मयटां प्राचुर्यमेवार्थो न विकारित्वमित्यत्र किं नियामकम् ? किञ्चान्नमयादीनां पञ्चानां ब्रह्मताऽभ्युपगतौ **'एकमेव'** (छा.उ. ६-२-१.) इत्यादि श्रुतिविरोधः स्याद् इत्यत आह – **येऽन्नं ब्रह्मेति ॥** अत्राऽदिशब्देन **'ये प्राणं ब्रह्मोपासते'** (तै.उ. २-३-१.) । **'आनन्दं ब्रह्मणो विद्वान्'** (तै.उ. २-४-१.) **'विज्ञानं ब्रह्म चेद् वेद'** (तै.उ. २-५-१.) **'अस्ति ब्रह्मेति चेद्वेद'** (तै.उ. २-६-१) इति वाक्यजातं गृह्यते । अस्ति आनन्दरूपं तद्वच्च । **'इत्यादि'** इति लुप्तसप्तमी-विभक्तिकम् । **'श्लोकेषु'** इति शेषः । ब्रह्मशब्दपदं तच्छ्रवणोपलक्षकम् । एवं प्रदर्शिते हेतुद्वयेऽध्याहृतहेतुद्वाराऽन्वययोग्ये क्रमेण साध्ये आह – **न विकारित्वमिति ॥ 'मयटामर्थ इति निश्चीयते'** इति शेषः । **'अविरोधः'** विरोधाभावः । चशब्दोऽप्यर्थः । तथा चेत्थं योजना – **'येऽन्नं ब्रह्म'**

---

१. 'विकारत्वम्' ह.

इत्यादिष्वन्नमयादीन् प्रत्युदाहृतश्लोकेष्वन्नमयादिविषयत्वेन **'ब्रह्मशब्दात्'** ब्रह्मशब्दश्रवणादन्यथासिद्धतत्समभिव्याहाराद् उभयथाऽपि सम्भवतां मयटां प्राचुर्यमेवार्थः, न विकारित्वमिति निश्चीयते । अतो न नियामकाक्षेपो युक्तः । एवमेकस्यैव ब्रह्मणो **'बहुरूपत्वाच्च'** शब्दादेकस्यैव बहुरूपत्ववचनोपपत्तेः **'एकमेव'** इति श्रुतिविरोधोऽपि नेति । पूर्वं **'तस्मिन्नेव प्रसिद्धब्रह्मशब्दाभ्यासात्'** इत्युक्त्वा अत्र ब्रह्मशब्दादित्येतावन्मात्रोक्तेः प्रयोजनं तु **'ब्रह्मशब्दस्याऽनन्दविज्ञानमययोरिवान्येष्वभ्यासाभावात् तेष्वसिद्धिपरिहारेण ब्रह्मशब्दश्रवणरूपसर्वसाधारणहेत्वर्थकथनमेव'** इत्युक्तं चन्द्रिकायाम् ॥

न च पृथक् कल्पना युक्ता ।
स्वरूपे च युज्यते प्रचुरप्रकाशो रविरितिवत् ॥

अत्रान्यैः, आनन्दमय एव ब्रह्म । तद्वतमयट एव प्राचुर्यार्थता । अन्नमयादयस्तु कोशाः । तद्वतानां मयटां च विकारार्थत्वमित्युक्तम् । तदयुक्तमित्याह – **न चेति ॥** प्रायपठितमयटां **'पृथक्कल्पना'** अर्थद्वैविध्यकल्पना न युक्ता । ततश्चान्नमयादीनां मध्ये एकस्यैव ब्रह्मत्वकल्पना च न युक्तैव, प्रायपाठविरोधेन क्लिष्टत्वादित्यर्थः । यस्तु वादी अन्नमयादीनां पञ्चानामप्यब्रह्मतां ब्रूते, स तु सूत्रकारेणैव पूर्वपक्षीकृत इति न तत्पक्षं प्रत्याक्षिपद् भाष्यकारः ॥

तत्त्वप्रदीपे तु - न चेति वाक्यं न च मायिना पृथक्कल्पना **'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै.उ. २-१-१.) **'तस्माद्वा एतस्मादात्मनः'** (तै.उ. २-१-२.) इत्यत्र ब्रह्मोच्यते । अन्नमयादयः पञ्चकोशा मिथो भिन्नाः । तेषां ब्रह्मशब्दोक्तत्वेऽपि अब्रह्मत्वम् । अन्त्यपुच्छस्यैव ब्रह्मत्वम् । अन्नमयाद्यतिक्रमो मोक्षः । वक्ष्यमाणानां चक्षुश्श्रोत्रमनोवाचां नान्नमयादिष्वनुवृत्तिः । **'अन्नं ब्रह्मेति व्यजानात्'** (तै.उ. ३-२) इत्यादौ पञ्चमस्याऽनन्दस्य ब्रह्मत्वम् ।

'एतमानन्दमयमात्मानमुपसङ्क्रम्य' (तै.उ. ३-१०-५.) इत्येतस्माद् ब्रह्मानन्द-मयाद्यतिक्रमनिर्गुणवाक्यात् पृथगेव **'इमान् लोकान्'** (तै.उ. ३-१०-५.) इत्यादिको वाक्यशेषः सगुणवाक्यैकवाक्यतापन्नः तत्फलप्रतिपादक इत्यादिका युक्ता । उक्तहेतुभिरत्यन्तासङ्गतत्वाद् इत्यन्त्यपक्षनिराकरण-परतया व्याख्यातम् । न चैवमेतद्विरोधष्टीकाया इति वाच्यम् । भाष्यकारः सविस्तरं विशिष्य न निराचख्याविति टीकाभिप्रायाभ्युपगमात् ॥

ननु **'न ब्रह्मणि प्रचुरानन्दः'** इत्यादिप्रयोगो युज्यते । तस्याऽनन्दादि-स्वरूपत्वात् **'घृतप्रचुर ओदनः'** इत्यादौ भेदस्थल एव तथा प्रयोगादित्यत आह – **स्वरूपे चेति** ॥ चशब्दोऽप्यर्थः । इतिशब्दः शब्दपदार्थः । **'रविरितिवत्'** इत्यनन्तरं **'व्यवहारः'** इति शेषः । **'स्वरूपे च'** इत्यस्याऽवृत्तिः । तथा च प्रकाशस्वरूपेऽपि सूर्यबिम्बे विशेषबलात् **'प्रचुरप्रकाशो रविरितिवत्'** एवंरूपव्यवहारवद् आनन्दादिस्वरूपेऽपि हरौ बिशेषेण तथा व्यवहारो युज्यत एवेति न तदनुपपत्तिरित्यर्थः ॥

सू - ॐ ॥ तद्धेतुव्यपदेशाच्च ॥ ॐ ॥ १४ ॥

'को ह्येवान्यात् कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात्'
(तै. २-७) **इति** ॥

आनन्दमयमात्रस्य विष्णुत्वे, हेत्वन्तररूपं प्राचुर्यमेव मयडर्थ इत्यत्र च हेतुं प्रतिपादयत् सूत्रमुपन्यस्यति – **तद्धेत्विति** ॥ आनन्दमय इति तत्त्विति चानुवर्तते । तदित्यस्याऽवृत्तिः । स चासौ हेतुश्चेत्यपि विग्रहः । तथा च न केवलं ब्रह्मशब्दाभ्यासात् । किन्तु **'तद्धेतुव्यपदेशात्'** तस्मिन्नानन्दमयप्रकरणे तस्य विष्णोः तस्मिन् आनन्दपूर्णत्वेनाऽनन्दमयत्वे प्राचुर्यस्यैव मयडर्थत्वे च तद्धेतुव्यपदेशाल्लोकचेष्टकत्वाख्यहेतूक्तेश्चाऽनन्दपूर्णत्वेनैवाऽनन्दमयशब्दवाच्यो विष्णुरेवेति सूत्रवृत्तिमभिप्रेत्य तमेव हेतुव्यपदेशं दर्शयति – **को हीति** ॥ **'यत्'**

इत्यादिष्वन्नमयादीन् प्रत्युदाहृतश्लोकेष्वन्नमयादिविषयत्वेन **'ब्रह्मशब्दात्'** ब्रह्मशब्दश्रवणादन्यथासिद्धतत्समभिव्याहाराद् उभयथाऽपि सम्भवतां मयटां प्राचुर्यमेवार्थः, न विकारित्वमिति निश्चीयते । अतो न नियामकाक्षेपो युक्तः । एवमेकस्यैव ब्रह्मणो **'बहुरूपत्वाच्च'** शब्दादेकस्यैव बहुरूपत्ववचनोपपत्तेः **'एकमेव'** इति श्रुतिविरोधोऽपि नेति । पूर्वं **'तस्मिन्नेव प्रसिद्धब्रह्मशब्दाभ्यासात्'** इत्युक्त्वा अत्र ब्रह्मशब्दादित्येतावन्मात्रोक्तेः प्रयोजनं तु **'ब्रह्मशब्दस्याऽनन्दविज्ञानमययोरिवान्येष्वभ्यासाभावात् तेष्वसिद्धिपरिहारेण ब्रह्मशब्दश्रवणरूपसर्वसाधारणहेत्वर्थकथनमेव'** इत्युक्तं चन्द्रिकायाम् ॥

न च पृथक् कल्पना युक्ता ।
स्वरूपे च युज्यते प्रचुरप्रकाशो रविरितिवत् ॥

अत्रान्यैः, आनन्दमय एव ब्रह्म । तद्वतमयट एव प्राचुर्यार्थता । अन्नमयादयस्तु कोशाः । तद्वतानां मयटां च विकारार्थत्वमित्युक्तम् । तदयुक्तमित्याह – **न चेति** ॥ प्रायपठितमयटां **'पृथक्कल्पना'** अर्थद्वैविध्यकल्पना न युक्ता । ततश्चान्नमयादीनां मध्ये एकस्यैव ब्रह्मत्वकल्पना च न युक्तैव, प्रायपाठविरोधेन क्लिष्टत्वादित्यर्थः । यस्तु वादी अन्नमयादीनां पञ्चानामप्यब्रह्मतां ब्रूते, स तु सूत्रकारेणैव पूर्वपक्षीकृत इति न तत्पक्षं प्रत्याक्षिपद् भाष्यकारः ॥

तत्त्वप्रदीपे तु - न चेति वाक्यं न च मायिना पृथक्कल्पना **'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै.उ. २-१-१.) **'तस्माद्वा एतस्मादात्मनः'** (तै.उ. २-१-२.) इत्यत्र ब्रह्मोच्यते । अन्नमयादयः पञ्चकोशा मिथो भिन्नाः । तेषां ब्रह्मशब्दोक्तत्वेऽपि अब्रह्मत्वम् । अन्त्यपुच्छस्यैव ब्रह्मत्वम् । अन्नमयाद्यतिक्रमो मोक्षः । वक्ष्यमाणानां चक्षुश्श्रोत्रमनोवाचां नान्नमयादिष्वनुवृत्तिः । **'अन्नं ब्रह्मेति व्यजानात्'** (तै.उ. ३-२) इत्यादौ पञ्चमस्याऽनन्दस्य ब्रह्मत्वम् ।

'एतमानन्दमयमात्मानमुपसङ्क्रम्य' (तै.उ. ३-१०-५.) इत्येतस्माद् ब्रह्मानन्द-मयाद्यतिक्रमनिर्गुणवाक्यात् पृथगेव **'इमान् लोकान्'** (तै.उ. ३-१०-५.) इत्यादिको वाक्यशेषः सगुणवाक्यैकवाक्यतापन्नः तत्फलप्रतिपादक इत्यादिका युक्ता । उक्तहेतुभिरत्यन्तासङ्गतत्वाद् इत्यन्त्यपक्षनिराकरण-परतया व्याख्यातम् । न चैवमेतद्विरोधष्टीकाया इति वाच्यम् । भाष्यकारः सविस्तरं विशिष्य न निराचख्याविति टीकाभिप्रायाभ्युपगमात् ॥

ननु **'न ब्रह्मणि प्रचुरानन्दः'** इत्यादिप्रयोगो युज्यते । तस्याऽनन्दादि-स्वरूपत्वात् **'घृतप्रचुर ओदनः'** इत्यादौ भेदस्थल एव तथा प्रयोगादित्यत आह – **स्वरूपे चेति** ॥ चशब्दोऽप्यर्थः । इतिशब्दः शब्दपदार्थः । **'रविरितिवत्'** इत्यनन्तरं **'व्यवहारः'** इति शेषः । **'स्वरूपे च'** इत्यस्याऽवृत्तिः । तथा च प्रकाशस्वरूपेऽपि सूर्यबिम्बे विशेषबलात् **'प्रचुरप्रकाशो रविरितिवत्'** एवंरूपव्यवहारवद् आनन्दादिस्वरूपेऽपि हरौ विशेषेण तथा व्यवहारो युज्यत एवेति न तदनुपपत्तिरित्यर्थः ॥

सू - ॐ ॥ तद्धेतुव्यपदेशाच्च ॥ ॐ ॥ १४ ॥

'को ह्येवान्यात् कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात्'
(तै. २-७) **इति** ॥

आनन्दमयमात्रस्य विष्णुत्वे, हेत्वन्तररूपं प्राचुर्यमेव मयडर्थ इत्यत्र च हेतुं प्रतिपादयत् सूत्रमुपन्यस्यति – **तद्धेत्विति** ॥ आनन्दमय इति तत्त्विति चानुवर्तते । तदित्यस्याऽवृत्तिः । स चासौ हेतुश्चेत्यपि विग्रहः । तथा च न केवलं ब्रह्मशब्दाभ्यासात् । किन्तु **'तद्धेतुव्यपदेशात्'** तस्मिन्नानन्दमयप्रकरणे तस्य विष्णोः तस्मिन् आनन्दपूर्णत्वेनाऽनन्दमयत्वे प्राचुर्यस्यैव मयडर्थत्वे च तद्धेतुव्यपदेशाल्लोकचेष्टकत्वाख्यहेतूक्तेश्चाऽनन्दपूर्णत्वेनैवाऽनन्दमयशब्दवाच्यो विष्णुरेवेति सूत्रवृत्तिमभिप्रेत्य तमेव हेतुव्यपदेशं दर्शयति – **को हीति** ॥ **'यत्'**

यदा यदि **'एष आकाशः'** आ समन्तात् प्रकाशमानो विष्णुरानन्दः पूर्णानन्दो न स्यात् तदाऽसौ लोकं न प्रवर्तयेदिति शेषः । आनन्दोद्रेकमन्तरेण प्रवृत्तौ कारणान्तराभावादिति भावः । यद्यसौ न लोकं प्रवर्तयेत् । तदा **'को ह्येवान्यात्'** को वा जनः लोकं चेष्टयेत् । **'कश्च प्राण्यात्'** धर्मादौ च कः प्रवर्तयेत् । न कोऽपि । अन्यस्यास्वातन्त्र्यादिति तैत्तिरीयभाष्यटीकारीत्या श्रुत्यर्थः । सुधायां तु ण्यर्थानन्तर्भावेन न कोऽपि लोकिकीं वैदिकीं प्रवृत्तिं कुर्यादिति व्याख्यातम् । इतीत्यस्य इति तद्धेतुव्यपदेशादित्यन्वयः ॥

सू-ॐ ॥ मान्त्रवर्णिकमेव च गीयते ॥ ॐ ॥१५॥

'ब्रह्मविदाप्नोति परम्' *(तै.२-१)* **इति सूचयित्वा**[1]
'सत्यं ज्ञानमनन्तं ब्रह्म' *(तै.२-१)*
इति मन्त्रवर्णलक्षितं परमेव ब्रह्म[2] **शब्दानुसन्धानाद् गीयते ॥**

यदुक्तं ब्रह्मशब्दादानन्दमयादीनां विष्णुत्वमिति न तद्युक्तम् । ब्रह्मशब्दस्यापरब्रह्मणि जीवेऽप्युपपत्तेः । तस्य परब्रह्मणि मुख्यत्वेऽपि विष्णोरानन्दमयावयवत्वोक्त्यादिना बाधकेनामुख्यार्थस्यैव ग्रहणोपपत्तेरित्याशङ्कां परिहरद् आनन्दमयादिशब्दवाच्यस्य विष्णुत्वे युक्त्यन्तरं वदत् सूत्रं पठित्वा व्याचष्टे – **मान्त्रवर्णिकमिति ॥** यत इत्यादौ योज्यं, **'न ते'** इति प्रतिज्ञाऽनुवर्तते । तथा च यतः **'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै.उ. २-१-१.) इति **'मन्त्रवर्णे'** मन्त्राक्षरे तदात्मकवाक्यविशेषे **'लक्षितं'** लक्षणवत्तया प्रोक्तमेव परमेव ब्रह्म नालक्षितं, नापरमित्येवार्थः । अन्नमयादिशब्दैः **'गीयते'** प्रतिपाद्यतेऽतोऽप्यानन्दमयादयो नापरे । किन्तु परमेव ब्रह्मेति योजना । कुतोऽन्नमयादिशब्दैर्मन्त्रवर्णलक्षितस्यैव प्रतिपादनं ज्ञायत इत्यत उक्तम् –

---

१. 'सूत्रयित्वा' ह. २ .'मन्त्रवर्णलक्षितमेव ब्रह्म' ह.

शब्दानुसन्धानादिति ॥ **'शब्दानां'** सत्यं ज्ञानमनन्तम् इत्येवंरूपाणाम् अन्नमयादिशब्दानां चार्थानुसन्धानाद् जातात् **'अनुसन्धानात्'** एकार्थत्वज्ञानादित्यर्थः ॥

मन्त्रवर्णेऽपि ब्रह्मेत्येवोक्तत्वात् कथं तदर्थानामप्यन्नमयादिशब्दानां पर-ब्रह्मार्थताज्ञप्तिरित्यत आह – **ब्रह्मविदिति ॥** प्रवृत्त इति शेषः । अस्य बुद्ध्या विविक्तेन मन्त्रवर्णपदेनान्वयः । तथा च यतो **'ब्रह्मविदाप्नोति परम्'** (तै.उ. २.१.१) इति परब्रह्मतज्ज्ञानतत्प्राप्तीः सूचयित्वा सङ्क्षेपेणोक्त्वा तत्र प्राप्तशङ्का-पनोदाय प्रवृत्तो मन्त्रवर्णः । ततोऽत्र लक्षितं परं ब्रह्मैवेति ज्ञायत इत्यर्थः ॥

सूत्रे आनन्दमयादिस्तत्त्विति चानुवर्तते । चशब्दो यत इत्यर्थे युक्तिसमुच्चये वा । तथा च न केवलं ब्रह्मशब्दादेवाऽनन्दमयादिविष्ण्वाख्यं परब्रह्मैव नापरब्रह्मेत्यवसीयते । किन्तु यतो मान्त्रवर्णिकं **'सत्यं ज्ञानम्'** इति वेदवाक्येन लक्षणवत्तया प्रोक्तं परं ब्रह्मैवान्नमयादिशब्दैः **'गीयते'** प्रतिपाद्यते च । अतस्तत्समाख्यानादार्थिकादपीति सूत्रार्थः ॥

'ब्रह्मवित्' परब्रह्मज्ञानी **'परं'** परमं ब्रह्माऽप्नोति । परब्रह्मप्राप्तिकामः परब्रह्म जानीयाद् इति श्रुतेः फलितोऽर्थः । किं तद् ब्रह्मेति शङ्कायां सत्य-मित्यादि प्रवृत्तम् । तत्र सत्यशब्देनोक्तं यद् गतिजीवननाशप्रापकत्वं तदेवा-न्नमयप्राणमयशब्दाभ्यामुच्यते । ज्ञानपदोक्तं सकलपदार्थसामान्यविशेष-विषयकज्ञानं मनोमयविज्ञानमयशब्दाभ्यामुच्यते । अनन्तशब्देनोक्तं देशतः कालतो वस्तुतश्चापरिच्छिन्नत्वम् ।परमात्माऽनन्तः पूर्णानन्दत्वादित्यानन्दमय-शब्देनोपपाद्यत इति सत्यादिशब्दानामन्नमयादिशब्दानां चैकार्थत्वमनुसन्धेयम्। अत्र देशानन्त्यं नामानवधिकपरिमाणत्वम् । कालानन्त्यं नामानवच्छिन्न-सत्ताकत्वम् । वस्त्वानन्त्यं नामापरिच्छिन्नसङ्ख्यागुणकर्मविग्रहवत्त्वम् ॥

न चावयवत्वविरोधः । 'स शिरः, स दक्षिणः पक्षः, स उत्तरः पक्षः, स आत्मा, स पुच्छम्' इति तस्यैवावयवत्वोक्तेश्चतुर्वेदशिखायाम् ।

ननु विष्णोरानन्दमयत्वं न युक्तं, तस्य तदवयवत्वात् । न चासिद्धिः, ब्रह्मपुच्छमित्युक्तेः । अवयविनश्चावयवत्वविरोधादित्यत आह – **न चेति** ॥ तस्येत्याकृष्यते । **'तस्य'** विष्णोरानन्दमयत्वे तदवयवत्वोक्तिविरोधो नेत्यर्थः । अवयवत्वे चावयवित्वस्य विरोधोऽपि नेति चशब्दार्थः । कुत इत्यतोऽवयविन एवावयवंत्वस्यावयवित्वस्य च श्रुत्युक्तत्वेनावयव्यादेरवयवाद्यभेदादित्याशयेन तां श्रुतिमुदाहरति – **स इति** ॥ **'सः'** नारायणः **'शिरः'** शीर्षं, शिरः स इति वा। एवम् उत्तरत्रापि व्याख्येयम् । द्वितीयादितच्छब्दाः स्मृत्यनुसारात् प्रद्युम्नादिपराः । **'पक्षो'** बाहुः **'उत्तरः'** सव्यः **'आत्मा'** मध्यदेहः **'पुच्छं'** पादौ इतीत्यस्यैवंरूपायां चतुर्वेदशिखायां तस्यैवावयविभूतस्यैव विष्णोरवयवत्वोक्तेरित्यन्वयः । एवशब्देनावयवावयविभेदो निवारितः । एवम् अवयवस्यावयवित्वे न केवलमियं श्रुतिः, किन्तु – भाष्ये उपलक्षणया गृहीता **'पदं पुच्छं प्रतिष्ठा वै पुरुषः'** इति तत्त्वप्रदीपोदाहृतश्रुतिरपि प्रमाणतया ग्राह्या । अस्मिन् पक्षे भाष्यगतावयवशब्दः अर्शआद्यजन्तोऽवयविपरः ॥

'शिरो नारायणः पक्षो दक्षिणः सव्य एव च ।
प्रद्युम्नश्चानिरुद्धश्च [१]सन्दोहो वासुदेवकः ॥
नारायणोऽथ सन्दोहो[२] वासुदेवः शिरोऽपि वा ।
पुच्छं सङ्कर्षणः प्रोक्तः एक एव तु पञ्चधा ॥
अङ्गाङ्गित्वेन भगवान् क्रीडते पुरुषात्तमः ॥

अवयविन अवयवत्वं विरुद्धमित्याशङ्कां श्रुत्या परिहृत्यात्र स्मृतिं चाऽह – **शिर इति** ॥ अत्र चित्रादौ लिख्यमाननवनारीरूपे अवयविभूतानामनेकस्त्रीणामेकदेहावयवत्वं तथा नारायणादिपञ्चरूपाणामेकावयवत्वमुच्यते । आद्यश्चः पक्षसमुच्चये । रूपयोः परस्परसमुच्चये द्वौ । अवयविभूत

१. २, 'सन्देहः' ह.

एव नारायणः शिर इत्येवशब्दान्वयः । एवमवयविभूतः प्रद्युम्नो दक्षिणः पक्षो बाहुः । अनिरुद्धः सव्यः । वासुदेवः **'सन्दोहः'** मध्यदेह इत्यन्वयः । [1]अपि वेति निपातसमुदायः पक्षान्तरे । पूर्वस्मिन् पक्षे नारायणस्य शीर्षत्वम् । वासुदेवस्य मध्यदेहत्वम् । अस्मिन् पक्षे तु – तदंशे वैपरीत्यमित्युपासनाभेदेन पक्षभेदोक्तिः । सङ्कर्षणस्तूभयत्र **'पुच्छं'** पादौ प्रोक्त इत्यन्वयः । तुशब्देन द्विरूपत्वं सुपर्णरूपत्वविशेषो वा ज्ञायते । ततः किमित्यत आह - **एक इति ॥** एवं **'पुरुषोत्तमः'** क्षराक्षरपुरुषाभ्याम् उत्तमो भगवान् कृष्णः **'एक एव'** पञ्चधा विभक्तः एक एवावयवैरभिन्न एव न तु भिन्नः । **'अङ्गत्वेन'** अवयवत्वेन **'अङ्गित्वेन'** अवयवित्वेन प्रकारेण तद्भावं प्राप्तः क्रीडत इत्यर्थः । इत्थम्भूतलक्षणे तृतीया ॥

ऐश्वर्यान्न विरोधश्च चिन्त्यस्तस्मिन् जनार्दने ।
अतर्क्ये हि कुतस्तर्कस्त्वप्रमेये कुतः प्रमा ॥' इति बृहत्संहितायाम्।

नन्वस्त्वेवं तावता न विरोधपरिहारो जात इत्यत आह – **ऐश्वर्यादिति।** **'तस्मिन्'** अवयविभावाद्यापन्ने जनार्दने **'तस्मिन्'** अवयवत्वादौ तद्विषये **'विरोधः'** सहानवस्थानरूपः **'न चिन्त्यः'** न केनचित् कल्प्यः । कुतः ? **'ऐश्वर्यात्'** ईश्वरसामर्थ्यात् तयोरेकत्रावस्थानरूपाविरोधोपपत्तेः । ईश्वरशक्तिश्चाघटितघटिकेति भावः । एवं **'तस्मिन्'** अवयवे **'तस्मिन्'** अवयवित्वे न विरोधः । कुतः ? एकैकस्यावयवस्य सर्वेश्वरत्वादित्यपि व्याख्येयम् । एवं न विरोध इत्येतद् अवयवावयविनोरभेदेऽयमवयवी अयम् अवयव इति भेदव्यवहारविरोधोऽपि नेत्यपि व्याख्येयम् । तत्र हेतुस्तु विशेषबलाच्छक्तिव्यक्तिभावादिति चशब्देन सूचितः । अत एव चशब्दोऽनुक्तसमुच्चयार्थ ऐश्वर्याच्चेत्यन्वेति ॥

---

१. **'अथवेति'** – म.

किञ्च – किं तर्कान्यप्रमाणेनावयविनोऽवयवत्वमवयवस्यावयवित्वं च विरुद्धम् ? उत अवयवी नावयवः अवयवित्वात् । अवयवो वा नावयवी अवयवत्वाल्लोकवदिति तर्कपदोक्तानुमानेन । नाऽद्योऽसिद्धत्वात् । न द्वितीय इत्याह – **अतर्क्य इति** ॥ **'हि'** यस्मादतर्क्यः तस्मात् **'अतर्क्ये'** तर्कागोचरे भगवति तद्विषये **'तर्कः'** अवयवी नावयवः अवयवित्वाद् इत्यादिरूपो हेतुः **'कुतः'** साधको बाधको वा नेत्यर्थः ॥

किञ्च – लोके परिमितशक्तित्व एव विरोधदर्शनाद् विष्णोर्विरोधोपयोगिपरिमितशक्तिशून्यत्वात् तर्क्यत्वाङ्गीकारेऽपि न विरोध इत्याह – **अप्रमेय इति** ॥ **'अप्रमेये'** देशकालगुणैरपरिच्छिन्ने भगवति **'प्रमा'** एतावदेव सामर्थ्यं नातोऽधिकमिति शक्तिपरिच्छेदः **'कुतः'** नेत्यर्थः । तथा च परोक्ततर्कस्य सोपाधिकत्वेनाप्रमाणत्वान्न विरोधित्वमिति भावः । अनेन **'अतर्क्ये'** इत्यस्यासत्तर्कागोचर इत्यर्थ इत्युक्तं भवति । इति बृहत्संहितायामित्यस्य **'तस्यैवावयवत्वोक्तेः'** इत्यनुषक्तेनान्वयः ॥

रसशब्देन विशेषणात् तत्तत्सारभूतं चिन्मात्रमेवोच्यते ।

ननु यदुक्तं **'स वै'** इति वाक्येऽस्य परमात्मन एव परामर्शः, न **'अन्नात् पुरुषः'** इत्युक्तदेहस्येति तदयुक्तम्; आत्मनो दूरस्थत्वाद् देहस्य च समीपस्थत्वात् समीपोक्तपरित्यागेन दूरस्थपरामर्शाङ्गीकारे कारणाभावात् ॥

किञ्च– पुरुषपदेन प्रकृतस्यैव पुरुषपदेनोक्तत्वाद् आत्मनश्च तेनाप्रकृतत्वात् पुरुषपदेन परामर्शायोगः । न च –

'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।'
'पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ॥'

इति वाक्यद्वयस्थपुरुषपदेनैकविधेनैव व्यवस्थया परमात्मजीवयोरुक्तिग्रहणवदिहाप्येकविधेनैव द्विरुक्तेन पुरुषपदेन व्यवस्थयाऽर्थद्वयोक्त्यङ्गी-

कारोऽस्त्विति वाच्यम् । तत्र दुःखानुभवितृत्वरूपभेदकश्रुतिवत् प्रकृते भेदकाभावेन अन्नात् पुरुषः इत्यत्र देहः, **'स वै'** इत्यत्र च परमात्मैवोच्यत इति व्यवस्थाङ्गीकारायोगादित्यत आह – **रसेति** ॥ **'स वा एषः'**, इति वर्तते । तदित्यावर्तते । एवमुच्यत इति च । अन्यद् विहायेति शेषः । तथा च **'स वै'** इति वाक्येन चिदेव चिन्मात्रं ब्रह्मचैतन्यमेव उच्यते परामृश्यते न देहः । न च तस्य दूरोक्तिविरोधः, पुरुषपदेनाप्रकृतत्वविरोधश्चेति वाच्यम् । यतस्तत् **'आत्मन आकाशः सम्भूतः'** (तै.उ.२.१.२) इत्याकाशादिपुरुषान्तशब्दैरुक्तं **'तत्तत्सारभूतम्'** आकाशादिपदार्थश्रेष्ठभूतं चिन्मात्रं ब्रह्मैव स वा इति परामर्शवाक्येनोच्यते । एवं तर्हि पुरुषपदेन द्वयोरपि प्रकृतत्वादुभय[1] परामर्शोऽयमस्त्विति न च वाच्यम् । यतः तत्सारभूतं पुरुषसारभूतं चिन्मात्रं ब्रह्मैवान्यदेहादिकं विहाय **'सः'** इति परामर्शवाक्येनोच्यते । कुत इत्यत आह – **रसेति** ॥ रसशब्दघटितान्नरसमयशब्देन **'विशेषणात्'** सारान्नमयत्व-रूपपुरुषविशेषणाभिधानादित्यर्थः । जडामिश्रजीवविलक्षणब्रह्मबोधार्थं मात्र-पदम् । **'रसशब्देन'** रसशब्दार्थेन मुख्यत्वेन **'विशेषणात्'** विशेषितत्वाद् अन्नत्वरूपविशेषणस्येति वा । ततश्चात्र **'अन्नरसोऽन्नसारोऽन्नशब्दार्थेषु मुख्यान्नृत्वादिलक्षणस्तत्प्रचुरः'** इति सुधोक्तेः । टीकायां चैतन्यमात्रं ब्रह्मैवेत्यन्वयः ॥

नन्वनुवाकान्तरे **'अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुद्ध्यन्ताम्'** (याज्ञिकी. ६६.) इति प्रार्थितशुद्धीनामन्नमयादीनां कथं ब्रह्मतोच्यत इत्यतो वाऽऽह – **रसेति** ॥ नात्र प्रार्थितशुद्धीनामन्नमयादि-कोशानामभिधानम् । किन्तु, तत्तत्सारभूतं तत्तत्कोशनियामकं तद्गतं ब्रह्म-चैतन्यमेव उच्यते । कुतः ? अत्र **'स वा एषः'** (तै.उ. २-१-३.) इत्यादौ **'रसो**

---

१. **'-दुभयोः परामर्शो-' म.**

वै सः' इत्यन्ते चान्नमयादीनां कोशव्यावृत्त्यर्थं तद्भेदार्थमेव **'रसशब्देन विशेषणात्'** विशेषितत्वादित्यर्थः । आदौ विशेषितत्वं घटितत्वम् । तथा च शब्दान्तरन्यायेनान्नमयाद्यपेक्षयाऽन्नरसमयादीनांभेद इति भावः । उपलक्षणमेतत् । व्यवहिताकाशादिकारणात्मपरामर्शिना तच्छब्देन च विशेषणादित्यपि द्रष्टव्यम् । ननु यदि परिदृश्यमानदेह एव नान्नमयः, किन्तु ब्रह्मैव, तस्यैव च स इत्यादौ परामर्शः, तदा **'तस्येदमेव शिरः'** (तै.उ. २-१-३.) इति प्रत्यक्षनिर्देशो नोपपद्यते । न च वाच्यम् उपनिषद्द्रष्टा मुनिर्ब्रह्मापरोक्षीकृत्य प्रत्यक्षतो निर्दिशतीति । तथासति तेनापरोक्षीकृतप्राणमयादावपि तथा निर्देशप्रसङ्गात् ॥

इदमिति च दृश्यमानसन्निहितत्वात् ।

किञ्च – स्वस्यापरोक्षतो ज्ञातत्वेन शब्दानपेक्षणाद् उपदेश्यपुरुषाणां चापरोक्षायोग्यत्वान्निर्देशवैयर्थ्यमित्यत आह – **इदमिति** ॥ चोऽप्यर्थः । निर्देशो युज्यत इति शेषः । इदमित्येतदस्येत्यपि व्याख्येयम् । तथा च **'अस्य'** अन्नमयभगवच्छिरःपक्षादेः दृश्यमानप्रत्यक्षसिद्धदेहशिरःपक्षादौ वस्त्रवर्मान्तर्वर्तिजानुवीरावयववत्[१] **'सन्निहितत्वात्'** सम्यङ्नियामकत्वेन स्थितत्वात् लक्षणया ब्रह्मशिरसि इदमिति निर्देशो युज्यत इति योजना । लक्षणाबीजं शक्यसम्बन्धं दर्शयितुं – **दृश्यमानेति** ॥ तथा च वस्त्रप्रावृते वर्मान्तर्गते वा जानुनीदं जान्विति व्यवहारवदयमपि व्यवहारो युज्यत एवेति न तद्विरोध इति भावः ॥

'अनन्योऽप्यन्यशब्देन तथैको बहुरूपवान् ।
प्रोच्यते भगवान् विष्णुरैश्वर्यात् पुरुषोत्तमः ॥' इति ब्रह्माण्डे ॥

नन्वन्नमयादीनां पञ्चानां ब्रह्मताऽनुपपन्ना **'तस्माद्वा एतस्मादन्न-**

---

१. **'-र्वर्तिजानुवत्' – म.**

रसमयात् । अन्योऽन्तर आत्मा प्राणमयः' (तै.उ. २-२-२.) इति परस्परं भिन्नत्वेनोक्तत्वात् । एवमेकस्यैव ब्रह्मणो बहुरूपत्वान्न **'एकमेव'** इति श्रुतिविरोध इत्यप्ययुक्तमप्रमितत्वादित्यत आह – **अनन्य इति ॥** अपिर्यद्यपीत्याद्यर्थे । तथाशब्दः समुच्चये । तथा च **'पुरुषोत्तमो भगवान् विष्णुः' 'अनन्योऽपि'** अभिन्नोऽपि अन्यो भिन्न इति शब्देन प्रोच्यते । तथा यद्यप्येकस्तथाऽपि बहुरूपवान् भवतीत्यर्थः । कथमित्यत उभयघटकमाह – **ऐश्वर्यादिति ॥** अचिन्त्यशक्तेरित्यर्थः । उपलक्षणमेतत् । अन्नमयादिपञ्चकोशगतान्यत्वान्तरत्वादयो धर्मास्तद्गतभगवद्रूपेषूपचर्यन्त इत्यपि द्रष्टव्यम् । अत एव तृतीये **'स्थानभेदादैश्वर्याच्च'** इति भाष्ये स्थानभेदाख्यं हेत्वन्तरमभिहितम् । तैत्तिरीयभाष्ये तु – भेदाभावेऽपि सङ्ख्याविशेषयुक्तत्वादन्यत्वोक्तिरित्युक्तम् । ब्रह्माण्डे पुराणे इत्यनन्तरम् उक्तत्वान्न विरोध इत्यन्वयः ॥

न चोक्तप्राप्त्या विरिञ्चादिरुच्यते ।

सू – ॐ ॥ नेतरोऽनुपपत्तेः ॥ ॐ ॥ १६ ॥

न ह्यन्यज्ञानान्मोक्ष उपपद्यते ।
'तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते'
(तै. आ. ३-१२-७.) **इति ह्युक्तम् ।**

ननु ब्रह्मशब्दस्य साधारणत्वात् तद्धेतुव्यपदेशस्य विष्णुनिष्ठतया स्पष्टमप्रतिभानान्मन्त्रवर्णसमाख्यायाश्चान्यलिङ्गादिभ्यो दुर्बलत्वेन सावकाशत्वाद् अनन्यथासिद्धहेत्वन्तरस्य चाभावादानन्दमयादयो विरिञ्चादय एव सन्त्विति शङ्कां परिहरत् सूत्रमवतारयति – **न चेति ॥** चोऽवधारणे । विरिञ्चादय इत्यनेनान्वेति । तथा च **'उक्तप्राप्त्या'** ब्रह्मशब्द-

शतानन्दत्वाष्टमूर्तित्वबहुभावादिरूपोक्तप्रापकेनान्नमयादिशब्दैर्विरिञ्चादिरेवोच्यते । न विष्णुरिति न, किन्तु, विष्णुरेव तैरुच्यते । न विरिञ्चादिरित्यर्थः । कुतो नेति हेत्वाकाङ्क्षायां सूत्रमुपन्यस्य प्रतिज्ञांशस्य न चेत्यादिभाष्येणैव व्याख्यातत्वात् सौत्रमनन्यथासिद्धहेतुमेव व्याचष्टे – **नेतर इति ॥** हिशब्दो हेतौ । **'अन्यज्ञानात्'** विष्ण्वन्यविरिञ्चादिज्ञानात् ॥

यद्यप्ययं नेतर इत्युक्तसाध्ये न हेतुः । तथाऽपि तस्यानन्यथासिद्धंत्वोपपादकत्वाद्धेतुत्वोक्तिः । अस्य हेतुवाक्यस्याध्याहृतहेतुवाक्यद्वारा न चेति प्रतिज्ञयाऽन्वयः ॥

अनेनाऽनन्दमयादिः विष्णोरितरो विरिञ्चादिर्न, कुतः ? **'ब्रह्मविदाप्नोति परम्** (तै.उ.२-१-१) ... **सर्वं वै तेऽन्नमाप्नुवन्ति** (तै.उ. २-२-१.)....**सर्वमेव त आयुर्यन्ति'**(तै.उ. २-३-१.) इत्यादिना आनन्दमयादेर्मुक्तिहेतुज्ञानविषयत्वोक्तेः, तस्य चेतरत्र **'अनुपपत्तेः'** अयोगादिति सूत्रार्थ उक्तो भवति ॥

विष्णुज्ञानादेव मोक्षो नेतरज्ञानादित्येतत् कुत इत्यत आह – **तमिति ॥ 'हि'** यस्मात् **'तमेवम्'** इति श्रुत्या मोक्षस्य विष्णुज्ञानादन्य उपायो नास्तीत्युक्तम् । तस्माद् विष्णोरन्यज्ञानान्मोक्षो नोपपद्यत इत्यर्थः । श्रुत्यर्थस्तु प्रागेवोक्तः ॥

सू – ॐ ॥ भेदव्यपदेशाच्च ॥ ॐ ॥ १७ ॥

'ते ये शतं प्रजापतेरानन्दाः' *(तै. २-८.)*,
'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते ।
अथ सोऽभयं गतो भवति' *(तै. २-७.)*
'स यश्चायं पुरुषे' *(तै. २-८.)* **इत्यादिभेदव्यपदेशात् ।**

हेत्वन्तरेण ब्रह्मादीनामानन्दमयत्वं पराकुर्वत् सूत्रं पठित्वा व्याचष्टे – **भेदेति** ॥ अत्र पूर्वहेतुसमुच्चायकेन चशब्देनाऽनन्दमयादिर्नेतर इति प्रतिज्ञावाक्यानुवृत्तेरपि सूचनात् । तद्विहाय सूत्रोक्तं भेदव्यपदेशं दर्शयति – **ते ये शतमिति** ॥ आदिशब्दः **'आनन्दाः'** इत्यतः परोऽपि योज्यः । तत्राऽद्येन **'ते ये शतम्'** इत्यस्य पूर्वोत्तरतैत्तिरीयवाक्यानि गृह्यन्ते । द्वितीयेन **'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान्'**, (तै.उ.२.४.१) इत्यादि । यद्वा सकृच्छ्रुत एव सर्वसङ्ग्राहकः ॥

अनेन नाऽनन्दमय इतरो विरिञ्चः, कुतः ? भेदव्यपदेशात् । विरिञ्चस्य **'ते ये शतम्'** (तै.उ.२.८.४) इत्यादिना रुद्राच्छतगुणानन्दत्वोक्तेः, आनन्दमयस्य च **'यतो वाचः'** इत्यादिनाऽपरिमितानन्दत्वोक्तेः । एवं न रुद्रः, तस्य हिरण्यगर्भाच्छतांशोनानन्दत्वोक्तेः । नापि बृहस्पत्यादयः । तेषामुत्तरोत्तरापेक्षया शतांशोनानन्दत्वोक्तेः । नापि प्रकृत्यादयः; **'अदृश्येऽनात्म्ये'** इत्यादौ प्रकृत्याद्ययोग्यस्वातन्त्र्यादिरूपभेदकधर्मश्रवणात् । नाप्यानन्दमयो ब्रह्मादिजीवसमुदायः, तस्य **'स यश्चायम्'** इति अपकृष्टोत्कृष्टसर्वजीवस्थितिरूपभेदकधर्मोक्तेः जीवसमुदायस्य चानेवंविधत्वादिति सूत्रार्थ उक्तो भवति ॥

एते च सर्वे व्यपदेशाः तैत्तिरीयश्रुतिगताः । तत्र **'प्रजापतिः शिवः शेफो लिङ्गमित्यभिधीयते'** इति शैवपुराणवचनात् **'प्रजापतेः'** रुद्रस्य **'ये शतं'** शतगुणिता आनन्दाः ते **'ब्रह्मणः'** चतुर्मुखस्य एक आनन्द इति प्रथमवाक्यस्यार्थः ॥

'अदृश्ये' साकल्येनाज्ञेये **'अनात्म्ये'** आत्मन इमे आत्म्याः जीवगुणाः, न विद्यन्ते आत्म्याः यस्मिन् सोऽनात्म्यः तस्मिन् जीवगुणविधुरे । अथवा – आत्मनः स्वामिनोऽयमात्म्यः स्वामिसम्बन्धी स नेत्यनात्म्यः तस्मिन्, स्वामिरहित इति यावत् । **'अनिरुक्ते'** साकल्येन निर्वचनागोचरे ।

'अनिलयने' अनन्याश्रये आनन्दमयशब्दवाच्ये विष्णौ तद्विषये योऽधिकारी **'अभयं'** यथा भवति तथा ध्यानरूपां **'प्रतिष्ठां'** स्थितिं **'विन्दते'** प्राप्नोति, करोतीति यावत् । **'अथ'** अनन्तरं **'सः'** उपासकः **'अभयं'** भयरहितं भगवन्तं **'गतः'** प्राप्तो भवतीति द्वितीयभेदव्यपदेशस्यार्थः ॥

'पुरुषे' पुरुषपदोपलक्षितापकृष्टजीवेषु **'यः'** अयमानन्दमयो विष्णुरस्ति । **'यश्चाऽदित्ये'** आदित्यपदोपलक्षितोत्कृष्टजीवेष्वस्ति **'सः'** उभयत्र स्थितो विष्णुः **'एकः'** अभिन्न इति तृतीयभेदव्यपदेशस्यार्थः ॥ **'यतो वाचः'** इत्यादिस्तु प्रागेव व्याख्यातः ॥

न च 'तत्त्वमसि' *(छा.६-८)* **'अहं ब्रह्मास्मि'** *(बृ.३-४-१०)* **इत्यादिश्रुतिविरोधः[1] ।**

नन्वस्त्वानन्दमयः परं ब्रह्म । तथाऽपि तेन कथं ब्रह्मादीनां भेदः सम्भवति । तद्भेदस्य **'तत्त्वमसि'** इत्यादिश्रुतिविरुद्धत्वादित्यत आह – **न चेति** ॥ भेदव्यपदेशस्येति शेषः । चः समुच्चये । एतद्विरोधशङ्का-परिहारसमुच्चितस्यैव भेदव्यपदेशस्य विवक्षितार्थसाधकत्वात् । एवमन्यत्रापि । त्वं तद् ब्रह्मासीत्यद्वैतरीत्याऽद्यश्रुत्यर्थः । द्वितीयस्यास्तु अहं ब्रह्माभिन्नोऽस्मीति॥

आद्यम् उद्दालकेन श्वेतकेतुं प्रत्युपदिष्टं छन्दोगवाक्यम् । द्वितीयं बृहदारण्यके वामदेवोक्तम् । अत्रोभयत्रापि विशिष्टयोरैक्यासम्भवात् तत्त्वमहंब्रह्मपदैर्लक्षितचैतन्ययोरैक्यमुच्यते । आदिशब्देन **'तद्योऽहं सोऽसौ योऽसौ सोऽहं'** (ऐ.आ. २-२-४.) **'योसावसौ पुरुषः सोऽहमस्मि'** (ई. २६.) इत्यादिश्रुतिर्गृह्यते ॥

---

१. **'इत्यादिविरोधः'** ह.

'नामानि सर्वाणि यमाविशन्ति' *(भाल्लवेयश्रुतिः)*

इति तत्तच्छब्दवाच्यत्वोक्तेः ।

कुतो नेत्यतस्तत्रैतच्छ्रुतीनां परब्रह्मार्थकत्वेनाद्वैतार्थत्वाभावादिति हेतूपस्कारमभिप्रेत्य तेषां परब्रह्मार्थत्वे प्रमाणमाह – **नामानीति** ॥ **'नामानि'** इति श्रुत्या तस्य ब्रह्मणः **'तत्तच्छब्दैः'** तत्त्वमादिपदैर्वाच्यत्वोक्तेरित्यर्थः । पद-समन्वयेनैतेषां ब्रह्मपरत्वान्नैतद्विरोध इति भावः । तत्प्रकारस्तु ततत्वात्तत् । त्वम्पदबोध्यजीवान्तर्यामित्वादभिमुखत्वाद्वा त्वम् । असनाद् जगत्सं-हरणादसिः । अहेयत्वाद् हंनामकजीवभिन्नत्वाद्वा अहम् । पूर्णत्वाद् ब्रह्म । असनान्मिनुतेरस्मि । यद्वा - सुमितत्वात् स्मीत्युक्तो जीवः, तद्भिन्नं पूर्णं ब्रह्म अस्मीत्युच्यत- इति । ज्ञानरूपत्वान्नितरां यन्तृत्वाच्च यः । सरणात् सारत्वाच्च सः । अमुष्मिन् अमुष्मिन् स्थितत्वात् परोक्षत्वाच्च असावसौशब्दवाच्यः इत्यैतरेयश्रुत्यर्थः ॥

'असौ' प्राणे स्थितः **'पुरुषः'** पूर्णषड्गुण इति ईशावास्यश्रुत्यर्थः ॥

'इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोध सम्भवः'
(भागवतम् १-५-२०), **'असर्वः सर्व इत्यपि'** *(तुरश्रुतिः)* ।

अस्तु वा एतच्छ्रुतीनाम् ऐक्यपरत्वं वाक्यान्वयरीत्या । तथाऽपि नैक्य-श्रुतिविरोधो भेदश्रुतेः शङ्कनीयः, भगवतः सर्वैक्यश्रुतेः सर्वस्वामित्वनिमित्तै-क्यपरत्वादित्याशयेन तत्र प्रमाणत्वेन भागवतस्मृतिं पठति – **इदं हीति** ॥ **'भगवान्'** स्वयम् **'इतरोऽपि'** जगतो भिन्नोऽपि सन् **'इदं'** प्रमितं विश्वमिवोच्यते **'तत्त्वमसि'** **'अहं ब्रह्मास्मि'** इत्यादिवचनेषु । यथोक्तं प्रथमतात्पर्ये – **'इतरोऽपि भगवान् विश्वमिव'** इति । कुतः ? **'यतः'** कारणात् **'जगत्स्थाननिरोधसम्भवः'** जगतः स्थानं स्थितिः, निरोधो नाशः, सम्भवः उत्पत्तिः, ते यस्माद् भवन्ति स तथोक्तः ॥ यद्वा - स्थापयति निरोधयति

सम्भावयतीति तथोक्तः । अथवा – तिष्ठत्यस्मान्निरुद्ध्यते प्रलीयतेऽस्मिन् सम्भवत्यस्मादिति तथोक्तः । तथा च जगत्सृष्ट्यादिकर्तेत्यर्थः । एवम्भूतस्य जगद्भेदः प्रमाणसिद्ध इति ज्ञापनाय हिशब्दः ॥ तत्त्वप्रदीपे तु - बहुव्रीहिं विना इदं विश्वं भगवानिव; एतदधीनत्वात् । स त्वितरः । कः ? **'यतो'** यस्मात् **'जगत्स्थाननिरोधसम्भवः'** जगत्सृष्ट्यादिकमित्युक्तम् । अत्र टीकायां च भगवानिदं विश्वमिवेत्यन्वयः ॥

स्वामित्वेनैक्यव्यपदेश इत्येतदेवाऽह- **असर्व इति** ॥ तुरश्रुतिः । भगवान् सर्वभिन्नोऽपि सर्वस्वामित्वात् सर्व इत्यभेदेन वेदादिषूच्यत इत्यर्थः । इत्यपीति श्रुतिस्थोऽपिः समुच्चये । यत इति शेषः । अस्यातोऽपि न विरोध इत्यन्वयः ॥

'विद्याऽऽत्मनि भिदाबोधः ।' *(भाग.- स्क. - ११-१९-३९)*
'भेददृष्ट्याऽभिमानेन निस्सङ्गेनापि कर्मणा'
(भा.स्क ३-३३-१२)

ननु भेदज्ञानस्य मिथ्याज्ञानत्वात् कथं तदनुसारेणैक्यश्रुतयो योज्यन्त इत्याशङ्कां भागवतवाक्येन परिहरति – **विद्येति** ॥ इदं च का विद्येत्युद्धव-प्रश्नस्योत्तरत्वेन कृष्णेनोक्तं वचनमेकादशस्कन्धे । **'आत्मनि'** परमात्मनि **'भिदाबोधो'** जीवाद्भेदज्ञानं जीवे वा यदीश्वराद् भेदज्ञानम् । सैव विद्येत्यर्थः । न च भिदाया अबोध इति व्याख्येयम्, अज्ञानस्य विद्यात्वाभावात् ॥

ननु भेदज्ञानस्य पुरुषार्थहेतुत्वात् कथं तस्य विद्यात्वमित्यत आह – **भेदेति** ॥ इदं च भागवते तृतीयस्कन्धगतं वाक्यम् -

'आद्यः स्थिरचराणां यो वेदगर्भः सहर्षिभिः ।
योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः ॥'

इति पूर्ववाक्येन

'कर्तृत्वात् सगुणं ब्रह्म पुरुषं पुरुषर्षभम् ।
स सङ्गत्य पुनः काले कालेनेश्वरमूर्तिना ॥
जातेऽगुणव्यतिकरे यथापूर्वं प्रजायते ॥'

इत्युत्तरवाक्येन च सह योजनीयम् ॥

तत्प्रकारस्तु – यः **'स्थिरचराणां'** स्थावरजङ्गमानाम् **'आद्यः'** हिरण्यगर्भः सः **'ऋषिभिः'** मनुष्योत्तममारभ्य गरुडशेषान्तैः ज्ञानिभिर्योगसिद्धैः सनत्कुमाराद्यैः सह **'भेददृष्ट्या'** जीवेश्वरादिभेदज्ञानेन **'अभिमानेन'** अभितो हरेर्मानेन परमेश्वरे बहुमानेन आग्रहेण च **'निःसङ्गेन कर्मणाऽपि'** फलाभिसन्धिरहितनिवृत्तकर्मणा च मुक्तः सन् **'कर्तृत्वात्'** जगत्कर्तृत्वान्निमित्तात् **'सगुणं'** सार्वज्ञादिगुणसम्पूर्णं **'पुरुषर्षभं'** क्षराक्षरेभ्यो वरं **'पुरुषं'** परमपुरुषाख्यं ब्रह्म **'काले'** प्रलयकाले **'सङ्गत्य'** प्रविश्य पुनः **'कालेन'** कालाख्येन **'ईश्वरमूर्तिना'** मूर्त्या **'काले'** सृष्टिकाले **'जाते'** उत्पन्ने सति **'अगुणव्यतिकरे'** सत्त्वादिगुणविक्रियाहीने विष्णुलोके **'यथापूर्वं'** पूर्ववत् प्रजायते सर्वमुक्ताधिपतिर्जायते इति सुधायामुक्तः । कर्मनिर्णयटीकायां तु - न केवलं सगुणं, किन्तु, **'ब्रह्म'** पुर्णं **'पुरुषमिति'** भगवतो नामकीर्तनम् । पुरुषत्वोक्त्याऽस्मदादिसालक्षण्यं प्राप्तं, तत्परिहाराय **पुरुषर्षभमिति** ॥ तदुपपादनाय कर्तृत्वात् सगुणं ब्रह्मेति विशेषार्थ उक्तः । तत्त्वप्रदीपे तु - अभिमाननेनेति पदम् अभितो मानेन विशेषज्ञाननेनेति व्याख्याय, **'गुणव्यतिकरे'** इति पदं छित्वा **'सः'** ब्रह्मादिजीवसङ्घः प्रलये ज्ञानैश्वर्याद्यनन्तगुणं ब्रह्म **'सङ्गत्य'** प्राप्य **'पुनः काले'** सृष्टिकाले **'कालेन'** ज्ञानात्मना **'ईश्वरमूर्तिना'** विष्णुरूपेण **'गुणव्यतिकरे'** गुणानां सत्त्वादीनां व्यतिकरे वैषम्ये जाते सति यथापूर्वं ज्ञानादिगुणतारतम्यं परस्परभेदं चाविहाय तद्विशिष्ट एव **'प्रजायते'** प्रकर्षेण मुक्तावभिव्यज्यते । न तु तदभिन्नो भवतीति व्याख्यातम् । अयं पदच्छेदष्टीकाकृतोऽपि सम्मतः । तत्पक्षे **'गुणव्यतिकरे काले'** सृष्टिकाले इत्यर्थः । उभयत्रापि यथापूर्वमित्यस्य संसार इवेत्यर्थः । पूर्वकल्पे इवेति वा ॥

'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः'

(मु. ३-१-२.)

अत्रैवार्थे अथर्वणवाक्यं प्रमाणयति - **जुष्टमिति ॥ जुष्टं** सर्वसेव्यम् ईशं स्वतन्त्रम् । अत एवान्यं जीवाद् भिन्नं विष्णुम् इति **'तदेतत्सत्यम्'** (मु. २-१-१) इत्यादिना प्रागुक्तप्रकारेण **अस्य महिमानं च यदा पश्यति** । पश्यो जीवः तदा **वीतशोको** मुक्तो भवतीत्यर्थः । **तत्त्वप्रदीपे** तु – **जुष्टं** देवैरस्य जीवस्य ईशम् अन्यं यदा पश्यति महिमानं महिमगुणात्मकं तदा तदैव वीतशोको भवति न दुःखलेशमपि स्पृशति जीवः । न तु महिमगुणविहीनम् अनन्यमनीशमसेवितं पश्यन् वीतशोको भवतीति व्याख्यातम् । यद्यपीयं श्रुतिः **'विशेषणभेदव्यपदेशाभ्याम्'** (ब्र.सू. १-२-२२.) इत्यत्र अयमन्यो मार्ग इत्युक्ते प्रसिद्धमार्गादन्यत्वबोधवद् अन्यमीशमित्युक्ते ईशशब्दितस्य ब्रह्मणः प्रसिद्धेशाद् रुद्राद् अन्यत्वप्रतीतेर्ब्रह्मणो रुद्रादन्यत्वे प्रमाणत्वेनोक्ता । न तु ब्रह्मणो जीवादन्यत्वे, नापि ईशत्वमन्यत्वे हेतूकृतम् । तथाऽपि तद् व्याख्यानान्तरमभिप्रेत्येति न तद्विरोधः । अत एव द्युभ्वादिनये **'भेदव्यपदेशात्'** (ब्र.सू. १-३-५.) इत्यत्र जीवेशभेदेऽपीयं प्रमाणतयोदाहृता ॥

'असर्वः सर्व इवाऽत्मैव सन्ननात्मेव प्रत्यङ् पराङिवैक ईयते बहुधेयते स पुरुषः स ईश्वरः स ब्रह्म'

एवं स्वामित्वार्थतया पराभिमताद्वैतश्रुतीर्व्याख्याय वाक्यसमन्वयाश्रयणेनान्तर्यामितयाऽपि ताः श्रुतिस्मृतिभ्यां व्याचष्टे – **असर्व इति ॥**

यद्यपि **'असर्वः'** इति वाक्यम् आत्मशब्दस्य स्वामित्वार्थत्वमुपेत्य स्वामित्वेन निमित्तेनैक्यश्रुतयः प्रवृत्ता इत्यत्र प्रमाणतयोदाहृतम् । तथाऽपि स्वामित्वेनेवान्तर्यामितयाऽप्यैक्यश्रुतयः प्रवृत्ता इत्युभयत्राप्यस्य प्रमाणत्व-

सम्भवादुभयत्रापि प्रमाणतयोदाहरणं युक्तम् । तत्त्वप्रदीपकृतामपि स्वामित्वेनेवान्तर्यामितयाऽप्यैक्यश्रुतयः प्रवृत्ता इत्युभयत्रापि **'असर्वः'** इति श्रुतिः प्रमाणमित्यभिप्रायः ॥

न चैवं **'तत्तदन्तर्यामित्वेनापि तत्तच्छब्दवाच्यत्वं विष्णोरस्तीत्याह – सर्वान्तर्यामिकः'** इति तत्त्वप्रदीपविरोधः; अत्र पदसमन्वयाभिप्रायप्रतीतेरिति वाच्यम् । अन्तर्यामित्वेनापीत्युक्त्या न केवलं **'नामानि'** इति श्रुतिबलात् तत्तच्छब्दप्रवृत्तिनिमित्तत्वेन तत्तच्छब्दवाच्यत्वं विष्णोः, अपि तु अन्तर्यामित्वेनापीत्येतावन्मात्रप्रतीतेरत्र पदसमन्वये तात्पर्यानवगमात् । महावाक्यगतस्यैतदादिशब्दस्यैकैकस्य **'सर्वान्तर्यामिकः'** इति स्मृतिबलाद् अन्तर्यामित्वनिमित्तेन विष्णुवाचित्वेऽपि पदान्तराणामन्यपरत्वेन वाक्यसमन्वयस्यैव वक्तव्यत्वात् । यदा, नामानि, इति श्रुतिबलात् क्रियाकारकादिसर्वार्थवाचिसर्वपदस्य विष्णुवाचित्वाभ्युपगमः तदैव पदसमन्वयः । न त्वेकैकस्य विष्णुवाचित्व इति न विरोधः ॥

तथा चान्तर्यामित्वनिमित्तेन तत्त्वमस्यादिवाक्यगतत्वमहमादिपदानां विष्णुवाचित्वे त्वं त्वदन्तर्यामी तद् ब्रह्म । अहं मदन्तर्यामी ब्रह्मेति वाक्यान्वयो द्रष्टव्यः । न चैवम् असि अस्मि, इति क्रियापदान्वयायोगः । जीवविशिष्टान्तर्यामिवाचकस्य त्वमादिशब्दस्य दग्धृशब्दस्यायसीवान्तर्यामिणि मुख्यवृत्तिः । जीवे त्वमुख्यवृत्तिरित्याश्रयणेनामुख्यार्थविवक्षयाऽसि अस्मीत्यादिपदप्रयोगोपपत्तेः ॥

यद्यपि निमित्तकथनप्रकरणे **'विद्याऽत्मनि'**, **'भेददृष्ट्या'**, **'जुष्टं यदा'** इति वाक्यत्रयस्यान्वयाभावः । तथाऽपि स्वामित्वनिमित्तेनैक्यव्यपदेश इत्यत्र श्रुतिस्मृत्योरुपन्यासे सति तत्र प्राप्तशङ्कापरिहारस्याऽवश्यकत्वेनावसरसङ्गत्या तद्वाक्यत्रयप्रवृत्तेः । **'इत्यादेः'** इत्यस्यात्राऽकर्षणेन **'न विरोधः'** इत्यस्यानुकर्षणेन चान्वयो द्रष्टव्यः ॥

श्रुत्यर्थस्तु – विष्णुः **असर्वोऽपि** सर्वानात्मकोऽपि **'सर्व इव'** सर्वात्मक इव सर्वात्मकत्वेन ईयते । कुत इत्यतस्तत्रान्तर्यामित्वं हेतुत्वेनाभिप्रेत्यानन्तर्यामित्वप्रतीत्या तस्यासिद्धिमाशङ्क्याऽह – **आत्मैवेति ॥** आत्मैव अन्तर्याम्येव सन् अनात्मेव अनन्तर्यामित्वेन ईयते ज्ञायते रामकृष्णादिरूपेषु । तथा च अज्ञानमूला अनन्तर्यामित्वप्रतीतिरिति भावः ॥

ननु विष्णोरन्तर्यामित्वे प्रत्यक्त्वं स्यात् । तच्चानुपपन्नं, पराक्त्वेन प्रतीतेरित्यत आह – **प्रत्यङिति ॥** भगवान् प्रत्यङ् देहान्तर्गतोऽपि पराङिव बहिर्मात्रवृत्तित्वेनेयते । तथा च बहिर्मात्रवृत्तित्वप्रतीतिर्भ्रान्तिरिति भावः । ननु विष्णौ विरुद्धानेकधर्माभ्युपगमे भेदापत्त्या एकमेव इति श्रुतिविरोध इत्यत आह - **एक इति ॥** एक एव बहुधा बहुरूपेणेयत इत्यर्थः । तथा चैकस्यैव रूपबाहुल्यात् सर्वधर्मोपपत्तिरिति भावः । द्विर्ग्रहणात् सर्वत्र क्रियासम्बन्धः सूचितः । तत्त्वप्रदीपे तु – प्रत्यङ् पराङिव अभिमुखोऽप्यनभिमुख इव एक एव बहुधेयते ज्ञायते प्राप्यते च इत्युक्तम् ॥

अन्तर्यामित्वनिमित्तेन सर्वात्मकत्वेन व्यपदिश्यमानः किं सर्वज्ञः ? क्व च व्यपदिश्यत ? इत्यत आह – **स पुरुष इति ॥** अनेन **'पुरुष एवेदं सर्वम्'** (तै.आ. ३-१२.) इति श्रुतिमुपादत्ते । सम्पूर्णषड्गुणत्वाद् देहाख्यपुरे शयनाद्वा पुरुषसञ्ज्ञ इत्यर्थः । स्थलान्तरमाह - **स इति ॥** अनेन **'सर्वं खल्विदं ब्रह्म'** (छा. ३-१४-१.) इति श्रुतिमुपादत्ते । सः सर्वात्मकत्वेन व्यपदिश्यमानो भगवान् ब्रह्म सर्वत्र पूर्णत्वाद् ब्रह्मसञ्ज्ञ इत्यर्थः । नन्वन्यत्रादृष्टमन्तर्गतस्य बहिर्गतत्वादिकं कथं घटत इत्यत आह - **स ईश्वर इति ॥** सः हरिः यत ईश्वरः अचिन्त्यशक्त्युपेतः अतस्तस्मिन् अन्यत्राघटितमपि सर्वं घटत इति ॥

'सर्वान्तर्यामिको[1] विष्णुः सर्वनाम्नाऽभिधीयते ।

---

१. **'सर्वान्तर्यामकः' ह. ।**

एषोऽहं त्वमसौ चेति न तु सर्वस्वरूपतः ॥',

स्मृतौ कप्रत्ययः सर्वदेहगतस्यापि विष्णोरज्ञातत्वमाह । यद्वा - [१]यामो नियमनं, तत्र भव इत्यर्थे ठक्, यतो विष्णुः सर्वान्तर्यामिकः सर्वान्तर्नियामकः अत एव **'एष आत्मेति होवाच'** (छा.८-३-४) **'सोऽहमस्मि'** (ई.१६) **'तत्त्वमसि'** (छा. ६-८-७) **'योऽसावसौ पुरुषः'** (ई.१६) इति वाक्यस्थेन एषोऽहंत्वमसाविति सर्वनाम्ना सर्ववाचकसर्वनामसञ्ज्ञकशब्देन सर्वमिति नाम्ना चाभिधीयते । न तु सर्वस्वरूपत्वादित्यर्थः ॥

'नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह' *(मोक्षधर्मे)* **इत्यादेश्च ।**

श्रेष्ठत्वस्त्वैक्यार्थतयाऽपि ऐक्यश्रुतीः स्मृत्या व्याख्याति – **नैतदिति ॥** मोक्षधर्मे हि वैशम्पायनं प्रति हे ब्रह्मन् भेदवाक्याद् बहवः पुरुषाः प्रतिपत्तव्याः । ऐक्यवाक्यं तु प्रधानपुरुषपरमिति वा ? उताहो ऐक्यवाक्याद् एक एव पुरुषः, द्वैतवाक्यं तु व्यावहारिकभेदपरमिति ? तथा – पुरुषबाहुल्य-मुपेत्यैक्यवाक्यस्य श्रेष्ठपरत्वपक्षेऽपि आत्मसु किं सर्वे समाः उतैकः श्रेष्ठः ? द्वितीये कोऽसावत्र पुरुषेषु श्रेष्ठः? स कथं हि श्रेष्ठः ? तं तथा च भवान् वक्तुमर्हतीत्याशयेन कृतस्य जनमेजयप्रश्नस्य वैशम्पायनेनोक्तमुत्तरम् -

'नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह ।
बहूनां पुरुषाणां हि यथैका योनिरुच्यते ॥
तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकम् ॥'

इति । अस्यार्थः – एतन्मतं नेच्छन्ति विद्वांसः । एतदिति किमित्यतस्तद् विवृणोति – **पुरुषमेकमिति ॥** तथा च वेदाः एकमेव पुरुषं वदन्तीत्येतन्मतं ज्ञानिनो नेच्छन्तीत्यर्थः । यद्वा – एतस्मिन् जगति एकं

---

१. **'अन्तर्यामो नियमनम्' – म**

पुरुषं नेच्छन्ति, किन्तु बहवः पुरुषाः सन्तीति । तर्ह्यद्वैतश्रुतिविरोध इति न वाच्यम् । यतो बहूनां श्रेष्ठः एक एव, तत्परमैक्यवाक्यम् । बहूनां कः श्रेष्ठः ? स कथं श्रेष्ठः ? इत्यस्योत्तरमाह - **बहूनामिति ॥** हे कुरुकुलोद्वह ! एतेषां बहूनां पुरुषाणाम् आत्मनां मध्ये या योनिः यः कारणभूतः **'एका'** श्रेष्ठः यथा च श्रेष्ठ उच्यते श्रुत्यादौ **'तथा'** तेन प्रकारेण **'तं'** विश्वं पूर्णं गुणाधिकं पुरुषम् आख्यास्यामि व्याख्यास्यामीति प्रमेयदीपिकाव्यासतीर्थीयदिशा स्मृत्यर्थः ॥

अनेन पराभिमतैक्यवाक्यमुत्तमवस्त्वैक्यपरम् । तथा च सर्वोत्कृष्टं यदेकं ब्रह्म तत्त्वमसि तस्मादत्यवरोऽसि अत्यवरोऽस्मीति श्रुत्यर्थ उक्तो भवति । **'इत्यादेश्च'** इत्यस्य **'न च तत्त्वमसीत्यादिविरोधः'** इत्यनेनान्वयः ॥

उक्ता च प्राप्तिः ।
'ब्रह्मैव सन्' *(बृ. ६-४.)* **इत्यपि जीव एव ब्रह्मशब्दः ।**
उपपद्यते च विरोधे ॥

नन्वद्वैतश्रुत्यभावे कथमद्वैतं भेदश्रुत्यादिना निषिध्यते । तस्याप्रत्यक्षत्वेन श्रुतिं विना प्राप्त्यभावात् । अप्राप्तस्य च प्रतिषेधायोगाद् इत्यत आह – **उक्ता चेति ॥** चः साध्यसमुच्चये । चो यतो न च **'तत्त्वमसि'** इत्यादिना जीवेश्वरैक्यस्य **'प्राप्तिः'** श्रुत्यर्थापरिज्ञाननिमित्ता प्रसक्तिरुक्ता । अतो न तन्निषेधानुपपत्तिरित्यर्थः । नन्वेतच्छ्रुतीनामविरोधकत्वेऽपि भेदश्रुतेः **'ब्रह्मैव सन् ब्रह्माप्येति'** इति श्रुतिविरोधस्तु भविष्यति । अत्र ब्रह्मैवेत्येवकारेण जीवस्याब्रह्मतानिषेधेन तदधीनत्वादिना निमित्तेनाब्रह्मभूते ब्रह्मत्वव्यवहार इत्युक्तगतेरसम्भवादित्यत आह – **ब्रह्मैवेति ॥** अपिः समुच्चये । न केवलं तत्त्वमसीत्यादिकमविरुद्धम् । किन्तु **'ब्रह्मैव सन्'** इति बृहदारण्यवाक्यमपीत्यर्थः ॥

कुत इत्यत आह – **जीव एवेति ॥** सप्तमीयं विषयार्थे । तथा च यतो **'ब्रह्मैव सन्'** इति वाक्ये श्रुतोऽयमाद्यो ब्रह्मशब्दः **'ब्रह्माणि जीवाः सर्वेऽपि'** इति श्रुतेर्जीव एव, न परब्रह्मणि अत इत्यर्थः । यद्वा - जीव इति प्रथमान्तम् । तथा चेति वाक्ये[1] श्रुताद्यब्रह्मशब्दोक्तो जीव एव, न परब्रह्मेत्यर्थः । तथा च सः मुक्तजीवो **'ब्रह्मैव सन्'** जीव एव सन् जीवभावमविहायैव प्रलये परब्रह्माऽप्नोति । अपिहितः सन् प्रविशतीति श्रुत्यर्थोपपत्तेः नोक्तभेदव्यपदेशस्यैतच्छ्रुतिविरोध इति भावः ॥

यथोक्तं बृहद्भाष्ये -

'जीवोऽपि ब्रह्मशब्दोक्तो जडाद् बहुगुणत्वतः ।
प्राप्नोति परमं ब्रह्म प्रलये प्रलये सदा ॥' इति ।

यद्यपि मुक्तावभेदे परेणेयं श्रुतिराशङ्किता । तथैव विष्णुतत्त्वविनिर्णयटीकोक्तेः । तथा च मुक्ताविति वाच्यं, न तु प्रलय इति । तथाऽपि सर्वजीवसाधारण्याय प्रलय इत्युक्तिः ॥

ननु ब्रह्मशब्दस्य परब्रह्मण्येव मुख्यत्वान्न जीवेऽसौ युज्यत इत्यत आह - **उपपद्यत इति ॥** चोऽप्यर्थः । तथाच ब्रह्मशब्दो यद्यपि परब्रह्मणि मुख्यः, तथाऽपि **'विरोधे'** स्वीयपूर्वोत्तरवाक्यविरोधे प्रमाणान्तरविरोधे वा सति जीवेऽप्युपपद्यत इत्यर्थः । प्रकृते च **'ब्रह्माप्येति '** इत्युत्तरभाविस्ववाक्येन **'परमं साम्यम्'** इति पूर्ववाक्येन भेदग्राहिप्रत्यक्षादिना च विरोधोऽस्तीति भावः ॥

प्रमादात्मकत्वाद् बन्धस्य[2] विमुक्तत्वं च युज्यते ।

ननु तथाऽपि भेदव्यपदेशस्य **'विमुक्तश्च विमुच्यते'** (कठ.२.५.१) इति कठश्रुतिविरोधः । अत्र संसारेऽपि जीवस्य मुक्तत्वोक्त्या तदन्यथाऽनुपपत्त्या

---

१. 'वाक्यश्रुता-' म. २. 'प्रमादात्मकत्वाच्च बन्धस्य' ह.

परब्रह्मत्वावगमाद् इत्यत आह - **प्रमादेति** ॥ चशब्दोऽप्यर्थे समुच्चये च । तथा **'च'** अपि - जीवस्य परब्रह्मत्वाभावेऽपि विमुक्तत्वं विमुक्तत्ववचनं युज्यते । न केवलं ब्रह्मशब्द उपपद्यत इति चार्थः । कथम् ? **'बन्धस्य'** स्वतःकर्तृत्वभोक्तृत्वाभिमानरूपस्य जीवगतसंसारस्य **'प्रमादात्मकत्वात्'** प्रमादपदोक्ताज्ञानमूलत्वेन तन्निमित्तप्रतीतिकत्वेनास्वाभाविकत्वाद् अस्वाभाविके चाविद्यमानपदप्रयोगदर्शनादित्यर्थः । अतो न तद्विरोध इति भावः ॥

बन्धस्याज्ञानमूलत्वं च -

'उभे सत्ये क्षत्रियाद्य प्रवृत्ते मोहो मृत्युः[1]सङ्गतो यं कवीनाम् ।
प्रमादं वै मृत्युमहं ब्रवीमि तथाऽप्रमादादमृतत्वं ब्रवीमि ॥'

(महाभारते सनत्सुजातीयम्)

इति तत्त्वप्रदीपन्यायामृतोदाहृतभारतवचनसिद्धं धृतराष्ट्रं प्रति सनत्सुजातवाक्यमेतत् । हे क्षत्रियाद्य ! **'मृत्युः'** संसारतदभावरूपामृतत्वं चेत्युभे अपि सत्ये एव प्रवृत्ते । तयोर्मध्ये **'मृत्युः'** मोहः अज्ञानाधीनस्तन्मूलः । तर्हि मिथ्या स्यादित्यतो नेत्याह - **प्रमादं वा इति** ॥ अहं **'मृत्युं'** संसारं **'प्रमादं'** अस्वाभाविकं ब्रवीमि । अमृतत्वं मुक्तत्वं त्वप्रमादात् प्रमादापायाद् ब्रवीमीत्यर्थः॥

'मुक्तिर्हित्वाऽन्यथा रूपं स्वरूपेण व्यवस्थितिः ॥'
(*भागवत -२-१०-६)* इति हि भागवते ।

बन्धस्यास्वाभाविकत्वं कुतः सिद्धमित्यत आह – **मुक्तिरिति** ॥ **'अन्यथारूपम्'** अस्वाभाविकं रूपं **'हित्वा'** त्यक्त्वा **'स्वरूपेण'** निजरूपेणावस्थितिरेव मुक्तिरित्यर्थः । भागवत इत्यस्य प्रमादात्मकत्वोक्तेरित्यनेनान्वयः ॥

---

१. **'सम्मतः' – म.**

न च तत्तदनुमानविरोधः ।

ननु भेदोक्तेः श्रुतिविरोधाभावेऽपि जीवो ब्रह्माभिन्नः चेतनत्वाद् ब्रह्मवत्, भेदो मिथ्या भेदत्वाद् चन्द्रभेदवत्, विमतानि शरीराणि मद्भोगायतनानि शरीरत्वात् मच्छरीरवत् इत्यनुमानविरोधस्तु भविष्यतीत्यत आह - **न चेति** ॥ चोऽविरोधसमुच्चये । तथाच न केवलं श्रुतिविरोधाभावः, किन्तु तस्याः भेदोक्तेः तेनाद्वैतपरिकल्पितानुमानेन विरोधोऽपि नेत्यर्थः । अनेन सौत्रश्च-शब्दो व्याख्यातः ॥

सू – ॐ ॥ कामाच्च नानुमानापेक्षा ॥ ॐ ॥१८॥

यथाकामं ह्यनुमातुं शक्यते । अतो न तत्त्वे पृथगनुमानमपेक्ष्यते।

तत्र हेत्वाकाङ्क्षायां सूत्रमुपन्यस्य व्याचष्टे – **कामादिति** ॥ **'हि'** यतोऽभेदसाधनाय परोपन्यस्तम् **'अनुमानम्'** अनुमानत्वेन पराभिमतं **'पृथक्'** प्रत्यक्षादिविरुद्धं श्रुतिसाहाय्यरहितं च अतः **'तत्त्वे'** विषये ज्ञानोपलक्षकमेतत्। तत्त्वज्ञानार्थं **'नापेक्ष्यते'** तत्त्वज्ञानकारणं[1] न भवतीत्यर्थः । न चाप्रयोजकता। **'हि'** यतः **'यथाकामं'** यथेच्छम् ईश्वरो न स्वतन्त्रः चेतनत्वाद् देवदत्तवत् । जड आत्मा वस्तुत्वादित्यादिरूपेण तत्त्वेऽतत्त्वेऽप्यनुमातुं शक्यते । अतोऽनेन प्रत्यक्षादिविरुद्धस्यापि प्रमाणत्वे चेतनत्ववस्तुत्वादेरपि प्रमाणत्वं स्याद् अविशेषादिति विपक्षे बाधकतर्क उक्तो भवति ॥

सूत्रे **'कामात्'** इत्येकदेशोत्कीर्तनेन यथाकामादिति समग्रशब्दो लक्ष्यते ज्योतिश्शब्देन ज्योतिष्टोमशब्दवद् इत्याशयेन यथाकाममित्युक्तम् । हीत्यनेन

---

१. ,२. **'तत्त्वज्ञानकरणम्' – म**

पञ्चमीव्याख्याता ।**'तत्त्वे'** इत्यनेनास्मिन्नित्यस्याऽकर्षोऽध्याहारो वा ज्ञापितः । **'अनुमानम्'** इत्यनेन **'नानुमा'** इति भिन्नपदत्वं **'पृथक्'** इत्यनेन नञो विरुद्धार्थकत्वमाश्रित्य **'नानुमा'** इत्यैकपद्यं च सूचितम् । **'नापेक्ष्यते'** इत्यनेन नञ्शब्दघटितसमासमङ्गीकृत्य **'नापेक्षा'** इत्यंशो व्याख्यातः । स्मृत्यनुसारेण सूत्रे भाष्ये च तत्त्वज्ञानासाधनत्वप्रकटनाय पराभिमतानुमाने साधनगोचरेच्छा-विषयत्वनिषेधः ॥

तथा चायं सूत्रार्थः - **'अनुमा'** अनुमानत्वेन पराभिमतमभेदसाधक-मनुमानम् **'अस्मिन् तत्त्वे'** तत्त्वज्ञानार्थं **'नापेक्षा'** न अपेक्षा यस्यां सा तथोक्ता [१]तत्त्वज्ञानकारणं न भवति । कुत एतत् ? यतः इयमनुमा 'नानुमा' प्रत्यक्षादिविरुद्धानुमा । तद्विरुद्धाऽपि सदनुमा किं न स्यात् ? न स्यात् । कुतः ? [२]यथाकामात्' अस्याः । काम इच्छा, तदनुसारिप्रवृत्तिमत्त्वात् । तथा च प्रत्यक्षादिविरुद्धाया अपि प्रामाण्ये उक्तरीत्याऽतत्त्वविषये प्रवृत्ताया अनुमाया अपि प्रामाण्यं स्यात्, अविशेषादिति भावः । यत एवमतो न द्वैतश्रुतेरनुमानविरोधोऽपीति ॥

उक्तं च स्कान्दे –

'यथाकामाऽनुमा यस्मात् तस्मात् साऽनपगा श्रुतेः ।
पूर्वापराविरोधाय चेष्यते नान्यथा क्वचित् ॥' इति ।

अत्रैव स्मृतिसम्मतिमाह – **उक्तं चेति** ॥ चः समुच्चये । न केवलं सूत्रकृता, स्कान्देऽप्युक्तमिति । किमुक्तमित्यतस्तत् पठति – **यथेति** ॥ पदार्थानतिवृत्त्यर्थोऽयं यथाशब्दः । लिङ्गमार्षम् । यद्वा - नायमव्ययीभावः, किन्त्वनतिक्रान्तः कामो ययेति बहुव्रीहिसमासः । प्रवर्तत इति शेषः । अपवृत्तं

---

१. 'तत्त्वज्ञानकरणम्' – म. २ .'यथाकामत्वात्' – म.

विरुद्धं गं गमनं यस्याः सा अपगा, न अपगा अनपगा इति विग्रहः । तथा च यस्मात् **'अनुमा'** श्रुत्यादिविरुद्धं पृथगनुमानं **'यथाकामा'** काममनतिक्रम्य प्रवर्तते । पुरुषेच्छानुसारेण प्रवृत्तिमतीति यावत् । तस्मात् **'श्रुतेरनपगा'** श्रुत्यनुकूला तदविरुद्धैव सा **'पूर्वापराविरोधाय'** श्रुतेः पूर्वोत्तरवाक्यविरोध-परिहारार्थम् **'इष्यते'** अपेक्ष्यते । न केवलमतीन्द्रियार्थतत्त्वनिश्चयायेति चशब्दार्थः । क्वचिदन्यथा चेद् यत्र श्रुत्याद्यानुकूल्यं तदविरोधः, पूर्वोत्तराविरोधश्च नास्ति तत्र साऽनुमा न मानत्वेनेष्यते मूलाभावात् प्रमाणविरोधात् प्रयोजनाभावाच्चेति योजना ॥

यद्वा, श्रुतेरनपगाऽनुमा पूर्वोत्तराविरोधाय तत्त्वनिश्चयाय च कारण-तयेष्यते । नान्यथा नान्या पृथगनुमा क्वचिद्वाक्येऽपि । कुतः ? यत् साऽनुमा केवलानुमा यथाकामा तस्मादिति योज्यम् । यथाकामानुमेत्येकं पदं वा । यथाकामा च साऽनुमेति विग्रहः । तथात्वे – यस्मादेषाऽनपगा न तस्मात् सा नोक्तफलार्थमपेक्ष्यते । **'अन्यथा'** युक्तिं विना नैत्यावृत्त्याऽन्वयः । अत एव सुधायां **'यथायोग्याखिलज्ञता'** इत्येकं पदमित्युक्तम् । इतिशब्दस्य स्कान्द इत्यनेनान्वयः ॥

'नैषा तर्केण मतिरापनेया' *(कठ. २-९.)* **इति च ॥**

स्पष्टोक्तित्वात् प्रथमं स्मृतिमुपन्यस्यात्रैवार्थे श्रुतिसम्मतिं चाऽह - **नैषेति ॥** आऽपनेयेत्यत्र आ अपेति विच्छेदः । विरुद्धार्थयोरुपसर्गयोः क्रमेण सम्बन्धः । तथा च **'एषा'** परब्रह्मविषया **'मतिः'** शुष्कतर्केण **'आनेया'** उत्पाद्या **'अपनेया'** निराकार्या च न भवतीत्यर्थः । **'प्रोक्ताऽन्येन सुज्ञानाय प्रेष्ठ'** इति वाक्यशेषः । प्रेष्ठेति नचिकेतसं प्रति यमस्य सम्बुद्धिः । **'अन्येन'** अन्यत्वज्ञानिना जीवेश्वरादिभेदज्ञानिना भगवद्भक्त्यादिमतेति यावत् । आचार्येण **'प्रोक्ता'** तदुपदेशाज्ज्ञाता **'सुज्ञानाय'** स्यादित्यर्थः । इति चेति चः समुच्चये । तथा च इति कठश्रुतौ चोक्तमिति सम्बन्धः ॥

ॐ ॥ अस्मिन्नस्य च तद्योगं शास्ति ॥ ॐ ॥१९॥

अस्य जीवस्य । युक्तिसमुच्चये चशब्दः ।

'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' *(तै. २-१.)*

'अनिलयनेऽभयं प्रतिष्ठां विन्दते' *(तै. २-७.)*

'एतमानन्दमयमात्मानमुपसङ्क्रामति' *(तै.२-८)* **॥इत्यादि ॥६॥**

॥ इत्यानन्दमयाधिकरणम् ॥

नन्वस्त्वानन्दमयेन ब्रह्मणा हिरण्यगर्भादिजीवानां भेदः । तथाऽपि सः व्यावहारिकः संसार एवास्ति, न पारमार्थिको मुक्तावपि । उदाहृतश्रुतीनां सांसारिकभेदपरत्वोपपत्तेरित्याशङ्कां परिहरत् सूत्रं पठति – **अस्मिन्निति ॥** अत्रास्येति नाऽनन्दमयपरामर्शः । किन्तु नेतर इत्युक्तजीवस्येत्याह – **अस्येति ॥** अस्यान्यस्य चेति प्रतीतिनिरासाय चशब्दं व्याख्याति – **युक्तीति ॥** अस्तीति शेषः ॥

किं तद्योगशासनमित्यत आह – **सोऽश्नुत इति ॥** क्रियाविशेषणमेतत् । लुप्तविभक्तिको वा निर्देशः । तथा च **'इत्यादि शास्ति'** इत्यादिना शास्तीति वाऽन्वयः । अनेन न केवलं भेदव्यपदेशादानन्दमयेन जीवानां भेदः सिद्धः । किं नाम ? यतोऽस्मिन् प्रकरणेऽस्य जीवस्यानेनाऽनन्दमयेन सह **'अस्मिंश्च'** मोक्षेऽपि **'योगं'** सम्बन्धं श्रुतिः शास्ति अतोऽपि । अतो न तदैक्यं जीवानां, नापि सांसारिक एव भेदः । न चैतावता कथं भेदसिद्धिः । सम्बन्धस्य भेदसापेक्षत्वात् ॥

यद्वा - यस्मात् **'अस्मिन्'** प्रकरणद्वयेऽपि **'अस्य'** जीवस्य **'तद्योगं'** तैरानन्दमयाद्यैर्योगं सम्बन्धं **'शास्ति'** प्रतिपादयति फलत्वेन श्रुतिरिति शेषः । तस्मादानन्दमयो न जीवकोशादिरिति सूत्रार्थ उक्तो भवति ॥

'सः' ब्रह्मज्ञानी **'विपश्चिता'** सर्वज्ञेन ज्ञातेनैव **'परब्रह्मणा'** चतुर्मुखेन च सह **'सर्वान्'** स्वयोग्यकामान् **'अश्नुते'** मुक्तौ प्राप्नोतीति श्रुत्यर्थः ॥

'अदृश्येऽनात्म्ये' इति वाक्यं तु प्रागेव व्याख्यातम् ॥

देहादुत्क्रान्तो जीवः **'एतम्'** **'आनन्दमयं'** पूर्णानन्दं परमात्मानं **'उपसङ्क्रामति'** तत्समीपं प्राप्नोतीत्यनुवाकान्तरगततृतीयवाक्यस्यार्थः ॥

॥ इत्यानन्दमयाधिकरणम् ॥

ॐ ॥ अस्मिन्नस्य च तद्योगं शास्ति ॥ ॐ ॥१९॥

अस्य जीवस्य । युक्तिसमुच्चये चशब्दः ।

'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' *(तै. २-१.)*

'अनिलयनेऽभयं प्रतिष्ठां विन्दते' *(तै. २-७.)*

'एतमानन्दमयमात्मानमुपसङ्क्रामति' *(तै.२-८)* **॥इत्यादि ॥६॥**

॥ इत्यानन्दमयाधिकरणम् ॥

नन्वस्त्वानन्दमयेन ब्रह्मणा हिरण्यगर्भादिजीवानां भेदः । तथाऽपि सः व्यावहारिकः संसार एवास्ति, न पारमार्थिको मुक्तावपि । उदाहृतश्रुतीनां सांसारिकभेदपरत्वोपपत्तेरित्याशङ्कां परिहरत् सूत्रं पठति – **अस्मिन्निति ॥** अत्रास्येति नाऽनन्दमयपरामर्शः । किन्तु नेतर इत्युक्तजीवस्येत्याह – **अस्येति ॥** अस्यान्यस्य चेति प्रतीतिनिरासाय चशब्दं व्याख्याति – **युक्तीति ॥** अस्तीति शेषः ॥

किं तद्योगशासनमित्यत आह – **सोऽश्नुत इति ॥** क्रियाविशेषणमेतत् । लुप्तविभक्तिको वा निर्देशः । तथा च **'इत्यादि शास्ति'** इत्यादिना शास्तीति वाऽन्वयः । अनेन न केवलं भेदव्यपदेशादानन्दमयेन जीवानां भेदः सिद्धः । किं नाम ? यतोऽस्मिन् प्रकरणेऽस्य जीवस्यानेनाऽनन्दमयेन सह **'अस्मिंश्च'** मोक्षेऽपि **'योगं'** सम्बन्धं श्रुतिः शास्ति अतोऽपि । अतो न तदैक्यं जीवानां, नापि सांसारिक एव भेदः । न चैतावता कथं भेदसिद्धिः । सम्बन्धस्य भेदसापेक्षत्वात् ॥

यद्वा - यस्मात् **'अस्मिन्'** प्रकरणद्वयेऽपि **'अस्य'** जीवस्य **'तद्योगं'** तैरानन्दमयाद्यैर्योगं सम्बन्धं **'शास्ति'** प्रतिपादयति फलत्वेन श्रुतिरिति शेषः । तस्मादानन्दमयो न जीवकोशादिरिति सूत्रार्थ उक्तो भवति ॥

'सः' ब्रह्मज्ञानी **'विपश्चिता'** सर्वज्ञेन ज्ञातेनैव **'परब्रह्मणा'** चतुर्मुखेन च सह **'सर्वान्'** स्वयोग्यकामान् **'अश्नुते'** मुक्तौ प्राप्नोतीति श्रुत्यर्थः ॥

'अदृश्येऽनात्म्ये' इति वाक्यं तु प्रागेव व्याख्यातम् ॥

देहादुत्क्रान्तो जीवः **'एतम्'** **'आनन्दमयं'** पूर्णानन्दं परमात्मानं **'उपसङ्क्रामति'** तत्समीपं प्राप्नोतीत्यनुवाकान्तरगततृतीयवाक्यस्यार्थः ॥

॥ इत्यानन्दमयाधिकरणम् ॥

॥ ७. अथान्तस्स्थत्वाधिकरणम् ॥

(श्रुत्युक्तो देहान्तःस्थो विष्णुरेव)

'अदृश्येऽनात्म्ये' इत्युक्तम् । तच्चादृश्यत्वम् - 'अन्तः प्रविष्टं कर्तारमेतम् । अन्तश्चन्द्रमसि मनसा चरन्तम् । सहैव सन्तं न विजानन्ति देवाः' *(तै. आ. ३-११.)* **इत्यन्तःस्थस्य कस्यचिदुच्यते ।**

अत्राधिकरणे अधिदैवगतान्यत्रप्रसिद्धेन्द्रादिनामसमन्वयसिद्ध्यर्थं देहान्तःस्थत्वरूपलिङ्गसमन्वयः क्रियत इति शास्त्राध्यायपादसङ्गतयः सिद्धा इत्याशयेन पूर्वाधिकरणतद्विषयवाक्यसङ्गती दर्शयति - **अदृश्य इति** ॥ पूर्वाधिकरणोदाहृते **'अदृश्ये अनात्म्ये'** इति वाक्ये आनन्दमयस्य कात्स्न्र्येनाज्ञेयत्वरूपमदृश्यत्वमुक्तमित्यर्थः ।ततः किमित्यत आह - **तच्चेति॥ चशब्द** एवार्थे ॥ तथा च यत्पूर्वोक्तमदृश्यत्वं तदेव **'अन्तःप्रविष्टम्'** इति वाक्ये न विजानन्तीत्यनेन कस्यचिदन्तःस्थस्योच्यते । देवाज्ञेयत्वात् कैमुत्येन प्रतिपाद्यत इत्यर्थः । अनेनान्तःस्थत्वमुखेनादृश्यत्वानन्दमयत्वयोरन्यनिष्ठत्वाक्षेप्रात् पूर्वाधिकरणेनास्याऽक्षेपिकी सङ्गतिरुक्ता भवति । हृदयगुहान्तःप्रविष्टं जगत्कर्तारं चन्द्रमस्यन्तर्मनसा स्वेच्छया चरन्तं सहैव स्थितम् एतं देवास्तत्त्वाभिमानिनः कात्स्न्र्येन न विजानन्तीति श्रुत्यर्थः । पूर्वपक्षे त्वियमन्यपरा॥

स च 'इन्द्रो राजा' *(तै.आ.३-११-६)*
'सप्त युञ्जन्ति' *(तै.आ.३.११.८)* **इत्यादिभिरन्यः प्रतीयते ।**

तत्र सयुक्तिकं पूर्वपक्षमाह – **स चेति** ॥ चशब्दोऽवधारणे । अन्य इत्यावर्तते । तथा च सोऽन्तस्स्थो विष्णोः **'अन्यः'** अन्य एव भवेत्, कुतः ? **'इन्द्रो राजा'** इत्यादिवाक्यैर्यतोऽन्योऽन्तःस्थतया प्रतीयत अत इति योजना । आदिशब्देन –

'अपां नेतारं भुवनस्य गोपाम्। त्वष्टारं रूपाणि विकुर्वन्तं विपश्चितम्[1]।

ब्रह्मेन्द्रमग्निं जगतः प्रतिष्ठां दिव आत्मानं सवितारं बृहस्पतिम्।

चतुर्होतारं प्रदिशोऽनुक्लप्तं वाचो वीर्यं तपसाऽन्वविन्दत्॥'

इत्यादि वरुणत्वष्ट्रग्न्यादिप्रापकतत्तच्छ्रुतिलिङ्गघटिततैत्तिरीयवाक्यानि गृह्यन्ते॥

तस्मात् स एवाऽनन्दमय इति न मन्तव्यम्॥

पूर्वपक्षफलमाह – **तस्मादिति॥** इदं चाऽवर्तते। प्रसज्यत इति शेषः। तथा च **'तस्मात्'** अन्तःस्थस्य विष्ण्वन्यत्वात् **'सः'** अदृश्योऽन्य एव प्रसज्यते। तस्मादन्यस्यादृश्यत्वात् **'सोऽन्य एव'** इन्द्राद्यन्यतम आनन्दमयः प्रसज्यते न विष्णुरिति योजना। राजा य इन्द्रो जगतः **'ईशे'** ईष्टे जगदीश्वरत्वेन वर्तत इत्यर्थः। यस्मादीशे ईष्टे तस्माज्जगतो राजेति वा। एतदुत्तरस्य **'सप्तहोता'** इति पदस्य सप्त बुद्धीन्द्रियाणि विषयेषु जीवेन जुहोतीति सप्तहोता। विषयानिन्द्रियैः जीवेन वेत्यर्थः॥

'सप्त युञ्जन्ति' इति वाक्ये आद्यार्धस्य **'सप्त'** छन्दांसि गायत्र्यादीनि अश्वरूपाणि **'एकचक्रं'** सूर्यरथं प्रति स्वात्मानं युञ्जन्ति रथे युक्तानि भवन्तीत्यर्थः। सप्तच्छन्दोऽभिमानिना पृथग्वेदाभिमानी सप्तच्छन्दोनामा एकः प्रधानोऽश्वोऽस्ति। **'छन्दोऽभिमानिना पृथग्वेदाभिमानी सप्तच्छन्दोनामा सप्तस्वेकोऽस्ति'** इति तत्त्वप्रदीपोक्तेः। अत एव **'सप्त युञ्जन्ति .... एको अश्वो वहति सप्तनामा'** इत्यनयोर्न विरोधः। सूर्यरथचक्रस्य स्थितिमाह - **त्रिनाभीति॥** त्रिरावृत्तमासचतुष्टयात्मकनाभित्रयोपेतम् **'अजरं'** सदा दृढम्

---

१. **'विपश्चिम्'** इति मुद्रितपाठः।

अर्वशब्दितेभ्यो वाजिभ्यो दूरस्थत्वादनर्वं चक्रं सूर्यरथस्यास्तीत्यर्थः । चक्रस्य मानसोत्तरगिरिशिखरवलयपरिवर्तित्वाद् अर्वतां मेरुमानसोत्तरमध्याकाशगामित्वाद् दूरस्थत्वं युक्तम् । येन **'यत्र'** चक्रे **'इमा'** इमानि विश्वानि सर्वाणि भुवनानि **'तस्थुः'** स्थिता इत्युत्तरार्धस्यार्थः । जगतः **'प्रतिष्ठाम्'** आश्रयं **'चतुर्होतारम्'** अन्तःकरणचतुष्टये विषयाणां होतारं **'प्रदिशः'** प्रतिदिशम् **'अनुक्लप्तं'** व्यवस्थितं **'वाचः'** वेदस्य **'वीर्यं'** सारं मुख्यार्थम् **'इन्द्रम् अग्निं'** **'दिवो'** देव्याः **'आत्मानं'** स्वामिनं वायुं **'सवितारं बृहस्पतिं'** **'ब्रह्मा'** हिरण्यगर्भः तपसा **'अन्वविन्दत्'** लब्धवानित्यर्थः । सिद्धान्तयति – **इतीति** ॥

सू - ॐ ॥ अन्तस्तद्धर्मोपदेशात् ॥ ॐ ॥ २० ॥

अन्तः श्रूयमाणो विष्णुरेव । 'अन्तस्समुद्रे मनसा चरन्तम् । ब्रह्मान्वविन्दद् दशहोतारमर्णे' *(तै.उ. ३-११-१.)* **'समुद्रे अन्तः कवयो विचक्षते मरीचीनां पदमिच्छन्ति वेधसः'** *(तै.आ. ३-११-११.)* **'यस्याण्डकोशं शुष्ममाहुः'** *(तै.आ. ३-११-४.)* **इत्यादि तद्धर्मोपदेशात् ।**

कुतो न मन्तव्यमित्यतस्तत्र हेतुत्वेन सूत्रमुपन्यस्य व्याचष्टे – **अन्तरिति** ॥ सूत्रेऽन्तरित्युद्देश्यभागेऽपेक्षितं पदमध्याहृत्य दर्शयति – **श्रूयमाण इति** ॥ अन्तस्स्थत्वेन श्रुत्योच्यमान इत्यर्थः । विधेयसमर्पकस्यानुवृत्तस्य तत्तु, इत्यस्यार्थमाह – **विष्णुरेवेति** । तैत्तिरीयोपनिषद्गतभिन्नभिन्नवाक्योदाहरणपूर्वकं हेत्वंशं व्याचष्टे – **अन्तरिति** ॥ **इत्यादीति** ॥ तस्य धर्मास्तद्धर्माः, तेषामुपदेशो वचनम् इत्यादिरूपश्चासौ तद्धर्मोपदेशश्च इत्यादितद्धर्मोपदेशः तस्मादित्यर्थः । यद्वा – लुप्तविभक्तिकोऽयं निर्देशः । तथा चेत्यादेरुपदेशादित्यर्थः । समुदायैकवचनमेतत् ॥

अनेन **'अन्तःप्रविष्टम्'** इति वाक्ये **'अन्तःश्रूयमाणः'** हृदयान्तस्स्थत्वेन श्रुत्युक्तो विष्णुरेव, न त्वन्यः । कुतः ? तस्य विष्णोर्धर्माणां क्षीरप्रलयाब्धिस्थत्व, ब्रह्मज्ञेयत्व, ब्रह्मतपोलभ्यत्व, ब्रह्माण्डवीर्यत्वादिरूपाणां **'तस्मिन्'** अन्तःश्रुते तेनान्तरित्यादिना **'उपदेशात्'** उक्तत्वादिति सूत्रार्थ उक्तो भवति ॥

उपदेशादित्यन्तस्य सूत्रस्य तस्मादन्य एवेति न मन्तव्यमित्यनेनान्वयः । **'ब्रह्मा'** वर्तमानचतुर्मुखः **'समुद्रे'** प्रलयाब्धौ क्षीराब्धौ च **'अन्तरर्णे'** जले क्षीरे च **'मनसा'** स्वेच्छया सञ्चरन्तं **'दशहोतारं'** ज्ञानकर्माख्यदशेन्द्रियेषु विषयहोतारं तत्तद्विषयस्थापकं दशेन्द्रियाणि जीवेन विषयेषु जुह्वतं वा विष्णुम् **'अन्वविन्दत्'** व्यजानात् । **'कवयः'** ज्ञानिनः **'समुद्रे'** क्षीरप्रलयाब्ध्योरन्तःस्थितं विचक्षते जानन्ति । **'वेधसः'** भूतभविष्यद्ब्रह्माणः **'मरीचिर्मितरुक्त्वतः'** इति छान्दोग्यभाष्योक्तेः । प्रमितरुक्त्वनिमित्तात् मरीचिपदोक्तानां जीवानां पदम् आश्रयं विष्णुम् इच्छन्ति प्रार्थयन्ति । तत्त्वप्रदीपरीत्या **'कवयः'** सन्तः **'वेधसो'** विचक्षते विचक्षणाय ज्ञानाय मरीचीनां पदं विष्णुम् इच्छन्तीत्येकान्वयो वा । कवयः **'अण्डकोशं'** ब्रह्माण्डाख्यस्थानं **'यस्य'** विष्णोः **'शुष्मं'** वीर्यं तदुपादानकमाहुरिति श्रुत्यर्थः । विरिञ्चिवाक्यस्यास्य **'प्राण उल्बं तेन क्लप्तोऽमृतेनाहमस्मि'** इति वाक्यशेषः । तस्य **'उल्बं'** जरायुः **'प्राणः'** अन्तःप्रावरणं येन सहैव जायते ।**'तेन'** अमृतेन **'अहं'** क्लप्तोऽस्मीत्यर्थस्तत्त्वप्रदीपेऽभिहितः॥

स हि क्षीरसमुद्रशायी । तस्य च वीर्यमण्डकोशः ।

क्षीरसमुद्रस्थत्वस्य विष्णुलिङ्गत्वं कुत इत्यत आह – **स हीति ॥ 'सः'** विष्णुः हिशब्देन लोकप्रसिद्धत्वादिति हेतुः सूचितः ॥ अस्तु विष्णोः क्षीराब्धिस्थत्वं लिङ्गं; प्रसिद्धत्वात्, तथाऽपि प्रलयार्णवस्थत्वस्य ब्रह्माण्डवीर्यत्वस्य च कुतो विष्णुधर्मत्वमित्यतस्तयोर्विष्णुधर्मत्वे प्रमाणं वक्तुं

प्रतिजानीते – **तस्येति** ॥ **'अण्डकोशः'** ब्रह्माण्डाख्यस्थानं **'तस्य'** विष्णोर्वीर्यमित्यर्थः । चशब्दात् सः प्रलयसमुद्रशायीति प्रतिज्ञा सूच्यते । तस्यैवेत्यवधारणे वा चशब्दः । तथात्वे प्रतिज्ञान्तरमुपलक्षणीयम् । अत एव प्रलयाब्धिशायित्वे **'आपो नाराः'** इति पश्चात् प्रमाणोपन्यासः श्रुतावण्डकोशशब्दश्रवणेऽपि प्रत्ययस्य स्वार्थिकत्वाद् तत्त्यागेनाण्डकोश इत्येवानूदितम् । श्रुतावपि तथैव छेदो वा ॥

'सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जाऽदौ तासु वीर्यमवासृजत् ।
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
यस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ।
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥' इति व्यासस्मृतेः ।

'सः' वासुदेवाद् जातो विष्णुः **'स्वात्'** स्वकीयाच्छरीरात् विविधाः प्रजाः **'सिसृक्षुः'** स्रष्टुमिच्छुः **'अभिध्याय'** विचिन्त्य **'आदौ'** अण्डसृष्टेः पूर्वमेव **'अपः'** तदावरणरूपाः ससर्ज । तास्वप्सु वीर्यम् **'अवासृजत्'** न्यधात् मायाद्वारेति शेषः । **'हैमं'** हिरण्यात्मकं **'सहस्रांशुसमप्रभं'** सूर्यसमप्रकाशं **'तत्'** वीर्यं ब्रह्माण्डाख्यमभवत् । **'यस्मिन्'** अण्डे **'सर्वलोकपितामहः'** ब्रह्मा चतुर्मुखः **'स्वयं'** स्वतन्त्राद् हरेः साक्षाज्जज्ञे इत्यर्थः । यतः आपः **'नरसूनवः'** नरस्य विष्णोः सूनवः । **'विष्णुर्नरो नाशात् परो यतः'** इति भागवततात्पर्योक्तेः । अतो नाराः प्रोक्ताः येन कारणेन **'पूर्वं'** प्रलये **'ताः'** आपः तस्य विष्णोरयनं **'तेन सः नारायणः स्मृतः'** तच्छब्दवाच्यत्वेन स्मृत्युक्त इत्यर्थः ॥

यद्यपि - **'पुरुषोऽण्डं विनिर्भिद्य यदादौ स विनिर्गतः ।**

आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः ॥' *इति भागवते ।*

'अण्डं प्रविष्टो यो विष्णुः सोऽण्डं भित्त्वा प्रकाशितः ।
सोऽपोऽसृजत्ततो नाराः . . . . ॥'

इति भागवततात्पर्ये चाण्डसृष्ट्यनन्तरम् अप्सृष्टिरुच्यते । तथाऽपि सा बहिःसृष्टेरन्याऽऽन्तरेति न विरोधः । इतीत्यस्य 'तस्य च वीर्यमण्डकोशः, स हि प्रलयसमुद्रशायी यतः' इति पूर्वेणान्वयः ॥

'अहं तत्तेजो रश्मीन्नारायणं पुरुषं जातमग्रतः ।
पुरुषात् प्रकृतिर्जगदण्डम्' इति चतुर्वेदशिखायाम् ॥ २० ॥

इतश्च ब्रह्माण्डजनकवीर्यत्वं प्रलयस्थत्वं च तस्यैव ज्ञायत इत्याह - **अहमिति ॥ 'त्रिपुरुषं मायाबीजमजायत्'** इति वाक्यशेषः । तदिति व्याप्तिवचनोऽसर्वनामशब्दः । अथवा सर्वनामशब्दः, अत एव टीकायां तदहेयमिति व्युत्क्रमः कृतः । तथा च तत्प्रसिद्धं व्याप्तं वा **'अहम्'** अहेयं रतिः शं च मितमस्येति रश्मिर्जीवः तमिन्दयति प्रेरयतीति रश्मीद् जीवप्रेरकं, **'इन्द प्रेरणे'** इति धातोरयं दकारान्तः शब्दः । अनुकृत्यधिकरणे तु - इन्धी दीप्ताविति धातुव्याख्यानाद् रश्मीद् भगवदपेक्षया रश्मिरूपाणाम् अल्पानां सूर्यादितेजसां प्रकाशकमिति व्याख्यातम्, तत्र धकारान्तोऽग्रीच्छब्दवदयं शब्दो ज्ञातव्यः । **'तेजः'** जगत्प्रकाशकं **'पुरुषं'** पूर्णषड्गुणं नारायणं तदाख्यं ब्रह्म तेज इति वा । **'अग्रतः'** प्रलये **'जातं'** स्थितं तस्मान्नारायणाख्यपुरुषात् **'अग्रतः'** प्रथमं **'प्रकृतिः'** चेतना जायते गच्छतीति जगद् जीवसमुदायः, जातमित्यस्योभयत्र यथायोग्यं सम्बन्धः । जनिश्च यथायोग्या ग्राह्या । पश्चात् **'अण्डं च' 'त्रिपुरुषं'** ब्रह्मवायुरुद्राख्यपुरुषत्रययुक्तं **'मायाबीजं'** प्रकृत्युपादानकम् अजायतेति तत्त्वप्रदीपदिशा श्रुत्यर्थः । चतुर्वेदशिखायाम् इत्यस्य वचनादित्यध्याहारेण तस्येत्यनेनान्वयः ॥

प्रतिजानीते – **तस्येति** ॥ **'अण्डकोशः'** ब्रह्माण्डाख्यस्थानं **'तस्य'** विष्णोर्वीर्यमित्यर्थः । चशब्दात् सः प्रलयसमुद्रशायीति प्रतिज्ञा सूच्यते । तस्यैवेत्यवधारणे वा चशब्दः । तथात्वे प्रतिज्ञान्तरमुपलक्षणीयम् । अत एव प्रलयाब्धिशायित्वे **'आपो नाराः'** इति पश्चात् प्रमाणोपन्यासः श्रुतावण्डकोशशब्दश्रवणेऽपि प्रत्ययस्य स्वार्थिकत्वाद्, तत्त्यागेनाण्डकोश इत्येवानूदितम् । श्रुतावपि तथैव छेदो वा ॥

'सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जाऽदौ तासु वीर्यमवासृजत् ।
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
यस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ।
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥' इति व्यासस्मृतेः ।

'सः' वासुदेवाद् जातो विष्णुः **'स्वात्'** स्वकीयाच्छरीरात् विविधाः प्रजाः **'सिसृक्षुः'** स्रष्टुमिच्छुः **'अभिध्याय'** विचिन्त्य **'आदौ'** अण्डसृष्टेः पूर्वमेव **'अपः'** तदावरणरूपाः ससर्ज । तास्वप्सु वीर्यम् **'अवासृजत्'** न्यधात् मायाद्वारेति शेषः । **'हैमं'** हिरण्यात्मकं **'सहस्रांशुसमप्रभं'** सूर्यसमप्रकाशं **'तत्'** वीर्यं ब्रह्माण्डाख्यमभवत् । **'यस्मिन्'** अण्डे **'सर्वलोकपितामहः'** ब्रह्मा चतुर्मुखः **'स्वयं'** स्वतन्त्राद् हरेः साक्षाज्जज्ञे इत्यर्थः । यतः आपः **'नरसूनवः'** नरस्य विष्णोः सूनवः । **'विष्णुर्नरो नाशात् परो यतः'** इति भागवततात्पर्योक्तेः । अतो नाराः प्रोक्ताः येन कारणेन **'पूर्वं'** प्रलये **'ताः'** आपः तस्य विष्णोरयनं **'तेन सः नारायणः स्मृतः'** तच्छब्दवाच्यत्वेन स्मृत्युक्त इत्यर्थः ॥

यद्यपि - **'पुरुषोऽण्डं विनिर्भिद्य यदादौ स विनिर्गतः ।**

आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः ॥' *इति भागवते ।*

'अण्डं प्रविष्टो यो विष्णुः सोऽण्डं भित्त्वा प्रकाशितः ।
सोऽपोऽसृजत्ततो नाराः . . . . ॥'

इति भागवततात्पर्ये चाण्डसृष्ट्यनन्तरम् अप्सृष्टिरुच्यते । तथाऽपि सा बहिःसृष्टेरन्याऽऽन्तरेति न विरोधः । इतीत्यस्य 'तस्य च वीर्यमण्डकोशः, स हि प्रलयसमुद्रशायी यतः' इति पूर्वेणान्वयः ॥

'अहं तत्तेजो रश्मीन्नारायणं पुरुषं जातमग्रतः ।
पुरुषात् प्रकृतिर्जगदण्डम्' इति चतुर्वेदशिखायाम् ॥ २० ॥

इतश्च ब्रह्माण्डजनकवीर्यत्वं प्रलयस्थत्वं च तस्यैव ज्ञायत इत्याह - **अहमिति ॥ 'त्रिपुरुषं मायाबीजमजायत्'** इति वाक्यशेषः । तदिति व्याप्तिवचनोऽसर्वनामशब्दः । अथवा सर्वनामशब्दः, अत एव टीकायां तदहेयमिति व्युत्क्रमः कृतः । तथा च तत्प्रसिद्धं व्याप्तं वा **'अहम्'** अहेयं रतिः शं च मितमस्येति रश्मिर्जीवः तमिन्दयति प्रेरयतीति रश्मीद् जीवप्रेरकं, **'इन्द प्रेरणे'** इति धातोरयं दकारान्तः शब्दः । अनुकृत्यधिकरणे तु - इन्धी दीप्ताविति धातुव्याख्यानाद् रश्मीद् भगवदपेक्षया रश्मिरूपाणाम् अल्पानां सूर्यादितेजसां प्रकाशकमिति व्याख्यातम्, तत्र धकारान्तोऽग्रीच्छब्दवदयं शब्दो ज्ञातव्यः । **'तेजः'** जगत्प्रकाशकं **'पुरुषं'** पूर्णषड्गुणं नारायणं तदाख्यं ब्रह्म तेज इति वा । **'अग्रतः'** प्रलये **'जातं'** स्थितं तस्मान्नारायणाख्यपुरुषात् **'अग्रतः'** प्रथमं **'प्रकृतिः'** चेतना जायते गच्छतीति जगद् जीवसमुदायः, जातमित्यस्योभयत्र यथायोग्यं सम्बन्धः । जनिश्च यथायोग्या ग्राह्या । पश्चात् **'अण्डं च' 'त्रिपुरुषं'** ब्रह्मवायुरुद्राख्यपुरुषत्रययुक्तं **'मायाबीजं'** प्रकृत्युपादानकम् अजायतेति तत्त्वप्रदीपदिशा श्रुत्यर्थः । चतुर्वेदशिखायाम् इत्यस्य वचनादित्यध्याहारेण तस्येत्यनेनान्वयः ॥

सू - ॐ ॥ भेदव्यपदेशाच्चान्यः ॥ ॐ ॥ २१ ॥

'इन्द्रस्याऽत्मा निहितः पञ्च होता'
'वायोरात्मानं कवयो निचिक्युः',
'अन्तरादित्ये मनसा चरन्तम्, देवानाꣳ हृदयं
ब्रह्मान्वविन्दत्' *(तै.आ. ३-११)* **इत्यादिभेदव्यपदेशात् ॥ २१ ॥**

॥ इत्यन्तस्थत्वाधिकरणम् ॥ ७ ॥

यद्येवं समुद्रस्थत्वादिलिङ्गादन्तस्स्थो विष्णुः, तर्हि तेनान्तस्स्थेन विष्णुना इन्द्रादीनामभेदोऽत्र विवक्षितोऽस्तु । इन्द्रादिप्रापकश्रुत्यादेरपि सद्भावात् । श्रुत्यादेश्च स्वभावतो लिङ्गस्य निरवकाशतया बलवत्त्वेनान्यतर-बाधेनान्यतरपक्षनिर्णयायोगात् । एवं च पूर्वोत्तरपक्षद्वयेऽन्योन्यं बाध्यबाधक-भावशून्ये सति तदन्यथानुपपत्त्या अन्तःस्थेन विष्णुनेन्द्रादीनामभेदः प्राप्त इत्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे - **भेदेति** ॥ तैत्तिरीये - **'इन्द्रस्य'** इत्येको भेदव्यपदेशः । **'वायोः'** इत्यन्यः । **'अन्तः'** इत्यपरः । **'देवानाम्'** इति चेतरः । आदिशब्देन **'अमृतं देवानामायुः प्रजानामिन्द्रं राजानं सवितारम्'** इत्यादिकं गृह्यते । व्यपदेशादित्यस्यान्य इति सौत्रप्रतिज्ञयाऽन्वयः ॥

अनेन सूत्रे विधेयसमुच्चयार्थकचशब्दस्य भिन्नक्रमेणान्वयेन न केवलमन्तश्श्रूयमाणो विष्णुः, किन्त्विन्द्रादिभ्योऽन्यश्च । कुतः ? तस्येन्द्रा-द्यन्तर्यामित्वतदन्तस्स्थत्वकथनेन तेभ्यो भेदोक्तेरिति सूत्रार्थ उक्तो भवति ॥

अत्र श्रुताविन्द्रशब्दोऽन्यपरः; षष्ठीश्रवणात् । **'इन्द्रो राजा'** इत्यादौ तु इन्द्रादिशब्दाः परममुख्यवृत्त्या विष्णुपरा एव, बाधकाभावात् ॥

तथा च मनो विहाय पञ्चसु ज्ञानेन्द्रियेषु शब्दादिविषयहोता तैर्विषयानुभावकः । इन्द्रस्याऽत्मा अन्तर्यामी आदानादिकर्ता वा । सर्वहृदयेषु

'निहितः' सन्निहितः **'कवयः'** ज्ञानिनः **'वायोरात्मानं निचिक्युः'** ददृशुः आदित्येऽन्तः **'मनसा'** स्वेच्छया सञ्चरन्तं विष्णुं कवयोऽन्वविन्दन् । **'ब्रह्मा'** चतुर्मुखः देवानां हृद्यनात् स्थितेः प्रवर्तनाद्वा हृदयं विष्णुम् **'अन्वविन्दत्'** अपश्यदिति श्रुत्यर्थः ॥

॥ इत्यन्तस्स्थत्वाधिकरणम् ॥ ७ ॥

॥ ८. अथाऽकाशाधिकरणम् ॥

(कतिपयश्रुत्युक्ताकाशशब्दवाच्यो भगवानेवेति समर्थनम्)

'को ह्येवान्यात् कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात्' *(तै. २-७.)* इति आकाशस्याऽनन्दमयत्वे[1] हेतुरुक्तः, न तु विष्णोः ।

॥ ८. अथ आकाशाधिकरणम् ॥

अत्राधिकरणे भगवति लोकतोऽन्यत्रप्रसिद्धाकाशपदोपलक्षिताधिभौतिकाशेषशब्दसमन्वयः क्रियते । फलकथनेन पूर्वपक्षः सूचितो भवतीत्याशयेन पूर्वपक्षफलमाह – **को हीति ॥ इतीति ॥** इत्यानन्दमयाधिकरणोदाहृतवाक्येनेत्यर्थः । तुशब्दस्याऽकाशस्य त्विति सम्बन्धः । तथा च छन्दोगश्रुत्युक्ताकाशाभिन्नाकाशस्यैवेत्यर्थः । **'आनन्दमयत्वे'** पूर्णानन्दत्वेन निमित्तेन आनन्दमयशब्दवाच्यत्वे **'हेतुः'** लोकचेष्टकत्वरूपः । तुशब्दार्थैवकारव्यावर्त्यमाह- **नेति ॥** अनेन विष्णुभिन्नभूताकाशस्यैव छन्दोगश्रुत्युक्ताकाशशब्दवाच्यत्वमिति पूर्वपक्षे **'को हि'** इति तैत्तिरीयश्रुत्युक्तोऽपि स एवेति तदुक्तहेतुना तस्यैवाऽनन्दमयत्वं सिद्ध्यति, न विष्णोरिति फलमुक्तं भवति ॥

पूर्वसङ्गतिस्त्वधिकाशङ्कां[2] कृत्वाऽत्र पूर्वन्याय एवातिदिश्यत इत्यातिदेशिकी द्रष्टव्या ॥

इति न मन्तव्यम् । यतः –

---

१. 'आनन्दत्वे' ह ।

२. '-धिकां शङ्कां' – म.

सू - ॐ ॥ आकाशस्तल्लिङ्गात् ॥ ॐ ॥ २२ ॥

'अस्य लोकस्य का गतिरित्याकाश इति होवाच' *(छा. १-९.)*
इत्यत्र भूताकाशस्य प्राप्तिः । न चासौ युज्यते, किन्तु विष्णुरेव।
'स एष परोवरीयानुद्गीथः स एषोऽनन्तः' *(छा. १-९.)*
इत्यादि तल्लिङ्गात् ।

सिद्धान्तयति – **इतीति** ॥ कुतो न मन्तव्यमित्याशङ्कायां तत्र हेतुतया सूत्रमुपादत्ते – **यत इति** ॥ इदं चाऽवर्तते । तत्राऽद्यस्य **'यतश्चोदेति'** इतिवत् कुत इत्यर्थः । **'यच्छब्दस्तु परामर्शे प्रश्नार्थेऽपि च भण्यते'** इति भागवततात्पर्योक्तेः । द्वितीयस्तु न मन्तव्यमिति प्रतिज्ञायां सूत्रार्थस्य हेतुत्वद्योतकः ॥

विषयादेः पूर्वपक्षफलकथनेन सूचनेऽपि मुखतोऽनुक्तेः तदनुवादपूर्वकं सूत्रं व्याचष्टे – **अस्येति** ॥ **'इत्यत्र'** वाक्ये प्रतिपाद्यत्वस्येति शेषः । चोऽप्यर्थः । यद्यपि तथाऽपीत्यर्थे । **'असौ'** आकाशोऽत्र वाच्य इति शेषः । सूत्रेऽनुवृत्तस्य **'तत्तु'** इत्यस्यार्थो विष्णुरेवेति ॥ **इत्यादीति** ॥ लुप्तविभक्तिको निर्देशः । आदिशब्दात् **'सर्वाणि भूतानि'** इत्यादिजगत्कारणत्वप्रतिपादकं वाक्यं गृह्यते । यथोक्तं तत्त्वप्रदीपे - 'सर्वाणि भूतानि – इत्यादिनोदीर्यमाणं जगदुत्पादकत्वादिकमादिशब्दादुपाददीत' इति । लिङ्गपदं श्रुत्युपलक्षकम् । तथा चेत्थं योजना ॥

यद्यपि **'अस्य लोकस्य'** इति छन्दोगवाक्ये भूताकाशस्य श्रुत्यादिबलादस्ति प्रतिपाद्यत्वस्य प्राप्तिः । तथाऽपि नासावत्र वाक्ये आकाशपदेन वाच्यो युज्यते, किन्तु – विष्णुरेव । कुतः ? **'स एषः'** इत्यादिवाक्ये **'तल्लिङ्गात्'** तस्य विष्णोर्लिङ्गमसाधारणधर्मः परोवरीयस्त्वादिः ।

॥ ८. अथाऽकाशाधिकरणम् ॥

(कतिपयश्रुत्युक्ताकाशशब्दवाच्यो भगवानेवेति समर्थनम्)

'को ह्येवान्यात् कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात्' *(तै. २-७.)* **इति आकाशस्याऽनन्दमयत्वे[1] हेतुरुक्तः, न तु विष्णोः ।**

॥ ८. अथ आकाशाधिकरणम् ॥

अत्राधिकरणे भगवति लोकतोऽन्यत्रप्रसिद्धाकाशपदोपलक्षिताधिभौतिकाशेषशब्दसमन्वयः क्रियते । फलकथनेन पूर्वपक्षः सूचितो भवतीत्याशयेन पूर्वपक्षफलमाह – **को हीति ॥ इतीति ॥** इत्यानन्दमयाधिकरणोदाहृतवाक्येनेत्यर्थः । तुशब्दस्याऽकाशस्य त्विति सम्बन्धः । तथा च छन्दोगश्रुत्युक्ताकाशाभिन्नाकाशस्यैवेत्यर्थः । **'आनन्दमयत्वे'** पूर्णानन्दत्वेन निमित्तेन आनन्दमयशब्दवाच्यत्वे **'हेतुः'** लोकचेष्टकत्वरूपः । तुशब्दार्थैवकारव्यावर्त्यमाह- **नेति ॥** अनेन विष्णुभिन्नभूताकाशस्यैव छन्दोगश्रुत्युक्ताकाशशब्दवाच्यत्वमिति पूर्वपक्षे **'को हि'** इति तैत्तिरीयश्रुत्युक्तोऽपि स एवेति तदुक्तहेतुना तस्यैवाऽनन्दमयत्वं सिद्ध्यति, न विष्णोरिति फलमुक्तं भवति ॥

पूर्वसङ्गतिस्त्वधिकाशङ्कां[2] कृत्वाऽत्र पूर्वन्याय एवातिदिश्यत इत्यातिदेशिकी द्रष्टव्या ॥

इति न मन्तव्यम् । यतः –

---

१. 'आनन्दत्वे' ह ।
२. '-धिकां शङ्कां' – म.

सू - ॐ ॥ आकाशस्तल्लिङ्गात् ॥ ॐ ॥ २२ ॥

'अस्य लोकस्य का गतिरित्याकाश इति होवाच' *(छा. १-९.)*
इत्यत्र भूताकाशस्य प्राप्तिः । न चासौ युज्यते, किन्तु विष्णुरेव।
'स एष परोवरीयानुद्गीथः स एषोऽनन्तः' *(छा. १-९.)*
इत्यादि तल्लिङ्गात् ।

सिद्धान्तयति – **इतीति** ॥ कुतो न मन्तव्यमित्याशङ्कायां तत्र हेतुतया सूत्रमुपादत्ते – **यत इति** ॥ इदं चाऽवर्तते । तत्राऽद्यस्य **'यतश्चोदेति'** इतिवत् कुत इत्यर्थः । **'यच्छब्दस्तु परामर्शे प्रश्नार्थेऽपि च भण्यते'** इति भागवततात्पर्योक्तेः । द्वितीयस्तु न मन्तव्यमिति प्रतिज्ञायां सूत्रार्थस्य हेतुत्वद्योतकः ॥

विषयादेः पूर्वपक्षफलकथनेन सूचनेऽपि मुंखतोऽनुक्तेः तदनुवादपूर्वकं सूत्रं व्याचष्टे – **अस्येति** ॥ **'इत्यत्र'** वाक्ये प्रतिपाद्यत्वस्येति शेषः । चोऽप्यर्थः । यद्यपि तथाऽपीत्यर्थे । **'असौ'** आकाशोऽत्र वाच्य इति शेषः । सूत्रेऽनुवृत्तस्य **'तत्तु'** इत्यस्यार्थो विष्णुरेवेति ॥ **इत्यादीति** ॥ लुप्तविभक्तिको निर्देशः । आदिशब्दात् **'सर्वाणि भूतानि'** इत्यादिजगत्कारणत्वप्रतिपादकं वाक्यं गृह्यते । यथोक्तं तत्त्वप्रदीपे - 'सर्वाणि भूतानि – इत्यादिनोदीर्यमाणं जगदुत्पादकत्वादिकमादिशब्दादुपाददीत' इति । लिङ्गपदं श्रुत्युपलक्षकम् । तथा चेत्थं योजना ॥

यद्यपि **'अस्य लोकस्य'** इति छन्दोगवाक्ये भूताकाशस्य श्रुत्यादिबलादस्ति प्रतिपाद्यत्वस्य प्राप्तिः । तथाऽपि नासावत्र वाक्ये आकाशपदेन वाच्यो युज्यते, किन्तु – विष्णुरेव । कुतः ? **'स एषः'** इत्यादिवाक्ये **'तल्लिङ्गात्'** तस्य विष्णोर्लिङ्गमसाधारणधर्मः परोवरीयस्त्वादिः ।

तस्य तस्मिन्नाकाशे श्रवणादुक्तत्वात् । यत एवं तल्लिङ्गाद् असौ छन्दोगश्रुत्युक्ताकाशो विष्णुरेव, तत एव **'को हि'** इति तैत्तिरीय-वाक्येऽप्यसावेव प्रतिपाद्यत इति तस्यैवाऽनन्दमयत्वे हेतुरुक्तो न तु भूतस्य । अतो भूताकाशस्याऽनन्दमयत्वे हेतुरुक्तः, न तु विष्णोरिति न मन्तव्यमिति । अनेन सूत्रयोजना दर्शिता ॥

अस्येत्यादेरयमर्थः – **'अस्य'** प्रत्यक्षसिद्धस्य पृथिवीलोकस्य तदभिमानिनश्चतुर्मुखस्य **'का गतिः'** आश्रय इति शिलकेन पृष्टः प्रवाहणो राजा आदीप्तत्वादाकाशनामको विष्णुरिति प्रत्युवाच । कथमित्याकाङ्क्षायां तदुपपादनाय तस्याऽकाशस्य महिमानमाह – **'सर्वाणि हवा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणं स एष परोवरीयानुद्गीथः स एषोऽनन्तः'** इति । अत्र वैशब्दस्य प्रसिद्धिद्योतकस्य सन्निहितसर्वभूतान्वयो वा, **'स्युरेवं तु पुनर्वैवेत्यवधारणवाचकाः'** इत्यभिधानादवधारणार्थत्वं वा द्रष्टव्यम् । भूत-शब्दो भूताकाश एवात्रोच्यते इति पूर्वपक्षे आकाशव्यतिरिक्तभूतपरः । सिद्धान्ते तु सर्वभूतपरः । ब्रह्मादिसर्वजगत्परो वा । तथा च **'सर्वाणीमानि'** प्रमितानि आकाशादिभूतानि ब्रह्मादिजगद्वा आकाशादेव समुत्पद्यन्ते । **'हवै'** प्रसिद्धं हि । आकाशं **'प्रत्यस्तम्'** अदर्शनं **'यन्ति'** तत्रैव प्रलये मुक्तौ च लीनाः भवन्ति । कुतः ? **'हि'** यस्मादाकाश एव **'एभ्यः'** ब्रह्मादिभ्यो **'ज्यायान्'** अधिकोत्तमः । कुत एतत् यत आकाशः **'परायणम्'** उत्तमाश्रयः नैतस्मादुत्तमं वस्त्वाशङ्क्यमिति भावेनाऽह – **स इति ॥ 'स एषः'** आकाशनामा भगवान् **'परोवरीयान्'** अत्र –

'परस्मादुत्तमं प्रोक्तं परो इति ततः परम् ।
[१]परोवरं परं तस्मात् प्रोक्तं पारोवरीयकम् ॥'

---

१. .'परोवरो वरं' – म.

इति सामसंहितावचनानुसारेणाऽदौ पर इति शब्दान्तरस्य मध्ये वरशब्दान्तरस्य चाऽवापेन वृत्तिवाक्ये सुबादेशस्य सोरुलोपेन रुत्वोत्वगुणेषु समाने परे ओप्तशब्दद्वयस्य लोपे चोत्तमोत्तमोत्तम इत्यर्थो ज्ञातव्यः । **'उद्गीथः'** उच्चत्वेन गीत उक्तो वेदेन । तकारस्य थकारो व्यत्ययात् । **'स एषः'** आकाशः **'अनन्तः'** देशकालगुणैरपरिच्छन्न इति । छान्दोग्यभाष्ये तु **'उच्चत्वाद्गीतत्वात् सर्वस्थानस्थत्वादुद्गीथो भगवान्'** इति व्याख्यातम् ॥

'विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवान् विममे रजांसि' *(ऋ. १-१५४-१.)* **'परो मात्रया तन्वा वृधान'** *(ऋ. ७-९९-१.)* **इत्यादिना तस्यैव हि तल्लिङ्गम्**[1] ।

'स एषोऽनन्तः' इत्युक्तानन्तत्वस्यापरिमितत्वस्य विष्णुनिष्ठत्वं कुतो ज्ञायत इत्यत आह-**विष्णोरिति** ॥ विष्णोर्वीर्याणि **'कं'** को नु को वा **'प्रवोचम्'** प्रावोचत् । साकल्येन प्रवक्ति न कोऽपि । **'यः'** कः कविर्ब्रह्मा **'पार्थिवानि रजांसि'** पार्थिवपरमाणून् **'विममे'** गणयति । सोऽपि न प्रवक्तीति श्रुत्यर्थः ॥

'परोवरीयान्' इत्युक्तसर्वोत्तमत्वस्य विष्णुधर्मत्वं कुत इत्यत आह - **पर इति** ॥ अत्र **'न ते महित्वमन्वश्नुवन्ति'** इति उत्तरवाक्यादुक्तार्थो ज्ञायते । अत एवाऽदिशब्द उभयान्वयी । तत्राऽद्यो **'विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि'** इति स्मृतिग्राही । व्याख्यातेयं श्रुतिर्जन्मनये । इत्यादिना वाक्येनेति शेषः । यद्यपि श्रुत्यनुसारात् सर्वोत्तमत्वे प्रथमं प्रमाणं वक्तव्यं न त्वनन्तत्वे । अत एव टीकायामादौ सर्वोत्तमत्वं गृहीतम् । तथाऽपि अनन्तत्वस्य सावकाशत्व-शङ्काविषयत्वात् प्रथमं तत्र प्रमाणोपन्यासः । अत एव तत्रैवोत्तरत्र स्मृत्या

---

१. 'तस्य हि तल्लिङ्गम्' ह. ।

सावकाशत्वशङ्कापरिहारः । **'तस्य'** विष्णोः हिशब्दो यत इत्यर्थे । **'तत्'** अनन्तत्वादि **'लिङ्गं'** धर्म इत्यवगतम् । अतो न हेतुविशेषणासिद्धिरिति वाक्यशेषः । एवकारपाठे नानैकान्त्यमिति शेषः । उत्तरत्रान्वयो वा । यद्यपि **'अनन्तः'** इति श्रुतिः; वाचकशब्दत्वात् । तथाऽपि तत्पदप्रवृत्तिनिमित्तस्य लिङ्गत्वमप्यविरुद्धम् ॥

'अनन्तो भगवान् ब्रह्म आनन्देत्यादिभिः पदैः ।
प्रोच्यते विष्णुरेवैकः परेषामुपचारतः ॥' इति ब्राह्मे[1] ।

नन्वनन्तत्वम् **'अनन्ताकाशवत् पश्यन्'** इत्याकाशस्यापि स्मर्यते, अतः सावकाशत्वात् कथं विष्णोरेव तल्लिङ्गमित्यतः स्मृतिमाह – **अनन्त इति** ॥ आनन्देति लुप्तविभक्तिको निर्देशः । विष्णुरेवैको मुख्यतया प्रोच्यत इति सम्बन्धः । **'परेषां'** विष्णोरन्येषाम् **'उपचारतः'** स्वस्वसमीपगतपरमात्म-सम्बन्धादेव वाच्यतेति शेषः । इति ब्राह्म इत्यस्य तस्यैव तल्लिङ्गमित्युक्तमिति पूर्वेणान्वयः । अनेनैवकारो लिङ्गस्य निरवकाशत्वज्ञापक इति सूचितम् ।

'नामानि सर्वाणि यमाविशन्ति' *(भाल्लवेयश्रुतिः)*

इति चोक्तम् ॥ २२ ॥

॥ इत्याकाशाधिकरणम् ॥ ८ ॥

ननु श्रुत्या पूर्वपक्षिते कथं लिङ्गेन निर्णयः । लिङ्गस्य श्रुतितो दुर्बलत्वादित्यतः आकाशश्रुतिर्विष्णौ सावकाशेति श्रुत्या दर्शयति – **नामानीति** ॥ **'च'** यतः **'नामानि सर्वाणि'** इति वाक्येन विष्णोराकाशादिसर्वशब्दवाच्यत्वमुक्तम्, अतो लिङ्गेन श्रुतेर्बाधया निर्णयो युक्त इति योजना ।

॥ इत्याकाशाधिकरणम् ॥ ८ ॥

---

१. 'इति च ब्राह्मे' ह ।

॥ ९. अथ प्राणाधिकरणम् ॥

(कतिपयश्रुत्युक्तप्राणशब्दवाच्यो भगवानेवेति समर्थनम्)

सू - ॐ ॥ अत एव प्राणः ॥ ॐ ॥ २३ ॥

'तद्वै त्वं प्राणो अभवः महान् भोगः प्रजापतेः ।
भुजः करिष्यमाणः यद् देवान् प्राणयो नव' *(तै.आ.३- १४.)*

इति महाभोगशब्देन परमानन्दत्वं प्राणस्योक्तम् ॥

॥ ९. अथ प्राणाधिकरणम् ॥

अत्राधिकरणे लोकतोऽन्यत्र प्रसिद्धाध्यात्मिकाशेषशब्दोपलक्षक प्राणशब्दस्य ब्रह्मणि समन्वयः क्रियते । सर्वत्राऽदौ सूत्रं पाठ्यम् । पश्चात् सङ्गत्यादिकं वक्तव्यमिति सूचयितुमत्र सूत्रमादावेव पठति – **अत एवेति ॥**

विषयवाक्योदाहरणपूर्वकं पूर्वाधिकरणेन सङ्गतिं विषयसंशयौ च सूचयति – **तदिति ॥** अत्र यत्तदोरावृत्तिः । भुज्यत इति भोग आनन्दः । तेन तद्वानुपलक्ष्यते, धर्मधर्मिणोरभेदविवक्षा वा । तथा च हे विष्णो **'यत्'** यस्मात् **'प्रजापतेः'** हिरण्यगर्भस्य तदुपलक्षितानां सकलजीवानां **'भुजः'** भोगान् योग्यानन्दान् **'करिष्यमाणः'** उपलक्षणमेतत् – कुर्वाणोऽकार्षीश्च । **'तस्मात्त्वं' 'महान् भोगः'** पूर्णानन्दवानभवः । स्वस्य महाभोगाभावे परस्मै तद्दानानुपपत्तेः । यस्माच्च पायुगुह्यैक्येन नवेन्द्रियाभिमानिनो देवान् त्वं **'प्राणयः'** अचेष्टयः । इदमप्युपलक्षणं – चेष्टयसि चेष्टयिष्यसि च । तस्मात् त्वं प्राणः प्राणशब्दवाच्योऽभव इति सिद्धान्तरीत्या श्रुत्यर्थः ॥

पूर्वपक्षे त्वेतत् सर्वं मुख्यप्राणे योज्यम् । **इतीति ॥ 'इति'** तैत्तिरीयशाखागतवाक्ये **'परमानन्दत्वं'** पूर्णानन्दत्वमुक्तमित्यावर्तते । तथा च यदानन्दमयत्वं विष्णोरुक्तं तत् परमानन्दत्वपर्यवसितं **'तद्वै त्वम्'** इति वाक्ये

'महाभोगशब्देन' 'महान् भोगः' इति पदद्वयात्मकवाक्येन च प्राणस्योक्तमिति योजना ॥

अनेन प्राणाख्यो विषयः । तस्य विष्ण्वन्यत्वाक्षेपमुखेनाऽनन्द-मयत्वस्याप्यन्यनिष्ठत्वाक्षेपादानन्दमयाधिकरणेनास्याऽक्षेपिकी सङ्गतिः । सः वायुरुत विष्णुरिति संशयश्च सूचितो भवति ॥

स च प्राणः प्रसिद्धेर्वायुरित्यापतति ।

सयुक्तिकं पूर्वपक्षं दर्शयति – **स चेति** ॥ तच्छब्द आवर्तते । चशब्दोऽवधारणे, वायुरित्यनेन सम्बध्यते । आनन्दमयश्चेति समुच्चये वा । तथा च परमानन्दत्वं यस्य प्राणस्योक्तं सः **'प्राणः'** तच्छब्दवाच्यो मुख्यवायुरेवेति **'आपतति'** प्राप्नोति । अत एवाऽनन्दमयोऽपि स एवेत्या-पतति । कुतः ? प्रसिद्धेः प्राणश्रुतेः । तस्याश्च तस्मिन् वायौ प्रसिद्धे रूढत्वात् । प्राणपदप्रवृत्तिनिमित्तस्य जीवनादिहेतुत्वस्य च शरीरे सति मुख्ये जीवनादिकं सम्भवति नासतीत्यन्वयव्यतिरेकाभ्यां स्वशरीरगतवायुविकारद्वारा मुख्यवायावेव प्रसिद्धेर्दर्शनादिति योजना ॥

न चैवम् । यतो विष्णुरेव प्राणः, अत एव
'श्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे' *(तै.आ.३-१३)*
इत्यादितल्लिङ्गादेव ॥

॥ इति प्राणाधिकरणम् ॥ ९ ॥

सिद्धान्तयति – **न चेति** ॥ एवं प्राणस्य वायुत्वम् आनन्दमयत्वं च न युक्तमित्यर्थः । कुतो नैवमित्याशङ्कायां तत्र हेतुतया सूत्रं व्याचष्टे - **यत इति** ॥ सूत्रार्थस्य हेतुत्वद्योतकोऽयं यतश्शब्दः । सूत्रेऽनुवृत्तस्य तत्त्वित्यस्यार्थो विष्णुरेवेति । तथा च यतोऽयं प्राणो विष्णुरेव अतो

नैवमित्यन्वयः । कुतोऽयं प्राणो विष्णुरेवेत्यतः सौत्रं हेतुमनूद्य व्याचष्टे – **अत एवेति ॥ इत्यादीति ॥** इत्यादिनोक्तं यद्विष्णुलिङ्गं तस्मादेवेत्यर्थः । कथं श्रुत्या पूर्वपक्षिते लिङ्गेन निर्णय इत्यतो लिङ्गस्य निरवकाशत्वज्ञापनायैवकारः । तथा च सावकाशश्रुतेर्निरवकाशलिङ्गेन बाध इति भावः । हे विष्णो ! **'ते'** तव श्रीश्च लक्ष्मीश्चेति द्वे पत्न्यौ स्तः । वक्षस्थलाश्रिता श्रीः, अङ्कस्थिता लक्ष्मीरिति सम्प्रदायविदः ॥

तत्त्वप्रदीपे तु – अङ्कस्थिता श्रीः, वक्षसि लक्ष्मभूता लक्ष्मीरित्युक्तम् । **'अहोरात्रे'** तदभिमानिसूर्यचन्द्रौ **'पार्श्वे'** पार्श्वस्थितावित्यर्थः । दिवारात्रमेते पार्श्वगते इति वा ॥

यद्यपीदम् **'अद्भ्यः'** इति पूर्वानुवाकगतम् । **'तद्वै त्वं प्राणः'** इत्येतच्च **'भर्ता सन् म्रियमाणः'** इत्युत्तरानुवाकगतम् । तथा च नानयोर्लिङ्गलिङ्गिभावो युज्यते । तथाऽपि **'श्रीश्च ते'** इति युष्मच्छब्देनोक्तस्य **'तद्वै त्वं प्राणः'** इत्यत्रापि युष्मच्छब्देन प्रत्यभिज्ञानात् तदुपपत्तिः । निरवकाशत्वाद् भिन्नानुवाकस्थस्यापि मुखतो ग्रहणं युक्तम् । आदिशब्देन **'हरिं हरन्तमनुयन्ति देवाः । विश्वस्येशानं वृषभं मतीनाम्'** (तै.आ.३-१५) इति तत्त्वप्रदीपोदाहृतमनुवाकान्तरस्थं गृह्यते । सर्वबुद्धिनियन्तारं जगत्पतिं सर्वसंहर्तारं हरिं देवा अनुगच्छन्तीत्यर्थः । चन्द्रिकायां तु – **'भर्ता सन्'** इत्युत्तरानुवाकगतं **'तमेव मृत्युममृतं तमाहुस्तं भर्तारं तमु गोप्तारमाहुः'** (तै.आ. ३-१४) इत्यादिकमादिपदेन ग्राह्यमित्युक्तम् ॥

यद्यपि तैत्तिरीयशाखायां **'ह्रीश्च ते'** इति पाठः । तथाऽपि वाजसनेयशाखाभिप्रायेण एवमुदाहृतमिति ध्येयम् । सूत्रार्थस्तु स्पष्टः ॥

॥ इति प्राणाधिकरणम् ॥ ९ ॥

॥ १०. अथ ज्योतिरधिकरणम् ॥

(कतिपयश्रुत्युदाहृतज्योतिःशब्दः परमात्मवाचक इत्युपपादनम्)

'यो वेद निहितं गुहायाम्' *(तै.उ. २-१)* **इत्युक्तम् ।**

तच्च गुहानिहितम्

'वि मे कर्णा पतयतो विचक्षुर्वी३दं ज्योतिर्हृदय आहितं यत् ।

वि मे मनश्चरति दूर आधीः किं स्विद् वक्ष्यामि किमु नू मनिष्ये'

(ऋ. ६-९-६) **इति ज्योतिरुक्तम् ।**

॥ १०. अथ ज्योतिरधिकरणम् ॥

अत्राधिकरणे तत्तत्सूक्तगताशेषशब्दोपलक्षकस्य लोकतोऽन्यत्रप्रसिद्धस्य ज्योतिर्नाम्नो ब्रह्मणि समन्वयः क्रियते । पूर्वाधिकरणतद्विषयसङ्गती विषयवाक्योदाहरणपूर्वकं विषयसंशयौ च दर्शयति - **यो वेदेति** ॥ ततः किमित्यत आह - **तच्चेति** ॥ चोऽवधारणे । तथा च यत् पूर्वं मान्त्रवर्णिकपदोपात्तमन्त्रवर्णगतेन **'यो वेद'** इति वाक्येन गुहानिहितं वस्तूक्तं तदेवाऽनन्दमयाद्याख्यमित्युक्तम् । तदेव **'विमे कर्णा'** इति वाक्ये **'ज्योतिरुक्तं'** ज्योतिश्शब्देनोक्तमित्यर्थः ॥

अनेन वक्ष्यमाणपूर्वपक्षपर्यालोचनया ज्योतिषो विष्ण्वन्यत्वसाधन-मुखेनाऽनन्दमयत्वस्या[1]न्यनिष्ठत्वाक्षेपादानन्दमयाधिकरणेनास्याऽक्षेपिकी सङ्गतिः सूचिता भवति । ज्योतिर्विषयः, किमग्निरुत विष्णुरिति सन्देहश्च सूचितो भवति ॥

---

१. **'नन्दमयत्वस्यापि' – म.**

'वि मे' इति ऋङ्मन्त्रे वीत्युपसर्गाणां क्रियापदेनान्वयः । तत्र धातोरेव विचरणाभिधायकत्वम् । उपसर्गास्तु द्योतकाः, न वाचकाः । अत एव सूत्रे **'चरणाभिधानात्'** इत्येवोक्तम् । भाष्ये तु **'विचरणाभिधानात्'** इति स्पष्टार्थमुक्तम् । अत एव तत्त्वप्रदीपे **'स्पष्टत्वाय विचरणाभिधानाद् इत्युक्तम्'** इत्युक्तम् । **'मे'** इत्यस्मच्छब्देन मन्त्रद्रष्टा ऋषिरुच्यते । **'दूर आधीः'** इत्यस्य एकपदत्वेऽप्यवग्रहदर्शनेन द्विखण्डत्वाद् विभज्यान्वयः । आङ् ईषदभिव्याप्त्युभयार्थकः । वर्तत इति शेषः । तथा च यतो मे कर्णौ ज्योतिषो विरुद्धं पतयतः पततः । स्वार्थे णिच् । चक्षुश्च विरुद्धं पततीति विपरिणामेनान्वयः । यथा कर्णादेर्ज्योतिर्विदूरत्वम् एवं ज्योतिषोऽपि कर्णादिविदूरत्वमित्याह - **वीदमिति** ॥ कम्पोऽत्यन्तमित्यर्थे । तथा च यदिदं हृदये **'आहितम्'** आ समन्तात् स्थितं ज्योतिस्तदत्यन्तं कर्णादिविरुद्धं वर्तते । एवं मे मनः ज्योतिषो दूरे विचरति अतीव तद्दर्शनविरुद्धं वर्तते । मनश्चरणस्य तत्त्वनिष्ठाविरोधित्वं **'चञ्चलं हि मनः कृष्ण'** इति गीतायामुक्तम् । अतः कारणात् **'आधीः'** ईषद्बुद्धिरहं व्याप्तबुद्धिरपीति वा **'किं स्वित्'** किं नु वक्ष्यामि । किमु किं वा नु इदानीं **'मनिष्ये'** चिन्तयामीति मन्त्रार्थः । तत्त्वप्रदीपे तु - आ समन्ताद् दूरस्थबुद्धिरहमित्येकान्वयेन व्याख्यातम् ॥

तच्च ज्योतिरग्निसूक्तत्वात् प्रसिद्धेश्चाग्निरेवेति प्राप्तम् ।

अथ सयुक्तिकं पूर्वपक्षयति – **तच्चेति** ॥ चः[1] समुच्चये । तदिति चाऽवर्तते । अग्निशब्दो भूततद्देवतापरः । द्वितीयचशब्दो भिन्नक्रमः । तथा च तज्ज्योतिर्गुहानिहितं चाग्निरेव भवेदिति प्राप्तं, कुतः ? **'प्रसिद्धेः'** ज्योतिश्श्रुतेस्तस्याश्च तस्मिन्नग्नावेव प्रसिद्धेः रूढत्वात् । न केवलं श्रुतेरेवेदं

१. **'चौ समुच्चये'** – म.

ज्योतिरग्निः, किन्तु तस्य ज्योतिषः **'अग्निसूक्तत्वात्'** अग्निप्रकरणगतत्वाच्चेति योजना । अत एव पूर्वपक्षोपसंहारटीकायां श्रुतिप्रकरणयोर्बलवत्त्वादिति प्रसिद्धपदलक्षितायाः श्रुतेः प्रथममुक्तिः । अत एव चन्द्रिकायां भाष्ये अग्निसूक्तस्थत्वाच्चेति चशब्दप्रयोगादित्युक्तम् । तथा च श्रुतिप्रकरणाभ्यां गुहानिहितत्वलिङ्गमात्रस्य बाधाद् अग्निरेवेदं ज्योतिर्गुहानिहितं चेति भावः ॥

अत आह -

सू – ॐ ॥ ज्योतिश्चरणाभिधानात् ॥ ॐ ॥ २४ ॥

विष्णुरेव ज्योतिः । कर्णादीनां विचरणाभिधानात् ।

सिद्धान्तयत्सूत्रमवतारयति – **अत इति** ॥ यतः पूर्वपक्षः प्राप्तोऽतः उत्तरं सूत्रमाह भगवान् बादरायण इत्यर्थः । तदेव सूत्रं पठति – **ज्योतिरिति** ॥ सूत्रे तत्त्वित्यस्यानुवृत्तिं विपरिणामं चाभिप्रेत्य प्रतिज्ञांशं व्याचष्टे – **विष्णुरेवेति** ॥ **'ज्योतिः'** तच्छब्दवाच्यो विष्णुरेव भवेदिति योजना । कुत इत्यतः प्राप्तं **'चरणाभिधानात्'** इति हेत्वंशं चरणशब्दस्य विचरणार्थत्वं कर्णादीनामित्यस्याध्याहारं चाभिप्रेत्य व्याचष्टे – **कर्णादीनामिति** ॥ अत्र वाक्ये कर्णादीनामेतज्ज्योतिः प्रति विरुद्धचरणोक्तेः कर्णादिविदूरत्व-लिङ्गश्रवणादित्यर्थः । अत्र कर्णादिविदूरत्वं नाम तैरियदिति परिच्छेदा-योग्यवैभवत्वं, न तु कर्णादिविदूरत्वमात्रम् । तद्विषये तस्यासम्भवात् । अभिधानपर्यन्तधावनं हेत्वसिद्धिपरिहारायेति द्रष्टव्यम् ॥

स हि 'परो मात्रया तन्वा वृधान' *(ऋ. ७-९९-१.)* **इत्यादिना कर्णादिविदूरः ॥ १० ॥**

॥ इति ज्योतिरधिकरणम् ॥ १० ॥

नन्वस्तु ज्योतिषः कर्णादिविदूरत्वोक्तिः, तावता तस्य विष्णुत्वं कुत इत्यतः कर्णादिविदूरत्वस्य विष्ण्वेकलिङ्गत्वे श्रुतिमुदाहरन् तत् प्रतिजानीते - **स हीति** ॥ एवेत्यनुषज्यते । आदिशब्देन **'न ते विष्णो'** इत्यादिकं गृह्यते । तथा च **'हि'** यस्मात् **'सः'** विष्णुरेव **'परो मात्रया'** इत्यादिवाक्येन कर्णादिविदूर इति प्रमितः तस्मान्नाप्रयोजकता, न वा हेतुविशेषणासिद्धिरित्यध्याहारेण योजना ॥

अनेन **'ज्योतिः'** तच्छब्दवाच्यं ब्रह्मैव । कुतः ? अत्र कर्णादीनामेतज्ज्योतिः प्रति साकल्येन तदविषयीकरणरूपविरुद्ध **'चरणाभिधानात्'** कर्णादिविदूरत्वलिङ्गश्रवणाद् इत्यावृत्त्यध्याहाराभ्यां सूत्रार्थ उक्तो भवति ॥

मापयति ज्ञापयति विषयानिति वा मीयन्ते विषया अनेनेति वा मात्रा इन्द्रियगणः तया ततस्त्वं **'परो'** दूरोऽसीति हे विष्णो ! अन्यमहिम्नः परमन्तं सीमानं ते महिमानं कोऽपि श्रोत्रादिना नाऽपेति च प्रकृतानुगुण्येन श्रुतिर्व्याख्येया ॥

अत्र तत्त्वप्रदीपसन्न्यायरत्नावलीकारयोः ज्योतिरित्यादिचतुस्सूत्री एकमेवान्तर्भेदाधिकरणमित्यभिप्रेतम् । अग्निसूक्तच्छान्दोग्यगतविषयवाक्यभेदादनयोर्भेदः । टीकाकृतस्तु ज्योतिस्सूत्रमेकमधिकरणं **'छन्दः'** इत्यादित्रिसूत्री अधिकरणान्तरमिति ज्ञातव्यम् ॥ १० ॥

॥ इति ज्योतिरधिकरणम् ॥ १० ॥

ज्योतिरग्निः, किन्तु तस्य ज्योतिषः **'अग्निसूक्तत्वात्'** अग्निप्रकरणगतत्वाच्चेति योजना । अत एव पूर्वपक्षोपसंहारटीकायां श्रुतिप्रकरणयोर्बलवत्त्वादिति प्रसिद्धपदलक्षितायाः श्रुतेः प्रथममुक्तिः । अत एव चन्द्रिकायां भाष्ये अग्निसूक्तस्थत्वाच्चेति चशब्दप्रयोगादित्युक्तम् । तथा च श्रुतिप्रकरणाभ्यां गुहानिहितत्वलिङ्गमात्रस्य बाधाद् अग्निरेवेदं ज्योतिर्गुहानिहितं चेति भावः ॥

अत आह -

सू – ॐ ॥ ज्योतिश्चरणाभिधानात् ॥ ॐ ॥ २४ ॥

विष्णुरेव ज्योतिः । कर्णादीनां विचरणाभिधानात् ।

सिद्धान्तयत्सूत्रमवतारयति – **अत इति** ॥ यतः पूर्वपक्षः प्राप्तोऽतः उत्तरं सूत्रमाह भगवान् बादरायण इत्यर्थः । तदेव सूत्रं पठति – **ज्योतिरिति** ॥ सूत्रे तत्त्वित्यस्यानुवृत्तिं विपरिणामं चाभिप्रेत्य प्रतिज्ञांशं व्याचष्टे – **विष्णुरेवेति** ॥ **'ज्योतिः'** तच्छब्दवाच्यो विष्णुरेव भवेदिति योजना । कुत इत्यतः प्राप्तं **'चरणाभिधानात्'** इति हेत्वंशं चरणशब्दस्य विचरणार्थत्वं कर्णादीनामित्यस्याध्याहारं चाभिप्रेत्य व्याचष्टे – **कर्णादीनामिति** ॥ अत्र वाक्ये कर्णादीनामेतज्ज्योतिः प्रति विरुद्धचरणोक्तेः कर्णादिविदूरत्व-लिङ्गश्रवणादित्यर्थः । अत्र कर्णादिविदूरत्वं नाम तैरियदिति परिच्छेदा-योग्यवैभवत्वं, न तु कर्णादिविदूरत्वमात्रम् । तद्विषये तस्यासम्भवात् । अभिधानपर्यन्तधावनं हेत्वसिद्धिपरिहारायेति द्रष्टव्यम् ॥

स हि 'परो मात्रया तन्वा वृधान' *(ऋ. ७-९९-१.)* **इत्यादिना कर्णादिविदूरः ॥ १० ॥**

॥ इति ज्योतिरधिकरणम् ॥ १० ॥

नन्वस्तु ज्योतिषः कर्णादिविदूरत्वोक्तिः, तावता तस्य विष्णुत्वं कुत इत्यतः कर्णादिविदूरत्वस्य विष्ण्वेकलिङ्गत्वे श्रुतिमुदाहरन् तत् प्रतिजानीते - **स हीति** ॥ एवेत्यनुषज्यते । आदिशब्देन **'न ते विष्णो'** इत्यादिकं गृह्यते । तथा च **'हि'** यस्मात् **'सः'** विष्णुरेव **'परो मात्रया'** इत्यादिवाक्येन कर्णादिविदूर इति प्रमितः तस्मान्नाप्रयोजकता, न वा हेतुविशेषणासिद्धिरित्यध्याहारेण योजना ॥

अनेन **'ज्योतिः'** तच्छब्दवाच्यं ब्रह्मैव । कुतः ? अत्र कर्णादीनामेतज्ज्योतिः प्रति साकल्येन तदविषयीकरणरूपविरुद्ध **'चरणाभिधानात्'** कर्णादिविदूरत्वलिङ्गश्रवणाद् इत्यावृत्त्यध्याहाराभ्यां सूत्रार्थ उक्तो भवति ॥

मापयति ज्ञापयति विषयानिति वा मीयन्ते विषया अनेनेति वा मात्रा इन्द्रियगणः तया ततस्त्वं **'परो'** दूरोऽसीति हे विष्णो ! अन्यमहिम्नः परमन्तं सीमानं ते महिमानं कोऽपि श्रोत्रादिना नाऽपेति च प्रकृतानुगुण्येन श्रुतिर्व्याख्येया ॥

अत्र तत्त्वप्रदीपसन्न्यायरत्नावलीकारयोः ज्योतिरित्यादिचतुस्सूत्री एकमेवान्तर्भेदाधिकरणमित्यभिप्रेतम् । अग्निसूक्तच्छान्दोग्यगतविषयवाक्यभेदादनयोर्भेदः । टीकाकृतस्तु ज्योतिस्सूत्रमेकमधिकरणं **'छन्दः'** इत्यादित्रिसूत्री अधिकरणान्तरमिति ज्ञातव्यम् ॥ १० ॥

॥ इति ज्योतिरधिकरणम् ॥ १० ॥

॥ ११. अथ छन्दोऽभिधानाधिकरणम् ॥

(भगवतः गायत्रीशब्दवाच्यत्वसमर्थनम्)

सू - ॐ ॥ छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात् तथा हि दर्शनम् ॥ ॐ ॥ २५ ॥

अत्राधिकरणे अधिवेदगतगायत्र्याद्यशेषशब्दसमन्वयः क्रियते । सङ्गत्यादिजिज्ञासाजननाय सूत्रमेवाऽदौ पठति – **छन्द इति** ॥ अत्र छन्द इत्यावर्तते । तच्च व्यस्तं समस्तं च । तथा च **'छन्दोऽभिधानात्' 'गायत्री वा इदम्'** इति वाक्यस्थगायत्रीशब्देन चतुर्विंशत्यक्षरमन्त्रविशेषात्मकछन्दसः प्रतिपादनात्, तच्छब्दस्य तत्र रूढत्वात्, गायत्रीशब्दवाच्यो न विष्णुः, किन्तु छन्द एव । यतो गायत्री न विष्णुः, अपि तु छन्दः, अतो ज्योतिरपि न विष्णुः किन्तु छन्दः । कुतः ? **'छन्दोऽभिधानात्'** छन्दसा गायत्र्या तदैक्याभिप्रायेण ज्योतिषोऽभिधानाद् उपक्रमादिति चेत् – न, विष्णुरेव ज्योतिः । कुतः ? **'निगदात्'** गायत्रीपदेन विष्णोरेवाभिधानात् । गायत्र्यादिपदैर्विष्णोरेवाभिधानं च न तदभेदविधानार्थं, किन्तु तथोपासनार्थमेवेत्याह – **तथेति** ॥ **'तथा'** गायत्र्यादिशब्दार्थगुणस्वरूपत्वेन **'चेतसो'** मनसः **'अर्पणाय'** ब्रह्मण्याधानायोपासनार्थमेव विष्णोर्निगदादित्यर्थः । उपासनेत्यनुक्त्वा चेतोर्पणेत्युक्तिरुपासनास्वरूपकथनार्था । अनेन प्रसिद्धगायत्र्यादिपदेन विष्णोरभिधानं व्यर्थमिति शङ्का परिहृता ॥

ननु भवेद् गायत्रीशब्दवाच्यत्वेन विष्णोर्ज्योतिश्शब्दवाच्यत्वसाधनम्, यदि गायत्रीशब्दवाच्यत्वं विष्णोः प्रमितं स्यात् । तदेव कुत इत्यत आह – **तथाहीति** ॥ **'हि'** यस्मात् **'तथा'** गानत्राणकर्तृत्वनिमित्तेन विष्णोर्गायत्रीशब्दवाच्यत्वसाधकं 'दर्शनं' दृश्यते ज्ञायतेऽर्थो ययेति व्युपत्त्या **'गायति च त्रायति च'** (शाखान्तरम्) इत्यादिरूपा श्रुतिरस्ति तस्मादिति सूत्रार्थः ॥

'अथ यदतः परो दिवो ज्योतिर्दीप्यते' *(छां. ३-१३-७)*
इत्युक्तस्य ज्योतिषः 'गायत्री वा इदꣳ सर्वम्' *(छां. ३- १२. १)*
इति गायत्र्या समारम्भः कृतः ॥ तस्मान्न विष्णुरिति चेत् -

श्रुत्यादिसङ्गतिविषयवाक्यविषयसंशयपूर्वपक्षतत्फलानि सूचयन् सूत्रे पूर्वपक्षांशं व्याचष्टे – **अथेति** ॥ उक्तस्येत्यावर्त्यते । तथा च **'हृदय आहितं यत्'** इति गुहानिहितत्वेन यदुक्तं तस्यैव **'ज्योतिषः'** पुनः **'अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेषु अनुत्तमेषूत्तमेषु लोकेषु । इदं वाव तद्यदिदमस्मिन्नन्तःपुरुषे ज्योतिः'** इति छान्दोग्येऽप्युक्तस्य **'गायत्र्या'** इत्थम्भूतलक्षणे तृतीया । गायत्रीत्वेन तद्रूपतया **'समारम्भः'** पाठः कृतः । कुतोऽयं विज्ञायते यतो **'गायत्री वा इदं सर्वं वाग् वै गायत्री वाग्वा इदं सर्वम्'** इति वाक्ये **'गायत्र्या'** गायत्रीशब्देन तदैक्यतात्पर्येण **'समारम्भः'** उपक्रमः कृतः, अत इति योजना । ततः किमित्यत आह – **तस्मादिति** ॥ इदं चाऽवर्तते । ज्योतिर्गायत्रीति च शेषः । छन्द इति चानुषज्यते । तथा च यस्माद्गायत्र्या समारम्भः कृतः, स च यस्मादनुपसञ्जातविरोधित्वेन बलवान्, तस्मादिदं ज्योतिर्गायत्र्येव भवेत् । सा च गायत्री वर्णसमावेशलक्षणमन्त्रात्मकछन्द एव भवेत्, न विष्णुः । कुतः ? तस्माद् गायत्रीशब्दस्य छन्दस्येव रूढत्वाद्वाक्त्वाभिधानाच्चेति योजना ॥

अनेन **'गायत्री वा इदं सर्वम्'** इति पूर्ववाक्यस्थगायत्रीशब्दस्य विष्ण्वन्यपरत्वे तत एवोत्तरवाक्यस्थज्योतिषो विष्ण्वन्यत्वापत्त्या तत एव अग्निसूक्तगतज्योतिषोऽपि तदन्यत्वमेव भवेत् । अत एवाऽनन्दमयत्वमप्यन्यस्यैव भवेन्न विष्णोरिति पूर्वोक्ताक्षेपेण एतदधिकरणोत्थानात् पूर्वेणास्याऽक्षेपिकी सङ्गतिः॥

एवं गायत्री विषयः । किं छन्दोविशेषः उत विष्णुरिति सन्देहः । तथा गायत्री छन्दोविशेष एव भवेत्; तच्छब्दस्य तत्र रूढत्वादिति सयुक्तिकः

पूर्वपक्षः । तथा तस्माद् ज्योतिरपि छन्द एवेति तस्यैव गुहानिहितत्व-मानन्दमयत्वं चेति पूर्वपक्षफलं च सूचितं भवति । अत्र पूर्वपक्षे गायत्र्यादि-शब्दाः मन्त्रपराः, सर्वमपि वाक्यं तन्माहात्म्यपरतया योजनीयम् ॥

. सिद्धान्ते तु **'अथ'** इत्यादेरयमर्थः – भगवन्माहात्म्यान्तरारम्भेऽथशब्दः **'यत्'** श्वेतद्वीपानन्तासनवैकुण्ठगतं नारायणवासुदेववैकुण्ठाख्यं रूपत्रयं तत् **'अतः'** एतस्माद् विवक्षिताद् बुद्धिस्थात् **'दिवः परः'** परं तदपेक्षयोच्चस्थानस्थितमित्यर्थः । **'ज्योतिः'** तेजोमयं एवम्भूतं तत् **'विश्वतः पृष्ठेषु'**

'पृथिव्यां ब्रह्मणो मेरौ वैजयन्तेऽन्तरिक्षगम् ।
तृतीयं सत्यलोके च सदनं त्रिविधं मतम् ॥'

इति वचनादन्तरिक्षगवैजयन्तमेरुसत्यलोकगतेभ्यो ब्रह्मसदनेभ्यः क्रमेणो-च्चेषु **'सर्वतः पृष्ठेषु'** अन्तरिक्षपृथिवीस्वरात्मकलोकेभ्यः क्रमेणोच्चेषु **'अनुत्तमेषु'** न विद्यते उत्तमो लोको येभ्यस्तेषु प्रत्यवरेष्विति वा । **'उत्तमेषु'** स्वयमेवोत्तमेषु **'लोकेषु'** श्वेतद्वीपानन्तासनवैकुण्ठेषु **'दीप्यते'** प्रकाशते **'तत्'** दीप्यमानं तेजः **'इदं वाव'** इदं खलु । इदं च किम् ? **'यदिदमस्मिन् पुरुषे'** हृदये **'अन्तर्ज्योतिः'** तच्छब्दितं ब्रह्मास्ति तत्तेनैकीभूतमित्यर्थः । यो गायत्रीनामा गायत्रीसंस्थः स्त्रीरूपो हयशीर्षाख्यो भगवान् तदिदं प्रथमं रूपमित्याशयेन तस्य द्वितीयं रूपं वक्तुं गायत्रीत्यादिवाक्यं प्रवृत्तम् ॥

'यदिदं किञ्च भूतं' पूर्णं मत्स्याद्यवताररूपं यच्च **'सर्वं'** सर्वान्तःस्थितं रूपं तत्सर्वं **'गायत्री'** गायत्रीनामा भगवानेव । वै प्रसिद्धम् । तस्यैव तृतीयं रूपमाह – **वागिति** ॥ गायत्रीनामा भगवान् **'वाग् वै'** वाङ्नामको विष्णुरेव । कुतोऽस्य विष्णुत्व-मित्यतस्तल्लक्षणयोगादित्याह – **वाग् वा इति** ॥ **'इदं सर्वं भूतं'** प्राणिजातं **'वाग् वै'** वाङ्नामकभगवदधीनमेव । अतः सर्वस्वामित्वाद् वाचो विष्णुत्वमिति ॥

न, तथा चेतोऽर्पणार्थं हि निगद्यते । अग्निगायत्र्यादि-शब्दार्थरूपोऽसाविति चेतोऽर्पणार्थं हि निगद्यते । तथा हि दर्शनं 'गायति[1] त्रायति च' *(छां. ३-१२-१.)* **इत्यादि ।**

सिद्धान्तसूत्रांशमनुकरोति – **नेति** ॥ निगद्यत इत्यत्रापि सम्बध्यते । तथा च ज्योतिःशब्दवाच्यो विष्णुर्नेति न, किन्तु ज्योतिःशब्देन विष्णुरेव निगद्यत इत्यर्थः । कुत इत्यतो निगदादिति हेतुं योजयति – **हि निगद्यत इति** ॥ गायत्रीशब्देनेति शेषः । तथा च **'हि'** यस्माद् गायत्रीशब्देनापि विष्णुरेव **'निगद्यते'** अधीयते तस्मादित्यर्थः ॥

विष्णोर्गायत्र्यादिशब्दैरभिधानं च न तदभेदविधानार्थं, किन्तु तथोपासनार्थमेवेत्याह – **तथेति** ॥ चेतोऽर्पणेत्युक्तिप्रयोजनं पूर्ववत् । भाष्यत्वज्ञापनाय तथेत्यादिस्वपदानि तथाशब्दार्थकथनेन विवृणोति - **अग्नीति** ॥ अत्र ज्योतिश्शब्दोपलक्षकाग्निपदं ज्योतिस्सूत्रस्य भिन्नाधिकरणत्वपक्षेऽन्यत्र प्रसिद्धस्य गायत्रीपदस्य विष्णौ प्रयोगे प्रयोजनमत्र वदता सूत्रकृता पूर्वत्रोत्तरत्र चाग्न्यादिपदस्य विष्णौ प्रयोगे प्रयोजनं सूचितमिति दर्शयितुम् । न च गायत्र्यादिपदाभ्यामेव गायत्रीपदसमन्वयफलस्य पूर्वत्रोत्तरत्र चोक्तसमन्वयफलस्य च सूचनसम्भवादग्निपदं व्यर्थमिति वाच्यम् । फलीभूतसमन्वयविषयत्वेनास्याप्यवश्योपादेयत्वात् । समानप्रकरणस्थवागादि-ग्राहकत्वेनाऽदिशब्दस्याप्यावश्यकत्वात् । अवश्यापेक्षिताभ्यामुभाभ्या-मप्यानन्दमयाद्यधिकरणेषूत्तरत्र चोक्तप्रयोजनस्यापि सूचनसम्भवादुभय-मप्यावश्यकम् । ज्योतिरित्यादिचतुःसूत्र्या एकाधिकरणत्वपक्षे तु साक्षात् समन्वेतव्यशब्दत्वेनैव शब्दद्वयोपादानं, न तु फलत्वेनाग्निशब्दस्याधि-करणान्तरेऽप्येतन्न्यायसूचनं त्वादिशब्देनैव, न तूभाभ्याम् । भिन्नजातीयानेक-

---

१. 'गायति च' ह ।

शब्दग्रहणार्थं शब्दद्वयोत्तरादिपदम् । अत एव तत्त्वप्रदीपे आदिशब्दस्योभयत्रान्वयं प्रथमादिशब्देन तेजःशब्दानां द्वितीयेन छन्दश्शब्दानां च ग्रहणमभिप्रेत्य **'अग्न्यादितेजःशब्दानां गायत्र्यादिछन्दश्शब्दानां च'** इत्युक्तम् ॥

केचित्तु भाष्यगतहिशब्दः **'ज्ञानार्थमथ ध्यानार्थम्'** इति प्रमाणप्रसिद्धिद्योतकः, अधिकरणान्तरेऽप्यस्य न्यायस्यानुसन्धेयत्वज्ञापकश्चेत्याहुः । चेतोऽर्पणार्थमिति सावधारणम् । तथा च **'असौ'** भगवानग्निगायत्र्यादिशब्दैरग्निगायत्र्यादिशब्दार्थगुणस्वरूप इति । तत्र **'चेतोऽर्पणार्थं'** बुद्ध्यवतारणार्थम् उपासनार्थमेव निगद्यते, न तदभेदविधानार्थमित्यर्थः । इतीत्यन्तेन तथाशब्दार्थ उक्तः । अनेनाप्रसिद्धगायत्र्यादिपदेन विष्णोरभिधानस्य वैयर्थ्यशङ्का परिहृता ॥

ननु भवेद् गायत्र्यादिशब्दवाच्यत्वेन विष्णोर्ज्योतिश्शब्दवाच्यतासाधनं यदीयं गायत्री विष्णुः स्यात्तदेव कुत इत्यतो गानत्राणकर्तृत्वलिङ्गादित्याशयेन तस्यासिद्धिपरिहाराय प्रवृत्तं तथाहीति सूत्रशेषम् अनुकृत्य दर्शनपदोक्तां श्रुतिं दर्शयति - **तथेति ॥ 'हि'** यस्मात् **'इत्यादि दर्शनं'** श्रुतिरस्तीत्यन्वयः । यद्यपि **'गायति त्रायते च'** इति पाठः छन्दोगानाम्, तथाऽपि शाखान्तरमेवेदमित्यदोषः । आदिपदेन **'या वै सा गायत्री इयं वाव सा येयं पृथिव्यस्यां हीदं सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयते**[१]' (छां.३.१२.२) इत्यादिकं गृह्यते । श्रुत्यर्थस्तु – यतो गायत्रीवाच्यो भगवान् वेदान् **'गायति'** मुखान्निस्सारयति प्रथमो वक्तेति यावत् । यस्माच्च **'त्रायते'** अखिलमिति शेषः । अतो गायत्रीशब्देनोच्यते । **'या'** प्रसिद्धा गायत्री तन्नामा विष्णुः **'सा इयं वै'** इयं खलु । किमियम् ? **'येयं पृथिवी'** तन्नामा भगवान् ॥

कथं पृथिवी विष्णुरित्यतः तल्लक्षणयोगादित्याह – **अस्यां हीदमिति ॥**

---

१. **'नातिश्रीयन्ते'** – म.

'अस्यां' पृथिव्यां **'भूतं'** प्राणिजातमाश्रितमिति । सुधायां तु पूर्वपक्षानुगुणतया गायत्री **'गायति'** अर्थं प्रतिपादयति, अध्येतॄन् **'त्रायते'** पालयति पापाद् रक्षतीत्यर्थ उक्तः ॥

'सर्वच्छन्दोऽभिधो ह्येषः सर्वदेवाभिधो ह्यसौ [1]।
सर्वलोकाभिधो[2] ह्येषस्तेषां तदुपचारतः ॥' इति वामने ॥

ननु गायत्र्यादिशब्दस्यान्यत्र रूढत्वात् कथं लिङ्गमात्रेण विष्णुत्वनिश्चय इत्यतो गायत्र्यादिश्रुतेः सावकाशत्वादिति भावेन गायत्र्यग्निपृथिव्यादिशब्दाः न केवलं श्रुत्युक्तयोगेन विष्णौ सावकाशाः, अपि तु पौराणिकरूढ्या गायत्र्याः भगवदधीनत्वादपीत्याशयेन तत्र स्मृतिमाह – **सर्वेति ॥ 'एषः'** विष्णुः **'सर्वछन्दोऽभिधः'** सर्वछन्दसाम् अभिधेवाभिधा यस्येति बहुव्रीहिः । छन्दोवाचकगायत्र्यादिसर्वशब्दवाच्यः । **'एवमसौ'** विष्णुः सर्वदेवतावाचकाग्न्यादिशब्दवाच्यः। तथा **'एषः'** विष्णुः सर्वलोकवाचकपृथिव्यादिशब्दवाच्य इत्यर्थः । कुत इत्यतः छन्दआदीनां भगवदधीनत्वादिति प्रत्येकं हेतुत्रयसूचनाय हिशब्दत्रयं, वेदप्रसिद्धिज्ञापनाय वा । छन्दसां लोकानां च प्रत्यक्षत्वाद् देवानां च परोक्षत्वादेषोऽसाविति विचित्रोक्तिः । कथं तर्ह्यन्यत्र व्यवहार इत्यत आह –**तेषामिति ॥** छन्दोदेवलोकानामित्यर्थः । **'तत्'** तच्छब्दबोध्यत्वम् **'उपचारतः'** विष्णुसमीपे चरणात् तदधीनत्वादमुख्यत एवेत्यर्थः ॥

वामन इत्यस्य **'हि'** यतो वामने इति **'दर्शनं'** प्रतिपादनमस्त्यतः श्रुतेर्मुख्यवृत्त्या विष्णावेव सावकाशत्वात् लिङ्गस्यामुख्यतोऽप्यन्यत्रानवकाशत्वात् तेन तद्बाधोपपत्तेर्भवत्येव गानत्राणकर्तृत्वलिङ्गमात्रेणायं निर्णय इत्युपस्कारेणान्वयः ॥

---

१. 'देवाभिधोऽप्यसौ' ह । २. '-लोकाभिधोऽप्येषः' ह ।

ॐ ॥ भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ ॐ ॥२६॥

हेत्वन्तरेणापि गायत्र्याः विष्णुत्वं साधयत् सूत्रमुपन्यस्य तद्गृहीतां श्रुतिमुदाहरति – **भूतादीति** । इतिशब्दस्य भूतादीत्यनेनान्वयः ॥ सूत्रे भूतं विश्वमादिः प्रथमोद्दिष्टं येषु ते भूतादयः, ते पादाः यस्य गायत्रीपदार्थस्य स भूतादिपादः, तस्य व्यपदेशः तत्प्रतिपादकं वाक्यं तस्योपपत्तेः युक्तत्वादिति विग्रहः । पादशब्दो भावप्रधानः । अत एव भूतादिपादत्वस्येत्युक्तं टीकायाम् । एवमित्यस्य चोभयत्रान्वयः । तथा च **'पादोऽस्य सर्वा भूतानि । त्रिपादस्यामृतं दिवि'** इत्येवं गायत्र्याः भूतादिशब्दगृहीतामृताख्यांशचतुष्टवत्त्वोपदेशात् तस्य च विष्णावेवोपपत्तेरन्यत्रानुपपत्तेरेव गायत्रीशब्दवाच्यो विष्णुरेव भवेदित्यर्थः । चशब्दस्य व्यपदेशपदेनान्वये गायत्र्या विष्णुत्वे साध्ये पूर्वसूत्रे दर्शनपदोक्तहेतोः एतत्सूत्रोक्तहेतुद्वयस्य च समुच्चये सः । यथाश्रुतान्वये तु भूतादिपादत्वस्य विष्णुलिङ्गत्वं न केवलं [१]विष्णोरेवोपपत्तेः सिद्धम्, किन्तु पुरुषसूक्तोक्तत्वाच्चेति हेतुसमुच्चये स इति ज्ञेयम् ॥

छान्दोग्ये हि **'सैषा चतुष्पदा षड्विधा गायत्री'** (छा.३-१२-५) इति वाक्येन यैषा षड्विधा गायत्री सा चतुष्पदेत्येवं गायत्रीनामकस्य भगवतः प्रागुक्तगायत्रीभूतवाक्पृथिवीशरीरहृदयलक्षणषड्विधत्वमनूद्य अंशचतुष्टयवत्त्वरूपं चतुष्पादत्वं विधाय स्वोक्तार्थ एव पुरुषसूक्तमन्त्रः समाख्यारूपत्वेनोदाहृतो ब्राह्मणेन **'तदेतदृचाऽभ्यनूक्तम्'** (छां. ३-१२-५) इति **'तदेतत्'** भगवतश्चतुष्पादत्वं **'ऋचा'** ऋङ्मन्त्रेण **'अभि'** निश्शङ्कं स्पष्टम् **'अनु'** आनुकूल्येनोक्तमित्यर्थः ॥

'तावानस्य महिमा ततो ज्यायांश्च पूरुषः । पादोऽस्य सर्वा

---

१. **'विष्णावेवो-'** म.

भूतानि त्रिपादस्यामृतं दिवि' *(छां.३-१२-६)* **इति ।**

किमुक्तमित्यतस्तन्मन्त्रं पठति – **तावानिति ॥** यद्यपि ऋचि **'एतावान्'** इति **'विश्वा'** इति च पाठः । तथाऽपि शाखान्तरपाठोऽयमित्यदोषः । **'अस्य'** पुरुषस्य **'पुरुष एवेदं सर्वम्'** (तै.आ. ३-१२.) इत्यृचा यः सर्वेशानत्वादिरूपः तावान् महिमोक्तः, न केवलमेतावान्, किन्तु, पुरुषः **'ततः'** पूर्वोक्तादपि महिम्नो **'ज्यायान्'** अधिकमाहात्म्योपेत इत्यर्थः । ज्यायस्त्वमेव दर्शयति – **पादोऽस्येत्यादिना ॥ 'सर्वा भूतानि'** सर्वं विश्वम् **'अस्य'** विष्णोरेकः **'पादः'** पादवत् पादो भिन्नांशः ॥

यद्यपि तत्त्वप्रदीपे – विश्वभूतविधिर्भाति । तथाऽपि टीकायां सर्वाणि भूतान्यस्यैकः पाद इति पादविधानदर्शनात्; चन्द्रिकायां **'पश्वेकत्ववद् विधेयगतत्वात् पादैकत्वं विवक्षितम्'** इत्युक्तत्वाच्च, तत्त्वप्रदीपोऽप्येवमेव व्याख्येयः । अस्य **'अमृतं'** नाशरहितम् अत एव स्वरूपभूतं **'त्रिपात्'** त्रयाणां पादानाम् अंशानां समुदायो नारायणवासुदेववैकुण्ठसञ्ज्ञं त्रिषु रूढ्या द्योतमानत्वाच्च द्युशब्दवाच्येषु श्वेतद्वीपानन्तासनवैकुण्ठेषु तिष्ठतीति ऋचोक्तमित्यर्थः ॥

यद्यपि भूतशब्दो **'भिन्नपादः सर्वजीवाः'** इति छान्दोग्यभाष्ये जीवपरतया व्याख्यातः । तथाऽपि **'सुवर्णम्'** इति श्रुत्यनुसारेणात्र विश्वार्थतया व्याख्यातव्यः ॥

'सुवर्णं कोशं रजसा परीवृतम् । देवानां वसुधानीं विराजम् । अमृतस्य पूर्णां तामु कलां विचक्षते । पादꣳ षड्डोतुर्न किला विवित्से' *(तै.आ.३-११)* **इति श्रुतेः पाद इति एकदेशपरिमितं चतुर्भागबल इतिवद् भिन्नं च ।**

ननु गायत्र्यामिव विष्णावपि भूतादिपादत्वोक्तिरनुपपन्ना । तस्य भूतभिन्नत्वादित्यत आह – **सुवर्णमित्यादि** ॥ **'सुवर्णम्'** इत्यारभ्य **'भिन्नं च'** इत्यन्तमेकवाक्यतयाऽर्थक्रमेण व्याख्येयम् । यज्ञदत्तस्य, देवदत्तः, इत्युच्यते, विश्वमिति च शेषः । पाद इति चाऽवर्तते । चशब्द एवार्थे हेतौ च । एकदेशपरिमितमिति हेतुगर्भमावर्तनीयम् । तथा च **'चो'** यतः श्रुतिस्थेन पाद इति शब्देन न भूतानामित्यमृतपादत्रयवत्स्वरूपांशत्वमुच्यते । येनानुपपत्तिः स्यात् । किन्तु, यज्ञदत्तस्य चतुर्भागबलो देवदत्त इतिवद् भिन्नमेव विश्वम् । यतः **'परिमितम्'** विष्णुपादपरिमितसामर्थ्यम् अतः पाद इति विष्णु-पादत्वेनोच्यत इत्यर्थः । अस्यातो विष्णौ भूतादिपादव्यपदेशोपपत्तेश्चैवमिति पूर्वेणान्वयः । तर्हि विश्वचतुष्टयसमो हरिरित्यागतमित्यतोऽप्याह – **पाद इतीति** ॥ तथा च यतः श्रौतपाद इति पदेन चतुर्भागबल इतिवन्न विश्वं विष्णुसामर्थ्यस्य चतुर्थांशपरिमितमित्युच्यते । किन्तु, **'एकदेशपरिमितं'** विष्णुसामर्थ्यैकदेश-परिमितमित्यतो नोक्तदोष इत्यर्थः । कुत एतद् ज्ञायत इत्यत आह – **सुवर्णं कोशमिति** ॥ **'श्रुतेः'** तैत्तिरीयश्रुतेः । श्रुतौ तृतीयार्थे षष्ठी, समुदायैकवचनं चैतत् । अत एव **'मुक्तैः पूर्णाम्'** इत्युक्तं टीकायाम् । एवं च तत्त्वप्रदीपटीकयोरेकवाक्यता ॥

पादमित्यावर्तते । तत्रैकं भावसाधनम् । न किलेति दीर्घः सांहितिकः । तथा चैकस्मिन् कपाले **'सुवर्णं'** तन्मयं **'रजसा परीवृतं'** रजोगुणो-पलक्षिताबग्रीरनभोऽहङ्कृन्महत्तत्त्वगुणत्रयैः परिवृतं **'विराजं'** ब्रह्मणः शरीरं, तत्त्वप्रदीपरीत्या विशेषेण राजन्तमिव **'कोशं'** लिङ्गव्यत्ययः, ब्रह्माण्डाख्यं यदस्ति । देवानां **'वसुधानीं'** द्रव्यनिधानमञ्जूषाम् **'अमृतैः'** मुक्तैः पूर्णां तां **'षड्होतुः'** षडिन्द्रियेषु विषयान् जुह्वतः, षडिन्द्रियाणि विषयेषु जीवेन जुह्वतो वा, षडिन्द्रियैः सारादनकर्तुर्वा, विष्णोः **'कलामु'** एकदेशपरिमितामेव **'पादं**

विचक्षते' पादशब्देनाऽचक्षते वदन्ति पुरुषसूक्ताद्यागमा इति शेषः । न किल अत्र पादशब्देनाङ्घ्रिं वदन्ति, नापि चतुर्थांशमित्येवार्थः । कुतः ? यतः सा मञ्जूषा '**पादं**' पादत्वं चतुर्थभागसाम्यं '**न विवित्से**' न लेभे किलेति श्रुत्यर्थः ॥

सत्तर्कदीपावल्याम् – **पादं न विवित्से** इति पादसाम्यं न लेभे इत्युक्तम् । अत्र पक्षद्वयेऽपि पुरुषव्यत्ययस्तुल्यः । टीकाकृत्पक्षे लकार-व्यत्ययश्च । यद्वा – लिङ्गव्यत्ययस्य छान्दसत्वं कोशमित्यस्य द्वितीयान्तत्वं चोपेत्य स्त्रीलिङ्गपदानामपि कोशविशेषणत्वेनैक एवान्वयः ॥

स हि पुरुषसूक्ताभिधेयः ।

'यज्ञेन यज्ञमयजन्त' *(तै.आ. ३-१२.)* **इति यज्ञशब्दात् ।**

'यज्ञो विष्णुर्देवता' *(श्रुत्यन्तरम्.)* **इति हि श्रुतिः ।**

स्यादेतदेवं यदि '**तावान्**' इत्यस्यामृचि विष्णुरभिधीयते इत्यत्र प्रमाणं स्यात्, तदेव नास्ति, अतो लिङ्गमन्यनिष्ठं भविष्यतीत्यतः सौत्रचशब्देन भूतादिपादत्वस्य विष्णुलिङ्गत्वे साध्ये पुरुषसूक्तोक्तत्वादिति यदनुमानं सूचितं तस्याप्रयोजकत्वमाशङ्क्य परिहरति – **स हीति** ॥ '**हि**' यस्मात् '**सः**' विष्णुरेव '**पुरुषसूक्ताभिधेयः**' तत्प्रतिपाद्यः तस्मात् स एव पुरुषसूक्तोक्त-भूतादिपादोऽपीति योजना । अन्यथा भूतादिपादत्वस्य विष्णुधर्मत्वाभावे पुरुषसूक्तप्रतिपाद्यत्वं न स्यादिति भावः । यद्वा – गायत्र्या विष्णुत्वे साध्ये सूत्रे भिन्नक्रमेणान्वितचशब्दसूचितयुक्त्यन्तरमाह – **स हीति** ॥ अस्य तस्माद् गायत्री विष्णुरेवेति प्रधानप्रतिज्ञावाक्येनान्वयः । चतुष्पदेत्युक्त-गायत्रीचतुष्पादत्वस्य पुरुषसूक्तमन्त्रेणोपपादनात् तत्प्रतिपाद्यत्वे तदुपपाद्य-गायत्रीशब्दार्थताऽपि तस्यैव प्राप्नोतीति भावः ॥

पुरुषसूक्तोक्तस्य विष्णुत्वं कुत इत्यत आह – **यज्ञेनेति** ॥ देवाः '**यज्ञेन**' ज्ञानकर्मात्मकेन रुद्राख्यपशुना वा '**यज्ञं**' विष्णुम् '**अयजन्त**' अपूजयन्निति श्रुत्यर्थः । **इति यज्ञशब्दादिति** ॥ इति वाक्ये यज्ञशब्दश्रवणादित्यर्थः ॥

यज्ञशब्दः कथं विष्णुत्वनिश्चायक इत्यतो विद्वद्रूढ्येत्याह – **यज्ञ इति** ॥ **'हि'** यतः यज्ञ इति पदेन विष्ण्वाख्या देवतोच्यत इत्यर्थः । यद्यपि **'यज्ञो वै विष्णुः'** इत्यध्वर्यूणां श्रुतिः । तथाऽपि श्रुत्यन्तरमिदमित्यदोषः ॥

'तस्मिन् काले महाराज राम एवाभिधीयते ।
यथा हि पौरुषे सूक्ते विष्णुरेवाभिधीयते ॥'इति च स्कान्दे ॥

ननु पुरुषसूक्तं न विष्णुप्रकरणं, किन्त्वन्यप्रकरणमेव । न च यज्ञश्रुति-विरोधः । पशुरूपान्यप्रकरणे तदन्यविष्णुश्रुतेरयोगादिति वाच्यम् । तस्याः प्रासङ्गिकत्वसम्भवात् । न च तत एव भूतादिपादत्वस्य विष्णुलिङ्गत्व-निश्चयः । तथाऽप्यसिद्धिः । **'पादोऽस्य विश्वा भूतानि'** इति श्रुतेर्भूतादिपादे यज्ञश्रुतेरभावादित्यतः पुरुषसूक्तोक्तस्य विष्णुत्वे स्मृतिं चाऽह -**तस्मिन्निति॥** महाराजेति कस्यचित्सम्बोधनं रामविशेषणं वा । तथात्वे दीर्घः स्यात् । तथाच हे महाराज **'तस्मिन्'** त्रेतायुगे सर्वैः पुरुषनामभी राम एवाभिधीयत इत्यर्थः ॥

अत एवांशाधिकरणे -

'नक्षत्रमानगणितं त्रयोदशसहस्रकम् ।
ब्रह्मलोकसमं चक्रे समस्तं क्षितिमण्डलम् ॥
रामोराम इति ह्याख्या सर्वेषामभवत् तदा ।
सर्वो राममयो लोको यदा रामस्त्वपालयत् ॥'

इति स्कान्द इत्युक्तं तत्त्वप्रदीपे ॥

अत्र दृष्टान्तमाह – **यथेति** ॥ यथा कृत्स्ने पौरुषे सूक्ते विष्णुरेव न त्वन्यः । पशुः नरः प्रासङ्गिकतयाऽभिधीयत इत्यर्थः । अनेन सिद्धस्यैव दृष्टान्तत्वात् पुरुषसूक्तस्य विष्णुपरत्वं सिद्धमिति भावः । स्कान्द इत्यनन्तरं एतदुक्तमिति शेषः । अस्य स हीति पूर्ववाक्येनान्वयः ॥

ॐ ॥ उपदेशभेदान्नेति
चेन्नोभयस्मिन्नप्यविरोधात् ॥ ॐ ॥२७ ॥

'त्रिपादस्यामृतं दिवि' *(छां. ३-१२-६.)* **इति पूर्वोपदेशः ।**
परो दिवः' *(छां. ३-१३-७.)* **इति पञ्चम्यन्तः पश्चिमः ।**
तस्मान्नेकं वस्त्वत्रोच्यते इति चेत् -—

उक्तमाक्षिप्य समादधत् सूत्रमुपन्यस्यति – **उपदेशेति ॥ 'उपदेशयोः'** सप्तमीपञ्चमीयुतवाक्ययोः **'उपदेशेन'** गायत्रीज्योतिषोः द्युस्थत्वदिवःपरत्वरूप-विरुद्धधर्मोक्त्या **'भेदात्'** विरोधान्न द्वयोर्विष्ण्वाख्यम् एकं वस्तु प्रतिपाद्यं, किन्तु भिन्नमेवेति चेत् – न, किन्तु **'उभयस्मिन्'** उभयत्राप्युपदेशे एकमेव प्रतिपाद्यं, कथम् ? अविरोधात् । त्रिसप्तलोकापेक्षया सप्तमीपञ्चम्योः एकार्थत्वेन विरोधाभावादिति सूत्रयोजनामभिप्रयन्नाक्षेपांशं तावद् व्याचष्टे – **त्रिपादिति ॥ 'पूर्वोपदेशः'** पूर्वोक्तिः । **'पश्चिमः'** पश्चात्तनः उत्तर उपदेश-स्तद्भिन्नोऽस्तीति शेषः । विरोधस्फोरणाय पञ्चम्यन्त इत्याद्युक्तिः । उपक्रमगतस्य प्राबल्योपपादनाय पूर्व इत्युक्तिः । ततः किमित्यत आह – **तस्मादिति ॥** यस्मादेवं भिन्नोपदेशद्वयमस्ति तस्मादत्रोपदेशद्वये गायत्रीज्योतिश्शब्दाभ्यां नैकं वस्तु विष्ण्वाख्यमुच्यते । कुतः ? यतोऽत्र **'नैकम्'** अनेकं वस्तु द्युस्थत्वदिवःपरत्वरूपं धर्मद्वयमुच्यते । किन्त्वत्र **'नैकम्'** अनेकं वस्तुद्वयमुच्यत इति योजना ॥

न, त्रिसप्तलोकापेक्षया उभयस्मिन्नप्यविरोधात् ॥

॥ इति छन्दोऽभिधानाधिकरणम् ॥ ११ ॥

सिद्धान्तयत् सूत्रांशं व्याचष्टे – **नेति ॥** नात्र वस्तुद्वयमुच्यते इत्यर्थः । किंत्विति शेषः, एकं वस्तूच्यत इत्यनुषज्यते । उभयस्मिन्निति साध्यान्तर्गतम् ।

अपिशब्दो न केवलमेकत्र, किन्तूभयत्रापीति समुच्चये । तथा च किन्तूभयस्मिन्नप्युपदेशे एकमेव विष्ण्वाख्यं वस्तूच्यत इति योजना । विरोधात् कथमेतद् युज्यते इत्यत आह - **त्रिसप्तलोकापेक्षयेति** ॥ त्रिलोकविवक्षया सप्तलोकविवक्षया च **'अविरोधात्'** उभयत्राप्येकवस्त्वभिधाने विरोधाभावादित्यर्थः ॥

अयं भावः – यदा भूर्भुवस्स्वरिति लोकत्रयविवक्षा, तदा लक्षयोजनोच्छ्रितान्तरिक्षाख्यभुव उपरितनस्य सर्वस्यापि द्युत्वात् श्वेतद्वीपानन्तासनवैकुण्ठानां चान्तरिक्षादुपरितनत्वात् तत्रत्यं नारायणवासुदेववैकुण्ठाख्यं त्रिपाच्छब्दोक्तं रूपत्रयं दिवि तिष्ठतीत्युच्यत इति न सप्तम्यन्तोपदेशविरोधः । न च ,

'पृथिवीस्थेषु सर्वोच्चो लोकोऽनन्तासनात्मकः ।
अन्तरिक्षात्मकेभ्यश्च श्वेतद्वीपस्थितो हरिः ॥'

इत्युक्तेरनन्तासनस्य नान्तरिक्षादुपरितनतेति शङ्क्यम् । तस्य पृथिवीस्थत्वेऽपि बहुलक्षयोजनोच्छ्रितत्वेनैकलक्षयोजनोच्छ्रितान्तरिक्षादुपरितनत्वोपपत्तेः । सर्वपृथिवीस्थोच्चत्वोक्त्या तु न पृथिवीस्थान्योच्चत्वयोगो व्यावर्त्यते । किन्तु पृथिवीस्थोच्चत्वायोगः । यदा तु भूर्भुवस्स्वर्महर्जनस्तपस्सत्यमिति सप्तलोकविवक्षा तदेन्द्रसदनस्य द्युत्वात् तदुच्चस्याप्युपरिस्थितत्वेन तत्सजातीयस्य वैकुण्ठस्य दिवः परत्वम् ॥

'पृथिव्यां द्यौर्महामेरुराकाशे सूर्यमण्डलम् ।
दिवीन्द्रसदनं चैव तत्परे तु दिवः परे ॥'

इति स्मृतेर्मेरोरपि द्युत्वात् तदुच्चस्य भूस्पृष्टत्वेन तत्सजातीयस्यानन्तासनस्यापि दिवः परता । एवं सूर्यमण्डलस्यापि द्युत्वात् तदुच्चस्योपरिस्थत्वेन तत्सजातीयस्य भूमेः किञ्चिदन्तरितस्य स्वर्गसमोन्नतस्य श्वेतद्वीपस्यापि दिवः

परत्वमस्तीति न पञ्चम्यन्तोपदेशविरोधोऽपीति । द्युपरत्वं च सम्भावित-सजातीयद्युपरत्वमिति न यावत्त्वयत्किञ्चित्त्वमुखेन दूषणावकाशः । वैकुण्ठस्य स्वर्गलोकात् परत्वेनैव दिवः परत्वसिद्धावपि तस्य **'सर्वतः पृष्ठेषु'** इत्यनेनैव उक्तत्वात् स्वर्गत्यागेनेन्द्रसदनस्य द्युत्वोक्तिः । न च लोकत्रयविवक्षयैवानन्ता-सनादीनामपि मेर्वादिपरत्वेन दिवः परत्वस्यापि सिद्धेः सप्तलोकविवक्षा व्यर्थेति वाच्यम् । तथा सति वैकुण्ठस्यापि द्युशब्दार्थनिविष्टत्वेन तस्य सर्वद्युपरत्वासिद्ध्यापत्त्या **'द्व्यात्मकेभ्यश्च सर्वेभ्यो वैकुण्ठश्चोच्च उच्यते'** इति प्रमाणविरोधापातात् ॥

छान्दोग्यभाष्ये तु –

'अनन्तशयनं चैव तथाऽनन्तासनं हरेः ।

बहुलक्षोच्छ्रिते नित्ये विमाने संस्थितं यतः ।

चित्प्रकृत्यात्मनि यतो दिवीति कथितं श्रुतौ ॥'

इति प्रमाणबलेन चित्प्रकृत्यात्मकानन्तासनश्वेतद्वीपवैकुण्ठाख्यस्थानत्रये सप्तम्यन्तो द्युशब्दो द्योतमानत्वनिमित्तेन यौगिकः, स्वर्गादौ तु रूढ इति उपदेशयोरविरोध इति प्रकारान्तरेण विरोधपरिहारः कृतः ॥ ११ ॥

॥ इति छन्दोऽभिधानाधिकरणम् ॥ ११ ॥

॥ १२. अथ पादान्त्यप्राणाधिकरणम् ॥

(ऐतरेयश्रुत्युक्तः प्राणो विष्णुरेवेति समर्थनम्)

प्राणो विष्णुरित्युक्तम् । तत्र 'ता वा एताः शीर्षञ्छ्रियः श्रिताश्चक्षुः श्रोत्रं मनो वाक् प्राणः' *(ऐ.आ. २-१-४.)* **इत्यत्र प्राणस्य विष्णुत्वं न युज्यते[1] । इन्द्रियैः सहाभिधानादिति । अत आह –**

॥ १२. अथ पादान्त्यप्राणाधिकरणम् ॥

अत्राधिकरणे लोकतोऽन्यत्र प्रसिद्धप्राणनाम्नो विष्णौ समन्वयः प्रतिपाद्यते । श्रुत्यादिसङ्गतिविषयवाक्यविषयसंशयसयुक्तिकपूर्वपक्षान् दर्शयति– **प्राण इति** ॥ आद्यप्राणाधिकरणे **'तद्वै त्वम्'** (तै.आ.३-१४.) इति वाक्योक्तप्राणो विष्णुरित्युक्तमित्यर्थः । ततः किमित्यत आह – **तत्रेति** ॥ उक्तमित्यनुषज्यते । तस्याऽवृत्तिविपरिणामौ । एवं तत्रेत्यप्यावर्तनीयम् । तथा च **'तत्र'** तद्वै त्वमिति वाक्ये उक्तस्य प्राणस्य विष्णुत्वं न विद्यते न युज्यते । कुतः ? यतस्तत्र **'तद्वै त्वम्'** इति वाक्योक्तप्राणविषये **'उक्ते'** श्रुते **'ता वा एताः'** इत्यैतरेयवाक्ये उक्तस्य श्रुतस्य प्राणस्य विष्णुत्वं न विद्यत इति योजना । कुतो न विद्यत इत्यत आह – **इन्द्रियैः सहाभिधानादिति** ॥ इन्द्रियैः सह पठितत्वाद् इन्द्रियगणे गणितत्वादित्यर्थः । अनेनैतरेयप्राणस्य विष्ण्वन्यत्वाक्षेपमुखेन प्राचीनतैत्तिरीयोक्तप्राणस्याप्यन्यत्वाक्षेपात् तेनास्याऽक्षेपिकी सङ्गतिरुक्ता भवति ॥

ऐतरेयप्राणाख्यो विषयः । प्राणोऽन्य उत विष्णुरिति संशयश्च सूचितः ।

---

१. 'न विद्यते' इ.।

तथा वाय्वादिरन्य एवेति पूर्वपक्षः । इन्द्रियगणे गणितत्वाख्यतत्साधकलिङ्गं च सूचितम् ॥

'ता वा एताः' इत्येतच्च चतुर्मुखशिरसि शिरश्शब्दप्रवृत्तिनिमित्तकथनाय प्रवृत्तम् । वैशब्दः प्रसिद्धौ । तथा च यतः **'ता एताः'** चक्षुः श्रोत्रं मनोवाक्प्राण इत्येतच्छब्दवाच्यास्तदभिमानिन्यो देवताः । **'शीर्षन्'** शीर्ष्णि शिरःसञ्ज्ञिक-मूर्ध्नि श्रिताः । अत एव श्रयणाच्छ्रय इति सिद्धान्ते श्रुत्यर्थः ॥

अनेन चक्षुरादिभिः श्रितत्वं शिरःपदप्रवृत्तिनिमित्तमित्युक्तं भवति । पूर्वपक्षी तु प्राणशब्दमन्यमात्रपरं मन्यते ॥

सिद्धान्तयत्सूत्रमवतारयति – **अत इति** ॥ यतः पूर्वपक्षः प्राप्तः अत उत्तरं सूत्रमाह भगवान् बादरायण इत्यर्थः ।

सू - ॐ ॥ प्राणस्तथाऽनुगमात् ॥ ॐ॥ २८ ॥

'तं देवाः प्राणयन्त' *(ऐ.आ. २-१-५.)*
'स एषोऽसुः स एष प्राणः' *(ऐ.आ. २-१-५.)*
'प्राण ऋच इत्येव विद्यात्' *(ऐ.आ.२-२-२.)*
'तदयं प्राणोऽधितिष्ठति' *(ऐ.आ.२-३-८.)* **इत्याद्यनुगमात् ।**

सूत्रं पठित्वा तत्रानुगमादिति हेत्वंशं श्रुत्युदाहरणेन व्याचष्टे – **प्राण इति ॥ इत्यादीति ॥** एवमादिवाक्योक्तानां देवतोपदेश्यत्वादिलिङ्गानाम् अत्रास्मिन् प्रकरणे बहुषु स्थलेषु **'अनुगमात्'** अनुवृत्तेरभ्यासादित्यर्थः । आदिपदेन **'प्राणो ह्येवैष य एष तपति'** इति सूर्यमण्डलस्थत्वप्रतिपादकवाक्यं गृह्यते । तथा **'सर्वाणि भूतान्यापिपीलिकाभ्यः प्राणेन वृहत्या विष्टब्धानि'** इत्यादि वाक्यं च गृह्यते ॥

अत्रापि प्राणो विष्णुरेव ।

सौत्रं तथाशब्दं व्याचष्टे – **अत्रापीति** ॥ श्रुत इति शेषः । न केवलं **'तद्वै त्वम्'** इत्यत्र, किन्त्वैतरेयेऽपीति समुच्चयेऽपिशब्दः । सूत्रे अनुवृत्तस्य तत्त्वित्यस्यार्थमाह – **विष्णुरेवेति** ॥ अनेन यथा **'तद् वै त्वम्'** इति श्रुत्युक्तप्राणो विष्णुः तथैतरेयोक्तोऽपि विष्णुरेव, न त्वन्यः । कुतः ? विष्णुलिङ्गानां देवतोपदेश्यत्वादीनामस्मिन् प्रकरणे **'अनुगमात्'** अनुवृत्तेरभ्यासादिति सूत्रार्थ उक्तो भवति । ऐतरेये **'तं देवाः प्राणयन्त'** इति एकखण्डस्थं वाक्यम् । **'तं'** नारायणं वायुं च देवाः **'प्राणयन्त'** प्रकर्षेण शिष्यप्रशिष्यादिषु नीतवन्तः उपदिदिशुरित्यर्थः । अनेन विष्णोः [१]सर्वदेवोपास्यत्वमुक्तं भवति । **'स एषोऽसुः स एष प्राणः स एष भूतिः'** इत्याद्यन्यखण्डगतं वाक्यम् । अनेन भूतित्वादिना देवाद्युपास्यत्वमुच्यते ॥

'स एषः' भगवान् दुष्टनिरसनादसुः प्रकृष्टानन्दरूपत्वात् प्राणः देवानां भूतिशब्दितज्ञानाद्यैश्वर्यप्रदत्वादसुराणाम् अज्ञानाद्यनैश्वर्यहेतुत्वाच्च भूत्यभूतिशब्दवाच्य इत्यर्थः । तत्रैव **'ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एव । प्राण ऋच इत्येव विद्यात्'** इति अन्यद्वाक्यम् । अत्र प्राणस्य सर्ववेदोक्तत्वमुच्यते । यास्ताः एताः सर्वा ऋचस्तासां **'एकैव व्याहृतिः'** एकमेव व्याहर्तव्यं प्रतिपाद्यम् । तच्च किम् ? प्राणो विष्णुरेव ॥

किञ्च ये सर्वे वेदाः तेषामपि प्राण एव प्रतिपाद्यः। अपि च ये समुद्रादिघोषाः तेषामपि, किमु वेदानाम् । तत्र ऋचस्तु विशेषत इन्द्रादिनामवतो विष्णोर्गुणान् अल्पज्ञानामपि प्रकाशयन्तीति, प्राणे नारायणे तद्विषया एव **'विद्यात्'** तत्प्रतिपादिका एवेति जानीयादित्यर्थः ॥

---

१. **'सर्वदेवोपदेश्यत्व-'** म.

ऐतरेयभाष्ये तु – प्रथमप्राणपदमपि विषयसप्तम्यन्ततया व्याहृतिशब्दं च व्याहरणपरतया व्याख्याय एकमेव व्याहरणं निर्दोषगुणपूर्तिवाचकत्वादेकप्रकारमेव नामेत्यर्थ उक्तः । तत्त्वप्रदीपेऽप्ययमेवोक्तः । **'अथ देवरथः तस्य वागुद्धिः श्रोत्रे पक्षसी चक्षुषी युक्ते मनः सङ्गृहीता तदयं प्राणोऽधितिष्ठति'** इति वाक्यान्तरम् । अत्र प्राणस्य देहरथत्वमुच्यते । प्रमेयान्तरकथनारम्भार्थोऽथशब्दः । उच्यत इति शेषः। तथा च देवस्य विष्णोः वायोः अध्यात्ममधिदैवतं च रथ उच्यते इत्यर्थः । तस्याध्यात्मं देहाख्यरथस्य **'वाक्'** वागाख्या उमा उद्धिः धारणरज्जुरूपा अधिदैवं विष्णुरथस्य प्रसिद्धस्यन्दनस्य च नागाकारोमा उद्धिः **'श्रोत्रे'** दक्षवामपार्श्वगतचन्द्रतद्धार्ये **'पक्षसी'** पार्श्वयुक्ताश्वौ अन्यत्राश्वरूपौ पार्श्वयोर्युक्तौ **'चक्षुषी'** उभयपार्श्वगतसूर्यतद्धार्ये च **'युक्ते'** अग्रतो नियुक्ताश्वौ **'मनः'** मनोऽभिमानी रुद्रः **'सङ्गृहीता'** सारथिः । एवम् अधिदैवं प्रसिद्धस्यन्दनस्यापि रुद्रः सारथिः । स चासावयं च तदयमित्येकं पदम् । तत्त्वप्रदीपरीत्या भिन्नपदत्वेऽपि तदिति रथतयोक्तं शरीरं परामृश्यते । लिङ्गव्यत्ययेन तं रथमिति वा । अयं प्राणो विष्णुः वायुश्चाधितिष्ठतीत्यर्थः । लिङ्गेन पूर्वपक्षिते कथं तेनैव सिद्धान्त इत्याशङ्कानुदयाय लिङ्गबाहुल्योक्तिः ॥

'विष्णुमेवाऽनयन् देवा विष्णुं भूतिमुपासते ।
स एव सर्ववेदोक्तस्तद्रथो देह उच्यते ॥' इति स्कान्दे ।

ननु बाहुल्येन बलवतः सैद्धान्तिकलिङ्गादपि पूर्ववाद्युक्तलिङ्गमेव बलवत् । निरवकाशत्वेन स्वभावतो बलवत्त्वात् । न चाविशेषेणानिर्णयः, बाहुल्येन बलवतोऽपि स्वभावबलिनः प्राबल्यात् । यदाहुः –

'द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावतः ।
'तयोः स्वभावो बलवान् उपजीव्यादिकश्च सः ॥' इति ।

अत्रापि प्राणो विष्णुरेव ।

सौत्रं तथाशब्दं व्याचष्टे – **अत्रापीति** ॥ श्रुत इति शेषः । न केवलं **'तद्वै त्वम्'** इत्यत्र, किन्त्वैतरेयेऽपीति समुच्चयेऽपिशब्दः । सूत्रे अनुवृत्तस्य तत्त्वित्यस्यार्थमाह – **विष्णुरेवेति** ॥ अनेन यथा **'तद् वै त्वम्'** इति श्रुत्युक्तप्राणो विष्णुः तथैतरेयोक्तोऽपि विष्णुरेव, न त्वन्यः । कुतः ? विष्णुलिङ्गानां देवतोपदेश्यत्वादीनामस्मिन् प्रकरणे **'अनुगमात्'** अनुवृत्तेरभ्यासादिति सूत्रार्थ उक्तो भवति । ऐतरेये **'तं देवाः प्राणयन्त'** इति एकखण्डस्थं वाक्यम् । **'तं'** नारायणं वायुं च देवाः **'प्राणयन्त'** प्रकर्षेण शिष्यप्रशिष्यादिषु नीतवन्तः उपदिदिशुरित्यर्थः । अनेन विष्णोः [१]सर्वदेवोपास्यत्वमुक्तं भवति । **'स एषोऽसुः स एष प्राणः स एष भूतिः'** इत्याद्यन्यखण्डगतं वाक्यम् । अनेन भूतित्वादिना देवाद्युपास्यत्वमुच्यते ॥

'स एषः' भगवान् दुष्टनिरसनादसुः प्रकृष्टानन्दरूपत्वात् प्राणः देवानां भूतिशब्दितज्ञानाद्यैश्वर्यप्रदत्वादसुराणाम् अज्ञानाद्यनैश्वर्यहेतुत्वाच्च भूत्यभूतिशब्दवाच्य इत्यर्थः । तत्रैव **'ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एव । प्राण ऋच इत्येव विद्यात्'** इति अन्यद्वाक्यम् । अत्र प्राणस्य सर्ववेदोक्तत्वमुच्यते । यास्ताः एताः सर्वा ऋचस्तासां **'एकैव व्याहृतिः'** एकमेव व्याहर्तव्यं प्रतिपाद्यम् । तच्च किम् ? प्राणो विष्णुरेव ॥

किञ्च ये सर्वे वेदाः तेषामपि प्राण एव प्रतिपाद्यः। अपि च ये समुद्रादिघोषाः तेषामपि, किमु वेदानाम् । तत्र ऋचस्तु विशेषत इन्द्रादिनामवतो विष्णोर्गुणान् अल्पज्ञानामपि प्रकाशयन्तीति, प्राणे नारायणे तद्विषया एव **'विद्यात्'** तत्प्रतिपादिका एवेति जानीयादित्यर्थः ॥

---

१. **'सर्वदेवोपदेश्यत्व-'** म.

ऐतरेयभाष्ये तु – प्रथमप्राणपदमपि विषयसप्तम्यन्ततया व्याहृतिशब्दं च व्याहरणपरतया व्याख्याय एकमेव व्याहरणं निर्दोषगुणपूर्तिवाचकत्वादेकप्रकारमेव नामेत्यर्थ उक्तः । तत्त्वप्रदीपेऽप्ययमेवोक्तः । **'अथ देवरथः तस्य वागुद्धिः श्रोत्रे पक्षसी चक्षुषी युक्ते मनः सङ्गृहीता तदयं प्राणोऽधितिष्ठति'** इति वाक्यान्तरम् । अत्र प्राणस्य देहरथत्वमुच्यते । प्रमेयान्तरकथनारम्भार्थोऽथशब्दः । उच्यत इति शेषः। तथा च देवस्य विष्णोः वायोः अध्यात्ममधिदैवतं च रथ उच्यते इत्यर्थः । तस्याध्यात्मं देहाख्यरथस्य **'वाक्'** वागाख्या उमा उद्धिः धारणरज्जुरूपा अधिदैवं विष्णुरथस्य प्रसिद्धस्यन्दनस्य च नागाकारोमा उद्धिः **'श्रोत्रे'** दक्षवामपार्श्वगतचन्द्रतद्भार्ये **'पक्षसी'** पार्श्वयुक्ताश्वौ अन्यत्राश्वरूपौ पार्श्वयोर्युक्तौ **'चक्षुषी'** उभयपार्श्वगतसूर्यतद्भार्ये च **'युक्ते'** अग्रतो नियुक्ताश्वौ **'मनः'** मनोऽभिमानी रुद्रः **'सङ्गृहीता'** सारथिः । एवम् अधिदैवं प्रसिद्धस्यन्दनस्यापि रुद्रः सारथिः । स चासावयं च तदयमित्येकं पदम् । तत्त्वप्रदीपरीत्या भिन्नपदत्वेऽपि तदिति रथतयोक्तं शरीरं परामृश्यते । लिङ्गव्यत्ययेन तं रथमिति वा । अयं प्राणो विष्णुः वायुश्चाधितिष्ठतीत्यर्थः । लिङ्गेन पूर्वपक्षिते कथं तेनैव सिद्धान्त इत्याशङ्कानुदयाय लिङ्गबाहुल्योक्तिः ॥

'विष्णुमेवाऽनयन् देवा विष्णुं भूतिमुपासते ।
स एव सर्ववेदोक्तस्तद्रथो देह उच्यते ॥' इति स्कान्दे ।

ननु बाहुल्येन बलवतः सैद्धान्तिकलिङ्गादपि पूर्ववाद्युक्तलिङ्गमेव बलवत् । निरवकाशत्वेन स्वभावतो बलवत्त्वात् । न चाविशेषेणानिर्णयः, बाहुल्येन बलवतोऽपि स्वभावबलिनः प्राबल्यात् । यदाहुः –

'द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावतः ।
'तयोः स्वभावो बलवान् उपजीव्यादिकश्च सः ॥' इति ।

अतः कथं तैर्विष्णुत्वनिश्चय इत्यतो देवतोपदेश्यत्वादिलिङ्गानां निरवकाशत्वमपि स्मृत्या साधयति – **विष्णुमिति** ॥ देवाः विष्णुमेव प्राधान्येन शिष्यादिषु ज्ञानसम्प्रदायप्रवर्तनेन **'आनयन्'** उपादिशन् । भूतिमुद्दिश्य विष्णुमेवोपासते । भूतिमिति विधेयविशेषणं वा । तथा च विष्णुं भूतिं भूतिर्ज्ञानाद्यैश्वर्यरूप इत्युपासत इत्यर्थः । **'सः'** विष्णुर्मुख्यवाच्यतयेति शेषः, तेनैवकारोपपत्तिः । **'तद्रथः'** विष्णोरेव रथः । अत्रैवकारस्य द्विर्ग्रहणात् सर्वत्रानुषङ्गः सूचितः । तेन सर्वलिङ्गानामपि निरवकाशत्वमुक्तं भवति । **स्कान्दे** इत्यनन्तरं लिङ्गानामनन्यथासिद्धत्वमुक्तमिति वाक्यशेषः । तथा चैकप्रकारेण प्रबलात् पूर्वपक्षिलिङ्गात् प्रकारद्वयेनापि प्रबलस्य सैद्धान्तिकलिङ्गस्याऽधिक्येन निर्णयोपपत्तिरिति भावः । अभ्युपेत्य चेदमुदितम् । वस्तुतस्तु पूर्वपक्षिलिङ्गस्य न निरवकाशत्वेनापि प्राबल्यमस्ति, प्राणैः सहगणितत्वस्यान्तर्यामिनिष्ठतासम्भवात् ॥

ब्रह्मशब्दानुगमाच्च ॥

यदा बहुत्वनिरवकाशत्वाख्यप्रकारद्वयेनापि दुर्बललिङ्गस्योभयथाप्रबललिङ्गतो बाधसम्भवेन तैनैव प्राणस्य विष्णुत्वसिद्धिः, तदा किमु वाच्यं निरवकाशब्रह्मशब्दाभ्यासादिति भावेनानुगमपदं प्रकारान्तरेण व्याचष्टे - **ब्रह्मेति** ॥ अस्मिन् प्रकरणे **'एतद्ब्रह्म'** (ऐ.आ. २-१-१.) **'ब्रह्मणो लोकः'** (ऐ.आ. २-१-३.) **'ब्रह्मेमं पुरुषम्'** (ऐ.आ. २-१-४.) **'उदरं ब्रह्मेत्याचक्षते'** (ऐ.आ.२-१-४.) **'अ इति ब्रह्म'** (ऐ.आ. २-३-८.) इत्यादि निरवकाशब्रह्मशब्दाभ्यासाच्चेत्यर्थः । एतद् विष्णुस्वरूपं ब्रह्म गुणपूर्णम् । अयं जीवो ब्रह्मणः परस्याऽश्रयः । इमं पुरुषं चतुर्मुखं परब्रह्म प्रापद्यत । वायुर्यत्र स्थित उर्वेव गरणं स्तवनं चक्रे तत्स्थानमुदरं तद्गतमित्यर्थः ॥

सू - ॐ ॥ न वक्तुरात्मोपदेशादिति चेदध्यात्म-
सम्बन्धभूमा ह्यस्मिन् ॥ ॐ ॥ २९ ॥

'प्राणो वा अहमस्म्यृषे' *(ऐ.आ.२-२-३.)*
इति वक्तुरात्मोपदेशादिन्द्र एवेति चेत् - न,
'प्राणस्त्वं प्राणः सर्वाणि भूतानि' *(ऐ.आ.२-२-३)*
इति बह्वध्यात्मसम्बन्धो ह्यत्र विद्यते ॥ २९ ॥

उक्तमाक्षिप्य समादधत्सूत्रं पठित्वाऽऽक्षेपांशं तावद् व्याचष्टे – **नेति ॥** प्राण इत्यनुवर्तते । तथा च प्राणो विष्णुरिति न युक्तम् । कुतः ? **'प्राणो वा अहमस्म्यृषे'** इति वाक्येन बृहतीसहस्रवक्तुर्विश्वामित्रस्येन्द्रेण प्राणतया आत्मनः स्वस्यैवोपदेशादित्यर्थः । प्राण इन्द्र एवेति फलोक्तिः । न तूक्तहेतोः साध्योक्तिः ॥

'प्राणो वाऽहमस्म्यृषे' इति वाक्यं तु 'तमिन्द्र उवाच ऋषे प्रियं वै मे धामोपागाः वरं ते ददामीति । स होवाच त्वामेव जानीयामिति । तमिन्द्र उवाच' इति पूर्ववाक्येन सह व्याख्येयम् । तत्प्रकारस्तु - 'तं' विश्वामित्रं 'इन्द्रः' तदन्तःस्थो भगवानुवाच । किमिति ? हे ऋषे ! मे प्रियं धामोपागाः प्राप्नुहि । ते वरं ददामीति । वैशब्दोऽवधारणे प्रसिद्धौ वा ॥

एवं त्रिवारं शंसनेन धामशब्दितसालोक्यप्राप्तिभगवत्पुरप्राप्तिसाधन-भगवत्प्रसादं प्राप्तः 'सः' विश्वामित्रः इन्द्राविष्टेन हरिणा वरं ते ददानीति पुनरुक्तः सन् उवाच । किमिति ? त्वां सामान्यतः पूर्वम् अहं जाने । अधुना कीदृशस्त्वमिति विशेषतो जानीया-मिति । एवमुक्तः 'इन्द्रः' तदन्तर्गतो हरिः ऋषिं प्रत्युवाच । किमिति ? हे ऋषे! अहं प्रकृष्टानन्दरूपत्वात् प्राणशब्द-वाच्योऽस्मीति । अत्र वाक्यसमन्वयपक्षेऽस्मदादिषूपपदेषु विहितानाम-स्मीत्यादितिङन्तपदानां तद्वृत्तेः सुलभत्वादिति तत्त्वनिर्णयटीकारीत्या

अहमितीन्द्रान्तःस्थेन हरिणा स्वात्मनो निर्देशादस्मीति उत्तमपुरुषोपपत्तिः ॥

[1]पूर्वपक्षिरीत्या श्रुत्यर्थस्तु स्पष्टः । अहं प्राणोऽस्मीति पदानामहेयत्व-प्रकृष्टानन्दत्वसंहर्तृत्वज्ञातृत्वनिमित्तैः भगवति समन्वयपक्षे तु न तदनुपपत्ति-रिति ध्येयम् ॥

नञध्याहारेण सिद्धान्तांशं व्याचष्टे - **नेति** ॥ अनुगमादित्यनुवर्तते । नेत्यावर्तते । हिशब्दो यत इत्यर्थे । अस्योक्तमिति शेषः । तथा चेत्थं तत्त्वप्रदीपटीकोक्ता योजना - नायं प्राण इन्द्रः, किन्तु विष्णुरेव । कुतः ? **'अनुगमात्'** प्रागुक्तप्रबलतमलिङ्गादेः । तथा सत्युपदेशविरोध इति चेत् - न, कुतः ? यतोऽत्र प्रकरणे स्वस्थितस्यैव प्रथमं **'प्राणो वा अहमस्म्यृषे'** इति वाक्येन परमात्मत्वमुक्तमिन्द्रेण । तर्ह्यैक्योक्तिविरोध इत्यपि न । यतोऽत्र तस्यैव प्राणाख्यपरमात्मनः **'प्राणस्त्वं प्राणः सर्वाणि भूतानि'** इत्येवमादि-वाक्येन **'बह्वध्यात्मसम्बन्धः'** इन्द्रादिजीवरूपबहुदेहसम्बन्धः सर्वगतत्वमेव ऋषिं प्रति इन्द्रेणोक्तं **'विद्यते'** अस्ति नत्वैक्यमत इति । सूत्रोक्तसम्बन्ध-बाहुल्यं सम्बन्धिनि पर्यवस्यतीत्याशयेन बह्वित्युक्तम् । भूमशब्दस्य भाव-वाचित्वेऽपि भावभवित्रोरभेदाद् भवितरि प्रयोगः । सूत्रे तु परनिपात आर्षः ॥

अथवा – अधिकश्चासावात्मा चाध्यात्मा तस्य सम्बन्धः बहुश्चासावध्यात्मसम्बन्धश्चेति विग्रहः । तथा च **'हि'** यतः **'अत्र'** इन्द्रे **'बहुः'** बहुलः परमात्मसम्बन्धः सन्निधिविशेषो विद्यत इत्यर्थः । विद्यत इत्यनन्तरं तदपेक्षयाऽयम् उपदेशो न स्वापेक्षयेति शेषः । तथाचेन्द्रे तात्कालिकेश्वरसन्निधानविशेषाभिप्राया **'प्राणो वा अहम्'** इत्युक्तिः, न स्वापेक्षयेति नोपदेशविरोध इति भावः । कुतो न स्वापेक्षयेत्यतः

---

१. **'पूर्वपक्षरीत्या'** – म

प्राणस्त्वमित्याद्याह । योजना तु - हि यस्मात् **'प्राणस्त्वम्'** इत्यादिवाक्येनास्य प्राणस्य **'बह्वध्यात्मसम्बन्धः'** अध्यात्मत्वेनान्तर्यामित्वेन इन्द्रादिरूपबहुदेह-सम्बन्धः सर्वगतत्वमुक्तं विद्यते । न चैतदत्र जीवविशेषेन्द्रे विद्यते युज्यते । **तस्मादिति ॥** प्रथमपक्षे **'यस्याऽत्मा शरीरम्'** (माध्यन्दिन) इति श्रुते-रिन्द्रादीनां विष्णुदेहत्वादैक्यव्यपदेशः शरीरशरीरिभावनिबन्धन इति ज्ञापनायाध्यात्मेत्युक्तिः । अनेन बृहतीसहस्रवक्तुर्विश्वामित्रस्य तं प्रतीन्द्रेण प्राणतयाऽत्मोपदेशादयं प्राणो न विष्णुः, किन्तु इन्द्र एवेति चेत् - नेन्द्रोऽयं प्राणः, किन्तु विष्णुरेव । कुतः ? अनुगमात् प्रागुक्तप्रबलतमलिङ्गादेः । न चोपदेशविरोधः । यतोऽयमिन्द्रगताध्यात्मविषय एव । कुतः ? हि यस्मादस्मिन् प्रकरणेऽध्यात्मसम्बन्धभूमा । अत्राध्यात्मसम्बन्धशब्देनाऽत्मा-धिकारे वर्तमानमिति । अधिश्वासौ आत्मा चेति देहः परमात्मा चोच्यते । तथा च यस्मादध्यात्मनो विष्णोरिन्द्रविश्वामित्रादिदेहसम्बन्ध उक्तोऽस्ति तस्मात् ॥

अथवा – हि यस्माद् अस्मिन्निन्द्रे अध्यात्मसम्बन्धभूमा – अधिरीश्वरे – अधिकस्याऽत्मनः परमात्मनः सम्बन्धस्याऽवेशस्य भूमा बाहुल्यं विद्यते तस्मादुपदेशस्य सन्निहितपरमात्मविषयत्वोपपत्तेरिति भावः । तदपि कुतः ? हि यस्मात् अस्मिन् प्रकरणेऽध्यात्मसम्बन्धभूमोक्तः तस्मादिति सूत्रार्थ उक्तो भवति ॥

ॐ॥ शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ ॐ ॥३०॥

शास्त्रमन्तर्यामी ।

ननु यदि प्राणशब्देनेन्द्रेणापि विष्णुरेव स्वात्मादिसर्वगततयोच्यते तर्हि मयि प्राण इति निर्देशः स्यात् । न त्वहमिति । विष्णावहमित्यादि-रूपोपदेशायोगादित्याशङ्कां परिहरत्सूत्रं पठति – **शास्त्रेति ॥** तुरेवार्थोऽप्यर्थः,

यत इत्यर्थे स्मृतिसूचकश्च । युज्यत इति शेषः । तथा च यतोऽपि प्राणस्य विष्णुत्वेऽप्युपदेशः 'प्राणो वाऽहम्' इत्येवंरूपो युज्यते, अतो न तदनुपपत्तिः । कथमयं युज्यते ? यतोऽयमुपदेशः **'शास्त्रदृष्ट्या'** शास्ति सर्वमिति शास्त्रं अन्तर्यामी भगवान्, तद्दृष्ट्या तदपेक्षयैव प्रवृत्तो न त्वैक्येन । न चान्तर्यामिणि अहमादिप्रयोगादर्शनात् तदयोगः । यतो **'वामदेववत्'** तत्कर्तृकप्रयोगवत् ॥

यथा वामदेवो नाम ऋषिः अन्तर्यामिविवक्षया **'अहं मनुरभवम्'** इति स्वस्मिन् अहंमन्वादिशब्दान् प्रयुयुजे । तथाऽयमप्युपदेशो युज्यत अत इति सूत्रयोजनामभिप्रयन् सौत्रशास्त्रपदं व्याचष्टे – **शास्त्रमिति ॥** विष्णुरिति शेषः। तथा चान्तर्यामी विष्णुरिह शास्त्रपदेनोक्त इत्यर्थः । अन्तर्यामीति प्रकृताभिप्रायेण । यद्वा - शास्ति प्रेरयति सर्वानिति व्युत्पत्त्याऽन्तर्यामीत्येतदेव शास्त्रमित्यस्य व्याख्यानं भवतीति नापदार्थत्वशङ्कावकाशः । अत एव भागवते ध्येयेऽन्तर्यामिण्येव शास्त्रशब्दप्रयोगः । ऐतरेयभाष्ये **'शास्तुरन्तर्यामिणः'** इति शास्तृशब्दं मूलीकृत्य व्याख्यानेऽपि, तदनुसारेण च तत्त्वप्रदीपे शास्तुरन्तर्यामिणो विष्णोरिति व्याख्यानेऽपि नास्य तद्विरोधः शङ्क्यः, यतस्तत्पर्यायशब्दव्याख्यानेनैव शास्त्रशब्दो व्याख्यातो भवतीत्याशयेन शास्त्रशब्दपर्यायशास्तृशब्दो व्याख्यायते ॥

यद्वा – शास्त्रशब्दे शास्तृ अ इत्यवयवविभागमभिप्रेत्य शास्त्रित्यंशस्यान्तर्यामिण इत्यनेनाशब्दस्य विष्णोरित्यनेन च व्याख्यातत्वात्, अत्र त्ववयवविभागमविवक्षित्वा शास्त्रमित्यखण्डपदस्यान्तर्यामीति व्याख्यानात् तदनुकूलतया **'संविच्छास्त्रम्'** इति वचनोपन्यासाच्च न विरोधः ॥

'संविच्छास्त्रं परं पदम्' इति हि भागवते ।

अन्तर्यामिणो विष्णोः शास्त्रपदवाच्यत्वे प्रमाणमाह – **संविदिति ॥** प्रथमस्कन्धे व्यासं प्रति नारदवाक्यमिदम् ॥

'स्वप्नो मायाऽग्रहः शय्या जाग्रदाभास आत्मनः ।
नामरूपक्रियावृत्तिः संविच्छास्त्रं परं पदम् ॥' इति ।

अस्यार्थः - आत्मनो जीवस्य मायावासनाख्यसंस्कारोपादानकवस्तु-ज्ञानरूपः स्वप्नः । अग्रहः जाग्रत्स्वप्नविषयज्ञानरहिता शय्या सुषुप्तिः नामरूपक्रियासु शब्दार्थकर्मसु वृत्तिर्व्यावृत्तिर्यस्याः सा । आभासः प्रत्ययः सञ्ज्ञादिविषयज्ञानरूपो जाग्रच्च । आहत्यैतदवस्थात्रयं यस्मादात्मनः परब्रह्मणो भवति, तत्संवित् सर्वविषयकयथार्थज्ञानरूपं सर्वज्ञं वा । शास्त्रं सर्वनियन्तृ, परम् उत्तमं पदं सद्भिः प्राप्यं ब्रह्म अहम् अचिन्तयमिति । भागवत इत्यनन्तरं **'प्रयोगात्'** इति शेषः । अस्यान्तर्यामीत्यनेनान्वयः ॥

'तत्तन्नाम्नोच्यते विष्णुः सर्वशास्तृत्वहेतुतः[१] **।**
न क्वापि किञ्चिन्नामास्ति तमृते पुरुषोत्तमम् ॥' इति पाद्मे ॥

नन्वन्तर्यामिणि अहमादिप्रयोगः कथं सम्भवतीत्याशङ्कायां तत्र तुशब्द-सूचितां स्मृतिमेवाऽह – **तत्तदिति** । विष्णुः **'तत्तन्नाम्ना'** अन्यपरत्वेन प्रसिद्धाहमादिनाम्नोच्यत इति । अनेन तस्यान्तर्यामिणि विष्णौ विद्वद्रूढिर्दर्शिता । **'सर्वशास्तृत्वहेतुतः'** सर्वनियन्तृत्वनिमित्तेनेति ! अनेन महायोगो दर्शितः । तत्र तस्य स्वातन्त्र्यनिमित्तोक्तेः । अनेन परमत इवा-स्मन्मतेऽपि लाक्षणिकत्वं परिहृतम् **'पुरुषोत्तमम्'** अन्तर्यामिणं विष्णुं **'ऋते'** विना, अन्यत्र **'क्वापि'** जीवादौ **'किञ्चित्'** अहमादिरूपं **'नाम'** वाचकतया नास्तीति । अनेन हरौ परममुख्यताऽन्यत्र केवलमुख्यता चोक्ता । अन्यथा न क्वापीति सामान्यनिषेधायोगात् । अत्राहमादिशब्दाः प्रत्यगादिवाचित्वेन प्रसिद्धाः, प्रत्यगादयश्च सर्वदा पिण्डीभूताः, तानविवेके-नाज्ञाः केवलजीवादौ

१. 'सर्वशास्तृत्वतो हरिः' ह.। २ 'इति च पाद्मे' ह.।

प्रयुञ्जते दहति शब्दमिव काष्ठे । प्राज्ञास्तु मुख्यामुख्यविवेकवन्तो ह्यमुख्यमर्थमनादृत्य मुख्यार्थे हरौ प्रयुञ्जत इति तत्त्वनिर्णय-टीकोक्तमनुसन्धेयम् । **'पाद्मे'** इत्यनन्तरम् **'अन्तर्यामिण्यहमादिपदानां मुख्यत्वोक्तेः शास्त्रदृष्ट्या अहमाद्युपदेशो युक्त एव'** इति वाक्यशेषः ॥

'अहं मनुरभवं सूर्यश्च' *(ऋ.४-२३-१)* **इत्यादिवत् ॥ ३० ॥**

नन्वन्तर्यामिणि अहमादिप्रयोगादर्शनात् तदयोग इत्याशङ्कां सूत्रोक्तदृष्टान्तविवरणेन परिहरति – **अहमिति ॥ 'अहं'** वामदेव-सञ्ज्ञकऋष्यन्तर्यामी तत्तदन्तर्यामितया मनुः सूर्यश्चाभवमिति ऋङ्मन्त्रार्थः । आदिपदेन **'अहं कक्षीवान् ऋषिरस्मि विप्रोऽहं कुत्सम्'** (ऋ.४-२६-१.) इत्यादिकं गृह्यते । **'इत्यादिवत्'** एवमादिप्रयोगवदित्यस्य **'शास्त्रदृष्ट्योपदेशः'** इत्यनेनान्वयः ॥

सू - ॐ ॥ जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासा-त्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ ॐ ॥ ३१ ॥

'तावन्ति शतसंवत्सरस्याह्नां सहस्राणि भवन्ति' *(ऐ.आ.२.२.४)* **इति जीवलिङ्गम् । प्राणसंवादादि मुख्यप्राणलिङ्गम् । तस्मात् नेति चेत् –**

पुनरुक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्य आक्षेपांशं तावद् व्याचष्टे – **जीवेति ॥** अनुसन्धीयत उक्तमिति च शेषः । संवादो विवादः कलहः प्राणस्य प्राणैः सह संवाद इति विग्रहः । तथा च यस्मादत्र प्रकरणे **'तं शतं वर्षाण्यभ्यार्चत् तस्माच्छतं वर्षाणि पुरुषायुषो भवन्ति'** (ऐ.आ.२.२.१) इत्यनेन यच्छतसंवत्सरपर्यन्तं प्राणस्य जीवदेहेऽवस्थानहेतुकं शतायुष्त्वरूपं जीवलिङ्गमुक्तं तत् **'तावन्ति शतसंवत्सरस्याह्नां सहस्राणि भवन्ति'**

इत्यादिना बहुषु स्थलेष्वनुसन्धीयते । यस्माच्च **'ता अहिंसन्ताहमुक्थमहमुक्थमस्मि'** (ऐ.आ.२-१-४.) इति वाक्येन प्राणस्य प्राणैरिन्द्रियैः सह संवादरूपमुख्यप्राणलिङ्गमुक्तम् । यस्माच्चाऽदिपदगृहीतं **'प्राणो वंश इति स्थविरः शाकल्यस्तद्यथा शालावंशे सर्वेऽन्ये वंशाः समाहिताः स्युरेवमस्मिन् प्राणे चक्षुश्श्रोत्रं मनो वागिन्द्रियाणि शरीरं सर्व आत्मा समाहिताः'** (ऐ.आ. ३-२-१-१.) इति वाक्येन सर्वजीवेन्द्रियदेहधारकत्वरूपलिङ्गं चोक्तमस्ति तस्मादयं प्राणो न विष्णुः, किन्तु जीवमुख्यप्राणावेवेति योजना ॥

यद्यपि **'तस्माच्छतं वर्षाणि पुरुषायुषो भवन्ति'** (ऐ.आ.२-२-१.) इति शतायुष्त्वलिङ्गप्रतिपादकवाक्यमेवोदाहरणीयं, न तु **'तावन्ति'** इति वाक्यम् । तथाऽपि लिङ्गस्य बहुषु स्थलेषु अनुगमोऽस्तीति ज्ञापनायोपनिषदो जीवलिङ्गे तात्पर्यमस्तीति ज्ञापयितुम् अनुसन्धिवाक्यमेवोदाहृतम् ॥

सिद्धान्ते श्रुत्यर्थस्तु - पुरुषायुषः शतसंवत्सरस्याह्नां सहस्राणि शतसंवत्सरान्तःप्रविष्टाहर्नियामकसूर्यगतभगवत्पुरुषरूपाणि तावन्ति सहस्राणि । कियन्ति ? बृहतीसहस्रगताक्षराणां वाच्यानि पुंरूपाणि यावन्ति सहस्राणि तावन्ति । तथा च तानि षट्त्रिंशत्सहस्राणि सम्पन्नानि भवन्ति । **'ताः'** चक्षुरादिदेवताः **'अहिंसन्त'** विवादमकुर्वन् । किन्विति अहमस्य चतुर्मुखदेहस्योक्थोऽस्मि उत्थापकोऽस्मीति ॥

न, अन्तर्बहिः सर्वगतत्वेनेत्युपासात्रैविध्यादिहाऽश्रितत्वाच्च ।

परिहारांशं व्याचष्टे – **नेति** ॥ प्राणो विष्णुर्नेति न, किन्तु विष्णुरेवायं, न जीवादिरित्यर्थः । कुतो नेत्यतस्तत्र प्रागुक्तानुगमहेत्वनुषङ्गं, न चोक्तजीवमुख्यप्राणलिङ्गविरोध इत्यतस्तत्र हेतुत्वेन यतः शास्त्रदृष्ट्या त्वयमुपदेशः इत्यस्यानुषङ्गं, किमर्थमन्तर्यामीति प्रश्नस्यान्तरुपास्त्यर्थमिति परिहारं

चाभिप्रेत्य न चोपासनेऽवान्तरभेदाभाव इति चोद्योत्तरत्वेन प्रवृत्तम् **'उपासा'** इति सूत्रांशं व्याचष्टे – **अन्तरिति** ॥ गतत्वेनेत्यस्यान्तर्बहिस्सर्वशब्दैः प्रत्येकं सम्बन्धः । इतिशब्दः प्रकारार्थः । तथा च देहान्तर्गतत्वेन तद्बहिर्गतत्वेन सर्वगतत्वेनेति प्रकारेण **'उपासात्रैविध्यात्'** भगवदुपासनस्य त्रिविधत्वादित्यर्थः । ननु तथाऽपि कथनं व्यर्थं वस्तुत उपासनात्रैविध्यस्येहानुक्तस्यान्तर्यामिकथनाप्रयोजकत्वादित्यतः प्रवृत्तम् **'आश्रितत्वात्'** इत्यंशं चशब्दा-ध्याहारेण व्याचष्टे – **इहेति** ॥ एतत्प्रकरणे उक्तत्वादित्यर्थः । उपासा-त्रैविध्यस्येति विपरिणामेनात्रान्वीयते । चो हेतूपपादकहेतुसमुच्चये । तथा च अत्रोक्तत्रैविध्यान्तर्गतान्तरोपासनार्थमन्तर्यामिकथनं युक्तमिति भावः ॥

'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत' *(ऐ.आ. २-४-३.)*
'स एतमेव पुरुषं ब्रह्म ततममपश्यत्' *(ऐ.आ. २-४-३.)*
'एतद्ध स्म वै तद् विद्वानाह महिदास ऐतरेयः' *(ऐ.आ.२-१-८.)*
इत्यादिना ।

अत्रोपासनात्रैविध्यमुच्यत इत्यत्रापि किं लिङ्गमित्यत आह – **स इति** ॥ **'सः'** वासुदेवो भगवान् **'एतमेव सीमानं'** शिरोमध्यं विदार्यैव **'एतया द्वारा'** सुषुम्नानाड्या **'प्रापद्यत'** प्राप्तः । चतुर्मुखहृदयमिति शेषः । अनेन भगवतो देहान्तःप्रवेशोक्तेरुक्तेश्चोपासनार्थत्वाद् अन्तरुपास्तिरुक्ता भवति ॥

'सः' चतुर्मुखदेहे प्राक्प्रपदाभ्यामन्तः प्रविष्टो नारायणः **'एतमेव पुरुषं'** व्यासकृष्णकपिलादिरूपमात्मानम् आततगुणं स्वस्वरूपभूतमादानादिकर्तारं वा । ततमं **'लोपः समाने'** इति सूत्रात् तलोपः । तमबर्थे मप्रत्ययो वा । तथा च ततममतिशयेन व्याप्तं निरवधिकव्याप्तिमन्तं **'ब्रह्म'** गुणपूर्णम् **'अपश्यत्'** तद्गुणकतया तद्रूपं ददर्शेत्यर्थः ॥ केचित्तु - तकार एव व्याप्त्यभिधायक इत्याहुः। अनेन सर्वगतत्वं तथोपासनार्थमुक्तम् ॥

'तदेतत्' प्रकृतं सर्वं **'विद्वान्'** जानन्नैतरेय इतराया अपत्यं पुमान् विशालसञ्ज्ञाद् ऋषेरुत्पन्न ऐतरेयः । **'महिदासः'** महिनो महात्मानो देवाः दासभूताः यस्यासौ भगवानाहेत्यर्थः । हस्मवैशब्दाः प्रसिद्धिद्योतकाः ॥

अत्र बहिरुपास्त्यर्थं महिदास आहेति बहिरुपास्तिरुक्ता भवति । न च वाच्यमत्र स्वरूपमात्रमुच्यते, नोपासनार्थमिति । उपासनां विनोक्ति-प्रयोजनाभावात् । इत्यादिनेत्यस्येत्यादिना वाक्येनोपासनात्रैविध्यस्याऽ-श्रितत्वादर्थादुक्तत्वादित्यन्वयः । आदिशब्देन **'तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषमेतस्यामेतम्'** (ऐ.आ.२-१-४) इत्यादिकं गृह्यते ॥

ननु **'एतद्धस्मवै तद्विद्वानाह हिरण्यदन् बैदः'** (ऐ.आ.२-१-५) इतिवन्महिदासोऽपि ऋषित्वेनोच्यतामिति चेन्न । अस्या उपनिषदः ऐतरेय-सञ्ज्ञयैवेतरापुत्रस्य महिदासस्य ऋषित्वसिद्धया तदुक्तेर्व्यर्थत्वात् ॥

'महिदासाभिधो जज्ञ इतरायास्तपोबलात् ।
साक्षात् स भगवान् विष्णुर्यस्तन्त्रं वैष्णवं व्यधात् ॥'
इति ब्रह्माण्डे[1]॥

तथाऽपि महिदासस्य विष्णुत्वं कुतो ज्ञायत इत्यत आह – **महिदासेति ॥ 'जज्ञे'** व्यक्तो बभूव । **'स च'** महिदासः – **'महिदासस्त्वैतरेयो बह्वृचोपनिषद्व्रतः । साक्षात् स भगवान् विष्णुस्तन्नामैको मुनिर्ह्यभूत् ॥'** इति छान्दोग्यभाष्येऽनन्तरोक्तभगवदन्यः तत्सञ्ज्ञकेतरापुत्रः ऋषिरत्र न विवक्षितः, किन्तु । यो **'वैष्णवं'** विष्णुविषयं **'तन्त्रं'** ग्रन्थं **'व्यधात्'** निर्ममे ॥

यद्वा – **'तन्त्रं'** पञ्चरात्रं व्यधात् नारदादिभ्यो व्याचख्यौ । यश्च **'साक्षात्'** स्वयं **'भगवान्'** पूर्णज्ञानादिमान् **'विष्णुः'** तदवतारभूतः पूर्वोक्तः स एवात्र

१. 'इति च ब्रह्माण्डे' ह. ।

विवक्षित इत्याह – **साक्षादिति** ॥ ब्रह्माण्डे पुराण इत्यस्याऽश्रितत्वा-दित्यनेनान्वयः । महिदासस्य विष्णुत्वोक्तिरिति तदर्थः । तेन चशब्दान्वयः ॥

तत्तदुपासनायोग्यतया च पुरुषाणाम् ।

नन्वेकविधोपासनया सर्वेषां ब्रह्मापरोक्षसम्भवात् किमुपासात्रैविध्येन इत्यतः प्रवृत्तं **'तद्योगात्'** इति सूत्रशेषं व्याचष्टे – **तत्तदिति** ॥ उपासनेत्यनेन पुरुषाणामित्यनेन च तदित्यस्याऽवृत्तिः सूचिता । चः समुच्चये । तथा च तेषां पुरुषाणां मनुष्यर्षिगन्धर्वदेवाख्याधिकारिणां तेषु त्रिविधोपासनेषु मध्ये तत्त-दुपासने यथाक्रमं बहिरन्तर्व्याप्तिरूपैकैकोपासन एव योग्यतया योग्यत्वेन हेतुनेत्यर्थः । अस्योपासात्रैविध्यादित्यनेनान्वयः । तथाचानेकविधोपास्ति-योग्यतावतामधिकारिणां नैकविधोपासनया ब्रह्मज्ञानमिति तत्त्रैविध्य-मावश्यकमिति भावः ॥

'केषाञ्चित् सर्वगत्वेन केषाञ्चिद्धृदये हरिः ।
केषाञ्चिद् बहिरेवासावुपास्यः पुरुषोत्तमः ॥' इति ब्राह्मे ॥

पुरुषाणामुक्तानेकविधोपासनयोग्यता कुतो ज्ञायत इत्यतः कर्तृविशेषाननुपादाय सामान्यतः उपासकत्रैविध्यप्रतिपादिकां स्मृतिं पठति – **केषाञ्चिदिति** ॥ **'पुरुषोत्तमो'** हरिः **'केषाञ्चित्'** देवानां देवैः सर्वगतत्वेन प्रकारेणोपास्यः । **'केषाञ्चित्'** ऋषिगन्धर्वादीनां **'हृदये'** स्वस्वहृदयाकाशे उपास्यः । **'केषाञ्चित्'** मनुष्योत्तमानां तु बहिरेवोपास्य इत्यर्थः । प्राचुर्यादेवमुक्तिः ॥

इति ब्राह्म इत्यस्य तत्तदुपासनयोग्यतया तद्विशिष्टत्वेन पुरुषाणामाश्रितत्वादुक्तत्वादिति पूर्वेणान्वयः ॥

'अग्नौ क्रियावतां विष्णुर्योगिनां हृदये हरिः ।

प्रतिमास्वप्रबुद्धानां सर्वत्र विदितात्मनाम् ॥' इति च ॥ ॥ ३१ ॥

॥ इति पादान्त्यप्राणाधिकरणम् ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते
श्रीमद्ब्रह्मसूत्रभाष्ये प्रथमाध्यायस्य प्रथमः पादः ॥

अत्रैवाधिकरणे कर्तृविशेषप्रतिपादकं विशेषप्रमाणमाह – **अग्नाविति ॥** विष्णुः **'क्रियावतां'** यज्ञादिक्रियानुष्ठातृणाम् **'अग्नौ'** गार्हपत्यादावुपास्यः हरिः । **'योगिनाम्'** ऋषीणां हृदये उपास्यः । **'अप्रबुद्धानां'** मन्दमतीनामत्यल्पप्रतिभानां मनुष्योत्तमानां **'प्रतिमासु'** कृष्णरामादिविग्रहेषु उपास्यः । **'विदितात्मनां'** विशेषतो ज्ञातभगवद्रूपाणाम् अश्रुतप्रतिभानां देवानां तु **'सर्वत्र'** सर्वस्थानेषूपास्य इत्यर्थः । अत्राग्नौ प्रतिमास्विति वाक्यद्वयेन बहिर्मात्रोपासनोपलक्ष्यते । अत एव स्थानद्वयोक्तिः। यथाश्रुते सूर्यादौ विष्णूपास्तेर्बहिरुपास्तित्वं न स्यात् । योगिनामित्यनेनान्तरुपास्तिरुक्ता ॥

'ऋषयोऽन्तःप्रकाशाः' इति श्रुतेः । सर्वत्रेति सर्वगतोपास्तिरिति ज्ञातव्यम्। न चात्र **'येषां बहिरुपासनेन मोक्षस्तेषामपि हृद्युपासनं किञ्चित्कार्यमेव'** इति बृहद्भाष्येण **'भगवान् बिम्बदर्शनेनैनं मोचयति'** इति न्यायविवरणेन च विरोधः शङ्क्यः । अग्नाविति वाक्येऽन्यनिषेधाभावेन बिम्बशब्दितस्वस्वयोग्यात्मापरोक्षार्थं हृद्युपासनस्यापि सर्वैः कार्यत्वाभ्युपगमात् । मोचकयोग्यापरोक्षद्वारभूतावताराद्यपरोक्षसाधनोपासनाया एव तैस्तैः प्राचुर्येण प्रकरणस्याग्नाविति वाक्येन व्यवस्थया प्रतिपादनाच्च ॥ **इति चेति ॥** चः समुच्चये । वचनद्वयस्याप्येकार्थसाधकत्वादस्यापि ब्राह्मे आश्रितत्वादिति पूर्वेणान्वयः । तत्तदुपासनयोग्यतावत्त्वेन पुरुषविशेषाणामुक्तत्वादिति तदर्थः । अतो न तद्योगादिति हेत्वसिद्धिः शङ्क्येति भावः ॥

विवक्षित इत्याह – **साक्षादिति** ॥ ब्रह्माण्डे पुराण इत्यस्याऽश्रितत्वादित्यनेनान्वयः । महिदासस्य विष्णुत्वोक्तिरिति तदर्थः । तेन चशब्दान्वयः ॥

तत्तदुपासनायोग्यतया च पुरुषाणाम् ।

नन्वेकविधोपासनया सर्वेषां ब्रह्मापरोक्षसम्भवात् किमुपासात्रैविध्येन इत्यतः प्रवृत्तं **'तद्योगात्'** इति सूत्रशेषं व्याचष्टे – **तत्तदिति** ॥ उपासनेत्यनेन पुरुषाणामित्यनेन च तदित्यस्याऽवृत्तिः सूचिता । चः समुच्चये । तथा च तेषां पुरुषाणां मनुष्यर्षिगन्धर्वदेवाख्याधिकारिणां तेषु त्रिविधोपासनेषु मध्ये तत्तदुपासने यथाक्रमं बहिरन्तर्व्याप्तिरूपैकैकोपासन एव योग्यतया योग्यत्वेन हेतुनेत्यर्थः । अस्योपासात्रैविध्यादित्यनेनान्वयः । तथाचानेकविधोपास्तियोग्यतावतामधिकारिणां नैकविधोपासनया ब्रह्मज्ञानमिति तत्त्रैविध्यमावश्यकमिति भावः ॥

'केषाञ्चित् सर्वगत्वेन केषाञ्चिद्धृदये हरिः ।
केषाञ्चिद् बहिरेवासावुपास्यः पुरुषोत्तमः ॥' इति ब्राह्मे ॥

पुरुषाणामुक्तानेकविधोपासनयोग्यता कुतो ज्ञायत इत्यतः कर्तृविशेषाननुपादाय सामान्यतः उपासकत्रैविध्यप्रतिपादिकां स्मृतिं पठति – **केषाञ्चिदिति** ॥ **'पुरुषोत्तमो'** हरिः **'केषाञ्चित्'** देवानां देवैः सर्वगतत्वेन प्रकारेणोपास्यः । **'केषाञ्चित्'** ऋषिगन्धर्वादीनां **'हृदये'** स्वस्वहृदयाकाशे उपास्यः । **'केषाञ्चित्'** मनुष्योत्तमानां तु बहिरेवोपास्य इत्यर्थः । प्राचुर्यादेवमुक्तिः ॥

इति ब्राह्म इत्यस्य तत्तदुपासनयोग्यतया तद्विशिष्टत्वेन पुरुषाणामाश्रितत्वादुक्तत्वादिति पूर्वेणान्वयः ॥

'अग्नौ क्रियावतां विष्णुर्योगिनां हृदये हरिः ।

प्रतिमास्वप्रबुद्धानां सर्वत्र विदितात्मनाम् ॥' इति च ॥ ॥ ३१ ॥

॥ इति पादान्त्यप्राणाधिकरणम् ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते
श्रीमद्ब्रह्मसूत्रभाष्ये प्रथमाध्यायस्य प्रथमः पादः ॥

अत्रैवाधिकरणे कर्तृविशेषप्रतिपादकं विशेषप्रमाणमाह – **अग्नाविति** ॥ विष्णुः **'क्रियावतां'** यज्ञादिक्रियानुष्ठातॄणाम् **'अग्नौ'** गार्हपत्यादावुपास्यः हरिः । **'योगिनाम्'** ऋषीणां हृदये उपास्यः । **'अप्रबुद्धानां'** मन्दमतीनामत्यल्पप्रतिभानां मनुष्योत्तमानां **'प्रतिमासु'** कृष्णरामादिविग्रहेषु उपास्यः । **'विदितात्मनां'** विशेषतो ज्ञातभगवद्रूपाणाम् अश्रुतप्रतिभानां देवानां तु **'सर्वत्र'** सर्वस्थानेषूपास्य इत्यर्थः । अत्राग्नौ प्रतिमास्विति वाक्यद्वयेन बहिर्मात्रोपासनोपलक्ष्यते । अत एव स्थानद्वयोक्तिः। यथाश्रुते सूर्यादौ विष्णूपास्तेर्बहिरुपास्तित्वं न स्यात् । योगिनामित्यनेनान्तरुपास्तिरुक्ता ॥

'ऋषयोऽन्तःप्रकाशाः' इति श्रुतेः । सर्वत्रेति सर्वगतोपास्तिरिति ज्ञातव्यम्। न चात्र **'येषां बहिरुपासनेन मोक्षस्तेषामपि हृद्युपासनं किञ्चित्कार्यमेव'** इति बृहद्भाष्येण **'भगवान् बिम्बदर्शनेनैनं मोचयति'** इति न्यायविवरणेन च विरोधः शङ्क्यः । अग्नाविति वाक्येऽन्यनिषेधाभावेन बिम्बशब्दितस्वस्वयोग्यात्मापरोक्षार्थं हृद्युपासनस्यापि सर्वैः कार्यत्वाभ्युपगमात् । मोचकयोग्यापरोक्षद्वारभूतावताराद्यपरोक्षसाधनोपासनाया एव तैस्तैः प्राचुर्येण प्रकरणस्याग्नाविति वाक्येन व्यवस्थया प्रतिपादनाच्च ॥ **इति चेति** ॥ चः समुच्चये । वचनद्वयस्याप्येकार्थसाधकत्वादस्यापि ब्राह्मे आश्रितत्वादिति पूर्वेणान्वयः । तत्तदुपासनयोग्यतावत्त्वेन पुरुषविशेषाणामुक्तत्वादिति तदर्थः । अतो न तद्योगादिति हेत्वसिद्धिः शङ्क्येति भावः ॥

अनेन नात्रोक्तप्राणो विष्णुः, किन्तु जीवमुख्यप्राणावेव । कुतः ? **'जीवमुख्यप्राणलिङ्गात्'** शतायुष्त्वरूपजीवलिङ्गस्य प्राणसंवादादिरूपमुख्य-प्राणलिङ्गस्य चेह श्रवणादिति चेत् – न, विष्णुरेवायं प्राणः, न जीवादिः । कुतः ? **'अनुगमात्'** हेतोरेव, न चान्यश्रुतिलिङ्गविरोधः । उक्तरीत्या **'तद्योगात्'** तेषामन्तर्यामिविषयत्वोपपत्तेः । यतः शास्त्रदृष्ट्याऽयम् उपदेश इति वा । किमर्थमत्रान्तर्यामिकथनमिति चेत्, अन्तरुपास्त्यर्थमिति ब्रूमः । न चोपासनेऽवान्तरभेदाभावः । **'उपासात्रैविध्यात्'** अन्तरादिभेदेन भगवदुपासनस्य त्रिविधत्वात् । न च तथाऽपि कथनमयुक्तम् । वास्तव-त्रैविध्यस्येहानुक्तस्य कथनाप्रयोजकत्वादिति वाच्यम् । **'इह'** प्रकरणे तत्त्रैविध्यस्याऽश्रितत्वादुक्तत्वात् । न चैकविधोपासनया सर्वेषां ब्रह्मापरोक्ष-सम्भवात् किमुपासात्रैविध्येनेति वाच्यम् । **'तद्योगात्'** तेषां पुरुषाणां तस्मिन् तदुपासन एव योग्यत्वात् । अनेकविधोपास्तियोग्यतावतां च पुरुषाणामेक-विधोपासनयाऽपरोक्षासम्भवेन योग्यताभेदादुपासात्रैविध्यस्याऽवश्यकत्वादिति सूत्रार्थ उक्तो भवति । न च विवादकर्तृत्वलिङ्गस्यान्तर्यामिविषयत्वे **'उदासीनौ च तावास्तां केशवश्चाब्जसम्भवः'** इति वचनविरोधः शङ्क्यः । तस्यान्तर्यामिविषयभिन्नबाह्यरूपविषयत्वात् । अतोऽन्यलिङ्गानां तत्तदन्त-र्यामिविषयत्वोपपत्तेः तद्विरोधाभावात् । विष्णुरेवायं प्राणः आनन्दमयश्चेति युक्ता तज्जिज्ञासेति सिद्धम् ॥

॥ इति पादान्त्यप्राणाधिकरणम् ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणां श्रीमद्रघुनाथतीर्थपूज्यपादानां शिष्येण श्रीमज्जगन्नाथयतिना कृतायां श्रीमद्ब्रह्मसूत्रभाष्यदीपिकायां प्रथमाध्यायस्य प्रथमः पादः ॥

॥ अथ द्वितीयः पादः ॥

॥ १. अथ सर्वगतत्वाधिकरणम् ॥

(आदित्ये विद्यमानतया प्रतीतस्य सर्वगततस्य भगवत्येव समर्थनम्)

लिङ्गात्मकानां शब्दानां विष्णौ प्रवृत्तिं दर्शयत्यस्मिन् पादे प्राधान्येन ॥

पूर्वोत्तरपादभेदस्य स्वस्मिन्नेकवाक्यतायाश्च सिद्धये एतत्पादप्रतिपाद्यं दर्शयति– **लिङ्गेति ॥** लिङ्गमनुमापको धर्मः । स आत्मेवाऽत्मा प्रवृत्तिनिमित्तं येषां ते तथोक्ताः । **'निमित्तनिमित्तिनोरभेदोपचारात्'** इति सुधोक्तेः । स्वरूपार्थो वा आत्मशब्दः । पूर्वयोजनायामात्मप्रतिपादके गौणी वृत्तिः । द्वितीयायां तु सामानाधिकरण्यमिति भेदः । स्वार्थे कः । तथा च व्याप्यधर्मद्वारा धर्मिबोधकानामापाततो यौगिकानामित्यर्थः । विष्णोरन्यत्र प्रसिद्धानामिति च संयोज्यम् । **'शब्दानामिति'** एकप्रातिपदिकरूपाणामनेकपदसमभिव्याहाररूपाणां चेत्यर्थः । **'विष्णौ प्रवृत्तिं'** प्रकर्षेण वृत्तिं महायोगविद्बद्बूढिभ्यां विष्णुपरत्वमिति यावत् । **'प्रदर्शयति'** प्रकर्षेण साधयति सूत्रकार इत्यर्थः । वैश्वानराधिकरणे नामसमन्वयकरणादव्याप्तिनिरासाय प्राधान्येन इत्युक्तम् । तथा च तत्रापि नामसमन्वयमुखेन प्राधान्येन फलतो बहुलिङ्गसमन्वयस्यैव करणान्नाव्याप्तिरिति भावः ॥

'ब्रह्म ततमम्' इति सर्वगतत्वमुक्तं विष्णोः । तच्च 'तस्यैतस्यासावादित्यो रसः' *(ऐ.आ.३.२.३)* **इत्यादिनाऽऽदित्यस्य प्रतीयते ॥**

यद्यपि पूर्वपादान्त्याधिकरणेनैतत्पादाद्यस्य नावान्तरसङ्गत्यपेक्षेति न सा

प्रदर्शनीया । तथाऽपीह तस्याः सम्भवात् फलस्यावश्यवक्तव्यत्वाच्च सा प्रदर्श्यत इत्याशयेन पूर्वाधिकरणसङ्गतिं विषयादिकं च दर्शयति – **ब्रह्मेति** ॥ इति वाक्ये विष्णोः निरवधिकसर्वगतत्वमुक्तमित्यर्थः । ततः किमित्यत आह – **तच्चेति** ॥ तदित्यावर्तते, उक्तमिति च वर्तते । तथा च **'ब्रह्म ततमम्'** (ऐ.आ.२.४.३) इति यत् ततमत्वमुक्तं प्राणाख्यविष्णोस्तत्तदेकदेशभूतं सर्वगतत्वान्तर्गतं सर्वप्राणिहृदयस्थत्वं तत्रैवैतरेयके **'एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्त एतमग्नावध्वर्यव एतं महाव्रते छन्दोगाः एतमस्यामेतं दिव्येतं वायावेतमाकाश एतमप्सु एतमोषधीष्वेतं वनस्पतिष्वेतं चन्द्रमस्येतं नक्षत्रेष्वेतं सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते'** (ऐ.आ-२-४-४) इत्यादौ एतमित्युत्तरवाक्येन उक्तमित्यर्थः ॥

ततोऽपि किमित्यतः सयुक्तिकं पूर्वपक्षमाह – **तच्चेति** ॥ चोऽवधारणे । आदिशब्देन **'स यश्चायमशरीरः प्रज्ञात्मा यश्चासावादित्य एकमेतदिति विद्यात् तस्मात् पुरुषं पुरुषं प्रत्यादित्यो भवति ... सूर्य आत्मा जगतस्तस्थुषश्च ... एतं सर्वेषु भूतेषु'** (ऐ. ३-२-३.) इत्यादिवाक्यं गृह्यते । अत्र तस्येत्यादेरुपन्यासः एतमिति परामर्शनीयसमर्पकतयाऽऽवश्यकत्वात् पूर्वपक्षयुक्तिप्रदर्शनार्थं च कृतः । तथा च यत एतमित्युत्तरवाक्येनोक्तं सर्वप्राणिहृदयस्थत्वं तस्येत्यादिना पूर्ववाक्येन प्रकृतत्वात् तस्याऽदित्यस्यैव प्रतीयते, अतस्तस्यैव तत्पूर्वोक्तं ततमत्वमपि भवेत् । न विष्णोरिति योजना ॥

अत्र पूर्वपक्षे ततमत्वं सङ्कुचितं सर्वभूतगतत्वरूपं विवक्षितम् । न चैवं सिद्धान्त्यभिमतनिरवधिकसर्वगतत्वाक्षेपाप्राप्तिरिति वाच्यम् । पूर्वपक्षे **'एतमेव'** इत्यवधारणेन विष्णोरन्यस्यैव सर्वभूतगतत्वाद् विष्णोर्भूतादन्यत्र सत्त्वेऽपि सर्वभूतगतत्वाप्राप्त्याऽऽक्षेपोपपत्तेः ॥

अनेन पूर्वोक्ततमत्वान्तर्गतसर्वभूतगतत्वस्य विष्णोरन्यत्राऽक्षेपात्

तेनास्याऽक्षेपिकी सङ्गतिः, विषयसंशयौ, विष्णोरन्यस्यैव सर्वप्राणिगतत्वमिति सयुक्तिकपूर्वपक्षश्च दर्शितो भवति ॥[१]

सिद्धान्ते श्रुत्यर्थस्तु – **'तस्य'** प्रकृतस्य **'एतस्य'** संवत्सरनामकस्य चतुर्मुखस्य सर्वादित्वततमत्वनियामकत्वनिमित्तैरादित्यनामा प्रद्युम्नो रसः सारभूतः । स यश्चायं पुरुषदेहगतः प्राकृतदेहवर्जनादशरीरः **'प्रज्ञात्मा'** ज्ञानरूपोऽनिरुद्धः । यश्चासावादित्ये स्थितः प्रद्युम्न एतत्स्थानद्वयगतं रूपमेकमिति विद्यात् । तस्मात् पुरुषादित्यगतानिरुद्धप्रद्युम्नयोरैक्यादादित्यः 'पुरुषं पुरुषं प्रति' प्रतिपुरुषं **'भवति'** अभिमुखो भवति । प्रतिगृहं कूप इतिवत् सर्वपुरुषगतो भवतीति चेति । **'जगतः'** जङ्गमस्य **'तस्थुषः'** स्थावरस्य **'आत्मा'** आदानादिकर्ता **'सूर्यः'** सूरिप्राप्यो विष्णुर्दिवं पृथिवीमन्तरिक्षं च **'आऽप्राः'** आ समन्तादपूरयदित्यर्थः । एतमित्यादीनां सप्तम्यन्तपदैः प्रत्येकं सम्बन्धः । तथा च **'बह्वृचाः'** ऋग्वेदिनः **'एतं ह्येव'** एतमेव पुरुषादित्यगतमेव हि विष्णुं **'महत्युक्थे'** महदुक्थनामकबृहतीसहस्रे तद्देवताविषये तद्देवतामिति यावत् **'मीमांसन्ते'** जानन्ति । **'अध्वर्यवः'** यजुर्वेदिनः **'अग्नौ'** चयनसाधनेष्टका-देवताविषये तद्देवतां मीमांसन्ते । **'छन्दोगाः'** सामवेदिनः **'महाव्रते'** तदाख्यस्तोत्रस्य देवतां स्तोत्रे मीमांसन्ते[२]। **'अस्यां'** पृथिव्यां एतं **'दिवि'** अन्तरिक्षे वाय्वादौ चैवं एतमेव **'सर्वेषु भूतेषु'** सर्वप्राणिष्वन्तर्व्याप्तमाचक्षते विद्वांस इत्यर्थः । सर्वेष्वित्येव पूर्तेः पुनर्भूतेष्वित्युक्तिरत्र भूतवृत्तित्वमात्रं प्रतिपाद्यतयाऽभिप्रेतमिति ज्ञापयितुम् । एतं सर्वभूतगतमेव विष्णुं गुणपूर्णत्वाद् व्याप्तत्वाच्च एतं मुख्यतो ब्रह्मेत्याचक्षते इति वाक्यशेषार्थः ॥

---

१. इतः परं यथालब्ध 'क' पुस्तकानुसारेण पाठान्तराणि दीयन्ते ।
(Manuscript No. 381 belongs to P.P.S.M. Laibrary)

२. 'महाव्रते तदाख्यकर्माङ्गभूते देवतास्तोत्रे मीमांसन्ते, विषयतयेति शेषः।'क

नस्थानाधिकरणटीकायां तु – सर्वेषु भूतेषु चक्षुरादिस्थानेषु एतमेकमेव ब्रह्म गुणपूर्णमाचक्षत इति व्याख्यातम् । पूर्वपक्षी तु तस्यैतस्य प्रकृतप्रसिद्धसंवत्सरस्यासौ प्रसिद्ध आदित्यः सूर्यो रसः सारभूतोऽधिपतिरित्यर्थं मन्यते ॥

अतोऽब्रवीत् -

सू – ॐ ॥ सर्वत्र प्रसिद्धोपदेशात् ॥ ॐ ॥ १ ॥

अथ सिद्धान्तयत्सूत्रमवतारयति – **अत इति** ॥ इति सङ्गतिसम्भवादाक्षेपसद्भावाच्च[1] अतस्तत्परिहारायोत्तरमब्रवीद् बादरायण इत्यर्थः । [2] तदेव सूत्रं पठति – **सर्वत्रेति** ॥

'स यश्चायमशरीरः प्रज्ञात्मा' *(ऐ.आ. ३-२-४.)* **इत्यादिना सर्वत्रोच्यमानो नारायण एव ।**

अत्र समन्वयसूत्रात् तत्त्वित्यस्यानुवृत्तिं लिङ्गव्यत्ययम् **'उच्यमानम्'** इत्यध्याहारं चाभिप्रेत्य प्रतिज्ञांशं व्याचष्टे – **स यश्चेति** ॥ वाक्येनेति शेषः । यद्यपि **'तस्यैतस्यासौ'** इत्यादिनेति वक्तव्यम् । पूर्ववाक्यत्वात् । तथाऽपि तस्य पूर्वपक्षयुक्तिप्रदर्शनार्थत्वेनोपन्यस्तत्वात् तद् विहाय सिद्धान्तयुक्तिप्रदर्शकवाक्यज्ञापनाय **'स यश्चायमशरीरः प्रज्ञात्मा'** इत्यादिनेत्येवोक्तम् ॥ वस्तुतस्तु – न **'तस्यैतस्यासौ'** इत्यस्येव **'स यश्च'** इत्यस्य युक्तिप्रदर्शनमात्रतात्पर्येणोपन्यासः, नापि विषयमात्रप्रदर्शनतात्पर्येण । अपि तु पूर्वं विषयवाक्यस्यानुदाहृतत्वात् तदर्थतया तद्गतैतच्छब्दपरामर्शनीयसमर्पणार्थमनन्यसाधारणस्वतोऽशरीरत्वयुक्तिप्रदर्शनार्थं चेति ध्येयम् ॥

---

१. **'-सम्भवादित्याक्षेपसद्भावात्'- क.** २. **'तदेतत्'- क.**

'सर्वत्र' सर्वप्राणिहृदयेष्वन्तर्गततयोच्यमानो नारायण एवेति नारायण-शब्दप्रयोगेन –

'यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥'

इति वाक्यमपि सङ्गृहीतं भवति । तेन च सूत्रे सङ्कुचितवृत्तिना सर्वत्रेत्यनेन सर्वभूतहृद्गतत्वस्यैवाभिप्रेतत्वेनान्यत्र बहिर्नेति प्राप्तशङ्का निरस्ता भवति ॥

'तदेव ब्रह्म परमं कवीनाम्' *(महाना. १-६.)*

'परमं यो महद्ब्रह्म' *(महाभारते विष्णुसहस्रनामसु)*

हेत्वंशं व्याचष्टे – **तदेवेति** ॥ व्याख्यातमेतज्जिज्ञासानये । ईश्वर-ब्रह्मणोरभेदबोधनार्थं प्रवृत्तस्य **'परमं यो महद्ब्रह्म परमं यः परायणम्'** इति भारतवाक्यस्य यः लोकप्रधानस्य[1] जगन्नाथस्य नाम्नामित्युत्तरवाक्येनान्वयः ॥

'वासुदेवात् परः को नु ब्रह्मशब्दोदितो भवेत् ।
स हि सर्वगुणैः पूर्णस्तदन्ये तूपचारतः ॥'

इति तस्मिन्नेव प्रसिद्धब्रह्मशब्दोपदेशात् ॥ १ ॥

वासुदेवादित्यपरा स्मृतिः ॥ **'वासुदेवात्'** कृष्णादन्यः को वा ब्रह्मशब्दमुख्यवाच्यो भवेत्, न कोऽपि । किन्तु स एव मुख्यवाच्यः । कुतः ? **'हि'** यस्मात् **'सः'** वासुदेवः सर्वगुणैः पूर्णस्तदन्ये त्वपूर्णाः तस्मात् । तर्हि **'ब्रह्माणि जीवाः सर्वेऽपि'** इत्यादि कथमित्यत आह **तदन्य इति** ॥ वासुदेवादन्ये जीवाः **'उपचारतः'** अमुख्यत एव ब्रह्मशब्दोदिताः, न तु मुख्यत इत्यर्थः ॥

---

१. **'जगदीश्वरस्य' क.**

इतीति ॥ वाक्येष्विति शेषः । अनेन सर्वत्रेत्यस्य हेतावप्यन्वयो दर्शितः । तथा च सर्वत्रोदाहृतवाक्येषु **'तस्मिन्नेव'** विष्णावेव **'प्रसिद्धस्य'** रूढत्वेनावगतस्य **'ब्रह्मशब्दस्योपदेशात्'** सर्वगते वस्तुनि श्रवणादित्यर्थः । तस्मिन्नेवेत्यनेन श्रुतेर्निरवकाशत्वमुक्तं भवति ॥

अनेन **'स यश्चायमशरीरः प्रज्ञात्मा'** (ऐ.आ. ३-२-३.) इत्यादिना **'सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते'** (ऐ.आ. ३-२-३.) इति शाखाशेषेण सर्वत्र सर्वेषु भूतेष्वन्तर्गततयोच्यमानो नारायण एव न त्वादित्यादिः । कुतः ? **'एतमेव ब्रह्मेत्याचक्षते'** इति सर्वभूतगते वस्तुनि नारायणैकनिष्ठत्वेन श्रुत्यादिप्रसिद्धब्रह्मशब्दोपदेशाच्छ्रुतेरिति सूत्रार्थ उक्तो भवति ॥

सू - ॐ ॥ विवक्षितगुणोपपत्तेश्च ॥ ॐ ॥ २ ॥

'स योऽतोऽश्रुतः' *(ऐ.आ. ३-२-४.)* **इत्यादि ।**

युक्त्यन्तरेण विष्णोरेवात्रोक्तसर्वगतत्वं प्रतिपादयत्सूत्रमुपन्यस्य तदुपात्तश्रुतिमेवोदाहरति– **विवक्षितेति** ॥ आदिपदेन **'अगतोऽमतोऽनतोऽदृष्टोऽविज्ञातोऽनादिष्टः । श्रोता मन्ता द्रष्टाऽऽदेष्टा घोष्टा विज्ञाता प्रज्ञाता सर्वेषां भूतानामन्तरपुरुषः[1] सम आत्मेति विद्यात्'** (ऐ.आ.३-२-४.) इति वाक्यशेषो गृह्यते । इत्यादीति लुप्ततृतीयाविभक्तिकं पदम्[2] । अस्य[2] विवक्षितेति सूत्रपदेनान्वयः[3] । अत एव सूत्रभाष्ययोरेकीभाव इति तत्त्वप्रदीपोक्तिः । अनेन सूत्रे श्रुत्येति शेषः सूचितः । चः पूर्वोक्तहेतुसमुच्चयेऽवधारणे च । यतो वक्तुं

१. **'स यः' क.**

२. **-'लुप्ततृतीयाविभक्तिकपदस्य'** क.

३. . इतः परं **'इत्यादिवाक्यविवक्षितानां तत्तात्पर्यविषयीभूतानामिति वाऽन्वयः'** इत्यधिकः पाठः क.पुस्तके ।

योग्ये विवक्षा भवति । अतो विवक्षिताः वक्तुं योग्याः वक्ष्यमाणा इति वा । ये तु श्रुतीनां ब्रह्मगुणेषु तात्पर्याभावं वदन्ति, तन्निरासाय विवक्षितपदमुपनिबबन्ध सूत्रकृदिति तत्त्वप्रदीपोक्तेः श्रुतितात्पर्यविषयभूता इति वा । सर्वत्रेत्यनुवर्तते । गते इति शेषः ॥

तथा च सर्वत्र गते विवक्षितानां श्रुत्या सर्वत्र गतनिष्ठतया[१] वक्तुं योग्यानां इतःपरं श्रुत्या सर्वगतनिष्ठतया वक्ष्यमाणानां श्रुतितात्पर्यविषयीभूतानां वा गुणानामुपसंहारगताश्रुतत्वादीनां विष्णोरेव योग्यत्वेन तस्मिन्नेवोपपत्तेरन्यत्रानुपपत्तेश्च सर्वत्रोच्यमानो नारायण एव इति सूत्रार्थ उक्तो भवति ॥

यः प्रकृतो विष्णुः सः **'अतः'** देशकालगुणैर्व्याप्तः । **'अत सातत्यगमने'** इति धातुव्याख्यानात् **'सन्ततो ह्यत उच्यते'** इति वचनाच्च। यद्वा - अतोऽतिः। तृतीयेऽतिशये । अधिक इत्यर्थः । **'अश्रुतः'** सर्वात्मना श्रोतुमशक्यः । स्वयमेव स्वात्मानं स्वातन्त्र्येण शृणोति । **'नर्ते त्वत्'** (ऋ.१०-११२- ९.) इति श्रुतेः । **'अगतः'** अप्राप्तः पूर्णत्वात् सर्वात्मनाऽज्ञात इति वा । सर्वात्मना मननविषयो न भवतीत्यमतः । अनतो नेतृरहितः स्वतन्त्र इति यावत् । **'अदृष्टः'** प्रत्यक्षेण केनचित्, सर्वात्मना पूर्णत्वात् । अत एव सर्वात्मना **'अविज्ञातः'** विशेषतो न ज्ञातः । **'अनादिष्टः'** नियोजकशून्योऽन्यैरनाज्ञप्त इति वा ॥

यथाऽन्यैः स्वयमश्रुतादिर्न तथाऽन्ये, सर्वात्मना श्रुत्याद्या इत्याह – **श्रोतेति ॥** **'श्रोता'** युगपत्स्वातन्त्र्येण श्रवणकर्ता । **'मन्ता'** स्वातन्त्र्येण सर्वमननकर्ता । स्वातन्त्र्येण सर्वद्रष्टा । **'आदेष्टा'** नियोजन कर्ता । **'आघोष्टा'** सम्यग्वक्ता ।**'विज्ञाता'** विशेषेण ज्ञाता । प्रकर्षेण ज्ञाता । **'सर्वेषां भूतानां'** जीवानाम् **'अन्तरः'** अन्तःस्थः 'पुरुषः' पूर्णः **'समः'** समानः, सर्वरूपेण

१. क.पुस्तके **'सर्वत्र गतनिष्ठतया'** इति स्थाने **'सर्वनिष्ठतया'** इति पाठः ।

'**आत्मा**' आदानादिकर्तेति विद्यादित्यैतरेयभाष्य,तत्त्वप्रदीप,विश्वेश्वरतीर्थीय-दिशा श्रुत्यर्थः ॥

स हि 'न ते विष्णो जायमानो न जातो देवः' *(ऋ.७-९९-२.)* **इत्यादिनाऽश्रुतत्वादिगुणकः ॥**

नन्वेतच्छ्रुत्युक्तानाम् अश्रुतत्वादिगुणानां कुतो विष्णुनिष्ठत्वमित्यत आह– **स हीति** ॥ हिशब्दः प्रसिद्धौ । **'सः'**[१]विष्णुः **'न ते'**[२] इत्यादिना वाक्येनाश्रुतत्वादिगुणः तद्वत्तया प्रसिद्ध[३] इत्यर्थः । श्रुतौ **'श्रोत्रादिना'** इति पदाध्याहारेणेति भावः[४] । यद्यपि श्रुतावतत्वस्य प्रथमोक्तत्वादतत्वादिगुण इति वक्तव्यम् । तथाऽपि तस्य सर्वगतत्वरूपत्वेन विष्णुनिष्ठतया साध्यत्वादसिद्धत्वात् स विष्णुरतत्वादिगुणकः प्रसिद्ध इति सिद्धनिर्देशायोगाद् अश्रुतत्वादीत्युक्तम् । यद्वा - विष्णुरतत्वादिगुणकः **'न ते विष्णो'** (ऋ. ७-९९-२.) इत्यादिश्रुतेरिति प्रयोगे सर्वगतत्वरूपस्यातत्वस्य साध्यत्वात्तस्य च **'न ते विष्णो'** इत्यादावनुक्तेर्हेत्वनन्वयादश्रुतत्वादीत्युक्तम् ॥

'स सविता स वायुः स इन्द्रः सोऽश्रुतः सोऽदृष्टो यो हरिर्यः परमो यो विष्णुर्योऽनन्तः' इत्यादि चतुर्वेदशिखायाम्[५] **॥ २ ॥**

'न ते' इत्यादिश्रुतौ मुखतोऽश्रुतत्वादिकं विष्णोर्न प्रतीयते इत्यतोऽत्रैवार्थे स्पष्टश्रुतिं चाऽह – **स इति** ॥ यः **'सविता'** जगदुत्पादकः स हरिरेव । यो **'वायुः'** बलज्ञानरूपो देवः स परमः परमात्मैव । यः **'इन्द्रः'**

---

१. **'हि यस्मात् '** क. । २. **'अतः'**- क.।

३. **'प्रमितः प्रसिद्धः' क.**

४. इतः परं **'तस्मान्न व्याप्त्यभाव इति वाक्यशेषः'** इति क.पुस्तकेऽधिकः पाठः

५. **'इत्यादि च चतुर्वेदशिखायाम्' ह.** ।

परमैश्वर्यवान् स विष्णुरेव, न प्रसिद्धादिः [१] । योऽश्रुतोऽदृष्टः सोऽनन्तोऽपरिमितो हरिरेव नान्य इत्यर्थः ॥ यद्वा – यो हर्यादिशब्दवाच्यः प्रसिद्धः, स एव सवितृत्वादिगुणवाचिशब्दवाच्य इत्यर्थः । **इत्यादीति** ॥ यतः चतुर्वेदशिखायामित्याद्युक्तमतोऽपि स एवाश्रुतत्वादिगुण इत्यन्वयः ॥

न चाऽदित्यशब्दाच्चक्षुर्मयत्वादेश्च जीव इति वाच्यम् ।

ननु यथा ब्रह्मशब्दादश्रुतत्वादिलिङ्गैश्च विष्णुः सर्वगत इत्युच्यते । तथाऽऽदित्यादिशब्दात् सर्वजीवलिङ्गाच्चाऽदित्यः सर्वजीवा वा सर्वगताः किं न स्युरित्यत आह – **न चेति** ॥ **'आदित्यो रसः'** इत्यादित्यशब्दात् सर्वगतत्वप्रकरणे **'चक्षुर्मयः श्रोत्रमयः छन्दोमयो मनोमयो वाङ्मय आत्मा'** (ऐ.आ.३-२-१) इति श्रुतौ ज्ञानकरणचक्षुराद्यात्मकदेहाभिमानित्वेन जीवे प्रसिद्धाच्चक्षुर्मयत्वादेश्चेत्यर्थः । हेतुसमुच्चये चशब्दः । **'जीवः'** इत्यनेन सूत्रगतं शारीरपदं व्याख्यातम् । **'शारीरौ तावुभौ प्रोक्तौ जीवश्च परमस्तथा'** इति स्मृतेः । शरीराभिमानित्वाच्च जीवस्य शारीरत्वं युक्तम् । जीव इत्येकवचनं समुदायाभिप्रायम् । जीवश्चेत्यपि चशब्दान्वयः । तेनाऽदित्यप्रतिज्ञा समुच्चीयते । सर्वत्र गत[२] इति शेषः । इति न वाच्यमिति सम्बन्धः ॥

सू -ॐ ॥ अनुपपत्तेस्तु न शारीरः ॥ ॐ ॥ ३ ॥

एकस्य सर्वशरीरस्थत्वानुपपत्तेरेव ॥ ३ ॥

कुतो न वाच्यमित्यत्र हेत्वाकाङ्क्षायां सूत्रमुपन्यस्य प्रतिज्ञाभागस्यावतारिकाभाष्येणैव व्याख्यातत्वाद्धेत्वंशमेव व्याचष्टे – **अनुपपत्तेरिति** ॥

---

१. **'प्रसिद्धादित्यः'** क.

२. **'सर्वगतः'** क.

एकस्यैकैकस्य जीवस्येति विपरिणामेनानुवर्तते । **सर्वशरीरेति** ॥ सर्वशरीरस्थत्वस्यानुपपत्तेः सर्वजीवस्य[१] समानभोगप्राप्तिरूपोपपत्तिविरुद्धत्वादेवेत्यर्थः । न त्वन्यप्रापकाभावादिति हेत्वन्तरमन्वेषणीयमित्येवशब्दार्थः । एवेत्यनेन सौत्रतुशब्दो व्याख्यातः । अनुपपत्तिस्तु टीकायामेव सहेतुकमुपपादिता ॥

सू - ॐ॥ कर्मकर्तृव्यपदेशाच्च ॥ ॐ॥ ४ ॥

'आत्मानं परस्मै शंसति' *(ऐ.आ. ३-२-३.)* **इत्यादि ॥ ४ ॥**

युक्त्यन्तरेण शारीरस्य सर्वगतत्वं निराकुर्वत्सूत्रमुपन्यस्य तदुपात्तश्रुतिमेवोदाहरति – **कर्मेति** ॥ भावप्रधानोऽयं, चः समुच्चये । **'सर्वत्रोक्तः शारीरः'** इति पदत्रयं विपरिणामेनानुवर्तते । तथा च सर्वत्रोक्तस्य सर्वगतस्य प्रकृतस्य **'एतमात्मानं परस्मै शंसति'** इत्यैतरेयश्रुतौ शंसनक्रियायां स एतमात्मानमिति कर्मत्वेन शारीरस्य जीवस्य च तस्यामेव कर्तृत्वेन व्यपदेशाद् एकस्यां क्रियायां तयोरुत्सर्गतो भिन्नत्वनियमाद् अपवादकारणाभावाच्च न सर्वत्रोच्यमानः शारीर इत्यर्थः ॥

तत्त्वप्रदीपे तु – चकारात् **'परस्मै'** इति सम्प्रदानव्यपदेशाच्चेत्यभिप्राय इत्युक्तम् । यः **'एतमात्मानं'** चक्षुर्मयत्वादिगुणकं परमात्मानम् **'अन्यस्मै'** अयोग्याय **'शंसति'** उपदिशति तस्य वेदाः **'दुग्धदोहाः'** फलविधुरा भवन्तीत्यर्थः । इत्यादीत्यस्य पूर्ववत् सूत्रेणान्वयः ॥ आदिपदेन **'आत्मानं वेद'** इति टीकोक्तं **'यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागोऽस्ति'** (ऐ.आ. ३-२-४.) इति तत्त्वप्रदीपोदाहृतवाक्यं च गृह्यते । **'सचिविदं'** कर्मसञ्चयवेत्तारं प्रीत्या एकदेशस्थत्वात् **सखायं** हरिं **'यस्तित्याज'** तत्याज अन्यथा वेद, तस्य **'वाचि'** वेदाध्ययनादौ[२]

१. 'सर्वजीवसमान-'क. २. '-ध्ययनादौ सत्यपि'- क.।

तस्मात् **'भागः'** फलं नास्ति नरकं च स्यादित्यर्थः ॥

सू - ॐ ॥ शब्दविशेषात् ॥ ॐ ॥ ५ ॥

'एतमेव ब्रह्मेत्याचक्षते' *(ऐ.आ. ३-२-३.)* **इति ।**

यदुक्तं ब्रह्मशब्दाद् विष्णुरेव सर्वगत इति । तदयुक्तम्, ब्रह्मशब्दस्य जीवेऽपि वृत्तेः । न चासौ जीवेऽमुख्य इति तदग्रहः । चक्षुर्मयत्वादिबाधकबलेनामुख्यार्थस्यापि ग्रहणोपपत्तेः । न च द्वितीयसूत्रोक्तबाधकान्न जीवः **'श्रुत्वाऽप्येनं वेद न चैव कश्चित्'** इति गीतायां जीवस्याश्रुतत्वादिश्रवणात्, तृतीयोक्तस्य च विष्णावपि साम्यात् । नापि[१] 'तुरीयोक्तचक्षुर्मयत्वादिबाधकेन, एकस्यैव [२]कर्मत्वकर्तृत्वयोरुपपत्तेरित्याशङ्कां परिहरत्सूत्रमुपन्यस्य तदुपात्तश्रुतिमेवोदाहरति – **शब्देति** ॥ भाष्यस्य सूत्रेणान्वयः । तथा च **'एतमेव ब्रह्मेत्याचक्षते'** इति वाक्ये हेतुत्वेन प्रकृतब्रह्मशब्दस्य **'विशेषात्'** सावधारणत्वरूपविशेषवत्त्वादित्यर्थः ॥

अस्य नानेन ब्रह्मशब्देन शारीर उच्यते इति लब्धसाध्येनान्वयः। अनेनैवकारो विधेयपदसङ्गतः, तच्छिरस्कब्रह्मशब्दश्च मुख्यब्रह्मत्वार्थकः । स च जीवे न युक्त[३] इत्युक्तं भवति ॥

यद्वा -एवकार एतमित्युद्देश्यवाचिपदेनैव सङ्गतोऽन्ययोगव्यवच्छेदार्थकः । न चैवं ब्रह्मशब्दस्य सावधारणत्वाप्राप्तिरिति वाच्यम् । एवकारार्थावधारणस्यान्ययोगव्यवच्छेदस्यान्यस्मिन् ब्रह्मत्वयोगव्यवच्छेद इति विवरणे ब्रह्मशब्दार्थब्रह्मत्वसम्बन्धाद् ब्रह्मशब्दस्य सावधारणत्वप्राप्तेः ॥

---

१. 'तुरीयोक्तानुपपत्तिः, चक्षुर्मय-' क. ।
२ 'कर्मत्वकर्तृत्वोपपत्तेः'–क.
३ 'युज्यते' – क. ।

[1]यद्यपि न शारीर एतच्छब्दार्थः । कुतः ? तस्य एवकारार्थप्रतियोगिवाचकब्रह्मशब्देनैव विशेषितत्वादिति सूत्रवृत्तिः सम्भवति । तथाऽपि न सा टीकोक्तेति न कैरपि प्रदर्शिता ॥

न हि जीवमेव ब्रह्मेत्याचक्षते ।

सावधारणत्वेऽपि ब्रह्मशब्दस्य कुतो न जीवे वृत्तिरित्यत आह – **न हीति** ॥ हिशब्दः प्रसिद्धौ हेतौ च । कवय इति शेषः । कुत इति चेद् एवकारशिरस्कब्रह्मशब्दवाच्यत्वे जीवस्य मुख्यब्रह्मत्वं स्यात्, तच्च नोपपद्यते । तस्यामुख्यब्रह्मत्वेन प्रसिद्धत्वादिति भावः । एवमेवकारस्योद्देश्यसम्बन्धेनान्ययोगव्यवच्छेदकत्वेऽपि पूर्वपक्षे एतच्छब्दार्थत्वेनाभिमतजीवादन्यस्य ब्रह्मत्वं निषिद्धं स्यात् । तच्च नोपपद्यते । जीवादन्यस्य परमात्मनो मुख्यब्रह्मणो जात्यादेरमुख्यब्रह्मणश्च सत्त्वेनान्यस्य ब्रह्मत्वसम्बन्धनिषेधायोगादित्यपि द्रष्टव्यम् ॥ तत्त्वप्रदीपे तु – जीवस्य ब्रह्मत्वे तस्य भूतत्वेन भूतेष्वित्युक्तं भूतस्थत्वं न युज्यत इत्युक्तम् ॥

'एष उ एव ब्रह्मैष उ एवाऽत्मैष उ एव सवितैष उ एवेन्द्र [2]एष उ एव हरिर्हरति परः परानन्दः' इति चेन्द्रद्युम्नशाखायाम् ॥५ ॥

विष्णावपि सावधारणब्रह्मशब्दस्य वृत्तिः कुत इत्यत आह – **एष इति** ॥ उ एव [3]। यद्वा - उशब्दो विष्णुपरः । तथा चैष विष्णुरेव ब्रह्मेत्यर्थः । **'आत्मानम्'** इत्युक्तमात्मत्वं **'स सविता'** इत्युक्तसवितृत्वादिकमपि

---

१. 'यद्यप्येवकारार्थप्रतियोगिवाचिब्रह्मशब्देनैतच्छब्दस्य विशेषितत्वान्न शारीरस्तद्वाच्य इति सूत्रवृत्तिः' इत्येवं क. पुस्तकानुसारी वाक्यविन्यासः ।

२. 'इन्द्रो य उ एव' ह. ।

३. 'उशब्दस्य व्याख्यैवेति ॥' – क.

विष्णोरेवेत्याह – **एष उ एवाऽत्मेत्यादिना** ॥ य उ यो विष्णुरेव हरिः । तत्र निमित्तमाह – **हरतीति** ॥ यज्ञगृहेष्विडोपहूतं भागं स्वीकरोतीत्यर्थः ॥ यद्वा - सतां पापं हरतीत्यर्थः । एवमेष एव पर उत्तमः पूर्णानन्दश्चेति योजना । इन्द्रद्युम्नशाखायामित्यस्य **'य एतं सर्वभूतस्थं विष्णुमेव[1] ब्रह्मेत्याचक्षते इन्द्रद्युम्नाः'** इत्युपस्कृतेनान्वयः । अस्य च हेतोरवतारिकागतसाध्येनान्वयः ॥

सू - ॐ ॥ स्मृतेश्च ॥ ॐ ॥ ६ ॥

'अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।' *(भ.गी. १०.२०,)*

'गामाविश्य च भूतानि धारयाम्यहमोजसा ।' *(भ.गी.१५.१३)*

इत्यादि ॥

स्मृतिसमाख्ययाऽपि विष्णोरत्रोक्तसर्वगतत्वं साधयत्सूत्रं पठित्वा तां स्मृतिमुदाहरति - **स्मृतेश्चेति** ॥ इत्यादिस्मृतेश्च सर्वत्रोच्यमानो नारायण एवेत्यन्वयः । न केवलमुक्तहेतुभ्य इति चकारार्थः । स्मृतेः स्ववचनत्वेऽपि परोक्तानुवादरूपत्वात् तदुक्तिर्युक्ता । एवमग्रेऽपि ॥

हे **'गुडाकेश'** गुडाका निद्रा, तदीशस्तद्रहित इति यावत् । गुडवदा-समन्तात् केशा यस्य सः श्लक्ष्णकेशेति[2] वा । अहमन्तर्यामितया [3]सर्वहृदय-स्थित इत्यर्थः ॥

'गां' भूमिमाविश्य तत्रावतीर्य **'भूतानि'** जीवान् **'ओजसा'** सामर्थ्येन धारयामीत्यन्यवाक्यस्यार्थः ॥

इमे च गीतायामर्जुनं प्रति कृष्णवाक्ये । पूर्ववाक्ये सर्वभूताशयस्थो [4]य

---

१. 'विष्णुमेव हि' - क. २ 'दलरक्तश्लक्ष्णकेशेति' क.
३ 'सर्वप्राणि-' क. ४.'अयम्' क.

आत्मा जीवः सोऽहमित्यभेदप्रतीतिनिरासाय द्वितीयवाक्योदाहरणम् । तद्वतत्वेनैव[१] तद्धारकत्वमभिप्रेतम् । अतो नासङ्गतिः । आदिपदात् स्मृत्यन्तरसङ्ग्रहः ॥

न चाप्रामाणिकं[२] कल्प्यम् ॥ ६ ॥

अन्ये तु, **'मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्पः'** इति वाक्ये[३] मनोमयत्वादिगुण ईश्वर एव, न जीव इति सिद्धान्तिते जीवेशयोरैक्यात् कथमेतदित्याशङ्क्य अस्ति भेदः । न चापसिद्धान्तः, यतोऽयं[४] न पारमार्थिकः, किन्तु, मिथ्याभूत एव सूत्रकृता विवक्षित इति समाधाय भेदमिथ्यात्वे सूत्रतात्पर्यं वर्णयन्ति । तेषां मतमाशङ्क्य दूषयति – **न चेति** ॥ चस्त्वर्थे । नञ् च तद्विरुद्धतदभावार्थः । तथा च 'अप्रामाणिकं' भेदमिथ्यात्वं तु **'न कल्प्यं'** सूत्रकृद्विवक्षाविषयत्वेन न कल्पनीयम् । कुतः ? यतस्तदप्रामाणिकं प्रमाणशून्यं **'द्वा सुपर्णा'** इत्यादिप्रमाणविरुद्धं चात इति योजना ॥

सू - ॐ ॥ अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ ॐ ॥ ७ ॥

'सर्वेषु भूतेषु' इत्यल्पौकस्त्वाच्चक्षुर्मयत्वादिना जीवव्यपदेशाच्च नेति चेन्न ।

उक्तार्थमाक्षिप्य समादधत्सूत्रं पठित्वाऽऽक्षेपांशं तावद् व्याचष्टे - **अर्भकेति** ॥ वाक्य इति शेषः । अर्भकेत्यस्य व्याख्याऽल्पेति ॥ अल्पमोकः

---

१. 'तद्वतेनैव' - क. २.'अप्रमाणकम्' ह.

३ 'वाक्योक्तो मनोमयत्वादिगुणकः' - क

४ 'नायं पारमार्थिकः । किन्तु'- क.

स्थानं यस्य तस्य भावस्तत्त्वं तस्मात् । तथाचाल्पस्थानस्थितत्वोक्तेरित्यर्थः । [१]सर्वजीवहृदयसुषिराणामल्पत्वादिति भावः । सूत्रगतच्छब्दस्य प्रकारप्रकार्युभयार्थत्वं मत्वाऽऽह – **चक्षुरिति, जीव इति च** ॥ आदिपदेन श्रोत्रमयत्वादि गृह्यते । चकारादादिशब्दाद्वा आदित्यश्रुतिरपि गृह्यते । अत एव जीवपदमादित्यसाधारणं प्रायोजि । जीवस्य व्यपदेशो वचनं जीवव्यपदेशः **'चक्षुर्मयश्श्रोत्रमयः'** इति श्रुताविति शेषः । चो हेतुसमुच्चये । **नेति** ॥ सर्वत्रोच्यमानो नारायण एवेति यदुक्तं तन्नेत्यर्थः । परमात्मपक्षेऽपि जीवपक्ष इव बाधकसद्भावादिति भावः ॥

परिहारांशं व्याचष्टे – **नेति** ॥ उक्तबाधकाद् विष्णोः सर्वत्रोच्यमानत्वाभावो नेत्यर्थः ॥

अर्भकौकस्त्वेन चक्षुर्मयत्वादिरूपेण च तस्यैव विष्णोर्निचाय्यत्वात् । सर्वगतत्वेऽप्यल्पौकस्त्वं च युज्यते व्योमवत् ॥

कुतो नेत्यतोऽत्र बाधकाभावादिति हेतुम् अर्भकौकस्त्वादीनां च विष्णावेवोपपन्नत्वेनाबाधकत्वादिति तदुपपादकहेतुं चोपस्कृत्य तर्हि विष्णावर्भकौकस्त्वादिकथनवैयर्थ्यमित्याशङ्क्य तत्परिहारत्वेनोक्तमेवंनिचाय्यत्वादित्यंशं व्याख्याति – **अर्भकौकस्त्वेनेति** ॥ आदिशब्दान्मनोमयत्वेनेत्याह[२]। अनेन सौत्रैवंशब्दः प्रकारार्थतया व्याख्यातः । सिद्धान्तांशेऽपि विष्ण्वर्थकस्य व्यत्यस्ततच्छब्दस्य[३] सावधारणस्यान्वयमभिप्रेत्याऽह – **तस्यैवेति** ॥ यद्वा प्रधानसूत्रेऽनुवृत्तस्य[४] तदित्यस्येह विपरिणतस्याऽवृत्तिं[५] मत्वाऽऽह –

---

१. 'सर्वजीवहृदि सुषिराणाम्' – क. २ .'मनोमयत्वादिनेत्याह' क.
३. 'व्यस्ततच्छब्दस्य'– क. ४. 'तत्त्वित्यस्येह' – क.
५. 'अनुवृत्तिं' – क.

तस्यैव विष्णोरिति ॥ एवकारोऽप्यर्थः । तथा च सर्वगतस्यापि जीवविलक्षणस्यापीत्यर्थः । न तु जीवस्य, इत्यन्यनिषेधार्थो वा एवकारः । **'निचाय्यत्वात्'** उपास्यत्वात् । अनेनापरिच्छिन्नेऽल्पौकस्त्वोक्तिः जीवविलक्षणे चक्षुर्मयत्वाद्युक्तिः[१] व्यर्थेति शङ्का निरस्ता भवति ॥

इदानीं सर्वगतस्याल्पौकस्त्वमयुक्तमिति शङ्कानिरासाय सूत्रगृहीतं दृष्टान्तांशं एवमित्यस्य चशब्देनाप्यन्वयं [२]व्यत्यस्ततत्पदस्य आवृत्तस्य **'युज्यते'** इति अध्याहृतेनापि सम्बन्धमभिप्रेत्य व्याख्याति –**सर्वगतत्व इति** ॥ अपीति द्वितीयचशब्दव्याख्यानम्[३] ॥

'सर्वेन्द्रियमयो विष्णुः सर्वप्राणिषु च स्थितः ।
सर्वनामाभिधेयश्च सर्ववेदोदितश्च सः [४]॥' इति स्कान्दे [५]॥ ७॥

यदपि जीवविलक्षणस्य नित्यज्ञानवतो ज्ञानकरणचक्षुरादिप्राचुर्यरूपचक्षुर्मयत्वादिकथनमयुक्तमिति चोद्यं, तत् चशब्दसूचितस्मृत्या निराह – **सर्वेन्द्रियमय इति** ॥ विष्णुर्यतः सर्वप्राणिषु संस्थितः । प्राणा इन्द्रियाणि, तद्वन्तः प्राणिनः तेष्विन्द्रियनियामकत्वेन स्थितः । सर्वेन्द्रियस्वामीति यावत् । अतः सर्वेन्द्रियमय इत्युक्त इत्यर्थः । स्वामित्वं मयडर्थ इति भावः । चशब्दः प्रथमपादार्थे [६]द्वितीयपादार्थं हेतुमाह । एवं द्वितीयतृतीयपादद्वयमपि आदित्यादिसर्वप्राणिस्थितत्वादादित्यादिसर्वनामाभिधेय इति हेतुहेतुमद्भावेन व्याख्येयम् । अत एव चशब्दः द्वितीयतृतीयचशब्दवद् विशेषणान्तरसमुच्चयेऽप्यन्वेयः । अनेन प्रथमपादेन **'चक्षुर्मयः श्रोत्रमयो मनोमयो**

---

१. -युक्तिश्च' क.
२. 'व्यस्त-' क.
३ '-शब्दस्य व्याख्यानम्' क
४. 'सर्ववेदेडितश्च सः' ह.
५. 'इति च स्कान्दे' ह .
६. 'द्वितीयपादार्थस्य हेतुत्वम्-' क.

वाङ्मयः' इत्यादिकं ब्रह्मणि तत्स्वामित्वेन निमित्तेन प्रयुक्तमिति व्याख्यातं भवति । एवं द्वितीयतृतीयपादाभ्यां तत्तद्गतत्वेनाऽदित्यादितत्तन्नामवाच्यत्व-कथनमुखेनाऽदित्यश्रुतेरीश्वरवाचित्वमुक्तं भवति ॥

अनेनैवाऽदित्येऽनुक्तियुक्तिविरोधश्च[1] परिहृतः । चतुर्थपादेन छन्दःपदो-क्तवेदमुख्यार्थत्वाच्छन्दोमयत्वं च विष्णोर्युक्तमित्युक्तं भवति ॥ ऐतरेयभाष्ये - 'सम्पूर्णदर्शनशक्तेः चक्षुर्मयः सम्पूर्णश्रवणशक्तेः श्रोत्रमयः सत्यकामत्वात् छन्दोमयः सर्वमन्तृत्वान्मनोमयः सर्ववक्तृत्वाद् वाङ्मयः पूर्णफलरूपत्वादात्मा' इति ॥ तथा बृहद्भाष्ये – 'मयट्प्राचुर्यार्थः स्वरूपे च' इति प्रतिज्ञाय[2] -

'सर्वद्रष्टृस्वरूपत्वाच्चक्षुर्मय इतीर्यते ।
सर्वश्रोतृस्वरूपत्वात् स श्रोत्रमय ईरितः ॥' इति ।

तथा भागवततात्पर्ये –

'सर्वे विष्णौ स्थिता यस्मादतः सर्वमयो ह्यसौ ॥'

इति प्रकारान्तरेण भगवति चक्षुर्मयत्वादिकं व्याख्यातम् ॥

स्कान्दे इत्यनन्तरं उक्तमिति शेषः । अस्य जीवविलक्षणस्यापि इन्द्रियस्वामित्वादिना चक्षुर्मयत्वादि युज्यत इति न तदयोग इत्युपस्कृत-साध्येनान्वयः ॥

अनेन **'सर्वेषु भूतेषु'** इत्यत्रार्भकौकस्त्वोक्तेः **'चक्षुर्मयः'** इत्यादौ च तस्य जीवस्य तेन चक्षुर्मयत्वादिना प्रकारेणोक्तत्वाद् आदित्यव्यपदेशाच्च अस्मादेव बाधकान्न सर्वत्रोक्तो नारायण इति चेत् – न,[3] कुतः ? अत्र बाधकाभावात्, अर्भकौकस्त्वादेश्च विष्णावेवोपपत्तेः । न चापरिच्छिन्नस्यार्भकौकस्त्वोक्तिः

---

१. 'अनुक्तिविरोधश्च' क. २ 'ज्ञापनाय' क.
३. 'न, विष्णौ सर्वगतत्वाभावो वाच्यः । कुतः' क.

जीवविलक्षणस्य चक्षुर्मयत्वाद्युक्तिश्च व्यर्थेति वाच्यम् । एवं निचाय्यत्वात् । **'चायृ पूजानिशामनयोः'** । [१]तस्यैव तस्यापरिच्छिन्नस्यापि विष्णोरल्पौकस्त्व-चक्षुर्मयत्वादिना प्रकारेणोपास्यत्वेनोपासनार्थं तदुक्तिसार्थक्यात्[२]। न चापरि-च्छिन्ने जीवविलक्षणे च ब्रह्मणि अर्भकौकस्त्वाद्युक्तिर्न युज्यत इति वाच्यम् । यतः **'एवं च'** एवमपि सर्वगतत्वेऽपि **'व्योमवत्'** तदल्पौकस्त्वं चक्षुर्मयत्वादि युज्यते । यथा व्याप्तस्यापि व्योम्नोऽव्याकृताकाशस्य मठाद्येकदेशावस्थितिः तथा ब्रह्मणो भूताशयादौ स्थितिर्युक्ता । [३]यतश्चैवं विष्णोर्जीवविलक्षणत्वेऽपि इन्द्रियस्वामित्वादिना चक्षुर्मयत्वाद्युक्तिर्युक्ताऽत इति [४]सूत्रार्थ उक्तो भवति ॥

ॐ ॥ सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ ॐ ॥ ८ ॥

जीवपरयोरेकशरीरस्थत्वे समानभोगप्राप्तिरिति चेन्न ।
सामर्थ्यवैशेष्यात् ।

पुनरुक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्यति – **सम्भोगेति** ॥ अत्र पूर्वसूत्रादेवंशब्दमनुवर्त्य तद्बोधितमापादकं दर्शयन् पूर्वपक्षांशं तावद् व्याचष्टे - **जीवेति** ॥ जीवपरमात्मनोरित्यर्थः । **एकेति** ॥ विष्णोः सर्वशरीरस्थत्वे जीवेन [५]सहैकशरीरस्थत्वप्राप्तेरिति भावः । संशब्दस्य **'व्यवहृपणोः समर्थयोः'** इत्यत्रेव समानार्थत्वमाश्रित्याऽह – **समानेति** ॥ परस्य जीवसमानभोग-प्राप्तिर्बाधिकाऽस्तीति शेषः । अतो जीवपक्ष इवेश्वरपक्षेऽपि बाधकसाम्यान्नायं सर्वगत इति वाक्यशेषः ॥

---

१. 'तथा च तस्यैव विष्णोः' क.
२. 'उपासनार्था तदुक्तिरिति न वैय्यर्थ्यमिति भावः ।' क.
३. 'एवं विष्णोः' क. ४.'-द्युक्तिरिति सूत्रार्थः' क.
५ सहैव सर्वशरीर-' क.

परिहारांशं व्याचष्टे – **नेति** ॥ नेश्वरस्य समानभोगप्राप्तिरित्यर्थः ॥ कुतो नेत्यतस्तत्र हेतुत्वेन वैशेष्यादित्यंशं योजयति – **सामर्थ्येति** ॥ स्वार्थे ष्यञ् । विशेषिणो भाव इति वा । तथा च परस्य [१]समानभोगाप्राप्तौ जीवादपि सामर्थ्यंवैशेष्यादित्यर्थः ॥

उक्तं च गारुडे -

'सर्वज्ञाल्पज्ञताभेदात् सर्वशक्त्यल्पशक्तितः ।
स्वातन्त्र्यपारतन्त्र्याभ्यां सम्भोगो नेशजीवयोः ॥' इति (च)॥८॥

॥ इति सर्वगतत्वाधिकरणम् ॥

किं तत् सामर्थ्यंवैशेष्यं, येन समानभोगाप्राप्तिरित्यत आह – उक्तमिति ॥ न केवलं सूत्रे जीवेशयोर्भोगसाम्याभावः, तत्र हेतुत्वेन सामर्थ्य-वैशेष्यं चोक्तम्, किन्तु [२]गारुडे चेति समुच्चयार्थश्चः ॥

किमुक्तमित्यतस्तत् पठति – **सर्वज्ञेति** ॥ सर्वज्ञत्वाल्पज्ञत्वरूप-भेदकधर्माभ्यामित्यर्थः । प्राप्तस्य बाधकस्य परिहाराय विष्णोः सामर्थ्ये सत्यपि प्रथमं प्राप्तिस्तावत् स्यादेव अग्निस्तम्भवतो दाहप्राप्तिवत् । साऽपि भगवति न सम्भवति ।तस्य सार्वज्ञेनैष्यद्बाधकपरिहर्तृत्वसम्भवादिति भावेनेह सार्वज्ञोक्तिः, न हेतुत्वेन, हेतुस्तु सर्वशक्तित्वम् । तलस्तसिलश्च प्रत्येकमन्वयः । ईश्वरस्य जीवेन सहैकशरीरस्थत्वेऽपि दुःखपरित्यागेन सुखमात्रभोगे स्वातन्त्र्यं हेतुः । जीवस्य चोभयानुभवे पारतन्त्र्यं[३] हेतुरिति विवेक्तव्यम् । सम्भोगः समानभोगः । [३]गारुड इत्यन्वयः । **'इति च'** इति चशब्दपाठे[४] तत्र पूर्वोक्तेन

---

१. 'जीवसमान-' – क. ।
२ .'गारुडे चोक्तमिति' क.
३. 'अस्वातन्त्र्यम्' क.
४. 'इति गारुडे' क.
५. 'चशब्दपाठः ।' क.

समुच्चयार्थश्चकारः ॥

अनेन यतो यथा एकस्य जीवस्य सर्वशरीरस्थत्वे सर्वसमानभोगप्राप्तिः बाधिकाऽनुपपत्तिः सूत्रोक्ताऽस्ति । तथैवमीशस्य[1] सर्वभूतगतत्वमङ्गीकृत्य जीवेश्वरयोरेकशरीरस्थत्वे[2] परस्य जीवसमानभोगप्राप्तिर्बाधिकाऽस्ति । अतो नेश्वरः सर्वभूतगत इति चेन्न, कुतः ? तस्य तदप्राप्तौ जीवादपि सामर्थ्यवैशेष्याद् अग्निस्तम्भवतो दाहाभाववदिति सूत्रार्थ उक्तो भवति ॥१ ॥

॥ इति सर्वगतत्वाधिकरणम् ॥

---

१. 'तथेशस्य' क.

२. 'सर्वशरीरस्थत्वे' क.

॥ २. अथात्तृत्वाधिकरणम् ॥

(सर्वात्तृत्वं परमात्मन एव नेतरस्येति प्रतिपादनम्)

'जन्माद्यस्य यतः' इत्युक्तम् । तत्रात्तृत्वं -

'स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति तददितेरदितित्वम्' *(बृ.३-२-५.)* **इत्यदितेः प्रतीयते ।**

अत्राधिकरणे लोकतोऽन्यत्र प्रसिद्धादितिशब्देन सहोक्तात्तृत्वलिङ्गस्य हरौ समन्वयः क्रियते । श्रुत्यादिसङ्गतिं विषयवाक्यमुदाहृत्य विषयसंशयौ सयुक्तिकपूर्वपक्षं च सूचयति – **जन्मेति** ॥ [१]जन्मादिसूत्रे जन्मादिकर्तृत्वं विष्णोरुक्तमित्यर्थः । **तत्रेति** ॥ उक्तलक्षणेषु मध्य इत्यर्थः । प्रविष्टमिति शेषः । **अत्तृत्वमिति** ॥

'स सर्गकाले च करोति सर्वं संहारकाले तु तदत्ति भूयः ।',

'स्रष्टा पाता तथैवात्ता' *(स्कान्दे)*

इत्यादावदिधातुप्रकृतिकानेकशब्दवाच्यं[२] संहर्तृत्वापरपर्यायशब्दबोध्यम् ऊर्णनाभ्यादिवद्यदत्तृत्वं[३]तदित्यर्थः । अनेन अदेर्भक्षणार्थत्वाददितेरत्तृत्वेऽपि न संहर्तृत्वलक्षणस्यातिव्याप्तिरिति शङ्का निरस्ता । प्रथमेतिशब्दः श्रुतिगतः । द्वितीयस्तु भाष्यकारीयः[४] । अदितेरित्यावर्तते । तत्रैकं भावप्रधानम् । तथा च, इति बृहदारण्यकवाक्ये यदत्तृत्वं प्रतीयते तद् अदितेः, देवमातुरेव भवेत् ।

---

१. 'सूत्रे' इति 'जन्मादिकर्तृत्वं विष्णोः'इति च शेषः । तत्रेति ॥ – क. ।

२. 'वाच्यसंहर्तृत्वा-' –क.

३. '-र्णनाभ्यादिवदत्तृत्वम्' इति मुद्रितपाठः ।

४. 'भाष्यकारीयः' । तदनन्तरं वाक्य इति शेषः क .

कुतः ? **'अदितेः'** अदितिश्रुतेः । तथा अदितित्वलिङ्गाच्चेति योजना । अदितित्वं च गोत्वादिवददितिमात्रधर्मः, न विष्णौ सावकाशम् ॥

अनेन जन्मादिसूत्रोक्तलक्षणंस्यातिव्याप्त्यसम्भवाक्षेपात् तेनास्याऽक्षेपिकी सङ्गतिः । श्रुत्युक्तमत्तृत्वं विषयः । [१]विष्णोरन्यस्य वेति सन्देहः । देवमातुरदितेरेवेति पूर्वः पक्षः । अदितिश्रुतिरदितित्वयुक्तिश्च सूचिता भवति ॥

पूर्वपक्षे श्रुत्यर्थस्तु - **'सः'** अदितिर्देवमाता संवत्सरनाम्ना चतुर्मुखेन **'यद्यदसृजत तत्तदत्तुमध्रियत'** मनः । आदच्चेति शेषः । कुतः सर्वात्तृत्व-मदितेः ? यस्मात् सर्वात्री सा सर्वमत्तीति यत् तदेव ह्यदितेर्देवमातुः **'अदितित्वम्'** अदितिशब्दवाच्यत्वे निमित्तम्, अन्यथा तन्न स्यादिति । अस्मिन् पक्षेऽपि स्थलान्तरस्थादितिशब्दस्य निर्वचनमिदम् । अत्र सर्वशब्दः सुधारीत्या अदित्यदनयोग्यसर्वपरः । टीकारीत्या सङ्कुचितसर्वपरो वा ॥

सिद्धान्ते श्रुत्यर्थस्तु - **'सः'** संवत्सरनामकचतुर्मुखो **'यद्यदेवासृजत तत्तत्सर्वमत्तुं'** स मृत्युनामा जनार्दनोऽध्रियत । आदच्च । कुतः सर्वसंहर्तृत्वं विष्णोः ? **'अदितेः'** अदितिशब्दात् । अदितिर्हि **'इदं सर्वं.....यदिदं किञ्च'** (तै.उ.२-६) **'अदितिर्देवतामयी'** (कठ. ४-७) इति श्रुत्यन्तरे ब्रह्मण्यदिति-शब्दप्रयोगादिति यावत् । तावताऽपि कुतः सर्वात्तृत्वं विष्णोः ? सर्वमत्तीति यत् तदेव हि **'अदितेः'** स्त्रीलिङ्गादितिशब्दवाच्यस्य **'अदितित्वम्'** [२]अदिति-शब्दवाच्यत्वमन्यथा स निर्निमित्तकः स्यादिति भावः । अनेन विष्णोः सर्वात्तृतायां तन्निमित्तश्रुत्यन्तरगतादितिशब्दो हेतुरित्युक्तं भवति । उक्तं हि चन्द्रिकायाम् । 'तत्तदत्तुमिति पूर्वप्रतिज्ञातसर्वात्तृतायां श्रुत्यन्तरे ब्रह्मणि

---

१. **'किं विष्णोः'** – क. ।

२. **'अदितिशब्दवाच्यत्वं ब्रह्मणः श्रुत्यन्तरगतादितिशब्दवाच्यत्वे निमित्त-मिति । अन्यथा-' क.** ।

प्रयुक्तस्य सर्वात्तृत्वनिमित्तकस्यादितिशब्दस्य हेतूकरणं सम्भवति' इति । अत एव ऋग्भाष्ये **'अत्ति विश्वं तेन चैवादितिरिति विष्णुः'** इत्युक्तम् । तत्रैव **'गुणतः कालतश्चाऽनन्त्यरूपमखण्डितत्वं चादितिशब्दप्रवृत्तिनिमित्तम्'** इति चोक्तम् ॥

'स यद्यदेवासृजत' इति पुल्लिङ्गं च
'कूटस्थोऽक्षर उच्यते' *(भ.गी. १५-१६.)* **इत्यादिवत् ॥**

नन्वेतदत्तृत्वमदितेश्चेत् कथं तर्हि तस्यां स इति पुल्लिङ्गं युक्तं स्यात् । अतस्तेन श्रुत्यादिबाध इत्यत आह – **स इति ॥** इति वाक्ये श्रुतमित्यर्थः । इत्यादिवदित्यनन्तरमदित्यां युज्यत इति शेषः । चस्त्वर्थः । आदिपदेन **'सोऽहं वायुं दिशां वत्सं वेद'** इति छन्दोगवाक्यं गृह्यते । तथा च पूर्वपक्षे न पुल्लिङ्गानुपपत्तिरिति भावः[१] । कूटमाकाशं तद्वन्निर्विकारतया तिष्ठतीति कूटस्थः । प्रकृतिः **'अक्षरः'** देहतोऽविनाशित्वादुच्यत इति गीतावाक्यस्यार्थः ॥

दिक्शब्दितानां पूर्वादिचतुर्दिगवस्थितभगवद्बाहूनां **'वत्सं'** ततो जातं **'वायुं'** मुख्यप्राणमहं **'वेद'** जानामीत्यर्थः । लक्ष्मीवाक्यमेतत् ॥

अत्रोच्यते [२]

-सू -ॐ ॥ अत्ता चराचरग्रहणात् ॥ ॐ ॥९॥

सिद्धान्तयत्सूत्रमवतारयति - **अत्रेति ॥** इति चोद्ये समाधानमुच्यते सूत्रकृतेति शेषः । अनेन सूत्रेऽत्रोच्यत इति शेषो दर्शितः । [३]तत्सूत्रं पठति - **अत्तेति ॥** तत्त्वित्यनुवर्तते । विपरिणम्यते च [४] । तथा चात्र वाक्ये यः **'अत्ता'**

---

१. इयं पङ्क्तिर्मुद्रितपुस्तके नास्ति । २ .'इत्यत्रोच्यते' ह.
३. क. पुस्तके 'तत्' इति पदं नास्ति। ४ '.विपरिणाम्यते च तच्छब्दः'– क.

संहर्तोच्यते स विष्णुरेव । कुतः ? **'सर्वं वा अत्ति'** इति **'चराचरस्य'** चेतनाचेतनरूपस्य विश्वस्याद्यतया संहार्यतया **'ग्रहणात्'** चराचरात्तृत्व-लिङ्गादिति यावदिति सूत्रार्थः ॥'

न हि चराचरस्य सर्वस्यात्तृत्वमदितेः ।
'स्रष्टा पाता तथैवात्ता निखिलस्यैक एव तु ।
[१]वासुदेवः परः पुंसामितरेऽल्पस्य वा न वा ॥' इति स्कान्दे ।

चराचरस्याद्यतया ग्रहणेऽपि कुतो नादितेस्तदत्तृत्वमिति लिङ्गस्य सावकाशत्वशङ्कां निराह - **न हीति ॥** हिशब्दः प्रसिद्धौ[२] । चराचरस्येति सूत्राक्षराण्यनूद्य श्रुत्यनुसारेण सर्वस्येति व्याख्यानम् । न च सामान्यपदेन व्याख्यानं व्यर्थमिति वाच्यम् । सूत्रस्य श्रुतिविसंवादप्रतीतिनिरासार्थत्वात् । **'अदितेः'** देवमातुः । सिद्धमिति शेषः [३] ॥

चराचरात्तृत्वं विष्णोरपि कुतः सिद्धमित्यत आह - **स्रष्टेति ॥ 'पुसां परः'** तेभ्यः उत्तमः **'वासुदेवः'** कृष्णः **'एक एव'** निखिलस्य जगतः एकः स्वतन्त्रः **'स्रष्टा'** सृष्टिकर्ता तथा **'पाता'** रक्षिता । तुश्चार्थः । अत्ता च । **'वासुदेवेतरे'** ब्रह्मा-द्यास्तु **'अल्पस्य'** जगदेकदेशस्यास्वातन्त्र्येण सृष्ट्यादिकर्तारो भवन्ति[४]। स्वात-न्त्र्यापेक्षया नेत्यर्थः । इति स्कान्दे इत्यनन्तरम् उक्तत्वादिति वाक्यशेषः[५] ॥

---

१. 'वासुदेवो वरः' ह.
२. 'हिशब्दस्तथा प्रमितत्वादिति हेतौ । तस्माल्लिङ्गं निरवकाशमिति भावः' क.
३. इयं पङ्क्तिर्मुद्रितपुस्तके नास्ति ।
४. 'सम्भवन्ति' – क.
५. 'उक्तत्वाद् विष्णोस्तु सिद्धमिति वाक्यशेषः । अत्र सर्वस्यात्तृत्वमित्य-नुषज्यते' – क.

'एकः पुरस्ताद् य इदं बभूव यतो बभूव भुवनस्य गोपाः ।
यमप्येति भुवनं साम्पराये स नो हरिर्धृतमिहाऽयुषेऽत्तु देवः ॥
(धृतसू.) इति [१]**श्रुतिः ॥ ९ ॥**

स्पष्टार्थत्वात् प्रथमं स्मृतिमुदाहृत्यात्रैवार्थे श्रुतिमप्याह - **एक इति ॥** एक इत्यस्याऽवृत्तिः, इदमित्यस्याप्यावृत्तिविपरिणामौ । तथा च य एकः **'इदम्'** अस्य जगतः **'पुरस्तात्'** प्रलये बभूव । यतश्च सृष्टौ **'इदं'** जगत् **'बभूव'** जातम् । अथ यश्चैको भुवनस्य **'गोपाः'** गोप्ता बभूव । यं च **'साम्पराये'** मुक्तिप्रलययोः भुवनं प्रविशति निगीर्णौदनवत् । **'सः देवः'** हरिः नः **'आयुषे'** आयुरर्थे **'इह'** यज्ञस्थाने आगत्य **'घृतम्'** आहुतिरूपम् **'अत्तु'** स्वीकरोत्विति तैत्तिरीयश्रुत्यर्थः मन्त्रद्रष्टृऋषिवाक्यमेतत् । इति श्रुतिरित्यनन्तरं[२] यत इति शेषः । अस्यातोऽपि विष्णोश्चराचरात्तृत्वं सिद्धमित्यन्वयः[३]॥

सू - ॐ ॥ प्रकरणाच्च ॥ ॐ ॥ १० ॥

यदा निरवकाशसर्वात्तृत्वलिङ्गमात्रात् सावकाशादितिश्रुत्यदितित्व-लिङ्गयोर्बाधेनात्ता विष्णुरेवेति सिद्ध्यति । तदा किमु वाच्यं निरवकाशप्रकरणसमुच्चिताल्लिङ्गादित्यर्थं प्रतिपादयत्सूत्रं पठित्वा व्याचष्टे - **प्रकरणाच्चेति ॥ 'नैवेह किञ्चन'** (बृ.३-२) इति निरवकाशविष्णुप्रकरणबलाच्चात्ता [४] विष्णुरेवेति सूत्रार्थः ॥

अप्संवत्सरसृष्ट्यादिना तत्प्रकरणत्वाच्च । [५]

प्रकरणस्य वैष्णवत्वासिद्धिमाशङ्क्याऽह -**अप्संवत्सरसृष्ट्यादिनेति॥**

---

१. 'इति च श्रुतिः' ह. २. 'श्रुत्यनन्तरम्' – इति मुद्रितपुस्तकपाठः।
३. '-मित्यनेनान्वयः' क.। ४. '-प्रकरणाच्चात्ता' – क.
५. 'तत्प्रकरणाच्च' ह.।

अप्सृष्टिः संवत्सरनामकचतुर्मुखसृष्टिश्च ते आदी यस्य तत् तथोक्तम्[१]। आदिपदेन [२]संवत्सरादनोद्यमादिलिङ्गं गृह्यते । **'तत्प्रकरणत्वात्'** विष्णुप्रकरणत्वादित्यर्थः । एतत्प्रकरणस्येति' शेषः । अवगमोपलक्षकमेतत् । अस्यातः प्रकरणाद् विष्णुरेवात्रोच्यते इति प्रकृतसाध्येनान्वयः । चो हेतुसमुच्चये । प्रकरणं नामैकप्रमेयप्रतिपादकानेकवाक्यानि ॥

बृहदारण्यके हि – **'नैवेह किञ्चनाग्र आसीत् । मृत्युनैवेदमावृतमासीत् । अशनायया३शनाया हि मृत्युस्तन्मनोऽकुरुताऽत्मन्वी स्यामिति ॥ सोऽर्चन्नचरत् तस्यार्चत आपोऽजायन्त । तद्यदपां शर आसीत् तत्समहन्यत सा पृथिव्यभवत् तस्यामश्राम्यत । सोऽकामयत द्वितीयो म आत्मा जायेतेति स मनसा वाचा मिथुनं समभवदशनाया हि मृत्युस्तद्रेत आसीत् तत् संवत्सरोऽभवत् । .... तं जातमभिव्याददात् स भाणमकरोत् सैव वागभवत् स ऐक्षत यदि ह वा इममभिमंस्ये कनीयोऽन्नं करिष्य इति । स तया वाचा तेनाऽत्मना इदं सर्वमसृजत'** (बृ. १-२.) इति विष्णुविषयाण्यनेकवाक्यानि श्रूयन्ते । **'अग्रे'** प्रलये **'इह'** अस्वतन्त्रवर्गे, गगन इति वा । **'किञ्चन'** जीवजडरूपं वस्तु नैवाऽसीदिति ॥

ननु –

'सर्वसंहारकं विष्णुं देवीं जीवांस्तथैव च ।
कालं त्रिगुणसाम्यं च कर्माणि प्राणमिन्द्रियम् ।
संस्कारं चैव वेदांश्च नर्ते किञ्चिल्लये त्वभूत् ॥'

---

१. 'तथोक्तं तेन' – क.

२. 'संवत्सरादनयत्नादिकं गृह्यते । अत्रोच्यमानलिङ्गेन विष्णुपरतयाऽवगादिति शेषः । तत्प्रकरणत्वाद्विष्णुप्रकरणादित्यस्य विष्णुरेवात्तोच्यत इति प्रकृतसाध्येनान्वयः । चो हेतु-' – क.

इति बृहद्भाष्योदाहृतवचनान्नित्यानां जीवानामपि सत्त्वात् कथमिय-मुक्तिरित्यत उक्तं - **मृत्युनैवेति** ॥ **'इदं'** जीवादिकं **'मृत्युना'** तन्नामकेन जनार्दनेन **'आवृतम्'** आच्छादितमासीत् । मृत्योरावरकत्वे हेतुः – **अशनाययेति** ॥ अशं जगत् तन्नेत्र्येत्यर्थः । मृत्योरशनायात्वं श्रुतिप्रसिद्ध-मित्याह – **अशनाया हीति** ॥ **'तत्'** तस्मादेकाकित्वान्मृत्युः **'आत्मन्वी'** जगद्रूपशरीरवान् स्यामित्यैच्छत् । एवं स मृत्युः **'अर्चन्'** स्वात्मानं पूजयन् सञ्चचार तस्यार्चत आपोऽजायन्त । [1]ता एव तासामर्चनसाधनमिति भावः । [2] तत्राप्सु योऽपां **'शरः'** फेनरूपो मण्ड आसीत् तच्छरः । स शरो मृत्युना स्वरेतसा **'समहन्यत'** सङ्घातत्वं प्रापितः । यः सङ्घातः सा **'पृथिवी'** ब्रह्माण्डरूपाऽभवत् **'तस्यां'** पृथिव्यां श्वेतद्वीपे 'अश्राम्यत्' शिश्ये मृत्युः । स मृत्युः **'मे'** मम **'आत्मा'** ब्रह्मा द्वितीयो वाय्वपेक्षया जायेतेति अकामयत । अथ **'अशनाया'** स मृत्युः 'मनसा' स्वेच्छया **'वाचा'** वेदाभिमानिश्रिया **'मिथुनं'** द्वन्द्वीभावं **'समभवत्'** प्रापत् । तेन मिथुनीभावेन यद्रेत आसीत् **'तत्संवत्सरः'** तदुपादानकदेहवान् संवत्सरनामकश्चतुर्मुखोऽभवत् । अथ जातं संवत्सरमभिलक्ष्यात्तुं **'व्याददात्'** विददार स्वमुखं मृत्युः । स संवत्सरो भयाद्[3] विष्णुदीत्याऽऽनन्दबोधकभाणिति शब्दमकरोत् । यद् भाणिति वचस्तदभिमानिनी सैव वाङ्नाम्नी सरस्वत्यभवत् । स मृत्युः **'ऐक्षत'** आलोचितवान् । किमिति ? **'यदीमं'** संवत्सरम् **'अभिमंस्ये'** लीनं करिष्ये तत् तदा मे **'कनीयः'** अल्पमन्नं करिष्ये । ततो बह्वन्नं भवत्वित्यालोच्य स मृत्युः **'तया वाचा'** सरस्वत्या **'तेनाऽत्मना'** चतुर्मुखेनेदं सर्वमसृजत । जनयामासेति श्रुत्यर्थः ॥

---

१. **'अत एव'** – क. २. **'तत्तत्राप्सु'** – क..

३. **'भाणं विष्णुदीक्षानन्द....'** – क ।

'नेहाऽसीत् किञ्चनाप्यादौ मृत्युरासीद्धरिस्तदा ।
सोऽत्मनो मनसाऽस्राक्षीदप एव जनार्दनः ॥
शयानस्तासु भगवान् निर्ममेऽण्डं महत्तरम् ।
तत्र संवत्सरं नाम ब्रह्माणमसृजत् प्रभुः ॥
तमत्तुं व्याददादास्यं तदाऽसौ विरुराव ह ।
अथ तत्कृपया विष्णुः सृष्टिकर्मण्ययोजयत् ॥ [१]
सोऽसृजद् भुवनं विश्वमद्यार्थं [२]**हरये विभुः ॥'**

इति ब्रह्मवैवर्ते ॥ १० ॥

॥ इति अत्तृत्वाधिकरणम् ॥ २ ॥

नन्वप्संवत्सरसृष्ट्यादिनाऽत्रोच्यमानेनापि कथमस्य विष्णुप्रकरणत्वनिश्चय इत्यतोऽप्संवत्सरसृष्ट्यादेर्विष्णुलिङ्गत्वादिति भावेन तस्य तल्लिङ्गत्वे स्मृतिमाह – **नेहाऽसीदिति ॥** **'आदौ'** प्रलये **'इह'** अस्वतन्त्रवर्गे **'किञ्चनापि'** जीवो जडं वा नाऽसीत् । नन्विदमयुक्तं, जीवादेः नित्यस्य सत्त्वादित्यत आह– **मृत्युरिति ॥** प्रलये मृत्युनामा हरिः जीवाद्यावरकत्वेनाऽसीत् । अत आवृतत्वान्नाऽसीदित्युक्तमिति नानुपपत्तिरिति भावः । **'सः आत्मनः'** इति पदच्छेदः[३] । **'मन्त्रेष्वाङ्यादेरात्मनः'** (पा.सू. ६-४-१४१) इत्याल्लोपः[४]। तथा च **'सः'** प्रभुर्विष्णुरात्मनो[५] **'मनसा'** स्वेच्छयैवापोऽस्राक्षीत् । **'तासु'** अप्सु **'महत्तरं'** स्वार्थे तरप् । महत् स्थूलम् **'अण्डं'** ब्रह्माण्डं निर्ममे । **'तत्र'** अण्डे संवत्सराख्यं ब्रह्माणमसृजदित्यन्वयः । नामेत्यनेन सम्यग्वत्सभूतान्

---

१. 'सृष्टिकर्म न्ययोजयत्' ह. २.सर्वमाद्यार्थं' ह.
३ '-च्छेदः । तृतीयायाः पञ्चमी । मन्त्रे-' – क.।
४ 'आलोपः' – क . ५.'आत्मनः सकाशात्' – क.

रमयतीति व्युत्पत्त्या संवत्सरशब्दश्चतुर्मुखे प्रसिद्ध इत्युच्यते । अत्रासामर्थ्यपरिहाराय – **प्रभुरिति** ॥ **'तं'** चतुर्मुखम् **'अत्तुं'** भक्षयितुं **'व्याददात्'** व्यावृणोद् विष्णुः । तदा ब्रह्मा **'विरुराव'** भाणिति शब्दमकरोदित्यर्थः । हेति, अस्यार्थस्य श्रुतिप्रसिद्धतां सूचयति । अथ [१]आरावकरणानन्तरं **'तत्कृपया'** तस्मिन् चतुर्मुखे कृपया विष्णुस्तमजग्ध्वा सृष्टिक्रियायामयोजयत् । **'स विभुः'** चतुर्मुखो हरये हरेरद्यार्थं भुवनमसृजत् ॥

यद्वा – भुवनमसृजत्, सृष्टं तद्धरयेऽद्यार्थमर्पितवानिति शेषेण योजना । ब्रह्मवैवर्त इत्यनन्तरं यत उक्तमिति शेषः । अस्यातोऽप्संवत्सरसृष्ट्यादे-र्विष्णुलिङ्गत्वसिद्धिरित्यध्याहृतसाध्येनान्वयः ॥

॥ इत्यत्तृत्वाधिकरणम् ॥ २ ॥

---

१. 'रावकरणानन्तरं' – क.

॥ ३. अथ गुहाधिकरणम् ॥

(कर्मफलभोक्तृत्वमेकस्यैव हरेरिति समर्थनम्)

सर्वात्तैकः पर उक्तः ।

'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे ।
छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिनाचिकेताः'
(कठ. १-३-१,) **इति पिबन्तौ प्रतीयेते तौ काविति ॥**

॥ ३. अथ गुहाधिकरणम् ॥

अत्राधिकरणे लोकतोऽन्यत्र प्रसिद्धकर्मफलभोक्तृत्वलिङ्गस्य विष्णौ समन्वयः प्रतिपाद्यते । पूर्वाधिकरणश्रुतिसङ्गतिं विषयवाक्योदाहरणपूर्वकं विषयं[1] सूचयति – **सर्वेति** ॥ यस्मात् **'परः'** परमात्मा **'एकः'** एकत्व-सङ्ख्यायुक्तः **'सर्वात्ता'** सर्वसंहर्ता च, तस्मात् प्रकृतिप्रत्ययार्थयोस्तत्र योगात् सर्वात्तेत्यादिक्रियालिङ्गबोधकशब्दैः वाच्यत्वेनोक्त इत्यर्थः । सर्वात्तेत्युक्तयैव अर्थात् पातेत्यप्युक्त इति भावः । ततः किमित्यत आह – **ऋतमिति** ॥ तत्रेत्यादौ संयोज्यम् ॥

तथा च **'तत्र'** सर्वात्तृत्वमध्ये प्रविष्टं तद्विशेषभूतं पातृत्वं यत्रोक्तं तत्र काठके **'ऋतं पिबन्तौ'** इत्यत्र **'पिबन्तौ'** कर्मफलसारभोक्तारौ द्वौ प्रतीयेते इति योजना । द्विवचनेन द्वित्वबोधादिति भावः । अनेन युक्तमत्तृत्वं भगवतस्तत्र प्रकृतिप्रत्ययार्थयोरुपपत्तेः । इह तु कर्मबन्धविधुरे परमात्मनि प्रकृत्यर्थस्य निर्भेदे प्रत्ययार्थस्य चायोगान्न तस्य द्विवचनान्तपिबच्छब्दवाच्यतेति पूर्व-वैषम्येण प्रत्यवस्थानाद्वा पूर्वमर्थादुक्तस्य पातृत्वस्यान्यमात्रनिष्ठत्वेऽसम्भव-

१. 'विषयं च' – क.

स्यान्यस्मिन्नपि सत्त्वेऽतिव्याप्तेर्वा, आक्षेपाद्वा पूर्वाधिकरणेनास्य सङ्गतिः, पातृत्वाख्यविषयश्च सूचितो भवति ॥

विषयवाक्ये जन्यजनकभावः षष्ठ्यर्थः । तथा च **'सुकृतस्य लोके'** सुकृतनिर्मिते शरीरे तत्त्वप्रदीपरीत्या सुकृतनिमित्ते शरीरे हृदयगुहां प्रविष्टौ गुहायामपि **'परमे'** सर्वजीवोत्तमे, आ ऋद्ध आर्धः । परेभ्यो रुद्रादिभ्य आर्धः परार्धः । तस्मिन्नतिपूर्णे वायाविति शेषः । तथा च तत्र प्रविष्टौ हृदय-गुहाश्रितवाय्वधिष्ठानाविति यावत् । **'स हाऽऽयस्तः पितुरर्धमेयाय'** (छां. ५-३-४.) इति तत्त्वप्रदीपोदाहृतश्रुतेः परब्रह्मावासत्वात् तदन्यजीवाभिमन्य-मानत्वात् परार्धं शरीरमिति वा ॥

'ऋतं सत्यं तथा धर्मः सुकृतं चाभिधीयते ।
ऋतं तु मानसो धर्मः .....॥'

इति गीताभाष्योदाहृतस्मृतेः शास्त्रविहितकर्मभिरागतं फलमुपलक्षणया ऋतमित्युच्यते । तथा च **'ऋतं पिबन्तौ'** भुञ्जानौ यावात्मान्तरात्माख्य-भगवद्रूपविशेषौ वर्तेते तौ **'ब्रह्मविदः'** ब्रह्मज्ञानिनः **'पञ्चाग्नयः'** देवपितृभूत-मनुष्यब्रह्मयज्ञाख्यपञ्चमहायज्ञवन्तः । **'स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः'** इत्यैतरेयोक्तपञ्चमहायज्ञा वा । द्युपर्जन्यधरापुंस्त्र्याख्यपञ्चाग्निविद्यानिष्ठा वा ॥

नचिकेता नाम ऋषिः, नचिकेतस इदं नाचिकेतमग्निचयनविशेषः । त्रिनाचिकेतास्त्रिवारमनुष्ठितनाचिकेतेष्टकाचयनवन्तो[1] ये वर्तन्ते ते विदुषां पापिनां च क्रमेण **'छायातपौ'** सुखदुःखकारणीभूतौ द्वौ वदन्तीत्यर्थः । सुख-दुःखहेतुत्वरूपं गौणं छायातपत्वं च प्रतियोगिभेदादविरुद्धम् । यथोक्तं

१. **'-नाचिकेतेष्टिकायतनवन्तः'** – क. ।

तत्त्वप्रदीपे – अमराणामाह्लादकावसुराणां तापकावित्यर्थ इति । प्रश्नरूप-कार्यद्वारा तन्मूलसन्देहप्रकारं दर्शयति – **'तौ'** श्रुत्युक्तपिबन्ताविति । इति वाक्ये पिबन्तौ यौ प्रतीयेते तौ कावित्यन्वयः । अनेन [१] पिबन्तौ किं जीवपरौ उत पररूपे एवेति संशयः सूचितो भवति । इतीत्यनन्तरम् इति संशये जीवसहित ईश्वरः पातेति पूर्वपक्षे च सतीति वाक्यशेषः ॥

उच्यते [२]-

ॐ ॥ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ॐ ॥ ११ ॥

गुहां प्रविष्टौ पिबन्तौ विष्णुरूपे एव ।

अथ सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे - **उच्यत इति ॥**[३] सूत्रात् परत इतिशब्दोऽध्याहार्यः । गुहां प्रविष्टाविति हेतुगर्भं विशेषणम् । पिबन्तावित्यात्मपदव्याख्यानम् । ऋतमित्यादावध्याहार्यम् । विष्णुरूपे इत्यात्मानावित्यस्य व्याख्यानान्तरम् ॥ तथा च - यावात्मानौ ऋतं पिबन्तौ तावात्मानौ विष्णुरूपे एव । कुतः ? यतो गुहां प्रविष्टाविति योजना । एवेत्यनेनानुवृत्ततुशब्दार्थ उक्तः । विष्णू इति वक्तव्ये विष्णुरूपे एवेत्युक्तिः द्विवचनस्य रूपद्वयविवक्षया सावकाशतोक्त्यर्था ॥

'घर्मा समन्ता त्रिवृतं व्यापतुस्तयोर्जुष्टिं मातरिश्वा जगाम'
(ऋ. १०-११४-१) **इत्यादिना तद्दर्शनात् ॥**

ननु विष्णोः सर्वशरीरेष्वेकैकरूपेणैव प्रवेशात् कथं रूपद्वयाभिप्रायेणापि

---

१. **'पिबन्तौ किं भगवद्रूपविशेषौ, उतान्याविति संशयः । इतीत्यनन्तरम्'** – क.
२. **'तौ कावित्युच्येते'**– ह. ।
३. **'उच्यत इति ॥ सिद्धान्त उच्यते सूत्रकृतेति शेषः । गुहां-'** – क.

द्विवचनोपपत्तिरित्यतः [१]तद्दर्शनादिति सूत्रांशसूचितश्रुतिमुदाहरति – **घर्मेति** ॥ भगवन्ताविति, कर्तुमिति च शेषः । त्रिवृतमित्यावर्तते । तथा च **'घर्मा'** घर्मौ दीप्तौ घर्षकौ [२]सङ्कोचकाविति वा । **'घर्षणात् सर्वलोकस्य नृसिंहो घर्म उच्यते'** इत्यैतरेयभाष्योक्तेः, घृष्टत्वेन घर्षकत्वेन च मिताविति[३] तत्त्वप्रदीपोक्तेश्च । **'समन्ता'** समन्तौ व्याप्तौ [४] प्रकृतिपुरुषकालव्यापिनौ । देशतः कालतः शक्तितश्च सम्पूर्णौ यौ भगवन्तौ त्रिवृतं तेजोबन्नात्मकं शरीरं **'व्यापतुः'** विशेषेणाऽपतुः देहहृदयगुहास्थानं प्राप्तौ । तयोः **'जुष्टिं'** सेवां कर्तुं **'मातरिश्वा'** मुख्यवायुरपि[५] त्रिवृतं जगाम । **'दिवो'** देव्या वायुपत्न्याः स्तन्यं **'पयः'** **'दिधिषाणाः'** पिपासन्तो देवाः द्विरूपं [६]तमेकम् 'अवेषन्' अन्वैच्छन्[७]। तम् 'अर्कम्' अरम् अलं कं रूपं सुखरूपं **'सहसामानं'** सहवायुं विदुरिति श्रुत्यर्थः ॥ गुर्वर्थदीपिकायां तु, समन्तादिति पदच्छेदं[८] कृत्वा विद्यमानाविति चाध्याहृत्य समन्ताद् विद्यमानौ व्याप्ताविति व्याख्यातम् । तच्चिन्त्यम् । **इत्यादिनेति** ॥ वाक्येनेति शेषः ॥

आदिपदेन **'दिवस्पयः'** इत्युत्तरार्धं, तथा-

'एकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे ।
तं पाकेन मनसाऽपश्यमन्तितस्तं माता रेळ्हि स उ रेळ्हि मातरम् ॥
सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति ।'

(ऋ. १०-११४-४., ५.)

---

१. 'प्रवृत्ततद्दर्शनादिति' – क.
२ 'संहारकाविति वा' – क.
३ 'घर्षकत्वेन निमित्तेनेति' – क.
४.'तत्त्वप्रदीपरीत्या प्रकृति-'क.
५ 'त्रिवृतं शरीरम्' – क.
६. 'तमेव' –क
७ 'ऐच्छन्। अथ तं' – क.
८. 'छेदं' – क.

इत्यादिकं च गृह्यते । सः **'एकः सुपर्णः'** सुष्ठु परमानन्दरूपो भगवान् समुद्रमाविवेश । स इदं सर्वं जगत् **'विचष्टे'** पश्यति । **'तं'** परमात्मानं पक्केन मनसा अहमपश्यम् । **'तं माता'** व्यञ्जकत्वाद् वाक् सरस्वती **'रेळ्हि'** लिह्यत इव । स परमात्मा मातरं रेळ्हि । तावन्योन्यं सम्बद्धौ भवतः ॥ तथा च भगवद्व्यञ्जकवाचोऽपि तद्व्यङ्ग्यत्वमिति भावः ॥

तमेव सुपर्णमेकं सन्तं **'विप्राः'** विशेषेण प्रकृष्टाः कवयो ज्ञानिनः **'वचोभिः'** शब्दैः[1] **'बहुधा'** केशवादिद्वादशधा स्थितं कल्पयन्ति चिन्तयन्तीत्यर्थः । **तद्दर्शनादिति** ॥ तस्य विष्णोः द्विरूपतया[2] सर्वशरीरप्रवेशस्योक्तत्वादित्यर्थः । तथा च – एकस्मिन्नपि विष्णौ युक्तं रूपद्वयाभिप्रायेण द्विवचनमिति भावः । एवं तद्दर्शनाद् [3]इत्येतत् तत्त्वप्रदीपरीत्या उक्तविशेषणे निर्णीते विष्णौ द्विवचनदर्शनात् **'एकः सुपर्णः'** इत्यादिना तच्छब्देनैकवचनेन परामर्शदर्शनात् तस्यैव समुद्रनिवेशिनो निखिलभुवनदर्शिनः **'अपश्यमन्तितः'** इति गुहाप्रविष्टत्वदर्शनादेकस्यैव बहुनामरूपदर्शनाद् इत्यपि व्याख्येयम् ॥

'आत्माऽन्तरात्मेति हरिरेक एव द्विधा स्थितः ।
निविष्टो हृदये नित्यं रसं पिबति कर्मजम् ॥'

इति च बृहत्संहितायाम् ।

ननु विष्णौ रूपद्वयविवक्षया प्रत्ययार्थोपपत्तावपि प्रातिपदिकार्थकर्मफलभोक्तृत्वायोगान्न 'ऋतम्' इति वाक्यप्रतिपाद्यत्वं तस्येत्यत आह –

---

१. **'शब्दैरेव' – क. ।**

२. **'तस्य द्विरूपतया' – क.।**

३. **'इत्येतच्छब्देनैकवचनेन परामर्शदर्शनाद् गुहाप्रविष्टत्वदर्शनादेकस्यैव बहुनामरूपदर्शनादित्यपि व्याख्येयम् । तथैव तत्त्वप्रदीपोक्तेः । ननु विष्णौ' क.**

आत्मेति ॥ एक एव हरिः देहजीवरूपोपाधिभेदाद् आत्मान्तरात्मेति रूपभेदेन **'द्विधा स्थितः'** द्विधा भूतः । देहजीवयोर्हृदये निविष्टः । यद्वा – टीकारीत्या उपाधिभेदविवक्षामन्तरेणैव द्विरूपतया देहनिविष्टः **'कर्मजं रसं'** फलं **'नित्यं'** नियमेन **'पिबति'** भुङ्क्ते इत्यर्थः । स्मृत इति पाठे कीर्तितः इत्यर्थः । रसशब्देन जीवाभोग्यगुणभोक्तृवेश्वरः, न तु तद्भोग्यद्रव्यभोक्तेति प्रमेयं सूचितम् । बृहत्संहितायामित्यस्य तद्दर्शनादित्यनुवृत्तवाक्येनान्वयः । कर्मफलभोगस्योक्तत्वादिति तदर्थः । तथा च - न तदनुपपत्तिरिति भावः । न केवलं बृहत्संहितायाम् । किन्तु -

'श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥' *(भ.गी. १५.९.)*

इति गीतास्वपीति चार्थः ॥

'शुभं पिबत्यसौ नित्यं नाशुभं स हरिः पिबेत् ।

पूर्णानन्दमयस्यास्य चेष्टा न ज्ञायते क्वचित् ॥' **इति पाद्मे ॥**

ननु किमीश्वरो दुःखं पापकर्मफलं भुङ्क्ते पुण्यजं सुखं वा ? नाद्यद्वितीयौ, पूर्णानन्दत्वादित्यत आह – **शुभमिति** ॥ **'असौ'** सर्वशरीरगतप्राणे स्थितो **'हरिः'** यज्ञे हविस्स्वीकर्ता[१] पापहर्ता भगवान् **'नित्यं'** नियमेन शुभकर्मफलमेव **'पिबति'** भुङ्क्ते ॥ स हरिरशुभकर्मफलं **'न पिबेत्'** न भुङ्क्ते इत्यर्थः । **'पुण्यमेवामुं गच्छति'** (बृ.३-५-२०) **'परमे परार्धे'** (कठ.३-१) इति श्रुतेः । पिबतीति ऋतपानकर्तर्यद्वितीयत्वमभ्युपैति । अनेनार्थेन[२] द्वितीयपक्षमङ्गीकृत्य आद्यपक्षोऽनभ्युपगमेन परिहृतः ॥

---

१. **'यज्ञहविःस्वीकर्ता'** – क. २. **'अनेनार्धेन'** – क.

पूर्णानन्दस्य[१]सुखभोगायोग इति द्वितीयं[२] दूषणं परिहरति – **पूर्णानन्दमयस्येति** ॥ तादात्म्यार्थे मयट् । **'तादात्म्यार्थे विकारार्थे प्राचुर्यार्थे मयट् त्रिधा'** इति गीताभाष्योक्तेः । तथा च पूर्णानन्दरूपस्यास्य विष्णोः **'चेष्टा'** ऐश्वर्यं क्वचित्काले देशे केनापि साकल्येन **'न ज्ञायते'** न चिन्त्यत इत्यर्थः ॥

तथा च – [३]ऐश्वर्यबलेन पूर्णानन्दस्यापि [४]सुखभोगो युक्त इति भावः । यद्वा - विष्णोर्भोक्तृत्वाभ्युपगमे **'अनश्नन्नन्यः'** (मु.३-१-१) इति श्रुतिविरोध इत्यत आह - **शुभमिति** ॥ [५]पराधीनभोगाभावविषयम् अशुभभोगाभावविषयं वा तद्वाक्यमिति भावः । न च **'नीचोच्चतैव दुःखादेर्भोग इत्यभिधीयते । नासौ नीचोच्चतां याति'** इति वाक्यविरोधः, सुखभोगस्योच्चतारूपत्वादिति वाच्यम् । विष्णौ जीवसमवेते भोगे स्वीकारमात्राभ्युपगमेन[६] उच्चतासम्पादकविक्रियाविशेषानभ्युपगमात्[७] । उक्तं हि तत्त्वप्रदीपे – न च **'अनश्नन्नन्यः'** इति श्रुतिविरोधः । न हि पराधीनतया भोगो, नाप्यप्रियभोगो न च तन्निमित्तोच्चनीचता विष्णोः, किन्तु – जीवसमवेते भोगे स्वीकारमात्रमुच्यत इति । यद्वा – नीचोच्चतासम्पादको भोगः स्वीयतया साक्षात्कारः, स चाभिमानयुतो विवक्षितः, न चासावीश्वरे इति न विरोधः । पाद्म इत्यनन्तरम् उक्तत्वादिति शेषः । तथा च – न श्रुतियुक्तिविरोध इति भावः ॥

'यो वेद निहितं गुहायाम्' *(तै. २-१.)* **इत्यादिना प्रसिद्धं हिशब्देन दर्शयति ॥ ११ ॥**

---

१. **'ननु पूर्णानन्दस्य'** – क
२. **'द्वितीयपक्षे दूषणं'** – क .
३. **'अचिन्त्यैश्वर्यबलेन'** –क.
४. **'सुखभोगोपपत्तिरिति'** क.
५ **'पराधीनाशुभभोगयोरभावविषयं तद्वाक्यमिति भावः'** – क.
६ **'जीवसमवेतभोगस्वीकारमात्राभ्युपगमेन'** – क.
७. **'-विशेषस्यानभ्युपगमात्'** – क.

ननु कथं गुहानिविष्टत्वलिङ्गात् पिबतो विष्णुत्वनिश्चयः, तस्य जीवेऽपि योगादित्यत आह – **यो वेदेति** । विष्णोरेव गुहानिहितत्वमत्र ग्राह्यमिति चोपस्कर्तव्यम्[१] । आदिशब्देन **'आत्माऽन्तरात्मा'** इति **'श्रोत्रं चक्षुः'** इति **'अहं वैश्वानरो भूत्वा'** इत्यादिस्मृतिर्गृह्यते ॥ तथाच इत्यादिना विष्णोरेव प्रसिद्धं गुहानिहितत्वमत्र ग्राह्यमिति इममर्थं[२] सूत्रकारो हिशब्देन दर्शयतीत्यर्थः ॥

[३] तथा च – हृदयगुहास्थत्वमात्रस्य जीवे सम्भवेऽपि न तदिह हेतुत्वेन गृह्यते । किन्तु – श्रुत्यादिप्रसिद्धं मोक्षजनकज्ञानप्रकारीभूतं प्राधान्येन गुहानिहितत्वमेव । तच्च जीवे निरवकाशमिति भावः । सूत्रे समन्वयसूत्रात्[४] तुशब्दमात्रमनुवर्तते । आत्मानावित्यावर्तते । तथा च 'आत्मानौ' आदेयं सुखं मात्यनुभवतीति व्युत्पत्त्या आत्मशब्दोक्तशुभकर्मफलभोक्तारौ 'आत्मानावेव' आत्मान्तरात्माख्ये विष्णुरूपे एव, न तु जीवेश्वरौ । कुतः ? हि यस्मात् तौ हृदयगुहां प्रविष्टौ तस्मात् । न हि जीवेऽपि गुहानिविष्टत्वलिङ्गं सम्भवतीति वाच्यम् । तस्य श्रुत्याद्यप्रसिद्धत्वात् । तत्र प्रसिद्धस्यैव[५] ग्राह्यत्वात् । विष्णोस्तु **'यो वेद'** इति श्रुत्यादिप्रसिद्धत्वादिति हिशब्दार्थः ॥

ननु विष्णौ पिबन्ताविति द्विवचनानुपपत्तिः । न च रूपद्वयाभिप्रायेण तदुपपत्तिरिति वाच्यम् । विष्णोः सर्वशरीरेष्वेकरूपेण प्रवेशेन द्विरूपेण

१. '-निहितत्वमितीति चाध्याहार्यम्' – क.
२. 'तथा च विष्णोरेव गुहानिहितत्वमित्यादिना प्रसिद्धं निश्चितमितीममर्थम्' क.
३ 'तथा च लिङ्गस्य जीवे सम्भवेऽपि तत्परित्यागेन श्रुत्यादिप्रसिद्धप्राधान्येन गुहानिहितत्वमेव ग्राह्यमिति भवत्येव निश्चय इति भावः । सूत्रे' – क.
४. तुशब्दोऽनुवर्तते' – क.
५ .'तत्प्रसिद्धस्यैव' – क

प्रवेशस्या[1]सिद्धत्वादित्याशङ्क्याऽह – **तद्दर्शनादिति** ॥ तस्य हरेर्द्विरूपतया शरीरहृदयगुहास्थत्वस्य लिङ्गस्य दर्शनात् **'धर्मा'** इति श्रुत्युक्तत्वादिति[2] सूत्रार्थः ॥

अत्र तत्त्वित्यस्यानुवृत्त्या[3] श्रौतपदानुवृत्त्या च आनन्दमयस्तद्ब्रह्मेत्यादिवदिहापि प्रतिज्ञासिद्धेरात्मानावित्युक्तिः । श्रौतद्विवचनस्य गतिमाह – **आत्मेति** ॥ स्मृतिसमाख्यां श्रौतपदानुवृत्तिं विना आदेयं मातीति व्युत्पत्त्या शुभकर्मफलभोक्तृत्वरूपलिङ्गं च वक्तुम् । उक्तं हि चन्द्रिकायाम् – आदेयं मातीति व्युत्पत्त्या आत्मशब्दोक्तं शुभभोक्तृत्वं मूलयुक्तिरिति ॥

न चैवमृतपातृत्वसमानाधिकरणगुहाप्रविष्टत्वोक्तिद्वारा तदुक्तिरिति तद्वाक्यान्तरविरोधः शङ्क्यः । तस्य सूत्रेऽवश्यवक्तव्यगुहाप्रविष्टत्वलिङ्गार्पकद्विवचनान्तपदान्वययोग्यतादृशविशेष्योक्तिमुखेनेत्यर्थाभ्युपगमात् । तथा – यद्यपि समन्वेतव्यमृतपातृत्वं साक्षादेव वक्तव्यमिति तद्वाक्यान्तरस्याप्यादेयं मातीति व्युत्पत्तिमन्तरेणान्तर्यामीतिवद् ऋतं पिबन्ताविति स्पष्टशब्देनैव वक्तव्यम् । न त्वात्मशब्देनेत्यर्थाश्रयणान्न विरोधः । अन्यथोक्तवाक्यविरोधापातात् । एवं चात्र केषाञ्चिदन्यथा चन्द्रिकाभिप्रायकथनम्, तथा तेषामेव समन्वयसूत्रात् तदित्यत्राप्यनुवर्तत इति चन्द्रिकाविरोधोक्तिरपि चिन्त्या ॥

सौत्रद्विवचनोपपत्त्यर्थम् उद्देश्यसमर्पणार्थं चावश्यवक्तव्यात्मानाविति पदेनैव विधेयस्यापि बोधनसम्भवेनेतरव्यावर्तकावधारणार्थकतुशब्दमात्रस्यैव वेक्षतिसूत्र इव वाऽत्रानुवृत्त्यौचित्यात् । न च तदित्यनुक्तौ तुशब्दस्यान्वयः प्रत्येतुं शक्यते इति समन्वयाधिकरणीयसुधाविरोधः । उद्देश्यविधेयपदान्तराभाव इत्याशयात् ॥

---

१. 'प्रवेशस्याप्रसिद्धत्वात्' – क.

२. 'श्रुत्युक्तत्वात् प्रसिद्धत्वादिति'– क.

३. 'ताबित्यस्यानुवृत्त्या श्रौतपदस्यानुवृत्तस्य वा' – क.

सू - ॐ ॥ विशेषणाच्च ॥ ॐ ॥ १२ ॥

'यः सेतुरीजानानामक्षरं ब्रह्म तत् परम्' *(कठ. १-३-२.)* **इति ॥**

एवं यदा निरवकाशगुहानिहितत्वलिङ्गस्य [१]सावकाशाद् द्विवचन-श्रुतितोऽपि प्राबल्याद् विष्णोः प्रकृत्यर्थभोक्तृत्वसम्भवाच्च स एव पातेति सिद्ध्यति । [२]किमु पुनर्निरवकाशश्रुत्याऽपीत्यर्थं प्रतिपादयत्सूत्रं पठित्वा तदभिप्रेतश्रुतिमेवोदाहरति - **विशेषणाच्चेति** ॥ इति विशेषणादित्यन्वयः । सूत्रे पिबतोरिति विपरिणामेनानुवर्तते । चो युक्तिसमुच्चये ॥

तथा च **'यः सेतुः'** इति श्रुतौ पिबतोरेकवचनबोध्येनैकत्वेन [३]विशेषणादेक एव पाता । स च यजमानसेतुत्वब्रह्मत्वाक्षरत्वादिना विशेषणाद् ब्रह्मणश्च परत्वेन विशेषणाद् विष्णुरेव, न जीव इति सूत्रार्थः । न केवलं लिङ्गात्, किन्तु सेत्वादिश्रुतितोऽपीति चार्थः ॥

'यः' आत्मान्तरात्माख्यो द्विरूपो भगवान् **'ईजानानां'** विष्णुमुद्दिश्य यागं कुर्वाणानां **'सेतुः'** आश्रयो यदक्षरं परं ब्रह्म, तं ध्यातुं नचिकेतसं प्रति साधनं वक्तुं **'शकेमहि'**[४] शक्ताः स्म इति काठकश्रुत्यर्थः ॥

'पृथग् वक्तुं गुणास्तस्य न शक्यन्तेऽमितत्वतः ।
यतोऽतो ब्रह्मशब्देन सर्वेषां ग्रहणं भवेत् ॥'[५]
एतस्माद् ब्रह्मशब्दोऽयं विष्णोरेव विशेषणम् ।
अमिता हि गुणा यस्मान्नान्येषां तमृते विभुम्' ॥ इति ब्राह्मे ॥

ब्रह्मशब्दस्य भगवदेकवाचित्वं स्मारयति – **पृथगिति** ॥ अत्र यत

---

१. 'सावकाशद्विवचनश्रुतितोऽपि' – क. २. 'किं पुनः' – क.
३. 'विशेषणाद् एवमीजानसेतुत्व-' – क. ४. 'शकेमसि' – क.
५. 'सर्वेषां वचनं भवेत्' ह. ।

इत्यावर्तते । तथा च यतः 'तस्य' विष्णोर्गुणाः **'अमितत्वतः'** असङ्ख्यातत्वतो निमित्तात् **'पृथक्'** विविच्य वक्तुं न शक्यन्ते । ज्ञातव्याश्च सर्वैरधिकारिभिः सर्वे गुणा इति शेषः । यतो[१] ब्रह्मशब्देन सर्वेषां गुणानां 'ग्रहणं' ज्ञानं भवेद् अतः सर्वगुणज्ञानार्थं तस्मिन् विष्णौ ब्रह्मशब्दः प्रयुज्यत इति शेषः । यतो ब्रह्मशब्देन सर्वेषां गुणानां ग्रहणं भवेत् । एवं च सर्वगुणवाची ब्रह्मशब्दो भवति, तत्र वृत्तिमन्तरेण तज्ज्ञानजनकत्वायोगादिति भावः । यस्माद् विभुं तं विष्णुमृते अन्येषां जीवानां नामिता गुणाः, किन्तु – विष्णोरेव[२] प्रमाणसिद्धम्, एतस्मात् कारणादयं ब्रह्मशब्दो विष्णोरेव 'विशेषणं' मुख्यवाचको नान्येषामित्यर्थः । ब्राह्म इत्यनन्तरं ब्रह्मशब्दस्य भगवदेकवाचित्वमुक्तमिति शेषः ॥

न च जीवे समन्वयोऽभिधीयते ।

अत्र परैः पिबन्तौ बुद्धिजीवाविति[३] पूर्वपक्षे प्राप्ते जीवेश्वरावेवेति व्याख्यातं, तन्निराकरोति – **न चेति** ॥ अत्रेति शेषः । अस्मिन्नध्याये इति तदर्थः । हेतौ[४] स्वव्याख्यनेन सह परव्याख्याननिराकरणस्य समुच्चये वा चशब्दः[५] तथा चासङ्गतिरिति भावः ॥

'सत्य आत्मा सत्यो जीव सत्यं भिदा सत्यं भिदा सत्यं भिदा,
मैवाऽरुवण्यो मैवाऽरुवण्यो मैवाऽरुवण्यः ॥' इति पैङ्गिश्रुतिः[६] ।

ननु नात्र जीवे समन्वयकथनमसङ्गतम् । जीवेश्वरभेदस्यासत्यत्वेन

---

१. 'यतश्च' – क.
२ .'विष्णोरेव हीत्यत्रार्थे प्रमाणप्रसिद्धिं सूचयति । एतस्मात्' – क
३ .'बुद्धिजीवाविति प्राप्ते' – क. ४. 'चशब्दो हेतौ'– क.
५. अयं क.पाठे नास्ति । ६. 'पैङ्गिश्रुतेः' - ह. ।

तयोरैक्यात् । जीवसमन्वयस्यैव ब्रह्मसमन्वयरूपत्वादित्यत आह – [१]**सत्य इति** ॥ 'सत्यं' सत्या 'भिदा' भेदः । यद्यप्यत्राऽत्मजीवयोः सत्यत्ववचनेनैव तत्स्वरूपभेदस्यापि सत्यत्वमुक्तं भवति । तथाऽपि पुनः **'सत्यं भिदा'** इत्युक्तिर्दर्शनप्रतीताभेद[२]प्रतीतिनिरासतात्पर्यार्था शपथावृत्तिः ॥

केचिद् भेदमसत्यमाहुः । तत् कथमेतदित्यतस्तेषां पक्षे श्रुतिरभीक्ष्णं दूषणमभिधत्ते - **मैवेति** ॥ **'आरुवण्यः'** अरा दोषास्तद्वन्तः, आसमन्तादरशीला वा आरवः तैरसत्यभेदज्ञानिभिः[३] विष्णुः सर्वथा वन्यो भजनीयो नेत्यर्थः । इति पैङ्गिश्रुतिरित्यनन्तरं यत इति शेषः । अस्य नासत्यो भेद इत्युत्तरेणान्वयः । एवं भाल्लवेयश्रुतिरित्यस्यापि ॥

अत्र यद्यपि भागवततात्पर्ये – **'सत्यत्वं च भेदस्योक्तं भाल्लवेयश्रुतौ । स्थाणुर्होच्चक्राम स प्रजापतिमुवाच कोऽसि के स्मः कः स इति । स होवाच [४]योऽस्मि ये स्थ यः स इति ।' अथैनमुपाक्रोशत् सत्यं भिदा सत्यं भिदा सत्यं भिदा'** इत्यादिना **'सत्यम्'** इति वाक्यं भाल्लवेयश्रुत्यन्तर्गततया पठ्यते । भाष्यपुस्तकेऽपि क्वचित्[५] **'सत्यम्'** इति वाक्यम् **'आत्मा हि'** इति वाक्यं च भाल्लवेयश्रुतित्वेन पठ्यते । न तु श्रुतिद्वयस्थत्वेन । तथाऽपि अनयोस्तात्पर्यानुसारेणैकश्रुतिस्थत्वं, बहुतरपाठबलात् **'सत्य आत्मा'** इति पैङ्गिश्रुतिः । **'आत्मा हि'** इति भाल्लवेयश्रुतिः । तात्पर्योदाहृता त्वन्या तत्समाख्यारूपा चेत्यदोषः [६] ॥

'स्थाणुः' रुद्रः **'उच्चक्राम'** ऊर्ध्वं जगाम । **'सः'** रुद्रः **'प्रजापतिं'** ब्रह्माणम्

---

१. 'सत्यमिति' – क.

२ '-प्रतीताभेदनिरासार्था । तत्र तात्पर्यार्था शपथावृत्तिः' – क.

३. 'सत्यभेदाज्ञानिभिः' – क.

४. 'योऽसि' – क.

५. 'क्वचित् क्वचित्' – क.

६. 'वेत्यदोषः' – क.

[१]उपाक्रोशदुवाच । किमिति ? त्वं **'कः'** कीदृशः । वयं **'के'** कीदृशाः । सः विष्णुः**'कः'** कीदृशः । किं भिन्न उताभिन्न इत्याशयः । क्रमेणोत्तरमाह – अहं **'यः'** यादृशोऽग्रे सर्वदा तादृशोऽस्मि । यूयं **'ये'** यादृशाः तादृशाः स्थ । **'सः'** विष्णुर्यादृशो मया भवदादिभिश्च भिन्नस्तादृश एवेति श्रुत्यर्थः ॥

'आत्मा हि परमः स्वतन्त्रोऽधिगुणो जीवोऽल्पशक्तिरस्वतन्त्रोऽवरः' इति च भाल्लवेयश्रुतिः ।

अत्रोक्तभेदसाधकप्रमाणत्वेन विरुद्धगुणोपन्यासाय **'आत्मा'** इति द्वितीयवाक्यं प्रवृत्तम् । **'आत्मा'** परमात्मा **'परमः'** स्वतन्त्रः । **'अधिगुणः'** पूर्णशक्तिः । अत एवोत्तरत्र परमत्वस्वतन्त्रत्वपूर्णशक्तित्वविरुद्धानां धर्माणाम् अल्पशक्तिरित्यादिपदैर्व्युत्क्रमेणाभिधानं कृतम् ॥

'यथेश्वरस्य जीवस्य भेदः सत्यो विनिश्चयात् ।
एवमेव हि मे वाचं सत्यां कर्तुमिहार्हसि ॥', *(पद्मपुराणम्)*

'यथेश्वरश्च जीवश्च सत्यभेदौ परस्परम् ।
तेन सत्येन मां देवास्त्रायन्तु सहकेशवाः॥' *(स्कान्दपुराणम्)*

इत्यादेर्नासत्यो भेदः ॥ १२ ॥

॥ इति गुहाधिकरणम् ॥ ३ ॥

अत्रैवार्थे पुराणवाक्ये पठति – **यथेति** ॥ अत्र षष्ठ्यन्तं वाक्यं पाद्मस्थं, प्रथमान्तं स्कान्दगतमिति तत्त्वप्रदीपोक्तेः । **'मे माम्'** इत्याभ्यां तत्प्रकृतो ग्राह्यः । **'विनिश्चयात्'** एवार्थोऽयं शब्दः ॥

सत्यभेदाविति बहुव्रीहिः । यथा सत्यभेदौ तथैव विद्यमाननतिक्रमेण

---

१. **'उपागम्याक्रोशत्'** – क.

ज्ञातेन[१] **'सत्येन'** सत्यभेदेन भेदसत्यत्वज्ञानाख्यकारणेनेति यावत् । **'सह-केशवाः'** इत्येकं पदं, [२]केशवसहिता देवाः **'त्रायन्तु'** अस्मान् रक्षन्त्वित्यर्थः । इत्यादेर्वाक्यान्नासत्यो भेदः, किन्तु - सत्य एवेति ज्ञायत इत्यर्थः ॥

अत्र पूर्ववाक्ये जीवेशभेदस्य दृष्टान्तत्वेनोपादानात् प्रामाणिकत्वं ज्ञायते, तादृशस्यैव दृष्टान्तत्वात् । द्वितीये तु विषयानतिक्रमेण भेदसत्यत्वज्ञानस्य त्राणकारणत्वोक्त्या भेदसत्यत्वमपि[३] ज्ञायत इति प्रकृतसङ्गतिः ॥

[४]आदिपदेन ग्राह्यवचनानि तत्त्वप्रदीपे उदाहृतानि । तथाहि -

'द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥
असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ॥ इत्यारभ्य –

'तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥' *इति भगवद्वचनम्।*

(भ.गी. १६-६,१९.)

'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
त आसुराः स्वयं नष्टाः जगतः क्षयकारिणः ॥' *इति व्यासस्मृतिः ।*

---

१. **'ज्ञातेन तेन'** – क. २. **'तथा च केशव-'** क.
३ **'सत्यत्वमपि'** – क.
४. इतः परमादिपदग्राह्यतया एतद्ग्रहाधिकरणसमाप्तिपर्यन्तमुदाहृतानि तत्त्वप्रदीपोदाहृतप्रमाणवचनानि क. पुस्तकपाठे न सन्ति । तत्र 'प्रकृतसङ्गतिः' इत्यव्यवहितोत्तरमन्तराधिकरणमेव प्रारभ्यते ।

'इन्द्रासोमा तपतं रक्ष उज्जतं न्यर्पयतं वृषणा तमोवृधः ।

पराशृणीतमचितो न्योषतं हतं नुदेथां निशिशीतमत्रिणः ॥'

(ऋ.७-१०४-१.)

'इन्द्रासोमा वर्तयतं दिवस्पर्यग्नितप्तेभिर्युवमश्महन्मभिः ।

तपुर्वधेभिरजरेभिरत्रिणः' *(ऋ. ७-१०४-५.)* इत्यादिका श्रुतिः ।

'येषां भिज्जगदीश्वरजीवानां नास्ति तेऽत्रिणः ।

स्वाज्ञानकल्पितजगत्परमेश्वरस्य जीवस्य भेदकलुषीकृतभूमभावे ।'

(इति हि मायिनो वदन्ति ।)

'आच्छाद्य विक्षिपति संस्फुरदात्मतत्त्वम् ।

जीवेश्वरस्य जगदाकृति तन्मृषैव ॥' इत्यादि च ।

'त्रिर्यातुधानः प्रसितिं तयेत्वृतं यो अग्ने अनृतेन हन्ति ॥'

(ऋ. १०-८७११.)

'वाचा स्तेनं शरव ऋच्छन्तु मर्मन् विश्वस्यैतु प्रसितिं यातुधानः ।'

(ऋ.१०-८७-१५.)

'अथ ज्ञानोपसर्गाः' इत्यारभ्य 'ये चान्ये मिथ्यातर्कैर्दृष्टान्तैः कुहकेन्द्रजालैर्वैदिकेषु परिस्थातुमिच्छन्ति तैः सह न संवसेत् । प्रकाश्या ह्येते तस्करा अस्वर्ग्याः' *(मैत्री. ७-८)* इत्यादिश्रुतिशतैरन्धं तम एव मायिनां गतिरिति निश्चीयते ॥

तथा च स्कान्दे -

'सर्वब्रह्मत्ववेत्तारो जीवब्रह्मत्ववेदिनः ।

अन्यसाम्यविदो विष्णोः विष्णुद्वेष्टार एव च ।

सर्वे यान्ति तमो घोरं न तेषामुत्थितिः क्वचित् ॥' इति ॥

॥ इति गुहाधिकरणम् ॥ ३ ॥

॥ ४. अथ अन्तराधिकरणम् ॥

(चक्षुरन्तःस्थो विष्णुरेव)

आदित्ये विष्णुरित्युक्तम् ।

'य एष आदित्ये पुरुषः सोऽहमस्मि स एवाहमस्मि'

(छां. ४-११.) **इत्यादावग्नीनामेवाऽदित्यादिस्थत्वमुच्यते ।**

॥ ४. अथान्तराधिकरणम् ॥

अत्राधिकरणे चक्षुरन्तःस्थत्वलिङ्गं ब्रह्मणि समन्वीयते । श्रुत्यादिसङ्गतिं विषयवाक्यं विषयसंशयौ सयुक्तिकं पूर्वपक्षं च दर्शयति – **आदित्य इति ॥** **'यश्चासावादित्ये'** इत्यानन्दमयाधिकरणोदाहृतायां तथा **'अन्तरादित्ये'** इत्यन्तर्नयोदाहृतायां च श्रुतावानन्दमयो[1]ऽन्तस्स्थो विष्णुरादित्येऽस्तीत्युक्तमित्यर्थः । ततः किमित्यत आह – **य इति ॥** तदित्यादौ संयोज्यम् । **'सोऽहं स एवाहम्'** इत्यभ्यासोपन्यासः पूर्वपक्षयुक्तिप्रदर्शनार्थः । प्रथमादिपदेन **'अथैनमन्वाहार्यपचनोऽनुशशास । य एष चन्द्रमसि पुरुषो दृश्यते । सोऽहमस्मि स एवाहमस्मि । अथैनमाहवनीयोऽनुशशास । य एष विद्युति पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मि'** इति च वाक्यद्वयं गृह्यते । द्वितीयादिपदेन चन्द्रविद्युत्स्थत्वम् ॥

यद्यपि आदित्यस्थत्वस्येव चन्द्रविद्युत्स्थत्वयोरग्नेरक्षिस्थत्वसाधकत्वाभावात् तदुपादानं न प्रकृतोपयुक्तम्[2]। तथाऽग्नीनामिति बहुवचनं चानुपयुक्तम्, पूर्वपक्षे गार्हपत्यस्यैवाक्षिस्थत्वसाधनेन गार्हपत्यादीनां त्रयाणां तस्यासाधनात्। चन्द्रविद्युतोरक्ष्येकविधत्वाभावेन तत्स्थत्वस्याक्षिस्थत्वासाधकत्वाच्च ।

---

१. 'आनन्दमयाख्यः' – क. २. 'तदुपादानं प्रकृतानुपयुक्तम्' – क.

तथाऽपि आदिशब्दद्वयं बहुवचनं च पूर्वपक्षे गार्हपत्यादिबह्वग्निश्रुति-रूपयुक्तिसूचनार्थम् । यथा अन्वाहार्यपचनाख्यदक्षिणाग्न्याहवनीययोः चन्द्र-विद्युत्स्थत्वमुच्यते, एवं गार्हपत्यस्यापि आदित्यस्थत्वमुच्यत इति दृष्टान्तार्थं[१] गार्हपत्यादीनां त्रयाणां क्रमेणाऽदित्यादित्रितयस्थत्वे[२] प्रसिद्ध-गार्हपत्यस्यैवाऽदित्यस्थत्वमुखेनाक्षिस्थत्वमागच्छतीति युक्तिप्रदर्शनार्थं वा तदुपादानमिति[३] न वैयर्थ्यमिति ध्येयम् ॥

अतोऽक्ष्यादित्ययोरैक्यात् 'य एषोऽन्तरक्षिणि पुरुषो दृश्यते' *(छां. ४-१५.)* **इत्यत्राप्यग्निरेवोच्यते ।**

ततोऽपि किमित्यत आह – **अत इति** ॥ अस्य, न सन्निहितेन **'ऐक्यात्'** इत्यनेनान्वयः । प्रकृतस्य अत इत्यनेन परामृष्टस्याऽदित्या-न्तःस्थत्वस्य ऐक्ये हेतुत्वायोगात् । किन्तु व्यवहितेन **'अत्राप्यग्निरेवोच्यते'** इत्यनेनान्वयः । न केवलमादित्यवाक्य इत्यपेरर्थः ॥

तथाच – यदानन्दमयाख्यविष्णुनिष्ठतयोक्तमादित्यस्थत्वं तच्छान्दोग्ये[४] **'य एष आदित्ये पुरुषः सोऽहमस्मि'** [५] इत्यादावग्नीनां गार्हपत्याख्याग्नेरेव **'उच्यते'** प्रतीयते न विष्णोः । कुतः ? यतोऽत्र **'अग्नीनां'** गार्हपत्यदक्षिणा-ग्न्याहवनीयानां त्रयाणां क्रमेणाऽदित्यादिस्थत्वमुच्यते, अतः । ततः किम् ? यतोऽत्र गार्हपत्याख्याग्नेरेवाऽदित्यस्थत्वमुच्यतेऽतो **'य एषोऽन्तरक्षिणि पुरुषो दृश्यते'** इति वाक्येऽप्यक्षिस्थत्वेन गार्हपत्याग्निरेवोच्यते, [६]न स विष्णुः । श्रुति-गताहंशब्देनापि स एवोच्यते इति योजना । तथा च पूर्वपक्षश्रुतिगताहंशब्दोऽ-

---

१. **'दृष्टान्तार्थं वा'** – क.
२. **'-त्रितयस्थत्वेन'**-क.
३. **'प्रयुक्तमिति'** – क.
४. **'तच्छन्दोगे'** – क.
५. **'सोऽहमस्मि स एवाहमस्मि'** – क.
६. **'न विष्णुः'** – क.

ग्रावेव मुख्य इति तस्यैव[१] ग्रहणमिति भावः । [२]नन्वग्नेरादित्यस्थत्वेऽपि कुतोऽक्षिस्थत्वप्राप्तिरित्यत आह – **अक्ष्यादित्ययोरिति** ॥ **'आदित्य-श्चक्षुर्भूत्वाऽक्षिणी प्राविशत्'** इत्यैतरेयश्रुतेरचेतनाक्ष्यादित्यमण्डलयोरादित्य-चक्षुःपदोदितैकचेतनाधिष्ठितत्व[३]रूपैकधर्मेणैकविधत्वादित्यर्थः ॥

यद्वा - **'अशनयोदाहृतादित्यस्त्रिवृदिव[४] वै चक्षुः शुक्लं कृष्णं कनीनिका[५]** इति श्रुत्यनुसारेण [६]तयोस्त्रिवृत्त्वधर्मेणैकविधत्वादित्यर्थः । तथा च – आदित्यस्थत्वोक्तावर्थादक्षिस्थत्वमपि प्राप्तमेवेति भावः । यद्यपि **'स यश्चायम्'** इति पूर्वोदाहृततैत्तिरीयश्रुतिस्थादित्यशब्दः उत्कृष्टचेतनमात्रोप-लक्षकतया व्याख्यातः । तथाऽप्यत्राधिकरणे सूर्याभिमन्यमानादित्यमण्डल-परत्वमप्यस्याङ्गीकृत्य आक्षेपपरिहारौ कृतौ [७] । अत एव टीकायामक्ष्यादि-त्ययो[८]रेकविधत्वाद्युक्तम् । तत्त्वप्रदीपे तु – अक्षीन्द्रियप्रेरकादित्ययोरेक-त्वादिति यथाश्रुतमेव व्याख्यातम् ॥

चन्द्रिकायामपि तत्त्वप्रदीपानुसारेण देवतापरमेवाक्षिपदम् । अत एव भाष्ये सन्न्यायरत्नावल्यां चाक्ष्यादित्ययोरैक्यादित्येवोक्तम्, न त्वेकविध-त्वादिति । अक्ष्यादित्ययोरेकविधत्वादिति टीकाऽपि भाष्यानुसारेण प्रकारभेदनिषेधमुखेन प्रकार्यैक्यपरा नेयेति पक्षान्तरमप्युक्तम् । तथा च – देवतापरत्वे **'आदित्ये विष्णुरित्युक्तम्'** इति [९]भाष्यश्रुतिस्थाक्ष्यादित्यपदयोश्च

१. 'तेन तस्यैव' – क.। २. 'नन्वग्नीनाम्' – क.
३. रूपेणैकधर्मेणैकत्वात्' – क. ४. त्रिवृत् त्रिवृदिव' क.
४. 'कनीनका' – क. ६. 'जडयोः' – क.।
७. 'प्रवृत्तौ' – क. ८. '-दित्ययोरैक्यादेकविधत्वात्' क.
९ 'भाष्यस्य यथाश्रुत एवार्थः । श्रुतिस्थाक्ष्यादित्यपदयोर्मण्डलपरत्वे चैतद्भा-ष्यस्थादित्यपदं-' – क.

यथाश्रुत एवार्थः । मण्डलपरत्वे तद्भाष्यस्थादित्यपदं पूर्वोदाहृततैत्तिरीय-श्रुतिस्थादित्यपदं च मण्डलपरतया व्याख्येयमिति विवेकः ॥

अनेन छन्दोगश्रुत्युक्ताक्षिस्थत्वस्यान्यनिष्ठत्वाक्षेपमुखेनाऽनन्दमयनयो-दाहृतायां तैत्तिरीयश्रुतावर्थादुक्तस्यापि तस्यान्यनिष्ठत्वाक्षेपादानन्दमयाधि-करणेनास्याऽक्षेपिकी सङ्गतिरुक्ता भवति ॥

अक्षिस्थत्वं विषयः । किमग्नेर्विष्णोर्वेति सन्देहः । अग्नीनामेवाक्षि-स्थत्वमिति पूर्वः पक्षः । [1]अत्राऽदित्यस्थत्वरूपयुक्तिश्चोक्ता भवति । अत्र, **'य एष आदित्ये पुरुषः' 'य एषोऽन्तरक्षिणि**[2] **पुरुषः'** इत्यनयोर्वाक्ययोः **'आदित्यश्चक्षुर्भूत्वा'** इति वाक्यद्वारा एकार्थत्वमुपपाद्य तन्मुखेन **'य एष आदित्ये'** इति वाक्येन **'यश्चासावादित्ये'** इति वाक्यस्य सङ्गतिं सम्पाद्य तद्द्वाराऽर्थाक्षिप्ततदर्थार्थकस्य **'य एषोऽन्तरक्षिणि'**[3] इति वाक्यस्यापि तेन सङ्गतिरित्येवं वक्रसङ्गत्यैतदधिकरणारम्भ आदित्यस्थत्वलिङ्गस्यापि समन्वय-सिद्ध्यर्थम् । अन्यथा **'नेतरोऽनुपपत्तेः'** इत्यादौ विष्णुज्ञानान्मोक्ष इत्युक्तम्, स मोक्षः **'तद्यथा'** इति वाक्येन **'य एषोऽन्तरक्षिणि** [4]' इत्युक्ताक्षिस्थज्ञानात् प्रतीयत इति वक्ष्यमाणऋजुसङ्गत्यैवाधिकरणमारम्भणीयं स्यादिति ध्येयम् ॥

अतः -'तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते' *(छां. ४-१४.)* **इत्यग्निज्ञानादेव सर्वपापाश्लेषान्मोक्षोपपत्तिरिति ।**

न केवलमक्षिस्थत्वसिद्धावग्नेरानन्दमयत्वप्राप्तिः । किन्तु यत्पूर्वं **'नेतरः'** इत्यादौ विष्णुज्ञानान्मोक्ष इत्युक्तं, तदपि बाधितं स्यादित्यत[5] आह – **अत**

---

१. 'तत्र' – क. २,३,४ .'अन्तरक्षणि' – क .

५. 'इत्याह' – क.

इति ॥ **'अग्निज्ञानादित्येतत्' 'सर्वपापाश्लेषात्'** इत्यनेनेव **'मोक्षः'** इत्यनेनापि सम्बध्यते । तथा च यतोऽग्निरक्षिस्थोऽतस्तज्ज्ञानादेव मोक्षोऽपि भवेत् न विष्णुज्ञानात् । कुत एतत् ? अक्षिस्थाग्निज्ञानात्[१] सर्वपापाश्लेषात् । न च तस्यासिद्धिः । **'तद्यथा'** इति[२] तदर्थवादेऽग्निज्ञानादेव सर्वपापाश्लेषोक्तेः । न च तज्ज्ञानात् सर्वपापाश्लेषमात्रेण कथं मोक्ष इति वाच्यम् । यतस्तज्ज्ञानान्मोक्षं विना सर्वपापाश्लेषासम्भवेन तदन्यथानुपपत्त्यैव मोक्षस्याप्युपपत्तिरिति योजना । एवं च पूर्वपक्षे अग्नेरक्षिस्थत्वेन **'तद्यथा'** इत्यक्षिस्थस्योक्तं मुक्तिहेतुज्ञानविषयत्वमपि तस्यैव प्राप्नोतीति **'नेतरः'** इत्युक्तमयुक्तमिति भावः । अनेन ऋजुसङ्गतिरप्यस्य दर्शिता भवति ॥

छान्दोग्ये हीत्थमाख्यायिका – (छां.४-१-५) कमलायनस्यापत्यं कामलायनः नामतः[३] उपकोसलः सत्यकामाख्ये गुरौ ब्रह्मचर्यमुद्दिश्योवास । स आचार्यस्याग्नीन् गार्हपत्यादीन् द्वादशवर्षपर्यन्तं पर्यचारीत् । सत्यकामस्त्वन्तेवासिनः[४] स्वाध्यायं ग्राहयन् एनमेकमेव नाध्यापयत् । पुनः स्वजाययोक्तोऽपि[५] अनुत्तैव विद्यां प्रवासाय प्रातिष्ठत । तदोपकोसलो व्याधिपीडितो विद्याप्राप्तिचिन्तया[६] स्वाचार्यभार्ययाऽशानेत्युक्तोऽपि नाश्नात् । एवं ब्रह्मचारिण्यनश्नति तूष्णीम्भूते सति तदा गार्हपत्याद्यग्नयः [७]कारुण्याविष्टाः त्रयोऽपि वयमस्मै ब्रह्मचारिणे विद्यां, प्रब्रुवामेति प्रतिज्ञाय मिलिताः सन्तो विद्यामूचुः । **'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म'** इत्यादि ॥

एवं सम्भूयोपदेशानन्तरमेनं प्रत्येकम्[८] अग्नय उपदिदिशुरित्युच्यते

---

१. **'अक्षिस्थज्ञानात्'** – क.
२. **'इत्यर्थवादे'** – क.
३. **'नाम'** – क.
४. **'अन्यान् अन्तेवासिनः'** -क.।
५. **'स्वजाययाऽग्निभिश्च'** क.
६. **'विद्याऽप्राप्तिचिन्तया'** – क.
७. **'करुणाविष्टाः'** – क.
८. **प्रत्येकं प्रत्येकम्'** – क

वेदपुरुषेण[१] **'अथ हैनं गार्हपत्योऽनुशशास ..... य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मि'** इत्यादिना । एवं त्रिभिरग्निभिः प्रत्येकमुपदिष्ट उपकोसलः अथास्माभिरुक्तं ज्ञेयमेव, नोपास्यम्, तत्तु त्वदाचार्य आगत्य वक्ष्यतीति[२] तैरुक्तोऽभूत् । एवं स्थितेऽथाऽचार्यः सत्यकाम आजगाम । आगत्य चोपकोसलोक्तं श्रुत्वा प्रत्युवाच । किमिति ? यदग्निभिस्तुभ्यमुपदिष्टं तत्[३] त्वया ज्ञेयमेव न तूपास्यं, तत्त्वमहमुपदेक्ष्ये इत्येवं प्रतिज्ञायाऽदरजननाय वक्ष्यमाणमस्तौत् **'यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते'** इति ॥

एवं स्तुत्वोपकोसलाय विद्यामुपादिशत् सत्यकामः । किमिति ? **'य एषोऽन्तरक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच । एतदमृतमेतदभयमेतद् ब्रह्मेति'** । अथ सम्भूयोपदेशानन्तरं एनमुपकोसलं गार्हपत्योऽनुशशास । किमिति ? पृथिव्यग्न्याख्यं ब्रह्मेति ॥

एवं व्याप्तविद्यामुक्त्वाऽन्तर्यामिविद्यामाह – **य इति** ॥ [४]अस्य सोऽहमस्मीत्यस्य द्विकर्तृकत्वाद् गार्हपत्याद्यन्तर्यामी भगवान् स्वस्याऽदित्याद्यन्तर्यामिणा गार्हपत्यादिः स्वान्तर्यामिणः आदित्याद्यन्तर्यामिणा ऐक्यमाहेत्युच्यते । तथा च – अहेयत्वात् प्रत्यक्त्वाच्चाहं मदन्तर्यामी । आदित्ये च एष पुरुषः पूर्णषड्गुणो भगवान् दृश्यते दिव्यदृष्ट्या सोऽस्मीत्यर्थः। आदित्यस्थस्य विष्णोर्मदन्तर्यामिणश्च विदुरधर्मादिवदभेदमात्रं न ; किन्तु विशेषाभावश्चेत्याह- **स एवेति** ॥

एवमुपासकस्य फलमाह – **'स एतदेवं विद्वानुपास्तेऽपहते पापकृत्यां**

---

१. '-पुरुषेण त्रिभिः पर्वभिः'– क.
२. 'वक्तीति'–क.
३. 'लोकाख्यं तत्' – क.
४. 'अत्र'– क.

लोकी भवति सर्वमायुरेति ज्योग् जीवतीति'। **'पापकृत्यां'** पापकार्यं **'लोकी'** भगवल्लोकी भवति । **'सर्वं'** सम्पूर्णं चाऽयुः प्राप्नोति । **'ज्योक्'** सर्वज्ञः सन् जीवतीति । एवं **'य एष चन्द्रमसि' 'य एष विद्युति'** इत्यनयोः अर्थोऽवगन्तव्यः ॥

'तत्' तत्रार्थे वक्ष्यमाणदृष्टान्तो यथा **'पुष्करपलाशे'** पद्मपत्रे आपो यथा **'न श्लिष्यन्ते'** न सज्जन्ते **'तथैवंविदि'** वक्ष्यमाणाक्षिस्थत्वेन ब्रह्मापरोक्ष-ज्ञानिनि ज्ञानोत्तरं पापं कर्म न श्लिष्यत इत्यर्थः । य एषोऽक्षिण्यन्तःपुरुषो दृश्यते दिव्यदृष्ट्या एष आत्मा वामनाख्य इति होवाच उपकोसलं प्रति सत्यकामः । **'एतदमृतं'** स्वतो मृतिशून्यं नित्यमुक्तं, **'एतदभयं'** स्वतो भयशून्यं **'एतद् ब्रह्म'** गुणपूर्णमिति सिद्धान्तरीत्या श्रुत्यर्थः । पूर्वपक्षी त्वेतत्प्रकरणमग्निपरं मन्यते ॥

अतोऽब्रवीत् –

सू – ॐ ॥ अन्तर उपपत्तेः ॥ ॐ ॥ १३॥

चक्षुरन्तस्स्थो विष्णुरेव ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे – **अत इति** ॥ इति सङ्गतिसम्भवात् शङ्कासद्भावाच्च । अतः तत्परिहाराय उत्तरमब्रवीत् सूत्रकार इत्यर्थः । चक्षुरन्तःस्थ इत्यनेन अन्तर इत्यंशो विष्णुरेवेत्यनेन अनुवृत्तस्तत्त्वित्यंशश्च व्याख्यातः । यद्यपि अनुव्याख्याने [१]शब्दवैयर्थ्यपरिहाराय **'अन्तस्स्थित्वा रमणकृत्'** इति व्याख्यानाद् अत्रापि तदनुसारेण रमणकृच्चेति[२] वक्तव्यम् । तथाऽप्यत्र रमणक्रियाबोधकात्मशब्दस्य हेतूकरणान्न तदर्थस्य

१. . 'रशब्दवैय्यर्थ्य-' – क. २.'इत्यपि' – क.।

प्रतिज्ञायामन्वयः सम्भवतीति अन्तःस्थ इत्येवोक्तम् । तत्र त्वात्मशब्दार्थस्य हेतुत्वाविवक्षणात् साध्यान्वयो न युज्यत इति रमणकृदित्यप्युक्तम् ॥

वस्तुतस्तु –सूत्रे अन्तरित्यनुक्त्वा अन्तर इत्यधिकोक्तेः सार्थक्यायात्रापि रंमणकृच्चेत्यपि उपलक्षणया वाच्यम् । अवयवार्थविवक्षाऽविवक्षाभ्याम् आत्मशब्दस्य साध्यसमर्पकताहेतुत्वं च युज्यत इति ध्येयम् ॥

'त्रिपादस्यामृतं दिवि' *(ऋ. १०-९०-३,)*
इत्यादिना तस्यैवामृतत्वाद्युपपत्तेः ।

उपपत्तेरित्येतदनेकलिङ्गपरतया लिङ्गानां निरवकाशत्वोक्तिपरतया च व्याचष्टे – **त्रिपादिति** ॥ इत्यादिना वाक्येन[१]उक्तस्येति शेषः । तस्येति विपरिणतं पदमावर्तते । अमृतत्वादित्येतदिहापि षष्ठ्यन्ततया[२] बुद्ध्या विविक्तं सम्बध्यते । प्रथमेनाऽदिपदेन **'अभयं तितीर्षतां पारम्'** (कठ.उ.३-२) **'अमृतैवैषा देवता'** **'आत्माऽजरोऽमृतो[३]ऽभयो ब्रह्म'** (बृ.६-४-२५) इत्यादिवाक्यं द्वितीयेनाभयत्वादिकं गृह्यते । तथा च [४] – त्रिपादित्यादिना श्रुत्यन्तरवाक्येन[५] तस्य विष्णोरेव उक्तस्य **'एतदमृतम्'** इति वाक्येऽन्तःस्थ-निष्ठत्वेनोक्तस्यामृतत्वा[६]द्युपपत्तेर्लिङ्गस्य तस्मिन् विष्णावेव उपपत्तेर्युक्तत्वा-दन्यत्रायुक्तत्वादिति योजना । अनेन लिङ्गस्य निरवकाशत्वानेकत्वाभ्यां प्राबल्यमुक्तं भवति ॥

'अमृतं' मृतिहरितं **'यदभयं'** भयरहितं यच्च **'तितीर्षतां'** संसारतरणेच्छूनां

---

१. **'अवगतस्येति'-क.** २. **'तृतीयान्ततया'– क**
३. **'अमरोऽमृतः'– क** ४. **'तथाचात्र'– क.**
५. **'समाख्यावाक्येनामृतत्वादिना रूपेणावगतस्य विष्णोरेव तस्यैतदमृतम्'–क.**
६. **'अमृतत्वादेर्लिङ्गस्योपपत्तेर्युक्तत्वादन्यस्यायुक्तत्वादिति योजना'– क.**

'पारं' संसारस्य पारस्थं तदुत्तरावधिभूते श्वेतद्वीपादौ स्थितं मुक्तप्राप्यं परं ब्रह्म तद् ध्यातुं साधनं वक्तुं वयं **'शकेमहि'** शक्ताः स्म इति कठश्रुत्यर्थः ॥

ब्रह्मशब्दाद्युपपत्तेश्च ।[१]

[२]यदैवं निरवकाशत्वानेकत्वाभ्यां बलवल्लिङ्गबलाच्चक्षुरन्तःस्थस्य[३] विष्णुत्वनिश्चयः, किमु तदोभयथा[४] स्वभावनिरवकाशत्वाभ्याम् अनेकत्वाच्च बलवच्छ्रुतितोऽपीति भावेन सौत्रमुपपत्तेरित्यंशं [५]ब्रह्मादिश्रुतिरूपहेत्वन्तर-परतया तस्य प्राबल्योपयोगिनिरवकाशत्वोपपादनपरतया च प्रकारान्तरेण व्याचष्टे – **ब्रह्मेति** ॥ आदिपदेनाऽत्मशब्दो गृह्यते । [६]ब्रह्मात्मादीति पाठे आदिशब्देन पुरुषशब्दो ग्राह्यः । अत्र श्रुतेत्यादौ संयोज्यम् । तस्यैवेत्यनु-षज्यते । तथा च – अत्रान्तःस्थप्रकरणे[७] श्रुतब्रह्मशब्दादेस्तस्य विष्णोरेवो-पपत्तेरन्यस्यानुपपत्तेरित्यर्थः। गुणपूर्तिवाचिब्रह्मशब्दस्य विष्णावेव मुख्यत्वा-दात्मशब्दस्यापि आदेयमुपादेयं सुखं मात्यनुभवतीति व्युत्पत्त्या तत्रैव मुख्यत्वादिति भावः ॥

अनेन **'य एषोऽन्तरक्षिणि'** इति श्रुत्युक्तोऽन्तरः तत्तु तत्तज्जीवप्रेरकत्वेन तत्तच्चक्षुरन्तस्स्थितो विष्णुरेव, न त्वग्निः । कुतः ? उपपत्तेः । अत्र **'एतदमृतमभयमेतद् ब्रह्मैष आत्मा'** इत्यमृतत्वाभयत्वादिलिङ्गश्रवणाद् ब्रह्मादिशब्दश्रुतेश्च तेषां च विष्णावेवोपपत्तेः, अन्यत्रानुपपत्तेरिति सूत्रार्थ उक्तो भवति ॥

---

१. 'ब्रह्मात्मशब्दाद्युपपत्तेः' ह. ।
२. 'यदेवं' – क.
३. 'बलवल्लिङ्गवच्चक्षुरन्तःस्थस्य' – क
४. 'किमुतोभयथा'–क.
५. 'ब्रह्मात्मादि-' क.
६. 'ब्रह्मादि-' क.
७. 'अन्तःस्थे श्रुत-' क.

'सोऽहमस्मि' इत्यादि त्वन्तर्याम्यपेक्षया ।
'अन्तर्यामिणमीशेशमपेक्ष्याहं त्वमित्यपि ।
सर्वे शब्दाः[१] प्रयुज्यन्ते सति भेदेऽपि वस्तुषु ॥'
इति महाकौर्मे॥[२]

ननु निरवकाशश्रुतिलिङ्गबलाद् यदि विष्णुरेव अक्षिस्थस्तदाऽऽदित्यस्थोऽपि स एव स्यात् । तर्हि **'सोऽहमस्मि स एवाहमस्मि'** इत्यहमादिश्रुतेः का गतिरित्यत आह – **सोऽहमस्मीत्यादीति** ॥ आदिपदेन[३] गार्हपत्यादिशब्दानां ग्रहणम् । तथा च इत्यादिवाक्यस्थमहमादिपदजातमित्यर्थः । अपेक्षयेत्यनन्तरं प्रवृत्तमिति शेषः ॥

अन्तर्यामिणि अहमादिशब्दप्रवृत्तिं स्मारयति– **अन्तर्यामिणमिति** ॥ आद्योऽपिः[४] समुच्चये । द्वितीयो यद्यपि तथाऽपीत्यर्थे । ईशानां ब्रह्मादीनाम् ईशमित्यन्तर्यामित्वोपपादकम् । तथा च – **'वस्तुषु'** अग्न्यादिजीवेषु ईशाद् भेदे सत्यपि तदभेदबोधकोऽहमितिशब्दः त्वमितिशब्दः । किं बहुनाऽभेदसाधकाः सर्वे तत्तच्छब्दाः प्रयुज्यन्ते । [५]कथम् ? यतोऽन्तर्यामिणमपेक्ष्यैवैते शब्दाः प्रयुज्यन्ते । नैतावताऽग्न्यादिजीवानां ईशाभेदः शङ्क्यः । यतः सोऽन्तर्यामी ईशेशो ब्रह्माद्युत्तम इत्यर्थः । महाकौर्मे इत्यस्य उक्तत्वादित्यध्याहारेण सोऽहमिति पूर्ववाक्येनान्वयः ॥

---

१. 'सर्वशब्दाः' ह. २.. 'कौर्मे' ह.
३. 'आदिपदेनाभ्यासार्थवादयोर्ग्रहणम् । यद्वा' – क. ४. 'अत्रापिः' – क. ।
५. 'नैतावताऽभेदो मन्तव्यः । कुतः ? यतः 'ईशेशमन्तर्यामिणं विष्णुं मुख्यतो वाच्यमपेक्ष्यैव' – क.

सू - ॐ ॥ स्थानादिव्यपदेशाच्च ॥ ॐ ॥ १४ ॥

'तद्यदस्मिन् सर्पिर्वोदकं वा सिञ्चति
वर्त्मनी एव गच्छति' *(छां.४-१५.)* **इत्यादिस्थानशक्तिः ।**

[1]वामनिर्भामनिरित्याद्यात्मशक्तिश्चोच्यते । तस्य ह्येतल्लिङ्गम् ।

युक्त्यन्तरेण विष्णोश्चक्षुरन्तःस्थत्वं साधयत्सूत्रमुपन्यस्य व्याचष्टे – **स्थानादीति ॥** सर्पिरित्यतः पूर्वं **'तद्यदस्मिन्'** इति श्रुतिवाक्यपाठः । तत्त्वप्रदीपे तु – **'यदिदं चक्षुषि'** इति पाठभेदेन पूर्ववाक्यमुदाहृतम् । इत्यादीति लुप्तविभक्तिकम् । इत्यादावित्यर्थः । एवमुत्तरत्रापि । आदिपदेन **'वर्त्मनी एव गच्छति'** इत्यादेर्ग्रहणम् ॥

स्थानशक्तिरिति ॥ [2]ब्रह्मस्थानभूतयोरक्ष्णोरक्षिस्थपरमपुरुषसम्बन्धादसङ्ग-त्वाख्यशक्तिरित्यर्थः । उच्यत इत्यत्रापि सम्बध्यते । अनेन सौत्रं स्थानपदं परमात्मस्थानशक्त्युपलक्षकतया व्याख्यातम् । उच्यते इत्यनेनासिद्धि-परिहारकव्यपदेशशब्दार्थो दर्शितः ॥

आदिपदेन **'एतं संयद्वाम इत्याचक्षते । एतं हि सर्वाणि वामान्यभिसंयन्ति . . एष उ एव वामनिरेष हि सर्वाणि वामानि नयति । एष उ एव भामनिरेष हि सर्वेषु लोकेषु भाति'** इति समग्रवाक्यं गृह्यते । **आत्मशक्तिरिति ॥** संयद्वामत्वरूपात्मसामर्थ्यमित्यर्थः । अनेन सौत्रादिशब्दो ह्यधिष्ठातृपरमात्मपरः सन् तच्छक्त्युपलक्षक इति व्याख्यातो भवति । चो हेतुसमुच्चये शक्तिसमुच्चये चाऽद्यो भिन्नक्रमः । उच्यते यत इति शेषः ।

---

१. **'भामनिर्वामनिः'** - ह ।
२. **'ब्रह्मणः स्थानभूतयोः'** – क. ।

अस्यातोऽपि चक्षुरन्तःस्थो विष्णुरेवेति पूर्वप्रतिज्ञावाक्येनान्वयः । यस्मादसङ्गोऽयं पुरुषोऽक्षिणि विद्यते नियामकतया तत् तस्माद्यदि **'अस्मिन्'** चक्षुषि **'सर्पिः'** घृतमुदकं वा **'सिञ्चति'** सिञ्चेत् कश्चिदपि तर्हि तद्वर्त्मनी उभयमार्गौ प्रत्येव गच्छति न चक्षुः स्पृशतीत्यर्थः ॥

एतं चाक्षुषं वामनाख्यं विष्णुं [1]संयद्वाम इत्याचक्षते विद्वांसः । कुतः ? हि यस्माद् एतं **'सर्वाणि वामानि'** स्त्रीरूपाणि अभिसंयन्ति प्राप्नुवन्ति । अनेन संयन्ति वामानि एनमिति[2] विग्रहो दर्शितः । **'एष उ'** चक्षुर्गत एव मुख्यतो वामनिरित्युच्यते । कुतः ? हि यस्मादेषः **'सर्वाणि वामानि'** सुन्दररमादिस्त्रीरूपाणि **'नयति'** प्रेरयति । एष उ एव चाक्षुषः पुरुषो **'भामनिः'** मुख्यतः तच्छब्दवाच्यः । कुतः ? हि यस्मादेव **'सर्वेषु लोकेषु'** पुरुषेषु भाति तदीयतेजःप्रकाशकतया तत्र दीप्यत इत्यर्थः । यथोक्तं तत्त्वप्रदीपे – वामं सौन्दर्यं, भामं तेजः, तत्प्रधानत्वात् स्त्रीपुरुषा वामभामशब्दितास्तन्नेता वामनिर्भामनिश्चेति ॥

एतल्लिङ्गद्वयसद्भावेऽपि कुतोऽक्षिस्थस्य विष्णुत्वनिश्चय इत्यत आह – **तस्येति ॥ 'हि'** यस्मात् **'तस्य'** विष्णोः **'एतत्'** स्वसम्बन्धेन[3] अक्ष्णोरसङ्गत्वापादकत्वं सर्वसौन्दर्याधिष्ठानस्त्रीरूपनेतृत्वं च **'लिङ्गं'** असाधारणो धर्मः तस्मान्नाप्रयोजकत्वमिति तेन विष्णुत्वनिश्चयोपपत्तिरिति वाक्यशेषः ॥

'स ईशः सोऽसपत्नः स हरिः सः परः स परोवरीयान् यदिदं चक्षुषि सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति स वामनः

---

१. 'संयद्वामम्' – क. २. 'यमिति' – क.

३. 'एतत्सम्बन्धेन' – क.

स भामनः[१] स आनन्दः सोऽच्युतः' इ
ति चतुर्वेदशिखायाम् ॥[२]

कुत एतस्य तल्लिङ्गमिति ज्ञायते इत्यत आह – **स इति** ॥ लिङ्गस्य विष्णुनिष्ठताज्ञापनाय **'स हरिः'** इत्यादेः **'सोऽच्युतः'** इत्यंशस्य चोक्तिः । इदंचक्षुषीति समस्तं पदम् । अन्यथा सर्पिरादिविशेषणत्वं प्रतीयते[३] , ततश्च प्रत्यक्षसिद्धगोळकविशेषणत्वं न ज्ञायेत[४] । अस्मिन् चक्षुषीत्येतत्प्रकरण-गतश्रुतिविसंवादश्च स्यात् । चेत्तर्ह्योरध्याहारः[५] ॥

तथा च – यद् यस्मात् सन्निहिताधिष्ठातुः यस्य सामर्थ्यादिति यावत्[६] । **'इदंचक्षुषि'** अस्मिंश्चक्षुषि सर्पिरुदकं वा सिञ्चति चेत् कश्चित् तर्हि तद्वर्त्मनी प्रत्येव गच्छति स ईशः **'सोऽसपत्नः'** शत्रुरहितः । **'स परः'** लोकविलक्षणः । [७]परोवरीयान् । इदमेकं पदम्[८] । रुद्रादेः[९] परतो वाण्याः पराच्चतुर्मुखात् परतः श्रीतत्वाद् वर उत्तमः । स एव वामनभामनानन्दाच्युतशब्दवाच्य इत्यर्थः । विधेयानेकत्वात् स इत्यसकृदावृत्तिः ॥

परोवरीयानित्यत्रापि तच्छब्दोऽनुषञ्जनीयः । एकदेशविकृतस्यानन्य-त्वाद् वामनिभामनिशब्दार्थ एव वामनभामनशब्दयोरर्थः । चतुर्वेद-शिखायामित्यनन्तरम् उक्तत्वादिति शेषः । अस्य तस्यैतल्लिङ्गमिति ज्ञायत इति पूर्वेणान्वयः ॥

---

१. 'स भामनः स वामनः' ह. ।
२. 'इति हि चतुर्वेदशिखायाम्' .ह
३. 'प्रतीयेत' – क.
४. 'प्रतीयेत' – क.
५. 'चेत्तर्हीति च शेषः' – क.
६. 'इदं चक्षुष्मत् चक्षुषि' – क.
७. 'स परोवरीयान्' – क. ।
८. क. पाठे वाक्यमिदं नास्ति ।
९. 'परतो रुद्रादेर्वराद् ब्रह्मादेः पराच्छ्रीतत्वादुत्तमः' – क.

'यत्स्थानत्वादिदं चक्षुरसङ्गं सर्ववस्तुभिः ।
स वामनः परोऽस्माकं गतिरित्येव चिन्तयेत् [१]॥ '

इति वामने[२] ॥ १४ ॥

लिङ्गस्वरूपस्य तस्य विष्णुरूपव्यक्तिविशेषनिष्ठतायाश्च श्रुतावस्फुटत्वात् तदर्थमत्रार्थे स्मृतिं चाऽह – **यदिति** ॥ यस्य स्थानत्वादित्यर्थः। अस्य यच्छब्दस्य स इति तच्छब्देनान्वयः । **'सर्ववस्तुभिः'** सर्पिरादिभिः । **'वामनः'** सुन्दरस्त्रीनेता वामनाख्यो विष्णुरेव **'अस्माकं'** भक्तानां **'परः'** परा **'गतिः'** प्राप्य इति चिन्तयेदित्यर्थः । यद्वा – वामन इत्यनेन प्राप्तात्पत्वशङ्कावारणाय **'परः'** पूर्ण इत्युक्तम् । **वामन इति** ॥ वामनाख्यपुराण इत्यर्थः । अस्य चतुर्वेदशिखायामितिवदन्वयः । स्पष्टः सूत्रार्थः ॥

सू–ॐ ॥ सुखविशिष्टाभिधानादेव च ॥ ॐ ॥१५॥

'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति' *(छां. ४-१०.)*

प्रकरणबलाच्चक्षुरन्तःस्थत्वं विष्णोः प्रतिपादयत्सूत्रमुपन्यस्य तदुपात्तश्रुतिमेवोदाहरति – **सुखेति** ॥ **'खं ब्रह्मेति'** इत्यन्तस्य[३] सूत्रेणान्वयः । उपक्रमे प्राणस्य श्रुतत्वेऽपि नैतत्प्रकरणस्य तत्परत्वम्, पूर्वसूत्रोक्त-विष्णुश्रुतिलिङ्गादिबाधकसद्भावादिति प्रतिपादयितुम् उत्तरत्र श्रौतकर्मशब्देन[४] प्राणब्रह्मणोस्तन्त्रेणोपादानात् [५]सूचनार्थं च **'प्राणो ब्रह्म'** इत्यंशोदाहरणम् । सूत्रे चशब्दः पूर्वोक्तहेतोरिह प्रकरणबलाच्चेत्यध्याहृतहेतोश्च समुच्चये । [६]सूत्रोदाहृतहेतोस्त्वध्याहृतसाध्येनान्वयः । विशिष्टं च तत्सुखं च

१. 'चिन्तय' ह.
२. 'इति च वामने' ह.
३. 'इत्येतस्य' – क.
४. 'सौत्रकशब्देन' – क.
५. 'उपादानसूचनार्थं' – क.
६. 'सूत्रोपात्तहेतोः' – क.

सुखविशिष्टम् । विशेषणस्य परनिपातः । सुखेन विशिष्ट इति वा, सुखेषु विशिष्ट इति वा विग्रहः । तत्र द्वितीये श्रैष्ठ्यरूपं वैशिष्ट्यमर्थात् सुखेऽप्यन्वेति । [1]अत्र प्रकरणे हि मुख्यप्राणो ब्रह्माखिलजीवेभ्यः पूर्ण इति मुख्यप्राणस्य पूर्णत्वमुक्त्वा **'कं ब्रह्म खं ब्रह्म'** [2]इत्यनेन **'कं'** सुखं **'ब्रह्म'** पूर्णं **'खं'** ज्ञानं ब्रह्म पूर्णमिति सुखसंविदोरपि पूर्णत्वमुच्यते । तथा च न केवलमुक्तहेतुबलाच्चक्षुरन्तःस्थो विष्णुः, किन्तु – प्रकरणबलाच्च । न च प्रकरणस्य वैष्णवत्वासिद्धिः । अस्योपक्रमे **'सुखविशिष्टाभिधानात्'** पूर्णसुखोक्तेरिति सूत्रार्थः । यदैवमुपक्रमे 'कं ब्रह्म' इति पूर्णसुखाभिधानादेवास्य प्रकरणस्य वैष्णवत्वं सिद्ध्यति किमुत तदा **'खं ब्रह्म'** इति पूर्णज्ञानादपीति कैमुत्यन्यायसूचनाय सूत्रे एवकारः । यद्यपि छान्दोग्यभाष्ये **'प्राणो ब्रह्म'** बलरूपं ब्रह्म । **'कं'** पूर्णानन्दरूपं ब्रह्म । **'खं'** पूर्णज्ञानरूपं **'ब्रह्म'** परं ब्रह्मेति व्याख्यातम् । तथाऽपि तद्ब्रह्मशब्दस्य परापरयो रूढ्या वृत्त्या[3] व्याख्यानान्तरमित्यदोषः ॥

'विज्ञानमानन्दं ब्रह्म' *(बृ. ५-९-२८.)*

'आनन्दो ब्रह्मेति व्यजानात्' *(तै. ३-६.)*

इत्यादेस्तस्यैव हि तल्लक्षणम् । [4]

ननूपक्रमे पूर्णसुखसंविदोरभिधानेऽपि कुतोऽस्य प्रकरणस्य वैष्णवत्वमित्याशङ्क्य [5]तयोस्तल्लक्षणत्वात् तद्रूपत्वाद् उपक्रमे तदभिधाने ब्रह्मैवोपक्रान्तं स्यादिति भावेन पूर्णसुखज्ञानयोर्ब्रह्मलक्षणत्वं श्रुत्या दर्शयति – **विज्ञानमिति ॥** विज्ञानादिरूपं ब्रह्मेत्यर्थः । अत्र विज्ञानादिपदं

---

१. 'अत्रोपक्रमे हि' – क.
२. 'इत्यादिना' – क.
३. .'रूढिमाश्रित्य' – क.
४. 'तस्यैव तल्लक्षणम्' ह.।
५. .'पूर्णसुखज्ञानयोर्ब्रह्मलक्षणत्वं-' – क.

पूर्णज्ञानादिवाचि, सङ्कोचे कारणाभावादिति [१]प्रकृतसङ्गतिः । इदं वाजसनेये श्रुतम् । **'आनन्दो ब्रह्म'** इति । तैत्तिरीयवाक्यादिति शेषः । आदिशब्देन **'अथैष एव परम आनन्दः'** **'सत्यं ज्ञानम्'** इत्यादिकं गृह्यते । तथा च इत्यादेर्वाक्यात्[२] **'तस्य'** ब्रह्मणः **'तत्'** पूर्णानन्दादिकं **'लक्षणं'** स्वलक्षणं [३] ज्ञायत इत्यर्थः । तथा च - श्रुत्यन्तरे ब्रह्मलक्षणत्वेनावगतयोः पूर्णज्ञान-सुखयोरत्र प्रकरणेऽभिधानाद् अस्य वैष्णवत्वसिद्धिरिति भावः ॥

'लक्षणं परमानन्दो विष्णोरेव न संशयः ।
अव्यक्तादितृणान्तास्तु विप्रुडानन्दभागिनः [४]॥'

इति ब्रह्मवैवर्ते ।

ननु सकलचेतनानामपि पूर्णानन्दत्वात् कथमेतद्विष्णुलक्षणमित्यत आह - **लक्षणमिति** ॥ स्वरूपधर्मोभयार्थकोऽयम् । **'परमानन्दः'** निरवधिक-पूर्णानन्द एव[५] लक्षणम् । इह लक्षणत्वेनाभिप्रेतः न पूर्णानन्दमात्रम् [६]। स च विष्णोरेव नान्येषाम् । अन्येषां त्वापेक्षिकमेव[७] पूर्णं सुखं[८] न विष्णुवन्निरवधिकं पूर्णमित्यर्थः[९] । कुत इत्यत आह - **यतोऽव्यक्तादीति** ॥ अव्यक्ता श्रीः सैवाऽदिर्येषां ते तथोक्ताः । एवं तृणजीवा मनुष्योत्तमा एवान्ते येषां ते तथोक्ताः । अव्यक्तादयश्च ते तृणान्ताश्चेति कर्मधारयः । तुशब्दो विशेषार्थः ॥

---

१. 'सङ्कोचकाभावादिति'– क. २. 'इत्यादिवाक्यात्' – क.
३. 'स्वलक्षणमिति' – क. ४. 'विप्रुडानन्दभागिनः' ह. ।
५. एवेह' – क.
६. 'लक्षणं लक्षणत्वेन बोध्यः । न त्वानन्दमात्रम् ' – क.
७. 'चापेक्षिकमेव' –क. ८. 'पूर्णसुखम्' – क.
९. 'निरवधिकपूर्णम् । कुतः' – क.

'विप्रुडानन्दभागिनः'[१] तारतम्येन [२] ब्रह्मानन्दप्रतिबिम्बत्वापेक्षिकानन्द-युक्ता इत्यर्थः । चेतना इति शेषः । 'न संशयः' इत्यस्यार्थस्य सावधारण-त्वमाह । ब्रह्मवैवर्त इत्यस्योक्तत्वादित्यध्याहारेण 'तस्यैव तल्लक्षणम्' इति सावधारणपूर्ववाक्येनान्वयः ॥

न च मुख्ये सत्यमुख्यं युज्यते ॥ १५ ॥

नन्वग्र्यादिसुखस्यापेक्षिकतयाऽपि पूर्णत्वसद्भावात् तेषां पूर्णसुखमिदं किं न स्यात् । तथा तेषां तल्लक्षणं किं न स्यात् । तथा तेषामेवेदं प्रकरणं किं न स्याद् इत्यत आह – **न चेति ॥ 'मुख्ये'** निरवधिकपूर्णत्वे **'कं ब्रह्म'** इति श्रुत्यर्थतया तल्लक्षणे [३] सम्भवति सति 'अमुख्यम्' आपेक्षिकमन्याधीनं पूर्णत्वं न युज्यत इत्यर्थः ॥

सू –ॐ ॥ श्रुतोपनिषत्कगत्यभिधानाच्च ॥ ॐ ॥ १६ ॥

'स एनान् ब्रह्म गमयति' *(छां. ४-१५)* **इति ।**

नन्वेतदुपक्रमे [४]सुखज्ञानयोरभिधानेऽपि नाक्षिस्थप्रकरणस्य वैष्णवत्वं युक्तम् । [५]छान्दोग्ये **'प्राणो ब्रह्म कम्'** इति विद्यां **'य एष आदित्ये पुरुषः'** इति विद्यां चोक्त्वाऽग्निभिरुपकोसलं प्रति **'उपकोसलैषा सोम्य तेऽस्मद्विद्या चाऽत्मविद्या चोक्ता'** इत्युक्तत्वेन **'कम्'** इत्याद्यविद्याया विष्णुविषयत्वस्य **'य एषः'** इति द्वितीयायाश्चाग्निविषयत्वस्यैव युक्तत्वात् । न च **'अस्मद्विद्या'** इत्युक्तादित्यविद्याया अग्निविषयत्वेऽपि नाक्षिस्थविद्यायास्तद्युक्तमिति

---

१. 'विप्रुडानन्दभागिनः'– क
२ 'ब्रह्मानन्दप्रतिबिम्बापेक्षिका-' – क.
३ . 'क्षणे'–क.
४ .'पूर्णसुखज्ञानयोः' – क.
५. 'छन्दोगे' – क.

वाच्यम् । **'य एषोऽन्तरक्षिणि'** इत्यक्षिस्थविद्याया आदित्यविद्ययैकार्थत्वात् ॥

न चोपक्रमविरोधः । यथा **'ह्वयाम्यग्निं प्रथमं स्वस्तये'** इत्यत्राग्नेरुपक्रमेऽपि **'सवितारमूतये' 'हिरण्ययेन सविता रथेन'** इत्यादिसवितृश्रुतिलिङ्गादिना तत्प्रकरणं सावित्रमिति प्रकरणविच्छेदः, तथाऽत्रापि ब्रह्मण उपक्रमेऽपि[१] **'अस्मद्विद्या'** इत्यग्नेरस्मच्छब्देनोक्तत्वादग्नीनामेवेदं प्रकरणं न विष्णोः । न च **'अस्मद्विद्या'** इत्येतदन्तर्यामिपरतया योज्यम् । तथा सति **'आत्मविद्या'** इति पृथगुक्त्ययोगात् । तस्मादग्निविषयत्वमेव चक्षुरन्तःस्थविद्याया इत्याशङ्कां परिहरत्सूत्रं पठित्वा तदुपात्तश्रुतिमेवोदाहरति – **श्रुतेति ॥**

[२]इतीत्यस्य सूत्रेणान्वयः । अत्र सूत्रे श्रुतेत्युपलक्षणं, मतध्यातेत्यपि द्रष्टव्यम् । केति वायुरुच्यते [३] । **'को वायुरिति शब्दितः'** इति अभिधानात् । कशब्दस्याऽवृत्त्या गतिरित्यनेनापि सम्बन्धे कगतिरिति परब्रह्मगतिरुच्यते । **'कं ब्रह्म'** इति वाक्यबोधितपरब्रह्मप्रकरणादेतदर्थनिश्चयात् । तथा च – श्रुतोपनिषदां श्रुतमतध्यातैतद्विद्यानां पुंसां केन वायुना [४]कगतेः **'कं ब्रह्म'** इति वाक्यबोधितब्रह्मप्राप्तेः **'स एनान् ब्रह्म गमयति'** इत्युपसंहारेऽभिधानाद् विष्णुविषयैवाक्षिस्थविद्या, न त्वग्निविषयेति सूत्रार्थः ॥

यद्वा – श्रुतोपनिषदमुपकोसलं प्रत्यग्निभिरेतद्विद्याफलत्वेन ब्रह्मगत्यभिधानाद् वैष्णवमेवेदं प्रकरणं, नत्वग्निविषयमित्यर्थः । तत्त्वप्रदीपे तु – **'स एनान् ब्रह्म गमयति'** इति श्रुतोपनिषत्कानां श्रुतोपनिषद्गतोपासनानां

---

१. **'अत्रापि प्रकरणे ब्रह्मलक्षणोपक्रमेऽपि'** – क
२. **'इतीत्यन्तस्य'** –क.
३. **'केति परब्रह्मवायू तन्त्रेणोक्तौ । तथा च श्रुतोपनिषदाम्'** – क.
४. **'कस्य परब्रह्मणो गतेः प्राप्तेः 'स एनान्-'** – क.

ब्रह्मगत्यभिधानाच्च आन्तरो विष्णुरेव । अस्यामुपनिषीदति ब्रह्मेत्युपनिषत् उपासना । अनया ब्रह्म उपनिषीदतीति वेत्युक्तम् । श्रुतविषयिणी या उपनिषत् मतिध्यानरूपोपासना तत्कानां तद्गतं तद्विषयकं ध्यानरूपोपासनं तद्वतामित्यर्थः । अनेन उपनिषच्छब्दो मतिध्यानरूपोपासनापरः । ब्रह्मेत्यनेन बहुव्रीहिसमासावयवभूतः कशब्द आवृत्तो ब्रह्मवाचक इत्युक्तं भवति । अत एवाऽह टीकाकृत् – श्रुतपदं मननिदिध्यासनयोरुपलक्षकमित्यादिना । तत्त्वप्रदीपपक्षे – उपनिषच्छब्द उपासनापरः । टीकाकृत्पक्षे विद्यापरः । टीकायां वाशब्दश्चार्थः[1] ॥

यद्यप्यस्य सूत्रस्य प्रकरणविच्छेदाशङ्कापरिहारायोपसंहारस्थलिङ्गोक्ति-परत्वेन [2]परमसाध्ये युक्त्यन्तरप्रतिपादकत्वाभावादत्र चशब्दो[3] न प्रयोज्यः । तथाऽपि **'स एनान् ब्रह्म'** इत्युपसंहारस्थस्यैतद्विद्यावेत्तॄणां ब्रह्मप्राप्ति-रूपलिङ्गस्य चक्षुरन्तरो विष्णुरेवेति परमसाध्येऽपि साक्षादन्वयादस्य च लिङ्गस्य आद्यसूत्रोक्तामृतत्व[4]लिङ्गापेक्षयोत्तरवाक्यस्थद्वितीयसूत्रोक्तलिङ्गा-पेक्षया तृतीयसूत्रोक्तप्रकरणापेक्षया युक्त्यन्तरत्वात् तद्विवक्षया सूत्रे चशब्द-प्रयोगोपपत्तिरिति केचिदाहुः ॥

वस्तुतस्तु – अत्र प्रकरणविच्छेदाशङ्कापरिहारेऽपि पूर्वसूत्रेऽत्र चैतत्प्रकरणस्य वैष्णवत्वरूपाध्याहृतावान्तरसाध्यस्यैकत्वेन तत्रानेन युक्त्यन्तराभिधानाच्चशब्दोपपत्तिः ॥

'अथ यदु चैवास्मिञ्छव्यं कर्म कुर्वन्ति यदि[5] च नार्चिषमेवा-

१. 'तत्त्वप्रदीपे तु – 'स एनान्' इत्यारभ्य 'चार्थः'
इत्यन्तो भागः क.पाठे नास्ति ।

२. 'परमसाध्ययुक्त्यन्तर-' – क.

३. '-भावाच्चशब्दः' – क.

४. 'अमृतत्वादि-' – क.

५. 'यदु' क.

वाच्यम् । **'य एषोऽन्तरक्षिणि'** इत्यक्षिस्थविद्याया आदित्यविद्ययैकार्थत्वात् ॥

न चोपक्रमविरोधः । यथा **'ह्वयाम्यग्निं प्रथमं स्वस्तये'** इत्यत्राग्नेरुपक्रमेऽपि **'सवितारमूतये' 'हिरण्ययेन सविता रथेन'** इत्यादिसवितृश्रुतिलिङ्गादिना तत्प्रकरणं सावित्रमिति प्रकरणविच्छेदः, तथाऽत्रापि ब्रह्मण उपक्रमेऽपि[१] **'अस्मद्विद्या'** इत्यग्नेरस्मच्छब्देनोक्तत्वादग्नीनामेवेदं प्रकरणं न विष्णोः । न च **'अस्मद्विद्या'** इत्येतदन्तर्यामिपरतया योज्यम् । तथा सति **'आत्मविद्या'** इति पृथगुक्त्ययोगात् । तस्मादग्निविषयत्वमेव चक्षुरन्तःस्थविद्याया इत्याशङ्कां परिहरत्सूत्रं पठित्वा तदुपात्तश्रुतिमेवोदाहरति – **श्रुतेति** ॥

[२]इतीत्यस्य सूत्रेणान्वयः । अत्र सूत्रे श्रुतेत्युपलक्षणं, मतध्यातेत्यपि द्रष्टव्यम् । केति वायुरुच्यते [३] । **'को वायुरिति शब्दितः'** इति अभिधानात् । कशब्दस्याऽवृत्त्या गतिरित्यनेनापि सम्बन्धे कगतिरिति परब्रह्मगतिरुच्यते । **'कं ब्रह्म'** इति वाक्यबोधितपरब्रह्मप्रकरणादेतदर्थनिश्चयात् । तथा च – श्रुतोपनिषदां श्रुतमतध्यातैतद्विद्यानां पुंसां केन वायुना [४]कगतेः **'कं ब्रह्म'** इति वाक्यबोधितब्रह्मप्राप्तेः **'स एनान् ब्रह्म गमयति'** इत्युपसंहारेऽभिधानाद् विष्णुविषयैवाक्षिस्थविद्या, न त्वग्निविषयेति सूत्रार्थः ॥

यद्वा – श्रुतोपनिषदमुपकोसलं प्रत्यग्निभिरेतद्विद्याफलत्वेन ब्रह्मगत्यभिधानाद् वैष्णवमेवेदं प्रकरणं, नत्वग्निविषयमित्यर्थः । तत्त्वप्रदीपे तु – **'स एनान् ब्रह्म गमयति'** इति श्रुतोपनिषत्कानां श्रुतोपनिषद्गतोपासनानां

---

१. **'अत्रापि प्रकरणे ब्रह्मलक्षणोपक्रमेऽपि'** – क
२. **'इतीत्यन्तस्य'** –क.
३. **'केति परब्रह्मवायू तन्त्रेणोक्तौ । तथा च श्रुतोपनिषदाम्'** – क.
४. **'कस्य परब्रह्मणो गतेः प्राप्तेः 'स एनान्-'** – क.

ब्रह्मगत्यभिधानाच्च आन्तरो विष्णुरेव । अस्यामुपनिषीदति ब्रह्मेत्युपनिषत् उपासना । अनया ब्रह्म उपनिषीदतीति वेत्युक्तम् । श्रुतविषयिणी या उपनिषत् मतिध्यानरूपोपासना तत्कानां तद्भूतं तद्विषयकं ध्यानरूपोपासनं तद्भूतामित्यर्थः । अनेन उपनिषच्छब्दो मतिध्यानरूपोपासनापरः । ब्रह्मेत्यनेन बहुव्रीहिसमासावयवभूतः कशब्द आवृत्तो ब्रह्मवाचक इत्युक्तं भवति । अत एवाऽह टीकाकृत् – श्रुतपदं मननिदिध्यासनयोरुपलक्षकमित्यादिना । तत्त्वप्रदीपपक्षे – उपनिषच्छब्द उपासनापरः । टीकाकृत्पक्षे विद्यापरः । टीकायां वाशब्दश्चार्थः[1]॥

यद्यप्यस्य सूत्रस्य प्रकरणविच्छेदाशङ्कापरिहारायोपसंहारस्थलिङ्गोक्ति-परत्वेन [2]परमसाध्ये युक्त्यन्तरप्रतिपादकत्वाभावादत्र चशब्दो[3] न प्रयोज्यः । तथाऽपि **'स एनान् ब्रह्म'** इत्युपसंहारस्थस्यैतद्विद्यावेत्तॄणां ब्रह्मप्राप्ति-रूपलिङ्गस्य चक्षुरन्तरो विष्णुरेवेति परमसाध्येऽपि साक्षादन्वयादस्य च लिङ्गस्य आद्यसूत्रोक्तामृतत्व[4]लिङ्गापेक्षयोत्तरवाक्यस्थद्वितीयसूत्रोक्तलिङ्गा-पेक्षया तृतीयसूत्रोक्तप्रकरणापेक्षया युक्त्यन्तरत्वात् तद्विवक्षया सूत्रे चशब्द-प्रयोगोपपत्तिरिति केचिदाहुः ॥

वस्तुतस्तु – अत्र प्रकरणविच्छेदाशङ्कापरिहारेऽपि पूर्वसूत्रेऽत्र चैतत्प्रकरणस्य वैष्णवत्वरूपाध्याहृतावान्तरसाध्यस्यैकत्वेन तत्रानेन युक्त्यन्तराभिधानाच्चशब्दोपपत्तिः ॥

'अथ यदु चैवास्मिञ्छव्यं कर्म कुर्वन्ति यदि[5] च नार्चिषमेवा-

---

१. 'तत्त्वप्रदीपे तु – 'स एनान्' इत्यारभ्य 'चार्थः'
इत्यन्तो भागः क.पाठे नास्ति ।

२. 'परमसाध्ययुक्त्यन्तर-' – क.

३. '-भावाच्चशब्दः' – क.

४. 'अमृतत्वादि-' – क.

५. 'यदु' क.

भिसम्भवन्ति । अर्चिषोऽहरह्न आपूर्यमाणपक्षम् आपूर्यमाणपक्षाद् यान् षडुदङ्ङेति मासान् तान् मासेभ्यः संवत्सरं संवत्सरादादित्य-मादित्याच्चन्द्रमसं चन्द्रमसों विद्युतं तत्पुरुषो मानवः स एनान् ब्रह्म गमयति' इति छन्दोगश्रुतेरयमर्थः –

अथेत्यर्थान्तरे । **'अथ'** अवसितकर्मणि **'अस्मिन्'** ज्ञानिविषये [१] पुत्रादयो यदि **'शव्यं'** शवयोग्यं दहनादि कर्म कुर्वन्ति । **'यदि चन** [२]' यदि वा न कुर्वन्ति[३] **'तदार्चिषम्'** अर्चिर्नामकदेवलोकं सम्भवन्ति प्राप्नुवन्त्येवेमे ज्ञानिन इति विपरिणामेनान्वयः । [४]संविशतीत्येकवचनान्तविशिधातुपाठः **'ते'** इति पाठश्च प्रमेयदीपछन्दोगपाठविरुद्धः । ततोऽहर्लोकं[५], ततः **'आपूर्यमाणपक्षं'** शुक्लपक्षलोकं, ततः सूर्यो **'यान्'** षण्मासान् उदङ्ङेति [६]तान् मासदेवलोकम् उत्तरायणलोकं च, ततः संवत्सरादित्यचन्द्र-विद्युदभिमानिलोकान् क्रमेण प्राप्नुवन्ति । ततः **'तस्याः'** विद्युन्नाम्न्या भारत्याः **'पुरुषः'** भर्ता **'मानवः'** मनुसञ्ज्ञस्य विष्णोः प्रियो [७]मुख्यवायुस्तं गच्छन्ति । **'सः'** वायुः **'एनान्'** स्वमाप्तान् प्रतीकालम्बनान् चतुर्मुखाख्यं कार्यं ब्रह्माप्रतीकालम्बनांस्तु परं ब्रह्म गमयतीति ॥

न ह्यन्यविद्ययाऽन्यगतिर्युक्ता ॥

अस्त्वेतद्विद्यायाः फलत्वेन ब्रह्मप्राप्त्यभिधानं, तथाऽपि कुतो नाग्निविषयत्वमस्या इत्यत आह – **न हीति ॥ 'हि'** यस्मादन्यस्या-

---

१. १.'ज्ञानिनि विषये' क. २. 'यदुचन' – क.

३ .'न कुर्वन्ति सर्वथा ते ज्ञानिनः स्वज्ञानप्रसन्नभगवत्सामर्थ्यात् कर्मक्षयोत्क्रान्ति-युता अर्चिषम्' – क.

४.'संविशन्तीति पाठः प्रमेयदीपिकाविरुद्धः' क. ५.'ततोऽथाहर्लोकं'–क

६.'तन्मासदेवलोकम्' इति मुद्रितपुस्तकपाठः । ७.'यो मुख्यवायुः'– क.

ग्रेर्विद्ययाऽन्यगतिरन्यस्य ब्रह्मणः प्राप्तिर्न युक्ता । यस्माच्चात्र परब्रह्मप्राप्तिः फलत्वेनोच्यत इत्यर्थः । तस्मान्नान्यविद्येयं ब्रह्मविद्यैवेति वाक्यशेषः । हिशब्देन विपक्षे – **'देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि'** इति स्मृतिविरोधं[1] सूचयति । **'अस्मद्विद्याऽऽत्मविद्या'** इति वचनविरोधस्तु तयोरन्तर्यामिसर्वगतरूपद्वयविषयकत्वेन परिहरणीयः । सावकाशश्रुतेरपि निरवकाशश्रुतेः प्राबल्यादिति भावः ॥

सू – ॐ ॥ अनवस्थितेरसम्भवाच्च
नेतरः ॥ ॐ ॥ ॥१७॥

जीवस्य जीवान्तरनियामकत्वेऽनवस्थितेः,
साम्यादसम्भवाच्च न जीवः ।

एवमुपपत्त्यादिभिर्विष्णोरक्षिस्थत्वं प्रतिपाद्य विपक्षे बाधकेनापि तत्समर्थयत्सूत्रं पठति – **अनवस्थितेरिति** ॥ अत्राऽन्तरस्तत्तज्जीवप्रेरकतया तत्तच्चक्षुस्स्थितः **'इतरः'** पूर्वप्रकृतात् कशब्दोदितात्[2] ब्रह्मणोऽन्योऽग्निजीवो न । कुतः ? यतः स इतरो जीव इति हेतुसाध्ययोजनामभिप्रेत्यात्र विपक्षेऽनिष्टप्रसङ्गाभिधायकतयाऽनवस्थितेरित्यंशं योजयति – **जीवस्येति** ॥ **'साम्यात्'** इति सूत्रेऽध्याहृतं पदं तत्त्वप्रदीपरीत्या देहलीदीपन्यायेनोभयत्र सम्बध्यते । जीवस्य जीवान्तरनियामकत्वे इत्येतद्विपरिणतमसम्भवादित्यनेनापि सम्बध्यते । चो हेतुसमुच्चये । इतर इत्यस्याग्निरित्यर्थे वाच्ये जीव इति सामान्येनोक्तिः साध्यहेत्वोस्तन्त्रेणाभिधानार्थम् । न जीव इत्यस्य आन्तर इत्युद्देश्यसमर्पकानुवृत्तपदेनान्वयः । अनेन तत्तज्जीवप्रेरकतया

१. 'स्मृतिविरोधं च' – क
२. 'कशब्दितात्' – क.

तत्तच्चक्षुरन्तरो नेतरः नाग्निः [१] । कुतः ? यतः स इतरो जीवः जीवत्वादिति यावत् । न च विपक्षे बाधकाभावः, जीवस्य जीवान्तरनियामकत्वे प्रेरकत्वे आन्तरजीवस्यापि जीवत्वसाम्यात् तस्यापि नियामकं जीवान्तरं[२] वाच्यमित्यनवस्थितेरसिद्धपरम्पराकल्पनरूपानवस्थाख्यानिष्टापत्तेः । अभ्युपगम्य चेदमुदितम् । वस्तुतस्तु – जीवस्य जीवान्तरनियामकत्वासम्भवाच्च नेतरोऽग्निरन्तरः । कुतोऽसम्भवः ? अग्नेर्जीवस्य प्रेर्यजीवान्तरेण सह परतन्त्रत्वरूपजीवत्वसाम्यादिति सूत्रवृत्तिर्दर्शिता भवति ॥

नियमप्रमाणाभावात् । अनीश्वरापेक्षत्वाच्च ॥ १७ ॥

॥ इति अन्तराधिकरणम् ॥ ४ ॥

ननु जीवप्रेरकाग्नेः स्वातन्त्र्याभ्युपगमान्नानवस्था । न चैवं जीवान्तरस्यापि स्वातन्त्र्यं स्याद् जीवत्वसाम्यादित्युक्तमिति वाच्यम् । जीवत्वसाम्येऽप्यग्नेरेव स्वातन्त्र्यं नान्येषामिति नियमाभ्युपगमादित्यत आह - **नियमेति** ॥ जीवत्वसाम्येऽप्यग्नेरेव स्वातन्त्र्यं नान्येषामिति नियमे प्रमाणाभावादित्यर्थः । अतोऽग्नेः स्वातन्त्र्यायोगात् सुस्थैवानवस्थितिरिति [३] भावः ॥

नन्वस्त्वग्नेरस्वातन्त्र्यं, तथाऽपि तत्प्रेरकस्येश्वरस्य स्वातन्त्र्यसम्भवान्नानवस्थेत्यत आह – **अनीश्वरेति** ॥ ईश्वरं जगत्प्रेरकत्वेन योऽपेक्षतेऽभ्युपैति स ईश्वरापेक्षः, स न भवतीत्यनीश्वरापेक्षः, तस्य भावस्तत्त्वं तस्मादित्यर्थः । पूर्ववादिन इति शेषः । हेतुसमुच्चये चशब्दः । एवं वा - ननु

---

१. 'नेतरोऽग्निः' – क.

२. 'नियामकजीवान्तरं' – क.

३. 'अनवस्थेति' – क.

परतन्त्रत्वसाम्येऽपि [1]जीवानां जीवान्तरनियामकत्वात् कथं तदसम्भव इत्यत[2] आह – **अनीश्वरेति** ॥ व्याख्यानं पूर्ववत् । तथा च – यथाऽस्मत्पक्षे सति राज्ञि मण्डलेशे प्रजानां राजशक्त्या नियम्यनियामकभाववद् ईश्वरशक्त्या जीवानां जीवान्तरनियामकत्वसम्भवः, न तथा परपक्षे सम्भवति, परेण ईश्वरानभ्युपगमादिति भावः । इदं च वाक्यद्वयस्य योजनाद्वयम् । टीकायां तत्त्वप्रदीपोक्तमेवोक्तम् । उक्तं हि तत्त्वप्रदीपे – नियमप्रमाणाभावोऽनीश्वरापेक्षत्वं चेत्युभौ उभयत्र हेतुरिति[3]। **'उभयत्र'** अनवस्थित्यसम्भवयोरित्यर्थः ॥

॥ इत्यन्तराधिकरणम् ॥ ४ ॥

---

१. .(क.पाठे एवं वाक्यविन्यासो विद्यते):– 'जीवानां नीचोच्चभाववन्नियम्य-नियामकभावसम्भवः किं न स्यादित्यत आह – नियमेति ॥ पूर्वव्याख्यानवन्नात्र सप्तमीतत्पुरुषः । किन्तु कर्मधारयः । नियम्यते व्यवस्थाप्यतेऽर्थोऽनेनेति नियमो नियामकम् । तथा च नियामकविशेषप्रमाणाभावादित्यर्थः । तथा च न दृष्टान्त-मात्रेण नियम्यनियामकभावसम्भव इति भावः । ननु सिद्धान्तिनाऽप्यग्न्यादि तत्तज्जीवानां जीवान्तरनियामकत्वाभ्युपगमात्-' – क.

२. 'इत्यतो वाऽऽह' – क.

३. 'हेतू इति' – क.

॥ ५. अथ अन्तर्याम्याधिकरणम् ॥

(सर्वान्तर्यामी विष्णुरेव)

'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः' *(बृ. ५-७-३.)* **इत्यादिनाऽन्तर्याम्युच्यते ।**

॥ ५. अथान्तर्याम्यधिकरणम् ॥

अत्राधिकरणेऽन्तःस्थत्वरूपभावसहितं[१] नियमनक्रियात्मकं लिङ्गं ब्रह्मणि समन्वीयते । विषयवाक्योदाहरणपूर्वकं विषयं दर्शयति – **य इति** ॥ इत्यादीति प्रथमा सप्तम्यर्थे । तृतीयार्थे वा । **'सप्तसु प्रथमा'** इति सूत्रात् । **'क्रियाविशेषणं वा'** इति तत्त्वप्रदीपोक्तेः[२] **'इत्यादिना'** इति [३]पाठस्तद्विरुद्धः । वाक्ये[४] वाक्येनेति वा शेषः । **'योऽप्सु तिष्ठन्' 'यो भूतेषु तिष्ठन्'** इत्यादिकमादिशब्देन गृह्यते । अन्तर्यामीत्यनेन विषयो दर्शितः ॥

बृहदारण्यके उद्दालकं प्रति याज्ञवल्क्येनोक्तम् इदं वाक्यम् । **'यः पृथिव्यां'** पृथुं विष्णुमूढ्वा वाति गच्छतीति पृथिवी गरुडः, तस्मिन् तिष्ठन् **'पृथिव्याः'** तदभिमानिचेतनात् **'अन्तरः'** विविक्तः । **'यं च पृथिवी'** तदभिमानी चेतनो न वेद साकल्येन । **'यस्य च पृथिवी'** तद्वशत्वनिमित्तात् शरीरभूता । न केवलं तत्र स्थितिमात्रं, किन्तु **'योऽन्तरः'** अन्तःस्थित्वा बाह्यविषयापेक्षां विना रममाणः । स्वतो नित्यतृप्तः -

---

१. 'अन्तःस्थितिरूपभावसहितं' –क.
२. 'तत्वप्रदीपोक्तिः' – क.
३. 'क्वचित् पाठस्तु' – क.
४. 'वाक्येषु' –क.

'..... सोऽन्तरः स्ववशत्वतः ।

बाह्यापेक्षां विना यस्तु रमते सोऽन्तरः स्मृतः' ॥ इति बृहद्भाष्योक्तेः ।

यद्वा - [१]**'अतिप्रियत्वाच्च हरेरन्तरत्वमुदाहृतम् ॥'** इति तत्रैवोक्तेः । **'प्रेयः पुत्रात्'** इत्यादिश्रुत्या परमप्रेयोरूपत्वात् **'अन्तरः'** अतिप्रियः सन् **'पृथिवीं'** गरुडं **'यमयति'** नियमयति । एषः **'ते'** तव **'अन्तर्याम्यात्मा'** नियामकः पुरुषः **'अमृतः'** नित्य इति श्रुत्यर्थः ॥

एतेन अन्तरो विविक्त इति टीकाया बृहद्भाष्यविरोधो निरस्तः । बृहद्भाष्यस्य **'य आत्मानम्'** इत्यत्रस्थान्तरशब्दविषयत्वात्[२] । अत एव न श्रुतौ पौनरुक्त्यम् । द्वयोर्भिन्नार्थत्वात् । पूर्वपक्षी त्विदं वाक्यमन्यपरं मन्यते ॥

तत्र च *'एतदमृतम्'(छां. ४-१५.१)* इत्युक्तममृतत्वमुच्यते । स च 'यस्य पृथिवी शरीरम्' इत्यादिना सर्वात्मकत्वात् प्रकृतिस्तत्तज्जीवो वा युक्तः ।

पूर्वाधिकरणतद्विषयवाक्यसङ्गतिं[३] दर्शयति – **तत्रेति** ॥ इयमत्र तत्त्वप्रदीपोक्ता योजना – **'यः पृथिव्यां तिष्ठन्'** इत्यादिवाक्येष्वन्तर्याम्युच्यते । तत्र च तद्वाक्येष्वेव तस्मिन्नेवान्तर्यामिणि **'एतदमृतमेतदभयम्'** इति पूर्वनयोदाहृतछान्दोग्यवाक्येऽक्षिपुरुषस्योक्तममृतत्वं **'एष त आत्माऽन्तर्याम्यमृतः'** इत्यनेन उच्यत इति ॥

अनेन बृहदारण्यकोक्तान्तर्यामिणि[४] विष्ण्वन्यत्वाक्षेपमुखेन तदुक्ता-

---

१. 'अतिप्रियत्वात्तु' – क
२. 'इत्यत्रत्यान्तरशब्दविषयत्वात्' – क.
३. '-सङ्गती'–क.
४. '-न्तर्यामिणो' – क.

मृतत्वस्याप्यन्यनिष्ठत्वं सम्पाद्य तस्य पूर्वाधिकरणोक्ताक्षिस्थत्वस्य[१] विष्णुत्व-साधकत्वाक्षेपात् [२]पूर्वेणाऽक्षेपिकी सङ्गतिरुक्ता भवति । ततः किमित्यतः सयुक्तिकं पूर्वपक्षयति – **स चेति** ॥ चशब्दो हेतुसमुच्चये[३]। आदिपदेन **'यस्याऽपः शरीरम्'** इत्यादेः सङ्ग्रहः । तच्छब्दस्य[४] विपरिणामेन हेतुवाक्येन सम्बध्यते । आत्मशब्दः स्वरूपशरीरोभयार्थः । तथा च सोऽन्तर्यामी जडचेतनोभयरूपा प्रकृतिः पृथिव्यादितत्तज्जीवो वा युक्तः । कुतः[५] ? श्रौतशरीरशब्दस्य इदं पूर्वपक्षशरीरमित्यादाविव स्वरूपार्थत्वात् । जडप्रकृतेश्च सर्वोपादानत्वेन सर्वात्मकत्वात् । चित्प्रकृतेश्च सर्वाभिमानित्वेन सर्वात्मक-त्वात् पृथिव्यादिजीवस्य पृथिव्यादिसर्वशरीरत्वादिति योजना ॥

न हि विष्णोः पृथिव्यादिशरीरत्वमङ्गीक्रियत इति ।

ननु यथा प्रकृत्यादिलिङ्गेन तेषामन्तर्यामित्वं तथाऽमृतत्वलिङ्गेन विष्णोस्तत् किं न स्यादित्यत आह – **न हीति** ॥ [६]पृथिव्यादि शरीरं यस्य स तथोक्तः, तस्य भावस्तत्त्वं त्वप्रत्ययापाठे त्वन्वयः ऋजुरङ्गीक्रियते । सिद्धान्तिनेति शेषः । तस्य पृथिव्यादिजडभिन्नचिच्छरीरत्वादिति[७]

---

१. '-क्षिस्थविष्णुत्व-' – क.

२. 'पूर्वेणाऽस्याऽ-' – क.

३. 'चोऽवधारणे । पूर्वपक्षे श्रौतशरीरशब्दः 'इदं पूर्वपक्षशरीरम्' इत्यादाविव स्वरूपार्थोऽपि भवति । आदिपदेन' – क.

४. 'अन्तर्यामिण इति प्रकृतेरिति तत्तज्जीवस्येति च विपरिणामेन' – क.

५. 'कुतः ? यस्येत्यादिना वाक्येनान्तर्यामिणः पृथिव्यादिसर्वशरीरत्वश्रवण-ात् । तेनैव सर्वात्मकत्वावगमात् । जडप्रकृतेश्च-' क.

६. 'हिशब्दो हेतौ । पृथिव्यादि' – क.

७. '-शरीरत्वाङ्गीकारादिति हिशब्दाभिप्रायः । न हीत्यस्य तस्मात् स न विष्णुरित्यावृत्त्यनुवृत्तिलभ्यसाध्येनान्वयः । तथा च' – क.

हिशब्दाभिप्रायः । तथा च- सैद्धान्तिकलिङ्गापेक्षया पूर्वपक्षलिङ्गस्य[1] निरवकाशतया बलवत्त्वादनेन तस्य बाधान्नान्तर्यामी विष्णुरिति भावः ॥

अत आह -

ॐ ॥ अन्तर्याम्यधिदैवादिषु
तद्धर्मव्यपदेशात् ॥ ॐ ॥ १८ ॥

'यं पृथिवी न वेद, यः पृथिव्या अन्तरः' *(बृ. ५-७-३.)*

इत्यादिना अधिदैवादिषु तद्धर्मव्यपदेशाद् विष्णुरेवान्तर्यामी ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे – **अत इति** ॥ इत्यादिना वाक्येन इति शेषः । तत्र यद्यपि सौत्रव्यपदेशपदेन अभिप्रेतं **'यं पृथिवी न वेद यः पृथिवीमन्तरो यमयति'** इति वाक्यमेवोदाहर्तव्यम् । अत्रोक्तान्तरत्वस्यैव सौत्रधर्मशब्दार्थत्वात्, न तु **'पृथिव्यामन्तरः'** इति वाक्यम् । अत्रत्यान्तरशब्दस्य विविक्तार्थत्वेन तदुक्तार्थस्याहेतुत्वात् । तथा च तदुदाहरणं न प्रकृतोपयुक्तम् । तथाऽपि तत्प्रतीकत्वेनोदाहृतमित्यदोषः । आदिशब्देन प्रकरणत्रयवाक्यं गृह्यते । अधिदैवादिषु । प्रकरणेष्विति शेषः । प्रकरणं नाम एकप्रमेयप्रतिपादकानेकवाक्यानि । तत्र **'यः पृथिव्यां तिष्ठन्'** इत्यधिदैवतप्रकरणम्[2] । **'यः सर्वेषु भूतेषु तिष्ठन्'** इत्यधिभूतप्रकरणम् । **'यः प्राणे तिष्ठन्'** इत्यध्यात्मप्रकरणम् ॥

सूत्रे भाष्ये चाधिदैवेत्युक्त्या पृथिव्यादीनां जडत्वेन तदविदितत्वं

---

१. **'पूर्वपक्षिलिङ्गं निरवकाशतया प्रबलमिति न साम्यमिति भावः । सिद्धान्तयत्-'– क.**

२. **'अधिदैवप्रकरणम्' – क.**

सर्वस्यापि सम्भवतीति शङ्का[1] वारिता । अत्रोक्तानां पृथिव्यादीनामधिदैवत्वेन चेतनत्वात्[2] **'प्राणे'** इति श्रुतौ प्राणशब्दः प्राणवायुदेवतापरः, सैव प्रमेयदीपरीत्या प्राणेन्द्रियदेवता । अधिदैवादिष्वित्यनेकप्रकरणग्रहणेन न केवलमेकत्र तद्धर्मोक्तिः, किन्तु – बहुषु स्थलेष्विति सूचितम् । अनुवृत्तस्य तत्त्वित्यस्यार्थमाह – **विष्णुरेवेति** ॥ तदित्यस्य नपुंसकत्वेऽप्यन्तर्यामीत्युद्देश्यसमर्पकसौत्रपदानुसारेण विष्णुरेवेति व्याख्यातम् ॥

अनेन **'एष त आत्मा'** (बृ.५-७-३) इत्युक्तोऽन्तर्यामी स विष्णुरेव । कुतः ? अधिदैवादिषु प्रकरणेषु **'तद्धर्मव्यपदेशात्'** तस्य विष्णोः धर्मस्य अविदितत्वान्तरत्वादेः **'यं पृथिवी न वेद'** इत्यादिनोक्तत्वादिति सूत्रार्थ उक्तो भवति ॥

स हि –

'न ते विष्णो जायमानो न जातः' *(ऋ.७-९९-२)*

'स योऽतोऽश्रुतोऽगतोऽमतोऽनतोऽदृष्टोऽविज्ञातो-
ऽनादिष्टः सर्वेषां भूतानामन्तरपुरुषः' *(ऐ.आ. ३-२-४.)*

इत्यादिनाऽविदितोऽन्तरश्च ॥ १८ ॥

अविदितत्वादेः कुतो विष्णुधर्मत्वमित्यत आह – **स हीति** ॥ 'सः' विष्णुः हि यस्मात् । **'इत्यादिना'** वाक्येनेति शेषः । आदिपदेन **'दिव्यो देव एको नारायणः'** (सुबाल.७) इत्युपक्रम्य **'यस्य पृथिवी शरीरं यः पृथिवीमन्तरः**[3] **सञ्चरन् यं पृथिवी न वेद एष सर्वभूतान्तरात्मा**

---

१. 'आशङ्का परिहृता । तथा चात्रो-' –क.

२. .'चेतनत्वान्नोक्तदोष इति भावः' – क. ।

३. . 'पृथिवीमन्तरे' – क.

अपहतपाप्मा दिव्यो देव एको नारायणः' [१]इत्युपसंहृत्याधीतं श्रुत्यन्तरं गृह्यते ॥

'अविदितः' साकल्येनाज्ञातः **'अन्तरः'** अन्तस्थित्वा रमणकृत् प्रसिद्ध[२] इति शेषः । चः समुच्चये[३] । **'न ते'** इति वाक्यं च ते देव महिम्नः परमन्तं महिमानं श्रोत्रादिना नाऽप इति प्रकृतानुगुण्येन सर्वत्राधिकरणे व्याख्यातम् । **'सः'** इति वाक्यमपि तत्रैव व्याकृतम् ॥

सू -ॐ ॥ न च स्मार्तमतद्धर्माभिलापात् ॥ ॐ ॥ १९ ॥

त्रिगुणत्वादिप्रधानधर्मानुक्तेर्न स्मृत्युक्तं प्रधानमन्तर्यामी ॥१९ ॥

एवं निरवकाशलिङ्गेन विष्णोरन्तर्यामित्वं समर्थ्य यदुक्तं पूर्वपक्षिणा प्रकृत्यादेरन्तर्यामित्वं तत् प्रकृतिजीवसाधारणं युक्त्या[४] निराकुर्वत्सूत्र-मुपन्यस्यति – **न चेति** ॥ [५]अत्र 'अतद्धर्माभिलापात्' इत्येतत् 'अतच्छब्दात्' इतिवदव्ययीभावसमासरूपम् ॥

अत एव अव्ययमित्याशयेनानियमाभिप्रायेणाऽदौ हेतुवाक्यं [६]व्याख्याति– **त्रिगुणत्वादीति** ॥ सत्त्वादिरूपास्त्रयो गुणा यस्य कार्यभूतास्तत् त्रिगुणं, तस्य भावस्त्रिगुणत्वं[७] तदादिर्येषां ते तथोक्ताः, प्रधानस्य प्रकृतेर्धर्माः[८],

---

१. 'उपसंहारेणाधीतं' –क. २. 'ज्ञातः' – क.
३. 'तस्मान्न हेतुविशेषणासिद्धिरिति वाक्यशेषः । न ते' – क.
४. 'प्रकृतिजीवपक्षसाधारणयुक्त्या' – क.
५. 'सूत्रे' – क. ६. 'आशयेन तत्पदं व्याख्याति' – क.
७. 'सत्वादिरूपास्त्रयो गुणाः, तेषां भावस्त्रिगुणत्वं' – क.
८. 'प्रकृतेर्धर्माः प्रधानधर्माः' – क.

त्रिगुणत्वादयश्च ते प्रधानधर्माश्च ते तथोक्ताः, तेषामनुक्तिरुक्त्यभावः, तस्या इत्यर्थः । आदिपदेनोपादानत्वजडत्वसंसारित्वादीनां ग्रहणम् । प्रधानपदं जीवस्याप्युपलक्षकम् । आदिशब्दो वाऽत्र[१] संयोज्यः । साध्यधर्म-प्रतियोगिनिर्देशाय पूर्वपक्षे युक्तिसूचनाय[२] च प्रयुक्तं स्मार्तमित्येतद् व्याचष्टे – **स्मृत्युक्तमिति** ॥ पृथिव्याद्यात्मकतया कापिलस्मृति-प्रतिपादितमित्यर्थः[३] । स्मृत्युक्तमेवैतन्न श्रुत्युक्तमिति ज्ञापनायेदम्[४] । पर्यवसितार्थमाह – **प्रधानमिति** ॥ जीवस्याप्युपलक्षकमिदम् । शारीरश्चेति वक्ष्यमाणस्यात्राप्यन्वयो दर्शितः । अन्तर्यामिणोऽन्यरूपत्वनिषेधाय प्रवृत्ते सूत्रेऽपेक्षितं साध्यधर्मिणं दर्शयति - **अन्तर्यामीति** ॥ अन्तर्यामी[५] न प्रधानमिति योजना ॥

न प्रधानमन्तर्यामीत्यनेन सौत्रचशब्दः अन्तर्यामी विष्णुरेव न तु प्रधानमिति[६] तुशब्दार्थः । स च न शारीर इत्यादाविव परपक्षनिषेधमात्रं न क्रियते, किन्तु, स्वपक्षविधिरपीति परपक्षनिषेधस्य स्वपक्षविधिपूर्वकत्वरूप-विशेषार्थ इति सूचितं [७]भवति । अनेनान्तर्यामी विष्णुरेव, न तु स्मार्तं पृथिव्याद्यात्मकतया स्मृतौ प्रतिपादितं प्रधानम् । शारीरो [८]जीवः । कुतः ?

---

१. 'अत्रापि' – क.
२. 'साध्यधर्मनिर्देशपूर्वपक्षयुक्तिप्रदर्शनाय' – क.
३. 'कापिलस्मरणेऽभिहितेत्यर्थः' – क.
४. 'श्रुत्युक्तमिति भावः' – क.
५. 'विष्णुरेवेति वर्तते । अन्तर्यामी विष्णुरेव न प्रधानम्' – क.
६. 'न प्रधानमिति तुशब्दार्थः' –क..
७. 'तुशब्दार्थः । तुशब्दश्च परपक्षनिषेधस्य स्वपक्षविधिपूर्वकत्वरूपविशेषार्थ इति सूचितं भवति ।' क.
८. 'जीवश्च' – क.

अत्र 'अतद्धर्माभिलापात्' त्रिगुणत्वसंसारित्वादिरूपप्रधानजीवधर्मोक्त्य-भावादिति सूत्रवृत्तिर्दर्शिता भवति ॥

तत्त्वप्रदीपे तु – नञस्तद्विरुद्धार्थत्वमाश्रित्याऽत्मत्वामृतत्वादृष्टत्व-द्रष्टृत्वाद्यतद्धर्माभिलापाच्च इति हेतुवाक्यस्य वृत्त्यन्तरमपि दर्शितम् ।

सू - ॐ ॥ शारीरश्चोभयेऽपि हि
भेदेनैनमधीयते ॥ ॐ ॥ २० ॥

'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्याऽत्मा शरीरं य आत्मानमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः',

(बृ.माध्यन्दिनपाठः)

'यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरम्' *(बृ. ५-७-२२.)*

इत्युभयेऽपि हि शाखिनो भेदेनैनं जीवमधीयते ।

यज्जीवोऽन्तर्यामीत्युक्तम् । तत्साधकाभावेन निरस्तमपि पुनर्बाधकाख्यविशेषयुक्त्या निराकुर्वत्सूत्रमुपन्यस्य व्याचष्टे – **शारीर इति ॥** इत्यभिधीयत इत्यन्वयः । उभये इत्यस्य विशेष्यपदं दर्शयति – **शाखिन इति ॥** काण्वा माध्यन्दिनाश्चेत्यर्थः । आत्मनोऽन्तर इति माध्यन्दिनाः विज्ञानादन्तर इति काण्वाः । अपिशब्दः शाखासमुच्चये[1] । अन्तर्यामिण इति विपरिणतमत्रानुवर्तते । एनमित्यनूद्य जीवमिति व्याख्यातम् [2]। अतो न शारीरश्चान्तर्यामीति च शेषः । तेन सौत्रचशब्दो नञः समाकर्षकः । न केवलं

१. 'शाखिसमुच्चये' – क.
२. 'व्याख्यातम् । यत इति ॥' – क.

न स्मार्तं, किन्तु शारीरश्चेति समुच्चयेऽपीत्युक्तं[१] भवति ॥

तत्त्वप्रदीपे तु - चित्प्रकृतेरप्यत्र पूर्वपक्षविषयतामाश्रित्य श्रीभूदुर्गा-रूपायाः तस्याः **'यस्तेजसि तिष्ठन्'** (बृ.५-७-१४) **'यस्तमसि तिष्ठन्'** (बृ.५.७.१३) इत्याद्यन्तर्यामिणः सकाशाद्भेदेनाध्ययनान्न साऽप्यन्तर्यामीति समुच्चयार्थश्चशब्द इत्युक्तम् ॥

अनेन **'हि'** यस्मात् **'उभयेऽपि'** शाखिनः **'एनं'** जीवमन्तर्यामिणः सकाशाद् भेदेन **'अधीयते'** आमनन्ति । तस्माद्बाधकान्नान्तर्यामी **'शारीरः'** [२]शरीराभिमानी जीव इति सूत्रार्थ उक्तो भवति ॥

श्रुतौ **'यः पृथिव्याः'** इति वाक्यस्याऽदित्वेऽपि तद्विहायाऽत्मविज्ञान-वाक्ययोश्चेतनपरत्वेनो[३]भयपरत्वादैकार्थ्याच्च ते एवात्रोभयकर्तृकभेदाध्ययन-तयोदाहृते । **'आत्मनः'** जीवात् **'अन्तरः'** विविक्तः । एवं विज्ञानशब्दोऽपि **'य आत्मनि'** इति श्रुतिसमाख्यानाज्जीवसामान्यपरः ॥

यद्यपि बृहद्भाष्ये - [४]आत्मादिशब्दस्य चतुर्मुखाख्यजीवपरतया व्याख्यातत्वादिदं सूत्रं जीवविशेषस्य योगिनोऽन्तर्यामित्वनिरासकमिति । अत एव तत्त्वप्रदीपे योगिनोऽन्तर्यामित्वं निराकरोतीत्युक्तम् । तथाऽपि यदा सर्वजीवाभिमानिचतुर्मुखादपि तन्नियामकत्वादिना भिन्नोऽन्तर्यामी तदा किमु तदभिमन्यमानसर्वजीवादिति कैमुत्यद्योतनाय तत्र तथोक्तिरिति[५]

---

१. **'समुच्चयेऽप्युक्तं'** – क.
२. **'शरीराभिमानवान् जीवश्चेति'**–क.
३. **'-परत्वेनोभयसम्मतत्वात्'** – क.
४. **'आत्मादिशब्दश्चतुर्मुखाख्यजीवविशेषपरतया व्याख्यातः । तथाऽपि यदा सर्वजीवाभिमानि-'** – क.
५. **'तथोक्तिरिति न विरोध इत्युक्तं चन्द्रिकायाम् । ननु न विष्णोः'** – क.

चन्द्रिकायामुक्तत्वाज्जीवसामान्यान्तर्यामित्वनिषेधपरतया प्रवृत्ताया एतत्सूत्र-टीकायाः बृहद्भाष्यतत्त्वप्रदीपविरोधः ॥

'शीर्यते नित्यमेवास्माद् विष्णोस्तु जगदीदृशम् ।

रमते च परो ह्यस्मिन्[१] शरीरं तस्य तज्जगत् ॥'

इति वचनान्न शरीरत्वविरोधः ॥ २० ॥

॥ इत्यन्तर्याम्यधिकरणम् ॥ ५ ॥

ननु न विष्णोरन्तर्यामित्वं युक्तम् । पृथिव्यादिशरीरत्वस्य[२] प्रधान-धर्मस्यात्रोक्तेः तस्य विष्णावसम्भवात् । कथं प्रधानधर्मानुक्तिः पृथिव्यादि-शरीरत्वस्यैव तद्धर्मत्वादित्यत आह – **शीर्यत इति** ॥ तुशब्दोऽवधारणे । तथा च **'हि'** यस्मात् **'ईदृशं'** वर्तमानजगत्सदृशं कालत्रयाबाध्यं वा **'जगत्'** पृथिव्यादि अस्माद् विष्णोरेव **'नित्यं'** नियतं प्रतिकल्पं **'शीर्यते'** नश्यति । आत्मादिचेतनानामपि देहद्वारा शीर्यता सत्यैव[३]। यस्माच्च **'परः'** परमात्मा **'अस्मिन्'** जगति स्थितः सन् रमते **'तत्'** तस्मादेव **'तस्य'** विष्णोः **'जगत्'** पृथिव्यादिकं शरीरमुच्यते, न रूढ्येत्यर्थः[४] ॥

न शरीरत्वविरोध इति ॥ न पृथिव्यादिशरीरत्वविरोध इत्यर्थः[५] ।

---

१. .'परोऽप्यस्मिन्' ह. ।

२. 'पृथिव्यादिशरीरित्वस्यैव तद्धर्मत्वादित्यत आह – शीर्यत इति ॥' – क.

३. 'शीर्यता अस्त्येव' – क.

४. 'शरीरमुच्यत इत्यर्थः' – क.

५. 'पृथिव्यादिशरीरकत्वोक्तिविरोध इत्यर्थः' क.

विष्ण्वन्तर्यामितायाः अतद्धर्माभिलापोक्तेर्वेति शेषः । विष्णोः पृथिव्याद्यात्मकत्वतच्छरीरत्वाभ्यां पृथिव्यादिशरीरत्वानुपपत्तावपि शरीरशब्दस्य पृथिव्यादिषु योगवृत्तिमाश्रित्य तस्मिन् पृथिव्यादिशरीरत्वव्यपदेशोपपत्तेरितरत्र तदनुपपत्तेरिति भावः ॥

यत्तु बृहदारण्यभाष्ये –

'पृथिव्याद्या देवतास्तु देहवद् यद्वशत्वतः ।

[1]शरीरमिति चोच्यन्ते यस्य [2] विष्णोः महात्मनः ॥'

इति प्रमाणानुसारेण पृथिव्यादेर्ब्रह्मशरीरत्वं गौणमित्युक्तम् । तत्पुराणादिषु प्रपञ्चे ब्रह्मकायत्वाद्युक्तिसमर्थनायेति न तद्विरोधः ॥ ५ ॥

॥ इत्यन्तर्याम्यधिकरणम् ॥ ५ ॥

---

१. 'शारीरमिति' – क.

२. 'तस्य' – क.

॥ ६. अथादृश्यत्वाधिकरणम् ॥

(विष्णोरदृश्यत्वादिगुणवत्त्वप्रतिपादनम्)

अदृश्यत्वादिगुणा विष्णोरुक्ताः ।

॥ ६. अथादृश्यत्वाधिकरणम् ॥

अत्राधिकरणे दृश्यत्वाद्याभावाख्यलिङ्गं ब्रह्मणि समन्वीयते । पूर्वाधिकरण-तद्विषयसङ्गतिविषयवाक्योदाहरणपूर्वकं विषयसंशयौ सयुक्तिकं पूर्वपक्षं च सूचयति – **अदृश्यत्वादीति** ॥ **'गुणाः'** शुभधर्माः । आदिपदेना-नात्म्यादिग्रहणम् । **उक्ता इति** ॥ आनन्दमयस्य **'अदृश्ये'** इति वाक्येनेति च शेषः । उपलक्षणमेतत् । अन्तःस्थस्य **'न विजानन्ति'** (तै.आ.३-११) इत्यनेन सर्वगतस्य **'स योऽतोऽश्रुतः'** (ऐ.आ. ३-२-४.) इत्यनेन अन्तर्यामिणः **'यं पृथिवी न वेद'** (बृ. ५-७-३.) इत्यव्यवहितपूर्वाधिकरणोदाहृतवाक्येन चेत्यपि द्रष्टव्यम् ॥

तत्र -

'यत्तदद्रेश्यमग्राह्यमगोत्रमवर्ण-
मचक्षुःश्रोत्रं तदपाणिपादम् ।
नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं
यद् भूतयोनिं परिपश्यन्ति धीराः' ॥ *(मुं.१-१-६.)*

इत्युक्त्वा –

उक्ता इत्यावर्तते । **'उक्त्वा'** इत्यनन्तरम् आम्नात इति शेषः । तेन क्त्वाप्रत्ययोपपत्तिः । चन्द्रिकायां तु – इत्युक्त्वा प्रतीयत इति भाष्ये क्रिययोः समानकर्तृकत्वाभावेऽपि क्त्वाप्रत्ययो **'यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते'** इतिवद् द्रष्टव्यमित्युक्तेरप्ययमेवाभिप्रायः । पर इतीत्यनन्तरं वाक्य इति शेषः ।

'तस्माच्च' इति पदद्वयं भाष्यकारीयम् । तथाचेत्थं योजना – पूर्वं ये अदृश्यत्वादिगुणा विष्णोरुक्तास्ते यत्र कस्यचिदक्षरस्योक्तास्तत्राऽथर्वणेऽदृश्यत्वादिगुणकाक्षरविषये **'यत्तदद्रेश्यमग्राह्यम्'** इत्याद्युक्त्वा तथा तत्रैव **'यथोर्णनाभिः'** इत्यादि **'विश्वम्'** इत्यन्तं वाक्यं चोक्त्वा पठित्वा अनन्तरमाम्नाते -

'दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः ।

अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः ॥'

इत्युत्तरवाक्ये **'तस्मादक्षरात्'**[१] प्रकृतादक्षरादपि **'परः'** उत्तमः **'प्रतीयते'** प्रतिपाद्यतया ज्ञायत इति । अनेन पूर्वोक्तादृश्यत्वस्य विष्ण्वन्यनिष्ठत्वाक्षेपात् पूर्वेणाऽनन्दमयाद्यधिकरणेन[२] अस्याऽक्षेपिकी सङ्गतिः । अदृश्यत्वादिरूपो विषयः । किं विष्णोरन्यस्य वेति सन्देहः । न विष्णोरदृश्यत्वादीति पूर्वः पक्षः। [३]अदृश्यत्वादिविशिष्टे **'अक्षरात् सम्भवति'** इत्यक्षरशब्दश्रवणात् तस्य च तत्परत्वोक्त्या विष्णोः निरवकाशत्वादिति पूर्वपक्षयुक्तिश्च सूचिता भवतीति ॥

श्रुत्यर्थस्तु – **'यत्'** परविद्यागम्यमक्षरं **'तदद्रेश्यं'**[४] दृश्यशब्दित-चक्षुरादिज्ञेयभिन्नम् । **'अग्राह्यं'** मनोग्राह्यभिन्नम् । **'अगोत्रं'** न विद्यते गोत्रादिकं यस्य तद्धि तथोच्यते इति सुधोक्तैर्वशिष्ठादिगोत्रहीनम् । **'अवर्णं '** [५]प्राकृत-शुक्लादिवर्णहीनम् । [६]अदृश्यत्वादिशब्दैर्दृश्याद्यन्योन्याभावोऽभिधीयत

---

१. 'तथाऽक्षरादिति प्रकृतात्' – क.
२. 'आनन्दमयाधिकरणेन'– क.
३. 'अदृश्यत्वादिगुणविशिष्टे' – क.
४. 'अदृश्यम्, दृश्यादन्योऽदृश्यः – इति सुधोक्तेश्चक्षुरादिदृश्यभिन्नम्'– क.
५. 'ब्राह्मणादिवर्णहीनं, प्राकृतनीलपीतादिवर्णहीनं वा' – क.
६. इयं पङ्क्तिः क. पुस्तके नास्ति ।

इति सुधोक्तेः गोत्रवर्णभिन्नत्वं चार्थः । तत् **'अचक्षुःश्रोत्रं'** प्राकृतज्ञानेन्द्रियादिशून्यम् । तत् **'अपाणिपादं'** प्राकृतकर्मेन्द्रियशून्यं **'नित्यं'** स्वरूपनाशरहितं[१] **'विभुं'** समर्थं **'सर्वगतं'** व्याप्तं **'सुसूक्ष्मम्'** अत्यन्ताव्यक्तं **'यद्भूतयोनिं'**[२] **'धीराः'** ज्ञानिनः परिपश्यन्ति **'तदक्षरम्'** अव्ययं देहतो नाशशून्यमिति ॥

अत्र तच्छब्दस्य सर्वत्रान्वयाय त्रिर्ग्रहणम् । भूतयोनिपदं च सत्तर्कदीपावल्यां भूतानाम् आकाशादीनां ब्रह्मादिचेतनानां वा केषाञ्चित् स्त्रीव्यवधानेन विना स्वदेहादेवोत्पादकमिति व्याख्यातम् । धीरा इत्यनेनादृश्यत्वदृश्यत्वयोर्विरोधः परिहृतः ॥

'यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः सम्भवन्ति ।
यथा सतः पुरुषात् केशलोमानि
तथाऽक्षरात् सम्भवतीह विश्वम् ॥' *(मुं.१-१-७,)*
इत्युक्त्वा तस्माच्च –
'अक्षरात् परतः परः' *(मुं. २-१-२,)* **इति परः प्रतीयते ।**

एतदेव दृष्टान्तोक्त्या स्पष्टयति – **यथेति ॥ 'यथोर्णनाभिः'** तन्तुवायः **'सृजते'** स्वोपभुक्तवस्तूनि तन्त्वात्मना परिणतानि स्वदेहान्निष्कासयति । **'गृह्णते'** चक्राद्याकारतया बहिर्निष्कासितं वस्तु पुनरन्तः स्वोदरे गृह्णाति । तथा विश्वं प्रलये निगीर्णं सृष्टौ अक्षरात् सम्भवति[३] । दृष्टान्तान्तरमाह –

१. **'नाशरहितम्'** – क
२. **'-योनिं प्राणिकारणम्'** – क.
३. **'बहिः सम्भवतीति'** – क.

यथेति ॥ **'ओषधयः'** अङ्कुरादयः । दृष्टान्तान्तरमाह – **यथेति ॥** **'सतो'** जीवतः[१] पुरुषाच्छरीरात् शिरस्थाः केशाः, अन्यानि लोमानि तानि । **'इह'** लोके **'विश्वं'** नानाविधकार्यं **'सम्भवति'** जायत इत्यर्थः । अत्र ब्रह्मणो भूतकारणत्वं तत्कर्तृत्वरूपं न तूपादानत्वमिति वक्तुमाद्यो दृष्टान्तः । अङ्कुरादिजनने पृथिवी बीजमिव विश्वसृष्टौ ब्रह्म तत्कर्मापेक्षत इति वक्तुं द्वितीयः । अनायासेन सृष्टिरिति वक्तुं तृतीयः[२] ॥

दिव्य इत्यादिवाक्यं तु **'दिव्यः'** अद्भुतः **'अमूर्तो'** नियतपरिच्छिन्नपरिमाणरहितः। किन्तु बाह्य आभ्यन्तरश्च । अप्राणो ह्यमना इति पदाभ्यां षोडशकलाराहित्यमुच्यते । **'शुभ्रः'** शुद्धः जडात् **'परतः अक्षरात्'** चित्प्रकृतेः पर इति कर्मनिर्णयटीकायां व्याख्यातम् ॥

अतोऽब्रवीत् -

सू - ॐ ॥ अदृश्यत्वादिगुणको धर्मोक्तेः ॥ ॐ ॥ २१ ॥

सिद्धान्तयत्सूत्रमवतारयति – **अत इति ॥** इति सङ्गतिसम्भवाद् इति शङ्कासम्भावाच्च तदुत्तररूपं [३] सूत्रमब्रवीद्बादरायण इत्यर्थः । तत्सूत्रं पठति - **अदृश्यत्वादीति ॥**

पृथिव्यादिदृष्टान्तमुक्त्वा -

'अक्षरात् सम्भवतीह विश्वम्' *(मुं. १-१-७)*

इत्यतः परं तत्परतः पराभिधानात्

---

१. 'जीवतः' – क.
२. 'तृतीय इति ध्येयम् । ' – क.
३. 'तदुत्तरं सूत्रम्' – क.

'कूटस्थोऽक्षर उच्यते' *(भ.गी. १५-१६.)*

इति स्मृतेश्च प्रकृतेः प्राप्तिः ।

नन्वदृश्यत्वादिकं विष्णोर्न चेत् – तर्हि वाक्यस्य निर्विषयतयाऽप्रामाण्यं स्याद् इत्यतः पूर्वपक्षं विशदयति – **पृथिव्यादीति** ॥ श्रुतावूर्णनाभिदृष्टान्तस्य प्राथम्येऽपि तत्र सृजत इत्यनेन कर्तृत्वमात्रप्रतीतेः पूर्वपक्षानुकूलस्योपादानतया जगत्कारणत्वस्याप्रतीतेः तं [१] परित्यज्य पृथिव्यादीत्युक्तम् । चः समुच्चये । तथा चेत्थं योजना - पृथिव्यादिदृष्टान्तमुक्त्वा अनन्तरमुक्तात् **'अक्षरात् सम्भवतीह विश्वम्'** इत्यतो वाक्यात् **'परम्'** अनन्तरमधीतेन **'अक्षरात्परतः परः'** इति वाक्येन **'तत्परतः'** तस्मात् कारणीभूतादक्षरात् परतः परस्योत्तमस्योक्तत्वात्, तथा **'कूटस्थोऽक्षर उच्यते'** इति स्मृतेश्च जडप्रकृतेश्चित्प्रकृतेश्चादृश्यत्वादि-प्राप्तिरिति ॥

अत्रायं विवेकः – यदा जडप्रकृतेः पूर्वपक्षविषयता तदाऽक्षरशब्दो हेतुः तत्परतः पराभिधानं च । तस्य निरवकाशत्वे [२] अक्षरात्परत इति च व्यधिकरणे पञ्चम्यौ । यदा च चित्प्रकृतेस्तदाऽक्षरशब्दस्तत्परो हेतुः । समानाधिकरणे पञ्चम्यौ । स्मृतेश्चेत्यपि हेतुरिति । स्मृतिश्चात्राधिकरणे व्याख्याता ॥

ब्रह्मशब्दात्तत्परतः पराभिधानादेव च हिरण्यगर्भस्य ।

पूर्वपक्षान्तरं वक्ति – **ब्रह्मशब्दादिति** ॥ **'स ब्रह्मविद्याम्'** इत्यादौ श्रुतब्रह्मशब्दादित्यर्थः । ब्रह्मशब्दो विष्णावेव मुख्य इति तस्यैव साधको नेतरस्येत्यतो हेत्वन्तरमाह – **परत इति** ॥ व्यधिकरणे पञ्चम्यौ । तथा च - हिरण्यगर्भाख्यादक्षरात् **'परतः'** श्रीतत्त्वात् परस्य विष्णोरभिधानादित्यर्थः ।

---

१. 'तत्' – क.

२. 'निरवकाशत्वे हेतुस्तदाऽक्षरशब्दो जडपरोऽक्षरात्' – क.

एवशब्देन हेतोर्निरवकाशत्वं नात्र हेत्वन्तरं गवेषणीयमिति च सूचयति । हिरण्यगर्भस्य प्राप्तिरित्यन्वयः । उपलक्षणमेतत् । **'कर्तारमीशम्'** इतीश-शब्दश्रवणाद् रुद्रस्य वा अदृश्यत्वादिप्राप्तिरिति वक्ष्यमाणमत्रापि द्रष्टव्यम् । अस्मिन् पक्षे[1] ईशशब्दस्य विष्णौ सावकाशत्वशङ्कायामनन्तरं तत्परतः पराभिधानादित्यपि योज्यम्[2] । अत्रापि व्यधिकरणे पञ्चम्यौ ॥

'तमेवं विद्वानमृत इह भवति' *(तै.आ. ३-१२-७.)*
'तत्कर्म हरितोषं यत् सा विद्या तन्मतिर्यया ।'

'अथ द्वे वाव विद्ये वेदितव्ये परा चैवापरा[3] च । तत्र ये वेदा यान्यङ्गानि यान्युपाङ्गानि यानि प्रत्यङ्गानि साऽपरा । अथ परा यया स हरिर्वेदितव्यो योऽसावदृश्यो निर्गुणः परः परमात्मा'

(मुं. १-१-५.)

इत्यादिना तद्धर्मत्वेनावगतपरविद्याविषयत्वोक्तेर्विष्णुरेवा-दृश्यत्वादिगुणकः ॥ २१ ॥

एवं प्राप्तं पूर्वपक्षं प्रतिक्षेप्तुं सूत्रं व्याचष्टे – **तमेवमिति ॥** **'तमेवम्'**[4] इत्येकं श्रुतिवाक्यम् ॥

'तत्' इत्यपरं स्मृतिवाक्यम् ॥

'अथ' इत्यन्यच्छ्रुतिवाक्यम् । आदिपदेन **'तदेतद् ब्रह्म'** (बृ.४-५-१९.)

---

१. **'पक्षेऽपि'** – क.
२. **इत्यपि हेतुर्योज्यः'** – क.
३. **'परा चापरा च'** ह. ।
४. **'इति चैकं'** – क.

'त्रिपादस्यामृतम्' (ऋ.१०-९०-३.) इत्यादिकं गृह्यते । [१]तस्य विष्णोर्धर्मस्तद्धर्मः तस्य भावस्तत्त्वं तेनेति [२]विग्रहः । प्रकारे तृतीया । अवगतत्वं प्रसिद्धत्वं विषयत्वविशेषणम् [३]। अमृतत्वादेरप्युपलक्षकमेतत् । अत्रेति शेषः । सूत्रेऽनुवृत्तस्य तत्त्वित्यस्यार्थो विष्णुरेवेति । अत्रादृश्यत्वं दृश्यभिन्नत्वम् । तच्च स्वरूपम्[४], न तु गोत्राद्यत्यन्ताभाववद्ब्रह्मभिन्नम् । तत्र तद्धत्त्वं ब्रह्मस्वरूपमिति विशेषं वक्तुम् [५]अदृश्यत्वादयो गुणा यस्येति बहुव्रीहित्वं [६]च सूचयितुं शुभधर्मार्थकगुणशब्दप्रयोगः कप्रत्ययश्च ॥

तथा चेत्थं सूत्रभाष्ययोजना - अदृश्यत्वादिगुणकस्तत्तु विष्णुरेव । कुतः ? [७]अत्र प्रकरणे **'अथ परा यया तदक्षरमधिगम्यते'** (मुं. १-१-५.) [८]**'तदेतदक्षरं ब्रह्म'** (मुं.२-२-२) **'पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम्'** (मुं.२.१.१०) इति वाक्येषु तस्यादृश्यत्वादिगुणकस्य परविद्याविषयत्वरूपधर्मोक्तेः । न च तस्य परविद्याविषयत्वोक्तावपि[९] कुतो विष्णुत्वमिति वाच्यम् । यतस्तत् **'तमेवम्'** इत्यादिना तद्धर्मत्वेनावगतमिति [१०] ॥

---

१. 'आदिशब्दापाठे इतिशब्द आद्यार्थे । तस्य' – क.
२. 'तेनेति स चासौ धर्मश्चेति च विग्रहः' – क.
३. 'अवगतत्वं श्रुत्यादिसिद्धत्वरूपम् । स्पष्टत्वं विषयत्वविशेषणं चैतत्'– क.
४. 'ब्रह्मस्वरूपम्' – क.
५. 'वक्तुं शुद्धधर्मार्थकगुणशब्दप्रयोगः ।'– क.
६. 'बहुव्रीहित्वात् कप्रत्ययः' – क.
७. कुतः ? अत्र तद्धर्मोक्तेः 'यया तदक्षरं' – क.
८. 'तदक्षरं ब्रह्म' – क.
९. '-विषयत्वायुक्तावपि'– क.
१०. 'यतस्तद्धर्मत्वेनावगतम् । केनेत्याकाङ्क्षायाम् इत्यादिनेत्युक्तम् । एवमादिसमाख्यावाक्येनेत्यर्थः । अत्र' – क.

अत्र **'तमेवम्'** इति श्रुतौ मोक्षसाधनज्ञानविषयत्वोक्त्या विष्णोः परविद्या-विषयत्वमुक्तं भवति । मोक्षसाधनविद्याया एव परविद्यात्वात् ॥

तत्कर्मेति स्मृतावपि यद्धरितुष्टिकरं तदेव कर्म । यया **'तन्मतिः'** हरेः ज्ञानं भवति, सैव विद्येत्युक्तत्वेन तस्य परविद्याविषयत्वमुच्यते । **'द्वे विद्ये वेदितव्ये'** (मुं.१-१-४.) इत्यत्रापि विष्णोः परविद्याविषयत्वमुच्यत इति न हेतुविशेषणासिद्धिः ॥

अथेति प्रकरणारम्भे [१]। वावेत्यवधारणे । चौ परस्परसमुच्चये । तथा च परा चापरा च द्वे विद्ये ज्ञातव्ये । **'तत्र'** परापरयोर्मध्ये **'ये वेदाः'** ऋगाद्याः यानि शिक्षादिषडङ्गानि **'यान्युपाङ्गानि'** आयुर्वेदगान्धर्वादीनि[२]। **'यानि प्रत्यङ्गानि'** शिष्टाः कला विद्याः साऽपरा[३]। अथेत्यर्थान्तरे[४]। योऽसौ **'अदृश्यो'** दृश्यादन्यो **'निर्गुणः'** सत्त्वादिहीनः **'परो'** विलक्षणः **'परमात्मा'** सर्वोत्तमो व्याप्तः स हरिर्यया वेदितव्यः सा ऋगादिरूपैव परेति श्रुत्यर्थः ॥ तथा च यथैकस्य कर्मणः सकामत्वनिष्कामत्वरूपोपाधिभेदात् प्रवृत्तनिवृत्तपदोदितत्वं तथा विष्णुविषयकत्वकर्मादिविषयकत्व[५]रूपोपाधिभेदादृगादीनाम् एव परापरविद्यात्वोपपत्तिरिति भावः ॥[६]

---

१. **'प्रकरणान्तरारम्भे'** – क.
२. **'आयुर्वेदधनुर्वेदगान्धर्वादीनि'** – क.
३. **'साऽपरा विद्या विष्ण्वन्यकर्मादिपरत्वरूपोपाधिनेति भावः'** – क.
४. **'अथेत्यर्थान्तरे । परोच्यत इति शेषः । तथा च योऽसौ प्राणे स्थितः प्रसिद्धः इति वाऽदृश्यः'** क.
५. **'विष्णुविषयत्वाविषयकत्वरूपोपाधिभेदाद्'** – क.
६. इतः परं क.पुस्तकपत्राणि नोपलब्धानि । यथोपलब्ध ग. पुस्तकानुसारेण पाठान्तराणि दीयन्ते ।

(This Manuscript No.277 belongs to P.P.S.M. Lalbrary)

न चानुव्याख्याने ब्रह्मसूत्रस्य परविद्यात्वोक्तिविरोधः । अनुग्राह्यतया ऋगादीनामनुग्राहकतया ब्रह्मसूत्रस्य च परविद्यात्वोपपत्तेः ॥

सू – ॐ ॥ विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ ॥ ॐ ॥ २२ ॥

यदुक्तं प्रकृतिविरिञ्चयोरदृश्यत्वादिगुणकत्वमिति तत्सिद्धान्तहेतोः परपक्षनिरासेऽपि व्यापारात् तद्धर्मोक्तेरित्यनेनोक्तस्य परविद्याविषयत्वस्य विष्णोरन्यत्र निरवकाशत्वान्यथानुपपत्त्या निराकृतमपि विशेषयुक्त्या निराकुर्वत्सूत्रं पठित्वा व्याचष्टे - **विशेषणेति** ॥ व्यपदेशशब्द उभयान्वयीत्याशयेनोभयश्रुतिमाह– **य इति** ॥ **'भेदः'** अन्यत्वम् । चशब्दस्य न केवलं धर्मोक्तेः, किन्तु विशेषणभेदव्यपदेशाभ्याम् इति समुच्चयार्थत्वस्य स्पष्टत्वान्न तस्यार्थ उक्तः । प्रकृतिः विरिञ्च इत्यनेन इतरा इतरश्चेति विग्रहाश्रयेणेतरशब्दार्थोऽभिहितः । उभयत्रादृश्यत्वादिगुणक इत्यनुषज्यते । प्रकृतिपक्षे लिङ्गविपरिणामः । तथा च **'यस्सर्वज्ञः'** इति वाक्ये तस्यादृश्यत्वादिगुणकस्य **'विशेषणात्'** सार्वज्ञ्यादिविशेषणोक्तेर्न दृश्यत्वादिगुणा[1] जडप्रकृतिः । एवं **'तस्मात्'** इति वाक्ये विरिञ्चस्य तस्मादक्षराज्जन्यत्वरूपभेदकधर्मोक्त्या भेदव्यपदेशान्नादृश्यत्वादिगुणो विरिञ्च इति योजना ॥

'यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः' *(मुं. १-१-९)*

इति विशेषणान्न प्रकृतिः ।

'तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते' *(मुं. १-१-९)*

इति भेदव्यपदेशान्न विरिञ्चः ।

आथर्वणे **'यः सर्वज्ञः सर्ववित्'** इत्यतः[2] पूर्ववाक्ये **'तपसा चीयते ब्रह्म'**

---

१. 'अदृश्यत्वादिगुणा' – ग. २.'इत्यन्ततः' - ग.

(मुं.१-१-८) इत्यत्र परब्रह्म[1] तपसा सम्बध्यत इत्युक्तम् । तत्[2] तपश्शब्द-स्याऽलोचनार्थतयाऽज्ञानप्रतीतौ तन्निरासाय **'यस्य ज्ञानमयं तपः'** इति वाक्यान्तरं प्रवृत्तम् । तस्य यस्य **'तपः'** आलोचनक्रिया **'ज्ञानमयं'** तदात्मकमेव न संशयाद्यात्मकमित्यर्थः । कुतस्तपसः सन्तापान्यपूर्णयथार्थ-ज्ञानात्मकत्वमित्याकाङ्क्षायां तस्य सर्वज्ञत्वादाप्तकामत्वादिति हेतुप्रदर्शनाय **'यस्सर्वज्ञः'** इति पूर्ववाक्योपन्यासः ॥

तदर्थस्तु – **'यः सर्वज्ञः'** सर्वविषयकसामान्यज्ञानवान् **'सर्ववित्'** सर्वविषयकविशेषज्ञानवांश्च । सर्वस्य लब्धा सर्वकामः सर्वोत्पादको वेति । तत्त्वप्रदीपे तु – विद सत्तायामिति धातुव्याख्यानात् सर्वत्र विद्यत इति सर्वविदित्युक्तम् ॥

'यस्य यः' इति यच्छब्दद्वयस्य **'तस्मात्'** अक्षरात् **'एतद् ब्रह्म'** चतुर्मुखाख्यं **'नाम रूपमन्नं'** तदभिमानिदैवतं चोत्पद्यत इत्युत्तरवाक्यगततच्छब्देनान्वयः ॥

'अपरं त्वक्षरं या सा प्रकृतिर्जडरूपिका ।
श्रीः परा प्रकृतिः प्रोक्ता चेतना विष्णुसंश्रया ॥
तामक्षरं परं प्राहुः परतः परमक्षरम्
हरिमेवाखिलगुणमक्षरत्रयमीरितम् ॥'
इति स्कान्दे त्र्यक्षराभिधानादक्षरात्
परतः पर इत्यपि विशेषणमेव ॥

---

१. 'परं ब्रह्म' – ग.
२. 'तत्र' – ग.

ननु न विष्णोरदृश्यत्वादिगुणकत्वं, परतः पराभिधानेनाक्षरश्रुतेस्तत्र निरवकाशत्वादित्यतो विशेषणभेदव्यपदेशादिति सूत्रखण्डस्यार्थान्तरमाह – **अपरमिति ॥** तुशब्दोऽवधारणे । **'अक्षरत्रयम्'** अक्षरस्य त्रयम् **'ईरितम्'** अक्षरं त्रिविधं प्रोक्तम् इति यावत् । तिस्रो विधाः व्यक्तिनिर्देशपूर्वकं दर्शयति – **अपरमिति ॥** या यदपरमक्षरं सा जडरूपिका प्रकृतिरेव । या यत्परमक्षरं **'प्रोक्ता'** प्रोक्तं वृद्धैस्तां तद् या विष्णुसंश्रया परा उत्तमा चेतना प्रकृतिः श्रीः लक्ष्मीः तां प्राहुः । यत्परतः परमक्षरमीरितं तज्जडप्रकृतेः पराछ्रीतत्त्वादखिलगुणं हरिमेव प्राहुरिति स्मृत्यर्थः । इति स्कान्दे इत्यस्य **'त्र्यक्षराभिधानात्'** अक्षरत्रैविध्यस्योक्तत्वादित्यनेनान्वयः ॥

अक्षरात् परतः पर इत्यपीति । इति वाक्योक्तमक्षरात्परतः परत्वमपीत्यर्थः । अपिः समुच्चये । तस्येति शेषः । तेनैवकारस्यान्वयः । तथा च न केवलं सार्वज्ञं विशेषणम्, किन्त्वक्षरात् परतः परत्वमपि तस्य विष्ण्वाख्यप्रकृताक्षरस्यैव विशेषणं, न तु प्रकृताक्षरमवधीकृत्यान्यस्य कस्यचिद् विशेषणम् । येनाक्षरश्रुतेर्विष्णाववकाशाभावः ॥

न चाक्षरस्याक्षरात् परतः परत्वं विरुद्धमिति वाच्यम् । **'अपरम्'** इति स्कान्दे त्र्यक्षराभिधानाद् अक्षरान्तरात् परादस्याक्षरस्य परत्वोपपत्तेरिति योजना । अक्षरत्रयाभिधानेन अक्षरात् परतः पर इत्यत्र सामानाधिकरण्येन वैयधिकरण्येन वाऽन्वयो दर्शितः ॥

प्रमेयदीपे तु – अक्षराच्छ्रीतत्वात् परतः परोऽत्युत्तम इति तद्भाष्यदिशा श्रुत्यर्थ उक्तः । अनेनाक्षरात्परतः पर इत्यपि तस्यैव विशेषणं, न त्वन्यस्य । न चाक्षरात्परतः परत्वं विरुद्धमिति वाच्यम् । भेदव्यपदेशात् । **'अक्षरत्रयमीरितम्'** इत्यक्षराणामवान्तरभेदोक्तेः पाण्डवस्यार्जुनस्य स्वाधमकार्तवीर्यार्जुनादिव

अक्षरात्परादक्षरान्तरादस्याक्षरस्य परत्वोपपत्तिरिति सूत्रखण्डस्यार्थान्तरमुक्तं भवति ॥

'जुष्टं यदा पश्यत्यन्यमीशमस्य
महिमानमिति वीतशोकः' *(मुं.३-१-२)*

इति भेदव्यपदेशादीशपदप्राप्तोऽपि[1] न रुद्रः ॥ २२ ॥

ननु **'अन्यम्'** इति शब्दश्रवणाददृश्यत्वादिगुणको रुद्रः किं न स्यादिति शङ्कोत्तरतयाऽपि भेदव्यपदेशान्नेतर इति सूत्रांशं व्याचष्टे – **जुष्टमिति** ॥ यद्यपि तथाऽपीत्यर्थेऽपिशब्दः । रुद्रोऽपीति समुच्चये वा । न केवलं पूर्वहेतोः, किन्तु भेदव्यपदेशादपीति समुच्चये वा । रुद्र इतीतरशब्दस्यार्थान्तरोक्तिः । न चेतरशब्दस्य जडप्रकृतिविरिञ्चरुद्रपरत्वे द्विवचनानुपपत्तिरिति वाच्यम् । विरिञ्चिरुद्रयोश्चेतनत्वेनैकीकृतत्वात् । तथा च यद्यपीशशब्दाद् रुद्रोऽप्यदृश्यत्वादिगुणकत्वेन **'प्राप्तः'** प्रतीतः, तथाऽपि **'जुष्टम्'** इति वाक्ये प्रवृत्तविष्ण्वाख्याक्षरस्येशशब्दितरुद्रादन्यत्वव्यपदेशादपि नादृश्यत्वादिगुणको रुद्र इति योजना । श्रुतिस्तु आनन्दमयाधिकरणे व्याख्याता ॥

सू - ॐ ॥ रूपोपन्यासाच्च ॥ ॐ ॥ २३ ॥

'यदा पश्यः पश्यते रुक्मवर्णं[2] कर्तारमीशं पुरुषं ब्रह्मयोनिम्'
(मुं. ३-१-३.) **इति ।**

युक्त्यन्तरेण विष्णोरेवादृश्यत्वादिगुणकत्वं साधयत्सूत्रं पठित्वा तदुपात्तश्रुतिमेवोदाहरति – **रूपोपन्यासेति**[3] ॥ इति रूपोपन्यासादित्यन्वयः । सूत्रे

१. .'ईशशब्दप्राप्तोऽपि' -ह. ।
२. .'रुग्मवर्णम्'– ह. । ३. 'रूपेति' – ग.

चशब्दो युक्तिसमुच्चये । तथा च – न केवलं धर्मोक्तेः, किन्त्वदृश्यत्वादि-गुणकस्य **'यदा'** इति [1]श्रुतौ शुद्धरुक्मरूपोक्तेश्चादृश्यत्वादिगुणको विष्णुरेवेति योजना ॥

अत्र यदेति वाक्यस्य **'तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति'** (मुं. ३-१-३) इति वाक्यशेषेणान्वयः । पश्यतीति पश्यो द्रष्टा जीवः । यदा [2]**'रुक्मवर्णं'** शुद्धहेमवर्णं **'ब्रह्मयोनिं'** हिरण्यगर्भकारणं, अत एव जगतः कर्तारं **'पुरुषं'** पूर्णषड्गुणं 'स्वस्येशं' विष्णुं **'पश्यते'** पश्यति तदाऽसौ **'विद्वान्'** जीवन्मुक्तः **'पुण्यपापे'** अप्रारब्धे अनिष्टपुण्यं पापं च विधूय **'निरञ्जनः'** ज्ञानोत्तरविकर्मकृताशुचित्वादिदोषरहितः अञ्जनाख्याविद्यारहित इति सुधोक्तेरज्ञानरहितो वा **'परमं साम्यं'** पूर्णानन्दत्वादिसाम्यं निर्दुःखत्वादिसाम्यं वा **'उपैति'** प्राप्नोतीति श्रुत्यर्थः ॥ तत्त्वोद्योतटीकायां त्वियं श्रुतिः मुक्तपरतया व्याख्याता । परममित्येतदभिव्यक्तमिति च व्याख्यातम् ॥

'एको नारायण आसीन्न ब्रह्मा न च शङ्करः । स मुनिर्भूत्वा समचिन्तयत्[3] । तत एते व्यजायन्त विश्वो हिरण्यगर्भोऽग्निर्यमो वरुणरुद्रेन्द्रा इति । तस्य हैतस्य परमस्य नारायणस्य चत्वारि रूपाणि शुक्लं रक्तं रौक्मं[4] कृष्णमिति । स एतान्येतेभ्योऽभ्यचीक्लृपत् । विमिश्राणि व्यमिश्रयत् ।

ननु ब्रह्मादीनामपि रूपसद्भावात् कुतो रूपोपन्यासेनास्य विष्णुत्वनिश्चय इत्यत आह – **एक इति ॥** **'इदमग्रे'** इत्युपस्क्रियते । अत एव न्यायदीपिकायां जगदादावित्युक्तम् । हेत्यास्वादने । एतेभ्य इति तादर्थ्ये चतुर्थी । तथा च

---

१. 'श्रुतः शुद्धरुग्म-' ग. ३.'समाचिन्तयत्' - ह. ।
२. 'रुग्मवर्णम्' – ग. ४. 'रौग्मम्' – ह. ।

इदमस्य जगतोऽग्रे प्रलये नारायणः **'एकः'** स्वतन्त्र आसीत् । न तदा चतुर्मुखशङ्करौ, न स्वस्वव्यापारावास्ताम् । **'सः'** विष्णुस्तदा **'मुनिः'** मननशीलो मौनी वा भूत्वा **'समचिन्तयत्'** एते जायन्तामिति ध्यानरूपां चिन्तामकरोत् । **'ततः'** तस्य चिन्तनादेते व्यजायन्त । के ते ? यो **'विश्वो'** वायुः, यश्च हिरण्यगर्भः, येऽग्न्यादय एत इत्यर्थः । ततः किमित्यत आह – **'तस्य'** श्रुत्यादिप्रसिद्धस्य **'एतस्य'** सर्वजीवशरीरगस्य **'परमस्य'** सर्वोत्तमस्य नारायणस्य **'रूपाणि'** वर्णाश्चत्वारि भवन्ति । कानि तानि ? शुक्लादीनि । किञ्चातः ? **'सः'** नारायणः पूर्वमेव **'विमिश्राणि'** स्वेन मिश्रीकृतानि रूपाणि **'एतेभ्यो'** वायुप्रभृत्युक्तदेवानामर्थे **'अभ्यचीक्लृपत्'** क्लृप्तान्यकरोत् । तानि विमिश्राणि पुनरपि **'व्यमिश्रयत्'** मानुषादौ विशेषेण मिश्रीचकार । यद्वा – स एतानि रूपाणि व्यमिश्रयत्, विमिश्राणि चैतेभ्योऽभ्यचीक्लृपदित्यर्थः । शुद्धानि रूपाणि तु स्वस्यैवाकरोदिति भावः ॥

अत्राऽद्ययोजना तत्त्वप्रदीपटीकयोरुक्ता । द्वितीया तु टीकायामिति ध्येयम् ॥

अत एतादृगेतद्रूपम्' इति तस्यैव हि रूपाण्यभिधीयन्ते ॥२३॥

॥ इत्यदृश्यत्वाधिकरणम् ॥ ६ ॥

ततः किमित्यत आह – **अत इति ॥** अतो मिश्रीकरणात् तद्रूपं तस्य विष्णो रूपम् **'एतादृगेव'** शुद्धं शुक्लादिस्वरूपमेव [१] । न तु वाय्वादिरूपमिव मिश्रमित्यर्थः । यद्यप्यत्र **'तस्य हैतस्य'** इत्यादिकमेवोदाहरणीयम्, प्रकृतोपयुक्तत्वात्, न तु **'एको नारायणः'** इत्यादिकम् । तथाऽपि **'एतेभ्यः'** इत्यस्यार्थस्य प्रत्ययार्थं तदंशोदाहरणं कृतम् । **इतीति । 'हि'** यस्माद् इति

१. **'शुद्धशुक्लादिस्वरूपमेव'** – ग.

उदाहृतवाक्येन **'रूपाणि'** [१]शुद्धरौक्मादिरूपाणि तस्य विष्णोरेवाभिधीयन्ते, नेतरेषां, तस्मान्नाप्रयोजकता शङ्क्चेत्यर्थः । अनेन सूत्रे सामान्येनोक्तत्वेऽपि रूपशब्दः शुद्धरूपपरः । तच्चान्यत्र नास्ति । **'ध्येयः सदा'** इति सूर्ये प्रतीतमपि मिश्रमेवेति लिङ्गस्यान्यत्र निरवकाशत्वमुक्तं भवति ।।

॥ इत्यदृश्यत्वाधिकरणम् ॥ ६ ॥

---

१. 'शुद्धरौग्म्यादिरूपाणि' – ग

॥ ७. अथ वैश्वानराधिकरणम् ॥

(विष्णौ वैश्वानरशब्दसमन्वयः)

अदृश्यत्वादिगुणेषु सर्वगतत्वं
'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते'
(छां. ५-१८-१.) **इति वैश्वानरस्योक्तमिति ॥**

॥ ७. अथ वैश्वानराधिकरणम् ॥

अत्राधिकरणे पाचकत्वाद्यनेकलिङ्गसमन्वयसिद्ध्यर्थं ब्रह्मणि वैश्वानरनामसमन्वयः क्रियते ।[1] पूर्वाधिकरणसङ्गतिं विषयवाक्योदाहरणपूर्वकं विषयादिकं सूचयति – **अदृश्यत्वादीति** ॥ उक्तमित्यस्याऽवृत्तिः श्रुताविति शेषः । तथा च – गताधिकरणोदाहृतमुण्डकश्रुत्युक्तादृश्यत्वादिगुणेषु मध्ये **'नित्यं विभुं सर्वगतम्'** (मुं.१-१-६) इत्यनेन यत्सर्वगतत्वमुक्तं तच्छन्दोगश्रुतौ **'यस्त्वेतम्'** इत्यनेन वैश्वानरस्योक्तमिति योजना ॥

अनेन छन्दोगश्रुतिस्थवैश्वानरशब्दस्यान्यनिष्ठत्वाक्षेपमुखेन पूर्वोक्तसर्वगतत्वादेरन्यनिष्ठत्वाक्षेपात् पूर्वेणास्याऽक्षेपिकी सङ्गतिरुक्ता भवति । वैश्वानरो विषयः, विष्णुरन्यो वेति सन्देहश्च सूचितः ॥

श्रुत्यर्थस्तु – **'यस्तु'** अधिकारी **'प्रादेशमात्रं'** देहहृदये तावत्परिमाणकम्। तत्त्वप्रदीपरीत्याऽधिकार्यपेक्षया प्रादेशमात्रमिति वा । **'अभिविमानम्'** अभितो विगतं मानं मर्यादा यस्य तं, सर्वगतमिति यावत् । **'आत्मानम्'** आततगुणम् **'एतं'** शरीरस्थं **'वैश्वानरं'** तदाख्यविष्णुम् **'एवं'** वक्ष्यमाणरीत्या उपास्ते **'सोऽन्नमत्ति'** (छां.५.१८.१) स्वयोग्यभोग्यमनुभवतीति ॥

---

१. **'पूर्ववाक्यसङ्गतिं'** – ग.

अत आह –

सू –

ॐ ॥ वैश्वानरः साधारणशब्दविशेषात् ॥ ॐ ॥ २४ ॥

अग्राविष्ण्वोः साधारणस्य वैश्वानरशब्दस्य विष्णावेव प्रसिद्धात्मशब्देन विशेषणाद् वैश्वानरो विष्णुरेव ॥ २४ ॥

सिद्धान्तयत्सूत्रमवतारयति – **अत इति** ॥ साधारणस्येत्यनन्तरमपीति शेषः । साधारण्यं साम्यम् । तत्र श्रुतेर्नोभयत्र प्रसिद्धत्वरूपं, वैश्वानरशब्दस्यान्यत्रैव प्रसिद्धत्वात् । किन्तु श्रुतेः प्रसिद्धतो लिङ्गेन साम्यरूपं, तदपि निरवकाशत्वेन प्रकारेण, वैश्वानरश्रुतेः विष्णौ प्रसिद्ध्यभावेन तत्र निरवकाशत्वात् पूर्वोक्तसर्वगतत्वस्यापि विष्णोरन्यत्र निरवकाशत्वात् । तथा च – यद्यपि अग्राविष्ण्वोः प्रतिज्ञाविषययोः सतोः पूर्वपक्षसाधकवैश्वानरशब्दो निरवकाशत्वेन प्रकारेणोत्तरपक्षसाधकलिङ्गसाधारणः । श्रुतिलिङ्गयोर्निरवकाशत्वेन साम्येऽपि लिङ्गाच्छ्रुतिः प्रबला । तस्मादग्निरेवेति प्राप्तम् । तथाऽपि साधारणस्यापि वैश्वानरशब्दस्य विष्ण्वेकनिष्ठतया श्रुत्यादिसिद्धेन **'आत्मानं वैश्वानरम्'** इत्यात्मशब्देन **'विशेषणात्'** विशेषितत्वाद् विष्णुपरत्वसम्भवात् । प्रसिद्ध्यादेरन्यथोपपन्नत्वेन निर्णयकारणाभावाच्छब्दविशेषादात्मशब्दाद् वैश्वानरो विष्णुरेव, **'न देवताभूतं च'** इत्यावृत्त्या सूत्रभाष्ययोर्योजना ॥

अनेन निर्णयेनैव पूर्वपक्षः सूचितः । अत्र पक्षे लिङ्गप्राबल्यनिरासाय साधारण्योक्तिः । सिद्धान्तश्रुतेः[१] सावकाशत्वज्ञापनाय साधारण्योक्तिरिति केचित् ॥

यद्वा – भाष्यटीकास्वारस्यादनिर्णयेनैव पूर्वपक्षः । अत्र पक्षे साधारण्यं

---

१. **'सिद्धान्ते श्रुतेः'** – ग.

प्रति धर्मित्वं शब्दस्यैव, न लिङ्गस्यापि । अग्राविष्ण्वोरिति विषयसप्तमी । तथा च यतोऽग्राविष्ण्वोर्यद्यपि वैश्वानरशब्दः साधारणः सम्भवद्वृत्तिकः । तथाऽपि [१]प्रसिद्धमुखेन निरवकाशत्वेन लिङ्गस्य साधारणश्च । ततः [२] पूर्वोत्तरपक्षसाधकयोः समबलत्वादनिर्णयः । तथाऽप्युभयत्र साधारणस्यापि वैश्वानरशब्दस्येत्यादिका योजना द्रष्टव्या ॥

सू - ॐ॥ स्मर्यमाणमनुमानं स्यादिति ॥ ॐ ॥२५॥

'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।' *(भ.गी.१५-१४)*
इति स्मर्यमाणमत्रापि स एवोच्यत इत्यस्यानुमापकम् ।
समाख्यानात् । इतिशब्दः समाख्याप्रदर्शकः ॥ २५ ॥

नन्वात्मशब्दस्याग्र्यादिष्वमुख्यत्वाभ्युपगमेन सामानाधिकरण्याविरोधात् तेषामेव वैश्वानरत्वं किं न स्यादित्याशङ्कां परिहर्तुं समाख्यारूपहेत्वन्तरेण वैश्वानरस्य विष्णुत्वं निश्चाययत्सूत्रं पठित्वा व्याचष्टे – **स्मर्यमाणमिति ॥** सूत्रभाष्ययोः **'स्मर्यमाणम्'** **'अहं वैश्वानरो भूत्वा'** इति गीतास्मृत्युक्तं विष्णोर्वैश्वानरत्वम् **'अत्र'** वैश्वानरविद्यायामपि **'सः'** गीतोक्तो भगवानेव वैश्वानरपदेनोच्यते **'इत्यस्य'** एवंरूपस्यार्थस्य **'अनुमानम्'** अनुमापकं **'स्यात्'** भवेदिति योजना ॥

नन्वहमिति विष्णुना कृष्णेनोक्तेः स्मृत्युक्तवैश्वानरस्य विष्णुत्वेऽपि अत्रोक्तवैश्वानरस्य कुतो विष्णुत्वमित्यत आह – **समाख्यानादिति ॥** अस्याः स्मृतेरिति शेषः । तथा च गीतास्मृतेः वैश्वानरविद्यासमानोक्ति-

---

१. **'सिद्धमुखेन'** – ग.
२. **'अतः'**- ग.

रूपत्वादस्यास्तत्समाख्यानान्निश्चयो भवतीत्यर्थः ॥

समाख्यायुक्तिर्न सूत्रोक्तेत्यत आह– **इतिशब्द इति ॥** **'प्रदर्शकः'** सूचकः । तथा च - इति स्मर्यमाणमित्यस्य इति समाख्यायमानमित्यर्थाभ्युपगमादितिशब्दः समानोक्तिरूपसमाख्यालिङ्गज्ञापक इति भावः । अत्र सूत्रे समाख्यारूपहेत्वन्तरोक्तावपि तस्याऽत्मशब्दाख्यपूर्वहेतोरनिश्चायकत्वशङ्कामुखेन तन्निरासाय प्रवृत्तत्वाच्चशब्दाभावः ॥

सू - ॐ ॥ शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न

तथा दृष्ट्युपदेशादसम्भवात्
पुरुषविधमपि चैनमधीयते ॥ ॐ ॥ २६ ॥

'अयमग्निर्वैश्वानरः *(बृ.७-९-१.)*
वैश्वानरमृत आजातमग्निम्' *(ऋ.६-७-१)* **इत्यादिशब्दः** [१]।
'वैश्वानरे तद्धुतं भवति' *(छां.५- २४-४)*
'हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः'
(छां. ५-१८-२.)
इत्याद्यग्निलिङ्गमादिशब्दोक्तम् ।

वैश्वानरस्य विष्णुत्वमाक्षिप्य समादधत्सूत्रमुपन्यस्य आक्षेपांशं तावद् व्याचष्टे – **शब्दादिभ्य इति ॥**

'अयमग्निर्वैश्वानरो योऽयमन्तःपुरुषे' (बृ.७-९-१) इति बृहदारण्यकवाक्यम् ॥

---

१. 'इत्यादिः शब्दः' ह. ।

प्रति धर्मित्वं शब्दस्यैव, न लिङ्गस्यापि । अग्राविष्ण्वोरिति विषयसप्तमी । तथा च यतोऽग्राविष्ण्वोर्यद्यपि वैश्वानरशब्दः साधारणः सम्भवद्वृत्तिकः । तथाऽपि [१]प्रसिद्धमुखेन निरवकाशत्वेन लिङ्गस्य साधारणश्च । ततः [२] पूर्वोत्तरपक्षसाधकयोः समबलत्वादनिर्णयः । तथाऽप्युभयत्र साधारणस्यापि वैश्वानरशब्दस्येत्यादिका योजना द्रष्टव्या ॥

सू - ॐ॥ स्मर्यमाणमनुमानं स्यादिति ॥ ॐ ॥२५॥

'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।' *(भ.गी.१५-१४)*
इति स्मर्यमाणमत्रापि स एवोच्यत इत्यस्यानुमापकम् । समाख्यानात् । इतिशब्दः समाख्याप्रदर्शकः ॥ २५ ॥

नन्वात्मशब्दस्याग्र्यादिष्वमुख्यत्वाभ्युपगमेन सामानाधिकरण्याविरोधात् तेषामेव वैश्वानरत्वं किं न स्यादित्याशङ्कां परिहर्तुं समाख्यारूपहेत्वन्तरेण वैश्वानरस्य विष्णुत्वं निश्चाययत्सूत्रं पठित्वा व्याचष्टे – **स्मर्यमाणमिति** ॥ सूत्रभाष्ययोः **'स्मर्यमाणम्'** **'अहं वैश्वानरो भूत्वा'** इति गीतास्मृत्युक्तं विष्णोर्वैश्वानरत्वम् **'अत्र'** वैश्वानरविद्यायामपि **'सः'** गीतोक्तो भगवानेव वैश्वानरपदेनोच्यते **'इत्यस्य'** एवंरूपस्यार्थस्य **'अनुमानम्'** अनुमापकं **'स्यात्'** भवेदिति योजना ॥

नन्वहमिति विष्णुना कृष्णेनोक्तेः स्मृत्युक्तवैश्वानरस्य विष्णुत्वेऽपि अत्रोक्तवैश्वानरस्य कुतो विष्णुत्वमित्यत आह – **समाख्यानादिति** ॥ अस्याः स्मृतेरिति शेषः । तथा च गीतास्मृतेः वैश्वानरविद्यासमानोक्ति-

---

१. **'सिद्धमुखेन'** – ग.
२. **'अतः'**- ग.

रूपत्वादस्यास्तत्समाख्यानान्निश्चयो भवतीत्यर्थः ॥

समाख्यायुक्तिर्न सूत्रोक्तेत्यत आह– **इतिशब्द इति ॥** **'प्रदर्शकः'** सूचकः । तथा च - इति स्मर्यमाणमित्यस्य इति समाख्यायमानमित्यर्थाभ्युपगमादितिशब्दः समानोक्तिरूपसमाख्यालिङ्गज्ञापक इति भावः । अत्र सूत्रे समाख्यारूपहेत्वन्तरोक्तावपि तस्याऽत्मशब्दाख्यपूर्वहेतोरनिश्चायकत्वशङ्कामुखेन तन्निरासाय प्रवृत्तत्वाच्चशब्दाभावः ॥

सू - ॐ ॥ शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न

तथा दृष्ट्युपदेशादसम्भवात्
पुरुषविधमपि चैनमधीयते ॥ ॐ ॥ २६ ॥

'अयमग्निर्वैश्वानरः *(बृ.७-९-१.)*

'वैश्वानरमृत आजातमग्निम्' *(ऋ.६-७-१)* **इत्यादिशब्दः** [१]।

'वैश्वानरे तद्धुतं भवति' *(छां.५- २४-४)*

'हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः'

(छां. ५-१८-२.)

इत्याद्यग्निलिङ्गमादिशब्दोक्तम् ।

वैश्वानरस्य विष्णुत्वमाक्षिप्य समादधत्सूत्रमुपन्यस्य आक्षेपांशं तावद् व्याचष्टे – **शब्दादिभ्य इति ॥**

'अयमग्निर्वैश्वानरो योऽयमन्तःपुरुषे' (बृ.७-९-१) इति बृहदारण्यकवाक्यम् ॥

---

१. 'इत्यादिः शब्दः' ह. ।

प्रति धर्मित्वं शब्दस्यैव, न लिङ्गस्यापि । अग्राविष्ण्वोरिति विषयसप्तमी । तथा च यतोऽग्राविष्ण्वोर्यद्यपि वैश्वानरशब्दः साधारणः सम्भवद्वृत्तिकः । तथाऽपि [१]प्रसिद्धमुखेन निरवकाशत्वेन लिङ्गस्य साधारणश्च । ततः [२] पूर्वोत्तरपक्षसाधकयोः समबलत्वादनिर्णयः । तथाऽप्युभयत्र साधारणस्यापि वैश्वानरशब्दस्येत्यादिका योजना द्रष्टव्या ॥

सू - ॐ॥ स्मर्यमाणमनुमानं स्यादिति ॥ ॐ ॥२५॥

'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।' *(भ.गी.१५-१४)*
इति स्मर्यमाणमत्रापि स एवोच्यत इत्यस्यानुमापकम् ।
समाख्यानात् । इतिशब्दः समाख्याप्रदर्शकः ॥ २५ ॥

नन्वात्मशब्दस्याग्न्यादिष्वमुख्यत्वाभ्युपगमेन सामानाधिकरण्याविरोधात् तेषामेव वैश्वानरत्वं किं न स्यादित्याशङ्कां परिहर्तुं समाख्यारूपहेत्वन्तरेण वैश्वानरस्य विष्णुत्वं निश्चाययत्सूत्रं पठित्वा व्याचष्टे – **स्मर्यमाणमिति ॥** सूत्रभाष्ययोः **'स्मर्यमाणम्'** **'अहं वैश्वानरो भूत्वा'** इति गीतास्मृत्युक्तं विष्णोर्वैश्वानरत्वम् **'अत्र'** वैश्वानरविद्यायामपि **'सः'** गीतोक्तो भगवानेव वैश्वानरपदेनोच्यते **'इत्यस्य'** एवंरूपस्यार्थस्य **'अनुमानम्'** अनुमापकं **'स्यात्'** भवेदिति योजना ॥

नन्वहमिति विष्णुना कृष्णेनोक्तेः स्मृत्युक्तवैश्वानरस्य विष्णुत्वेऽपि अत्रोक्तवैश्वानरस्य कुतो विष्णुत्वमित्यत आह – **समाख्यानादिति ॥** अस्याः स्मृतेरिति शेषः । तथा च गीतास्मृतेः वैश्वानरविद्यासमानोक्ति-

---

१. **'सिद्धमुखेन'** – ग.
२. **'अतः'**- ग.

रूपत्वादस्यास्तत्समाख्यानान्निश्चयो भवतीत्यर्थः ॥

समाख्यायुक्तिर्न सूत्रोक्तेत्यत आह– **इतिशब्द इति ॥** **'प्रदर्शकः'** सूचकः । तथा च - इति स्मर्यमाणमित्यस्य इति समाख्यायमानमित्यर्थाभ्युपगमादितिशब्दः समानोक्तिरूपसमाख्यालिङ्गज्ञापक इति भावः । अत्र सूत्रे समाख्यारूपहेत्वन्तरोक्तावपि तस्याऽत्मशब्दाख्यपूर्वहेतोरनिश्चायकत्वशङ्कामुखेन तन्निरासाय प्रवृत्तत्वाच्चशब्दाभावः ॥

सू - ॐ ॥ शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न

तथा दृष्ट्युपदेशादसम्भवात्
पुरुषविधमपि चैनमधीयते ॥ ॐ ॥ २६ ॥

'अयमग्निर्वैश्वानरः *(बृ.७-९-१.)*

'वैश्वानरमृत आजातमग्निम्' *(ऋ.६-७-१)* **इत्यादिशब्दः** [१]।

'वैश्वानरे तद्धुतं भवति' *(छां.५- २४-४)*

'हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः'

(छां. ५-१८-२.)

इत्याद्यग्निलिङ्गमादिशब्दोक्तम् ।

वैश्वानरस्य विष्णुत्वमाक्षिप्य समादधत्सूत्रमुपन्यस्य आक्षेपांशं तावद् व्याचष्टे – **शब्दादिभ्य इति ॥**

'अयमग्निर्वैश्वानरो योऽयमन्तःपुरुषे' (बृ.७-९-१) इति बृहदारण्यकवाक्यम् ॥

---

१. 'इत्यादिः शब्दः' ह. ।

'मूर्धानं दिवो अरतिं पृथिव्यां वैश्वानरमृत आजातमग्निम् ।

कविं संराजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥'

(ऋ. ६-७-१.) इति ऋग्वेदवाक्यम् ॥

इत्यादीति कर्मधारयः । तथा च इत्यादिरूपः शब्दः सौत्रशब्दपदेनोक्त इत्यर्थः । यद्वा – **'इत्यादि'** एवमादिवाक्यजातं **'शब्दः'** सौत्रशब्दपदेन गृहीत इत्यर्थः । आदिशब्देनैतज्जातीयकं श्रुत्यन्तरवाक्यं गृह्यते ॥

'वैश्वानरे' इति श्रुत्यन्तरवाक्यम् ॥

हृदयमित्यादि छन्दोगश्रुतिः ॥

इत्याद्यग्निलिङ्गमिति ॥ एवमादिवाक्योक्ताग्निलिङ्गमित्यर्थः । आदिशब्देन **'नाभिं यज्ञानां सदनं रयीणाम्'** (ऋ. ६-७-२.) इत्यादिवाक्योक्तानि गृह्यन्ते । **'आदिशब्दोक्तम्'** सौत्रादिशब्दोक्तमित्यर्थः ॥

'येनेदमन्नं पच्यते' *(बृ.७-९-१.)*

'तद्यद् भक्तं प्रथममागच्छेत् तद्धोमीयम्' *(छां. ५-१९-१.)*

इत्यादिना पाचकत्वेनान्तःप्रतिष्ठानं च प्रतीयते ।

'येनेदमन्नं पच्यते यदिदमद्यते' इत्येतदपि **'अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे'** *(बृ.७-९-१.)* इत्यतः परं [१]बृहदारण्यकश्रुतम् ॥

'तद्यद्भक्तम्' इति छान्दोग्यवाक्यम् ॥

इत्यादिनेति ॥ वाक्येनेति शेषः । कुरुपाण्डवन्यायेन **'सर्वकर्मा**

---

१. **'बृहदारण्यके श्रुतम्' – ग.**

सर्वलिङ्गः' इति श्रुत्यनुसारादादिपदोक्तलिङ्गात् पार्थक्येन कर्म बोधयितुं सूत्रेऽन्तः प्रतिष्ठानादित्युक्तम् ॥

यद्वा - **'पाचकत्वेनान्तःप्रतिष्ठानं प्रधानलिङ्गत्वेनाभिमतत्वात् पृथगुक्तम्'** इति तत्त्वप्रदीपोक्तेः प्रधानलिङ्गत्वादिदं पृथगुक्तमित्यभिप्रेत्य तल्लिङ्गं तत्कर्मोक्त्या दर्शयति - **पाचकत्वेनेति** ॥ इत्थम्भूतलक्षणे तृतीया । अनेन सूत्रेऽन्तःप्रतिष्ठानपदेन न केवलं तत्तद्धृदयान्तरावस्थानमात्रं विवक्षितं, किन्तु सव्यापारमित्युक्तं भवति । अत एव **'येनेदमन्नं पच्यते' 'तद्यद्धक्तम्'** इत्युभयबोधकश्रुत्युदाहरणम् । चः समुच्चये ॥

तस्मान्न विष्णुरिति चेत् –

ततः किमित्यत आह – **तस्मादिति** ॥ यस्मादेवमग्निपक्षेऽपि श्रुतिलिङ्गाद्यस्ति, विष्णुपक्षे तु त्वयैवाऽत्मशब्दः समाख्यानं चोक्तम्, तस्मादुभयत्र श्रुत्यादिसाम्याद् वैश्वानरो विष्णुरेवेति निश्चयो न युज्यत इत्यर्थः ॥

ननु **'यस्त्वेतम्'** इति विचार्यवाक्ये वैश्वानरशब्दसमानाधिकृताग्निशब्दाभावाद् वाक्यान्तरगताग्निशब्दस्य कथं शङ्काहेतुत्वमिति चेत् – न, अत्र सर्ववैश्वानरविद्यानां विचार्यत्वात्, अत एवानेकवाक्योद्धारः । यद्वा – पूर्वपक्षेऽपि सिद्धान्त इव समाख्यां प्रदर्शयितुं समाख्यारूपेण तत्तद्वाक्योद्धारो युक्तः । अयमिति वाक्येऽयमित्युक्तः क इत्यत आह – **योऽयमिति** ॥ तथा च – **'योऽयमन्तः पुरुषे'** पुरुषस्यान्तःस्थितो भगवान् **'अयमग्निः'** अङ्गशब्दितशरीरनेतृत्वात् तच्छब्दवाच्यः । विश्वगुणसम्बन्धी न रीयते चेति वैश्वानरश्चेति योजना । तद्व्यापारमाह – **येनेति** [१]॥ इदं किमित्यत आह – **यदिदमिति** ॥ अद्यते भक्ष्यते प्राणिभिः ॥

---

१. **'येनाग्निनेति ॥'** – ग.

'मूर्धानम्' इति मन्त्रे षष्ठ्यर्थः कार्यकारणभावसम्बन्धः । **'मूर्धत्वं विष्णोरङ्गाङ्गत्वभेदात्'** इति तत्त्वप्रदीपोक्तेः मूर्धानमरति मित्यभेदोक्तिः ॥

ऋतायेति वेदान्तरे पाठादृचि ऋत इति सप्तमी तादर्थ्ये । तथा च दिवः कारणभूतमूर्धानं लोके गमनेनारतिदर्शनाद् रतिविरुद्धगतिसाधनत्वाद् गौण्या वृत्त्या - **'अरमलमतति गच्छति येन पुरुषः सोऽरतिः पादः'** इति तत्त्वप्रदीपोक्तेः मुख्यया वृत्त्या अरतिः पादः ॥

ऋ गताविति्यस्मात् करणे अतिप्रत्यये[१] निष्पन्नोऽरतिशब्दः पादे मुख्य एवेत्यपि केचित् । तत्तु तत्त्वप्रदीपचन्द्रिकानुक्तम् । तत्त्वप्रदीपे अरशब्दोपपदाददतेः, चन्द्रिकायां नञुपपदाद् रमेरस्य निष्पत्तेरुक्तत्वात् । तथा च - पृथिव्याः अरतिं कारणीभूतपादं जनानाम् आक्रते सम्यग्ज्ञानाय 'जातम्' अभिव्यक्तं **'कविं'** सर्वज्ञं **'सम्राजम्'** अखण्डेशम् **'अन्नं थम्'** इति श्रुतेः थशब्दोऽन्नवाची । तृतीयोऽतिशये । तथा च **'अतिथिम्'** अत्यन्नम् । पात्रमित्यनेनापि जनानामित्येतत्सम्बध्यते । तथा च जनानां **'पातारं'** रक्षकं **'वैश्वानरं'** विश्वजीवान्तरत्वयोगेन तच्छब्दवाच्यम् **'अग्निम्'** अङ्गनेतारं विष्णुं प्रसिद्धं च देवा आसन् । अविभक्तिकोऽयं निर्देशः । आस्यशब्दस्यासन्नादेशः । तथा च आसन् स्वास्यतया आजनयन्त । अडभावश्छान्दसः । आसमन्तात् सर्वकर्म स्वकुर्वन्निति सिद्धान्तरीत्या श्रुत्यर्थः ॥

तत्त्वप्रदीपे तु – विश्वनरस्थम् ऋते वेदे **'आ समन्ताज्जातं'** व्यक्तम् **'अग्निम्'** अङ्गनेतारं **'सम्राजं'** सम्यग् राजन्तम् **'अतिथिं'** सर्वानतिशय्य स्थितं पातारम् अग्निं जनानाम् **'आसन्'** आश्रयम् आजनयन्त आसमन्ताज्जनयाञ्चक्रुः । अग्न्यादिदेवा इति विशेषार्थ उक्तः ॥

---

१. **'डतिप्रत्यये'** – ग.

केचित्तु – जनिबाधकाङ्योगादाजनयन्त अकुर्वन्नित्युक्तमित्याहुः । तत्तूदाहृततत्त्वप्रदीपविरुद्धम् । अतोऽनेकार्थत्वाद् धातूनां विष्णुजन्येऽग्नौ देवजन्यत्वायोगाद् जनेरुत्पत्त्यर्थायोगाच्च । अकुर्वन्नित्युक्तमिति आङ्-विश्लेषेणैव टीका व्याख्येया । पूर्वपक्षी तु श्रुतिगताग्न्यादिशब्दान् प्रसिद्धाग्नि-परानेव मन्यते ॥

'वैश्वानरे तद्धुतम्' इति वाक्यार्थस्तु - **'तस्मादु हैवंविद्यद्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य वैश्वानरे हुतं स्यात्'** (छां. ५-२४-४.) इति छन्दोगसमाख्यावाक्यादवगन्तव्यः । तदर्थस्तु – यदि **'एवंवित्'** उक्तरीत्या वैश्वानरज्ञानी उच्छिष्टाद्यनर्हायापि चण्डालायोच्छिष्टं **'प्रयच्छेत्'** दद्यात् । तदा तद्दत्तमुच्छिष्टं चण्डालान्तर्यामिणि वैश्वानरे हुतं स्यान्न पापकरं भवति । प्रत्युत महाफलमेवेति । अनेनाऽहुतिस्थानत्वलिङ्गमुच्यते ॥

'हृदयं' हृदयस्थो विष्णुर्गार्हपत्यपदवाच्य इत्यर्थः । एवमुत्तरत्रापि । **'अन्वाहार्यपचनः'** दक्षिणाग्निरन्वाहार्य ओदनोऽत्र पच्यत इति व्युत्पत्ति-सम्भवात् । पूर्वपक्षे तु गार्हपत्यं वैश्वानरस्य प्रसिद्धाग्नेर्हृदयस्थानीय-मित्यादिरर्थः ॥

'तद् यद्भक्तम्' इति वाक्यार्थस्तु – **'तत्'** तदा भोजनवेलायां **'यद्यद्भक्तम्'** अन्नं **'प्रथममागच्छेत्'** आस्यं प्रति प्राणाहुतिरूपेण । **'तद्धोमीयं'** पाचकत्वेनान्तःस्थितस्याग्नेर्होमद्रव्यमिति । अनेनाग्नौ हूयमानद्रव्यस्याग्निः पाचक इति सिद्धमिति पाचकत्वाख्यलिङ्गमुक्तं भवति ॥

यद्यपि **'येनेदम्'** इति पूर्ववाक्ये **'अयमग्निः'** इति तत्पूर्ववाक्यसाहित्यात् पाचकत्वेनान्तःप्रतिष्ठानोक्तावपि न **'तद्यद्भक्तम्'** इति वाक्ये तत् प्रतीयते । तथाऽपि **'तद्धोमीयम्'** इत्यनेनान्तस्थितस्य होम्यमित्युक्तत्वात् तत्प्रत्यायकत्वोपपत्तिः ॥

न, -

'अथ हेममात्मानमणोरणीयांसं परतः
परं विश्वं हरिमुपासीतेति ।
सर्वनामा सर्वकर्मा सर्वलिङ्गः सर्वगुणः
सर्वकामः सर्वधर्मः सर्वरूप इति ।'

परिहारसूत्रांशं व्याचष्टे – **नेति** ॥ तस्मान्न विष्णुरिति पूर्ववाक्येनास्य नञर्थस्यान्वयः । कुतो नेत्यतस्तत्र भाष्ये 'तस्मादित्युक्तम्' इत्यावृत्त्या हेतुत्वेन संयोज्यम् । सूत्रे त्वत इत्याकर्षणीयम् । आत्मशब्दादिपूर्वहेतोरेवेति तदर्थः । न चेतरत्राप्यस्ति श्रुत्यादिकमित्यनिर्णयः । तेषामन्यत्र मुख्यतो योगेन विष्णावेव सावकाशत्वोपपत्तेरित्यध्याहारः ॥

कुतोऽग्र्यादिनामकर्मणां विष्णावेव सावकाशत्वं ज्ञायत इत्यतस्तत्र हेतुसमर्पकं **'तथा दृष्ट्युपदेशात्'** इत्यंशम् उपदेशपदोक्तश्रुत्युदाहरणपूर्वकं व्याचष्टे – **अथेति** ॥ प्रकरणान्तरारम्भार्थोऽयमथशब्दः । प्रथमेतिशब्दो विधि-समाप्तौ । द्वितीयस्य इत्युपासीतेत्यन्वयः । तथा च **'एतमात्मानम्'** आदानादि-कर्तारम् **'अणोरणीयांसं'** सूक्ष्मादपि सूक्ष्मं **'परतो'** महतः परं **'विश्वं'** पूर्णं हरिमुपासीतेत्यर्थः ॥

किमितीत्यतः उपासनाप्रकारमाह – **सर्वेति** ॥ इतिशब्दः प्रत्येकं सम्बध्यते। तथा च मुख्यतः इन्द्रादिसर्वनामवानित्युपासीत । **'सर्वकर्मा'** **'नर्ते त्वत्क्रियते'** इत्यादेः स्वातन्त्र्येण सर्वक्रियाकर्तेत्युपासीत । लिङ्गं लक्षणं, [1]वज्रधरत्वादि-सर्वलिङ्ग इत्युपासीत । ज्ञानानन्दादिसर्वगुणपूर्ण[2] इत्युपासीत । एतदिच्छयैव

१. 'तथा च वज्र-' ग.
२. '-सर्वगुण इत्यु-' ग.।

सर्वं भवतीति सर्वकामः पूर्णकाम इत्युपासीत । भेदसंयोगविभागादि-सर्वधर्मास्तदधीना इति वा, सर्वज्ञत्वादिसर्वधर्मवत्त्वाद्वा **सर्वधर्म** इत्युपासीत । सर्वत्र रूपमस्य इति वा सर्वं जगदस्य रूपं प्रतिमेति वा **सर्वरूप** इत्युपासीत ॥

'स य एतमेवमात्मानं विश्वं हरिमारादरमुपास्ते
तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेषु देवेषु
सर्वेषु वेदेषु कामचारो भवति' इति
तत्तन्नामलिङ्गादिना तस्यैव दृष्ट्युपदेशान्महोपनिषदि ॥

एवमुपासकस्य फलमाह – **स इति ॥** **'सः'** प्रसिद्धः योऽधिकारी एतमात्मानम् अणोरणीयांसं परतः परमेव विश्वं हरिमेव, नान्यम्, **'आरात्'** समीपे स्वहृदये **'अरम्'** अलं सम्यगुपास्ते तस्यैवमव्याप्ते व्याप्तरूपोपासकस्य सर्वेषु लोकेषु सर्वेषु **'भूतेषु'** प्राणिषु सर्वेषु लोकेषु स्थितेषु भूतेष्विति वा । वेदेषु[1] सर्वेषु, वेदेषु यथेष्टसञ्चारः कामसञ्चरणसर्वपूज्यत्वसर्वज्ञत्वादिः स्याद् इत्यर्थस्तत्त्वप्रदीपेऽभिहितः । **'इति'** महोपनिषदीत्यन्वयः ॥

सौत्रतथाशब्दार्थमाह– **तत्तदिति ॥** अग्र्यादिनामलिङ्गादिमत्त्वेनेत्यर्थः । आदिपदेन तत्तत्कर्मादेर्ग्रहणम् । प्रधानसूत्रेऽभिहितं तत्त्वित्येतदत्रापि विपरिणामेन संयोज्यमित्याशयेनाऽह – **तस्यैवेति ॥** विष्णोरेवेत्यर्थः । न त्वग्र्यादेरित्येवार्थः । **'दृष्ट्युपदेशात्'** उपासनोपदेशात् । श्रुतौ हरिमेव उपास्त इत्यवधारणेनान्यव्यावृत्त्यवगमादिति भावः ॥

'अनात्तत्वादनात्मान ऊनत्वाद् गुणराशितः ।
अब्रह्माणः परे सर्वे ब्रह्माऽत्मा विष्णुरेव हि ।' इत्यादिना,

---

१. 'देवेषु' – ग.

'को न आत्मा किं ब्रह्म' *(छां. ५-११-१.)*

इत्यारम्भाच्चान्येषामसम्भवाद् विष्णुरेव वैश्वानरः ।

एवमन्यश्रुतिलिङ्गादीनां विष्णौ सावकाशत्वोपपादकतया तथेत्यंशं व्याख्याय आत्मशब्दादेरन्यत्र निरवकाशोक्तिपरतयाऽसम्भवादित्यंशं प्रमाणोदाहरणपूर्वकं व्याख्याति - **अनात्तत्वादिति** ॥ योजना तु - इत्यादिना प्रमाणेन विष्णोरन्येषाम् आत्मत्वब्रह्मत्वासम्भवोक्तेः, अत एव आत्मशब्दादेरन्यत्रासम्भवादिति ॥

यद्वा - न केवलमात्मशब्दश्रुतिसमाख्याभ्यां, किन्तु प्रकरणबलाच्च वैश्वानरस्य विष्णुत्वनिश्चयो भवतीत्याह – **अनात्तत्वादिति** ॥ आदिशब्देन **'ब्रह्मशब्दः परे विष्णौ'** इत्यादिकं गृह्यते । तथा चेत्थं योजना - **'को न आत्मा किं ब्रह्म'** 'इत्यारम्भाच्च' इत्यारभ्याधीतात् प्रकरणाच्च विष्णुरेव वैश्वानरः । ब्रह्मात्मशब्दयोरेतदुपक्रमे श्रवणेऽपि कुतोऽस्याः वैश्वानरविद्यायाः विष्णु-प्रकरणत्वम् 'अनात्तत्वात्' इत्यादिना प्रमाणेन विष्णोरन्येषामात्मशब्दार्थ-व्याप्तत्वगुणपूर्णत्वयोरसम्भवावगमादिति ॥

अनेन सूत्रे आरम्भादिति पदमध्याहृत्य तेनापिशब्दः संयोज्यः । असम्भवादिति हेतुस्तु आत्मशब्दादेरन्यत्रानवकाशत्वसाधकतयोभयत्र संयोज्य इत्युक्तं भवति । अत एव भाष्ये अग्निश्रुत्यादीनां विष्णौ सावकाशत्वसाधकतयेत्यादिव्याख्यानान्तरं विष्णुपक्षसाधकात्मशब्दादेरन्यत्रा-नवकाशत्वसाधकासम्भवादिति हेतौ व्याख्यातव्येऽपि तद् विहायाऽरम्भादि-त्यध्याहृतहेतूपन्यासानन्तरमसम्भवादित्युपन्यस्तम् ॥

टीकायामपि - न चाऽत्मशब्दादेरन्यत्रास्त्यवकाश इति प्रतिज्ञाय प्रकरणबलाच्चेत्यध्याहार्यहेतुं च प्रदर्श्य, अनन्तरमात्मशब्दप्रकरणयो-र्निरवकाशत्वसाधकासम्भवादित्यंशो व्याख्यातः । तथा दृष्ट्युपदेशाद-

सम्भवादितिवन्नाध्याहृतहेतोरवान्तरसाध्येनान्वयः, किन्तु प्रधानेनैवेति ज्ञापनाय विष्णुरेव वैश्वानर इति पुनरुक्तिः । उद्देश्यविधेयनिर्देशस्यैच्छिकत्वाद् व्यत्यासः ॥

'हि' यस्माद् विष्णोः **'परे'** अन्ये गुणैः **'अनाप्तत्वात्'** अव्याप्तत्वात् सर्वोत्कृष्टत्वेन वैदिकैरस्वीकृतत्वाद्वा **'अनात्मानः'** अनात्मशब्दमुख्यार्थाः । यस्माच्च गुणराशित ऊनत्वादब्रह्माणश्च । तस्मात् **'ब्रह्मात्मा'** तच्छब्दमुख्यवाच्यो विष्णुरेव सिद्ध इत्यर्थः ॥

छान्दोग्ये हि **'को न आत्मा किं ब्रह्म'** इति मिलित्वा मीमांसमानैः प्रत्यब्दयज्ञकृत्त्वनिमित्तान्महाशालसञ्ज्ञैः पञ्चभिर्महामुनिभिरुद्दालकोद्दिष्टै[1]स्तद्युक्तैः परिपृष्टो राजाऽश्वपतिर्वैश्वानरमुपदिदेश । **'नः'** अस्माकम् उपास्य आत्मा **'कः'** किंलक्षणः । ब्रह्म च **'किं'** किंलक्षणमित्यर्थः ॥

'चन्द्रमा मनसो जातः । चक्षोस्सूर्यो अजायत' *(तै.आ. ३-१२)*

इत्यादिना यः पुरुषाख्यो विष्णुरभिहितस्तद्विधमेवात्र
'मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मा' *(छां. ५-१८-२.)*
इत्यादिनैनं वैश्वानरमधीयते ॥

श्रुतिसमाख्यया च वैश्वानरस्य विष्णुत्वमुपपादयितुं प्रवृत्तं **'पुरुषविधमप्येनमधीयते'** इत्यंशं व्याचष्टे - **चन्द्रमा इति ॥** अत्र **'चन्द्रमाः'** इति वाक्यं प्रतीकत्वेन गृहीतम् । उदाहरणवाक्यं तु **'चक्षोः सूर्यो अजायत'** इति ध्येयम् । प्रथमादिपदेन **'शीर्ष्णो द्यौः समवर्तत, प्राणाद्वायुरजायत, ... पद्भ्यां भूमिः'**

---

१. **'उद्दालकोद्दिष्ट-'** – ग.

(तै.आ. ३-१२.) इत्यादिकं द्वितीयादिपदेन **'सन्दोहो बहुलो वस्तिरेव रयिः पृथिव्येव पादौ'** (छां. ५-१८-२.) इत्यादिकं गृह्यते ॥

एतमित्यस्य व्याख्यानं – **वैश्वानरमिति** ॥ तथा च – यस्मात् पुरुषसूक्ते **'शीर्ष्णो द्यौः समवर्तत, चक्षोस्सूर्यो अजायत'** इत्यादिना शब्देन यः पुरुषाख्यो विष्णुः यद्विधो द्युम्वादिजनकशीर्षादिमानभिहितः, तद्विधमेव द्युम्वादिजनक-शीर्षादिमत्त्वप्रकारोपेतमेवात्र छान्दोग्ये **'मूर्धैव सुतेजाः'** इत्यादिना वाक्येनैनं वैश्वानरमधीयते छन्दोगाः तस्मात् पुरुषसूक्तसमाख्ययाऽपि वैश्वानरो विष्णुरेवेति योजना ॥

चशब्देन सकलवेदतन्त्रपुराणादिषु विष्णुपरत्वं पुरुषसूक्तस्य दर्शयति ।

ननु पुरुषसूक्तस्य विष्णुपरत्वे भवेत्तत्समाख्यया एतद्विद्याया विष्णुपरत्वं, तदेव कुत इत्यत आह – **चशब्देनेति** ॥ श्रुतेराधिक्यात् प्रथमं प्रतिज्ञा । **'पुरुषसूक्तस्य'** इत्यनन्तरं **'प्रसिद्धमिति'** शेषः । **'दर्शयति'** सूचयति सूत्रकार इत्यर्थः । आत्मशब्दस्मृतिसमाख्याप्रकरणसमुच्चयस्येव प्रकरणश्रुति-समुच्चयस्यापि अपिपदेनैव सिद्धत्वान्न तत्रोपक्षीणश्चशब्द इति भावः ॥

तथा च ब्राह्मे –

'यथैव पौरुषं सूक्तं नित्यं विष्णुपरायणम् ।
तथैव मे मनो नित्यं भूयाद् विष्णुपरायणम् ॥' इति ।

किं तद्वेदादीत्यतः श्रुतेः साक्षात्प्रतिज्ञातार्थासाधकत्वात् प्रतिज्ञा-क्रममतिक्रम्य साक्षात्प्रतिज्ञातार्थसाधकत्वादादौ पुराणवाक्यं पठति – **तथा चेति** ॥ सूत्रे पुरुषसूक्तस्य विष्णुपरत्वं सिद्धमिति यथोक्तं तथा ब्राह्मे चोक्तमित्यर्थः । चः समुच्चये । एवम् उत्तरत्रापि **'उक्तम्'** इति पदाध्याहारेण

सप्तम्यन्तपदानामन्वयो द्रष्टव्यः ॥

'नित्यं' नियमेन **'विष्णुपरायणं'** विष्णौ महातात्पर्यवत् । द्वितीयस्य नित्यमित्यस्य सदेत्यर्थः । **'इति ब्राह्म इति'** इतिशब्दान्वयः । सिद्धार्थस्यैव दृष्टान्तत्वादनेन ब्राह्मवचनेन विवक्षितार्थो ज्ञायते ॥

चतुर्वेदशिखायां च –

'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
इत्येष ह्येवाचिन्त्यः परः परमो हरिरादिरनादिरनन्तो[1] ऽनन्त-
शीर्षोऽनन्ताक्षोऽनन्तबाहुरनन्तगुणोऽनन्तरूपः' इति ।

प्रतिज्ञातां श्रुतिं दर्शयितुं प्रथममेव तत्स्थानमाह - **चतुर्वेदशिखायां चेति** ॥ अत्र चतुर्वेदशिखाश्रुतिः **'सहस्र'** इत्यारभ्य **'सहस्रपात्'** इत्यन्तेन पुरुषसूक्तमुपन्यस्य **'एष ह्येव'** इत्यनेन **'सहस्रशीर्षा पुरुषः'** इत्युक्तो हरिरेव नान्य इत्येतत्सूक्तं विष्णुपरतया व्याख्यातीति प्रकृतसङ्गतिः । सुप आकारो वैदिकः ॥

एषः क इत्यतो यः **'परो'** विलक्षणः अत एव **'अचिन्त्यो'** मनसा **'परमः'** उत्तमः **'आदिः'** कारणभूतः **'अनादिः'** उत्पत्तिशून्यः **'अनन्तः'** नाशशून्यः, स्वरूपतोऽपरिच्छिन्नो वा हरिः स इत्याह । कुतोऽयं पुरुषः सहस्रशीर्षा ? **'हि'** यस्मादनन्तशीर्षा । कुतः सहस्राक्षः ? यस्मादयमनन्ताक्षः। कुतोऽयं सहस्रपात् ? यस्मादनन्तबाहुः । अनन्तपादित्यस्याप्युपलक्षकमेतत् । एवं पूर्ववाक्येऽपि **'स भूमिम्'** इत्युत्तरवाक्येऽप्युपपादकमाह – **अनन्तगुणोऽनन्तरूपोऽनन्ताकार इति** ॥ चतुर्वेदशिखायामित्यन्वयः ॥

---

१. **'अनन्तोऽन्तोऽनन्तशीर्षः'** ह. ।

बृहत्संहितायां च -

'यथा हि पौरुषं सूक्तं विष्णोरेवाभिधायकम् ।
न तथा सर्ववेदाश्च वेदाङ्गानि च नारद ॥' इत्यादि [1]।

ब्राह्मवाक्यस्य पुरुषसूक्तस्य लक्षणया विष्णुपरत्वेऽन्यपरत्वेऽपि वा सावकाशत्वान्न तत्प्रतिज्ञातार्थनिश्चायकमित्यतो व्याख्यानव्याख्येयभावाख्य-द्वारमन्तरेण पुरुषसूक्तं मुख्यतो विष्णोरेवाभिधायकमिति साक्षात्प्रतिज्ञातार्थ-साधकं स्मृतिवाक्यं तत्स्थाननिर्देशपूर्वकं पठति – **बृहत्संहितायां चेति** ॥ चकारः पूर्वसमुच्चयार्थः । **'वेदाङ्गानि'** शिक्षादीनि ब्रह्मवाक्यमेतत् । इत्यादि - बृहत्संहितायामुक्तमित्यन्वयः । आदिपदेन **'सर्वतः पौरुषे सूक्ते गुणा विष्णोरुदीरिताः'** इति ब्रह्मतर्कादिग्रहणम् । **'सर्वतः'** सर्वे गुणाः । सामान्येनेति शेषः । सर्वस्मिन्, सर्वस्मात् वेदतदङ्गेभ्योऽतिशयेनेति वा ॥

[2]'यस्माद्यज्जायते चाङ्गाल्लोकवेदादिकं हरेः ।
तन्नामवाच्यमङ्गं तद् यथा ब्रह्मादिकं मुखम् ॥'

इति नारदीयवचनान्नाभेदोक्तिविरोधः ॥ २६ ॥

ननु पुरुषसूक्ते द्युम्वादिजनकशीर्षादिमत्त्वं पुरुषस्योच्यते । वैश्वानरविद्यायां तु वैश्वानरस्य तदभेद उच्यते । तदुभयोर्विरुद्धार्थत्वान्नेयं समाख्येत्यत आह – **यस्मादिति** ॥ **'लोकः'** स्वर्गादिः **'वेदः'** ऋगादिः । यद्यपि नात्र छान्दोग्ये वेदाभेद उच्यते इति न तद्व्यतिरिक्तव्या । तथाऽपि श्रुत्यन्तरगताभेदवाक्यार्थनिर्णयायायमंशः प्रवृत्तः ॥

---

१. 'इति' ह ।
२. 'यद् यस्माज्जायते चाङ्गाल्लोकदेवादिकं' ह. ।

यद्वा –वेदशब्देन 'उर एव वेदिः' इत्युक्ता वेदिर्गृह्यते । **'तृतीयोऽतिशये'** इत्युक्तत्वात् । **'वेद्यादिकम्'** इति पाठः स्वरसः । तथा च यस्माद् यस्माद् हरेरङ्गात् यद्यत् लोकवेदादिकं जायते, यदाश्रित्य तिष्ठति, यत्र लीयते च तज्जनकमङ्गं तस्मात् **'तन्नामवाच्यं'** तस्य लोकादेर्यन्नाम वाचकशब्दः तेन मुख्यवाच्यं भवति । अत एव तदभिन्नत्वेन प्रतीयते च । न तावता तयोरभेदो मन्तव्य इत्यर्थः । अत्र दृष्टान्तमाह - **यथेति** ॥ मुखमित्युपलक्षणम् । तथा च भगवन्मुखादिर्ब्राह्मणादिजातिजनकत्वाद् ब्राह्मणादिनाम्नोच्यते **'ब्राह्मणोऽस्य मुखमासीत्'** (तै.आ.३-१२) इत्यादौ । अत एव तदभिन्नत्वेन प्रतीयते च सामानाधिकरण्यात् । तद्वदत्रापीत्यर्थः । न ह्यत्र पुरुषोत्तममुखादिभिरभेदो ब्राह्मणादीनामुच्यते, **'पद्भ्यां शूद्रो अजायत'** (तै.आ. ३-१२.) इत्युत्तरवाक्यविरोधात् । इति वचनादित्युक्तत्वाद् वैश्वानराङ्गानां **'मूर्धैव'** इति लोकाद्यभेदोक्तिनिमित्तो विरोधो नेत्यर्थः । अभेदप्रत्यायकोक्तेस्तज्जन्य-जनकभावविवक्षापूर्वकत्वादिति भावः । अनेन भगवतो मूर्धासुतेजस्त्वादि-गुणयोगात् सुतेजःशब्दितस्वर्गजनकत्वात् सुतेजा इत्युच्यते ॥

एवं **'चक्षुर्विश्वरूपः'** सर्वप्रकाशकत्वगुणयोगाद्[१] विश्वरूपशब्दितसूर्य-जनकत्वात् तच्छब्देनोच्यते । **'प्राणः पृथग्वर्त्मात्मा'** (छां. ५-१८-२.) वायुजनकत्वात् तच्छब्दित इति श्रुत्यर्थः सूचितः । आत्मशब्दः स्वरूपार्थो मध्यदेहार्थो वा ॥

छान्दोग्यभाष्ये तु – **'मूर्धा विष्णोश्शिरः स्वर्गाधारं द्युनामकम्'** अतितेजसा सुतेजोनामकं च । विश्वानि रूपाणि विषयत्वेन यस्येति विग्रहाश्रयेण सर्वरूपातिदर्शनाच्चक्षुर्विश्वरूपाख्यम् । एवं विष्णोः प्राणो

१. **'सर्वप्रकाशकत्वयोगाद्'** – ग.

नृसिंहाख्यो वाय्वादिप्राणशक्यं यन्न भवति तस्य पृथग्वर्त्मात्मा पृथग्विलक्षणो मार्गो यस्य स चासावात्मा चेति, इति निमित्तान्तरेण श्रुतिर्व्याख्याता ॥

एवं बहुलरयिपृथिवीशब्दिताकाशवारिवसुन्धरादेवताजनकत्वात् सन्दोह, वस्ति,पादपदोक्तानि मध्यदेह,कटि,प्रपदरूपाणि भगवतो वैश्वानरस्याङ्गानि तत्तच्छब्दवाच्यानीत्यपि ज्ञातव्यम् ॥

अनेन **'शब्दादिभ्यः'** अग्न्यादिश्रुतेः गार्हपत्याद्यङ्गवत्त्वादिलिङ्गाच्च पाचकत्वेनान्तःप्रतिष्ठानाच्च वैश्वानरो विष्णुरेवेति निश्चयो न युज्यत इति चेत् - न, अन्यश्रुतिलिङ्गादीनां विष्णौ सावकाशत्वेनाऽत्मशब्दादेरेव निश्चयोपपत्तेः । कुतः सावकाशत्वम् ? **'तथा दृष्ट्युपदेशात्'** अग्न्यादिनामलिङ्गकर्मवत्त्वेन विष्णोरुपासनोपदेशात् । न चाऽत्मशब्दादेरन्यत्रास्त्यवकाशः, अन्यत्राऽत्मत्वादेरसम्भवात् । न केवलमात्मशब्दस्मृतिसमाख्यानाद्वैश्वानरो विष्णुरेवेति निश्चयः, अपि तु आरम्भाच्च प्रकरणबलाच्च ॥

न च वैश्वानरविद्याया विष्णुप्रकरणत्वसिद्धिः, **'को न आत्मा किं ब्रह्म'** इति विचारपूर्वकमस्याऽरभ्याधीतत्वात् । न चाऽत्मत्वब्रह्मत्वोपक्रमेऽपि कुतोऽस्य विष्णुपरता, आत्मत्वब्रह्मत्वादीनामग्न्यादावसम्भवात् । न केवलं स्मृतिसमाख्याप्रकरणबलाद्वैश्वानरो विष्णुरेवेति निश्चीयते, किन्तु यतः पुरुषसूक्ते पुरुषो यद्विधोऽभिहितः तद्विधमेवैनं विष्णुं **'मूर्धैव'** इत्यादिनाऽधीयते छन्दोगाः । अतः श्रुतिसमाख्यानादपि चशब्दः पुरुषसूक्तस्य विष्णुपरत्वं बहुप्रमाणसिद्धमिति द्योतयतीति सूत्रवृत्तिर्दर्शिता भवति ॥

सू–ॐ ॥ अत एव न देवता भूतं च ॥ ॐ ॥२७॥

अग्निवैश्वानरादिशब्दस्तेजसि भूतेऽग्निदेवतायां च प्रसिद्धोऽप्यतः पूर्वोक्तहेतुत एवात्र न सा तच्चाभिधीयते ॥ २७ ॥

ननु वैश्वानरशब्दस्य देवताभूतयोः प्रसिद्धत्वादत्राप्यसौ तत्परः किं न स्यादित्याशङ्कां परिहरत्सूत्रमुपन्यस्यति – **अत एवेति** ॥ अत्र चशब्दस्य समुच्चयार्थत्वं यद्यपितथाऽपीत्यर्थत्वं चाऽश्रित्य सूत्रं व्याचष्टे – **अग्नीति** ॥ समुदायैकवचनमेतत् । आदिशब्देन जातवेदआदिशब्दो गृह्यते । विद्यान्तरोपलक्षणयाऽग्निशब्दादिशब्दयोर्ग्रहणम् । न चाग्न्यादीत्यनेनैवोपलक्षण-सम्भवात् किं शब्दद्वयग्रहणेनेति वाच्यम् । वैश्वानरशब्दस्येह विचार्यत्वेन अतिप्रसिद्धत्वादग्निशब्दस्य च ग्रहणोपपत्तेः । यद्वा - आदिशब्दस्योभयत्रान्वयेन अग्न्यादीति आधिभौतिकविद्यान्तरस्य वैश्वानरादीत्याध्यात्मिकविद्यान्तर-स्योपलक्षणार्थमग्न्यादिवैश्वानरादिग्रहणम् । **'तेजसि भूते'** इति सामानाधिकरण्यम् । चः समुच्चये । **'प्रसिद्धः'** इत्यनेन पूर्वपक्षे प्रसिद्धत्वादिति युक्तिः सूचिता ॥

सौत्रमतःशब्दमनूद्य व्याख्याति – **अत इति ॥ पूर्वोक्तेति ॥** आत्मशब्दादिति हेतुत इत्यर्थः । न तत्र हेत्वन्तरं[1]गवेषणीयमित्येवार्थः । **'अत्र'** वैश्वानरविद्यायां विद्यान्तरे च **'सा'** अग्निदेवता **'तत्'** तेजोभूतं प्रसिद्धि-प्राधान्याभ्यां निर्देशव्यत्यासः । चशब्दः समुच्चये । अभिधीयते **'तेन'** इति शेषः । वैश्वानरादिशब्देनेति तदर्थः । **'अत्र'** इति पाठाभावे तदप्यध्याहार्यम् ॥

सू–ॐ ॥ साक्षादप्यविरोधं जैमिनिः ॥ ॐ ॥२८॥

नाग्न्यादयः शब्दा अग्न्यादिवाचकाः । तथाऽपि साक्षादेवानन्ययोगेन ब्रह्मवाचकैः शब्दैः [2]व्यवहारार्थमनभि-ज्ञानाच्चान्यत्र व्यवहरन्तीत्यभ्युपगमेऽविरोधं जैमिनिर्वक्ति ।

---

१. 'विशेषणीयमि-' – ग.

२. .'ब्रह्मवाचकैर्व्यवहारार्थ-' ह. ।

ननु लोके वेदे चाग्न्यादिपदानाम् ईशादन्यत्र व्यवहारप्रसिद्धिदर्शनात् तस्य च कारणान्तराभावात्तदन्यथानुपपत्त्याऽन्येषां [1]वाच्यमङ्गीकार्यम् । अन्यथा तद्विरोधः स्यादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे – **साक्षादिति** ॥ अत्र तथाऽपीत्यपिशब्दव्याख्यानाद् यद्यपीति लभ्यते । अग्निशब्दः स्वपरः । अग्निशब्द एव आदिर्येषां तेऽग्न्यादय इति विग्रहः । अपिरवधारणेऽपीत्याशयेन साक्षादेवेत्युक्तम् । अर्थान्तराव्यवधानेनेत्यर्थः । फलितार्थमाह – **अनन्येति** ॥ शक्यरूपान्यसम्बन्धमन्तरेण मुख्यवृत्त्येत्यर्थः । यद्वा – तत्त्वप्रदीपरीत्याऽन्यत्र योगवृत्त्यभावेन ब्रह्मणि सम्यग् योगेनेत्यर्थः । ब्रह्मवाचकैरपीत्यपिशब्दान्वयः । **'तैरग्न्यादिशब्दैः'** इति शेषः । **'व्यवहारार्थं'** हानादिव्यवहारसिद्ध्यर्थं **'अनभिज्ञानात्'** मुख्यवाच्यज्ञानाभावात् । चशब्दो न केवलं व्यवहारार्थं किन्त्वनभिज्ञानाच्चेति समुच्चये । **'अन्यत्र'** अग्न्यादिषु तान् तत्र व्यवहरन्ति ज्ञानिनोऽज्ञानिनश्चेति क्रमेण शेषः । **'इत्यभ्युपगमे'** इति निमित्तसप्तमी । एवमङ्गीकारात् **'अविरोधं'** ज्ञान्यज्ञानिव्यवहारविरोधाभावं जैमिनिराचार्यो वक्तीत्यर्थः । **'यत्रानवसरः'** इत्युक्तेर्वक्तीत्युक्तम् ॥

अनेनाग्न्यादिशब्दाः नाग्न्यादिवाचकाः, किन्तु ब्रह्मवाचका एव । तथाऽपि नान्यत्र प्रसिद्धिविरोधः । न वाऽन्यथानुपपत्त्याऽन्येषां वाच्यत्वं कल्प्यम् । कुतः ? यतो वाच्यार्थधीव्यवहितं लक्षणादिकं विना साक्षान्मुख्यवृत्त्याऽपि ब्रह्मवाचकानग्न्यादिशब्दान् मुख्यार्थज्ञानिनः अजामिल-चरमतनये नारायणशब्दमिव हानादिसिद्ध्यर्थं तदज्ञानिनस्त्वनभिज्ञानादेव तान् ज्वलनादिषु व्यवहरन्तीत्यभ्युपगमेनान्यत्राविरोधं व्यवहारविरोधाभावं प्रसिद्धिविलोपाभावं वक्ष्यत इति सूत्रार्थ उक्तो भवति ॥

---

१. **'वाच्यत्वम-'** ग.

'व्यासचित्तस्थिताकाशादवच्छिन्नानि कानिचित् ।
अन्ये व्यवहरन्त्येतान्यूरीकृत्य गृहादिवत् ॥'
इति स्कान्दवचनान्न मतानां परस्परविरोधः ॥ २८ ॥

ननु जैमिन्यादिमतानां भगवन्मताविरोधित्वे जैमिन्यादिग्रहणवैयर्थ्यात् तद्विरोधित्वे वा कथं विरुद्धराद्धान्तेन परिहार इत्यत आह – **व्यासेति** ॥ व्यासचित्तस्थितं मतापरपर्यायं ज्ञानाख्यमहाकाशमपेक्ष्य गृहाद्यवच्छिन्नाकाशवत् **'अवच्छिन्नानि'** विविक्तानि परिमितविषयाणि कानिचिदेतानि मतान्यूरीकृत्य **'अन्ये'** केचन जैमिन्याद्याः व्यवहरन्तीत्यर्थः । यथोक्तं सत्तर्कदीपावल्याम् - आकाशवद् व्याप्तत्वात् प्रकाशमानत्वाच्च व्यासचित्तस्थितमताख्याकाशात् **'अवच्छिन्नानि'** स्वस्वमत्या विविक्तानि तानि मतानि इदं मदीयं इदं मदीयम् इत्यूरीकृत्यान्ये व्यवहरन्ति । यथा गृहनगरादिभिराकाशप्रदेशानवच्छिद्यायं मदीयः प्रदेशोऽयं मदीयः प्रदेश इति जनाः व्यवहरन्तीति । मतानामिति बहुवचनं वक्ष्यमाणमतविवक्षया । तथा च जैमिन्यादिमतानां व्यासमतेन परस्परं चाविरोध[1] इत्यर्थः ।

सू-ॐ ॥ अभिव्यक्तेरित्याश्मरथ्यः ॥ ॐ ॥२९॥

तत्र तत्र प्रसिद्धावप्यग्न्यादिषु ब्रह्मणोऽभिव्यक्तेरग्न्यादि-
सूक्तनियम इत्याश्मरथ्यः ॥ २९ ॥

ननु लौकिकप्रसिद्धेरज्ञानादिमूलत्वेनान्यथोपपत्तावपि वैदिकाग्न्यादि-सूक्तमन्त्रादिप्रसिद्ध्यन्यथानुपपत्त्याऽग्न्यादीनां सूक्तादिगताग्न्यादिशब्दवाच्यत्वं स्यात्, तत्राज्ञानादिमूलकत्वकल्पनाऽयोगेनान्यथोपपत्त्यभावात् । नापि

१. . 'न विरोधः' – ग.

व्यवहारार्थत्वेन अन्यथोपपत्तिः,अनादित्वादित्याशङ्कां परिहरत्सूत्रं पठति – **अभिव्यक्तेरिति** ॥ अत्र पूर्वस्मादपिरनुवर्तनीयः ॥

तच्छब्दश्चानुवृत्तोऽनेकधा विपरिणेतव्य इत्याशयेन तद् व्याचष्टे – **तत्रेति** ॥ **'तत्र तत्र'** सूक्तादौ तस्य ब्रह्मण एव **'प्रसिद्धावपि'** प्रतिपाद्यत्वेऽपि अग्न्यादीनामप्रतिपाद्यत्वेऽपीत्यर्थः । अग्न्यादिष्विति सावधारणम् । सूत्रेऽविरोधमित्यनुषक्तपदतात्पर्यमाह - **अग्न्यादीति** ॥ आदिशब्दः उभयत्र योज्यः । **युज्यत इति** ॥ वक्तीति शेषः ।

अनेनापि – तत्तत्सूक्तादौ ब्रह्मण एव प्रतिपाद्यत्वेऽपि अग्निवाय्वादीनामप्रतिपाद्यत्वेऽपि अविरोधः । अग्न्यादिसूक्तनियमः इदमग्निसूक्तम् इदं वायुसूक्तम् इति[1] सूक्तनियमः, इयमग्निविद्या इयं वायुविद्येति विद्यानियमश्च युज्यते । कथम् ? तैरग्न्यादिसूक्तादिभिस्तस्य ब्रह्मणस्तस्यामुपास्तौ कृतायां तत्राग्न्यादिष्वेव तस्य ब्रह्मणः **'अभि'** स्वेच्छयाऽभिव्यक्तिनियमात् तदभिप्रायेण तत्प्रसिद्धेरुपपत्तेरित्येवं वैदिकाग्न्यादिसूक्तादिप्रसिद्ध्यविरोधमाश्मरथ्याचार्यो वक्तीति सूत्रार्थ उक्तो भवति ॥

सू – ॐ ॥ अनुस्मृतेर्बादरिः ॥ ॐ ॥ ३० ॥

[2]तत्र तत्रोक्तस्य विष्णोरग्न्यादिष्वनुस्मर्यमाणत्वात्तन्नियम इति बादरिः ॥ ३० ॥

प्रकारान्तरेण सूक्तादिनियमस्यान्यथोपपत्तिं कथयत्सूत्रमुपन्यस्य व्याचष्टे– **अनुस्मृतेरिति** ॥ अत्र पूर्ववदध्याहारादिः । **'तत्र तत्र'** अग्न्यादिविद्यासु ।

१. **'इदं वरुणसूक्तमिति'** – ग.
२. **'तत्रोक्तस्य'** ह. ।

सूत्रेऽविरोधमित्यनुषक्तपदतात्पर्यमाह – **तन्नियम इति** ॥ अनेनापि – विष्णोरेव अग्न्यादिविद्याप्रतिपाद्यत्वेऽपि यतस्तस्याग्न्यादिविद्यासु उक्तस्य विष्णोस्तैस्तत्तत्सूक्ताद्युपासकैस्तत्राग्न्यादिष्वेव **'अनुस्मृतेः'** अनुस्मर्तव्यत्वाद् प्रतिपत्तव्यत्वाद् अविरोधस्तन्नियमः अग्न्यादिसूक्तादिव्यवस्था युज्यते । अतो नैतदन्यथानुपपत्त्याऽन्येषां वाच्यत्वं कल्प्यमिति सूक्तादिप्रसिद्ध्यविरोधं **'बादरिः'** बादरात्मजः शुकाचार्यो वक्तीति सूत्रवृत्तिर्दर्शिता भवति ॥

सू – ॐ ॥ सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ॐ ॥ ३१ ॥

साक्षादप्यविरोधं वदन् जैमिनिः सूक्तादिनियममग्न्यादि-सम्प्राप्त्या मन्यते ॥

रीत्यन्तरेण सूक्तादिनियमस्यान्यथोपपत्तिं कथयत्सूत्रमुपन्यस्यति – **सम्पत्तेरिति** ॥ जैमिनिमतस्य पूर्वमुपन्यस्तत्वात् किमर्थं पुनर्वचनमिति मन्दाशङ्कानिरासायोभयान्वयीति शब्दपरामृष्टपूर्वोक्तानुवादेन विषयभेदं दर्शयन् सूत्रं व्याचष्टे – **साक्षादिति** ॥ अग्न्यादिशब्दानां मुख्यतो ब्रह्मवाचकत्वेऽपि **'अविरोधं'** लौकिकव्यवहारविरोधाभावं वदन्नित्यर्थः । अत्राप्यनुवृत्तस्य अविरोधमित्यस्यार्थमाह – **सूक्तादीति** ॥ नियमो व्यवस्था । सम्प्राप्त्या निमित्तभूतयेति शेषः ।

'तं यथा यथोपासते तदेव भवति' इति दर्शयति ॥ ३१ ॥

नन्वग्न्यादिषु भगवदुपास्तौ अग्न्यादिप्राप्तिर्भवतीत्येतत्कुत इत्यतः सूत्रसूचितां श्रुतिमुदाहरति – **तमिति** ॥ **'तं'** परमात्मानं येन येन प्रकारेण उपासते अधिकारिणः तेन प्रकारेण तदेव रूपं **'भवति'** प्राप्नुवन्तीत्यर्थः । तत्त्वप्रदीपेऽपि 'यादृशो भावितस्त्वीशस्तादृशो जीव आभवेत्' इति तृतीयतात्पर्योक्तेः **'तदेव**

भवति' तथैव भवति । यत्प्रकारेणोपास्ते तत्प्रकारेण भवतीत्ययमेवार्थ उक्तः । तत्त्वप्रदीपकारपक्षे उपासते इत्येकवचनं धात्वन्तरमेतत् ॥

अनेन यतोऽग्न्यादिसूक्तादिषु मुख्यतः परब्रह्मण एव प्रतिपाद्यत्वेऽप्यविरोधः, सूक्तादिनियमो युज्यते । अतो न तदन्यथानुपपत्त्याऽन्येषां वाच्यत्वं मन्तव्यम् । कथमिदं युज्यते ? तैरग्न्यादिषु भगवदुपासकानाम् अग्न्यादिसम्पत्तेः प्राप्तेः । न च तदसिद्धिः । **'हि'** यस्मात् तमिति प्रसिद्धा श्रुतिः । **'तथा'**[१] अग्न्याद्यधिकरणकोपास्त्या अग्न्यादिप्राप्तिर्भवतीति **'दर्शयति'** प्रतिपादयति । साक्षादिति लौकिकव्यवहारेऽविरोधं वदन् जैमिनिः सूत्रेषु **'अविरोधम्'** अनियमाख्यविरोधाभावं नियमं **'मन्यते'** वर्णयतीति सूत्रार्थ उक्तो भवति ॥

यद्यप्युत्तरसूत्रद्वये साधकव्यापारोक्तेरल्पाक्षरत्वाच्च दृष्टेरिति वाच्यम्, न त्वभिव्यक्तेरिति, तस्या ईश्वरव्यापारत्वात् । तथाऽप्यभिव्यक्तिं विना दृष्टेरयोगात् तद्ग्रहणेनोभयलाभात् प्राधान्यादीश्वरव्यापार एवोक्तः । यद्यप्यनुस्मृतिशब्दितोपास्त्यनन्तरमभिव्यक्तेः तदनन्तरं तत्सम्पत्तेः प्रथममनुस्मृतेरिति वक्तव्यम् । तथाऽप्यभिव्यक्तिसम्पत्त्युभयानन्तरमप्युपास्तिः कार्येति दर्शयितुमनुस्मृतेर्मध्ये निवेश इति द्रष्टव्यम् ॥

यद्यपि ऋग्भाष्ये -

'पृथग्रूपाणि विष्णोस्तु देवतान्तरगाणि तु ।

अग्न्यादिशब्दवाच्यानि नाम्ना सूक्तभिदा भवेत् ॥'

---

१. **'अग्न्याधिकारकोपास्त्या'** – ग.

इत्यग्न्याद्यन्तर्गतविष्णुवाचकाग्न्यादिशब्दयोगः सूक्तस्य व्यवस्थापक उक्तः । तथा चाग्न्यादिशब्दास्तत्तत्सूक्तानि च अग्न्यादिगतब्रह्मरूपेष्वेव मुख्यानि । एवं बहिर्गतरूपेषु चातीतानागतवर्तमानाग्न्यादिष्वमुख्यानीति व्यवस्था सिद्ध्यति ॥

तथाऽपीहाभिव्यक्तिर्वाऽग्न्यादिसूक्तोपासकैरग्न्यादिगतत्वेनानुस्मर्तव्यत्वं वा सम्प्राप्तिर्वा तत्तत्सूक्तव्यवस्थापकमित्यनुष्ठानविशेषोपयोगितया सौरसावित्र-वामनविष्ण्वादिसूक्तादिव्यवस्थार्थं च व्यवस्थापकान्तरमुक्तमित्यविरोधः । लौकिकवैदिकव्यवहारयोरग्न्यादावुपचरितत्वबीजं तु तयोस्तत्र मुख्यत्वाङ्गीकारे **'तथा दृष्ट्युपदेशात्'** इत्यनेन सूचितः । **'सर्वनाम'** इत्यादिश्रुति-विरोधादिरूपप्रागुक्तानुपपत्तिरिति टीकायामेवोक्तम् ॥

न ह्यन्योपासकोऽन्यं प्राप्नुत इति युज्यत इत्यत आह –

सू – ॐ॥ आमनन्ति चैनमस्मिन् ॥ ॐ ॥ ३२ ॥

एनं विष्णुमस्मिन्नग्न्यादावामनन्ति ।

'योऽग्नौ तिष्ठन्' *(बृ. ५-७-५.)*

'य एष एतस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषः' इत्यादिना ॥ ३२ ॥

॥ इति वैश्वानराधिकरणम् ॥ ७ ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते ब्रह्मसूत्रभाष्ये प्रथमाध्यायस्य द्वितीयः पादः ॥

यदुक्तमग्न्यादिसूक्तादिभिः ब्रह्मोपासकस्याग्न्यादिप्राप्तिर्भवतीति तच्छ्रुत्युक्तमपि न युक्तम् । **'मद्भक्ता यान्ति मामपि'** इत्यादेरन्योपासकस्यान्यप्राप्तेरयोगात् ॥

'श्रुतोपनिषत्कगत्यभिधानात्' इत्यादौ तदनभ्युपगमाच्चेति भावेनाऽशङ्क्य तत्परिहारतया सूत्रमवतार्य व्याचष्टे – **न हीति ॥** टीकायामाशङ्क्यावतार्येत्यन्वयः । शङ्करूपसूत्रावतारिकां प्रदर्श्येत्यर्थः । **'हि'** यस्मादन्योपासकोऽन्यं प्राप्नुत इत्येतत्प्रमाणविरोधान्न युज्यते । तस्मादुक्तमयुक्तमित्यर्थः । एनमित्यनुवादेन विष्णुमिति व्याकृतम् । अस्मिन्नित्यस्य व्याख्यानमग्न्यादाविति । **'आमनन्ति'** प्रतिपादयन्ति श्रुतय इति शेषः । चशब्दः विष्णूपासकस्याग्न्यादिप्राप्तिरयुक्तेति पूर्वपक्षिशङ्काव्यावर्तकः । तेन सिद्धान्तिप्रतिज्ञा, अग्न्यादिप्राप्तिपदेन तदन्तर्गतभगवत्प्राप्तेरेव विवक्षितत्वादिति साक्षाद्धेतुश्च सूचितः ॥

तत्त्वप्रदीपे तु – न केवलमेकत्रैवाऽमनन्ति पठन्ति वाजसनेयाः, किन्त्वन्यत्र **'स यश्चायमस्मिन्'** इत्यादौ, एवमन्ये[1] आमनन्ति **'य एष एतस्मिन्'** इत्यादौ, अन्ये चाऽमनन्ति [2]**एतस्याम्'** इत्यादौ, अन्ये च **'तत् सृष्ट्वा । तदेवानुप्राविशत्'** इत्यादौ । स्मरन्ति च स्मृतिकर्तारः **'यच्चन्द्रमसि यच्चाग्नौ'** इत्यादीनि । समुच्चयार्थश्चशब्द इत्युक्तम् ॥

ताः श्रुतीः दर्शयति - **य इति ॥**

'योऽग्नौ तिष्ठन्' इत्येकं वाजसनेयं वाक्यम् ।

'य एषः' इत्यपरं छान्दोग्यवाक्यम् । उभयत्र यच्छब्दस्य तत्रत्य-

---

१. **अन्ये च'** – ग

२. **'एतस्यामेतम्'** – ग.

तच्छब्देनान्वयः । **'तेजोमयः'** तेजोरूपः **'अमृतमयः'** नित्यात्मा । आदिशब्देन **'एतमग्नावध्वर्यवः'** इत्यादिकं गृह्यते । इत्यादिना आमनन्तीत्यन्वयः ॥

अनेन – न विष्णूपासकस्याग्र्यादिप्राप्त्युक्तिरयुक्ता । कुतः ? अग्र्यादि-प्राप्तिपदेन तदन्तर्गतभगवत्प्राप्तेर्विवक्षितत्वात् । न च विष्णो-रग्र्याद्यन्तर्गतत्वासिद्धिः । यतः **'एनं'** विष्णुं **'अस्मिन्'** अग्र्यादौ आमनन्ति श्रुतयोऽत इति सूत्रार्थ उक्तो भवति ।

॥ इति वैश्वानराधिकरणम् ॥ ७ ॥

॥ श्रीमद्रघुनाथतीर्थपूज्यपादानां शिष्येण

श्रीमज्जगन्नाथयतिना कृतायां श्रीमद्ब्रह्मसूत्रभाष्यदीपिकायां

प्रथमाध्यायस्य द्वितीयः पादः ॥

॥ अथ तृतीयः पादः ॥

॥ १. अथ द्युभ्वाधिकरणम् ॥

(विष्णौ द्युभ्वाद्यायतनत्वसमर्थनम्)

तत्र चान्यत्र च प्रसिद्धानां शब्दानां विष्णौ समन्वयं प्रायेणास्मिन् पादे दर्शयति । विष्णोः परविद्याविषयत्वमुक्तम् ॥

॥१. अथ द्युभ्वाधिकरणम् ॥

एतत्पादप्रतिपाद्यं दर्शयति – **तत्रेति** ॥ अन्योन्यसमुच्चये चशब्दौ । देवताधिकरणापशूद्राधिकरणयोः समन्वयाकरणात् तद् व्यावृत्त्यर्थं – **'प्रायेण'** प्राचुर्येणेति । तथा च प्रायेणास्मिन् तृतीये पादे **'तत्र'** हरौ तस्मात् **'अन्यत्र'** रुद्रप्रकृत्यादौ च श्रुतिलिङ्गादिभिः प्रसिद्धानां नामलिङ्गात्मकशब्दानां विष्णौ **'समन्वयं'** परममुख्यया वृत्त्या तात्पर्यप्रबलहेतुभिः **'दर्शयति'** प्रतिपादयति सूत्रकृदित्यर्थः । श्रुत्यादिसङ्गतिं विषयवाक्यमुदाहृत्य विषयसंशयसयुक्तिकपूर्वपक्षान् दर्शयति – **विष्णोरिति** ॥

तत्र - 'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः । तमेवैकं जानथ आत्मानम्' *(मुं. २–२–५.)* **इत्यत्र 'प्राणानां ग्रन्थिरसि रुद्रो माऽऽविशान्तकः'** *(महाना–३५.)* **'प्राणेश्वरः कृत्तिवासाः पिनाकी'** (घृतसू)

इत्यादिना रुद्रस्य प्राणाधारत्वप्रतीतेः,

'स एषोऽन्तश्चरते बहुधा जायमानः' (मुं.२–२–६.)

इति जीवलिङ्गाच्च तयोः प्राप्तिरिति ॥

उक्तमित्यावर्तते । तत्रेत्यव्ययं तदित्यर्थेऽपि । अत्रेत्यप्यावर्तते । आदिशब्द उभयान्वयी । रुद्रस्येति शेषे षष्ठी । तयोरित्येतत् प्रधानवाय्वोरप्युपलक्षकम् । तथा चादृश्यत्वादिगुणकाक्षरस्य विष्णोः परविद्याविषयत्वं यत्रोक्तं तत्रैवाथर्वणे तत्परविद्याविषयत्वं -

'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः ।

तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ ॥' (मुं.२–२–५)

'अमृतस्यैष सेतुः' इत्यत्र इति वाक्ये तत्र द्युभ्वाद्याश्रये उक्तमित्येका योजना । तत्र द्युभ्वाद्यायतनत्वे 'तयोः' रुद्रजीवयोः प्राप्तिः । कुतः ? अत्र वाक्ये द्युभ्वाद्यायतने प्राणाधारत्वप्रतीतेः श्रवणात् । तथा स एष इति जीवलिङ्गश्रवणाच्च । न च प्राणाधारत्वश्रवणेऽपि कुतोऽत्र रुद्रस्य प्राप्तिरिति वाच्यम् । 'प्राणानां ग्रन्थिरसि रुद्रो माऽऽविशान्तकस्तेनान्नेनाप्यायस्व' (महाना. ३५.) इति तैत्तिरीयवाक्येन, तथा –

'यो ब्रह्मा ब्रह्मण उज्जभार प्राणेश्वरः कृत्तिवासाः पिनाकी ।

ईशानो देवः स न आयुर्दधातु' *(धृतसूक्तम्.)*

इत्यादिखिलसंहितावाक्येन च रुद्रस्य प्राणाधारत्वप्रतीतेः, इत्यपरा योजना । यद्वा – अस्मिन्नेव पक्षे तयोरित्येतत् सप्तम्यन्तमाश्रित्य लिङ्गलिङ्गिरूपधर्मद्वयपरतया व्याख्येयम् । तथात्वे आदिशब्दो 'रुद्रो वाव लोकाधारः' इति वाक्यग्राही । एवं तत्र तयोः प्राप्तिरिति दूरान्वयेन 'तत्र' परविद्याविषयत्वे तयो रुद्रजीवयोः प्राप्तिरित्यन्या योजना ॥

तत्र आद्ययोजनायां द्युभ्वाद्यायतनत्वस्य विष्ण्वन्यत्वाक्षेपमुखेन **'तमेवम्'** इत्यादिना **'अमृतस्यैष सेतुः'** (मुं.२.२.५) इति वाक्यशेषबलात् प्रतीतस्य मोक्षजनकज्ञानजनकविद्याविषयत्वरूपस्य तत्त्वप्रदीपरीत्याऽनन्ययोगेन

प्राधान्येन ज्ञेयत्वरूपस्य वा परविद्याविषयत्वस्य पूर्वोक्तस्य विष्णोरितरत्वाक्षेपाद् अदृश्यत्वाधिकरणेनास्याऽक्षेपिकी सङ्गतिरुक्ता भवति । तथा द्युभ्वाद्यायतनत्वरूपो विषयः दर्शितः । द्विविधद्वितीययोजनायां सयुक्तिकपूर्वपक्षो दर्शितः । तृतीयायां तु पूर्वपक्षफलं दर्शितमिति द्रष्टव्यम् ।

'यस्मिन्' परमात्मनि द्व्यादिलोकाः **'मनः'** तदभिमानी **'सर्वैः प्राणैः'** इन्द्रियैस्तदभिमानिभिश्च सह **'तं'** प्रविष्टं परमात्मानम् **'एकं'** प्रधानं **'जानथ'** जानीध्वम् इति श्रुत्यर्थः ॥ रुद्र उ मा आविश इति पदच्छेदः । उ इत्यव्ययं सम्बुद्धिद्योतको निपातः । मा इत्यव्ययं, नास्मदादेशः माशब्दः । यद्वा मेत्यनेनास्मदादेशो माशब्दश्चेत्युभौ तन्त्रेणोपात्तौ । स च निषेधार्थः । तथा च – हे रुद्र त्वं **'प्राणानाम्'** इन्द्रियाणां ग्रथ्यतेऽस्मिन्निति **'ग्रन्थिः'** आश्रयः **'अन्तकः'** संहर्ता चासि । स त्वं **'मा'** माम् **'आविश'** प्रविश मयि सन्निधिं कुर्वित्यर्थः । यद्वा – हे रुद्र ! अन्तकस्त्वं मां मा प्रविशेत्यर्थः । **'तेन'** आहुतिरूपेण दत्तेन **'अन्नेन'** माम् **'आप्यायस्व'** सुखय ॥

यो **'ब्रह्मणे'** चतुर्मुखाय **'ब्रह्म'** वेदान् **'उज्जभार'** उज्जहार, स **'प्राणेश्वरः'** इन्द्रियेशः **'कृत्तिवासाः'** कृत्तिश्चर्म वसनं यस्यासौ,**'पिनाकी'** ईशानो न आयुः **'दधातु'** पुष्णात्विति श्रुत्यन्तरार्थः । सिद्धान्ते तु रुद्रादिशब्दाः विष्णुपराः । य एष जीवो **'बहुधा'** बहुशरीरेणोत्पद्यमानः शरीरान्तःसञ्चारीत्याथर्वणश्रुत्यर्थः ॥

अत उच्यते –

सू – ॐ ॥ द्युभ्वाद्यायतनं स्वशब्दात् ॥ ॐ ॥ १ ॥

'तमेवैकं जानथ आत्मानम्' *(मुं.२–२–५)* **इत्यात्मशब्दाद्**[1]

१. 'द्युभ्वाद्यायतनं' ह.

द्युभ्वाद्याश्रयो विष्णुरेव ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे – **अत इति** ॥ सौत्रस्वशब्दस्य स्वशब्दपर्यायात्मशब्दादिति विष्णुतत्त्वनिर्णयोक्तेः, स्वेतिशब्दः स्वशब्द इति व्युत्पत्त्या स्वशब्दपर्यायात्मशब्दग्राहित्वं विष्णोः स्वरूपस्यैव साक्षाद्वाचको ह्ययमात्मशब्द इति तत्त्वप्रदीपोक्तेः, स्वस्य विष्णोरेव वाचकः शब्दः स्वशब्द इति विग्रहाश्रयेण चाऽत्मशब्दपरामर्शित्वमाश्रित्य स्वशब्दादित्येतदात्मशब्दादिति व्याख्यातम् ॥

तथा च **'इत्यात्मशब्दात्'** इत्यत्राऽत्मशब्दश्रवणादित्यर्थः । द्युभ्वाद्याश्रय इत्यनेनाऽयतनशब्दो व्याख्यातः । क्वचिदायतनशब्दस्यैव पाठः । विष्णुरेवेत्यनेन समन्वयसूत्रानुवृत्तं तत्त्वित्येतत् श्रुत्यनुसाराल्लिङ्गविपरिणामेन व्याख्यातम् ॥

अनेन – **'स्वशब्दात्'** विष्णुवाचिस्वशब्दपर्यायात्मशब्दात् स्वशब्दात् **'द्युभ्वाद्यायतनं'** स्वर्गभूम्यादिसर्वाश्रयः**'तत्तु'** विष्णुरेवेति सूत्रार्थ उक्तो भवति ॥

'आत्मब्रह्मादयः शब्दास्तमृते विष्णुमव्ययम् ।
न सम्भवन्ति यस्मात् तैर्नैवाऽप्ता गुणपूर्णता ॥'
[1] इति ब्रह्मवैवर्ते ॥ १ ॥

आत्मशब्दादपि कुतोऽयं विष्णुरित्यत आह – **आत्मेति** ॥ यस्मात् **'तैः'** विष्णोरितरैश्चतुर्मुखादिजीवैः गुणपूर्णता **'नैवाऽप्ता'** न सर्वथा प्राप्ता । तस्मादात्मब्रह्मादयः शब्दाः **'अव्ययं'** नित्यनिरतिशयप्रवृत्तिनिमित्तवन्तं विष्णुम् **'ऋते'** विना तदन्यं **'न सम्भवन्ति'** न मुख्यतो वाचकत्वेन प्राप्नुवन्तीत्यर्थः । अनेनाऽत्मशब्दस्यापि गुणपूर्तिरर्थ इत्युक्तं भवति ॥

---

१. **'इति हि ब्रह्मवैवर्ते'** ह.

ब्रह्मवैवर्त इत्यनन्तरमन्यत्र निरवकाशतयोक्तादिति शेषः । तस्याऽत्मशब्दादित्यनेनान्वयः ॥

सू – ॐ ॥ मुक्तोपसृप्यव्यपदेशात् ॥ ॐ ॥ २ ॥

'अमृतस्यैष सेतुः' *(मुं. २–२–५.)* **इति ।**

ननु विष्णौ मुख्योऽप्यात्मशब्दो जायमानत्वरूपजीवलिङ्गबलादमुख्यार्थः किं न स्यात् । तथा च न ततो विष्णोर्द्युभ्वाद्यायतनत्वनिर्णय इत्याशङ्कां परिहरत्सूत्रमुपन्यस्य तदुपात्तश्रुतिमेवोदाहरति – **मुक्तेति ॥** इति मुक्त-प्राप्यत्वव्यपदेशादित्यन्वयः । सूत्रे द्युभ्वाद्यायतनस्येति विपरिणामेनानुवर्त-नीयम् । मुक्तोपसृप्येति भावनिर्देशः । उपसृप्यत्वं चेह श्रौतसेतुशब्दबलात् प्राप्यान्तररहितत्वे सति प्राप्यत्वं विवक्षितम् ।न त्वर्चिरादिवत् प्राप्यत्वमात्रम् ॥

तथा च – द्युभ्वाद्यायतनस्य **'अमृतस्य'** इति मुक्तोपसृप्यत्वोक्ते-र्विष्णुत्वनिश्चयान्नाऽत्मशब्दस्यामुख्यार्थत्वमाश्रित्य विष्णोरन्यद् द्युभ्वाद्यायतनं कल्प्यमिति । **'मुक्तानाम्'** इति स्मरणादमृतस्येति जातावेकवचनम् । तथा च **'अमृतस्य'** मुक्तजातस्य **'एषः'** परमात्मा **'सेतुः'** सेतुरिव सेतुर्मुख्याश्रय इत्यर्थः ॥

ब्रह्मविदाप्नोति परम् ।' *(तै. २–१.)*
'नारायणं महाज्ञेयं विश्वात्मानं परायणम्' *(महाना.११)*
'मुक्तानां परमा गतिः' *(महाभा.)*
'एतमानन्दमयमात्मानमुपसङ्क्रामति' *(तै. २–८.)*
इत्यादिना तस्यैव मुक्तप्राप्यत्वव्यपदेशात् ।

ननु द्युभ्वाद्यायतनस्य मुक्तप्राप्यत्वं कुतः विष्णुत्वनिश्चायक-मित्याशङ्कापरिहारकतयाऽपि सूत्रं व्याचष्टे – **ब्रह्मविदिति ॥ 'इत्यादिना'**

वाक्येन **'तस्य'** विष्णोः । एवेत्यनेन प्राप्यत्वं प्राप्यान्तररहितत्वे सति प्राप्यत्वम् ॥ अनेन द्युभ्वाद्यायतनस्य मुक्तोपसृप्यत्वव्यपदेशात् तस्य विष्णोरेव मुक्तोपसृप्यत्वव्यपदेशादित्यावृत्त्या सूत्रं व्याख्यातम् । प्रधानसूत्रेऽनुवृत्तं तत्त्वित्येतदिह विपरिणामेनानुवर्तनीयमिति सूचितम् । उपसृप्यपदं भावप्रधानं कृत्वा व्याख्यातम् । एवकारो लिङ्गस्यान्यनिष्ठत्वव्यवच्छेदकः । **'ब्रह्मवित्'** विष्णुज्ञानी मुक्तः सन् **'परं'** विष्णुमाप्नोतीति तैत्तिरीयश्रुत्यर्थः ॥

'नारायणम्' इति तैत्तिरीयोपनिषदि महोपनिषदि च श्रुतम् । अत्र **'तद्विश्वमुपजीवति'** इत्यनुवर्तते । तथा च **'तद्विश्वं'** जगत् महनीयं ज्ञेयं, पूज्यज्ञेयं वा । विश्वस्वामिनं **'परायणं'** मुक्तानामाश्रयमुपजीवतीति श्रुत्यर्थः। **'मुक्तानां परमा गतिः'** इति सहस्रनामगतमेकं नाम । परमा मुख्या, गम्यत इति गतिराश्रयः ॥

'एतम्' इति तैत्तिरीयवाक्यमानन्दमयनये व्याकृतम् । आदिपदेन **'एतमानन्दमयमात्मानमुपसङ्क्रम्य'**, **'परमं यः परायणम्'** इत्यादिकं गृह्यते ॥

'बहुनाऽत्र किमुक्तेन यावच्छ्वेतं न गच्छति ।
योगी तावन्न मुक्तः स्यादेष शास्त्रविनिर्णयः[१] ॥ '

इत्यादित्यपुराणे ॥ २ ॥

ननूदाहृतवाक्यैरस्तु विष्णोः मुक्तप्राप्यत्वं, तथाऽप्यत्रान्यव्यवच्छेदाभावाद् विष्णुवदन्यस्य मुक्तप्राप्यत्वं किं न स्यादिति लिङ्गस्य सावकाशत्व-माशङ्क्यान्यत्र प्राप्यत्वमात्रसम्भवेऽपि निरुक्तोपसृप्यत्वं सौत्रमुक्तशब्दित-विवक्षितमुक्त्युपेतजीवप्राप्यत्वं वाऽन्यत्र निरवकाशमिति प्रमाणेनाऽह –

१. 'शास्त्रस्य निर्णयः' ह .

बहुनेति[१] ॥ **'अत्र'** प्राप्यमोक्षतत्साधनविषये **'बहुनोक्तेन'** इदमिदं चेति प्रत्येकं बहुना वचनेन **'किं प्रयोजनं'** न किमपि, प्रत्युतोक्तिगौरवमेवेति भावः । तर्हि कथं निर्णय इत्यत आह – **यावच्छ्वेतमिति** ॥ **'श्वेतं'** श्वेतद्वीपाख्यं विष्णुस्थानं **'यावन्न गच्छति'** न प्राप्नोति, तत्रत्यं विष्णुं च न पश्यति **'तावद् योगी'** अपरोक्षज्ञानाख्योपायवान् मुक्तो न स्यात् । भगवदिच्छारूपावरणान्मुक्तः सम्यगाविर्भूतज्ञानानन्दादिमान् न भवेदिति **'एषः'** उपदेशः **'शास्त्रविनिर्णयः'** शास्त्रतत्त्वविषयकनिर्णयसाधनमित्यर्थः । एषोऽर्थः **'शास्त्रविनिर्णयः'** तज्जन्य-निर्णयविषय इति वा ॥

भावबोधे तु – सूत्रे पुराणे च मुक्तपदेन लिङ्गभङ्गवान् विवक्षित इत्युक्तम् । अत्र [२]श्वेतद्वीपागन्तुरमुक्तत्वोक्त्या श्वेतद्वीपं प्राप्तस्यैव मुक्तत्वं ज्ञायते । तथा च तत्स्थितस्य विष्णोरेवेतरव्यवच्छेदेन मुक्तप्राप्यत्वं सिद्धमिति भावः । इत्यादित्यपुराणे इत्यस्य तस्यैव मुक्तप्राप्यत्वव्यपदेशादित्यनेनान्वयः । अनेन तस्यैवेत्येवकारस्योपयोगो ज्ञापितो भवति । अस्य [३]हेतोर्न लिङ्गस्य सावकाशत्वं शङ्क्यमित्यध्याहृतसाध्येनान्वयः ॥

सू – ॐ ॥ नाऽनुमानमतच्छब्दात् ॥ ॐ ॥ ३ ॥

नानुमानात्मकागमपरिकल्पितरुद्रोऽत्र वाच्यः ।

ननु प्रागुक्तरीत्या रुद्रप्रकृत्योर्द्युभ्वायतनत्वं किं न स्यादित्यत-

---

१. इतः परं प.पुस्तकानुसारेण यथालब्धपाठान्तराणि दीयन्ते ।
(Manuscript No. 354 belongs to P.P.S.M Library)

२. **'श्वेतद्वीपगन्तुः'** – प.

३. **.हेतोर्नान्यस्य मुक्तप्राप्यत्वमित्यध्याहृतसाध्येनान्वयः । तथा च लिङ्गं निरवकाशमिति भावः'** । प.

स्तत्साधकाभावान्न तयोस्तदित्याह सूत्रकृत् – **नानुमानमिति** ॥ अत्र नानुमानमिति साध्यांशं व्याचष्टे – **नानुमानात्मकेति** [१]॥ **'अनुमानप्राप्त-प्रामाण्यासदागमोऽनुमात्मकः'** इति तत्त्वप्रदीपोक्तेरनुमानात्मकेऽनुमान-सिद्धप्रामाण्यके पाशुपताद्यागमे सर्वाश्रयत्वेन कल्पितो बोधित इत्यर्थः ॥

[२] केचित्तु – प्रमाणत्वेनानुमीयत इत्यनुमानमिति व्याचिख्युः । एतत्पक्षे आत्मकशब्दवैयर्थ्यं, तत्त्वप्रदीपटीके विरुद्धे । रुद्रपदं प्रधानादेरुपलक्षकम् । प्रधानसूत्रादनुवृत्तेन[३] द्युभ्वाद्यायतनपदेनोपस्थापितं नत्रर्थप्रतियोगिनं[४] दर्शयति – **अत्रेति** ॥ द्युभ्वाद्यायतनप्रकरण इत्यर्थः । **'वाच्यः'** प्रतिपाद्यः । सर्वाश्रयत्वेनेति शेषः ॥

भस्मधरोग्रत्वादितच्छब्दाभावात् ।

एवं सूत्रे प्रतिज्ञांशं व्याख्याय हेत्वंशं व्याचष्टे – **भस्मधरेति** ॥ तस्य रुद्रस्य शब्दस्तच्छब्दः । तच्छ्रुतिलिङ्गात्मकः । तथा च भस्मधरोग्रत्वादिधर्मविशिष्टधर्मिबोधकभस्मधरोग्रादिशब्दाभावादित्यर्थः । अथ वा – **'किमुच्यते भस्मधरोग्रत्वादीनां तच्छब्दत्वम्'** इत्युत्तरटीकाबलाद् भावभवित्रोरभेदविवक्षया स्वार्थे त्वप्रत्ययः । तत्प्रयोगस्तु[५] लिङ्गात्मकशब्दस्यापि सङ्गच्छाय ॥

---

१. **'नानुमानात्मकेति ॥ अनुमानप्रधानकागमसिद्धेत्यर्थः । यद्वा, प्रमाणत्वेन अनुमीयत इत्यनुमानमागमः । तथा चानुमानात्मके उक्तव्युत्पत्त्या अनुमानशब्दवाच्येऽनुमानसिद्धप्रामाण्यके'** – प.

२. प. पुस्तके केचित्तुपक्षः नास्ति ।

३. **'-सूत्रादनुवर्तित-'** प.

४. **'तदर्थप्रतियोगिकं दर्शयति'** – प.

५. **'प्रयोगस्तु'**– प.

भावबोधे तु – भस्मधरेत्यनेन रुद्रवाचकनामात्मकशब्दो गृह्यते । उग्रत्वपदेनोग्रत्वरूपलिङ्गात्मकशब्दो गृह्यते । आदिपदेन नामलिङ्गात्मकशब्दान्तराणि गृह्यन्ते । समाख्यादेरुपलक्षकमेतत् । तथा च भस्मधरादिरुद्रश्रुतीनाम् उग्रत्वादिरूपतल्लिङ्गानां रुद्रप्रापकसमाख्यादीनां चाभावादित्यर्थ इत्युक्तम् ॥

अत्र रुद्रशिवादितच्छब्दाभावादित्यनुक्त्वा भस्मधरोग्रत्वादीति वचनं **'रुद्रो भस्मधरो नग्नः'** इति वचनाद् विशेषनामाभिप्रायेण[1]। अत एवैतद्वचनोक्ताः नग्नादिशब्दा[2] एवाऽदिपदेन ग्राह्या इति ध्येयम् । भस्मधरेत्येतत् प्रधानत्रिगुणत्वादिरूपप्रकृतिप्रापकश्रुतिलिङ्गाद्यभावादित्यर्थान्तरोपलक्षकतयाऽपि व्याख्येयम् ॥

यद्यपि अतच्छब्दादित्यस्य तच्छब्दाभावादिति व्याख्याने नञः क्रियासापेक्षत्वेनासमर्थत्वात् समासानुपपत्तिः । तथाऽपि निर्मक्षिकमित्यादाविव **'अर्थाभावे यदव्ययम्'** इत्यव्ययीभावसमासाश्रयणान्नानुपपत्तिः। पञ्चमीत्वान्नात्राम् भवति ॥

अनेन सूत्रे जगत्कर्तृत्वेनानुमीयत इत्यनुमानशब्देन वा **'आनुमानमनुमानसम्बन्धि'** इति सत्तर्कदीपावल्युक्तेरानुमानमिति पदच्छेदेनाऽनुमानशब्देन वा अनुमानसिद्धप्रामाण्यकपाशुपताद्यागमसिद्धं[3] रुद्रप्रधानादिकं गृह्यते ॥

यद्वा – प्रमाणत्वेनाऽनुमीयत इत्यनुमानं पाशुपताद्यागमः । ततो मत्वर्थे

---

१. **'उग्रो भस्मधरः' इति वचनविशेषनामत्वाभिप्रायेण । – प.**

२. **'एतद्वचनोक्तनग्नादिशब्दाः'** – प.

३. **'-पाशुपतसाङ्ख्याद्यागमसिद्धम्'** – प.

अर्शआदिभ्योऽच्, तेन तत्प्रतिपाद्यमुच्यते । एवमानुमानमिति पदच्छेदेऽप्यणन्तात् पुनरण् कार्यः । तत्र प्रथमाणन्तपदेनाऽगम उच्यते । द्वितीयेन प्रतिपाद्यत्वम् । तथा च [१]अनुमानात्मकपाशुपताद्यागमप्रतिपाद्यं रुद्रादिकं न द्युभ्वाद्यायतनं = न **'यस्मिन्'** इत्यादिप्रकरणे सर्वाश्रयत्वेन प्रतिपाद्यं, कुतः ? **'अतच्छब्दात्'** रुद्रप्रधानादिसाधकश्रुतिलिङ्गाद्यभावादिति सूत्रार्थ उक्तो भवति ॥

'सोऽन्तकः स रुद्रः स प्राणभृत् स प्राणनायकः स ईशो
यो हरिर्योऽनन्तो यो विष्णुर्यः परोवरीयान्' [२]

इत्यादिना प्राणग्रन्थिरुद्रत्वादेर्विष्णोरेवोक्तत्वात् ।

नन्वाथर्वणे[३] रुद्रादिज्ञापकाभावेऽप्यत्रोक्तप्राणाधारत्वप्रतिपादिकायां **'प्राणानां ग्रन्थिरसि रुद्र'** (महाना–१६–२) इत्यादिसमाख्याश्रुतौ रुद्रादिशब्दानाम् अन्तकत्वादिलिङ्गानां [४]चोक्तत्वात् तद्बलात् तत्रोक्तं द्युभ्वाद्यायतनत्वं रुद्रादेः किं न स्यादित्यत आह – **स इति** ॥ योऽन्तकः संहर्ता स एव तच्छब्दवाच्यः श्रुतः स विष्णुरेव । यो रुद्रः श्रुतः सोऽपि विष्णुरेव । यः **'प्राणभृत्'** प्राणाधारत्वबोधकप्राणग्रन्थिशब्दवाच्यः, सोऽपि विष्णुरेव । यः **'प्राणनायकः'** तत्स्वामी तत एव [५]प्राणेशशब्दितः सोऽपि विष्णुरेव[६] । य ईशः श्रुतः सोऽपि विष्णुरेव । योऽनन्तस्तच्छब्दवाच्यः सोऽपि त्रिविधपरिच्छेदशून्यत्वाद् विष्णुरेव, न शेषः । यः परोवरीयान् सोऽपि रुद्रादेः

---

१. 'अनुमानशब्दितपाशुपता-'–प.
२. 'यः परः परोवरीयान्' ह.
३. 'नन्वत्र रुद्रादि-' प.
४. 'च श्रुतत्वात्' – प.
५. 'प्राणेश्वरशब्दितः'– प.
६. 'हरिरेव' – प.

परतो वाण्यादेः पराद् विरिञ्चात् परतः [१]प्रकृतेः परत्वाद्धरिरेव नान्य इति श्रुत्यर्थः ॥

अत्रान्तराधिकरणोदाहृतचतुर्वेदशिखावाक्ये च **'परस्मादुत्तमं प्रोक्तम्'** इति वचनानुसारेण परपरतरवरवरतमानां चतुर्णां प्रत्यायनाय वृत्तिवाक्ये सुबादेशस्य सो रुत्वोत्वगुणसमानशब्दलोपा ज्ञातव्याः । प्रत्युद्देश्यं विधेयान्वयज्ञापनाय बहूनां यत्तदां प्रयोगः[२]। **'इत्यादिना'** श्रुत्यन्तरवाक्येन **'प्राणग्रन्थिरुद्रत्वादेः'** प्राणग्रन्थित्वलिङ्गस्य रुद्रशब्दवाच्यत्वस्य च तस्यैव विष्णोरेवोक्तत्वादित्यर्थः ।प्राणेश्वरादिशब्दवाच्यत्वमन्तकत्वादिलिङ्गं [३]चाऽदिशब्दार्थः । प्रकृतिश्रुतिलिङ्गादेरप्युपलक्षकमेतत् । न तु रुद्रादेरित्येवकारार्थः । एवकारेणान्यत्रामुख्यतः सत्त्वमनुमन्यते । उक्तत्वादित्यस्य **'न रुद्रादिश्रुतिलिङ्गविरोधः'** इत्यध्याहृतसाध्येनान्वयः [४] ॥

ब्रह्माण्डे च –

'रुजं द्रावयते यस्माद् रुद्रस्तस्माज्जनार्दनः ।
ईशानादेव चेशानो महादेवो महत्त्वतः ॥
पिबन्ति ये नरा नाकं मुक्ताः संसारसागरात् ।
तदाधारो यतो विष्णुः पिनाकीति ततः स्मृतः[५]॥

---

१. 'प्रकृतेः गुणतो वरत्वाद्धरिरेव' – प.
२. 'विधेयान्वयाय हरिर्विष्णुरिति पदद्वयप्रयोगः'। – प.
३. 'वाऽदिशब्दार्थः' – प.
४. 'उक्तत्वादित्यस्य श्रुत्यन्तरोक्तमपि द्युभ्वाद्यायतनत्वं विष्णोरेवेत्यध्याहृतसाध्येनान्वयः' –प.
५. 'श्रुतः' ह.

शिवः सुखात्मकत्वेन शर्वः शंरोधनाद्धरिः ।
कृत्त्यात्मकमिमं देहं यतो वस्ते प्रवर्तयन् ॥
कृत्तिवासास्ततो देवो विरिञ्चश्च विरेचनात् ।
बृंहणाद् ब्रह्मनामाऽसावैश्वर्यादिन्द्र उच्यते ॥
एवं नानाविधैः शब्दैरेक एव त्रिविक्रमः ।
वेदेषु सपुराणेषु गीयते पुरुषोत्तमः ॥' इति ।

ननु तथाऽपि न प्राणाधारत्वद्युभ्वाद्यायतनत्वबोधकसमाख्याश्रुतौ विष्णोः प्रतिपाद्यत्वनिश्चयः । तत्रत्यानां रुद्रादिशब्दानां [१]पशुपत्यादावेव रूढत्वेन विष्णौ तदभावात्, भावे वा पुनरनिश्चयात् । विष्णौ योग-वृत्तिसम्भवेऽपि तस्या रूढितो दुर्बलत्वेनानिश्चायकत्वात् । न हि श्रुत्यन्तरे विष्णुलिङ्गाद्यस्तीत्यत आह – **ब्रह्माण्डे चेति** ॥ चोऽप्यर्थः समुच्चये । उक्तत्वादित्यनुवर्तते । तेनास्यान्वयः । किमुक्तमित्यतो रुद्रादिशब्दानां महायोगविद्वद्रूढिप्रतिपादकं वाक्यं पठति – **रुजमिति** ॥ **'रुजं'** रोगम् उत्पत्त्यादिकं **'द्रावयते'** निर्वापयति[२] निवर्तयति यस्मात् तस्माद् रुद्र इत्युच्यते । क इत्यतस्तद्रूपविशेषमाह – **जनार्दन इति** ॥ जननमर्दयतीति व्युत्पत्तिः । ईशनाद् ईशानां ब्रह्मादीनां चेष्टकत्वादीशानोऽपि स एवेत्यर्थः । महत्त्वत इत्युपलक्षणम् । द्योतनादेश्चेत्यपि द्रष्टव्यम् ॥

ये **'नराः'** जनाः संसारसागरान्मुक्ताः सन्तो **'नाकं'** परमसुखं **'पिबन्ति'** भुञ्जते ते पिनाकाः । विष्णुर्यतः **'तदाधारः'** तेषामाधारस्ततः पिनाकीति **'स्मृतः'** अभिहितः श्रुताविति शेषः । [३]श्रुत इति पाठः स्वरसः ॥

१. **'पशुपत्यादिष्वेव'** – प.
२. **'निर्यापयति'** – प.
३. **'श्रुतिपाठः स्वरसः'**–प.

'शंरोधनात्' मुक्तिपर्यन्तं [१]स्वरूपभूतमपि सुखं रुध्वा वर्तनाद् आसुरसुखं निरुध्य वर्तनाद्वा शर्व इत्यर्थः ॥

यतः **'कृत्त्यात्मकं'** चर्ममयमिमं देहं **'प्रवर्तयन्'** सृजन् नियमयन् वा तेन स्वात्मानं जीवं वा **'वस्ते'** आच्छादयति तदन्तर्वर्तते । यद्वा देहं वस्ते अधिवसतीत्यतः कृत्तिवासा इत्युच्यत इत्यर्थः ॥

'विरेत्रनात्' जगत्सर्जनात् ॥

असौ विष्णुः बृंहणाद् वर्धनाद्वा[२] ब्रह्मनामा । असौ परमैश्वर्यादिन्द्र इत्युच्यते ॥

एवं विष्णौ रुद्रादिशब्दानां महायोगमुक्त्वा विद्वद्रूढिं चाऽह – **एवमिति** ॥ निमित्तैरित्यध्याहार्यम् । तथा च **'एवम्'** उक्तरीत्या नानाविधैर्निमित्तैः सपुराणेषु वेदेषु गतैः एतैर्नानाविधैः शब्दैर्विष्णुरेक एव **'गीयते'** मुख्यतोऽभिधीयत इत्यर्थः ॥

कथमन्यत्रादृष्टं सर्वशब्दमुख्यवाच्यत्वमस्येत्यतः **'पुरुषोत्तमस्त्रिविक्रमः'** इत्याभ्यां तत्रोपपादकमुक्तम् । [३]त्रिभुवनार्थशब्दव्यापी हि त्रिविक्रमः । [४]सर्वपुरुषशब्दनिमित्तकस्वामी हि पुरुषोत्तमः । तथा चानेन विष्णौ रुद्रादिशब्दानां महायोगविद्वद्रूढिकथनात् तयोश्च रूढिमात्रात् प्राबल्याद् युक्तः समाख्याश्रुत्यन्तरेऽपि विष्णोः प्रतिपाद्यत्वनिश्चय इति भावः । **'पुरुषोत्तम इति'** इत्यन्तस्य **'ब्रह्माण्डे'** इति पूर्वेणान्वयः ॥

---

१. **'स्वरूपभूतमिति सुखव्यावर्तनादासुरसुखनिरोधकत्वाच्च शर्वः'** – प.
२. **'वृद्धत्वाद् वा'** – प.
३. **'त्रिभुवनव्यापी'** – प.
४. **'सर्वपुरुषस्वामी'** – प.

वामने च –

'न तु नारायणादीनां नाम्नामन्यत्र सम्भवः ।
अन्यनाम्नां गतिर्विष्णुरेक एव प्रकीर्तितः ॥' इति ।

ननु यदि रुद्रादिशब्दानां विष्णुपरत्वमुक्त्वा **'रुद्रो माऽऽविशान्तकः'** इत्यादिश्रुतीनामनिर्णायकत्वमुच्यते, तर्हि नारायणादिनाम्नां रुद्रादिपरत्वेन **'नारायणं महाज्ञेयम्'** (महाना–११) इत्यादिश्रुतीनामनिर्णायकत्वं च स्यादित्यत आह – **वामने चेति** ॥ चोऽप्यर्थे । अस्याप्युक्तत्वादविरोध इति पूर्वेणान्वयः । किमुक्तमित्यतस्तद्वाक्यं पठति – **न त्विति** ॥ तुरवधारणे । **'नारायणादीनां'** नारायण इत्यादीनामन्यत्र रुद्रादौ सम्भवो मुख्यवृत्तिरस्तीति शेषः । **'अन्यनाम्नां'** रुद्रादिशब्दानां **'विष्णुरेक एव गतिः'** मुख्यवाच्यः प्रकीर्तित इत्यर्थः । इतिशब्दस्य वामन इत्यनेनान्वयः । तस्य नारायणादिनाम्नामन्यत्र निरवकाशत्वोक्तेः न तच्छ्रुतीनामनिर्णायकत्वमिति [1] विवक्षितसाध्येनान्वयः ॥

स्कान्दे च –

'ऋते नारायणादीनि नामानि पुरुषोत्तमः ।
प्रादादन्यत्र भगवान् राजेवर्ते स्वकं पुरम् ॥' इति ।

भगवन्नामत्वाविशेषाद् रुद्रादिनामवन्नारायणादिनाम्नामपि रुद्रादौ वृत्तिः [2]किं न स्यादित्यत आह – **स्कान्दे चेति** ॥ चोऽप्यर्थः समुच्चये । अस्याप्युक्तत्वादिति पूर्वेणान्वयः । [3]किमुक्तमित्यतस्तद्वाक्यं पठति – **ऋत**

---

१. **'अनिर्णायकत्वमिति भावः'** – प.
२. **'प्रवृत्तिः'** – प.
३. **'किमुक्तमित्यतः'** इति प. पाठे नास्ति ।

इति ॥ विनेत्यर्थः । **'अन्यत्र'** अन्येभ्यो रुद्रादिभ्यः अन्यानि रुद्रादिनामानीति शेषः । आदिशब्देन विष्णुरित्यादिकं गृह्यते । अत्र दृष्टान्तमाह – **राजेति ॥** यथा राजा स्वकं पुरमृतेऽन्यदमात्यादिभ्यो ददाति तद्वदित्यर्थः । इतीत्यन्तस्य स्कान्दे इत्यनेनान्वयः । तस्य च नारायणादिनाम्नामन्यत्र वृत्त्यभावस्योक्तत्वान्न साम्यमित्युपस्कृतेनान्वयः । अनेन स्कान्दे नारायणादिनाम्नां विष्णोरेवोक्तत्वान्न साम्यमित्यन्वयेन पूर्वप्रयुक्तैवकारस्य कृत्यान्तरं सूचितं भवति ॥

'चतुर्मुखः शतानन्दो ब्रह्मणः पद्मभूरिति ।
उग्रो भस्मधरो नग्नः कपालीति शिवस्य च ।
विशेषनामानि ददौ स्वकीयान्यपि केशवः ॥' इति च ब्राह्मे ॥ ३ ॥

यद्येवं रुद्रादिशब्दाः विष्ण्वैकपराः तर्हि किमुच्यते भस्मधरोग्रत्वादीनां तच्छब्दत्वम् । विष्णुदत्तत्वाभिप्रायेण चेत् – तर्हि रुद्रादिशब्दा अपि तादृशा इति कथं तैर्निर्णयाभाव इत्यत आह – **चतुर्मुख इति ॥** यद्यपि स्वकीयानि, तथाऽपि **'केशवः'** ब्रह्मरुद्रप्रवर्तको विष्णुः **'स्वकीयानि'** मुख्यतः स्ववाचकान्येव चतुर्मुखः शतानन्दः पद्मभूरिति **'विशेषनामानि'** नामविशेषानेव **'ब्रह्मणः'** ब्रह्मणे ददावित्यर्थः ॥

'नग्नः' दिगम्बरः । **'शिवस्य'** शिवाय । चस्त्वर्थः । ब्राह्म इत्यस्याप्युक्तत्वादिति पूर्वेणान्वयः । रुद्रादौ भस्मधरोग्रत्वादेरेव विष्णोः सकाशात् प्राप्तत्वेनेति तदर्थः । तस्य च पूर्वोक्तं युक्तमिति साध्येनान्वयः ॥

सू – ॐ ॥ प्राणभृच्च ॥ ॐ ॥ ४ ॥

एतैरेव हेतुभिर्न जीवो वायुश्च ।

ननु **'स एषोऽन्तश्चरते बहुधा जायमानः'** (मुं. २–२–६.) इति जीवलिङ्गश्रवणात् प्राणित्वप्रसिद्धेश्च जीवसामान्यस्य वा, [१]विषयभूतलोकाधारत्वस्य **'वायुना वै गौतम सूत्रेणायं लोकः परश्च लोकः सर्वाणि भूतानि सन्दब्धानि भवन्ति'** (बृ.५–७–२) इति श्रुत्यन्तरे वायुनिष्ठत्वेन प्रसिद्धत्वाद् वायोर्वाऽत्र प्रकरणे द्युभ्वाद्याश्रयत्वेन प्रतिपाद्यता किं न स्यादित्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे – **प्राणभृच्चेति ॥ एतैरिति ॥** आत्मशब्दः, मुक्तोपसृप्यत्वम्, अतच्छब्दो रुद्रादिप्रापकश्रुतीनां विष्णुपरत्वमित्येवंरूपैः पूर्वोक्तहेतुभिरित्यर्थः । नात्र हेत्वन्तरं वाच्यमित्येवशब्दार्थः । जीवो वायुरित्यनेन प्राणभृच्छब्दो व्याख्यातः ॥

अत्र वाच्य इत्यनुषज्यते । चः समुच्चये ॥ अनेन सूत्रे चशब्दः प्रागुक्तहेतूनां नानुमानमित्यतो नञश्च समाकर्षकः । न केवलं रुद्रोऽत्र न वाच्यः, किन्तु जीवो वायुश्चेति समुच्चयार्थश्चेत्युक्तं भवति ॥

'अजायमानो बहुधा विजायते' *(तै.आ. ३–१३–१.)*

इति तस्यैव बहुधा जन्मोक्तेः ॥ ४ ॥

ननु **'वायुना वै गौतम'** इत्यादिश्रुतेर्विष्णुपरत्वेन वायुसाधकत्वाभावेऽपि बहुधा जन्माख्यलिङ्गेन जीवोऽत्र वाच्यः किं न स्यादित्यत आह – **अजायमान इति ॥** देहतः **'अजायमानः'** अविकुर्वाणो 'बहुधा' रामकृष्णादिरूपेण 'विजायते' तत्र तत्र प्रादुर्भवतीत्यर्थः । **इतीति ॥** इति पुरुषसूक्तगतवाक्येनेत्यर्थः[२] ॥

---

१. **'विषयीभूत'** – प.

२. **'पुरुषसूक्तगतश्रुत्येत्यर्थः'** – प.

यस्य जन्मासम्भवोऽभिहितः पूर्ववादिना तस्यैव विष्णोर्न जीवस्येत्येवशब्दार्थः । तथा च लिङ्गं सावकाशमिति[१] न तद्विरोध इति वाक्यशेषः ॥

सू – ॐ ॥ भेदव्यपदेशात् ॥ ॐ ॥ ५ ॥

न चैक्यं वाच्यम् ।
'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानम्' *(मुं.३–१–२)*

इति भेदव्यपदेशात् ॥ ५ ॥

ननु किं जीवलिङ्गस्य विष्णुगतत्वप्रतिपादनायासेन, लिङ्गबलाज्जीवस्यैव द्युभ्वाद्यायतनत्वं स्यात् । न चोक्तात्मशब्दादिहेतुविरोधः । जीवेशाभेदाभिप्रायेण जीवेऽप्यात्मशब्दाद्युक्तिसम्भवादित्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे –**भेदेति ॥ नैक्यं वाच्यमिति**[२] ॥ जीवेश्वरयोरत्राभिप्रेतमिति च शेषः[३] । अनेन सूत्रे नानुमानमित्यतो नञ्नुवर्तनीयः । स च हेतुगतभेदप्रतियोगिना संयोज्य इत्युक्तं भवति । चशब्दो जीवेशैक्यप्रयुक्तात्मशब्दवाच्यतैतत्प्रकरणबोध्यताऽपि नेति समुच्चयार्थः । कोऽसौ व्यपदेश इत्यत आह – **जुष्टमिति ॥ इति भेदव्यपदेशादिति** ॥ इति भेदश्रुतेरित्यर्थः ॥

अनेन – **'जुष्टम्'** इति वाक्ये **'पश्यति'** इति दर्शनकर्तृत्वेन प्रकृतजीवस्य ईशपदोक्तेश्च ईश्वराद्भेदोक्तेः न तयोरैक्यमत्राभिप्रेतमिति वाच्यमिति सूत्रार्थ उक्तो भवति । श्रुतिस्त्वानन्दमयनये व्याकृता ॥

---

१. 'सावकाशमिति न जीवसाधकमिति भावः ।' प.
२. 'न चैक्यं वाच्यमिति' - प.
३. 'इति शेषः' – प.

सू – ॐ ॥ प्रकरणात् ॥ ॐ ॥ ६ ॥

'द्वे विद्ये वेदितव्ये' *(मुं.१–१–४)*
इति तस्य [१] ह्येतत् प्रकरणम् ॥ ६ ॥

नन्वत्र जीवस्य कस्माच्चिदीशादन्यत्वमुच्यते, न परमात्मनः, अतो न तयोर्भेद इत्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे – **प्रकरणादिति** ॥ [२]इतीत्यनन्तरम् **'इत्युपक्रम्याधीतम्'** इति शेषः । **'हि'** यतः **'एतत्'** जुष्टमित्यादिवाक्यजातं यतः **'तस्यैव'** परविद्याविषयस्य परमात्मन एव **'प्रकरणं'** नान्यस्येत्येवशब्दार्थः ॥

अनेन स्वप्रकरणात् **'द्वे विद्ये वेदितव्ये'** इति परविद्याविषय-वस्तुनोऽत्राधीतत्वेन विष्णुप्रकरणत्वात् परमात्मन एव भेदव्यपदेशावगतेः न जीवपरमात्मनोरभेदोऽत्राभिप्रेत इति वाच्यमिति सूत्रयोजना दर्शिता भवति ॥

सू – ॐ ॥ स्थित्यदनाभ्यां च ॥ ॐ ॥ ७ ॥

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥'
(मुं.३–१–१)

---

१. 'तस्यैव' – ह.

२. 'इतीत्यनन्तरम् 'आरभ्याधीतस्य' इति शेषः । इत्युपक्रम्य पठितस्येति तदर्थः । तस्यैव परविद्याविषयस्य परमात्मन एव नान्यस्येत्येवशब्दार्थः । हि यतः एतद् जुष्टमित्यादिवाक्यजातम् । अत ईशशब्देन परमात्मैवोच्यते नान्य इति नात्र परमात्मभेदोक्त्यभाव इति वाक्यशेषः । अनेन स्वप्रकरणात् स्वशब्दितपरमात्मन एव भेदव्यपदेशा-' प.

इतीशजीवयोः स्थित्यदनोक्तेः ॥ ७ ॥

॥ इति द्युभ्वाधिकरणम् ॥ १ ॥

न केवलं **'जुष्टम्'** इति भेदश्रुतेर्न जीवेशभेदोऽत्र प्रकरणे विवक्षित इति ज्ञायते, किन्तु लिङ्गादपीत्याह सूत्रकृत् – **स्थितीति** ॥ तदसिद्धिवारणाय श्रुत्युदाहरणेन व्याचष्टे – **द्वा सुपर्णेति** ॥

अनेन – **'द्वा सुपर्णा'** इत्यत्र श्रुताभ्यां कर्मफलानुपजीवनावस्थिति-तदुपजीवनाभ्यां हेतुभ्यां च नैवात्र जीवेशयोरैक्यं वाच्यमिति सूत्रार्थ उक्तो भवति ॥

चशब्दस्तु हेतुसमुच्चायक इति स्पष्टत्वान्न व्याख्यातः । श्रुतावदनस्य प्राथम्येऽपि स्थितेरीशसम्बन्धित्वेनाभ्यर्हितत्वादल्पाक्षरत्वाच्च सूत्रे तदनुसारेण भाष्ये च श्रौतक्रममुल्लङ्घ्य स्थितेः प्रथममुक्तिः ॥

'सयुजा' सयुजौ संयुक्तौ उपकार्योपकारकभाववत्तया परस्परापरिहारेण वर्तमानौ **'सखाया'** सखायौ प्रीत्या एकदेशस्थौ **'द्वा'** द्वौ **'सुपर्णा'** सुपर्णौ । सुपर्णसरूपौ । **'सुपर्णा सखाया'** इति विशेषणस्वारस्यादस्य समजीवमात्रविषयत्वे[1] सुष्ठुपरमानन्दरूपौ जीवेश्वरौ **'समानम्'** एकं **'वृक्षं'** देहाख्यम् अश्वत्थं **'परिषस्वजाते'** आलिलिङ्गतुः । **'तयोः'** सुपर्णयोर्मध्ये ईश्वरात् **'अन्यो'** जीवः **'पिप्पलम्'** अश्वत्थफलरूपं देहजनितकर्मफलम् **'स्वादु अत्ति'** अस्वाद्वेव स्वादुत्वेनैव अश्नाति । जीवात् **'अन्यः'** ईश्वरस्तु **'अनश्नन्'** जीवाद्यमेवाभुञ्जानः **'अभि'** अभितः **'चाकशीति'** प्रकाशते । न तु स्वस्थित्यै जीववत् कर्मफलमपेक्षत इति मुण्डकश्रुत्यर्थः ॥ १ ॥

॥ इति द्युभ्वाधिकरणम् ॥ १ ॥

---

१. **'सज्जीवमात्रविषयत्वेन'** – प.

॥ २. अथ भूमाधिकरणम् ॥

(हरेरेव भूमशब्दवाच्यत्वम्)

'प्राणो वा आशाया भूयान्' इत्युक्त्वा
'यो वै भूमा तत् सुखम्' *(छां. ७–२३.)*
इत्युक्तेस्तस्यैव [1]भूमत्वप्राप्तिः ।

॥ २. अथ भूमाधिकरणम् ॥

अत्राधिकरणे भूमनाम्नो विष्णौ समन्वयः प्रतिपाद्यते । भूमशब्दश्च **'भूम्नः क्रतुवत्'** इत्यादौ क्वचिद्धर्मवाचकोऽप्यत्र पूर्णरूपधर्मिवचनः । पूर्णत्वं च गुणत उत्तमत्वमिति ध्येयम् । श्रुत्यादिसङ्गतिं विषयादिकं च सूचयन् सयुक्तिकं पूर्वपक्षं दर्शयति – **प्राण इति** ॥ [2]'छान्दोग्ये' इत्यादौ उपस्कार्यम् । **'इत्युक्त्वा'** इत्युपक्रम्येत्युपलक्षणम् । तदुत्तममनुक्त्वेत्यपि द्रष्टव्यम् । अत एव तस्यैव प्राणस्यैवेत्येवकारोऽन्यव्यवच्छेदकः प्रायोजि ॥

श्रुतौ पूर्वपक्षे प्राणशब्दो वायुमात्रपरः । सिद्धान्ते तु भाष्यरीत्या वायुविष्णूभयपरः । न्यायविवरणछान्दोग्यभाष्यरीत्या तु वायुमात्रपरः । न च वायुविष्णूभयवाचित्वं वायुमात्रवाचित्वमित्यर्थद्वयं विरुद्धम् । अन्तर्यामिविवक्षया भाष्यस्य, तदविवक्षया विवरणादेः प्रवृत्तत्वात् ॥

यथा **'आत्मनः आकाशः'** (तै.२–१) इत्यत्र सम्भूतशब्दस्यानेकार्थत्वेऽन्तर्यामिविष्णुरप्याकाशपदेनोच्यते । तस्य जनिमात्रार्थत्वे तु न तेन स उच्यते । तथा तत्त्वप्रदीपे तु **'अभ्युपगमवादत्वात्'** इत्यादिना अयं प्राणो

१. **'इति तस्यैव'** ह
२. **'छन्दोगश्रुतौ'** – प.

विष्णुरित्यभ्युपेत्य वादेन भाष्यं प्रवृत्तम्, इत्युक्तम् ॥

तथा चाऽद्यपक्षे प्राणः **'आशायाः'** भारत्याः **'भूयान्'** गुणतो ज्येष्ठः । एवं **'प्राणः'** तदन्तर्यामी विष्णुरन्तर्यामित्वादेव तत आशायाश्च भूयानित्यर्थः ॥ अनेन पूर्वमानन्दमयशब्दोक्तसजातीयोत्कृष्टत्वरूपपूर्णत्वस्येह वायावाक्षेपादानन्दमयाधिकरणेनास्याऽक्षेपिकी सङ्गतिः सूचिता ॥

छन्दोगश्रुत्युक्तो भूमाख्यो विषयः, किं वायुरुत विष्णुरिति सन्देहश्च सूचितः । तथा तस्यैव भूमत्वप्राप्तिरिति पूर्वपक्षः । तत्र प्राणोपक्रमतदुत्तमानुक्तिरूपयुक्तिश्च दर्शिता भवति । **'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखम्'** इति वाक्ये सुखशब्दः पूर्णसुखार्थः । **'यत्सुखं स भूमा'** इति व्यासतीर्थीयोक्तेः, सर्वनामानि पर्यायेण तत्तल्लिङ्गभाञ्जीत्युक्तेश्च निरुपपदसुखशब्दमात्रस्यापि पूर्णसुखार्थत्वात् । यदनन्याधीनपूर्णानन्दसुखं स भूमा गुणतः पूर्णो नारायण इत्युद्देश्यविधेययोर्व्यत्ययः [१] । अत एव स्वातन्त्र्येण सुखस्य विशेषणान्न मुक्तजीवेष्वनैकान्त्यमित्याशयेन तदुपपादयति – **नाल्प इति** ॥ **'अल्पे'** अपूर्णे मुक्तजीवे तत्प्रसादं विना यतः सुखं नास्तीत्यर्थः । निगमयति – **भूमैव सुखमिति** ॥ अत्रापि व्यत्ययः ॥

'उत्क्रान्तप्राणान्' *(छां. ७–१५–३.)*

[२]इत्यादितल्लिङ्गात् प्राणशब्दश्च वायुवाचीति ।

ननु **'प्राणो वा आशाया भूयान्'** इत्युक्तप्राणशब्दस्य **'अत एव प्राणः'** (ब्र. सू. १–१–२३) इत्युक्तरीत्या विष्णुपरत्वाद् विष्णोरेव भूमत्वप्राप्तेः कथं प्राणशब्दबलाद् वायोर्भूमत्वप्राप्तिरित्यत आह – **उत्क्रान्तेति** ॥ **इत्यादीति** ॥ लुप्तविभक्तिको निर्देशः । आदिशब्देन **'उत्क्रान्तप्राणान् शूलेन**

---

१. 'व्यत्ययः कार्यः'– प. २. 'इत्यादिलिङ्गात्' ह.

समासं व्यतिषं दहेत् नैनं ब्रूयुः पितृहाऽसीति' (छा. उ.७–१५–३) समग्रवाक्यं गृह्यते । तच्च तत् लिङ्गं च, तस्य लिङ्गमिति च विग्रहः । अयमिति शेषः । चशब्दोऽवधारणे । वायुवाची चेति भिन्नक्रमः ॥

तथा च **'अयं'** प्राणशब्दो **'वायुवाच्येव'** न विष्णुवाची । कुतः ? **'उत्क्रान्तप्राणान्'** इत्यादौ **'तल्लिङ्गात्'** तस्य प्राणस्योत्क्रमणादिरूप-लिङ्गश्रवणादिति योजना । उत्क्रान्तः प्राणो येभ्यस्ते तथोक्ताः । तान् मातृपित्राचार्यादीन् **'समासं'** साकल्येन **'व्यतिषम्'** एकदेशेन च शूलेन विलुण्ठ्य यदि दहेत्पुत्रः शिष्यो वा तथा नैनं ब्रूयुः जनाः । किमिति ? पितृहाऽसीति मातृहाऽसीति । मुख्यप्राणसन्निधानाभावादिति भावः । इति श्रुत्यर्थः ॥

अतो वक्ति –

सू – ॐ ॥ भूमा सम्प्रसादादध्युपदेशात् ॥ ॐ ॥८ ॥

'सम्प्रसादात्' पूर्णसुखरूपत्वात्
'अध्युपदेशात्' सर्वेषामुपर्युपदेशाच्च विष्णुरेव भूमा ।

सिद्धान्तयत्सूत्रमवतारयति – **अत इति** ॥ सूत्रे प्रसीदत्यनेन [१]जन इति प्रसादः सुखम्, सम्यक् प्रसादः सम्प्रसादः, तस्मादिति विग्रहः । ईश्वरे सुखमिव दुःखमपि स्यादिति नाऽशङ्क्यं, पूर्णसुखकार्येण सम्यक् प्रसादेन दुःखाभावनिश्चयादित्याशयेन प्रयुक्तं सम्प्रसादादिति हेतुमनूद्य व्याचष्टे – **सम्प्रसादादिति** ॥ उत्तरसूत्रस्थचशब्दोऽत्राऽकर्षणीय इत्याशयेन **'अध्युपदेशात्'** इत्येतद्धेत्वन्तरपरतयाऽनूद्य व्याख्याति – **अध्युपदेशादिति** ॥

१. 'जगदिति' – प.

नामादीनां सर्वेषाम्[१] **'उपरि'** तदुत्तमत्वेन **'उपदेशात्'** उक्तेरित्यर्थः । चो हेतु-समुच्चये । अत्राधीत्येव हेतुः, न तु समग्र एको हेतुः । स चेश्वरवचनो भावप्रधानः, विशेषानुक्तेः अखिलेश्वरत्वादिति हेत्वर्थः अखिलेशत्वादित्यनुव्याख्यानसुधोक्तो ज्ञातव्यः । असिद्धिपरिहारायोपदेश-पर्यन्तं धावनम् । प्रायपाठाद् भूम्नोऽखिलाधिपप्राणाधिपत्ये अखिलाधिपत्यं सिद्ध्यतीति भावः । समन्वयसूत्रादनुवृत्तस्य तत्त्विति विधेय-समर्पकस्यार्थमाह – **विष्णुरेवेति** ॥ भूमा विष्णुरेवेत्यन्वयः ॥

'सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् ।
विश्वं नारायणं देवमक्षरं परमं पदम् ॥
[२]विश्वतः परमां नित्यम्' *(महाना. ११.)* **इति हि श्रुतिः ।**

पूर्णसुखत्वादिकं कुतो विष्णुत्वनिश्चायकमित्यत आह – **सहस्रेति** ॥ इति हीति । **'हि'** यस्मात् **'इति'** नारायणानुवाकगता श्रुतिरस्ति, तस्मात् सम्प्रसादाद् विष्णुत्वनिश्चयो भवत्येवेत्यर्थः । **'सहस्रशीर्षं'** सहस्रपदोपक्षितामितमूर्धानं 'देवं' प्रकाशरूपं विश्वतो [३]दर्शनादक्ष्यस्येति विश्वाक्षं **'विश्वशम्भुवं'** पूर्णसुखाश्रयं **'विश्वं'** जगत्प्रविष्टत्वेन वर्तमानं **'नारायणं'** मुक्तसङ्घे व्यक्तम् **'अक्षरं'** स्वरूपतो नाशरहितम् अक्षेषु रममाणं वा । परेभ्यो ब्रह्मादिभ्योऽधिकत्वेन मीयत इति परा मा यस्येति वा परमस्तं परमं **'पदं'** प्राप्यं ॥

विश्वतः परमश्चासावश्चेति विग्रहः, सवर्णदीर्घः । सोमपाशब्दवदयं शब्दः ।

---

१. **'सर्वेषां नामादीनामुपरितनत्वेनोपदेशादुक्तेरित्यर्थः'** – प.
२. **'विश्वतः परमं'** पा.
३. **'दर्शनादिकमस्येति विश्वाक्षं'** – प.

सुधारीत्या आबन्तत्वाश्रयेण लिङ्गव्यत्ययो वा । तथा च **'विश्वतःपरमां'** सर्वस्मादुत्तमम् अकारवाच्यं सर्वोत्तमं वा **'नित्यं'** देहतो नाशरहितं **'विश्वं'** गुणैः पूर्णं यज्ञेषु हविःस्वीकरणात् हरिवर्णत्वाच्च[१] **'हरिं' 'देवं'** क्रीडादिगुणकं **'नारायणं'** तदाख्यं देवं तद्विश्वमुपजीवतीति श्रुत्यर्थः ॥

यद्यपि **'विश्वतः परमम्'** इति द्राविडपाठः । तथाऽप्यान्ध्रपाठमनुसृत्य परमामित्युक्तम् ॥

'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' *(बृ. ६–४–२.)* **इत्यादिना नोत्क्रमणादिलिङ्गविरोधोऽपि [२] ॥ ८ ॥**

अत्र प्राणशब्देन विष्णोर्वाच्यत्वाङ्गीकारे प्रागुक्तोत्क्रमणादिलिङ्गविरोध इत्यतो नेत्याह – **तमिति ॥** प्रथमादिशब्देन तदुत्तरवाक्यानि, द्वितीयेन तल्लिङ्गान्तराणि [३]च गृह्यन्ते । अपिशब्दः समुच्चये, यद्यपि तथाऽपीत्यर्थे च । तथा च – न केवलं प्राणशब्दोपक्रमविरोधः, तस्य विष्णुपरत्वात्, किन्तु **'अपि'** अत्र प्राणशब्देन विष्णो– वाच्यत्वाङ्गीकारे[४] उत्क्रमणादिलिङ्गविरोधो नास्ति । कुतः ? **'अपि'** तथापि[५] सर्वगतेऽपि विष्णावुत्क्रमणादिलिङ्गस्य **'तमुत्क्रामन्तम्'** इत्यादिना वाजसनेयवाक्येन सिद्धत्वादिति योजना । श्रुतिसिद्धेऽर्थे लोकदृष्टिविरोधोऽकिञ्चित्कर इति भावः ॥

'तस्य हैतस्य हृदयस्याग्रं प्रद्योतते । तेन प्रद्योतेनैष आत्मा निष्क्रामति' (बृ.६–४–२.) इति पूर्ववाक्ये प्रकृतः परमात्मा तच्छब्देन परामृश्यते । तथा च प्रद्योतितहृदयाग्रेणापरोक्षज्ञानिदेहात् **'उत्क्रामन्तं'**

---

१. **'हरितवर्णत्वाच्च'** – प

२. **'नोत्क्रमादिलिङ्गविरोधोऽपि'** ह. ३. **तदुक्तलिङ्गान्तराणि च'** – प.

४. **'वाच्यत्वाङ्गीकारेऽपि'** – प. ५. **'तथापि'** इति पदं प. पाठे नास्ति ।

निर्गच्छन्तं परमात्मानमनुसृत्य **'प्राणो'** मुख्यवायुः **'उत्क्रामति'** देहान्निर्गच्छतीति श्रुत्यर्थः ॥

सू – ॐ ॥ धर्मोपपत्तेश्च ॥ ॐ ॥ ९ ॥

सर्वगतत्वादिधर्मोपपत्तेश्च ॥ ९ ॥

॥ इति भूमाधिकरणम् ॥ २ ॥

युक्त्यन्तरेण विष्णोर्भूमत्वप्रतिपादकं सूत्रमुपन्यस्य व्याचष्टे –**धर्मेति** ॥ आदिपदेन स्वातन्त्र्यस्वप्रतिष्ठितत्वादिकं गृह्यते । अस्य हेतोर्विष्णुरेव भूमेति प्रधानसाध्येनान्वयः ॥

यद्यपि छान्दोग्ये **'यत्र नान्यत्'** (छां.७.२४.१) इति स्वातन्त्र्य-बोधकवाक्यानन्तरं **'स एवाधस्तात्'** (छां.७.२५) इति सर्वगतत्वाभिधायक-वाक्यश्रवणात् प्रथमश्रुतस्वातन्त्र्यधर्मं स्वशब्देन गृहीत्वा सर्वगतत्वमादिशब्देन ग्राह्यम् । तथाऽपि तद्वाक्ये भूमत्वनियतसर्वगतत्वस्य स्पष्टं प्रतीतेस्तदेव वाचकशब्देन गृहीतमिति द्रष्टव्यम् ॥

अनेन – सूत्रे चो युक्तिसमुच्चये धर्मशब्दात् परमन्वेति । लिङ्गस्य निरवकाशत्वज्ञापनायोपपत्तिपर्यन्तं धावनम् । तथा च न केवलं सम्प्रसादादेः, किन्तु **'स एवाधस्तात् स उपरिष्टात् स पश्चात् स पुरस्तात् स दक्षिणतः स उत्तरतः स एवेदं सर्वम्'** (छां. ७–२५–१.) इति वाक्ये, तथा – **'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमा'** (छां. ७–२४–१) इति वाक्ये, तथा – **'स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि'** (छां. ७–२४–१) इत्यादिवाक्ये च सर्वगतत्वादिधर्मश्रवणाच्च भूमा विष्णुरेव, तेषां च धर्माणां विष्णावेवोपपत्तेरिति सूत्रार्थ उक्तो भवति ॥

'सः' भूमशब्दितो नारायणः अधः उपरि पश्चात् पुरस्ताद् दक्षिणत उत्तरतः सर्वत्रास्ति । तत्प्रयोजनमाह – **स एवेदं सर्वमिति ॥** तेनैवेदं जगद् व्याप्तं स एव सर्वसत्ताप्रदस्तदर्थमेव सर्वत्र तिष्ठतीत्यर्थः । **'यत्र'** यद्विना यदधीनं विना अन्यन्न पश्यत्यधिकारी सर्वमेव तदधीनं पश्यति, तथैव शृणोति, विजानाति च स भूमेत्यर्थः । **'यत्र'** यस्मिन् दृष्टेऽन्यत् स्वतन्त्रं न पश्यतीति वा । हे **'भगवो'** भगवान् स भूमा कस्मिन् प्रतिष्ठित इति नारदप्रश्ने महिमगुणात्मके **'स्वे'** स्वस्मिन् स्वकीये महिम्नि वा स्वयं **'प्रतिष्ठितः'** आश्रित इति सनत्कुमारः प्रत्याहेति श्रुत्यर्थः ॥ २ ॥

॥ इति भूमाधिकरणम् ॥ २ ॥

॥ ३. अथाक्षराधिकरणम् ॥

(विष्णावक्षरशब्दसमन्वयः)

अदृश्यत्वादिगुणा विष्णोरुक्ताः ।

'अदृष्टं द्रष्ट्रश्रुतं श्रोतृ' *(बृ.५.८.११)* **इत्यादिना ।**
'अहं सोममाहनसं बिभर्मि' *(ऋ.१०.१२५.२.)*
[1]इत्यादेस्तस्यापि सम्भवान्मध्यमाक्षरस्योक्ता इति ।

॥ ३. अथ अक्षराधिकरणम् ॥

अत्राधिकरणेऽक्षरनामसमन्वयः क्रियते । श्रुत्यादिसङ्गतिं विषयवाक्यमुदाहृत्य विषयादिकं च सूचयन् सयुक्तिकं पूर्वपक्षं च दर्शयति – **अदृश्यत्वादीति** ॥ उक्ता इत्यस्याऽवृत्तिः । ते इति शेषः । आद्यादिशब्देनाग्राह्यत्वादि गृह्यते । गुणा इत्यनेन चन्द्रादित्याद्याधारत्वगुणोऽपि गृह्यते ॥

द्वितीयादिशब्देन **'अश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञातृ एतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च'** (बृ.५–८–११.) इति शिष्टवाक्यम्, तथा – **'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः'** (बृ. ५.८.९) इति वाक्यं च गृह्यते ॥

तृतीयादिशब्देन -
'अहं त्वष्टारमुत पूषणं भगम्' (ऋ.१०.१२५.२) इति वाक्यम्,

---

१. 'इत्यादेश्च' ह.

तथा –

'ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥' (गी. १२–३.)

इति गीतावाक्यम् ।

'आसीदिदं तमोऽभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥'

इति तद्भाष्योदाहृतवाक्यं च गृह्यते ॥

चशब्देनाक्षरशब्दस्य श्रीतत्त्वे प्रसिद्धेश्चेति अक्षरपदसूचितो हेतुः समुच्चीयते । तस्येति पदमावर्तते, विपरिणम्यते च । न केवलं विष्णोरेव, किन्तु **'तस्य'** अक्षरस्यापीत्यपेरर्थः । विष्णुजडव्यावृत्त्यर्थं – **मध्यमेति ॥ 'भूमत्वप्राप्तिः'** इति पूर्ववाक्याद् बुद्ध्या विवेकेन प्राप्तिरिति पदमत्रानुवर्तते । तथा च – पूर्वमदृश्यत्वाधिकरणे येऽदृश्यत्वादिगुणा अक्षरस्य विष्णोरुक्ताः । ते वाजसनेयके "[1]**तद्वा एतदक्षरं गार्गि अदृष्टं द्रष्टृ** इत्यादिना वाक्येन **'मध्यमाक्षरस्य'** श्रीतत्त्वस्य **'उक्ताः'** उच्यन्ते इत्येका योजना ॥

अपरा तु – **'तस्य'** तेषामदृश्यत्वादिगुणानां **'तस्य'** तस्मिन् मध्यमाक्षरेऽपि सम्भवाद् युक्तत्वात् **'तस्य'** चन्द्राद्याधारत्वलिङ्गस्यापि **'अहं सोममाहनसम्'** इत्यादिवाक्यात् तस्मिन्नक्षरे उपपत्तेः **'तस्य'** अक्षरशब्दस्य तस्मिन् मध्यमाक्षरे प्रसिद्धेश्च **'तस्य'** मध्यमाक्षरस्यापि **'तस्य'** अक्षरनामवाच्यत्वस्य प्राप्तिरिति ॥

तत्राऽद्ययोजनायाम् अदृश्यत्वाधिकरणोक्तादृश्यत्वादिगुणकाक्षरस्य

---

१. 'तदेतदक्षरं गार्गि' – प.

विष्ण्वन्यत्वाक्षेपात् तेनास्याऽक्षेपिकी सङ्गतिरुक्ता भवति ॥

तथाऽक्षराख्यो विषयः, द्रष्टृत्वाभिधायकोत्तरवाक्यपर्यालोचनया जडव्यावृत्तेः । किं चेतनप्रकृतिरुत विष्णुरिति संशयश्च सूचितः । द्वितीययोजनायां सयुक्तिकः पूर्वपक्षः प्रदर्शित इति ज्ञातव्यम् ॥

'तद्धा' इत्यादेः सिद्धान्तरीत्याऽयमर्थः – **'तत्'** आकाशाश्रयत्वेन वक्ष्यमाणम् **'अक्षरं'** न क्षरतीत्यक्षरशब्दवाच्यं ब्रह्म **'एतत्'**[1] एतल्लक्षणकं च प्रसिद्धम् । तदेवाऽह – **अदृष्टमित्यादिना ॥** अन्यैः साकल्येनादृष्टत्वात् स्वयं द्रष्टृत्वाददृष्टं द्रष्ट्रित्युच्यते । एवमुत्तरवाक्यमपि व्याख्येयम् । द्रष्टृत्वादौ विशेषमाह– **नेति ॥ 'अतः'** अक्षरादन्यत् स्वातन्त्र्येण द्रष्टृ श्रोतृ मन्तृ ज्ञातृ[2] च नास्तीत्यर्थः ॥

'एतस्मिन्' एवम्भूतेऽक्षरशब्दिते ब्रह्मणि दीप्तिनिमित्ताकाश-पदोक्तं श्रीतत्त्वम् **'ओतश्च प्रोतश्च'** अत्रोतं च प्रोतं च । तथा च सर्वाकारेण तदाश्रितं खल्वित्यर्थः । गार्गीति याज्ञवल्क्यकर्तृकपत्नीसम्बोधनम् । **'एतस्य वा अक्षरस्य'** विष्णोः **'प्रशासने'** आज्ञायामिति निमित्तसप्तमी । तथा च आज्ञामात्रात् **'सूर्याचन्द्रमसौ' 'केशौ सूर्यविधू मतौ'** इति बृहद्भाष्योक्तेर्ब्रह्मरुद्रौ भाष्यटीकारीत्या प्रसिद्धरविचन्द्रौ च **'विधृतौ'** विशेषेण धृतौ भवत इति । पूर्वपक्षी त्वक्षरशब्दं श्रीतत्त्वपरं मन्यते । तत्पक्षे आकाशशब्दः प्रकृत्यन्यतत्पोष्यपरः ॥

अहम् **'आहनसं'** स्वाभिमन्यमानलताद्वारा यज्ञेष्वभिषूयमाणं **'सोमं'** सोमलताभिमानिनं चन्द्रं त्वष्टारं च **'उत पूषणं'** पूषणं च भगं च **'बिभर्मि'**

---

१. **'एतल्लक्षणकं वै प्रसिद्धम्'**– प.

२. **'विज्ञातृ च'** – प

दधामीत्यम्भ्रिणीवाक्यस्यार्थः । त्वष्ट्रादयस्तु सूर्यप्रभेदाः । तत्त्वप्रदीप-सत्तर्कदीपावल्योस्तु बृहद्भाष्यानुसारेण **'सोमम्'** उमया सहितम् **'आहनसम्'** आसमन्ताद् हन्तारं संहर्तारं रुद्रं बिभर्मीति व्याख्यातम् ।**'अक्षरं'** देहतोऽप्यविनाशि, **'अनिर्देश्यं'** शब्दागोचरं, **'सर्वत्रगं'** देशतो व्याप्तम्, **'अचिन्त्यं'** मनसाऽग्राह्यं, गुणबाहुल्यात्, कूटे आकाशेऽभिमानित्वेन तिष्ठतीति **'कूटस्थम्'**, **'अचलं'** कदाऽपि स्वपदादभ्रष्टं **'ध्रुवम्'** उत्पत्तिविनाशशून्यम्, **'अव्यक्तं'** श्रीतत्त्वं ये पर्युपासत इति गीतार्थः ॥

प्रलये **'अभूतम्'** अजातम् **'अप्रज्ञातं'** प्रत्यक्षावेद्यम् अवेद्यलक्षणत्वादलक्षणम् अत एव **'अतर्क्यम्'** अनुमानावेद्यम् **'अविज्ञेयम्'** आगमावेद्यम् अनाद्यविद्याभिमानित्वात्, तमःशब्दवाच्यमिदं लक्ष्म्याख्यं तत्त्वं **'प्रसुप्तमिव'** निर्व्यापारं **'सर्वतः'** सर्वत्राऽसीदिति स्मृत्यर्थः ॥

अतो ब्रूते –

सू – ॐ ॥ अक्षरमम्बरान्तधृतेः ॥ ॐ ॥ १० ॥

'एतस्मिन् खल्वक्षरे[1] गार्ग्याकाश ओतश्च प्रोतश्च'

(बृ. ५–८–११.) **इत्यम्बरान्तस्य सर्वस्य धृतेर्ब्रह्मैवाक्षरम् ।**

सिद्धान्तयत्सूत्रमवतारयति – **अत इति** ॥ सूत्रे गहनार्थत्वात् प्रथमं हेतुभागं व्याकरिष्यमाणोऽसिद्धिपरिहाराय श्रुतिमुदाहरति – **एतस्मिन्निति** ॥ इतीत्यनन्तरं **'वाक्ये'** इति शेषः । अन्यपदार्थं दर्शयन् विग्रहं दर्शयति – **अम्बरेति** ॥ अम्बरमाकाशः अन्तो यस्य सर्वस्य[2] पृथिव्यादेर्धारक-

१. **'एतस्मिन्नु खल्वक्षरे'** ह.

२. **'तस्य सर्वस्य'** – प.

त्वोक्तेरित्यर्थः ॥ यद्यपि **'एतस्मिन्'** इति वाक्येऽम्बरधृतिरेवोच्यते । न तु तदन्तसर्वधृतिः । तथाऽपि **'यदूर्ध्वं गार्गि दिवो**[1] **यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी...आकाश एव तदोतं च प्रोतं च'** (बृ.५–८–७.) इत्यनेनाऽकाशस्य चित्प्रकृतेः[2] सर्वाधारत्वमुक्त्वाऽनन्तरम् 'एतस्मिन्' इति वाक्येऽक्षरस्य तादृशप्रकृत्याधारत्वोक्तेः प्रकृतिद्वाराऽक्षरस्याम्बरान्त-सर्वाधारत्वमत्रोक्तमेवेति न दोषः । एतच्च सूत्रेऽम्बरान्तेत्यन्तपदप्रयोगात् सूचितम् । सूत्रे तत्त्वित्यनुवृत्तपदद्वयोपेतप्रतिज्ञाभागं व्याख्याति – **ब्रह्मैवेति** ॥ अक्षरं ब्रह्मैवेत्यन्वयः ॥

अनेन अक्षरस्य **'एतस्मिन्'** इति प्रकृतिद्वाराऽऽकाशान्त-सर्वाधारत्वश्रुतेरक्षरं [3]ब्रह्मैवेति सूत्रार्थ उक्तो भवति ॥

'य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ।'

(ऋ. १–१५४–५.)

'भर्ता सन् म्रियमाणो बिभर्ति । एको देवो बहुधा निविष्टः ।
यदा भारं तन्द्रयते स भर्तुम् । परास्य भारं पुनरस्तमेति ॥'

(तै.आ. ३–१४.)

सर्वाधारत्वं कुतो विष्णुत्वनिश्चायकमित्यतः तस्य विष्णुलिङ्गत्वेन श्रुतिसिद्धत्वादित्याह – **य इति** ॥ व्याख्यातेयं श्रुतिर्जन्मनये ॥

'भर्ता सन्' इति तैत्तिरीयाणां श्रुतिः । **'देवः'** प्राणाख्यो भगवान् स्वयं जगता जीवेन वा हृदि म्रियमाणः तत् 'बिभर्ति' धत्ते पुष्णाति च । तर्हि

---

१. 'यदूर्ध्वं दिवः' – प.

२. 'आकाशाख्यचित्प्रकृतेः' – प.

३. 'एतदक्षरं ब्रह्मैव' – प.

जगदीशयोः साम्यापत्तिरित्यत आह – **भर्ता सन्निति** ॥ जगतो मूलभर्ता सन्नेव म्रियमाणः, न [1]स्वकीयस्थित्येत्यर्थः । नन्वेकस्यैव भगवतः भर्ता म्रियमाणो बिभर्तीत्यनेकविधव्यवहारविषयत्वं कथमित्यत आह – **एको बहुधेति** ॥ एकोऽपि भर्तृत्वादिना **'बहुधा'** बहुरूपेण च **'निविष्टो'** व्याप्त इत्यर्थः । तत्र प्रविष्ट इति वा । **'यदा भारं तन्द्रयते स भर्तुं परास्य भारं पुनरस्तमेति'** इति वाक्यशेषः । **'सः'** विष्णुर्यदा तं जगद्भारं **'परास्य'** अधो निधाय पुनर्भर्तुं **'तन्द्रयते'** नेच्छति तदा असौ भारः **'अस्तमेति'** नश्यतीत्यर्थः ॥

'यस्मिन्निदं सं च वि चैधि सर्वं यस्मिन् देवा अधि विश्वे निषेदुः ।' *(महाना. १–२.)* **इत्यादिश्रुतेः ।**

'यस्मिन्' इत्यपि तैत्तिरीयेऽन्यद्वाक्यम् । अत्र यच्छब्दस्य **'तदेव ब्रह्म परमम्'** (महाना.१.६.) इत्युत्तरवाक्यस्थतच्छब्देनान्वयः । चौ प्रकारसमुच्चये । तथा च – **'यस्मिन्निदं'** सर्वं जगत् **'सं'** सम्यक् **'वि'** विविधं **'चैधि'** अवर्धत । एधतेर्लिङि[2] छान्दसं रूपमेतत् । यद्वा – एधि वर्धते । अस्तीति वाऽर्थः । अस्मिन् पक्षे अस्तेर्लटि [3]मध्यमपुरुषैकवचने छान्दसं रूपम् । वस्तुतो लोटि मध्यमपुरुषैकवचने रूपमेतत् । यस्मिंश्च **'विश्वे'** सर्वे देवाः **'अधिनिषेदुः'** यमध्यगुस्तदेव ब्रह्मेत्यर्थः । इत्यादिश्रुतेरित्यस्य अम्बरान्तधृतेरित्यनेनान्वयः । [4]ब्रह्मण्यवगताया इति शेषः । तृतीयार्थे पञ्चमी ॥

आदिशब्देन **'येनाऽवृतं खं च दिवं महीं च येनाऽदित्यस्तपति**

---

१. **'स्वकीयस्थित्यै'** – प. २. **'यङि'** – प.

३. **'प्रथमपुरुषैकवचने'** – प.

४. **'ब्रह्मण्यवगमात्'**–प. । प.पुस्तके **'तृतीयार्थे पञ्चमी'** इति वाक्यं नास्ति ।

तेजसा भ्राजसा च' (महाना.१–३) इत्यादिकम्, **'तमेव मृत्युममृतं तमाहुस्तं**[1] **भर्तारं तमु गोप्तारमाहुः'** (तै.आ.३–१४) इत्यादि च गृह्यते । तथाच विष्णुलिङ्गत्वेन श्रुतिसिद्धात्[2] सर्वाधारणाद् विष्णुत्वनिश्चयो भवत्येवेति भावः ॥

'पृथिव्यादि प्रकृत्यन्तं भूतं भव्यं भवच्च यत् ।
विष्णुरेको बिभर्तीदं नान्यस्तस्मात् क्षमो धृतौ ॥'
इति च स्कान्दे ।

विष्णुवदन्यस्यापि सर्वाधारत्वं किं न स्यादित्यत आह – **पृथिव्यादीति** ॥ प्रकृत्यन्तपदेन सौत्रान्तपदं[3] व्याख्यातम् । **'भूतम्'** अतीतं **'भव्यं'** भविष्यत् **'भवत्'** वर्तमानं **'यत्'** इदं विश्वं तद्विष्णुः **'एक एव'** असहायो बिभर्ति । तस्य धृतौ तस्माद्विष्णोरन्यः **'क्षमः'** समर्थो नेत्यर्थः । इति स्कान्द इत्यस्य **'उक्तत्वात्'** इत्यध्याहारेण न सावकाशत्वं लिङ्गस्येति वाक्यशेषेणान्वयः ॥

सू – ॐ ॥ सा च प्रशासनात् ॥ ॐ ॥ ११ ॥

सा च धृतिः प्रशासनादुच्यते ।
'एतस्य वा अक्षरस्य प्रशासने गार्गि
सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' *(बृ. ५–८–९)* **इत्यादिना ।**
तच्च प्रशासनं विष्णोरेव ।

---

१. 'तमु' – प.
२. 'सर्वधारणाद् विष्णुनिश्चयः'–प.
३. 'सौत्राम्बरान्तपदम्' - प.

युक्त्यन्तरेण विष्णोरेवाक्षरत्वं प्रतिपादयत्सूत्रमुपन्यस्य व्याचष्टे – **सा चेति** [१]॥ **'सा च'** सर्वधृतिरपि इत्यादिना प्रशासनादुच्यते यतोऽतोऽपि ब्रह्माक्षरमित्यन्वयः । आदिशब्देनैवंरूपाण्येकप्रकरणगतानेकवाक्यानि गृह्यन्ते ॥

अनेन – यदा **'सा'** पूर्वोक्ता सर्वधृतिरेव अक्षरस्य विष्णुत्वसाधिका, तदा सुतरां, या तु **'एतस्य'** इति श्रुतिवाक्येऽक्षरस्य प्रशासनादेवासङ्कुचितविषयानन्यायत्तप्रकृष्टाज्ञामात्रादेव सर्वधृतिरुच्यते सेति सूत्रार्थ उक्तो भवति ॥

ननु सर्वधृतिहेतुप्रशासनेन कुतोऽक्षरस्य विष्णुत्वनिश्चय इत्यतस्तस्य विष्णुकर्तृकत्वादित्याह – **तच्चेति** ॥ सर्वधृतिकारणं प्रशासनं त्वित्यर्थः । न केवलं सर्वधृतिः, किन्तु तद्धेतुप्रशासनं चेति समुच्चये वा चशब्दः । **'विष्णोरेव'** विष्णुकर्तृकमेव । न त्वन्यकर्तृकमिति एवार्थः । एवकारस्योत्तरत्रोपयोगः ॥

'सप्तार्धगर्भा भुवनस्य रेतो
विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि ।' *(ऋ. १.१६४.३६.)*

कुत एतज्ज्ञायत इत्यतस्तच्चेत्यनेन प्रतिज्ञातार्थे श्रुतिं प्रमाणयति – **सप्तेति** ॥ आ ऋद्धगर्भाः आर्धगर्भाः । ब्रह्माण्डाख्यातिसमृद्धगर्भाः । निगरणेन भ्रियन्त इति गर्भास्तदावरणभूता इति यावत् । रेत इति लिङ्गव्यत्ययेनैकवचनं प्रथमाबहुवचनार्थे । तथा च – **'भुवनस्य'** लोकस्य **'रेतसो'** रतिप्रदाः सारभूता वा ॥

यद्वा – भूमत्वात् पूर्णत्वाद् वननीयत्वाद् भजनीयत्वाद् भुवनस्य विष्णो

---

१. **'सा चेति ॥ न केवलं सर्वधृतिरेव । किन्त्वाज्ञामात्राधृतिरपि - इति युक्ति - समुच्चयेऽवधारणे कैमुत्येनोच्यत इति सूत्रशेषोक्तिः । इत्यादिनाऽन्वयो यत इति विशेषोऽस्यापि ब्रह्मैवाक्षरमिति प्रधानसाध्येनान्वयः । आदिपदेनैवं-'प.**

रेतोरूपाः **'सप्त'** महदहङ्कारपञ्चमहाभूताख्याः ब्रह्मादयो देवाः । भुवनस्य **'रेतो'** रेतसो जगद्रतिप्रदस्य विष्णोः **'प्रदिशा'** आदेशेनाऽज्ञया **'विधर्मणि'** विविधविश्वधारणे तिष्ठन्तीति ऋङ्मन्त्रार्थः ॥

विश्वेश्वरतीर्थीये तु **'अर्धस्य'** विष्णोः **'गर्भाः'** सप्त देवाः भुवनस्य **'रेतः'** कारणम् । एते च विष्णोः प्रदिशा विधर्मणि तिष्ठन्तीत्यर्थ उक्तः ॥

'चतुर्भिः साकं नवतिं च नामभि-
श्चक्रं न वृत्तं व्यतीँ रवीविपत् ।' *(ऋ.१.१५५.६)* **इत्यादिश्रुतेः।**
'एकः शास्ता न द्वितीयोऽस्ति शास्ता
यो हृच्छयस्तमहमिह ब्रवीमि ।' *(भारते-सभाप.)*
'न केवलं मे भवतश्च राजन् स वै बलं बलिनां चापरेषाम् ।'
(भाग.स्क.७,अ.८,श्लो.८) **इत्यादेश्च ॥ ११ ॥**

'चतुर्भिः' इति वाक्यं तु जन्मनये व्याख्यातम् । एवञ्जातीयकश्रुतिरादिशब्दार्थः । श्रुतेरित्यस्य ज्ञायत इत्यध्याहारेण तच्चेति पूर्ववाक्येनान्वयः ॥

सर्वधृतिहेतुप्रशासनं विष्णोरिवान्यस्यापि किं न स्यादित्यत आह – **एक इति ॥** इदं च भारतवाक्यं सभापर्वगम्[1] । **'शास्ता'** सर्वधृतिहेत्वाज्ञाकर्ता । **'एकः'** न तु द्वितीयोऽस्ति, स च विष्णुरेवेत्यर्थः । **'गर्भे शयानं पुरुषं कोऽस्ति शास्ता'** इति शिष्टवाक्यम् । **'यो हृच्छयः'** इत्यन्यद् वाक्यमुत्तरवाक्यपर्यालोचनया प्रकृतसङ्गतम् । **'यः'** सर्वधृतिहेतुप्रशासनाय **'हृच्छयः'** सर्वहृदयनिवासी तमहमिह स्थाने ब्रवीमीत्यर्थः ॥

'न केवलम्' इत्यादि हिरण्यकशिपुं प्रति प्रह्लादवाक्यम् । हे राजन् ! न

१. **'सभापर्वगतम्'** - प

केवलं मे भवतश्च **'सः'** भगवान् **'बलं'** बलप्रदो धृतिहेतुः, किन्त्वन्येषां बलिनां च बलमित्यर्थः । इत्यादेश्चेत्यस्य **'तच्च प्रशासनं विष्णोरेवेति ज्ञायते'** इत्यनेनान्वयः । अनेन विष्णोरेवेत्येवकारस्य कृत्यं[1] सूचितम् ।

सू – ॐ ॥ अन्यभावव्यावृत्तेश्च ॥ ॐ ॥ १२ ॥

'अस्थूलमनणु' *(बृ. ५–८–८.)*

इत्यादिना स्थूलाण्वादीनामन्यवस्तुस्वभावानां व्यावृत्तेश्च ।

हेत्वन्तरेण विष्णोरेवाक्षरत्वं प्रतिपादयत्सूत्रं पठित्वा व्याचष्टे – **अन्येति ॥** आदिशब्देन **'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्ग-मरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तर-मबाह्यं न तदश्नाति किञ्चन न तदश्नाति कश्चन'** (बृ.५–८–८) इति समग्रवाक्यं गृह्यते । **'स्थूलाण्वादीनाम्'** इति भावप्रधानो निर्देशः । व्यावृत्तेरित्यनन्तरं **'कथनात्'** इति शेषः । चो हेतुसमुच्चये । अस्यापि ब्रह्मैवाक्षरमिति पूर्वेणान्वयः ॥

अनेन – न केवलं पूर्वोक्तहेतुभ्यां, किन्त्वन्येषां सकलवस्तूनां भावानां स्वरूपाणां स्थौल्यादिधर्माणां व्यावृत्तेः अनन्यापेक्षाराहित्यस्य **'अस्थूलम्'** इत्यादिनाऽक्षरे कथनादप्यक्षरं ब्रह्मैवेति सूत्रार्थ उक्तो भवति ।

श्रुत्यर्थस्तु – **'तत्'** आकाशाश्रयत्वेन वक्ष्यमाणम् **'अक्षरं'** न क्षरतीत्यक्षरशब्दवाच्यं ब्रह्म एतल्लक्षणकं **'ब्राह्मणाः'** ज्ञानिनोऽभिवदन्ति वै प्रसिद्धम् । तत् किं लक्षणमित्यत आह – **अस्थूलमिति ॥** स्थूलं महत् ।

१. **'कृत्यान्तरम्'** - प.

स्वप्नबुद्धार्थान्तरं तु – **'एतत्'** अक्षरं ब्राह्मणाः **'तत्'** चित्प्रकृत्याख्यमिति वदन्ति पूर्वपक्षयन्ति तद् ब्रह्मेत्यभिवदन्ति सिद्धान्तयन्ति । सिद्धान्तसाधकं हेतुमेवाऽह– **अस्थूलमित्यादिनेति** ॥ अनेन **'प्रसिद्धस्थूलसूक्ष्मादि-वैलक्षण्याज्जनार्दनः'** इति बृहद्भाष्योक्तरीत्या प्रसिद्धस्थूलादिवैलक्षण्यमुच्यते । [१]स्थूलाण्वादिपदस्य भावप्रधानत्वे तु लौकिकस्थौल्यादिराहित्यमनेनोक्तं भवति । **'अलोहितं'** लोहितशब्दितरक्ताद्युपलक्षितप्राकृतरूपसामान्यरहितम् । **'अस्नेहं'** प्राकृतस्नेहरहितम् । **'अच्छायं'** - **'छाया त्वविद्या सम्प्रोक्ता'** इति वचनादज्ञानरहितम् । जीवदेहस्येव छायारहितं च[२] । **'अतमः'** आवरणरहितम् । **'अवायु'** पीडारूपश्वासोच्छ्वासरहितम् ॥

यद्वा – व्यासतीर्थीयोक्तरीत्या अवाय्वनाकाशमतेजस्कमित्येतैस्तदारब्ध-शरीररहितमित्युच्यते । अत एव **'अच्छायमतमोऽवाय्वनाकाशम्'** इत्यत्र सर्वात्मना निषेध इत्युक्तं सुधाटीकयोः । **'असङ्गं'** सर्वगतमपि तत्कृतलेपरहितम् । **अरस**मगन्धमित्याभ्यामुपलक्षणया प्राकृतरसगन्धादि-राहित्यमुच्यते । **अचक्षुष्क**मित्यादिना प्राकृतस्वभिन्नचक्षुरादिराहित्यम् । **'अतेजस्कं'** प्राकृतवर्चोरहितम् । **'अप्राणम्'** उक्तचक्षुरादिव्यतिरिक्त-प्राकृतज्ञानेन्द्रियकर्मेन्द्रियरहितम् । व्यासतीर्थीयोक्तरीत्या प्राणवायुरहितमिति वा । **'अमुखं'** प्राकृतविग्रहरहितं [३] वा । **'अमात्रं'** परिमितिशून्यम् । **'मीयन्ते एभिः'** इति मात्रा [४] इन्द्रियाणीति टीकोक्तेरमात्रं चक्षुरादीन्द्रियरहितमिति

---

१. **'स्थूलाण्वादिपदं च भावप्रधानम् । स्थूलं महत् । तथा च लौकिकस्थौल्यादि'**– प.

२. इदं वाक्यं प.पाठे नास्ति ।

३. **'प्राकृतविग्रहरहितं तादृशमुखादिरहितं वा'** – प.

४. **'मात्रा इन्द्रियगुणा ' इति टीकोक्तेरमात्रं चक्षुरादिव्यतिरिक्तेन्द्रिय-रहितमिति व्यासतीर्थीयोक्तिः'** । – प.

व्यासतीर्थीयोक्तिः । सर्वात्मना शरीरारम्भकपञ्चमात्रशून्यं वा । न विद्यतेऽन्तरं बाह्यं च यस्मात् तदनन्तरमबाह्यम्, इदमेव सर्वस्मादन्तरं बाह्यं चेत्यर्थः । **'तत्'** ब्रह्म **'किञ्चन'** अन्नादिकं शुभमशुभं वा

'साशनानशनत्वेन नरदेवौ यथोदितौ ।

अत्तिं विनाऽप्यदौर्बल्यात् तथाऽनत्तिर्हरेर्भुजिः ॥'

इति स्मृतेरुपजीवनार्थं **'नाश्नाति'** नात्ति । **'कश्चन'** कोऽपि समर्थः **'तत्'** ब्रह्म **'नाश्नाति'** न संहरतीति ॥

'अस्थूलोऽनणुरमध्यमो मध्यमोऽव्यापको व्यापको

योऽसौ हरिरादिरनादिरविश्वो विश्वः सगुणो निर्गुणः'
इत्यादेर्विष्णोरेव ते धर्माः ।

लौकिकस्थौल्यादिराहित्यं कथं विष्णुत्वनिश्चायकं, तद्धर्मत्वेनानिश्चितत्वादित्यत आह – **अस्थूल इति ॥** **'अस्थूलः'** लौकिकमहत्त्वरहितः, **'अनणुः'** लौकिकाणुत्वरहितः, **'अमध्यमः'** लौकिकमध्यमपरिमाणरहितः । न च परिमाणादिराहित्ये विष्णोरस्वभावत्वापत्तिरिति वाच्यम् । लौकिकस्थौल्यादिराहित्येऽप्यलौकिकपरिमाणादिसद्भावादित्याह – **मध्यम इत्यादिना ॥** न चानेन स्थूलत्वादेरनुक्तेर्न चोक्तपरिहार इति वाच्यम् । **'मध्यमो व्यापकः'** इत्याद्युक्तेः स्थूलोऽणुश्चेत्युपलक्षकत्वात् । न च मध्यमपरिमाणवत्त्वे विष्णोरनित्यत्वापत्तिरिति वाच्यम् । अनित्यत्वानापादकमध्यमपरिमाणाभ्युपगमात् ॥

तत्त्वप्रदीपे तु **'अमध्यमः'** मध्यमपरिमाणनियतिवर्जितः **'व्याप्तोऽणुर्मध्यमस्तथा'** इत्युक्तेः मध्ये मीयमानत्वान्मध्यम इति व्याख्यातम् ।

अस्मिन् पक्षे नियतमध्यमपरिमाणशून्यत्वान्नानित्यत्वमिति परिहारोऽभिप्रेतः । न विद्यतेऽन्यो व्यापको यस्यासावव्यापकः । लोकविलक्षणव्यापक इति वा । **'व्यापकः'** सर्वदेशकालव्यापी । आदिः कारणमनादिस्तच्छून्य उत्पत्तिशून्य इति वा । न विद्यते विश्वः पूर्णो यस्मादविश्वः । पूर्णत्वाद् विश्वः ॥

यद्वा – **'अविश्वः'** लौकिकेष्वप्रविष्टः । **'विश्वः'** जगद्धृदयं वा प्रविष्टः । **'सगुणः'** ज्ञानानन्दादिगुणवान् । **'निर्गुणः'** सत्त्वादिगुणहीन इत्यर्थः । **'इत्यादेः'** इति वाक्यात् । आदिशब्देन **'अणोरणीयान् महतो महीयान्'** (कठ.२–२०) इति कठश्रुतिर्गृह्यते । **'ते'** अस्थूलत्वादयः ।[१]यत इति निश्चिता इति शेषः ।[२] अस्य अतस्तेऽक्षरस्य विष्णुत्वनिश्चायका भवन्तीत्युपस्कृतवाक्येनान्वयः ॥

ननु तथाऽपि ते विष्णोरेवेति कथं,[३]यस्मात् तेऽप्राकृतविग्रहे मध्यमाक्षरेऽपि सन्ति । नैष दोषः – यतस्ते तत्र भगवदपेक्षयैव सन्ति । अन्यानपेक्षा एव धर्मा ह्यत्र हेतुत्वेन विवक्षिताः ॥

'अस्थूलोऽनणुरूपोऽसावविश्वो विश्व एव च [४]।
विरुद्धधर्मरूपोऽसावैश्वर्यात् पुरुषोत्तमः ॥'

इति च ब्राह्मे ॥ १२ ॥

॥ इत्यक्षराधिकरणम् ॥ ३ ॥

ननु लौकिकपरिमाणादिराहित्यं कथं विष्णोर्युक्तं, लोके सर्वपदार्थानां प्राकृतपरिमाणस्यैव दर्शनादित्यत आह – **अस्थूलेति** ॥

---

१. **'हि यत इति'** – प.
२. **'अस्य'** इति प.पाठे नास्ति ।
३. **'यतस्ते'** – प.
४. **'स विश्वोऽविश्व एव च'** ह.

'असौ पुरुषोत्तमः' भगवान् **'अस्थूलोऽनणुरूपो भवति**[१]**'** प्राकृतलौकिकस्थूलाणुत्वरूपधर्मरहितवपुर्भवति । एवं **'अविश्वो विश्वश्च'** लोकबहिर्भूतो लोकान्तर्गतश्च भवति । तथा विरुद्धधर्मरूपश्च भवति । लोके परस्परं विरुद्धाः स्थूलत्वाणुत्वादयो धर्माः स्वरूपभूता यस्य सः तथोक्तः । कथमित्यतो घटकमाह – **ऐश्वर्यादिति** ॥ अचिन्त्यैश्वर्यसामर्थ्यादित्यर्थः । ऐश्वर्यादेवेत्यनेन नात्रोपपादकान्तरमन्वेषणीयमित्युक्तं भवति । इति ब्रह्माण्डे[२] इत्यस्य उक्तत्वाद् युक्ता इत्यध्याहारेण ते धर्माः विष्णोर्युक्ता एवेति पूर्ववाक्येनान्वयः ॥

॥ इत्यक्षराधिकरणम् ॥ ३ ॥

---

१. **'भवति'** इति पदं प.पाठे नास्ति ।

२. **'ब्राह्मे'** इति स्वरसः पाठः ।

॥ ४. अथ सदधिकरणम् ॥

(सच्छब्दवाच्यो विष्णुः, न प्रकृतिः)

'सदेव सोम्येदमग्र आसीत्' *(छां. ६–२–१.)*
इत्यादिना सतः स्रष्टृत्वमुच्यते ।

॥ ४. अथ सदधिकरणम् ॥

अत्राधिकरणेऽनेकप्रकरणात्मकं **'सदेव'** इत्यादिस्थानं समन्वीयते । श्रुत्यादिसङ्गतिं विषयवाक्यमुदाहृत्य विषयादिकं च सूचयति – **सदिति ॥** **'इत्यादिना'** छान्दोग्यवाक्येन । आदिशब्देन **'एकमेवाद्वितीयं,** (छां.६.२.१) **'तत् तेजोऽसृजत'** (छां.६.२) **'सन्मूलाः सोम्येमाः'** (छां.६.८.६) **'सता सोम्य तदा सम्पन्नो भवति'** (छां.६.८.१) इत्यादिकं गृह्यते । तच्चेत्यत-स्तदित्याकृष्यते । तथा च इत्यादिना सतः **'तत्'** जन्मनयोक्तं **'स्रष्टृत्वम्'** अनन्याधीनकारणत्वम् । उपलक्षणमेतत् । सर्वोत्तमत्वसर्वाधारत्व-सुप्तिगम्यत्वादिकं च **'उच्यते'** प्रतिपाद्यते इति योजना ।

अनेन जन्माधिकरणोक्तकारणत्वस्य विष्ण्वन्यस्मिन् प्रधाने आक्षेपात् तेनास्य आक्षेपिकी सङ्गतिरुक्ता भवति । तथा विषयवाक्यम्, सदाख्यो विषयश्चोक्तः ॥

'सदेव' इत्युद्दालकवाक्यम् । हे **'सोम्य'** भक्तिज्ञानलक्षणसोमार्ह श्वेतकेतो **'इदम्'** अस्य जगतः **'अग्रे'** तत्सृष्टेः पूर्वं प्रलये सच्छब्दोक्तं ब्रह्मैवाऽसीत् स्वातन्त्र्येणेति शेषः । तत्सत् **'एकमेवाद्वितीयं'** [1]स्वगतस्वावयवभेदाभेदशून्यं सर्वोत्तमम् । प्रजाः **'सन्मूलाः'** सद् ब्रह्मैव मूलं यासां तास्तथोक्ताः । **'तदा'**

---

१. **'स्वस्वावयवभेदशून्यं सर्वोत्तमं भवति'** – प.

सुप्तौ सता सम्पन्नो भवति सुप्त[1] इति सिद्धान्ते श्रुत्यर्थः ॥

ब्रह्मलक्षणाभिधायकानेकवाक्यसङ्ग्राहकादिशब्दप्रयोगेन सिद्धान्तेऽप्यत्र [2]प्रधानस्य प्रतिपाद्यत्वाभ्युपगमेनानिष्टाभावादधिकरणवैयर्थ्यमिति शङ्का निरस्ता भवति । अत्र प्रकरणे श्रुतानां ब्रह्मलक्षणानां प्रधानेऽसम्भवेन[3] ब्रह्मणोऽपि प्रतिपाद्यत्वेन प्रधानमात्रस्य प्रतिपाद्यत्वानभ्युपगमात् ।

तच्च सत् 'बहु स्यां प्रजायेय' *(छां.६–२–३)*

इति परिणामप्रतीतेर्न विष्णुः ।

सयुक्तिकं पूर्वपक्षयति – **तच्चेति** ॥ चशब्दः प्रधानमिति पदाकर्षकोऽवधारणे च । तदित्यावृत्तं विपरिणम्यते । तथा च **'तत्'** छान्दोग्ये श्रुतं सत् प्रधानमेव भवेत्, न तु विष्णुः । कुतः ? 'तस्य' सतो **'बहु स्याम्'** इत्युत्तरवाक्येन बहुभावाख्यपरिणामस्य विकारस्य प्रतीतेरिति योजना । **'प्रजायेय'** प्रजनयेयं जगत्सृजानि । [4]तदर्थं **'बहु स्याम्'** नियामकबहुरूपी भवेयमिति । **'बहु स्याम्'** तदर्थं प्रजायेयेति वा श्रुत्यर्थः ॥

स हि 'अविकारः सदा शुद्धो नित्य आत्मा सदा हरिः'
इत्यादिनाऽविकारः प्रसिद्ध इति ।

विकारित्वप्रतीतावपि कुतोऽयं न विष्णुरित्यत आह – **स हीति** ॥ **'हि'** यस्मात् **'सः'** विष्णुः **'अविकारः सदा'** इत्यादिप्रमाणैरविकारः **'प्रसिद्धः'** तत्त्वेन

---

१. **'सुप्तः'** इति पदं प.पाठे नास्ति।
२. **'प्रधानप्रतिपाद्यत्वावगमेन'** – प.
३. **'असम्भवेन मुख्यतो ब्रह्मण एव प्रतिपाद्यत्वेन'** –प. ।
४. **'तदर्थं च'** - प

निश्चितस्तस्मात्[1] तदसम्भवात् प्रधाने च तत्सम्भवाद् अत्र च विकारप्रतीतेः तत् सत् न विष्णुः, किन्तु प्रधानमेवेति योजना । श्रुतौ द्वितीयस्य सदाशब्दस्य सदाऽविकार इत्यन्वयः । आद्यस्य तु सदा **'शुद्धः'** निर्मल इति ॥

अतो ब्रवीति –

सू – ॐ ॥ ईक्षतिकर्मव्यपदेशात् सः ॥ ॐ ॥ १३ ॥

'तदैक्षत' इतीक्षतिकर्मव्यपदेशात् स एव विष्णुरत्रोच्यते ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे – **अत इति ॥**

सूत्रोक्तं व्यपदेशं दर्शयति – **तदिति ॥** ईक्षतीति धातुनिर्देशेन तदर्थेक्षणक्रिया लक्ष्यते । ईक्षतिकर्मेति सामानाधिकरण्यं तत्कर्तृत्वपरम् । तथा च **'तदैक्षत'** इति श्रुतावीक्षणाख्यव्यापारे कर्तृत्वोक्तेरित्यर्थः[2]॥

यद्वा, कर्मशब्देन सृष्ट्यादिक्रियोच्यते । तथात्वे वैयधिकरण्यम् । ईक्षतिपूर्वकसृष्ट्यादिव्यपदेशादित्यर्थः । समन्वयसूत्रात् तदित्यस्य अनुषङ्गसम्भवेऽपि **'एको नारायण आसीत् स मुनिर्भूत्वा'** इत्यादिसमाख्यामपि प्रमाणीकर्तुं स इत्युक्तम् । तदनूद्य विष्णुरिति व्याख्यातम् । विष्णुरेवेत्यन्वयः । एवेति [3]तुशब्दार्थः । अनेन समन्वयसूत्रात् तुशब्दमात्रमनुवर्तनीयमिति सूचितम् ॥

सूत्रे समन्वेतव्यानुक्तेराह – **अत्रेति ॥ 'सदेव'** इत्यादिस्थान इत्यर्थः ।

---

१. **'तस्मात् तस्मिन् तदसम्भवात्'** – प.

२. **'ईक्षतिकर्मेति सामानाधिकरण्यम् । तथा च "तदैक्षत" इतीक्षणाख्यव्यापारोक्तेरित्यर्थः ।'** – प.

३. **'तुशब्दस्यार्थः'** – प.

सच्छब्देनेति शेषः । तथा चात्र प्रकरणजाते सच्छब्देन य उच्यते स विष्णुरेव न तु प्रधानमिति साध्यवाक्यार्थः ॥

अनेन अत्र सदेवेत्यादिस्थाने सच्छब्देनोच्यमानः स विष्णुरेव, न प्रधानम् । कुतः ? **'ईक्षतिकर्मव्यपदेशात् सः'** ततः **'तदैक्षत'** इतीक्षणाख्य-क्रियाकर्तृत्वश्रवणादीक्षितृत्वसृष्ट्यादिक्रिययोर्वा[१] श्रवणाज्जडप्रकृतौ च [२]तदसम्भवादिति सूत्रार्थ उक्तो भवति ॥

सूत्रे सच्छब्देनेति शेषं विना स इत्यस्याऽवृत्तिः, तत्रैकस्य [३]प्रतीकग्रहणार्थत्वमिति पक्षे ईक्षतिकर्मव्यपदेशात् **'सः' 'सोऽकामयत'** (तै. २–६.) इत्यादिप्रकरणप्रतिपाद्यः स विष्णुरेव भवेत्, न प्रधानमित्यर्थोऽवसेयः [४] ।

'नान्योऽतोऽस्ति द्रष्टा' *(बृ.५–७–२३)*
'नान्यदतोऽस्ति द्रष्टृ' *(बृ.५–८–११)*
इत्यादिना तस्यैव हि तल्लक्षणम् ।

नन्वीक्षणकर्तृत्वं विष्णुवत् प्रधानस्य किं न स्यादित्यतश्चेतनस्यापीह[५] हेतुत्वेनाभिमतं मुख्येक्षणं न सम्भवति, किमु जडस्येत्याशयेन तत्र प्रमाण-माह – **नेति** ॥ **'अतो'** ब्रह्मणः सकाशात् **'अन्यः'** स्वातन्त्र्येण **द्रष्टा द्रष्टृ** च नास्तीति वाजसनेयप्रकरणद्वयगतवाक्यद्वयस्यार्थः ॥

आदिशब्देनैवञ्जातीयकं वाक्यं गृह्यते । **'तस्य'** विष्णोरेव । हिशब्दः

---

१. 'ईक्षतिसृष्ट्यादिक्रिययोर्वा' – प.
२. 'चेक्षणासम्भवादिति' – प.
३. प्रतीकग्रहणार्थत्वपक्षे' – प.
४. 'प्रधानमिति सूत्रार्थोऽवसेयः' – प.
५. इत्यतस्तस्यापीह' – प.

[1]प्रसिद्धौ । स्वातन्त्र्येणेक्षणकर्तृत्वलक्षणं लिङ्गं उक्तमिति शेषः । अस्य तस्मान्न लिङ्गस्यान्यगामित्वं[2] मन्तव्यमित्युपस्कृतवाक्येनान्वयः ॥

बहुत्वं चाविकारेणैवोक्तम् -

'अजायमानो बहुधा विजायते' *(तै.आ.३–१३–१)* **इति ॥**

॥ इति सदधिकरणम् ॥ ४ ॥

ननु विष्णोरविकारितया सिद्धत्वेन तत्र बहुभावाख्यविकारान्वयायोगान्निरवकाशविकारित्वलिङ्गेनात्रेक्षतिर्गौणो व्याख्येयः । **'सत्त्वात् सञ्जायते ज्ञानम्'** इति स्मरणाद् ज्ञानोपादानतया सिद्धे प्रधाने तत्कर्तृत्वासम्भवेन तत्र तस्यामुख्यत्वादित्यत आह – **बहुत्वं चेति ॥** चस्त्वर्थः । **'अविकारेण'** विकारित्वं [3]विनैव स्वरूपबहुत्वेनैवेत्यर्थः । इत्यादिनोक्तमित्यन्वयः[4]। तथा च बहुत्वस्य सावकाशत्वान्न तद्बलेन ईक्षतेर्गौणत्वं कल्पनीयमिति भावः ॥

यद्वा – **'बहुत्वं'** 'बहु स्याम्' इति बहुभाववचनं 'उक्तं' व्याख्यातम् । तथा च इत्येवमादिप्रमाणवाक्येन **'बहु स्याम्'** इति बहुभाववचनम् **'अविकारेण'** विकारं विनैव नियामकस्वरूपबहुत्वेनैव[5] मुख्यप्रतिपाद्येनैव युक्तमित्युक्तम् इति योजना । तथा च – सिद्धान्ते **'बहु स्याम्'** इत्यस्य तत्तन्नियामकस्वरूपबहुभावसङ्कल्पोऽर्थ इत्युक्तं भवति । न चैवं नियामकस्वरूपबहुभावसङ्कल्पानन्तरं नियम्यसृष्टिरयुक्तेति वाच्यम् । गुरुत्वराजत्वादेः

---

१. **'हि यस्मात् तत्स्वातन्त्र्येणेक्षणं लिङ्गमित्यवधारितमिति शेषः'** – प.

२. **'-गामितेत्युपस्कृत-'** प.

३. **'विकारं विनैव'** – प.

४. **'इत्यनेनोक्तमित्यन्वयः ।'** – प.

५. **'-बहुत्वेन मुख्यप्रतिपाद्येनैव'** – प.

शिष्यभृत्यसापेक्षत्वेन तत्सङ्कल्पानन्तरं शिष्यादिसम्पादनवन्नियामकताया नियम्यसापेक्षत्वेन नियामकबहुभावसङ्कल्पानन्तरं तत्सापेक्षनियम्य-सृष्टेर्युक्तत्वात् । **'अजायमानः'** अविकुर्वाण इति श्रुत्यर्थस्तु द्युभ्वादिनयेऽभिहितः ॥ ४ ॥

॥ इति सदधिकरणम् ॥ ४ ॥

॥ ५. अथ दहराधिकरणम् ॥

(हृत्पद्मस्थितिर्नाऽऽकाशस्य, परमात्मन एव)

चन्द्रादित्याद्याधारत्वं विष्णोरुक्तम् । तच्च

'अथ यदिदमस्मिन्[1] ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशः[2]

..... किं तदत्र विद्यते .....' *(छां. ८–१–२.)*

'उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते
उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि'

(छां ८–१–३)

इत्यादिनाऽऽकाशस्य प्रतीयते ।

॥ ५. अथ दहराधिकरणम् ॥

अत्राधिकरणे सर्वाधारतयाऽन्वेष्टव्यतया च साक्षाद्वा व्यवधानेन वा सामान्यतो हृत्पद्मस्थत्वलिङ्गस्य ब्रह्मणि समन्वयः क्रियते । श्रुत्यादिसङ्गतिं विषयवाक्यमुदाहृत्य विषयादिकं च सूचयन् सयुक्तिकं पूर्वपक्षयति [3] – **चन्द्रेति ॥ 'एतस्य वा अक्षरस्य'** (बृ. ५–८–९) इत्यादिनेति वर्तते । आदिपदेन द्यावापृथिव्यादिकं गृह्यते । ततः किमित्यत आह – **तच्चेति ॥** तदित्यावर्तते । चः समुच्चयेऽवधारणे च ॥ तथा च **'तत्र'** छन्दोगश्रुतौ यदक्षरनयोदाहृतवाक्योक्तं चन्द्रादित्याधारत्वं तदेव तथा तत्समानाधिकरणं

---

१. .'एतस्मिन्' ह.
२. .'अन्तराकाशः' ह.
३. 'पूर्वपक्षं दर्शयति' – प.

हृत्पद्मस्थत्वं चाऽकाशस्य **'अथ'** इत्यादिना वाक्येन प्रतीयत[१] इति योजना ॥

यद्यपि बृहद्भाष्येऽक्षरनयोदाहृतबृहदारण्यकश्रुतिगतसूर्यचन्द्रपदयोर्ब्रह्मरुद्र-परतया व्याकृतत्वादेवमनुवादोऽनुपपन्नः । तथाऽपि तयोः प्रसिद्धचन्द्रसूर्यपर-त्वस्याप्यनुमतत्वादेवमुक्तिः ॥

यद्वा – अत्र भाष्येऽपि चन्द्रादित्यपदे रुद्रब्रह्मपरे । अत एव तत्त्वप्रदीपेऽक्षरनये **'अहं सोमम्'** (ऋ.१०.१२५.२) इति वचने सोमशब्दो रुद्रपरतया व्याकृतः । तथा च न कोऽपि विरोधः । अनेनाक्षरनयोक्त-चन्द्रादित्याद्याधारत्वस्य साक्षाद् हृत्पद्मस्थाकाशनिष्ठताक्षेपात् तेन अस्याऽक्षेपिकी सङ्गतिरुक्ता भवति ॥

एवं सर्वाधारत्वान्वेष्टव्यत्वसमानाधिकरणः साक्षाद् व्यवधानेन वा सामान्यतो हृत्पद्मस्थत्वरूपो विषयश्च दर्शितः । न चैवं **'चन्द्रादित्य'** इति भाष्येण स चन्द्रादित्याद्याधारः किं दहराकाशः स्यात् ? आहोस्वित् तत्स्थः कश्चित् ? इति तत्त्वप्रदीपेन च विरोध इति वाच्यम् । तयोरक्षराधि-करणाक्षेपेणात्र पूर्वपक्ष इति दर्शयितुं प्रवृत्तत्वेन विषयप्रदर्शनायाप्रवृत्तत्वात् । **'आकाशस्य'** इत्यनेन प्रसिद्धभूताकाशस्यैव सर्वाधारतया साक्षाद् हृत्पद्मस्थ-त्वमिति पूर्वः पक्षः प्रदर्शितः । तथा प्रश्नप्रतिवचनपूर्वकं साक्षादाकाशस्यैवात्र सर्वाधारतया हृत्पद्मस्थत्वकथनादिति पूर्वपक्षयुक्तिश्च प्रदर्शिता भवति ॥

अत्र यद्यपि **'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः[२] तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति । तं चेद् ब्रूयुः ... किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव**

१. 'प्रतीयते ज्ञायत इति योजना'। – प.

२. 'अन्तर आकाशः' – प.

विजिज्ञासितव्यमिति । स ब्रूयाद् यावान् वाऽयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः । उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते । उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ । विद्युन्नक्षत्राणि' (छा.८-१-२) इत्यादि समग्रवाक्यमुदाहर्तव्यम्, न तु विच्छिद्य । तथाऽप्यपेक्षितांशोदाहरणेनैव पूर्तेः विषयपूर्वपक्षयुक्त्यादेरेतावतैव[१] ज्ञातुं शक्यत्वादुपयुक्तमात्रमुदाहृतम् ॥

यद्यपि **'यदिदमस्मिन्'** इति श्रुतिपाठः । तथाऽपि समानजातीय-श्रुत्यन्तरोपसङ्ग्रहायैवमुदाहृतमिति ध्येयम् ॥

श्रुतावथशब्दः प्रमेयान्तरारम्भार्थः । **'ब्रह्मपुरम्'** इत्येतद् ब्रह्मणः पुरं निवासस्थानमिति[२] ब्रह्मैव पूर्णत्वात् पुरमिति च द्वेधा व्याख्येयम् । **'अन्तर्हृदये'** इति सप्तम्यन्तम् । **'आकाशः'** इति प्रथमान्तम् । तथा च एतस्मिन् ब्रह्मपुरे शरीरे यत् पुरं ब्रह्मास्ति **'अस्मिन्'** तस्मिन् ब्रह्मणि **'दहरं'** दभ्रमल्पं **'पुण्डरीकम्'** अब्जं **'वेश्म'** तस्य सद्मरूपमस्ति अस्मिन् **'अन्तर्दहरः'** अल्पो भूताकाशोऽस्ति । किं चातः **'तस्मिन्'** आकाशेऽन्तर्यद् वर्तते **'तदन्वेष्टव्यं'** ज्ञातव्यं मार्गितव्यं [३]वा ॥

ननु न घटादिवदन्वेषणं युक्तम्, अप्रत्यक्षत्वादित्यतस्तदेव विवृणोति – **तद्वावेति ॥** वावेत्यवधारणे । तथा च तदेव **'विजिज्ञासितव्यं'** विचारितव्यम् । इति गुरुणोक्ते **'तं'** गुरुं प्रति **'चेत्'** यदि शिष्याः **'ब्रूयुः'** पृच्छेयुः । किमिति ? **'अत्र'** भूताकाशे यदन्वेष्टव्यं यद्भाव विजिज्ञा-सितव्यमित्युक्तं **'तत्'** आधेयस्वरूपं 'किं' किंमहिमं चेति ॥

---

१. **'तावतैव'** – प.
२. **'विलासस्थानमिति'** – प
३. **'मार्गितव्यमिति वा'** – प.

न च ब्रह्मपुरे ब्रह्मणो वेश्मेत्युक्त्यैवाऽकाशस्य ब्रह्मत्वनिश्चयात् प्रश्नायोग इति वाच्यम् । अन्यपुरेऽप्यन्यस्य वेश्मसम्भवादन्यवेश्मन्यप्यन्यस्यावस्थानसम्भवात् तदुक्तेरनिश्चायकत्वात् ॥

एवं शिष्यैः पृष्टे **'सः'** गुरुर्ब्रूयात् । किमिति ? हृदोऽन्तः अन्तर्हृत् तस्मिन्नयतेऽस्तीति व्युत्पत्त्या **'अन्तर्हृदये'** तच्छब्दबोध्ये हृत्पद्मगतभूताकाशे[1] द्यावापृथिव्याद्याश्रयः **'आकाशः'** तदाख्यः परमात्माऽस्तीति ॥

नन्वणौ तस्मिन् कथं द्यावापृथिव्याद्यवस्थितिरित्यतस्तस्य व्याप्तत्वमाह – **यावानिति** ॥ **'अयं'** बहिःस्थितः **'आकाशः'** तदाख्यो भगवान् गुणतः परिमाणतश्च यावान्, एष आन्तरोऽपि तावानेव । तथा चाणावपि रूपे ईशशक्त्या महत्त्वस्यापि सत्त्वाद् व्याप्तस्य तस्यानेकाधारत्वं युज्यत एवेति भावः । अन्यपरित्यागेनास्यैव जिज्ञास्यत्वे को हेतुरित्यतोऽस्य सर्वाधारत्वाख्यं महिमानमाह – **उभ इत्यादिना** ॥ अस्मिन्नन्तरे ये उभे मुक्तामुक्ते द्यावापृथिव्यौ देव्यौ[2] **'समाहिते'** समवस्थिते । एवमुभयविधौ अग्निश्च वायुश्चेत्येतौ देवौ समाश्रितौ । तथा[3] उभौ मुक्तामुक्तौ सूर्याचन्द्रमसौ विद्युत् नक्षत्राणि च समाश्रितानीति छान्दोग्यभाष्यरीत्या श्रुत्यर्थः ॥

न्यायविवरणे तद्विवरणरूपटीकायां[4] –**'तस्मिन् यदन्तः'** इत्यत्र हृत्पद्मस्थाकाशगतं ब्रह्मान्वेष्टव्यमित्युक्तम् । न च पद्मस्थस्य ब्रह्मत्वासिद्धिः । शरीरपुण्डरीकयोर्ब्रह्म प्रति पुरत्ववेश्मत्वोक्त्यैवा अन्वेष्टव्यस्य ब्रह्मत्वसिद्धेः । तथा च पद्मे ब्रह्मास्तीत्युक्तेऽपि तद् ब्रह्म किम्प्रकारमिति[5] भावेन पुनः **'किं**

---

१. **'हृत्पद्मगभूताकाशे'**– प.
२.**'दिव्यौ'** - प.
३. **'तथा तौ'**– प.
४.**'टीकायां तु'** – प.
५. **'किम्प्रकारकमिति'**– प

तदत्र विद्यते' इति पृष्टे तत्प्रकारज्ञापनाय **'यावान्'** [१]इत्याद्याह गुरुः । अनेन च यद् ब्रह्मान्वेष्टव्यतयोक्तं [२]तद्ब्रह्मान्तर्हृदये यावानेष प्रसिद्धाकाशस्तावान् सर्वोऽप्याकाशो वर्तते । तस्मिंश्चाऽकाशे पृथिव्यादिकं सर्वं[३] समाश्रितम् । अपहतपाप्मत्वादिगुणकं च तदित्येवमाकाशादिसर्वाश्रयत्वादपहतपाप्मत्वादि-प्रकार [४] उक्तो भवतीति प्रकारान्तरेण व्याख्यातम् ॥

पूर्वपक्षी तु – **'हृदय आकाशे'**[५] इति पदं सप्तम्यन्तं कृत्वा दहराकाशस्थो व्याप्ताकाशोऽन्वेष्टव्य इति वा आकाश इति प्रथमान्तं कृत्वा प्रागुक्तदहरभूताकाशमनूद्य यावानित्यनेन बाह्याकाशतुल्यतया तं विशिष्य जिज्ञास्यत्वेन तत्र द्यावापृथिव्यादिकमुच्यत इत्याह ॥

स चाऽकाशो न विष्णुः ।

'तस्यान्ते सुषिरं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम्' *(महाना.११.)*
इति श्रुतेरिति । [६]

नन्वस्त्वाकाशस्य सर्वाधारतया हृत्पद्मस्थत्वं तस्य चाऽकाशस्य **'आकाशस्तल्लिङ्गात्'** (ब्र.सू.१.१.२२) इति न्यायेन विष्णुत्वेन[७] विष्णोरेव हृत्पद्मस्थत्वं सिद्ध्यतीत्यत आह – **स चेति** ॥ चस्त्वर्थः, प्रतिज्ञासमुच्चये

---

१. 'इत्याह । गुरुवचनेन यद्'– प.
२. 'उक्तं तस्यान्तर्हृदये'–प
३. 'सर्वम्' इति पदं प. पाठे नास्ति ।
४. 'सर्वाश्रयत्वापहतपाप्मत्वादिप्रकारः' – प.
५. 'हृदय आहित इति' – प.
६. 'इति' इति. ह. पाठे नास्ति ।
७. 'विष्णुत्वे' – प.

वा । तथा च यः सर्वाधारतया हृत्पद्मस्थत्वेन च श्रुत्युक्तः **'स चाऽकाशो न विष्णुः'** भूतमेव न तु विष्णुरित्यर्थः ॥

कुतो वा न विष्णुरित्यत आह – **तस्यान्त इति** ॥ स चेत्यनुषक्त[1]श्चशब्दोऽत्र बुद्ध्या विविक्तसुषिरपदेनान्वीयतेऽवधारणे चायम् । श्रुतिसमानोक्त्युपलक्षकं चैतत्[2]। तथा च **'तस्यान्ते'** इति वाक्ये **'सुषिर-पदश्रुतेः'** सुषिरशब्दश्रवणात् सुषिरस्य छिद्रात्मकप्रसिद्धाकाशस्यैव श्रुतेः सर्वाधारतया हृत्पद्मस्थत्वोक्तेः तत्समाख्यानादित्यर्थः । [3]**'तस्य' 'पद्मकोश-प्रतीकाशं हृदयं चाप्यधोमुखम्'** इति पूर्ववाक्ये प्रकृतस्य हृत्पद्मकोशस्य **'अन्ते'** अन्तरे तन्मध्ये सूक्ष्मं **'सुषिरं'** छिद्रमस्ति, तस्मिन् **'सर्वं'** जगत् प्रतिष्ठितमिति तैत्तिरीय श्रुत्यर्थः ॥

अत आह –

सू – ॐ ॥ दहर उत्तरेभ्यः ॥ ॐ ॥ १४ ॥

'य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सो-ऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' *(छां.८.७.३)*

इत्यादिभ्य उत्तरेभ्यो गुणेभ्यो दहरे विष्णुरेव ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे – **अत इति** ॥ **'इत्यादिभ्यः'** इत्यादिरूपेभ्यः **'उत्तरेभ्यः'** विषयवाक्यानन्तरभाविभ्यः **'शब्देभ्यः उक्तेभ्यः'** इति

---

१. 'स च इत्यतोऽनुषक्तः' – प.

२. 'श्रुत्युक्तिसमानोपलक्षकं चैतत्' – प.

३. 'तत्र' – प.

शेषः । इत्याद्युत्तरवाक्येभ्य इति पर्यवसितार्थः । यद्वा **'गुणेभ्यः'** गणवचनेभ्य इत्यर्थः । हेत्वसिद्धिपरिहाराय श्रुत्युदाहरणम् । आदिपदेन **'विशोकोऽविजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः'** इत्यादिकं गृह्यते । गुणेभ्य इत्यनेनोत्तरपदमुत्तरत्र श्रुतानेक-शब्दवाच्यगुणोपलक्षकमित्युक्तं भवति ॥ **'दहरे'** हृत्पद्मगताल्पाकाशे इत्यनेन सूत्रे **'दहरे'** इति सप्तप्यन्तं पदं, न परमत इव प्रथमान्तमित्युक्तं भवति । स्थितोऽन्वेष्टव्यतयोक्त इति शेषः । समन्वयसूत्रादनुवृत्तस्य विधेयपरस्य तत्त्वित्यस्यार्थो विष्णोरेवेति ॥

अनेन – **'यः'** इति दहरवाक्यादुत्तरवाक्ये श्रुतेभ्यो गुणेभ्यो **'दहरे'** विजिज्ञास्यतयोक्तः **'तत्तु'** विष्णुरेव न भूताकाशादिरिति सूत्रार्थ उक्तो भवति ॥

यो हृत्पद्माकाशगतः परमात्मा **'न वधेनास्य हन्यते'** (छां.८.१.५) इति प्राक् शरीरस्य नाशेनावध्यत्वेनोक्तः सः **'अपहतपाप्मा'** नित्यमेव स्वतोऽपहतपाप्मा पापात्यन्ताभाववानिति यावत् । अत एव न तत्कार्यं जरादिकमस्येत्युच्यते – **विजर इत्यादिना ॥ 'अविजिघत्सः'** बुभुक्षारहितः । **'अपिपासः'** पानेच्छारहित इति । **'बुभुक्षादिना पीडाभाव उच्यते'** इति ज्ञानपादीयटीकोक्तेर्नादनपानेच्छाभावोऽभिधीयते, प्रमाणबाधितत्वात् । किन्तु तत्पीडाभावः । अत्र हेतुः – **सत्यकाम इति ॥** तस्य यदिष्टं तत् स्वत एव भवेदिति सत्यकामः । तत्रापि हेतुः – **'सत्यसङ्कल्पः'** अप्रतिहतसङ्कल्प इति । य एवम्भूतः सोऽन्वेष्टव्य इति श्रुत्यर्थः ॥

'योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति' *(बृ.५.५)*

'स एष सर्वेभ्यः पाप्मभ्य उदितः' *(छां.१.६.७)*

इत्यादिना विष्णोरेव हि ते गुणाः ।

अपहतपाप्मत्वादिकं कथं विष्णुत्वनिश्चायकं, तद्गतत्वेनासिद्धत्वादित्यत आह – **य इति** ॥ बृहदारण्यकश्रुतिरियम् । यः **'अशनाया'** अशनेच्छा । **'पिपासा'** पानेच्छा । ते **'अत्येति'** अतिक्रम्य वर्तते । यश्च **'शोकं'** दुःखं **'मोहं'** मूर्छां **'जरां'** मरणं चाप्येतीत्यर्थः । अत्रत्यस्य[1] यच्छब्दस्य **'तमात्मानं विदित्वा'** इति तच्छ्रुतिस्थतच्छब्देनान्वयः ॥

'स एषः' इति छन्दोगश्रुतिः । **'स एषः'** परमात्मा **'पाप्मभ्यः'** पापेभ्यः **'उदितः'** नित्यं स्वत एवोद्गतः पापरहित इत्यर्थः ॥

'इत्यादिना' वाक्येन आदिशब्देन सत्यकामत्वादिगुणान्तरबोधकवाक्यानि गृह्यन्ते । हिशब्दो यत इत्यर्थे । ते अपहतपाप्मत्वादिरूपोत्तरवाक्योक्ताः सिद्धा इति शेषः । तस्मान्न तेषां विष्णुलिङ्गत्वनिश्चय[2] इति वाक्यशेषेणास्यान्वयः । अन्यत्र पापाद्यभावस्य कथञ्चिद्योगेऽपि सर्वथा सत्यकामत्वादिकं न युज्यत इति ज्ञापनायाऽदिशब्दबहुवचनयोः प्रयोगः ॥

'नित्यतीर्णाशनायादिरेक एव हरिः स्वतः ।
अशनायादिकानन्ये तत्प्रसादात् तरन्ति हि ॥' इति पाद्मे ॥

सापेक्षनिरपेक्षयोश्च निरपेक्षं स्वीकर्तव्यम् ।

तथाऽपि नैते गुणा विष्णोरेव, रमादिष्वपि सम्भवादित्यत आह – **नित्येति** ॥ **'स्वतः'** अन्यानपेक्षया नित्यं तीर्णा अशनायादयो येन स हरिरेक एव, नान्योऽस्ति । हरेरन्ये रमाब्रह्मादयस्तु **'अशनायादिकान्'**

---

१. 'अत्र' – प.

२. 'विष्णुलिङ्गत्वानिश्चयः' – प.

अशनपानेच्छाशोकादिदोषान्[१] **'तत्प्रसादात्'** तस्य हरेरनुग्रहादेव **'तरन्ति'** अतियन्ति, न स्वत इत्यर्थः । हिशब्दः प्रसिद्धौ । **'पाद्मे'** उक्तमिति शेषः । अतो निरपेक्षगुणानामन्यत्राभावाद् विष्णोरेवेत्युक्तमिति भावः ॥

ननु रमादिष्वपहतपाप्मत्वादीनामन्यानधीनानाम[२]भावेऽपि यथाकथञ्चित्[३] सत्त्वादन्यगतैस्तैः कथं विष्णुत्वनिश्चय इत्यत आह – **सापेक्षेति ॥ 'सापेक्षम्'** अन्याधीनं **'निरपेक्षम्'** अन्यानधीनं[४] तयोर्मध्ये इत्यर्थः । चोऽवधारणे, निरपेक्षमेवेति सम्बध्यते । अपहतपाप्मत्वादिकमिति विशेष्यं प्रकृतत्वाल्लभ्यते । **'स्वीकर्तव्यं'** [५]लिङ्गत्वेनेति शेषः । तथा च विवक्षितलिङ्गस्यान्यत्राभावात्तेन विष्णुत्वनिश्चयो भवत्येवेति भावः ॥

'सत्यकामः परो[६] नास्ति तमृते विष्णुमव्ययम् ।

सत्यकामत्वमन्येषां भवेत् तत्काम्यकामिता ॥'

इति स्कान्दे[७] ॥ १४ ॥

किं च सापेक्षत्वनिरपेक्षत्वादिविशेषितानामपहतपाप्मत्वादीनामभावरूपाणामन्यत्राऽकाशादौ साक्षाद्वाऽभिमानिद्वारा वा यथाकथञ्चिद् वृत्तावपि न कथञ्चिदन्यत्र सत्यकामत्वाद्यस्तीति युक्तस्तेन विष्णुत्वनिश्चय इत्याह –

---

१. -शोकादीन्' – प.
२. 'हर्यनधीनानाम्' – प.
३. 'तदपेक्षाणां सत्त्वादन्यगामिभिस्तैः' – प.
४. अनन्याधीनम्' – प .
५. 'हेतुत्वेनेति शेषः'। – प.
६. 'सत्यकामोऽपरः' ह.
७. 'इति च स्कान्दे' ह.

सत्यकाम इति ॥ **'अव्ययम्'** अक्षीणकाममोघकामं[१] सत्यकामं विष्णुम् **'ऋते'** विना **'परोऽन्यः'** विष्णोरन्यः[२] सत्यकामः सत्यसङ्कल्पश्च नास्ति । विष्णौ तद्भावस्य तदन्यस्मिन् तदभावस्य च प्रतिपादनाय वक्रोक्तिः । विष्णोरन्येषां रमादीनां क्वचिदागमे प्रतीयमानमपि सत्यकामत्वं **'तत्काम्यकामिता'** विष्णुकामनाविषयविषयककामनावत्त्वरूपमेव भवेन्न मुख्यमित्यर्थः[३]। तथा चापहतपाप्मत्वं स्वतः पराधीनं चेति यथा द्विविधं, न तथा सत्यकामत्वं किं त्वेकविधं, तच्च मुख्यं विष्णावेव, अन्यत्र तु पारिभाषिकमिति भावः ॥

'स्कान्दे' उक्तमिति शेषः । अतः सत्यकामत्वादिविवक्षया विष्णोरेव हि ते गुणा इत्युक्तं युक्तमिति भावः ॥

सू – ॐ ॥ गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ॥ ॐ ॥ १५ ॥

'अहरहर्गच्छन्त्य[४] एतं ब्रह्मलोकं न विन्दन्ति' *(छां. ८–३–२,)*
इति सुप्तस्य तद्गतिर्ब्रह्मशब्दश्चोच्यते[५] ।

युक्त्यन्तरेण विष्णोर्हृत्पद्मस्थत्वं प्रतिपादयत्सूत्रमुपन्यस्यासिद्धिपरिहाराय[६] श्रुत्युदाहरणपूर्वकं व्याचष्टे – **गतीति ॥** **'इमाः'** सुप्ताः प्रजाः **'अहरहः'** प्रतिदिनमेतं **'गच्छन्त्यः'** प्राप्यमाणाः **'एतं'** ब्रह्मलोकं ब्रह्मणो

---

१. **'अमोघकामं वा विष्णुम्'** – प.
२. **'विष्णोरन्यः'** इति पदद्वयं प. पाठे नास्ति ।
३. **'-वत्त्वमेव भवेन्न विवक्षितरूपमित्यर्थः'** । – प.
४. **'गच्छत्यः'** ह.
५. **'चोच्येते'** ह.
६. **'असिद्धिपरिहाराय'** इति प. पाठे नास्ति ।

[1]विष्णोरावासस्थानभूतं हृत्पद्मं तद्द्वारा तत्रत्यं ब्रह्म साक्षाल्लोकपदोक्तं ब्रह्माख्यमाश्रयं वा **'न विन्दन्ति'** न विजानन्ति, स एष आत्मा हृदीति श्रुत्यर्थः । **इतीति ॥** इति छन्दोगवाक्ये **'सुप्तस्य'** चेतनस्य **'तद्गतिः'** अहरहो हृद्गतं ब्रह्मलोकं प्रति गतिः प्राप्तिः **'उच्यते'** व्यपदिश्यत इत्यर्थः ॥

'ब्रह्मशब्दः' इत्यत्रापि तदिति पदं बुद्ध्या विविच्य विपरिणामेन सम्बध्यते । तथा च तस्मिन् प्राप्यमाणे हृद्गते ब्रह्मलोके **'ब्रह्मशब्दः'** **'उच्यते'** श्रूयत इत्यर्थः । उच्यते च इत्यपि सम्बन्धः । चः समुच्चये । यत इति शेषः । अस्यातोऽपि दहरे विष्णुरेवेति [2]प्रधानसाध्येनान्वयः ॥

'सता सोम्य तदा सम्पन्नो भवति' *(छां. ६–७–१.)*
इति श्रुतेस्तं हि सुप्तो गच्छति ।

सुप्तप्राप्यत्वं कुतो विष्णुत्वनिश्चायकमित्यत आह – **सतेति ॥** हे **'सोम्य'** भक्तिज्ञानार्ह श्वेतकेतो **'तदा'** सुप्तिकाले **'सता'** ब्रह्मणा **'सम्पन्नः'** सङ्गतो भवतीत्यर्थः । उद्दालकवाक्यमेतत् । श्रुतेरिति पञ्चमी । **'तं'** विष्णुम् । हिशब्दः प्रसिद्धौ । **'गच्छति'** प्राप्नोति । इति ज्ञायत इति शेषः[3] । तथा च सुप्तप्राप्यत्वस्य विष्णुलिङ्गत्वेन श्रुतिप्रसिद्धत्वात् तेन विष्णुत्वनिश्चयो भवतीति भावः ॥

'अरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके' *(छां ८–५–३.)*
इति लिङ्गं च तथा दृष्टम् ।

'लिङ्गं च तथा हि दृष्टम्' इति सूत्रशेषं हेत्वन्तरपरतया व्याचष्टे –

---

१. विष्णोर्लोकमावासस्थानभूतम्' – प.
२. 'प्रधानसाध्यवाक्येनान्वयः' – प.
३. 'यत इति शेषः' – प.

अरश्चेति ॥ चशब्दो हेतुसमुच्चये । यथा सुप्तगम्यत्वम् **'अहरहः'** इति श्रुतौ हृत्पद्मस्थे दृष्टम्, तथा अरण्यनामामृतसमुद्रद्वयाश्रयलोकवत्त्वरूपं लिङ्गमपि [१] **'अरश्च'** इति श्रुतौ हृत्पद्मस्थे दृष्टं श्रुतमिति । उपमायां तथाशब्दः । अनेनासिद्धिः परिहृता । न च गतिशब्दयोरिवास्य सन्निधौ हृत्पद्मस्थस्यानुक्तेरसिद्ध्यनिवृत्तिरिति [२] वाच्यम् । हृत्पद्मस्थस्य ब्रह्मण आवासत्वेन निमित्तेन तल्लोकभूते हृत्पद्मे **'एतं ब्रह्मलोकम्'** इति प्रयुक्तस्य ब्रह्मलोकशब्दस्यारण्याश्रयलोकेऽपि प्रयोगात् तन्मुखेन तादृशलोकवत्त्वरूपलिङ्गस्य हृत्पद्मस्थब्रह्मनिष्ठतायाः प्राप्तत्वात् । दृष्टमित्यनन्तरं यत इति शेषः । [३]अस्यातोऽपि दहरे विष्णुरेवेति प्रतिज्ञावाक्येनान्वयः ॥

श्रुतौ हवा इति निपातौ प्रसिद्धिद्योतकौ । समुद्रयोरन्योन्यसमुच्चये चशब्दौ ॥ तथा च ब्रह्मणो विष्णोर्लोके श्वेतद्वीपे अरण्याख्यार्णवौ सुधासमुद्रौ अर्णवोपमे सुधासरसी [४]वा स्त इति श्रुत्यर्थः ॥

'अरश्च वै ण्यश्च सुधासमुद्रौ तत्रैव सर्वाभिमतप्रदौ द्वौ ।' इत्यादिना तस्यैव हि[५] तल्लक्षणत्वेनोच्यते ॥ १५ ॥

ननु हृत्पद्मस्थस्यारण्याश्रयलोकवत्त्वलिङ्गश्रवणेऽपि कुतोऽयं विष्णुरित्यतोऽरण्याश्रयत्वस्य विष्णुलोकैकलिङ्गत्वेन स्मृतिसिद्धत्वादित्याशयेन सौत्रहिशब्दाभिप्रेतां स्मृतिं दर्शयति – **अरश्चेति** ॥ वैशब्दः प्रसिद्धौ । चशब्दौ परस्परसमुच्चये । **'तत्रैव'** [६]क्षीराब्धिमध्यस्थितविष्णुलोक एव **'सर्वाभिमतप्रदौ'**

---

१. '- रूपलिङ्गमपि'– प.
२. 'असिद्धिनिवृत्तिः' – प.
३. 'अतोऽपि' – प. ।
४. 'सुधासमुद्रौ अमृतसरसी वा' – प.
५. हपाठे 'हि' इति नास्ति । ६. 'क्षीराब्धिमध्यस्थविष्णु-' – प.

[1]विष्णोरावासस्थानभूतं हृत्पद्मं तद्द्वारा तत्रत्यं ब्रह्म साक्षाल्लोकपदोक्तं ब्रह्माख्यमाश्रयं वा **'न विन्दन्ति'** न विजानन्ति, स एष आत्मा हृदीति श्रुत्यर्थः । **इतीति ॥** इति छन्दोगवाक्ये **'सुप्तस्य'** चेतनस्य **'तद्गतिः'** अहरहो हृद्गतं ब्रह्मलोकं प्रति गतिः प्राप्तिः **'उच्यते'** व्यपदिश्यत इत्यर्थः ॥

'ब्रह्मशब्दः' इत्यत्रापि तदिति पदं बुद्ध्या विविच्य विपरिणामेन सम्बध्यते । तथा च तस्मिन् प्राप्यमाणे हृद्गते ब्रह्मलोके **'ब्रह्मशब्दः' 'उच्यते'** श्रूयत इत्यर्थः । उच्यते च इत्यपि सम्बन्धः । चः समुच्चये । यत इति शेषः । अस्यातोऽपि दहरे विष्णुरेवेति [2]प्रधानसाध्येनान्वयः ॥

'सता सोम्य तदा सम्पन्नो भवति' *(छां. ६–७–१,)*
इति श्रुतेस्तं हि सुप्तो गच्छति ।

सुप्तप्राप्यत्वं कुतो विष्णुत्वनिश्चायकमित्यत आह – **सतेति ॥** हे **'सोम्य'** भक्तिज्ञानार्ह श्वेतकेतो **'तदा'** सुप्तिकाले **'सता'** ब्रह्मणा **'सम्पन्नः'** सङ्गतो भवतीत्यर्थः । उद्दालकवाक्यमेतत् । श्रुतेरिति पञ्चमी । **'तं'** विष्णुम् । हिशब्दः प्रसिद्धौ । **'गच्छति'** प्राप्नोति । इति ज्ञायत इति शेषः[3] । तथा च सुप्तप्राप्यत्वस्य विष्णुलिङ्गत्वेन श्रुतिप्रसिद्धत्वात् तेन विष्णुत्वनिश्चयो भवतीति भावः ॥

'अरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके' *(छां ८–५–३,)*
इति लिङ्गं च तथा दृष्टम् ।

'लिङ्गं च तथा हि दृष्टम्' इति सूत्रशेषं हेत्वन्तरपरतया व्याचष्टे –

---

१. **विष्णोर्लोकमावासस्थानभूतम्' – प.**
२. **'प्रधानसाध्यवाक्येनान्वयः' – प.**
३. **'यत इति शेषः' – प.**

अरश्चेति ॥ चशब्दो हेतुसमुच्चये । यथा सुप्तगम्यत्वम् **'अहरहः'** इति श्रुतौ हृत्पद्मस्थे दृष्टम्, तथा अरण्यनामामृतसमुद्रद्वयाश्रयलोकवत्त्वरूपं लिङ्गमपि [१] **'अरश्च'** इति श्रुतौ हृत्पद्मस्थे दृष्टं श्रुतमिति । उपमायां तथाशब्दः । अनेनासिद्धिः परिहता । न च गतिशब्दयोरिवास्य सन्निधौ हृत्पद्मस्थस्यानुक्तेरसिद्ध्यनिवृत्तिरिति [२] वाच्यम् । हृत्पद्मस्थस्य ब्रह्मण आवासत्वेन निमित्तेन तल्लोकभूते हृत्पद्मे **'एतं ब्रह्मलोकम्'** इति प्रयुक्तस्य ब्रह्मलोकशब्दस्यारण्याश्रयलोकेऽपि प्रयोगात् तन्मुखेन तादृशलोकवत्त्वरूपलिङ्गस्य हृत्पद्मस्थब्रह्मनिष्ठतायाः प्राप्तत्वात् । दृष्टमित्यनन्तरं यत इति शेषः । [३]अस्यातोऽपि दहरे विष्णुरेवेति प्रतिज्ञावाक्येनान्वयः ॥

श्रुतौ हवा इति निपातौ प्रसिद्धिद्योतकौ । समुद्रयोरन्योन्यसमुच्चये चशब्दौ ॥ तथा च ब्रह्मणो विष्णोर्लोके श्वेतद्वीपे अरण्याख्यार्णवौ सुधासमुद्रौ अर्णवोपमे सुधासरसी [४]वा स्त इति श्रुत्यर्थः ॥

'अरश्च वै ण्यश्च सुधासमुद्रौ तत्रैव सर्वाभिमतप्रदौ द्वौ ।' इत्यादिना तस्यैव हि[५] तल्लक्षणत्वेनोच्यते ॥ १५ ॥

ननु हृत्पद्मस्थस्यारण्याश्रयलोकवत्त्वलिङ्गश्रवणेऽपि कुतोऽयं विष्णुरित्यतोऽरण्याश्रयत्वस्य विष्णुलोकैकलिङ्गत्वेन स्मृतिसिद्धत्वादित्याशयेन सौत्रहिशब्दाभिप्रेतां स्मृतिं दर्शयति – **अरश्चेति** ॥ वैशब्दः प्रसिद्धौ । चशब्दौ परस्परसमुच्चये । **'तत्रैव'** [६]क्षीराब्धिमध्यस्थितविष्णुलोक एव **'सर्वाभिमतप्रदौ'**

---

१. '- रूपलिङ्गमपि'– प.
२. 'असिद्धिनिवृत्तिः' – प.
३. 'अतोऽपि' – प. ।
४. 'सुधासमुद्रौ अमृतसरसी वा' – प.
५. हपाठे 'हि' इति नास्ति । ६. 'क्षीराब्धिमध्यस्थविष्णु-' – प.

सर्वेष्टकरौ स्त इत्यर्थः । एवकारोऽन्यत्र सत्त्वव्यावर्तकः । तेनारण्याश्रयलोकवत्त्वलिङ्गस्य [१]विष्णुत्वेनाव्यभिचारः सिद्ध्यति । अत एव भाष्ये तस्यैवेत्येवकारः । **'इत्यादिना'** पुरुषोत्तमध्यानचक्रवाक्येन **'तस्यैव'** विष्णोरेव **'तत्'** सुधार्णवद्वयाश्रयलोकवत्त्वं **'लक्षणत्वेन'** लिङ्गत्वेन **'उच्यते'** प्रतिपाद्यत इत्यर्थः । **'हि'** यस्मादित्यर्थे । तस्मादेतल्लिङ्गबलाद् विष्णुत्वनिश्चयो युक्त इति वाक्यशेषः ॥

यद्वा – ब्रह्मलोकमिति हृत्पद्मस्य विष्णुलोकत्वोक्तेः तदन्तर्गतो विष्णुरित्युक्तं, ब्रह्मलोकपदं कुतो विष्णुलोकवाचीत्यत आह – **अरश्चेति** ॥ ब्रह्मलोकपदस्य विष्णुलोके **'अरश्च'** इति वाक्ये प्रयोगादत्र हृत्पद्मे प्रयुक्तम् **'एतं ब्रह्मलोकम्'** इति पदमपि विष्णुलोकपरमेव । न च **'अरश्च'** इति श्रुतावपि ब्रह्मलोकपदं कुतो विष्णुलोकपरमिति वाच्यम् । यतस्तत्रारण्याश्रयत्वलिङ्गं श्रुतमित्यर्थः । [२]अथाप्यरण्याश्रयत्वस्य भगवल्लोकलिङ्गत्वं कुत इत्यत आह – **अरश्चेति** ॥ अस्मिन् पक्षे सौत्रं लिङ्गपदं हृत्पद्मस्थस्य ब्रह्मत्व-साधकब्रह्मलोकपदाख्यहेतोर्विष्णुलोकपरत्वसाधकारण्याश्रयत्वाख्यहेतुपरम् । अत एवास्य लिङ्गस्य हेतुगतविशेषसाधकत्वेन हृत्पद्मस्थस्य ब्रह्मत्वरूपप्रधानसाध्ये हेतुत्वाभावात् सूत्रे लिङ्गशब्देन पृथगुक्तिः । पूर्वव्याख्यानेऽपि गतिशब्दयोरिवास्य लिङ्गस्य विष्णुनिष्ठताया[३] उपपादन-सापेक्षत्वेन स्पष्टत्वाभावाद् गतिशब्दलिङ्गैरित्यनुक्त्वा लिङ्गं चेति पृथगुक्तिर्युक्ता ॥

अनेन – न केवलमुत्तरेभ्यो गुणेभ्यः, किन्तु गतिशब्दाभ्यां च **'अहरहः'** इति वाक्ये हृत्पद्मस्थनिष्ठतया श्रुताभ्यां सुप्तप्राप्यत्वब्रह्मशब्दाभ्यां च दहरे

---

१. **'विष्णुनिष्ठत्वेन'** – प. २. **'तथाऽ-'** प.

३. **'विष्णुनिष्ठतयोपपादने'**–प.

विष्णुरेवेति ज्ञायते । न केवलमेताभ्यामेव, किन्तु यतः **'अरश्च'** इति श्रुतौ **'तथा'**[१] गतिशब्दयोरिव **'हि'** विष्णुलिङ्गत्वेन स्मृतिसिद्धमरण्याश्रय-लोकवत्त्वरूपं लिङ्गं हृत्पद्मस्थे विष्णुलोके प्रयुक्तब्रह्मलोकपदस्य हृत्पद्मे प्रयोगात् **'दृष्टं'** श्रुतमतोऽपि दहरे विष्णुरेव ॥

यद्वा – कुतोऽत्र प्रयुक्तस्य ब्रह्मलोकपदस्य विष्णुलोकपरत्वम् ? **'अरश्च'** इति वाक्ये विष्णुलोके ब्रह्मलोकपदप्रयोगात् । अत्रापि **'एतं ब्रह्मलोकम्'** इति तस्यैव प्रयोगात् । न च तत्रापि विष्णुलोकपरत्वं कुतः ? [२]यतोऽरण्याश्रयत्वं लिङ्गं **'दृष्टं'** श्रुतमत इति सूत्रार्थ उक्तो भवति ॥

सू – ॐ ॥ धृतेश्च - महिम्नोऽस्यास्मिन्नुपलब्धेः ॥ ॐ ॥ १६ ॥

'एष सेतुर्विधृतिः' *(छां. ८–४–१,)* **इति धृतेः,**

हेत्वन्तरेण विष्णोर्हृत्पद्मस्थत्वं प्रतिपादयत्सूत्रमुपन्यस्य व्याचष्टे – **धृतेरिति ॥ 'इति धृतेः'** इत्यस्य **'अस्मिन्नस्य'** इति पदानुवर्तनेनेत्यस्मिन्[३] वाक्येऽस्य हृत्पद्मस्थस्य धृतिपदोक्तसर्वाधारत्वश्रुतेरित्यर्थः । अस्य दहरे विष्णुरेवेति प्रतिज्ञावाक्येनान्वयः । श्रुतौ विधृतिः सेतुरित्यन्वयः ।[४]तत्र विधृतिरित्येतत् सेतुत्वे हेतुः । तथा च य आत्मा हृत्पद्मस्थत्वेनोक्तः [५]स एष

१. 'तथा' इति प. पाठे नास्ति ।
२. 'यतोऽत्रारण्या-' – प.
३. '-वर्तनेनास्मिन्' – प.
४. 'अत्र धृतिरित्येतत्'–प.
५. 'स एवैषां भूरा-' – प.

'एषां' भूरादिलोकानाम् **'असम्भेदाय'** असाङ्कर्यायाविदारणायेति, व्यासतीर्थीयोक्तरीत्या वर्णाश्रमसाङ्कर्याभावायेति वा **'विधृतिः'** धारणपोषण-समर्थोऽत एव सेतुरिव **'सेतुः'** आश्रय इत्यर्थः । धारकत्वं च न धार्याद् बहिष्ठतया, किन्त्वन्तःकृतजगत्त्वेन, **'श्रितमस्मिन् जगत् सर्वमिति [1]सेतुरितीरितः'** इत्युक्तेः मुख्यार्थ एव वा सेतुशब्दः ॥

यद्यपि **'[2]स सेतुर्विधृतिः'** इति छन्दोगश्रुतिपाठः । तथाऽपि शाखान्तराणा-मप्यत्रोपसङ्ग्रहायैवमुक्तिः । एवमन्यत्रापीति सम्प्रदायविदः ॥

'एष भूताधिपतिरेष भूतपालः' (बृ. ६–४–२१.)
इत्याद्यस्य महिम्नोऽस्मिन्नुपलब्धेः ।

एवं सेतुसमुच्चायकसौत्रचशब्दस्य यथाश्रुतान्वयेन लिङ्गोक्तिपरतया धृतेश्चेत्यंशं व्याख्यायेदानीं समग्रं सूत्रं समानोक्तिरूपसमाख्यापरतया व्याचष्टे – **एष इति ॥** धृतेरिति पदमत्रानुषज्यते । अस्मिन् पक्षे सौत्रचशब्द उपलब्धेश्चेत्यन्वेति । तथा च न केवलं धृतेर्लिङ्गात्, किन्तु **'धृतेः'** धृतियुक्तायास्तद्बोधिकाया उपलब्धेः वाजसनेयके **'य एषोऽन्तर्हृदय आकाश-स्तस्मिन् शेते सर्वस्य वशी'** (बृ.६.४.२१) इत्याद्युक्त्वा आम्नातायाः **'एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण[3] एषां लोकानामसम्भेदाय'** इत्युक्तेः समानोक्तेश्च दहरे विष्णुरेवेति योजना । समाख्यायाः कुतो विष्णुपरत्वमित्यत आह – **एष इति ॥** इत्यादीति लुप्ततृतीयाविभक्तिको निर्देशः । आदिशब्देन **'एष सर्वस्य वशी एष सर्वस्याधिपतिरेष सर्वेश्वरः'** (बृ.६.४.२१) इति पूर्ववाक्यम् **'एष सेतुर्विधरण[4]**

---

१. 'सेतुरुदीर्यते' – प.
२. 'य आत्मा स सेतुः' – प.
३. ४, 'विधारणः' – प.

एषां लोकानामसम्भेदाय' इत्युत्तरवाक्यं च गृह्यते । अत एव मध्यस्थ-वाक्यग्रहणं कृतम् । अस्य महिम्न इति व्यधिकरणषष्ठ्यौ । उपलब्धेरि-त्यावृत्तमत्रान्वेति[१] । तथा च '**अस्मिन्**' वाजसनेयके **'एष भूताधिपतिः'** इत्यादिना वाक्येन '**अस्य**' विष्णोर्भूताधिपतित्वादिमहिम्नः '**अस्मिन्**'[२] दहराकाशगते वस्तुनि '**उपलब्धेः**' उक्तत्वादिति योजना ॥

य एष सर्वस्याधिपतिः, यश्चैष सर्वेश्वरो, यश्चैष प्रसिद्धो '**भूताधिपतिः**' भूत एवाधिपतिर्नास्याधिपत्यमादिमत्, [३]यश्चैष भूत एव पालको, यश्च '**एषां**' भूरादिलोकानाम् '**असम्भेदाय**' अमेलनाय एषां '**विधरणः**'[४] विधारणसमर्थः, न केवलं सामर्थ्यमात्रं, किन्तु य एषां लोकानां '**सेतुः**' आश्रयश्च, तमेतं भगवन्तं ब्राह्मणा विविदिषन्तीति श्रुत्यर्थः ॥

अनेन – न केवलं पूर्वोक्तहेतुभ्यः, किन्तु [५] विधृतेश्चास्मिन् प्रकरणे '**स सेतुर्विधृतिः**' इति सर्वाधारत्वलिङ्गश्रवणादपि दहरपद्मस्थो विष्णुरेव । न चास्य हृत्पद्मस्थत्वं कुत इति वाच्यम् । '**अस्य**' हृत्पद्मस्थस्य 'महिम्नः' अपहतपाप्मत्वादेर्लक्षणस्य '**अस्मिन्**' सर्वाधारे '**सर्वे पाप्मानोऽतो निवर्तन्ते**' (छां.८.४.१) इत्यनेन '**उपलब्धेः**' उक्तत्वात् । न केवलं धृतेर्लिङ्गात्, किन्तु धृतेर्धृतियुक्ताया उपलब्धेरुक्तेः । '**य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते . . एष सेतुर्विधरणः**[६] इति वाजसनेयसमाख्यायाश्च दहरे विष्णुरेव । समाख्याया अपि कुतो विष्णुविषयत्वम् '**अस्मिन्**' वाजसनेयके '**अस्य**' विष्णोः '**महिम्नो**' भूताधिपतित्वादेरुक्तत्वादिति सूत्रार्थ उक्तो भवति ॥

---

१. 'अत्राप्यन्वेति'-प.
२.'दहराकाशे वस्तुनि'-प
३. 'यश्चैष भूतपालकः'-प.
४.'विधारणः'-प
५. 'धृतेः-प.
६.'विधारणः'-प.

यद्यपि **'अस्य महिम्नः'** इत्याद्यंशो भाष्ये[१] धृतेश्चेत्यस्य लिङ्गपरतया योजनायां नान्वितः । तथाऽपि टीकायां **'सर्वे पाप्मानोऽतः'** इति तल्लक्षणोक्तेश्चेत्युक्तत्वाल्लिङ्गस्य हृत्पद्मस्थत्वरूपपक्षधर्मोपपादकतयाऽपि योजनीयः[२] ॥

'एतस्मिन्[३] खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च'
(बृ.५.८.११),
'एतस्य वा अक्षरस्य प्रशासने गार्गि' *(बृ.५.८.९)*
'स हि सर्वाधिपतिः स हि सर्वपालः स ईशः स विष्णुः',
'पतिं विश्वस्याऽत्मेश्वरम्' *(महाना.११)*
इत्यादिश्रुतिभ्यस्तस्य ह्येष महिमा ।

यदुक्तं सर्वाधारत्वलिङ्गश्रवणाद् हृत्पद्मस्थो विष्णुरिति, तत्र सर्वाधारत्वं कुतो विष्णुत्वनिश्चायकं, तत्समानाधिकरणत्वेनासिद्धत्वादित्यत आह – **एतस्मिन्निति ॥ 'एतस्य वा अक्षरस्य प्रशासने'** इति प्रतीकग्रहणेन **'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ'** इत्यादिबहुवाक्यानि सूचयति ॥ इमान्यक्षरनये व्याकृतानि ॥

ननु समाख्याश्रुत्युक्तः सर्वेश्वरत्वादिमहिमा कुतो विष्णोरवगत इत्यत आह – **स हीति ॥ 'स हि'** इत्यारभ्य **'स विष्णुः'** इत्यन्तमेकं वाक्यं श्रुत्यन्तरगतम् । **'सः'** प्रकृतः । **'हिः'** प्रसिद्धौ ॥ **'पतिं विश्वस्य'** इति

१. **'भाष्ये'** इति प.पाठे नास्ति ।
२. **'योजनीयम्'** - प.
३. **'एतस्मिन्नु'** ह.

नारायणानुवाकस्थं वाक्यम् । **'विश्वस्य'** अचेतनप्रपञ्चस्य पतिं **'आत्मेश्वरं'** चेतनेश्वरं नारायणं तद्विश्वमुपजीवतीत्यर्थः ॥

इत्यादीति । एवमादिश्रुतिवाक्येभ्य इत्यर्थः । आदिशब्देनैतज्जातीयं गृह्यते । तृतीयार्थे पञ्चमी ॥ **'तस्य'** विष्णोः **'हिः'**प्रसिद्धौ हेतौ वा ॥ **'**[1]**एष सर्वेश्वरः'** (बृ.६.४.२२) इत्यादिमहिमा । अवगत इति शेषः । तस्मान्नैतेषां विष्णुत्वरूपसाध्यसामानाधिकरण्यासिद्धिरिति वाक्यशेषः ॥

'सर्वेशो विष्णुरेवैको नान्योऽस्ति जगतः पतिः ।'

इति च स्कान्दे ॥ १६ ॥

ननु सर्वेश्वरत्वादिकं विष्णुवदन्यस्यापि किं न स्यादित्यत आह – **सर्वेश इति ॥** अत्र सर्वजगच्छब्दौ चेतनाचेतनप्रपञ्चपरौ । यद्वा – जगतः पतिरिति प्रतियोगित्वेनैवोक्तस्यानुवादः[2] । अथवा – **'पतिः'** पालकः । तथा च सर्वेश्वरः सर्वपालकश्च विष्णुरेक एव नान्योऽस्तीत्यर्थः । इति स्कान्द इत्यस्य एवकारोक्तपदाध्याहारेण तस्य ह्येष [3]महिमेति पूर्वेणान्वयः । तस्मान्नैत-ल्लिङ्गानामन्यत्र सावकाशत्वं शङ्क्यमिति वाक्यशेषः ।

सू – ॐ ॥ प्रसिद्धेश्च ॥ ॐ ॥ १७ ॥

'तत्रापि दहरं[4] **गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम्'** (महाना. १०–७.) **इति प्रसिद्धेश्च ॥**

---

१. **'एष सर्वेश्वरत्वादिमहिमेति'**–प.

२. **'-वोक्तस्यैवानुवादः'** – प.

३. **'तस्यैवैषः'** – प.

४. **'दहं'** ह.

समाख्यान्तररूपयुक्त्यन्तरेण विष्णोर्हृत्पद्मगताकाशस्थत्वं साधयत्सूत्रं पठित्वा व्याचष्टे – **प्रसिद्धेश्चेति** ॥ इतीत्यनन्तरं श्रुताविति शेषः । तस्येत्यनुवर्तते । **'तस्य'** विष्णोः **'तस्य'** हृत्पद्मस्थस्येति तदर्थः ॥

अनेन – सूत्रेऽस्यास्मिन्निति पदद्वयं पूर्वसूत्रादनुवर्तनीयम् । तथा च न केवलं वाजसनेयसमाख्यानात्, किन्तु **'अस्मिन्'** तत्रापीति तैत्तिरीयश्रुतिवाक्ये **'अस्य'** हृत्पद्मस्थस्य विष्णुत्वप्रसिद्धेश्च[१] तत्समाख्यानादपि दहरपद्मस्थो विष्णुरेवेति सूत्रार्थ उक्तो भवति ॥

'दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा सम्प्रतिष्ठितः' (मुं.२.२.७) इत्याथर्वणे प्रसिद्धेश्च ॥ **'य एषोऽन्तर्हृदय आकाशस्तस्मिन्नयं पुरुषः'** (तै.१.२.१) इति तैत्तिरीयवाक्यान्तरे प्रसिद्धेश्चेति सूत्रस्य यद् वृत्त्यन्तरं[२] टीकायां सूचितं, तद्भाष्यस्थेतिशब्दस्याऽद्यर्थत्वमाश्रित्येति द्रष्टव्यम्[३] ॥

श्रुतौ **'दहरं विपाप्मं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम्'** (महाना.१०.७) इति वाक्ये यत् **'दहरम्'**[४] अल्पं परस्य ब्रह्मणः सद्मभूतम्, अत एव विगतपापं[५] देहाख्यब्रह्मपुरमध्ये संस्थं हृदयकमलं प्रकृतं तत् तत्रेति परामृश्यते । तथा च **'तत्रापि'** पुण्डरीकेऽपि यत् **'दहरम्'** अल्पं गगनमस्ति तस्मिन् **'अन्तः'** अन्तरे **'विशोकः'** विशोकं विशोकपदोपलक्षितं जरादिशून्यं[६] यद् ब्रह्म तदुपासितव्यमित्यर्थः । विशोक इति लिङ्गव्यत्ययः छान्दसः ॥

तत्त्वप्रदीपे तु – लिङ्गव्यत्यासस्तस्य पुरुषत्वज्ञापनार्थः । **'य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकः'** इत्यादावुदितगुणाना-

---

१. **'अस्य विष्णोः हृत्पद्मस्थत्वस्य प्रसिद्धेश्च'**–पं
२. **'पक्षान्तरं'** – प.
३. **'सूचितम्'**– प
४. **'दहम्'** – प.
५. **'विपापम्'**–प.
६. **शोकपदोपलक्षितजरादिशून्यम्'** – प.

मधिकरणैक्यबलेन सन्निधीयमानानामनुकर्षणार्थश्चेति प्रयोजनमुक्तम् ॥

[1]तदन्तस्स्थत्वापेक्षत्वान्न सुषिरश्रुतिविरोधः ॥ १७ ॥

ननु साक्षात् पद्मगतस्य विष्णुत्वाभ्युपगमे सुषिरश्रुतिविरोधः । एवं पद्मगताकाशस्यैव विष्णुत्वाभ्युपगमेऽपि सुषिरश्रुतिविरोधः, सुषिरशब्दस्याऽकाशवाचित्वात् । एतद् विहाय दहरपद्मस्याऽकाशत्वं, विष्णोस्त्वाकाशगतत्वं, तस्यैव सर्वाधारत्वमित्युपगमेऽपि[2] सुषिरश्रुतिविरोधः । तत्र साक्षात् सुषिरस्य सर्वाधारत्वोक्तेरित्यत आह – **तदन्तस्स्थेति** ॥ बुद्ध्या विविक्तसुषिरश्रुतिपदं षष्ठ्यन्तमत्रान्वीयते । तथा च **'सुषिरश्रुतेः[3]'** इति सुषिरपदघटितश्रुतेः **'तदन्तस्स्थापेक्षत्वात्'** पद्मगतसुषिरान्तस्स्थपरमात्मानमपेक्ष्य प्रवृत्तत्वात् तस्य च [4]सर्वाधारत्वान्न सुषिरश्रुतिविरोधोऽस्मदभ्युपगमस्येत्यर्थः । यथा मन्दिरस्थमञ्जूषान्तर्गतमपि वस्तु मन्दिरस्थमिति सङ्गीयते, एवमिहापीति भावः । तदन्तस्स्थत्वेति पाठे परमात्मनः सुषिरान्तस्स्थत्वमपेक्ष्य श्रुतेः[5] प्रवृत्तत्वादित्यर्थः ॥

सू – ॐ ॥ इतरपरामर्शात् स
इति चेन्नासम्भवात् ॥ ॐ ॥ १८ ॥

'परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते,' *(छां. ८.१२.३)*

---

१. **'तदन्तस्स्थापेक्षत्वात्'** ह.

२. **'-मित्यभ्युपगमेऽपि' –**प.

३. **'सुषिरश्रुतेः सुषिरस्याऽकाशस्यैव साक्षात् सर्वाधारत्वप्रतिपादिकायास्तस्यान्त इति सुषिरपदघटितश्रुतेः' – प.**

४. **'सर्वाधारत्वस्येष्टत्वान्न' प.**

५. **'श्रुतेः'** इति प. पाठे नास्ति ।

'एष आत्मेति होवाच' *(छां.४.१५.१)*

इति जीवपरामर्शात् स इति चेत्,

भगवतो हृत्पद्मस्थत्वमाक्षिप्य समादधत्सूत्रमुपन्यस्याऽक्षेपांशं तावद् व्याचष्टे – **इतरेति ॥ 'निष्पद्यते'** इत्यनन्तरमित्युक्तस्येति शेषः । अस्य च समासप्रविष्टजीवपदेनान्वयः । अनेन सूत्रे अस्मिन्नस्येत्यस्यानुवृत्तिः । इतरपदं च सिद्धान्त्यभिमतब्रह्मप्रतियोगिजीवपरम् । अत एव श्रुतावेष इति जीवपरामर्शः । सिद्धान्ते श्रुत्यर्थस्तु वक्ष्यते ॥

न । तस्य स्वतोऽपहतपाप्मत्वाद्यसम्भवात् ॥ १८ ॥

धृतिसूत्रात् **'अस्यास्मिन् उपलब्धेः'** इत्यस्यानुवृत्तिमभिप्रेत्य परिहारांशं व्याचष्टे – **नेति ॥** हृत्पद्मस्थो न जीव इत्यर्थः । कुतो नेत्यतस्तत्रानुवृत्तवाक्येन **'अस्मिन्'** प्रकरणे **'अस्य'** अपहतपाप्मत्वादेरुपलब्धेरित्यस्य हेतोर्लाभात् तमनुपन्यस्योक्तहेतोर्जीवे निरवकाशत्वोक्तिपरतयाऽसम्भवादित्यंशं व्याचष्टे – **तस्येति ॥** जीवस्येत्यर्थः। मुक्तभावमादाय जीवे सम्भवाद् असिद्धिवाराणाय – **स्वत इति ॥** स्वातन्त्र्येणेत्यर्थः । सत्यकामत्वादिकमादिशब्दार्थः ॥

अनेन – **'अस्मिन्' 'परं ज्योतिः'** इति वाक्येऽभिव्यक्तिकर्तृत्वेनोक्तस्य प्रकृतस्योपसम्पत्तिकर्मीभूताद् ब्रह्मण इतरस्यास्य जीवस्याऽत्मेति **'य आत्मा'** इत्युक्तहृत्पद्मस्थात्मत्वविधानाय **'एषः'** इत्येतच्छब्देन **'परामर्शात्'** उपस्थापनात् । जीवपरामर्शकैतच्छब्दश्रवणादिति[1] यावत् । दहरे स जीव एव, न विष्णुरिति चेत् – न हृत्पद्मस्थो जीवः । कुतः ? अस्मिन्

१. '-परामर्शकतच्छब्दश्रवणादिति' – प.

प्रकरणेऽस्यापहतपाप्मत्वादेरुपलब्धेः श्रवणात् । अस्य चास्मिन् जीवे स्वतोऽसम्भवादिति सूत्रार्थ उक्तो भवति ॥

सू –ॐ ॥ उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ ॐ ॥१९॥

'स तत्र पर्येति जक्षन् क्रीडन् रममाणः' *(छां.८.१२.३)*
इत्याद्युत्तरवचनाज्जीव एवेति चेत्,

जीवस्यापहतपाप्मत्वाद्यसम्भवमाक्षिप्य समादधत्सूत्रमुपन्यस्याऽक्षेपांशं तावद् व्याचष्टे – **उत्तरादिति** ॥ **'इत्याद्युत्तरवचनात्'** एवंरूपाद् दहरवाक्यापेक्षया परामर्शवाक्यापेक्षया वाऽनन्तराद् वचनादित्यर्थः । वचनादित्यनन्तरम् अस्यास्मिन्नुपलब्धेरित्यनुषज्यते । सम्भवादिति शेषः । **'अस्य'** सत्यकामत्वस्य **'अस्मिन्'** जीवे प्रतीतेस्तत एव विशोकत्वादेः **'उपलब्धेः'** सिद्धेरुक्तगुणानां सम्भवादिति तदर्थः । जीव इत्यनेन पूर्वसूत्रात् स इत्यस्यानुवृत्तिः सूचिता । नेश्वर इति एवशब्दार्थः । हृत्पद्मस्थ इति वर्तते ॥

न । तत्र हि परमेश्वरप्रसादादाविर्भूतस्वरूपो मुक्त उच्यते ।

नञनुवृत्त्या परिहारांशं व्याचष्टे – **नेति** ॥ नैतद्वाक्यबलेन जीवस्य सत्यकामत्वादिगुणान् [१]सम्भाव्य हृत्पद्मस्थत्वं वाच्यमित्यर्थः । कुतो नेत्यतोऽभिहितम् **'आविर्भूतस्वरूपस्तु'** इत्यंशं तत्रेति पदाध्याहारेण व्याचष्टे – **तत्रेति** ॥ **'स तत्र'** इत्युत्तरवाक्य इत्यर्थः । तत्र आविर्भूतस्वरूप उच्यत इति सम्बन्धः । **'आविर्भूतस्वरूपः'** इत्यस्य व्याख्यानं **मुक्त** इति ॥ हिशब्दो यत इत्यर्थे । उत्तरवचनादित्यत्रापि सम्बध्यते । तथा च **'उत्तरवचनात्' 'स्वेन रूपेण'** इति जडदेहत्यागोत्तरकालीन-

---

१. **'सत्यकामत्वादिगुणैरसम्भाव्यम्'** –

स्वरूपाभिव्यक्तिश्रुतेः । अत्र मुक्तस्योक्तेः हृत्पद्मस्य च देहान्तरवृत्तितया मुक्तत्वायोगान्नायं जीव इति भावः ॥

नन्वस्य मुक्तविषयत्वेऽपि मुक्तस्यापि जीवत्वे नास्त्येव जीवेऽपहतपाप्मत्वादिसम्भवः । न च तस्य हृत्पद्मस्थत्वायोगः, यतो जीवो भाविभावेनापहतपाप्मत्वादिगुणः इदानीं हृत्पद्मगततयोच्यत इत्यत आह – **परमेश्वरप्रसादादिति** ॥ एवेत्यनुवर्तते । अनेन तुशब्दो व्याख्यातः । परमेश्वरप्रसादादित्यनेन उत्तरादित्येतदुत्तमादित्यपि व्याख्यातम् ॥ अत्र मुक्त इति न सौत्रपदव्याख्यानमात्रम् । किन्तूद्देश्यसमर्पकं च । अनेनाऽवृत्तिस्तुशब्दस्य यथाश्रुतान्वयश्च सूचितः । तथा[1]च योऽत्र मुक्त उच्यते स तु परमेश्वरप्रसादादेव **'आविर्भूतस्वरूपः'** उच्यते । आविर्भूतो व्यक्तः स्वरूपः अपहतपाप्मत्वादिः स्वधर्मो यस्य स तथोक्तः । अतो न स्वतोऽपहतपाप्मत्वादिगुणकः, अतो न दहरस्थो[2] जीव इति योजना ॥

यत्प्रसादात् स मुक्तो भवति स भगवान् पूर्वोक्तः ॥ १९ ॥

ननु **'परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते'** (छां.८.३.४) इत्यत्र मुक्तस्याभिव्यक्तापहतपाप्मत्वादिगुणकत्वमेवोच्यते, न तु तद्गुणानां परमेश्वराधीनत्वम् । अतस्तत् स्वत एवेत्यत आह – **यदिति** ॥ अस्य यच्छब्दस्य द्वितीयतच्छब्देनान्वयः । प्रसादो नाम इच्छाविशेषः । **'सः'** जीवः । पुनः स इत्युक्त्या सूत्रेऽनुवृत्तस्य स इत्यस्याऽवृत्तिः सूचिता । **पूर्वोक्तः** इत्यनेन सूत्रे उत्तरत्रेत्यस्य प्रतियोगितया पूर्वत्रेत्युपस्कार्यमित्युक्तं भवति । तथेति शेषः । तथा च **'यत्प्रसादात्'** यस्यानुग्रहात् **'सः'** जीवो **'मुक्तः'**

---

१. **'किन्तु विशेष्यपदोक्तिः । तथा च'** – प.

२. **'दहरे'** – प.

अपहतपाप्मत्वादिगुणो भवति । **'सः'** गुणप्रदाता भगवान्, **'पूर्वोक्तः' 'परञ्ज्योतिरुपसम्पद्य'** इति पूर्ववाक्ये **'तथा'** गुणप्रदातृतया उक्त इति योजना । अन्यथा ल्यबन्तपदं व्यर्थं स्यादिति भावः । उक्त इत्यनन्तरं यत इति शेषः । अस्यातो नात्र [१]मुक्तगुणप्राप्तेः परमेश्वराधीनत्वोक्त्यभाव इत्युपस्कृत-वाक्येनान्वयः ॥

अथवा – ननु जीवेऽन्याधीनस्य तद्गुणजातस्य सत्त्वात् स एवापहतपाप्मत्वादिनोक्तो हृत्पद्मस्थश्चास्त्वित्यत आह – **यदिति** ॥ योजना तु[२] – यत्प्रसादात् स जीवो जडदेहान्मुक्तो भवति, मुक्तो भूत्वा च सोऽपहतपाप्मत्वादिगुणो भवति, स भगवानेव **'पूर्वोक्तः' 'एष आत्माऽपहतपाप्मा'** (छां.८.१.५) इत्यादिपूर्ववाक्ये तथाऽपहतपाप्मत्वादिनोक्तो न जीवः । दातृप्रतिगृहीत्रोर्मध्ये दातुरेव मुख्यत्वान्मुख्यामुख्ययोश्च मुख्यस्यैव ग्राह्यत्वादिति ॥

अनेन – अस्य **'एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय'** (छां.८.३.४) इत्युक्तस्य जीवस्य **'उत्तरात्'** दहरवाक्यापेक्षया परामर्शवाक्यापेक्षया वाऽनन्तरात् **'स तत्र पर्येति'** इत्यादिवचनात् **'अस्मिन्'** पूर्वप्रकृते जीवे **'अस्य'** सत्यकामत्वस्य **'उपलब्धेः'** प्रतीतेः, तत एवास्य विशोकत्वादेः सिद्धेश्च । अत एवास्योक्तगुणासम्भवाभावात् स हृत्पद्मस्थो जीव एव नेश्वर इति चेत् –

न, यतस्तत्र **'स्वेन'** इत्युत्तरवाक्यबलादाविर्भूतस्वरूपो मुक्त उच्यते । स च [३]देहानन्तर्गततया न हृत्पद्मस्थो भवतीति भावः । न च मुक्तस्यापि जीवत्वेन तत्रापहतपाप्मत्वहृत्पद्मस्थत्वयोर्भिन्नकालीनत्वेऽपि सामाना-

---

१. 'गुणप्राप्तेः' – प.
२. 'अत्र योजना तु' – प.
३. 'देहान्तर्गततया' – प.

धिकरण्योपपत्तेरस्ति पुनस्तस्य प्राप्तिरिति वाच्यम् । यतोऽत्र वाक्ये[१] यो मुक्त उच्यते स उत्तरादुत्तमात् परमेश्वरप्रसादादेवाऽविर्भूतस्वरूपो न स्वतः । न चात्र मुक्तस्य तद्गुणत्वमेवोच्यते, न परमेश्वराधीनत्वं तद्गुणजातस्येति वाच्यम् । यतः पूर्वत्र **'परं ज्योतिः'** इति पूर्ववाक्ये यत्प्रसादात् स मुक्तो भवति स परमात्मा तथा गुणप्रदातृतयोच्यते ॥

न च यथाकथञ्चिद् जीवस्यापहतपाप्मत्वादिगुणकत्वात् पुनस्तत्प्राप्तिरिति वाच्यम् । यतो यस्मादुत्तरादुत्तमाद् भगवतस्तत्प्रसादात् स मुक्तः **'आविर्भूत-स्वरूपः'** अभिव्यक्तापहतपाप्मत्वादिगुणकः स तु भगवानेव पूर्वत्र **'एष आत्माऽपहतपाप्मा'** (छां.८.१.५) इति पूर्ववाक्ये उक्तो, न मुक्तजीव इति सूत्रार्थ उक्तो भवति ॥

श्रुत्यर्थस्तु **'एषः'** जीवो यतः **'सम्प्रसादः'** सम्यग्विष्णुप्रसादवान् अतो **'अस्मात् चरमशरीरात्' 'समुत्थाय'** मुक्तः **'यत्परं ज्योतिः'** ब्रह्म **'उपसम्पद्य'** प्राप्य स्वेन रूपेण **'अभिनिष्पद्यते'** अभिव्यज्यते **'स उत्तमः पुरुषः'** परज्योतिराख्यः । मुक्तस्य विषयैश्वरणप्रकारमाह – **स इति ॥ 'सः'** प्राप्तनिजानन्दाविर्भावो मुक्तः **'तत्र'** मुक्तिस्थाने परमात्मानुग्रहेणैव **'जक्षन्'** स्वापेक्षितं भक्षयन् हसन् वा ज्ञातिभिः सहमुक्तैरज्ञातिभिः पूर्वकल्पमुक्तैः[२] **'क्रीडन्'** स्त्रीभिः **'रममाणः'** रतिं प्राप्नुवन् प्राकृतस्त्र्यादिविषयसौख्यमनुभवन् **'पर्येति'** परितः सञ्चरतीति ॥

---

१. **'वाक्ये उक्ताविर्भूतस्वरूपस्तु मुक्तोऽपि उत्तरादुत्तमात्'** – प.

२. **'पूर्वकल्पे मुक्तैः'** – प.

सू – ॐ ॥ अन्यार्थश्च परामर्शः ॥ ॐ ॥ २० ॥

'यं प्राप्य स्वेन रूपेण जीवोऽभिनिष्पद्यते[१] स एष आत्मा' इति परमात्मार्थश्च परामर्शः ॥ २० ॥

ननु **'एषः'** इति जीवं परामृश्य **'आत्मा'** इति तस्य [२]हृत्पद्मस्थात्मत्वाभिधानादमुख्यापहतपाप्मत्वादिगुणोऽपि जीवः एतच्छब्दपरामर्शबलेन हृत्पद्मस्थात्मा[३] किं न स्यादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य **'इतरपरामर्शात् स इति चेन्न'** [४]इत्यनुवृत्तपूर्ववाक्येनापेक्षितस्य सिद्धान्तप्रतिज्ञायाश्च लाभान्नेत्युक्तसाध्ये हेतुतया सूत्रं व्याचष्टे – **अन्येति** ॥ श्रुतौ **'परञ्ज्योतिः'** इति नपुंसकपदनिर्दिष्टस्य[५] यमिति पुल्लिङ्गेन निर्देशो लिङ्गस्याविवक्षितत्वाद् वा विशेष्यशब्दविवक्षया वा युक्तः ॥

अनेन श्रुतौ परञ्ज्योतिरिति एकं पदम् । यद् वक्ष्यति **'परञ्ज्योतिःशब्देन परमात्मैवोच्यते'** इति, तच्च **'परञ्ज्योतिः परं ब्रह्म'** इति पौराणिकरूढ्या विष्णुवाचीत्युक्तं भवति ॥

ज्योतिः प्रकाशरूपं परं ब्रह्मेति भिन्ने पदे इत्यपि केचित् । अस्मिन् पक्षे [६]उक्तभाष्यविरोधः । किं च **'यं परञ्ज्योतिराख्यं भगवन्तम्'** इति यच्छब्दव्याख्यानपरटीकाविरोधः । **'परञ्ज्योतिः परमात्मानम्'** इति विष्णुतत्त्वनिर्णयटीकाविरोधश्च । श्रुतावुपसम्पद्येत्यस्यार्थः प्राप्येति । सौत्रान्यपदं पूर्वपक्ष्यभिमतजीवप्रतियोगितया[७] व्याख्याति – **परमात्मेति** ॥

---

१. 'निष्पद्यते' ह.
२. 'हृत्पद्मस्थात्मत्वविधानाद्' – प.
३. 'हृत्पद्मस्थात्मादि-' – प.
४. 'इत्यावृत्तपूर्व-' – प.
५. 'नपुंसकनिर्दिष्टस्यायमिति'–प.
६. 'पक्षे तूक्तभाष्यवचनविरोधः' – प.
७. 'प्रतियोगिपरतया' – प.

परमात्मैवार्थोऽभिधेयो यस्य स तथोक्तः । **'परामर्शः'** एतच्छब्दः । यद्वा – परमात्मन एवाऽत्मत्वविधानमर्थः प्रयोजनं यस्य स तथोक्तः । तथात्वे **'परामर्शः'** एतच्छब्देन परिग्रहणमित्यर्थः ॥

सूत्रभाष्ययोश्चशब्दस्तु न केवलं जीवपक्षेऽपहतपाप्मत्वासम्भवाख्यबाधकसद्भावः, किन्तु परामर्शाख्यसाधकाभावश्चेति समुच्चयार्थस्तुशब्दार्थो वा । चन्द्रिकायां तु – न केवलं परामर्शस्येश्वरपक्षे बाधकत्वाभावः [१], किन्तु जीवपक्षसाधकत्वाभावश्चेत्युक्तत्वात् परामर्शो जीवान्येश्वरार्थ एव[२] इत्यवधारणार्थतया व्याख्यातः ॥

अनेन – **'इतरपरामर्शात्'** इतरं जीवं **'एषः'** इति परामृश्य तस्य हृत्पद्मस्थत्वविधानात् स हृत्पद्मस्थ आत्मा जीव एव नेश्वर इति चेत्, न । कुतः ? यतः **'एषः'** इति परामर्शः **'अन्यार्थः'** जीवान्येश्वरार्थ एव, न जीवार्थः, अतः ॥

अथवा – न केवलमसम्भवात्, किन्तु यतः परामर्शोऽन्यार्थोऽपि [३] ॥ यद्वा – असम्भवान्न हृत्पद्मस्थो जीवः, किन्त्वीश्वर एव । न चैवं परामर्शायोगः । यतः **'परामर्शः'** एतच्छब्दस्तु अन्यार्थ इति त्रेधा सूत्रार्थ उक्तो भवति ॥

'यं प्राप्य' यत्समीपं प्राप्येति । अनेन जीवः परज्योतिराख्यं परमात्मानमुपसम्पद्यापरोक्षतो ज्ञात्वा अथ समीपं प्राप्याविद्याविधूननेनाऽनन्दादिना स्वेन रूपेणाभिनिष्पद्यते आविर्भूतस्वगुणो भवतीति

---

१. **'-स्येश्वरपक्षसाधकत्वाभावः'– प.**

२. **'एव, न जीवार्थ इत्यवधारणा-' – प.**

३. **'अन्यार्थोऽतोऽपि' – प.**

यावत् । यं प्राप्य स्वरूपेणाभिनिष्पद्यते जीवः, स एष आत्मा य आत्मेति प्रागुक्तः परमात्मेति होवाच [1]ब्रह्मादीन् प्रति रमेति सिद्धान्ते श्रुत्यर्थः ॥

सू- ॐ॥ अल्पश्रुतेरिति चेत् तदुक्तम् ॥ ॐ ॥ २१॥

'दहरः' *(छां. ८-१-१,)* **इत्यल्पश्रुतेर्नेति चेत्,**

उक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्य श्रुत्युदाहरणेनाऽक्षेपांशं तावद् व्याचष्टे – **अल्पेति** ॥ **'दहरः'** इति प्रतीकग्रहणेन **'दहरोऽस्मिन्नन्तर आकाशस्तस्मिन् यदन्तः'** इति वाक्यं गृह्यते । अल्पपदं चाल्पस्थानस्थितिपरम् । श्रुतेरित्यनन्तरमसम्भवादित्यनुवर्तते । अस्मिन्निति चास्ति । तथा च **'दहरः'** इति वाक्ये **'अस्मिन्'** दहरगते वस्तुन्यल्पस्थानस्थितिरूपलिङ्गश्रुतेस्तस्याश्चास्मिन् परमात्मनि **'असम्भवात्'** अनुपपत्तेरित्यन्वयः । अस्माद्धेतोर्न दहरे विष्णुः, किन्तु स जीव एवेतीतरसूत्रानुवृत्तप्रतिज्ञयाऽन्वयः ॥

न । 'निचाय्यत्वादेवं व्योमवच्च' इत्युक्तत्वात् ।

सूत्रेऽनुवृत्तनञ आवृत्तिमभिप्रेत्य परिहारांशं व्याख्याति – **नेति** ॥ नाल्पस्थानस्थितिश्रवणं विष्णावनुपपन्नमित्यर्थः । कुतो नेत्यतः प्रवृत्तं तदुक्तमित्यंशं यत इत्यध्याहाराभिप्रायेण हेतुतया व्याख्याति – **निचाय्यत्वादिति** ॥ अत्रापीति शेषः । तथा च **'निचाय्यत्वात्'** इत्यत्र सर्वगतस्यापि विष्णोर्व्योमवदल्पस्थानस्थितेरुक्तत्वादित्यर्थः ॥

---

१. 'ब्रह्मादीन् प्रति तमिति सिद्धान्ते श्रुत्यर्थ उक्तो भवति'। –प.

'एष म आत्माऽन्तर्हृदये ज्यायान्' *(छां.३.१४.३)*

इति श्रुत्युक्तत्वाच्च ॥ २१ ॥

॥ इति दहराधिकरणम् ॥

ननु युक्तं व्योम्नोऽशतोऽल्पौकस्त्वम्, अंशस्यापूर्णत्वात् । ब्रह्मणि त्वंशोऽपि पूर्ण इति कथं [1]तस्यांशतोऽल्पौकस्त्वमित्यतः सूत्रशेषं प्रकारान्तरेण व्याचष्टे – **एष म इति** ॥ चशब्दो युक्तिसमुच्चये । [2]सूत्रकृच्छ्रुत्युक्तिसमुच्चये वा । **'गुणाः श्रुताः'** इति श्रुतिसमुच्चये वा । **'यस्मिन्'** इति स्मृतिसमुच्चये वा ॥

अनेन **'अल्पश्रुतेः' 'दहरः'** इति वाक्ये सर्वगते वस्तुन्यल्पस्थान-स्थितिश्रवणात्, [3]तस्याश्च विष्णावसम्भवादनुपपत्तेर्न दहरे विष्णुः, किन्तु स जीव एवेति चेत्, न । यतः **'तदुक्तं'** [4]तत्र निचाय्यत्वादिति पूर्वत्र तस्य सर्वगतस्यापि विष्णोर्व्योमवत् तदल्पस्थानस्थितत्वम्, तस्मादुपासनार्थं युक्तमित्युक्तम् । न चांशतोऽपि सर्वगततया तत्र तदनुपपत्तिः । यतस्तस्यां **'[5]एष म आत्मा'** (छां.३.१४.३.) इति छन्दोगश्रुतौ तेन सर्वज्यायस्त्वेन वृद्धतमत्वेन व्याप्तत्वेनैव प्रकारेण तस्य विष्णोस्तद्धृदयस्थत्वमुक्तं स्मृत्युक्तं चात[6]इति सूत्रार्थ उक्तो भवति ॥

न च श्रुतिस्मृत्युक्तमपि[7] कथमेतदङ्गीकार्हं, युक्तिविरोधादिति

---

१. 'तस्य हृदयस्थांशतोऽप्यल्पौकस्त्वम्' – प.

२. 'सूत्रकृत्प्रयुक्तसमुच्चये वा' – प.

३. 'तस्य' – प.।

४. 'तत्' – प.

५. 'एष य आत्मा' – प.

६. 'स्मृत्युक्तमत इति' – प.

७. 'श्रुतिस्मृत्युक्तत्वेऽपि' – प.

वाच्यम् । ब्रह्मणोऽचिन्त्यशक्तित्वादुपपत्तेः ॥

'गुणाः श्रुताः' (सौपर्णश्रुतिः) [1]**'यस्मिन् विरुद्धगतयः'** इत्यादिवचनाच्च । मम हृदये य **'आत्मा'** परमात्माऽस्ति । उपलक्षणमेतत् । सर्वहृदये च य आस्ते **'एषः'** हृदयस्थांशरूपो भगवान् **'ज्यायान्'** वृद्धतमः देशकालगुणैः पूर्ण इति श्रुत्यर्थः । उपनिषद्द्रष्टृऋषिवाक्यमेतत् ॥

[2]**('विरुद्धगतयोऽपि'** अन्यत्र भिन्नाश्रया अप्यणुत्वमहत्त्वादयो धर्माः यस्मिन् 'पतन्ति' वर्तन्ते च । न कालभेदेनेत्याह – **अनिशमिति ॥** मुक्तसाधारण्यमाशङ्क्याऽह – **विद्यादय इति ॥** यस्माद् विष्णोरन्यत्राणुत्वमहत्त्वादिविविधशक्तयो धर्माः । विद्या आदिः ज्ञप्तिकारणं येषां ते तथोक्ताः । ज्ञानज्ञेया इति यावत् । हरौ विरुद्धधर्मसत्त्वे प्रमाणमाह – **आनुपूर्व्येति ॥ 'आनुपूर्वी श्रुतिर्वेदत्रयी चाऽम्नाय उच्यते'** इत्यभिधानाच्छ्रुत्या सिद्धा इत्यर्थः । यच्छब्दस्य **'तद् ब्रह्माहं प्रपद्ये'** इति उत्तरवाक्यगततच्छब्देनान्वयः) ॥ ५ ॥

॥ इति दहराधिकरणम् ॥ ५ ॥

---

१. **'यस्मिन् विरुद्धगतयोऽप्यनिशं पतन्ति'**– प.

२. ( ) एतच्चिह्नान्तर्गतं प. पाठे नास्ति ।

॥ ६. अथानुकृत्यधिकरणम् ॥

(ज्ञानार्थमपेक्षितो भगवानेव, न ज्ञानिसुखम्)

अदृश्यत्वादयः परमेश्वरगुणा उक्ताः ।
तेषां सुखं शाश्वतं नेतरेषाम् ।
तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम्' *(कठ.५–१२,१४)*
इत्यादिना ज्ञानिसुखस्याप्यनिर्देश्यत्वमज्ञेयत्वं चोच्यत इति ॥

॥ ६. अथानुकृत्यधिकरणम् ॥

अत्राधिकरणे **'कथं नु तद् विजानीयाम्'** इति वाक्योक्तं ज्ञानार्थं ज्ञेयप्रार्थनाविषयत्वं वा **'कथं नु तद् विजानीयां किमु भाति** [१]' इति ब्रह्मज्ञानानुकूलाभिव्यक्त्याख्यभानप्रार्थनाविषयत्वरूपं वा आनुकूल्येन गृह्यमाणत्वं लिङ्गं ब्रह्मणि समन्वीयते । श्रुत्यादिसङ्गतिं विषयादिकं च सूचयन् सयुक्तिकं पूर्वपक्षं दर्शयति – **अदृश्यत्वादीति ॥ 'उक्ताः'** आनन्दमयाधिकरणे उदाहृता-दृश्य इति वाक्ये इति भावः । उक्ता इत्यनन्तरं तत्र प्रविष्टमिति शेषः ॥

प्रथमादिपदेनानिरुक्तत्वादेः, द्वितीयेन तु **'कथं नु तद् विजानीयां किमु भाति न भाति वा'** (कठ.५.१४) इति समन्वेतव्यलिङ्गबोधकोत्तरार्धस्य च ग्रहणम् । न केवलं विष्णोः, किन्तु ज्ञानिसुखस्यापीत्यपेरर्थः । एवार्थो वाऽपिशब्दः[२] आनुमानिकसूत्रगतापिपदवत् । **'अज्ञेयत्वं'** साकल्येनाज्ञेयत्वं दुर्ज्ञेयत्वमिति यावत् ॥

चशब्दः परस्परसमुच्चये, आनुकूल्येन गृह्यमाणत्वरूपसमन्वेतव्य-

१. **'किमु भाति न भाति वेति' – प.**
२. **'अपिशब्दः । यथोक्तमानुमानिकनये टीकायाम्-अपिरवधारण इति ॥'-प.**

लिङ्गसमुच्चये वा [१] । पूर्वश्रुत्यनुसाराददृश्यत्वादय इति, एतच्छ्रुत्यनुसारादनिर्देश्यत्वमिति व्युत्क्रमः ॥

यद्यपि **'तदेतदिति'** एतदेवोदाहर्तव्यम् । तथाऽपि पूर्वपक्षे तच्छब्दार्थप्रदर्शनाय **'तेषाम्'** इति पूर्ववाक्यैकदेशोपन्यासः । अत एव तत्त्वप्रदीपे तेषामिति प्रस्तुतिः पूर्वपक्षोत्थापिकेत्युक्तम् ।

तथा चेत्थं योजना – पूर्वमानन्दमयाधिकरणे येऽदृश्यत्वादयो गुणाः परमेश्वरस्योक्ताः । तत्र तेषु प्रविष्टमनिर्देश्यत्वमज्ञेयत्वं च **'तेषां सुखम्'** इति प्रकृत्याऽऽम्नातेन[२] **'तदेतत्'** इत्यादिना काठकवाक्येन पूर्वपक्षिरीत्या[३] समीपस्थात् तच्छब्दात् परामृष्टस्य **'ज्ञानिसुखस्यापि'** ज्ञानिसुखस्यैवोच्यत इति । पूर्वार्धेनानिर्देश्यत्वस्योत्तरार्धे च[४] **'किमु भाति न भाति'** इत्यनेन दुर्ज्ञेयत्वपर्यवसिताज्ञेयत्वस्य चार्थादुक्तत्वादिति भावः । [५]टीकायामदृश्यत्वपदस्यानिर्देश्यत्वपरत्वादनिर्देश्यत्वमिति पाठाभ्युपगमाद्वा न तद्विरोधः । अत्रानिर्देश्यत्वमज्ञेयत्वं चोच्यत इति फलोक्तिः[६], आनुकूल्येन गृह्यमाणत्वस्यैवात्र विचार्यत्वात् । तत्तु द्वितीयादिशब्दोपात्तवाक्येन चशब्देन वा सूचितमिति द्रष्टव्यम् । यत एवमतः पूर्वोक्तमयुक्तमिति भावः ॥

---

१. **'गृह्यमाणरूपसमन्वेतव्यसमुच्चये वा'** – प.
२. **'प्रकृत्य तेन'** – प.
३. **'पूर्वपक्षरीत्या'** – प.
४. **'उत्तरार्धेन'** – प.
५. **'अत्र टीकायाम् अदृश्यत्वमनिर्देश्यत्वपरम् । अनिर्देश्यत्वमिति पाठः स्वरसः'** । – प.
६. **'फलितोक्तिः'** – प.

अनेनाऽनन्दमयाधिकरणोक्ताद्दश्यत्वाज्ञेयत्वरूपस्यानिर्देश्यत्वानिरुक्तत्व-रूपस्य[1] च तत्रान्यत्र च सत्त्वे ज्ञानिसुखेऽतिव्याप्त्याक्षेपाद् [2]इतरमात्रनिष्ठत्वे त्वसम्भवाक्षेपात् फलतस्तेनास्याऽक्षेपिकी सङ्गतिरुक्ता भवति ॥

तथा चशब्दसूचितमानुकूल्येन गृह्यमाणत्वं विषयः । विष्णोरन्यस्य वेति सन्देहः । ज्ञानिसुखस्यैवेति पूर्वः पक्षः । तथा चानिर्देश्यत्वाज्ञेयत्वे च तस्यैवेति फलं, सुखश्रुतिः, प्रकृतत्वादिरूपयुक्तिश्च सूचिता भवति ।

अतो वक्ति –

सू–ॐ ॥ अनुकृतेस्तस्य च ॥ ॐ ॥२२॥

'तमेव भान्तमनुभाति सर्वम्' *(कठ -५-१५)* **इत्यनुकृतेः,**

'तस्य भासा सर्वमिदं विभाति' *(कठ.५.१५)*

इति वचनाच्च परमात्मैवानिर्देश्यसुखरूपः ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे – **अत इति ॥ 'इत्यनुकृतेः'** इत्यनुभान-श्रुतेरित्यर्थः । अनुभानं नाम तदिच्छानुरोधेन भानं क्रियाविशेषः । सूत्रे तस्येत्यस्यानुकृतेरित्यनेनापि सम्बन्धे तेनैवानुकरणप्रतिसम्बन्धिन आनुकूल्येन गृह्यमाणस्य तत्कर्तुः [3]सूर्यादितेजसश्च लाभो भवतीति स्पष्टत्वात् तदुभयानुक्तिः ॥

यद्वा – पूर्वसूत्रात् तदित्यस्य विपरिणतस्येहानुवर्तनादुभयलाभो भवतीत्याशयेन तदुभयानुक्तिः । न केवलं तस्येत्येतत् समन्वेतव्यानुकूल्येन

---

१. **'आनन्दमयाधिकरणोक्ताद्दश्यत्वस्य तत्रान्यत्र च'** – प

२. **'तन्मात्रनिष्ठत्वे त्वसम्भवाक्षेपात्'** – प.

३. **'सूर्यादितेजसोऽनुभानं भवतीति स्पष्टत्वात् तदुभयानुक्तिः'।** – प.

गृह्यमाणत्वाख्यलिङ्गधर्मिणः, सूर्यादितेजसश्च परामर्शकं, किन्तु श्रुति-प्रतीकरूपमपि सर्वजगत्प्रकाशकत्वपरं [१]चेत्याशयेन तद्धेत्वन्तरपरतया व्याचष्टे– **तस्येति** ॥ **'इति वचनात्'** इत्यनेन सूत्रे इत्युक्तेरिति शेषो दर्शितः ॥

यद्यपि सूत्रभाष्ययोः **'अनुभाति'** इति श्रुत्यनुसारादनुभानादिति वाच्यम् । तथाऽपि –

'[२]तापिनी पाचिनी चैव शोषिणी च प्रकाशिनी ।
नैव राजन् रवेः शक्तिः शक्तिर्नारायणस्य सा ॥'

इति ऐतरेयभाष्योदाहृतपाद्मवचनात् सूर्यादिकर्तृकप्रतपनादिकमपि परमात्माधीनमिति दर्शयितुमनुकृतेरित्युक्तम् । सूत्रे तदनुसारिभाष्ये च चशब्दो द्वितीयसूत्रस्य वक्ष्यमाणव्याख्यानभेदेन सर्वजगत्प्रकाशकत्वरूपोक्तहेतुसमुच्चये वा, सूर्याद्यप्रकाश्यत्वरूपानुक्तहेतुसमुच्चये वा द्रष्टव्यः । सूत्रे समन्वय-सूत्रादनुवृत्तस्य विधेयपरस्य तत्त्वित्यस्यार्थमाह – **परमात्मैवेति** ॥ न तु ज्ञानिसुखमित्येवशब्दार्थः ॥

लिङ्गसमन्वयेन भवत्फलं दर्शयति – **अनिर्देश्येति** ॥ अनिर्देश्यश्चासौ सुखरूपश्च इति वा, अनिर्देश्यं यत् सुखं तद्रूप इति वा विग्रहः । अत्र रूप-शब्दो भिन्नक्रमः । तथा चानिर्देश्यं परमं सुखं परमात्मरूपमित्यन्वयः [३]। एक इत्यादौ पुल्लिङ्गेन प्रकृतस्यैतदिति नपुंसकलिङ्गेन ग्रहणाय रूपशब्दप्रयोगः । उपलक्षणमेतत् । अनुग्राह्यश्चेत्यपि द्रष्टव्यम् ॥

वस्तुतस्तु – वचनाच्चेति शब्दस्य[४] सुखरूपश्चेत्यपि सम्बन्धे तेनैवाऽनु-

---

१. 'वेत्याशयेन' प.
२. 'तापनी पाचनी चैव शोषणी च' –प.
३. 'अनिर्देश्यरूपः परमात्मैवेत्यन्वयः' – प
४. 'चशब्दस्य'– प.

कूल्येन गृह्यमाणाख्यः साध्यधर्मी सूचित इति ध्येयम् ॥

यद्यप्यनिर्देश्यत्वमज्ञेयत्वं चेत्युपक्रमादुभयं ग्राह्यं, न त्वेकं, सुखरूपमिति चाधिकम् । तथाऽपि पूर्वपक्ष्युक्तसुखश्रुतेः सुखरूपे ब्रह्मणि सावकाशत्व-ज्ञापनाय **'तदेतत्'** इति वाक्योक्तमनिर्देश्यसुखरूपत्वमेव गृहीतम् । अज्ञेयत्वमपि द्रष्टव्यम् ॥

यद्यप्यत्र भाष्ये लिङ्गद्वयस्याऽनुकूल्येन गृह्यमाणस्य[१] वाऽनिर्देश्य-सुखरूपस्य वा विष्णुत्वे साध्ये साक्षाद्धेतुत्वं भाति । टीकायां तु – 'तदेतत्' इति श्रुतिस्थतच्छब्देन समीपोक्तज्ञानिसुखपरित्यागेन **'चेतनश्चेतनानाम्'** (कठ.-५.१३.) इति व्यवधानेन प्रकृतपरमात्मग्रहणे लिङ्गद्वयं हेतुत्वेन योजितम् । तथाऽपि हेतुद्वयेन तच्छब्देन ज्ञानिसुखपरित्यागेन परमात्मन एव ग्रहणसिद्धौ तत एव तच्छब्दगृहीतस्य परमात्मन एवानिर्देश्यसुखरूपत्वं पर्यवस्यतीत्याशयेन भाष्ये लिङ्गद्वयस्य प्रकृतसाध्यहेतुत्वेनोक्तिरित्यविरोधः ॥

केचित्तु – **'परमात्मैवानिर्देश्यसुखरूपः'** इति भाष्यमेवानुकृतिसूत्रे **'आनन्दमयोऽभ्यासात्'** इत्यादाविव समन्वेतव्यशब्दादेर्विष्णुपरत्व एव हेतुर्नोच्यते, किन्त्वनिर्देश्यं सुखमित्यत्र समीपोक्तज्ञानिसुखपरित्यागे हेतुरुच्यत इत्यत्र ज्ञापकं, टीकाऽपि तदनुसारिणीत्याहुः ॥

तथा चायं सिद्धान्ते श्रुत्यर्थः–

'एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीराः ॥' *(कठ. ५–१२.)*

इति पूर्ववाक्ये **'य एकः'** ज्ञानानन्दाद्यभिन्नः समाभ्यधिकशून्यो वा यः

---

१. **'गृह्यमाणत्वस्य'– प.**

सर्वमस्य वशेऽस्तीति **'सर्ववशी'** यः **'सर्वभूतान्तरात्मा'** सर्वप्राणिनामन्तर्नियामकः **'य एकं'** स्वस्वरूपं बहुधा करोति नियम्यानन्त्यात् । **'तं'** प्रकृतम् **'आत्मस्थं'** जीवहृदयस्थितं ये **'धीराः'** ज्ञानिनोऽनुपश्यन्तीति प्रकृता ये ज्ञानिनस्तेषामेव **'शाश्वतं सुखं'** नित्याभिव्यक्तसौख्यं नेतरेषाम् । अनेन [१] ब्रह्मसामर्थ्यमुक्तं भवति ॥

एवं **'नित्यो नित्यानाम्'** इति वाक्यमपि ब्रह्ममाहात्म्यपरतया व्याख्येयम् ॥

'तदेतत्' इत्यादिनाऽपि[२] प्रकृतभगवत्स्वरूपमेव विशेषतः प्रतिपाद्यत इति । मन्यन्त इत्यस्योत्तरत्रान्वयः । तथा च **'यतो वाचो निवर्तन्ते'** (तै.२.४.१) **'एषोऽस्य परम आनन्दः'** (बृ.६.३.३२) इत्यादौ प्रसिद्धम् अनिर्देश्यं परमं सुखं कथं नु तद् विजानीयामिति मन्यन्त इत्यानुकूल्येन गृह्णन्ति । ज्ञानार्थं तद्भानं [३] वा प्रार्थयन्ते । **'किमु भाति न भाति वा'** इति तस्य दुर्ज्ञेयत्वं च वदन्ति ज्ञानिनः । तद् ब्रह्मणो रूपं स्वरूपभूतं सुखमेतदेकं रूपं बहुधा यः करोतीति प्रकृतेश्वररूपाभिन्नमिति मन्यन्ते ज्ञानिन इति । एतच्छब्दस्येश्वरपरत्वेऽपि रूपशब्दसामानाधिकरण्यान्नपुंसकलिङ्गतोपपत्तिः । तदुक्तं न्यायविवरणे – **'यद् ब्रह्मानिर्देश्यं सुखमिति वदन्ति तदेतत्स्वरूपमिति मन्यन्त इति'** ॥

काठकभाष्ये तु – तद् **'गुह्यं ब्रह्म सनातनम्'** इत्युपक्रान्तम् । **'रूपं रूपं प्रतिरूपो बभूव'** (कठ.५.९) इति [४]जीवस्य प्रतिबिम्बत्वमुक्तम् ।

---

१. **'भगवत्सामर्थ्यम्'** – प.

२. प.पाठेऽपिशब्दो नास्ति ।

३. **.'तदा तद्भानं'** – प.

४. **'जीवाख्यप्रतिबिम्बानि, प्रतिबिम्बभूतं रूपशब्देन प्रकृतमेतत् ।'** – प.

रूपशब्देन प्रकृतमेतत् **'एकं रूपम्'** इत्यत्र प्रकृतं च भगवद्रूपम् **'अनिर्देश्यम्'** इत्थमिति साकल्येन निर्वक्तुमशक्यं परमं सुखमिति मन्यन्ते ज्ञानिन इति सुखरूपत्वविधिपरतया व्याख्यातम् । भाष्येऽप्यनिर्देश्यसुखरूपमित्येतावन्मात्रग्रहणेन श्रुतौ सुखरूपत्वं विधेयमिति सूचितम् ॥

[1]तदनिर्देश्यपरमसुखात्मकं भगवद्रूपं तत्प्रसादमृते किमु भाति न भाति वेति सम्यग् भाति न भातीति कथं न्वहं [2] जानीयामिति शिष्टवाक्यार्थस्तत्रैवोक्तः । विवृतं चैतद् व्यासतीर्थैये – 'तत्' अनिर्देश्यपरमसुखात्मकं भगवद्रूपं तत्प्रसादमृते किमु सम्यग् भाति ? न भाति वा ? इति प्रश्नस्योत्तरभूतम् एकं निश्चितार्थं[3] **'कथमहं विजानीयां'** न केनापि प्रकारेणेति । अत्रेतिशब्द उभयान्वयी । तथा च किमु भातीति प्रश्नस्योत्तरभूतं न भातीति [4]वाक्योक्तमेकमज्ञेयत्वरूपमर्थमिति योजना ॥

केचित्तु – यदेवं ब्रह्म तत्प्रसादमृते 'नु' इदानीं **'कथमहं विजानीयाम्'** [5]प्रार्थनायां लिङ् । न कथमपीत्यर्थः । ज्ञानिवाक्यानुकरणमेतत् । भगवत्प्रसादादपि किं साकल्येन तज्ज्ञानं भवतीति नचिकेता यमं पृच्छति – **किमु भातीति ॥** उशब्दः सम्यगित्यर्थे । किम्वित्येकं वा । तथात्वे सम्यगिति शेषः । उत्तरमाह यमः – **न भातीति ॥** वाशब्दोऽवधारणे । न भात्येवेति व्याख्याति ॥

---

१. 'अनिर्देश्यं परम-' – प.

२. 'कथं नु तद् विजानीयाम् इति विशिष्टवाक्यार्थः' – प.

३. 'निश्चितमर्थं' – प.

४. 'न भातीत्युक्तम् अज्ञेयरूपमर्थमिति योजना'– प.

५. 'प्रार्थनीयं लिङ्गम्'। – प.

न हि ज्ञानिसुखमनुभाति सर्वं, न च तद्भासा ।

ननु **'तमेव भान्तम्'** इति वाक्ये सूर्यादितेजसां परमात्माधीनप्रकाशकर्तृत्वस्य **'तस्य भासा'** इति वाक्ये च सर्वस्य जगतस्तत्प्रभाप्रकाश्यत्वस्य च श्रवणेनासिद्धिपरिहारे[१] कुतस्तयोर्विष्णुत्व-साध्येनाव्यभिचरितत्वम्, येन तल्लिङ्गद्वयबलात् समीपोक्तज्ञानिसुख-परामर्शपरित्यागः स्यादित्यत आह – **न हीति ॥** सर्वमित्युभयान्वयी । भातीति शेषः । तथा च **'हि'**[२] यस्मात् **'सर्वं'** सूर्यादितेजः ज्ञानिसुखमनुसृत्य **'न भाति'** न प्रकाशते । तथा **'तद्भासा'** तस्य ज्ञानिसुखस्य प्रकाशेन **'सर्वं'** जगत् **'न भाति'** न प्रकाशते चेत्यर्थः । वक्ष्यमाणप्रमाणविरोधादिति भावः । चशब्दः समुच्चये । अतो न लिङ्गद्वयमन्यत्रावकाशवदिति वाक्यशेषः ॥

'अहं तत् तेजो रश्मीत्'
इति नारायणभासा हि सर्वं भाति ॥ २२ ॥

अस्त्वेतदुभयं ज्ञानिसुखेऽनुपपन्नम् । तथाऽप्यनेन कुतः परमात्मनो ग्रहणं, अस्य परमात्मत्वसाध्यसामानाधिकरण्यानिश्चयादित्यतस्तत्र द्वितीयसूत्रस्थापिपदेन सूचितां श्रुतिमाह – **अहमिति ॥** [३]अहमितीत्यनन्तरं श्रुतेरिति शेषः । इतिशब्द आद्यार्थे । तेन **'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति'** (कठ.५.१५) इत्याथर्वणश्रुतिरपि गृह्यते । **नारायणेति ॥** नारायणाधीनभासेत्यर्थः । हिशब्दो यत इत्यर्थे, प्रसिद्धौ च । **'सर्वं'** सूर्यादितेजः **'भाति'** प्रकाशते ॥

---

१. **'-परिहारेऽपि'** – प.
२. **'हि यतः सर्वं सूर्यादितेजसः'** – प.
३. प. पाठेऽहम्पदं नास्ति ।

यद्वा – **'नारायणभासा'** नारायणीयभासा **'सर्वं'** जगत् **'भाति'** प्रकाश्यत इत्यर्थः । **'इति ज्ञायते'** इति शेषः । श्रुतौ **'रश्मीत्'** इत्यनेन सूर्यादितेजसां नारायणाधीनप्रकाशकर्तृत्वस्य, **'तेजः'** इत्यनेन सर्वस्य जगतो नारायणीय-प्रकाशप्रकाश्यत्वस्य चोक्तत्वादिति भावः ॥

'अहम्' इति, श्रुतिस्त्वन्तर्नये व्याख्याता ॥

[1]अनेन – तदुक्तमित्यतः सूत्रे तदित्यनुवर्तते । तस्येत्यावर्तते विपरिणम्यते च । असम्भवादिति चानुवर्तते । तथा च –

'तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम् ।
कथं नु तद्विजानीयाम् ॥' *(कठ. ५–१४.)*

इत्यानुकूल्येन गृह्यमाणं तदेतच्छब्दपरामृश्यं अनिर्देश्यं सुखं तत्तु विष्णुरूपमेव, न समीपोक्तज्ञानिसुखम् । कुतः ? **'तस्य'** सूर्यादितेजसः **'तस्य'** आनुकूल्येन गृह्यमाणस्य सुखस्य तस्मिन् **'तमेव भान्तम्'** इति **'अनुकृतेः'** अनुभानश्रवणात् [2]तस्यैतदधीनप्रकाशकर्तृत्वश्रवणादस्यान्य-तेजोनियन्तृत्वश्रवणादिति यावत् । तथा तस्य सर्वस्य जगतस्तस्य तत्प्रकाशप्रकाश्यत्वस्य **'तस्य भासा'** (कठ.५.१५) इति श्रुतावुक्तत्वात् तस्य सर्वजगत्प्रकाशकत्वोक्तेरिति यावत् । तस्य च लिङ्गद्वयस्य **'अहं तत्तेजः'** (चतुर्वेदशिखा.) इत्यादिश्रुत्या स्मृत्या च तस्मिन् विष्णावेव निश्चयेनोपपत्तेर्ज्ञानिसुखे च **'असम्भवात्'** अनुपपत्तेः । तथा तस्मिन्नुपसंहारे तस्याऽनुकूल्येन गृह्यमाणस्य **'न तत्र सूर्यो भाति'** इति वाक्ये तस्य सूर्याद्यप्रकाश्यत्वस्य चोक्तेश्चेति सूत्रार्थ उक्तो भवति ॥

---

१. **'व्यक्तम् अतोऽनेन'** – प.

२. **'तेषामेव तदधीनप्रकाशकर्तृत्वस्य श्रवणात्'** – प.

सू – ॐ ॥ अपि स्मर्यते ॥ ॐ ॥ २३ ॥

'यदादित्यगतं तेजो जगद् भासयतेऽखिलम् ।

यच्चन्द्रमसि यच्चाग्नौ तत् तेजो विद्धि मामकम् ॥'

(गी.१५.१२) **इति ।**

यदेतल्लिङ्गद्वयस्य विष्णुनिष्ठत्वम् **'अहम्'** इति श्रुत्योपपादितम् । तत्स्मृत्याऽप्युपपादयत्सूत्रं पठित्वा तां स्मृतिमुदाहरति – **अपीति ॥** इति स्मर्यत इत्यन्वयः । **'यत्'** आदित्यादिषु स्थितं तेजस्तत् **'मामकं'** मदधीनं मदीयं च, मत्तेज एवाऽदित्यादिषु प्रेरकत्वेनास्ति । तदेवाखिलं जगत् **'भासयते'** प्रकाशयतीति गीतास्मृत्यर्थः ॥

'न तद् भासयते सूर्यो न शशाङ्को न पावकः ।
यद् गत्वा न निवर्तन्ते तद् धाम परमं मम ॥'

(गी.१५.६) **इति च ॥ २३ ॥**

॥ इत्यनुकृत्यधिकरणम् ॥ ६ ॥

किं च काठके **'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः'** इत्याद्यानुकूल्येन गृह्यमाणस्य सुखस्य सूर्याद्यप्रकाश्यत्वमुच्यते । तच्च विष्णोरेव स्मर्यते, अतो विष्णुरेव **'तदेतत्'** इत्यत्र प्रतिपाद्यः, न ज्ञानिसुखमिति सूत्रस्यार्थान्तरमपिपदस्य युक्तिसमुच्चयार्थत्वं चाभिप्रेत्य तां स्मृतिमुदाहरति –**न तदिति ॥** अत्रापीतिशब्दस्य स्मर्यत[1] इत्यन्वयः । ज्ञानिनो **'यद्गत्वा'** यत्प्राप्य पुनस्तस्मान्न निवर्तन्ते, तन्मम परमं **'धाम'** स्वरूपं, तदेतद्धाम

१. 'इति स्मर्यते' – प.

सूर्यो **'न भासयते'** न प्रकाशयते, एवं चन्द्रः । यदा चैवं तदा कुतोऽयमवमोऽग्निरिति गीतास्मृत्यर्थः ॥

अनेन – पूर्वव्याख्याने न केवलमनुकृत्यादिः **'अहं तत्तेजः'** इति श्रुत्यन्तरे **'तमेव भान्तमनुभाति'** इत्याथर्वणादौ[1] विष्णुधर्मत्वेन श्रूयते, किन्तु यदादित्येति स्मर्यतेऽपीति श्रुतिसमुच्चयार्थेऽपिशब्दः । द्वितीयव्याख्याने तु **'तमेव भान्तमनुभाति'** इत्युत्तरवाक्योक्तानुकृत्यादिहेतोः **'न तत्र सूर्यो भाति'** इति पूर्ववाक्योक्तसूर्याद्यप्रकाश्यत्वहेतोश्च समुच्चयेऽपिशब्दः । तथा च न केवलं **'तदेतत्'** इत्यत्रोक्तानुकूल्येन गृह्यमाणस्य विष्णुत्वरूपप्रधानसाध्ये हेतूकृतमनुकृत्यादिकम् **'अहं तत्तेजो रश्मीत्'** इत्यादौ श्रूयते, किन्तु यदादित्येति स्मर्यतेऽपीति वा अपिः ॥

किञ्च – यतो न केवलं प्रथमसूत्रोक्तलिङ्गद्वयं, किन्तु ततोऽन्यदपि **'न तत्र'** इति काठकवाक्ये तस्याऽनुकूल्येन गृह्यमाणस्योक्तं सूर्याद्यप्रकाश्यत्वरूपं लिङ्गं तस्य विष्णोः सम्बन्धित्वेनैव **'न तत्'**[2] इति स्मर्यते । अतस्तदेतत् **'कथं नु तद् विजानीयाम्'** इत्यत्र विष्णुरेव प्रतिपाद्य इति वा सूत्रस्यार्थद्वयमुक्तं भवति ॥

'न तत्र' इत्यादेरयमर्थः । पूर्वं ब्रह्म न सम्यग् भातीति तस्य दुर्ज्ञेयत्वमुक्तं, तत्कुत इत्यतः इदमुच्यते – यस्यैवंविधं सुखं रूपं[3] **'तत्र'** ब्रह्मणि सूर्यो **'न भाति'** [4]तन्न प्रकाशयतीति यावत् । चन्द्रतारकमिति द्वन्द्वैकवद्भावः । एवं तत्र विद्युतोऽपि **'न भान्ति'** न भासयन्तीति ॥

---

१. **'आथर्वणादौ च'– प.**
२. **'सम्बन्धित्वेनैव तत् इति' – प.**
३. **'सुखरूपम्' – प.**
४. प.पाठे तदिति नास्ति ।

'तमेव भान्तम्' इत्युत्तरवाक्यं तु - यद्यपि व्यासतीर्थकृताथर्वण-टीकायाम् **'एतत्समाख्यारूपमाथर्वणवाक्यं' 'भान्तं'** भासयन्तं परमात्मानमनुसृत्यैव सूर्यादयो घटादिकं **'भान्ति'** भासयन्ति । तस्य परमात्मनो भासा **'सर्वमिदं'** जगत् **'भाति'** प्रकाशत इति व्याख्यातम् ॥ तथाऽपि टीकानुसारात् **'सर्वं'** सूर्यादितेजः **'भान्तं'** प्रकाशमानं भगवन्तमनुसृत्यैव **'भाति'** प्रकाशते । **'तस्य'** भगवतो **'भासा'** प्रकाशेन **'इदं सर्वं'** जगत् **'भाति'** प्रकाश्यत[१] इति व्याख्येयम् । व्यासतीर्थीयं तु व्याख्यानान्तरं टीकाकृदभिप्रेतं भविष्यतीति न तद्विरोधः ॥६ ॥

॥ इत्यनुकृत्यधिकरणम् ॥ ६ ॥

---

१. 'सम्यक् प्रकाश्यते' – प.

॥ ७. अथ वामनाधिकरणम् ॥

(ईशानशब्दवाच्यः परमात्मैव न वायुः)

विष्णुरेव जिज्ञास्य इत्युक्तम् । तत्र

'ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति ।

मध्ये वामनमासीनं विश्वे देवा उपासते ॥' *(कठ.५.३)*

इति सर्वदेवोपास्यः कश्चित् प्रतीयते ।

॥ ७. अथ वामनाधिकरणम् ॥

अत्राधिकरणे ईशाननामसमन्वयः[१] क्रियते । श्रुत्यादिसङ्गतिं विषयसंशयौ च सूचयति – **विष्णुरेवेति** ॥ जिज्ञासासूत्रे विष्णुरेव सर्वैर्मुमुक्षुभिर्मोक्षार्थं जिज्ञास्य इत्युक्तमित्यर्थः । न च तत्र जिज्ञास्यत्वायोगव्यवच्छेद एव कृतः, न त्वन्ययोगव्यवच्छेद इति वाच्यम् । अन्यस्यापि जिज्ञास्यत्वे तस्यापि मोक्षदातृत्वापत्त्या **'यतो नारायणप्रसादमृते'** इत्यादिविवरणानुपपत्तेरन्ययोगव्यवच्छेदस्यापि तत्राभिप्रेतत्वात् । अतोऽत्रैवकार उभयान्वयितया व्याख्येयः ॥

ततः किमित्यत आह – **तत्रेति** ॥ इदं चाऽवर्तते । तत्रेत्यव्ययं तदित्यर्थेऽपि । तथा च **'अथातो ब्रह्मजिज्ञासा'** इति यत् पूर्वं विष्णोर्जिज्ञास्यत्वमुक्तं **'तत्र'** जिज्ञास्यत्वे **'तत्र' 'ईशानो भूतभव्यस्य'** इत्युक्त्वा आम्नाते **'ऊर्ध्वम्'** इति काठकवाक्ये **'कश्चित्'** ईशानो धर्मित्वेन प्रतीयते । कथम् ? यतोऽयं **'सर्वदेवोपास्यः'** तैर्जिज्ञास्यः प्रतीयत अत इति वाक्ययोजना ॥

---

१. **'ईशाननाम्नः समन्वयः'** – प.

न च वायोः सर्वदेवोपास्यत्वेऽपि न विष्णोः सर्वदेवोपास्यत्वहानिरिति वाच्यम् । तावताऽपि सर्वैर्मुमुक्षुभिर्विष्णुरेव जिज्ञास्य इति नियमस्यासिद्धेः । न च श्रुतिगतविश्वेदेवशब्दस्य गणविशेषवाचित्वात् सर्वदेवोपास्य इत्युक्तिरनुपपन्नेति वाच्यम् । गणविशेषपरत्वे तस्य गुणाधिक्यासिद्ध्या सर्वदेवपरत्वावश्यम्भावात् ॥

अनेन – ईशानशब्दस्यान्यनिष्ठत्वाक्षेपमुखेन फलतो मुमुक्षुकर्तृकजिज्ञास्यत्वस्यान्यनिष्ठत्वाक्षेपाद् जिज्ञासाधिकरणेनास्याऽक्षेपिकी सङ्गतिरुक्ता भवति । तथेशानाख्यो विषयश्च सूचितः ॥

स च - 'एवमेवैष प्राण इतरान् प्राणान्
पृथक् पृथगेव सन्निधत्ते' *(प्रश्न. ३–४.)*
'योऽयं मध्यमः प्राणः' *(बृ. ३–५–२१.)*
'कुविदङ्ग' *(ऋ. ७–९१–१.)*
इत्यादिना प्राणव्यवस्थापकत्वान्मध्यमत्वात् सर्वदेवोपास्यत्वाच्च वायुरेवेति प्रतीयते ।

सयुक्तिकं पूर्वपक्षयति – **स चेति** ॥ अत्रेत्थं योजना – **'स च'** सर्वदेवोपास्यश्चेशानो वायुरेव भवेत्, न विष्णुः । कुतः ? अत्र प्राणव्यवस्थापकत्वश्रवणात् । तथा मध्यमत्वोक्तेः [1]सर्वदेवतोपास्यत्वोक्तेश्च । [2]न चैषां वाय्वेकनिष्ठत्वासिद्धिः । यतोऽयं वायुः **'एवमेवैष प्राणः'** (प्रश्न.३.४) **'योऽयं मध्यमः'** (बृ. ३–५–२१.) **'कुविदङ्ग'** (ऋ.७.९१.१) इत्यादिना वाक्येन [3]प्राणव्यवस्थापकत्वादिमान् प्रतीयते, अत इति [4] ॥

---

१. 'एवं सर्वदेव-' – प.
२. 'स प्राण-' – प.
२. 'न चैतेषां' प.
४. 'प्रतीयत इति' प.

काठके हि –

'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ।

ईशानो भूतभव्यस्य ॥' *(कठ.४.१२)*

इत्यनेन भगवतोऽङ्गुष्ठमात्रत्वं, पूर्णषड्गुणत्वं, देहमध्यस्थत्वं, भूतभविष्यद्वर्तमानेशानत्वमित्यादिमाहात्म्यमभिधायेशानपदोक्तस्य तस्यैव **'ऊर्ध्वम्'** इत्यादिना महिमान्तरमुच्यते । तत्र मध्यमशब्दः सिद्धान्ते ऊर्ध्वं प्रत्यक्छब्दसमभिव्याहाराद् देशविशेषवचनः, न त्ववान्तरेश्वरत्वादिरूपमध्यमत्वार्थकः ॥

तथा च यः प्राणाख्यरूपेण **'प्राणं'** प्राणाख्यवायुमूर्ध्वम् 'उन्नयति' उद्गमयति ऊर्ध्वगतिमत्तया प्रेरयति । अपानरूपी चापानाख्यं वायुं **'प्रत्यक्'** अधस्ताद् विण्मूत्रादिनिष्कासनहेतुतया **'अस्यति'** निरस्यति प्रेरयतीति यावत् । तं **'देहमध्ये'** हृदये **'आसीनम्'** उपविष्टं **'वामनं'** सौन्दर्यप्रधानाः स्त्रियो वामाः ताः नेतारं विष्णुं **'विश्वे देवाः'** सर्वे देवाः **'उपासते'** जिज्ञासन्त इति सिद्धान्तरीत्या श्रुत्यर्थः । पूर्वपक्षी त्विदं वायुपरं मत्वा मध्यशब्दो **'योऽयं मध्यमः'** इति श्रुत्यन्तरसमाख्यानान्मध्यमेश्वरत्ववचनो[1] न देशविशेषवचन इत्याह ॥

'एवम्' इति षट्प्रश्नवाक्यं च **'यथा सम्राडेवाधिकृतान् विनियुङ्क्ते एतान् ग्रामानधितिष्ठस्वेति'** इति दृष्टान्तवाक्येन सह व्याख्येयम् । तत्प्रकारस्तु – यथा **'सम्राट्'** सार्वभौमः अधिकृतान् नियोगिनोऽधिकृत्य विनियुङ्क्ते । कथम् ? त्वम् **'एतान्'** पाटलीपुत्रादीन् ग्रामान् **'अधितिष्ठस्व'** तदाधिपत्येन तिष्ठस्वेति । **'एवमेवैषः' 'आत्मत एष प्राणो जायते'** (प्रश्न.३.२.)

---

१. **'मध्यमस्थत्ववचनः'** – प.

इत्यात्मजातत्वेनोक्तो मुख्यप्राणः **'इतरान्'** भिन्नान् स्वजन्यत्वेनोपचारेणाऽत्मप्रविभागान् प्राणान् वायून् पृथक्स्थानेषु हृदयादिषु स्थापयतीति ॥

'योऽयम्' इत्यादि बृहदारण्यकवाक्यम् । तत्र हि पूर्वं वागादीनां मृत्युग्रस्तत्वमुक्त्वा **'अथैनमेव नाऽप्नोत्'** इत्यनेन मुख्यप्राणस्य तदनात्तत्वेन तेभ्यः[1] श्रैष्ठ्यमभिधाय **'योऽयम्'** इत्यनेन प्राणशब्दवाच्येषु विष्णुवायुतदितरेषु चेतनेषु त्रिषु विष्णोरुत्तमत्वादन्येषामधमत्वाद् वायोर्मध्यमत्वादस्मान्निमित्ताद्वा अवान्तरेश्वरत्वाद्वा मुख्यप्राणस्य सर्वोत्तमत्वरूपकाष्ठात्वाविरोधिमध्यस्थत्वमेवोच्यते, न तु मध्यदेशस्थत्वम् । तथा तत्रैव चतुर्थाध्याये **'अयं वाव शिशुः योऽयं मध्यमः प्राणः**[2] (बृ.४–२–१) इति चन्द्रिकोदाहृते वाक्ये स्थूलदेहाख्यविस्तृतप्रदेशगतलिङ्गशरीररूपगृहे विष्णुरूपायां स्थूणायाम् अन्नाख्येन श्रीरूपेण दाम्ना बद्धो गोवत्सरूपो वायुर्मध्यमत्वेनोच्यते ॥

'कुविदङ्ग नमसा ये वृधासः पुरा देवा अनवद्यास आसन् ।

ते वायवे मनवे बाधितायाऽवासयन्नुषसं सूर्येण ॥' *(ऋ.७–९१–१)*

इति ऋङ्मन्त्रे **'अङ्ग'** इति प्रियसम्बोधनम् । तथा च ये देवाः वायोः **'नमसा'** नमस्कारोपलक्षितसेवादिना **'वृधासः'** वृद्धा ज्ञानादिगुणपूर्णाः **'अनवद्यासः'** अनवद्याः अज्ञानरागाद्यवद्यविधुराश्च पुरा ससूर्या आसन् । ते **'कुवित्'** क्वचिद् रहस्यस्थाने सूर्येण साकं **'मनवे'** ज्ञानिने **'बाधिताय'** संसारक्लेशवह्निः शरणं प्राप्ताय 'वायवे' वायुमुद्दिश्य **'उषसम्'** उष प्रकाशे, असुन्, बुद्धिम् **'अवासयन्'** तद्विषयामकुर्वन्निति श्रुत्यर्थः ॥

अतोऽब्रवीत् –

---

१. 'तददनात् तेभ्यः' – प.

२. 'मध्यमः प्राणः' 'प्राणः स्थूणा' इति – प

सू – ॐ ॥ शब्दादेव प्रमितः ॥ ॐ ॥ २४ ॥

वामनशब्दादेव विष्णुरिति प्रमितः ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे – **अत इति ॥ 'वामनशब्दात्'** वामनश्रुतेः । एवकारो वायुलिङ्गसद्भावाद् वायुरेवेशानः किं न स्यादिति चोद्य-परिहाराय लिङ्गेभ्यः श्रुतेः प्राबल्यमाह । यथोक्तं सुधायाम् – [१]एवशब्द-व्याख्यानं बलवदिति **'शब्दादेव प्रमितः'** इति यथेति । समन्वयसूत्रादनुवृत्तस्य तदित्यस्यार्थो विष्णुरिति । विधेयभूतविष्णुत्वस्यान्वययोग्योद्देश्यद्योतनायेति-शब्दप्रयोगः[२] । आवर्तते चायम् । इतिशब्दात् परमपि एवशब्दो योज्यः । तेनानुवृत्तस्तुशब्दो व्याख्यातः[३]। तथा च **'ईशानो भूतभव्यस्य'** (कठ.४.१२) इति श्रुत ईशानो विष्णुरेव भवेत् । कुतः ? यस्तत्र प्रमितो विष्णावेव महायोगविद्बद्रूढिभ्यां प्रसिद्धो **'मध्ये वामनम्'** इति श्रुतो वामनशब्दस्तस्मादेवेति योजना । प्रमितपदं श्रुतेर्निरवकाशत्वसूचकम् । अनेन सूत्रे इतिशब्दोऽध्याहार्य इति सूचितम् । तथा च **'ईशानो भूतभव्यस्य'** इति श्रुत ईशानः **'तत्तु'** विष्णुरेव भवेत् । कुतः ? यस्तत्र विष्णावेव प्रमितो महायोग-विद्बद्रूढिभ्यां प्रसिद्धोऽन्यत्र निरवकाशो **'मध्ये वामनमासीनम्'** (कठ.५.३) इति श्रुतो लिङ्गात् प्रबलो वामनशब्दस्तच्छ्रुतिस्तस्मादिति सूत्रार्थः ॥

---

१. **'एवशब्दस्य व्याख्यानं' – प.**

२. **'-विष्णुत्वस्य प्रकारत्वद्योतनायेतिशब्दप्रयोग इति ।' – प.**

३. **'व्याख्यातः । स चेत्यस्यात्रापि सम्बन्धः । प्रमितपदं च श्रुतेर्निरवकाशत्व-सूचनार्थम् । तथा च स च सर्वदेवोपास्य ईशानो विष्णुरित्येव प्रमितो न वायुरिति । यद्वा, स ईशानशब्दो विष्णुरित्येव विष्णुवाचित्वेनैव प्रमितो न वायुवाचित्वेन । कुतः ? वामनश्रुत्याख्यशब्दपदादेवेति योजना । सूत्रे एवकारप्रयोगेन सूचितं' – प.**

न हि श्रुतेर्लिङ्गं बलवत् ।

सूत्रे एवकारप्रयोगेन सूचितं श्रुतेः प्राबल्यं लिङ्गस्य प्राबल्यनिषेधमुखेन दर्शयति – **न हीति** ॥ श्रुतेरिति पञ्चमी । हिशब्दो वक्ष्यमाणप्रमाण-विरोधादिति हेतुसूचकः । तथा च 'हि' यस्मान्न श्रुतेर्लिङ्गं बलवत्, किन्तु दुर्बलमेव । तस्माल्लिङ्गात् प्रबलाद्[1] वामनशब्दादेवेशानो विष्णुरेवेत्यर्थः ॥

'श्रुतिर्लिङ्गं समाख्या च वाक्यं प्रकरणं तथा ।
[2]पूर्वं पूर्वं बलीयः स्यादेवमागमनिर्णयः ।' इति स्कान्दे ।

कुतो न श्रुतेर्लिङ्गं बलवदित्यतस्तथा सति श्रुतेर्लिङ्गात् प्राबल्यवचनविरोधापत्तेरित्याशयेन तद्वाक्यं पठति – **श्रुतिरिति** ॥ इति स्कान्द इत्यनन्तरं वचनादिति शेषः । अस्य न हीत्यनेनान्वयः ।

वाचकशब्दः श्रुतिः । असाधारणधर्मो वा, तद्बोधकशब्दो वा लिङ्गम् । निर्णीतस्यान्यत्र समानोक्तिः[3] समाख्या । सा द्विविधा – अर्थतः शब्दतोऽपीति । समभिव्याहृतपदैरेवाऽकाङ्क्षापूर्तौ तच्छान्त्यर्थं पदान्तरनिरपेक्षाणि पदानि वाक्यम् । एकप्रमेयप्रतिपादकानेकवाक्यानि

---

१. 'प्रबलाद् अन्यत्र निरवकाशाद् वामनशब्दादेवेशानो विष्णुरित्येव प्रमितो न लिङ्गाद् वायुरिति योजना । अनेन सूत्रे शब्दादित्यस्य आवृत्तिः । तत्रैकस्य विपरिणामः । सौत्रेशानशब्दो वाऽनुषञ्जनीयः । इतिशब्दोऽध्याहार्य-स्तत्त्विति चानुवर्तते । तथा च शब्दादेव लिङ्गात् प्रबलादन्यत्र निरवकाशाद् वामनशब्दादेव ईशानशब्दस्तत्त्विति प्रमितो विष्णुवाचित्वेनैव निश्चितः । न तु दुर्बलाल्लिङ्गाद् वायुवाचित्वेनेति वा ईशानशब्दो विष्णुरित्येव प्रमित इति वा सूत्रार्थ उक्तो भवति ।' – प.

२. 'पूर्वपूर्वं' ह.

३. 'निर्णीतस्थले समानोक्तिः' – प.

प्रकरणम् । अनुक्तस्थानसमुच्चये तथेति शब्दः । अनेकप्रमेयप्रतिपादकमेकार्थतात्पर्ययुक्तं [१]वचनं स्थानम् । अत्र **'वाक्यं प्रकरणं स्थानं समाख्या च तथाविधा'** इत्यनुव्याख्यानुसारेण समाख्यायाः स्थानानन्तर्यमेव ग्राह्यं, न त्वत्रोक्तक्रमानुसारेण वाक्याद्यपेक्षया प्राथम्यम् । अत्रोक्तक्रमस्याविवक्षितत्वात् । उक्तं हि प्रमाणलक्षणटीकायां – समाख्यादित्वेन ग्रहणं **'श्रुतिर्लिङ्गं समाख्या च'** इत्यविवक्षितक्रमं वाक्यमनुसृत्येति ।

अत एव जैमिनिः –**'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये [२]पारदौर्बल्यमर्थविप्रकर्षात्'** इति स्मृत्युक्तादन्यथाक्रममाह ॥ **पूर्वं पूर्वमिति ॥** पूर्वोद्दिष्टमित्यर्थः[३]। एकत्र समवेतं विरुद्धमिति च शेषः । **'बलीयः'** अतिशयेन स्वभावतो बलवत् ॥

यथाऽत्रैवाधिकरणे अनन्तरोद्दिष्टलिङ्गापेक्षया पूर्वोद्दिष्टा[४] वामनश्रुतिः स्वतः प्रबला । वाक्यापेक्षया प्रबलं लिङ्गम् । यथा – दहराधिकरणे दहराकाशस्य साक्षात् सर्वाधारत्वप्रापकात् **'किं तदत्र विद्यते .... उभे अस्मिन् द्यावापृथिवी'** (छां.८.१.२,३) इति वाक्यात् प्रबलं विष्णोस्तत्प्रापकापहतपाप्मत्वादिकं लिङ्गम् । प्रकरणापेक्षया प्रबलं वाक्यम् । यथा – 'ज्योतिर्दर्शनात्' इत्यधिकरणे जीवस्य **'हृद्यन्तर्ज्योतिः'** (बृ.६.३.७) इति वाक्यबोध्यज्योतिष्त्वसाधकाज्जीवप्रकरणात् प्रबलं विष्णोर्ज्योतिष्त्वप्रापकं **'कतम आत्मा'** (बृ.६.३.७) इति प्रश्नवाक्यम् । स्थानापेक्षया प्रबलं

---

१. **'एकार्थे तात्पर्ययुक्तवचनं'** – प.
२. **'परदौर्बल्यम्'** – प.
३. **'पूर्वपूर्वोद्दिष्टमित्यर्थः'** – प.
४. **'पूर्वनिर्दिष्टा'** – प.

प्रकरणम् । यथा – [१]समग्रोपनिषद ईश्वरपरत्वसाधकात् षट्प्रश्नरूपस्थानात् प्रबलम् **'आत्मत एष प्राणो जायते'** (प्रश्न. ३.३) इत्येतत्खण्डरूपं मुख्यप्राण-प्रकरणम् । अत एवात्राधिकरणे षट्प्रश्नोक्तप्राणव्यवस्थापकत्वादीनां मुख्यप्राणलिङ्गत्वमुपेत्य श्रुत्या बाध उक्तः ॥

समाख्यापेक्षया प्रबलं स्थानम् । यथा – अन्नमयादिशब्दानां कोशपरत्वसाधकात् **'अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुध्यन्ताम्'** (याज्ञिकी. ६६.) इति नारायणानुवाकसमाख्यायाः प्रबलं तेषां विष्णुत्वसाधकं ब्रह्मपरानेकप्रकरणसन्दर्भरूपं स्थानम् । एतान्येव श्रुत्यादिनाऽर्थनिर्णयस्थलानि । आद्यया समाख्यया[२] निर्णेतव्यं यथा – पुरुषसूक्तसमाख्यया वैश्वानरस्य विष्णुत्वम् । द्वितीयया यथा – अम्भ्रिणीसूक्तसमाख्यया[३] विश्वकर्मसूक्तोक्तस्याजस्य विष्णुत्वम् ॥

अस्त्वेवं ततः किमित्यत आह – **एवमिति** ॥ विरुद्धैतेषां समवाये सति[४] प्रबलेन पूर्वेणोत्तरबाधे च सति **'आगमनिर्णयः'** आगमार्थस्य विप्रतिपन्नस्यैतैः निर्णयो भवतीत्यर्थः ॥

तच्च लिङ्गं विष्णोरेव । तस्यैव प्राणत्वोक्तेः
'तद्वै त्वं प्राणो अभवः' इति ॥ २४ ॥

नन्वस्तु श्रुतेः स्वभावतः प्राबल्यम् । तथाऽपि बाहुल्येन पूर्वपक्ष्युक्तलिङ्गानामपि प्राबल्यात् साम्येनानिर्णय एवेत्यत आह – **तच्चेति** ॥

---

१. 'समग्रोपनिषदि' – प.
२. 'अर्थतः समाख्यया' – प.
३. 'अम्भ्रणीसूक्तसमाख्यया' – प.
४. 'सति यथाऽऽगमार्थस्य' – प.

चस्त्वर्थः । लिङ्गमिति समुदायैकवचनम् । तथा च **'तत्'** पूर्ववाद्युक्तं लिङ्गजातं तु विष्णोरेव युक्तम्, न वायोरित्यर्थः । तथा च बाहुल्येऽपि लिङ्गानां सावकाशत्वात्तेभ्यः श्रुतेरेकस्या अपि निरवकाशायाः प्राबल्यान्नानिर्णय इति भावः । ननु न लिङ्गं विष्णौ सावकाशं, पूर्वपक्ष्युदाहृतसमाख्यारूपश्रुत्यन्तरेण तस्य प्राणनिष्ठतयैवोक्तत्वादित्यत आह – **तस्यैवेति ॥ 'तद्वै त्वम्'** इति श्रुतौ **'तस्य'** विष्णोः प्राणत्वस्य प्राणशब्दवाच्यत्वस्योक्तेरुक्तत्वादित्यर्थः ॥

एवं **'अत एव'** इत्यत्राऽध्यात्मिकाशेषशब्दस्य समन्वयं ब्रुवता तथा – **'शास्त्रदृष्ट्या'** इत्यत्रान्तर्यामिपरत्वं ब्रुवता सूत्रकारेणेतरव्यावृत्त्या[1] तस्यैव प्राणत्वोक्तेः साधितत्वादित्यपि व्याख्येयमेतत् । तथा च श्रुत्यन्तरे प्राण-निष्ठतया लिङ्गस्योक्तावपि न तद्विरोधः । तस्य प्राणस्य विष्णुत्वाभ्युपगमादिति भावः ॥

ननु तथाऽपि **'कुविदङ्ग'** इति ऋचि वायुनिष्ठतया लिङ्गोक्तेस्तद्विरोध इत्यस्यापीदमेवोत्तरम् । अस्मिन् पक्षे प्राणत्वमिति वायुत्वमुपलक्ष्यते । तथा चान्तर्नये आधिदैविकाशेषशब्दसमन्वयं ब्रुवता सूत्रकारेण **'तस्यैव'** विष्णोरेव **'प्राणत्वोक्तेः'** वायुशब्दवाच्यत्वरूपवायुत्वस्योक्तत्वादित्यर्थः । तथा च न तद्विरोधोऽपीति भावः । न च सिद्धान्तेऽपि स्थानापेक्षया प्रबलात् प्रकरणात् **'एवमेवैषः'** इति श्रुत्यन्तरगतप्राणशब्दस्य, तथा **'योऽयं मध्यमः'** (बृ.३.५.२१) [2]इत्यस्य, तथा **'कुविदङ्ग'** इति मन्त्रस्थवायुशब्दस्य मुख्यवायुपरत्वं, तत्रोक्तलिङ्गानामपि तत्परत्वमुपेत्य तेषां श्रुत्या बाधस्योक्तत्वात् कथं श्रुत्यन्तरस्थप्राणवायुशब्दयोः विष्णुपरत्वाङ्गीकारेण समाधानम् ॥

---

१. **'सूत्रकारेणैतदव्यावृत्त्या'** – प.

२. **'इत्यत्रत्यस्य'** – प.

अत एव चन्द्रिकायाम्– मध्यमशब्दोऽपि **'ऊर्ध्वं प्राणम्'** (कठ.२.२.३) इति प्राणस्य स्थानान्तरनिर्देशात् तत्त्यागेन मध्यमस्थानस्थब्रह्मपरः, न तु श्रुत्यन्तरे मध्यमशब्दोक्तप्राणपर इत्युक्तम् । अतः **'एवमेवैषः'** (प्रश्न.३.४) इति वाक्यं स्थानात् प्रकरणस्य प्राबल्ये उदाहृतमिति वाच्यम् । उक्तरीत्या मुख्यतः श्रुत्यन्तरगतप्राणशब्दादेर्ब्रह्मपरत्वेन लिङ्गानां तत्तदन्तर्यामिनिष्ठत्वेऽपि समाकर्षन्यायेनान्यपरत्वस्याप्यङ्गीकारात् । श्रुत्यन्तरोक्तलिङ्गानामन्य-निष्ठत्वेऽपि वा नानुपपत्तिः । न चैवं काठकोक्तलिङ्गाना-मप्यन्यनिष्ठत्वापत्त्याऽन्येषामीशानत्वाद्यापत्तिः । निरवकाशश्रुत्या काठकोक्त-लिङ्गानां विष्णुनिष्ठतानिर्णयोपपत्तेः ॥

ननु तथाऽपि कथमीशानो विष्णुर्भवेच्छ्रुतावीशानस्याङ्गुष्ठपरिमितत्वोक्तेः । सर्वगते च हरौ तदयोगात् । न च व्योमवत् सर्वगतस्याप्यणुत्वं युज्यत इति प्रतिपादितमिति वाच्यम् । तथाऽपि **'अङ्गुष्ठमात्रः'** इति तन्मात्रपरिमाणत्वोक्तेरयोगात् । न च **'अङ्गुष्ठमात्रः'** इत्यत्र श्रुतः परिमाणार्थको मात्रच्प्रत्यय एव, न त्ववधारणार्थको मात्रशब्दः । **'देहाङ्गुष्ठमितो देहे जीवाङ्गुष्ठमितो हृदि'** इति स्मृतौ मित इत्यनेन परिमाणस्यैवोक्तेः । तथा च नानुपपत्तिरिति वाच्यम् ॥

तथात्वेऽङ्गुष्ठमात्रत्वाभिधात्र्याम् **'अङ्गुष्ठमात्रः'**(कठ.४.१२) इति श्रुतौ **'मध्य आत्मनि'** इत्यस्य स्मृतौ हृदीत्यस्य च वैयर्थ्यापातात् । तन्मात्रपरिमितत्वोक्त्यर्थं हि तत्र हृदयरूपसूक्ष्मस्थानोक्तिः । तस्मादवधारणार्थकमात्रशब्द एवायमङ्गीकार्यः । उक्तं हि चन्द्रिकायाम् – मात्रशब्दस्यावधारणार्थकत्वादिति ॥

सू – ॐ ॥ हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥

॥ ॐ ॥ २५ ॥

सर्वगतस्यापि तस्याङ्गुष्ठमात्रत्वं हृद्यवकाशापेक्षया युज्यते ।

तथा च सर्वगते हरावङ्गुष्ठमात्रत्वोक्तिरनुपपन्नेति नात्रेशानो विष्णुरित्याशङ्कां परिहरत्सूत्रमुपन्यस्य तदक्षराणि व्याचष्टे – **हृदीति** ॥ सर्वगतस्यापीत्यनेन तुशब्दो यद्यपितथापीत्यर्थतया व्याख्यातः । हृद्यपेक्षयेत्यनेन सूचितहेतोरन्वययोग्यं साध्यं दर्शयति – **तस्येति** ॥ योजना तु – यद्यपि विष्णुः सर्वगतस्तथापि **'तस्याङ्गुष्ठमात्रत्वम्'** अङ्गुष्ठमात्रत्वोक्तिर्युज्यते । कथम् ? यतो **'हृद्यवकाशापेक्षया'** हृदि विद्यमानो योऽयमवकाशोऽङ्गुष्ठपरिमितदेशस्तदपेक्षया तत्राभिव्यक्ततावत्परिमितभगवन्मूर्तिविशेषमपेक्ष्य तस्य विष्णोरङ्गुष्ठमात्रत्वम् अस्त्यत इति ॥

यद्वा – **'हृद्यवकाशापेक्षया'** हृदि विद्यमानावकाशमपेक्ष्य तत्सम्बन्धात् तस्याङ्गुष्ठमात्रत्ववचनं युज्यत इत्यावृत्तिं विना योजना । प्रथमपक्षे शक्त्याऽपरिमितेऽपि भगवति मूर्तिविशेषे व्यक्त्यात्मनाऽङ्गुष्ठमात्रत्वं मुख्यमिति भावः । द्वितीयपक्षे तु स्थानहृदयाकाशगतस्याङ्गुष्ठमात्रत्वस्य [1]स्थानिनि ब्रह्मणि तत्सम्बन्धादुपचारेणोक्तिरिति भेदः । अत्र टीकायां हृद्यवकाशापेक्षयेति भाष्यं सावधारणं कृत्वा सौत्रतुशब्दोऽवधारणतया[2] व्याख्यातः । तेन विष्णोरङ्गुष्ठमात्रत्वं हृद्यपेक्षयैव, न तु लोकवत् परिच्छिन्नत्वादित्युक्तं भवति । तत्तत्स्थानेषु व्यक्तमूर्तिविशेषापेक्षया [3]वोपचारेण वा तत्तत्परिमाणत्वोक्त्या **'यस्त्वेतमेव प्रादेशमात्रम्'** (छां.५.१८.१) इति छान्दोग्ये **'प्रादेशमात्रं पुरुषम्'** इत्यन्यत्र **'प्रादेशः पुरुषोत्तमः'** इत्यपरत्र च हृद्गतस्य विष्णोः प्रादेशपरिमितत्वोक्तेः । **'अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः'**

---

१. **'स्थानानि'** – प.

२. **'अवधारणार्थतया'**-प.

३. **'वोपचारत्वोक्त्या यस्त्वेतमेवं प्रादेशमात्रं'** – प.

(महाना.१६.३) इति श्रुत्यन्तरे '[१]**अङ्गुष्ठमात्रः पुरुषः**' इति कठवल्यां च '**अङ्गुष्ठमात्रः पुरुषः**' इत्यपरत्र चाङ्गुष्ठपरिमितत्वोक्तेः '**अङ्गुष्ठाग्रप्रमाणकः**' इति क्वचिदङ्गुष्ठाग्रप्रमाणकत्वोक्तेर्विरोध इति चोद्यं परिहृतं भवति । देहे हृदयाकाशे प्रादेशपरिमितिरूपविशेषस्य हृदयगतकमलकर्णिकामूलगताकाशेऽङ्गुष्ठाग्र-प्रमाणकरूपान्तरस्य कर्णिकाग्रगताकाशे चाङ्गुष्ठपरिमितरूपान्तरस्य च व्यक्तिसम्भवात्, तत्तत्स्थानधर्मस्य स्थानिन्युपचरितत्वसम्भवाच्च ॥

यथोक्तं बृहदारण्यकभाष्ये –

'[२]**हृदये सर्वशो व्यापी प्रादेशः पुरुषोत्तमः ।**
जीवानां स्थानमुद्दिष्टः सर्वदैव सनातनः ॥
हृत्कर्णिकामूलगतः सोऽङ्गुष्ठाग्रप्रमाणकः ।
मूलेश इति नामास्मिन् सर्वे जीवाः प्रतिष्ठिताः ॥
अङ्गुष्ठमात्रे पुरुषे कर्णिकाग्रस्थिते हरौ ।
प्रविशन्ति सुषुप्तौ तु प्रबुध्यन्ते ततस्तथा ॥' इति ॥

अस्मिन् मूलेशव्यापिनोर्मध्येऽङ्गुष्ठमात्रत्वं च देहे देहाङ्गुष्ठमितत्वं जीवहृदि जीवाङ्गुष्ठमितत्वमिति विवेक्तव्यम् । अत्र '**अङ्गुष्ठं च समाश्रितः**' इत्यनेन [३]कर्मेन्द्रियाधिष्ठितत्वमुच्यत इति प्रमेयदीपोक्तमपि[४] ज्ञातव्यम् ॥

ननु '**दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः**' इत्यादि-वचनाज्जाग्रदाद्यवस्थाप्रेरकविश्वतैजसप्राज्ञानां दक्षिणाक्ष्यादिषु सत्त्वं तावत्

१. 'अङ्गुष्ठमात्रे' – प.
२. 'हृदयेऽपि च स व्यापी' –प.
३. 'कर्मेन्द्रियाधिष्ठातृत्वम्' – प.
४. -दीपोक्तमिति ज्ञातव्यम्'–प.

सिद्धम् । यदि चैवं तदा जीवोऽपि जाग्रदवस्थायां[१] दक्षिणाक्षिस्थः स्वप्ने [२]कण्ठदेशस्थः सुप्तौ तु हृदयस्थो भवति, 'हृदयस्थात् पराञ्जीवो दूरस्थो जाग्रदेष्यति' इत्युक्तेः । दूरस्थोऽक्षिस्थो जाग्रज्जाग्रत्त्वमिति तस्यार्थः । तथा च कथं हृदयव्याप्तप्रादेशपरिमितभगवद्रूपस्य सर्वदा जीवस्थानत्वम् ? कथं च हृत्कर्णिकामूलगतभगवद्रूपे सदा प्रतिष्ठितो जीवः ? सुप्तौ हृत्कर्णिकाग्रगते हरौ प्रविशतीत्युक्तिरिति[३] चेत् । न –

यतः सर्वदा हृदि स्थितमेव जीवस्वरूपं जागरितादावक्ष्यादिष्वपि विशेषसन्निहितं दीपप्रकाशवदित्यङ्गीकृतम् । यथोक्तमैतरेयभाष्ये – हृदि स्थितमेव तस्य रूपं जागरितेऽप्यक्ष्यादिषु विशेषसन्निहितं भवतीति । एकस्यैव जीवस्य स्थापनधृत्याख्यप्रतिष्ठापनसुप्तिप्रापणाख्यप्रयोजनभेदादेकदेहेऽनेकधा[४] स्थितानां भगवन्मूर्तीनां शक्त्या सर्वगानामपि तत्र व्यक्त्यात्मनाऽनेकाल्पपरिमाणवत्त्वं च युज्यत इति न काचिदनुपपत्तिः ॥

इतरप्राणिनामङ्गुष्ठाभावेऽपि
मनुष्याधिकारत्वान्न विरोधः ॥२५॥

॥ इति वामनाधिकरणम् ॥ ७ ॥

ननु तथाऽपि नाङ्गुष्ठपरिमाणवत्त्वं[५] विष्णोर्युक्तम् । तथा हि । किं तत्तदङ्गुष्ठमात्रत्वं वा यत्किञ्चिदङ्गुष्ठमात्रत्वं वा । नाऽद्यः पश्वादीना-

१. 'जाग्रदाद्यवस्थायाम्' – प.
२. स्वयमेव कण्ठदेशस्थः'– प.
३. 'इत्युक्तमिति चेत्' – प.
४. 'एकदेहानेकधा' – प.
५. '-ङ्गुष्ठपरिमाणत्वं' – प.

मङ्गुष्ठाभावेन तदन्तर्गतस्य विष्णोरङ्गुष्ठपरिमितत्वायोगात् । न द्वितीयः । अङ्गुष्ठमात्रत्वोक्तेस्तैस्तैस्तथोपासनार्थत्वेन तस्य चाङ्गुष्ठव्यक्तिविशेषनिर्धारणं विनाऽयोगेन यत्किञ्चिदङ्गुष्ठमात्रत्वोक्तेर्व्यर्थत्वात् ।[१]पिपीलिकादिहृदयस्थेऽङ्गुष्ठमात्रत्वसामान्यस्याप्यसम्भवाच्चेत्याशङ्कां परिहरन् **'मनुष्याधिकारत्वात्'** इति सूत्रशेषं तुशब्दस्य काकाक्षिन्यायेनात्राप्यन्वयं तस्याप्यर्थत्वं चाभिप्रेत्य तत्सम्बन्धिप्रदर्शनपूर्वकं व्याचष्टे – **इतरेति ॥** पश्वादीनामित्यर्थः ॥

अपिरावर्तते । अङ्गुष्ठमात्रत्वमित्येतद् विपरिणामेनानुवर्तते । **'न विरोधः'** इति विरोधसूत्रादाकृष्टे पदे । तथा च **'अपि'** तत्तदङ्गुष्ठपरिमितत्वाङ्गीकारेऽपीतरप्राणिनामङ्गुष्ठाभावेऽपि न विष्णोरङ्गुष्ठमात्रत्वस्य विरोधेनाङ्गुष्ठमात्रत्वोक्तेरसम्भवः । कुतः ? अङ्गुष्ठमात्रत्वोक्तेरेतद्विद्याया **'मनुष्याधिकारत्वात्'** मनुष्यानधिकृत्य [२]प्रवृत्तत्वात् । तदपि कुतः ? वेदविद्योपासनस्य **'मनुष्याधिकारत्वात्'** मनुष्यमात्राधिकारंत्वादिति योजना ॥

सूत्रे भाष्ये च मनुष्याणामधिकारो यस्मिन्, अथवा – [३]अधिक्रियतेऽत्रेत्यधिकार उपासनं शास्त्रं[४] वा, मनुष्याणामेव अधिकारो मनुष्याधिकारस्तस्य [५]भावस्तस्मादिति विग्रहः । **'मनुष्याधिकारित्वात्'** इति पाठे मनुष्या अधिकारिणो यस्मिन् तत् तथोक्तम् । तथा च मनुष्याधिकारिकत्वादित्यर्थः ॥

मनुष्यपदं च वक्ष्यमाणन्यायेन मननादिशीलचेतनपरम् । तेन देवानां

---

१. 'पिपीलिकादिहृदयस्य' – प.
२. 'प्रवर्तमानत्वात्' – प.
३. 'यस्मिन् अर्था अधिक्रियन्त इत्यधिकारः'-प.
४. 'शास्त्रे वा' – प.
५. 'तस्य भावस्तत्त्वं तस्मादिति' – प.

[१]जरितार्यादीनां वक्ष्यमाणन्यायेन वेदविद्याधिकारिणामेतद्विद्याधिकारसिद्धिः । तत्र जरितार्यादीनां[२] स्वस्वाङ्गुष्ठपरिमितत्वेन भगवदुपासनाऽसम्भवात्, तेषामेतद्विद्योत्पन्नवाक्यार्थज्ञान एवाधिकारो, नोपास्तावपि । अत एव टीकायां मनुष्याणामेव वेदविद्योपासनाधिकारित्वेनेति मनुष्यत्वं व्यापकत्वेनोक्तम् । न चानधिकारिणां पश्वादीनां [३]देहस्थितस्य भगवतोऽङ्गुष्ठपरिमितत्वाभावे परिमाणान्तरानुक्तेरद्रव्यत्वापत्तिरिति वाच्यम् । पश्वादिदेहगतस्य परमात्मनः [४]तत्तदाकारयुक्तत्वेन तदनुसारिपरिमाणवत्त्वात् । यथोक्तमैतरेयभाष्ये –

'सङ्कर्षणश्च प्रद्युम्नस्तदाकारौ नृषु स्थितौ ।
नारायणानिरुद्धौ तु पश्वाकारौ पशुस्थितौ ॥' इति ॥

अनेन – सूत्रे तुशब्दोऽप्यर्थेऽवधारणे च । तत्राप्यर्थस्योभयत्रान्वयः । अङ्गुष्ठमात्रत्वं युज्यत इति शेषः । तदिति प्रधानसूत्रादनुवृत्तस्येह विपरिणामेनान्वयः । न विरोध इत्यस्याऽकर्षः । **'तस्य मनुष्याधिकारित्वात्'**[५] इत्यावर्तते । तथा च **'तु'** अपि सर्वगतस्यापि **'तस्य विष्णोरङ्गुष्ठमात्रत्वं'** तदुक्तिर्युज्यते ॥ न च विरोधः । यतोऽत्र **'हृद्यपेक्षया तु'** हृद्यवकाशापेक्षयैवाङ्गुष्ठमात्रत्वमुच्यते[६], न तु परिच्छिन्नत्वात् । तच्च मूर्तिविशेषे तन्मात्रत्वस्य सत्त्वादुपचारेण वा युज्यते ॥

न च नाङ्गुष्ठमात्रत्वं विष्णोर्युक्तं, यत्किञ्चिदङ्गुष्ठमात्रत्वोक्ते-

---

१. 'जरितर्यादीनां' – प.
२. 'जरितर्यादीनां' – प.
३. 'देहे स्थितस्य' – प.
४. 'तदाकारयुक्तत्वेन' – प.
५. '-धिकारत्वात्' – प.
६. -मात्रत्वं युज्यते' – प.

व्यर्थत्वेनासम्भवेन च तत्तदङ्गुष्ठमात्रत्वे वाच्ये तस्य च पश्वादीनामङ्गुष्ठाभावेन तदन्तर्गतविष्णावयोगादिति वाच्यम् । यतः 'तु' अपि इतरप्राणिनामङ्गुष्ठाभावेऽपि न विष्णोस्तत्तदङ्गुष्ठमात्रत्वस्य **'विरोधः'** असम्भवः । कुतः ? अङ्गुष्ठमात्रत्ववचनस्य तद्बोधकविद्यायाः **'मनुष्याधिकारत्वात्'** मनुष्यानेवाधिकृत्य प्रवृत्तत्वात् । तदपि कुतः ? **'तस्य'** वेदविद्योपासनस्य **'मनुष्याधिकारत्वात्'** मनुष्यमात्रेऽधिकारत्वादिति सूत्रार्थ उक्तो भवति ॥

॥ इति वामनाधिकरणम् ॥ ७ ॥

॥ ८.अथ देवताधिकरणम् ॥

(देवानां वेदविद्याधिकारप्रतिपादनम्)

मनुष्याणामेव वेदविद्याधिकार[१] इत्युक्तम् ।

॥ ८. अथ देवताधिकरणम् ॥

अस्मिन्नधिकरणे देवानां ब्रह्मविद्याधिकारः समर्थ्यते । प्रासङ्गिकत्वान्नाध्यायपादसङ्गती मार्गणीये । श्रुत्यादिसङ्गतिविषयसंशयतद्बीजानि दर्शयति – **मनुष्याणामिति** ॥ **'उक्तं'** पूर्वसूत्रे । तुशब्दार्थावधारणस्य समासप्रविष्टमनुष्यपदेनापि सम्बन्धोऽस्तीति भावेन मनुष्याणामेवेत्यनुवादः । नेतरेषामित्येवशब्दार्थः । **'वेदविद्याधिकारः'** वेदविद्योपासनाधिकारः ॥

अनेन– देवताधिकाराभावमुखेन **'विश्वे देवा उपासते'** इत्यादिपूर्वोदाहृतश्रुत्युपलक्षिताशेषश्रुतिप्रामाण्यस्याऽक्षेपात् पूर्वाधिकरणेनास्याऽक्षेपिकी सङ्गतिः वेदविद्याधिकाराख्यो विषयश्चोक्तो भवति ॥

'अङ्गुष्ठमात्रः' इति श्रुतिमूलायाः **'मनुष्याणामेव'** इत्युक्तेः **'विश्वे देवा उपासते'** (कठ.२.२.३) इति श्रुतेश्च कोटिद्वयोपस्थापकत्वेन सन्देहबीजत्वात् तदुक्त्यैव देवानामधिकारोऽस्ति उत नास्तीति [२] संशयः, नास्तीति पूर्वपक्षश्च सूचितः ॥

तिर्यगाद्यपेक्षयैव मनुष्यत्वविशेषणमुक्तं,
न तु देवाद्यपेक्षयेत्याह–

---

१. 'वेदविद्यायामधिकारः' ह.
२. 'नास्त्युतास्तीति संशयः' – प.

ततः किमित्यतः संशयबीजं विघटयन् सिद्धान्तयितुं सूत्रमवतारयति – **तिर्यगादीति** ॥ विशिष्टबुद्ध्यादिरहिततिर्यगादिव्यावृत्त्यर्थमित्यर्थः । मनुष्यत्व-विशेषणं सावधारणत्वेनाभिप्रेतम् । मनुष्यपदम् **'उक्तं'** प्रयुक्तं, तत्रेति शेषः । पूर्वसूत्र इति तदर्थः । स्वप्रयुक्तैवकारव्यावर्त्यं दर्शयति – **न त्विति** ॥ **'देवाद्यपेक्षया'** देवादिव्यावृत्त्यर्थम् । तुशब्दो विशेषार्थः । न तु देवाद्यर्थमपीत्यपिशब्दार्थो वा । **'इत्याह'** इत्यभिप्रेत्य सूत्रकारो देवानामधिकारभावमाहेत्यर्थः ॥

सू – ॐ ॥ तदुपर्यपि बादरायणः सम्भवात् ॥ ॐ ॥ २६ ॥

तदुपरि मनुष्याणां सतां देवादित्वप्राप्त्युपरि ।
सम्भवति हि तेषाम् । विशिष्टबुद्ध्यादिभावात् ।

तत्सूत्रं पठति – **तदुपरीति** ॥ अत्र तदुपरीति साध्यधर्मिसूचकं पदमनूद्य तेषां तस्मात् तस्या इति विग्रहाश्रयेण व्याचष्टे – **तदुपरीति** ॥ वेदविद्याधिकार इत्यनुषज्यते । न केवलं मनुष्याणां सतां, किन्तु तदुपर्यपीत्यपेरर्थः ॥ तथा च **'तेषां'** मनुष्याणां सतां देवतापदयोग्यानां जीवानां पदप्राप्तेः पूर्वं मनुष्यशरीरं प्राप्तानां सतां 'तस्मात्' मनुष्यत्वात् 'उपरि' [१]मनुष्यशरीरापगमेन 'तस्या उपरि' देवोपदेवादिपदप्राप्तेरुपरितनकालेऽपि देवभावमापन्नानामपि वेदविद्याधिकारोऽस्त्येवेति योजना ॥

कुत इत्यतस्तद्धेतुतया सम्भवादिति हेतुं [२]व्याचष्टे । **'हि'** यतः ।

---

१. **'मनुष्यशरीरागमेन'** – प.

२. **'कुत इत्यतः सम्भवादिति पदं तद्धेतुतया व्याचष्टे – सम्भवतीति ॥'** प.

'वेदविद्याधिकारः' [1]इत्यत्रापि सम्बध्यते । **'तेषां'** देवानाम् । अधिकार-सम्भवोऽपि कुत इत्यतोऽत्रापि सम्भवादित्येतदेवाऽवृत्त्य हेतुतया योजयति – **विशिष्टेति** ॥ तेषामित्यत्राप्यन्वीयते । तथा च **'तेषां'** योग्यमनुष्याणां विद्याकर्मभ्यां देवादित्वप्राप्तिमतां **'सम्भवात्'** विशिष्टबुद्ध्यादिभावादर्थग्रहणा-नुष्ठानोपयुक्त[2]बुद्धिविशेषादिसद्भावादित्यर्थः । अर्थित्वसामर्थ्ये आदिपदेन ग्राह्ये । न चार्थित्वाभाव इत्यत्रापि तेषां सम्भवति हीत्येव हेतुः । विद्याभिस्तेषां मोक्षसिद्धिः सम्भवति हीति तदर्थः ॥

अनेन – सूत्रे तदित्यावर्तते । मनुष्यपरामर्शि चेदं[3] बुद्धिस्थपरामर्शि च। अपिः समुच्चये । अधिकार इति बुद्ध्या विविच्यात्रान्वेति । अनधिकाराधि-काराभिधायकजैमिनिबादरायणोक्तिरूपविप्रतिपत्तिसूचनाय बादरायणपदम् । तत्त्वप्रदीपरीत्या तात्पर्यज्ञापनार्थमधिकाराधिक्यज्ञप्तिदार्ढ्यार्थं च बादरायणः स्वयमेव वक्तीत्याह – इति वा । सम्भवादिति चाऽवर्तते ॥

तथा च यतो न केवलं देवादिपदयोग्यजीवानां पदप्राप्तेः पूर्वं भूमौ किञ्चित्कालं मनुष्याणां सतां तस्यां दशायामेवाधिकारः, किन्तु **'तदुपर्यपि'** तस्मान्मनुष्यत्वादुपरि तदत्ययेन ताभ्यां विद्याकर्मभ्यां तस्याः देवादित्व-प्राप्तेरुपरितनकालेऽपि देवभावमापन्नानामपि वेदविद्यायामधिकारोऽस्त्येव [4]। न च तत्कारणाभावः । **'सम्भवात्'** अधिकारोपयोगिनो विशिष्टबुद्ध्यादेस्तेषु सम्भवात् । न च देवादीनां विशिष्टबुद्धिसामर्थ्यसद्भावेऽप्यर्थित्वा-भावादधिकाराभाव इति वाच्यम् । कुतः ? 'सम्भवात्' विद्यासाध्यज्ञान-

---

१. .'इत्यपि' – प.

२. '-पयुक्तेर्बुद्धि-'– प.

३. **'चेदम्'** इति पदद्वयं प. पाठे नास्ति ।

४. **'अस्त्येवातो न विष्णोः सर्वदेवोपास्यत्वासम्भवः'** – प.

मोक्षयोरर्थित्वसम्भवादिति भगवान् बादरायणो मन्यत इति सूत्रार्थ उक्तो भवति ॥

तिर्यगादीनां तदभावादभावः ।
तेषामपि यत्र [१]विशिष्टबुद्ध्यादिभावस्तत्राविरोधः ।

ननु न देवा वेदविद्याधिकारिणः, तथा सति सूत्रेऽमनुष्यमात्रव्यावर्तकमनुष्यपदप्रयोगेण तिर्यगादिवदमनुष्यत्वान्न देवा वेदविद्याधिकारिण इत्यनुमानसूचनात् [२]तद्विरोधापत्तेरित्यत आह – **तिर्यगादीनामिति** ॥ [३]आदिपदेन स्थावराणि मूढमनुष्या वा गृह्यन्ते । **'तदभावात्'** विशिष्टबुद्ध्यादेरभावात् 'अभावः' तस्य वेदविद्याधिकारस्य । अनेनाधिकाराभावे विशिष्टबुद्ध्यादिराहित्यस्य प्रयोजकत्वोक्त्या परोक्ता-मनुष्यत्वहेतोः[४] सोपाधिकत्वं सप्यव्यतिरेकसाधकोपाधिव्यतिरेकाख्य-प्रतिपक्षग्रस्तत्वं चोक्तं भवति । सौत्रमनुष्यपदं च मननादिशीलपरं सद् विशिष्टबुद्ध्यादिरहितमेव चेतनं व्यावर्तयति, न तु मर्त्यभिन्नमात्रमिति न तद्विरोध इति भावः ॥

ननु विशिष्टबुद्ध्यादिराहित्यमुपाधिः । तिर्यक्षु अधिकाराभाव-रूपसाध्याव्यापकत्वात् । अत एव न तदभावोऽपि साध्यव्यतिरेकहेतुरित्यत आह – **तेषामपीति** ॥ अपिरुभयत्रान्वेति । तत्राऽद्यः समुच्चये । अधिकार इति शेषः । तथा च न केवलं देवानां, किन्तु **'तेषां'** तिरश्चामप्यधिकारेऽपि न विरोधः ॥

---

१. 'बुद्ध्यादिभावः' ह.
२. 'तद्विरोध इत्यतः' – प.
३. 'आदिपदेन वर्णावरमूढमनुष्याः'प.
४. 'परोक्तमनुष्यत्वहेतोः'– प.

ननु कथमविरोधस्तिर्यक्षु सर्वत्र वेदाधिकारे मानविरोधापातादित्यत आह – **तेषामपीति** ॥ तिरश्चां मध्येऽपीत्यर्थः । **'यत्र'** येषु विशिष्टबुद्ध्यर्थित्वाख्यरागादिभावः[1] तत्सत्त्वं तत्रैवाधिकारे **'अविरोधः'** मानाविरोधः । बाधो न सर्वत्रेत्यर्थः । अनेनापिना सौत्रोऽपिशब्दो जरितार्यादिसमुच्चायकश्चेति सूचितम् । यदाह तत्त्वप्रदीपिकाकारः – **'तेषामपीत्यादिरपिपदव्याख्या'** इति ॥

आनन्दमालाकारोऽपि – **'तिर्यञ्चोऽपि केचिदपिशब्दगृहीताः'** इत्याह । तथा च मनुष्यभिन्नेष्वपि तिर्यक्ष्वधिकारसद्भावाद् व्यभिचारादधिकाराभावे नामनुष्यत्वं हेतुः, किन्तु विशिष्टबुद्ध्यादिराहित्यमेवाव्यभिचारात् । अतो भवत्येव स उपाधिः । अत एव सौत्रमनुष्यपदस्य व्यावर्त्यसङ्कोचोऽपि युक्त इति भावः ॥

निषेधाभावात् । दृश्यन्ते हि जरितार्यादयः ॥ २६ ॥

ननु कथं तिरश्चामप्यधिकारेऽप्यविरोधः । तेषामधिकारनिषेधस्य तद्दर्शनस्य वा विरोधित्वादित्याशङ्क्य नाऽद्य इत्याह – **निषेधेति** ॥ तेषामित्यत्रापि सम्बध्यते । अधिकारे इत्यादौ संयोज्यम् । तेन निषेधराहित्ये सति विशिष्टबुद्ध्यादिमत्त्वमेवाधिकारे प्रयोजकम्, न केवलं येन शूद्रादौ व्यभिचारः स्यादिति सूचितम् । न द्वितीय इत्याह – **दृश्यन्ते हीति** ॥ वेदाधिकारितयेति शेषः । हिशब्दो भारतादिप्रसिद्धिसूचकः । अत एव भारते –

'एवमुक्तो भ्रातृभिस्तु जरितारिर्विभावसुम् ।
तुष्टाव प्राञ्जलिर्भूत्वा यत् तच्छृणु नराधिप ॥'

---

१. 'विशिष्टबुद्धिरर्थित्वाख्यरागादिभावः'– प.

इत्यादिना जरितारिसारिसृक्कस्तम्बमित्रद्रोणाख्येषु पक्षिषु मध्ये जरितारिरग्रजः स्वभ्रातृभिरस्मान् मोचयेति प्रार्थितः **'अयमग्ने जरिता'** (ऋ.१०.१४२.१) इत्याग्नेयसूक्तेनाग्निं स्तुत्वा खाण्डववनदहने स्वभ्रातॄनग्नि-दाहादमोचयदिति प्रतिपादितम् ॥

यत इत्यर्थे [१]वा हिशब्दः । अत्र **जरितार्यादय** इत्येव पाठो युक्तः, न तु **जरितर्यादय** इति ह्रस्वयुक्तपाठः, भारतविरोधात्, तत्त्वप्रदीपविरोधाच्चेति ध्येयम् ॥

दृश्यन्ते हीत्यनेन – देवा वेदविद्याधिकारिणः निषेधराहित्ये सति विशिष्टबुद्ध्यादिमत्त्वात् तादृशमर्त्यवदिति सिद्धान्त्यभिमतानुमाने मनुष्यत्वोपाधिर्निरस्तो भवति । जरितारौ आदिशब्दगृहीतसारिसृक्कादौ च साध्याव्यापकत्वात् ॥

सू – ॐ ॥ विरोधः कर्मणीति
चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥ ॐ ॥ २७ ॥

मनुष्या एव देवादयो भवन्तीति तदुपरीत्युक्तम् । तत्र यदि मनुष्याः सन्तो देवादयो[२] भवन्ति तत्पूर्वं देवताभावाद् देवतोद्दिष्टकर्मणि विरोध इति चेत्,

देवानां वेदविद्याधिकारसिद्ध्यर्थं तदुपरीत्यनेनोक्तं सादित्वमाक्षिप्य समादधत्सूत्रं पठित्वाऽऽक्षेपांशं तावद् व्याचष्टे – **विरोध इति ॥ मनुष्या एवेति** । देवादिपदयोग्या जीवाः पूर्वं भूमौ किञ्चित्कालं मनुष्याः सन्त एव

१. 'इत्यर्थे च हिशब्दः' – प.
२. 'देवाः' ह.

ननु कथमविरोधस्तिर्यक्षु सर्वत्र वेदाधिकारे मानविरोधापातादित्यत आह – **तेषामपीति** ॥ तिरश्चां मध्येऽपीत्यर्थः । **'यत्र'** येषु विशिष्टबुद्ध्यर्थित्वाख्यरागादिभावः[1] तत्सत्त्वं तत्रैवाधिकारे **'अविरोधः'** मानाविरोधः । बाधो न सर्वत्रेत्यर्थः । अनेनापिना सौत्रोऽपिशब्दो जरितार्यादिसमुच्चायकश्चेति सूचितम् । यदाह तत्त्वप्रदीपिकाकारः – **'तेषामपीत्यादिरपिपदव्याख्या'** इति ॥

आनन्दमालाकारोऽपि – **'तिर्यञ्चोऽपि केचिदपिशब्दगृहीताः'** इत्याह । तथा च मनुष्यभिन्नेष्वपि तिर्यक्ष्वधिकारसद्भावाद् व्यभिचारादधिकाराभावे नामनुष्यत्वं हेतुः, किन्तु विशिष्टबुद्ध्यादिराहित्यमेवाव्यभिचारात् । अतो भवत्येव स उपाधिः । अत एव सौत्रमनुष्यपदस्य व्यावर्त्यसङ्कोचोऽपि युक्त इति भावः ॥

निषेधाभावात् । दृश्यन्ते हि जरितार्यादयः ॥ २६ ॥

ननु कथं तिरश्चामप्यधिकारेऽप्यविरोधः । तेषामधिकारनिषेधस्य तद्दर्शनस्य वा विरोधित्वादित्याशङ्क्य नाऽद्य इत्याह – **निषेधेति** ॥ तेषामित्यत्रापि सम्बध्यते । अधिकारे इत्यादौ संयोज्यम् । तेन निषेधराहित्ये सति विशिष्टबुद्ध्यादिमत्त्वमेवाधिकारे प्रयोजकम्, न केवलं येन शूद्रादौ व्यभिचारः स्यादिति सूचितम् । न द्वितीय इत्याह – **दृश्यन्ते हीति** ॥ वेदाधिकारितयेति शेषः । हिशब्दो भारतादिप्रसिद्धिसूचकः । अत एव भारते –

'एवमुक्तो भ्रातृभिस्तु जरितारिर्विभावसुम् ।
तुष्टाव प्राञ्जलिर्भूत्वा यत् तच्छृणु नराधिप ॥'

---

१. **'विशिष्टबुद्धिरर्थित्वाख्यरागादिभावः'**– प.

इत्यादिना जरितारिसारिसृक्कस्तम्बमित्रद्रोणाख्येषु पक्षिषु मध्ये जरितारिरग्रजः स्वभ्रातृभिरस्मान् मोचयेति प्रार्थितः **'अयमग्ने जरिता'** (ऋ.१०.१४२.१) इत्याग्नेयसूक्तेनाग्निं स्तुत्वा खाण्डववनदहने स्वभ्रातॄनग्नि-दाहादमोचयदिति प्रतिपादितम् ॥

यत इत्यर्थे [1]वा हिशब्दः । अत्र **जरितार्यादय** इत्येव पाठो युक्तः, न तु **जरितर्यादय** इति ह्रस्वयुक्तपाठः, भारतविरोधात्, तत्त्वप्रदीपविरोधाच्चेति ध्येयम् ॥

दृश्यन्ते हीत्यनेन – देवा वेदविद्याधिकारिणः निषेधराहित्ये सति विशिष्टबुद्ध्यादिमत्त्वात् तादृशमर्त्यवदिति सिद्धान्त्यभिमतानुमाने मनुष्यत्वोपाधिर्निरस्तो भवति । जरितारौ आदिशब्दगृहीतसारिसृक्कादौ च साध्याव्यापकत्वात् ॥

सू – ॐ ॥ विरोधः कर्मणीति
चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥ ॐ ॥ २७ ॥

मनुष्या एव देवादयो भवन्तीति तदुपरीत्युक्तम् । तत्र यदि मनुष्याः सन्तो देवादयो[2] भवन्ति तत्पूर्वं देवताभावाद् देवतोद्दिष्टकर्मणि विरोध इति चेत्,

देवानां वेदविद्याधिकारसिद्ध्यर्थं तदुपरीत्यनेनोक्तं सादित्वमाक्षिप्य समादधत्सूत्रं पठित्वाऽऽक्षेपांशं तावद् व्याचष्टे – **विरोध इति ॥ मनुष्या एवेति** । देवादिपदयोग्या जीवाः पूर्वं भूमौ किञ्चित्कालं मनुष्याः सन्त एव

१. 'इत्यर्थे च हिशब्दः' – प.
२. 'देवाः' ह.

अथ देवादयो भवन्तीत्यर्थः । न तु मनुष्यभावं विनेत्येवशब्दार्थः । **इत्युक्तमिति** ॥ अत्रोक्तमित्यनन्तरं तदयुक्तमिति शेषः ॥

कुत इत्यतस्तत्पक्षे बाधकोक्तिपरं विरोध इत्यंशं सहेतुकं व्याचष्टे – **तत्र यदीति** ॥ यदीत्यारभ्य भवन्तीत्यन्तं पूर्ववाक्यार्थानुवादस्तस्याऽपादकत्व-प्रदर्शनार्थः । तत्रेत्यव्ययं तर्हीत्यर्थकं[1] भवन्तीत्यतः परं योज्यम् ॥

यद्वा, मनुष्या एव देवादयो भवन्तीत्युक्त्या प्राप्ताभेदशङ्कां वारयितुं मनुष्या एवेत्यादिस्वपदानि वर्णयति – **तत्रेति** ॥ तत्र देवतोद्दिष्टकर्मणीति सामानाधिकरण्यम् । अत्र पक्षे यदीति श्रवणात् तर्हीति लभ्यते । भवन्तीत्यनन्तरमित्युक्तमित्यस्ति । उभयत्राऽदिपदेनोपदेवादयो गृह्यन्ते । कर्मपदं शब्दस्याप्युपलक्षकम् ॥

तथा च **यदि** पूर्वं मनुष्याः **सन्तोऽप्यथ**[2] **देवादयो भवन्तीत्युक्त-**मित्युच्यते, तर्हि **'तत्पूर्वं'** तेभ्यः पूर्वं तेषां देवादिपदप्राप्तेः पूर्वं साधकत्वावस्थायां **'देवताभावात्'** देवतायाः असत्त्वाद् येन कर्मणा देवादित्वं साध्यमित्युक्तम्, **'तत्र'** तस्मिन्नेव **'देवतोद्दिष्टकर्मणि'** पूर्वकल्पे देवतोद्देशेन प्रवृत्तकर्मणि देवतावाचकशब्दे च **'विरोधः'** तयोर्वैयर्थ्यमिति योजना । उद्देश्याभावाद् वाच्याभावाच्चेति भावः ॥

न । अनेकेषां देवतापदप्रतिपत्तेर्दर्शनात् ।
'ते ह नाकं महिमानः सचन्ते ।
यत्र पूर्वे साध्याः सन्ति देवाः' *(तै.आ.३.१२)* **इति ॥ २७ ॥**

परिहारांशं व्याचष्टे – **नेति** ॥ इदं चाऽवर्तते । योजना तु – न कर्मणि

---

१. **'तर्हीत्यर्थे'** – प.
२. **'अप्यथ'** – इति प. पाठे नास्ति ।

विरोधः, कुतः ? यतो न पूर्वं देवताभाव इति । तेषां प्रवाहतोऽनादित्वेनै-तद्देवानां पूर्वमभावेऽपि देवतान्तरसद्भावादिति भावः । न च प्रमाणाभाव इत्यतः प्राप्तमनेकेत्यंशं प्रतिपत्तिशब्दस्य ज्ञानार्थत्वभ्रमं वारयन् [१]तत्सम्बन्धि-प्रदर्शनपूर्वकं व्याचष्टे – **अनेकेषामिति ॥ 'ते ह नाकम्'** (तै.आ.३.१२) इति श्रुतौ **'अनेकेषाम्'** एकैकगणशोऽनन्तानां देवत्वादियोग्यमनुष्याणां विद्या-कर्मभ्यां पूर्वपूर्वदेवतापदप्राप्तेर्**दर्शनादि**त्यर्थः ॥

अनेन तदुपरीत्यत्रोक्तं[२] देवानां सादित्वमयुक्तं, तथा सति येन कर्मणा देवादित्वं साध्यमित्युक्तम्, तत्र कर्मणि शब्दे च विरोधस्तस्य वैयर्थ्यं स्यात्, तत्पूर्वं देवताभावादिति चेत्, न । यतो न पूर्वं देवताऽभावः । तत्कथम् एतद्देवानां पूर्वमभावेऽपि देवान्तरसद्भावात् । न च तत्र मानाभावः[३]। **'अनेकप्रतिपत्तेर्दर्शनात्'** अनेकेषां योग्यमनुष्याणां पूर्वपूर्वपदप्राप्तेः **'ते ह नाकम्'** इत्यत्रोक्तत्वादिति सूत्रार्थ उक्तो भवति ॥

श्रुतौ -**'यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन्'** [४]इति पूर्ववाक्ये प्रकृताः देवास्तच्छब्देन गृह्यन्ते । हशब्दः पुनरर्थे प्रसिद्धौ वा ॥

तथा च ये **'देवाः'** देवत्वयोग्याः मनुष्या ज्ञानकर्मात्मकेन **'यज्ञेन' 'यज्ञं'** विष्णुम् **'अयजन्त'** अपूजयन् । ततस्तेन ज्ञानपूर्वककर्मणा देवपदं[५] प्राप्य **'प्रथमानि'** प्रथमाः मुख्याः **'धर्माणि'** धर्माः लोकधारका आसन् । **'महिमानः'** महात्मानः महिमगुणात्मका वा । **'ते'** देवाः **'ह'** पुनः अनन्तरं स्वाधिकारा-

---

१. 'तत्सम्बन्ध-' – प. २. '-रीत्यनेनोक्तं' – प.

३. 'प्रमाणाभावः' – प.

४. इत्यत्र पूर्ववाक्ये प्रकृता देवाः 'ते ह नाकं महिमानः सचन्त यत्र पूर्वे' इत्यत्र तच्छब्देन गृह्यन्ते । – प.

५. 'स्वपदं' – प.

वसाने **'नाकं'** कं सुखं तदन्यत् दुःखमकं, तन्नेति नाकं, नञ्द्वयेन पूर्णसुखात्मकमिति लभ्यते । एवम्भूतं मोक्षं **'सचन्ते'** आप्नुवन् । लङर्थे लट् । लङ् वा, एत्वाडभावौ छान्दसौ । **'यत्र'** मोक्षे **'पूर्वे'** पूर्वकल्पे मुक्ताः **'साध्याः'** बहुवचनमाद्यर्थे ॥

'ऋजवो ब्रह्ममुख्या हि सुपर्णः शेष एव च ।
सरस्वती सुपर्णी च वारुणी साध्यनामकाः ॥'

इत्युक्ताः साध्यादयो देवाः सन्तीति श्रुत्यर्थः ॥

न च वसुरुद्रादित्यमरुत्साध्येषु वसूनामादित्वाट्टीकायां वस्वादिदेवा इति वक्तव्यम्, न तु साध्यादीति । अत एव तत्त्वप्रदीपे **'पूर्वे साध्याः वस्वादयो देवाः पूर्वसिद्धा मुक्ता वा'** इत्युक्तमिति वाच्यम् । साध्यशब्दितानां प्राधान्येन क्रमोल्लङ्घनात् । छन्दोगश्रुतिक्रमानुसारेण तत्त्वप्रदीपप्रवृत्तेः। न चैवं व्याख्याने पुरुषार्थाधिकरणेऽस्याः [१]प्राप्तपददेवतापरत्वेनोदाहरणानुपपत्तिरिति वाच्यम् । ये पदं प्राप्य जगद्धारका अभूवन् ते देवा यज्ञेन यज्ञमयजन्त ते ह नाकं मोक्षगतातिशयं सचन्ते इति श्रुतेरर्थान्तरविवक्षया तदुपपत्तेस्तदनुसारेण तट्टीकायां व्याकरणस्याप्युपपत्तेश्च ॥

सू – ॐ ॥ शब्द इति चेन्नातः प्रभवात्

प्रत्यक्षानुमानाभ्याम् ॥ ॐ ॥ २८ ॥

'वाचा विरूप नित्यया' *(ऋ.८.६४.६)*

[२]**इत्यादिश्रुतेरास्यनिश्चयान्नित्यत्वापेक्षत्वाच्च मूलप्रमाणस्य ।**

---

१. 'प्राप्तपददेवताविषयत्वेन' – प. २.'इति श्रुतेः' ह.

यद् देवानामधिकारसिद्ध्यर्थम् आद्यन्तवत्त्वमुक्तं तदुपर्यनेकेत्याभ्यां [१], तदाक्षिप्य समादधत्सूत्रं पठित्वाऽऽक्षेपांशं तावद् व्याचष्टे – **शब्द इति ॥** अनेकप्रतिपत्तेर्दर्शनान्न विरोध इत्याद्यनुषज्यते । यदितर्ह्योरप्यनुषङ्गः । तथा चेत्थं योजना – यद्यनेकेषां पूर्वपूर्वमुत्त्या देवतापदप्राप्तेर्दर्शनान्न कर्मणि विरोध इति उच्यते, तर्हि तत्रैव शब्दे[२] दर्शनपदोक्ते वेदेऽप्रामाण्याख्यो विरोधः स्यात् । कुतः ? देवानामनित्यत्वात् । अनेकेत्यादिना देवानामनित्यत्वस्यान्तवत्त्वस्योक्तत्वात् । ननु देवानामनित्यत्वेऽपि वेदानामप्रामाण्यं कुत इत्यतः – **तदुदितानामित्याह** । हेतुगर्भविशेषणमेतत् । अनेनानित्यदेववाचकत्वादिति हेतुः सूचितः ॥

ननु देवानामनित्यत्वेऽपि न तद्वाचकवेदस्य वाच्यहीनत्वरूपाप्रामाण्यं प्रसज्यते, देववद् वाचकवेदस्याप्यनित्यत्वेन कदाऽपि वाच्यहीनत्वाभावादित्यत उक्तम् – **वेदस्य नित्यत्वादिति ॥** वेदस्य नित्यत्वमेव कुत इत्यत उक्तं – **वाचेति ॥** श्रुतेरित्यस्य वेदस्य नित्यत्वादित्यनेनान्वयः । ज्ञानोपलक्षकं चैतत् । आदिशब्देन **'नित्ययाऽनित्यया'** (पौष्यायणश्रुतिः) **'नित्या वाव श्रुतिः'** इत्यादिकं गृह्यते ॥

ननु न नित्यो वेदः । न च श्रुतिविरोधः, श्रुतेर्बहुकालीनत्वरूपनित्यत्वार्थकत्वेनोपचरितार्थत्वादित्यतोऽप्याह । तथा सति वेदस्यानित्यत्वादप्रामाण्याख्यविरोधः स्यादिति । ननु वेदस्यानित्यत्वेऽप्याप्तिमूलत्वेन प्रामाण्यं सम्भवतीत्यत आह – **आप्तनिश्चयादिति ॥** वेदकर्तुरिति शेषः । तथा च कर्तुः सार्वज्ञादौ मानाभावेन वेदकर्तुः सार्वज्ञादिरूपाप्तनिश्चयादित्यर्थः ॥

अस्तु वा कर्तर्याप्तिनिश्चयः, तथाऽपि न वेदे तन्मूलत्वनिश्चय इत्याह[१] –

---

१. **'अनेकेषामित्याभ्यां'** – प. २. **'शब्दे'** इति प. पाठे नास्ति ।

३. **'इत्यत आह'** – प.

आप्त्यनिश्चयादिति ॥ वेदस्येत्याकृष्यते [१]। तथा च वेदस्याऽप्तप्रणीतत्व-रूपाप्तिमूलत्वानिश्चयादित्यर्थः । तस्मान्मानाभावेनाऽप्तितन्मूलत्वानिश्चयाद् वेदानित्यत्वे तत्प्रामाण्याभावापत्तेः न नित्यत्वश्रुतेरुपचरितार्थत्वं वाच्यमिति भावः । न केवलं श्रुतेर्वेदनित्यत्वसिद्धिः, किन्तु परिशेषानुमानादपीत्याह – **नित्यत्वेति** ॥ मूलप्रमाणस्य नित्यत्वापेक्षत्वाद् वेदस्य नित्यत्वाव-गमादित्यन्वयः ॥

अयं भावः – प्रामाण्यसिद्ध्यर्थं वेदस्याऽप्तप्रणीतत्वे मूलप्रमाणेन भाव्यं, पौरुषेयस्य मूलप्रमाणसापेक्षत्वनियमात् । अन्यथाऽनाश्वासाद् यज्ञादेः पुण्यसाधनतादिबोधकं वेदमूलं[२] च भवत् प्रत्यक्षानुमानयोरसम्भवात् परिशेषाद् वाक्यमेवेति वाच्यं, तस्य चानित्यतामुपेत्य मूलान्वेषणेऽनवस्थापत्त्या नित्यत्वमेव वाच्यं, ततो वरं वेदस्यैव नित्यत्वाङ्गीकरणं, श्रुतिसिद्धत्वादिति ॥

स्वतः प्रामाण्यप्रसिद्धेश्च नित्यत्वाद् वेदस्य तदुदितानां देवानामनित्यत्वात् ।

ननु यथा वेदानित्यत्वे[३] आप्त्यनिश्चयात् प्रामाण्याभावापत्तिर्बाधिका, तथा तस्य नित्यत्वेऽप्याप्तोक्तत्वरूपगुणजन्यत्वाभावेन प्रामाण्याभावापत्तिरिति समं बाधकमित्यत आह – **स्वत इति** ॥ वेदस्येत्यनुवर्तते । तथा च **'वेदस्य'** वेदजन्यज्ञानगतयाथार्थ्यरूपप्रामाण्यस्य **'स्वत एव'** ज्ञानसामान्यकारणादेव **'प्रसिद्धेः'** उपपत्तेः प्रमितत्वादित्यर्थः ॥

यद्वा – वेदगतयथार्थज्ञानकरणत्वरूपकरणप्रामाण्यस्य **'स्वत एव'** ज्ञानकरणत्वसहजशक्त्यभिन्नयथार्थज्ञानजनकत्वशक्तिरूपत्वेनैव प्रमितत्वादि-

---

१. 'वेदस्येत्यावर्तिष्यते' – प. २. '–बोधकवेदमूलं च' – प

३. 'वेदादिनित्यत्वे' – प.

त्यर्थः । अस्यापि वेदस्य नित्यत्वसम्भवादित्यनेनान्वयः । तथा च वेदस्य नित्यत्वस्य[१] सिद्धत्वात् तद्वाच्यदेवानामनित्यत्वे वाच्यहीनत्वरूपाप्रामाण्यापत्तिरिति भावः ॥

पुनरन्यभावनियमाभावाच्च शब्दे विरोध इति चेत्,

नन्वतीतकल्पे एकदेवताऽभावे देवतान्तरसद्भावाद् यथा कर्मण्युद्देश्याभावनिमित्तो विरोधो नास्ति, तथाऽत्राप्येकदेवतानाशेऽपि पुनरन्यदेवतोत्पत्तिसम्भवान्न वाच्यहीनत्वाख्यो विरोध इत्यत आह – **पुनरन्यभावनियमाभावाच्चेति ॥** [२]पूर्वकल्पीयनाशानन्तरमित्यानन्तर्यार्थे पुनश्शब्दः । उत्तरकल्प इत्यर्थे वा । अन्यभावः अन्योत्पत्तिः । तस्य नियमे प्रमाणाभावादित्यर्थः । अतीतदेवताप्रवाहे तु प्रमाणमस्तीति वैषम्यमिति भावः ॥

अनेनोत्तरकाले देवताभावविरोधः कर्मण्यपि समान इति सौत्रशब्दशब्देन कर्माप्युपलक्षणीयमित्युक्तं भवति । न चैवमत्रापि विरोधपदाकर्षणमिति टीकाविरोधः । **'तदुपरि'** इति सूत्रादपेरनुकर्षोक्तेः[३] तस्य च न केवलं शब्दे उत्तरकाले देवताभावविरोधः, कर्मण्यपीत्येतदर्थकत्वादिति वाच्यम् । आकर्षणशब्दस्यान्वयार्थत्वमाश्रित्य न केवलं पूर्वसूत्रे विरोधपदान्वयः, किन्त्वेतत्सूत्रेऽपीति टीकार्थाङ्गीकारेण[४] अपिविरोधपदयोराकर्षणमित्यर्थानभ्युपगमात् । अस्तु वा द्वन्द्वः, तथाऽपि नानुपपत्तिः, अपेः स्वरूपनित्यत्वाभावेऽपीत्यर्थाभ्युपगमेन कर्मसमुच्चयार्थत्वानभ्युपगमात् । अत एव टीकायां देवानां स्वरूपनित्यत्वाभावेऽपीत्युक्तिः । अत्र नित्यत्वसाधकयोः श्रुत्यनुमानयोः समुच्चये एकश्चशब्दः । अनित्यत्वबाधकस्य नित्यत्वे तदभावस्य च

---

१. 'तथा च वेदनित्यत्वस्य' – प. २ .'पूर्वकल्पीयस्य' – प.
३. '-रनुकर्षोक्तेरिति वाच्यम् । आकर्षण-' –प. ४. '-ङ्गीकारेण विरोधपदयो-' – प.

समुच्चयेऽन्यः ।[१]अनित्यत्वान्यभावनियमाभावयोः समुच्चयेऽपर इति विवेकः ॥

'तस्मै नूनमभिद्यवे वाचा विरूप नित्यया ।

वृष्णे चोदस्व सुष्टुतिम्' *(ऋ. ८–६४–६.)*

इति ऋग्यजुर्मन्त्रार्थस्तु न विलक्षणत्वाधिकरणटीकायामुक्तः ॥

तत्र यद्यपि विरूपेति स्वात्मानं प्रति सम्बोधनमित्युक्तेः विष्णुतत्त्वनिर्णयटीकायां विरूपाख्यऋषेस्सम्बोधनमित्युक्तेश्च विरोधो भाति । तथाऽपि विरूपर्षिकर्तृकं स्वान्तर्यामिसम्बोधनमिति तदर्थाभ्युपगमान्न विरोधः । उक्तं हि तत्त्वप्रदीपे[२] – प्रेरयेति प्रार्थनं विरूपस्य ऋषेरन्तर्यामिविषयमिति । विरूपकर्तृकं तदुद्देश्यकं सम्बोधनमिति पक्षेऽपि स्वात्मशब्दितस्वजीवं प्रति सम्बोधनमिति टीकार्थाभ्युपगमान्न विरोधः । अस्मिन् पक्षे तत्त्वप्रदीपोक्तं व्याख्यानान्तरं भविष्यति ॥

न च पद्मनाभतीर्थकृतविष्णुतत्त्वनिर्णयटीकायां न्यायरत्नावल्यां धर्मेण विरूपर्षिं प्रत्येतदुच्यत इत्युक्तत्वात्तद्विरोध इति वाच्यम् । प्रथमं यमदृष्टस्य मन्त्रस्यानन्तरं विरूपेणापि दृष्टत्वसम्भवेन तदा स्वसम्बोधनसम्भवेनाविरोधात् । तथा च, हे **विरूप** ! अभितो द्यौः प्रकाशो यस्यासावभिद्युः, तस्मै **'वृष्णे'** वर्षिणेऽतिसमर्थायेति वा । तत्त्वप्रदीपरीत्या वृषा श्रेष्ठस्तस्य चतुर्थी वृष्णे इति वा । **तस्मै** भगवते एनमुद्दिश्य **'नूनं'** निश्चितं **'नित्यया'** अनादिनिधनया वेदलक्षण**वाचा**[३] **'सुष्टुतिं'** शोभनां स्तुतिं **'चोदस्व'** प्रेरय कुर्वित्यर्थः ॥

---

१. 'अनित्यान्यभाव-' – प.

२. 'तत्वप्रदीपेऽपि' – प.

३. 'वेदलक्षणया वाचा' – प.

न ।

'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्'[१] *(महाना.५.७)*

'यथैव नियमः काले[२] **सुरादिनियमस्तथा ।**

तस्मान्नानीदृशं कापि विश्वमेतद् भविष्यति ॥' इत्यादेः,

अत एव शब्दात् तेषां प्रभवनियमात् । महतां प्रत्यक्षात् ।

परिहारांशं व्याख्याति – **नेति** ॥ विरोध इत्यस्ति । तथा च वेदस्य वाच्यहीनत्वप्रयुक्ताप्रामाण्याख्यविरोधो नेत्यर्थः । कुत इत्यतः प्राप्तं प्रभवादिति हेतुं तत्सम्बन्धिप्रदर्शनपूर्वकं प्रवाहतः प्रभवनियमपरतया च व्याचष्टे – **तेषां प्रभवनियमादिति** ॥ **'तेषां'** वेदवाच्यदेवानां **'प्रभवस्य'** प्रवाहत उत्पत्तेः **'नियमात्'** प्रतिकल्पं नियमेनोत्पत्तेरिति यावत् । तथा च देवानां स्वरूपेण नित्यत्वाभावेऽपि प्रवाहरूपेण नित्यत्वान्न तद्वाचकवेदाप्रामाण्यमिति भावः ।

ननु प्रमाणाभावादसिद्धो हेतुरित्यतः प्राप्तमतःशब्दमनूद्य सावधारणत्वेन व्याचष्टे – **अत एव शब्दादिति** ॥ कोऽसौ शब्द इत्यतो यस्मिन् विरोधः शङ्कितस्तस्मादेव, नान्यस्मादप्रकृतादित्याशयेन [३]तदुदाहरति – **सूर्येत्यादिना** ॥ श्रुतोऽस्मिन् कल्पेऽपीति शेषः ॥

ननूत्पादकाभाव इत्यतोऽप्याह – **अत एवेति** ॥ अकारवाच्यात् श्रुत्युक्ताद् धातुर्विष्णोरेव, नान्यस्मादित्यर्थः । अस्मिन् पक्षे [४]अतश्शब्दादिति व्याख्यानान्तरम् ॥

नन्वकल्पयदिति लङ्योगादियं[५] श्रुतिरतीतविषयैव, अतो न देवप्रभव-

---

१. 'ह.पाठे **'इति'** इति पदमधिकं वर्तते । २. **'कालनियमः' ह.**

३. **'तमुदाहरति' –प.** ४. **'शब्दादित्येतत्' – प.**

५. **'लङ्प्रयोगादियं' – प.**

नियमं प्रमापयतीत्यतोऽप्याह – **अत एवेति**[१] ॥ तथा च धाता यथा पूर्वकल्पे सूर्याचन्द्रमसावकल्पयत् तथाऽस्मिन् कल्पेऽपीति प्रतिकल्पं श्रुत्या कथने देवानां सर्वकल्पेषु प्रजननाख्यसद्भावसिद्धेरध्याहारं विना अतएवशब्दाद् बुद्धिस्थाद् यथैवेति स्पष्टश्रुत्यन्तराच्च तेषां सर्वकल्पेषु प्रभवसिद्धेर्नोक्तचोद्यावकाश इति भावः ॥

ननु श्रुतावुपचारेणाप्युक्तिः सम्भवतीति न तया देवप्रभवनियमनिश्चय इत्यतः प्राप्तं प्रत्यक्षेत्यंशं व्याचष्टे – **महतामिति** ॥ अतीतानागतविदामित्यर्थः । अस्यापि तेषां प्रभवनियमादित्यनेनान्वयः । ननु परप्रत्यक्षस्याप्रत्यक्षत्वात् तदनिश्चय इत्यतोऽप्याह – **महतां प्रत्यक्षादिति** ॥

'यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये ।

दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥'

इत्यादिरूपात् **'महतां'** भारताचार्याणां **'प्रत्यक्षात्'** प्रत्यक्षवचनादित्यर्थः । अस्मिन् पक्षे **'प्रत्यक्षात्'** निश्चितात् प्रत्यक्षादित्यन्वयः ॥

यथेदानीं तथोपर्यपि देवा भविष्यन्तीती-
तरेषामनुमानाच्च ॥ २८ ॥

नन्वयोगिनां श्रुतिप्रत्यक्षयोरविश्वासेन तेषां देवप्रभवनिश्चयाभाव[२] इत्यतः प्राप्तमनुमानेत्यंशं व्याचष्टे – **यथेति** ॥[३] इदानीन्तनकाले **यथा देवाः** सन्ति

---

१. **'अत एवेति ॥ श्रुतौ तथाऽस्मिन् कालेऽपीत्यध्याहारेऽनयैव तेषां तेषां प्रभवनियमावगमात् । देवानां सर्वकल्पेषु प्रजननाख्यसद्भाव-सिद्धेरध्याहारापेक्षां विनाऽपि अतएवशब्दाद् बुद्धिस्थाद् यथैवेति स्पष्ट-श्रुत्यन्तरात् तेषां सर्वकल्पेषु प्रभवसिद्धेरित्यर्थः ।'** – प.

२. **'प्रभवनिश्चयाभावः'** – प.

३. **'इदानीमिदानीन्तनकाले'** – प.

तथोपरिभाविकालेऽपि देवा **भविष्यन्तीतीतरेषां** महद्भ्योऽन्येषामयोगिना**मनुमानादि**त्यर्थः । अस्यापि प्रभवनियमादित्यनेनान्वयः । **च**शब्दः प्रभवनियमे, शब्दप्रत्यक्षानुमानाख्यप्रमाणत्रयसमुच्चये वक्ष्यमाणयुक्त्यन्तरसमुच्चये च [१] ॥

अनुमानाकारस्तु – उपरितनकालो देववान् अप्रलयकालत्वाद् इदानीन्तनकालवद् इति ॥

अनेन – देवानामधिकारसिद्ध्यर्थं यद्यद्यन्तवत्त्वमभ्युपगम्यते, तर्हि पूर्वसूत्रे यद्बलात् पूर्वपूर्वदेवताप्रवाहस्यानादित्वमुक्तं, तस्मिन् **'शब्दे' 'वाचा विरूप नित्यया'** [२]इत्यादिश्रुतौ नित्यतया सिद्धे वेदे कर्मणि चोत्तरकल्पे वाच्योद्देश्यहीनत्वरूपाप्रामाण्याख्यो विरोधः स्यादिति चेत्, न । कुतः ? **'प्रभवात्'** देवानां सर्वकल्पेषु प्रभवनियमान्नियमेनोपपत्तेः [३] । तेषां प्रवाहतो नित्यत्वादिति यावत् । न चोत्पादकाभावः । **'अतः'** [४]विष्णोरेव प्रभवात् । न चासिद्धिः । **'अतः' 'धाता यथापूर्वम्'** (महाना.५.७) इति प्रकृताच्छब्दाच्छ्रुतेः **'यथा'** इति स्पष्टश्रुतेश्च । तथा **महता**मतीतानागतकालविदां योगिनां **'प्रत्यक्षात्' 'यथर्तुषु'** इति प्रत्यक्षवचनाद् ज्ञापितात् महतामतीतानागतकालयोर्देवप्रभवनियमग्राहिप्रत्यक्षात् । तथा महद्भ्यः, इतरेषामयोगिनामनुमानाच्च तत्सिद्धेरिति सूत्रार्थ उक्तो भवति ॥

'यथैव' इति श्रुत्यर्थस्तु [५] – यथा पूर्वयुगात्यये कल्पात्यये वा पुनर्युगकल्पान्तरोत्पत्तिरिति काले प्रभवनियमः, तथा सुरादेर्देवोपदेवादेः पूर्वपूर्व-

---

१. '-समुच्चये वा' – प. २. 'इत्यादिश्रुतेः' – प.
३. 'नियमेनोत्पत्तिस्तेषाम्' – प. ४. विष्णुरेव'– प.
५. 'श्रुत्यर्थस्तु – धाता विष्णुर्यथा पूर्वकल्पे सूर्याचन्द्रमसावकल्पयदसृजत् तथाऽस्मिन् कल्पेऽपीति । यथा पूर्वयुगात्यये' – प.

कल्पात्यये[१] पुनरन्यभावनियमोऽस्ति । यथोक्तम् –

'स हि विश्वसृजो विभुंशम्भुपुरन्दरसूर्यमुखानपरानमरान् ।

सृजतीड्यतमोऽवति हन्ति निजं पदमापयति प्रणतान् सुधिया ॥'

इति । प्रतिकल्पमिति शेषः । तस्मात् पूर्वकल्प इवोत्तरकल्पेऽपि पूर्वकल्पसदृशसर्वोत्पत्तिनियमादेव **'तस्मात्'** विष्णोः सकाशादेतद् विश्वं **'क्वापि'** कदाऽपि **'अनीदृशं'** पूर्वपूर्वविसदृशं[२] देवताप्रभवशून्यं न भविष्यति, किन्तु तत्सद्भावोपेतमेव भविष्यतीति[३]॥

यद्वा – **'एतत्'** चेतनाचेतनात्मकं विश्वमनीदृशं न भविष्यति, किन्तु नामरूपाभ्यामीदृशमेव भविष्यतीत्यर्थः । तत्त्वप्रदीपे त्वियं श्रुतिः **'यथैव कालनियमः'** इति व्यत्यासेन पठिता ॥

सू – ॐ ॥ अत एव च नित्यत्वम् ॥ ॐ ॥ २९ ॥

अत एव शब्दस्य नित्यत्वादेव च देवप्रवाहनित्यत्वं युक्तम्[४] ॥ २९ ॥

(१३) युक्त्यन्तरेण देवप्रवाहस्य नित्यतां साधयत्सूत्रं पठित्वा व्याचष्टे – **अत एवेति ॥** अत एवेत्यनुवादः । तस्य व्याख्यानं – **'शब्दस्य'** वेदस्य नित्यत्वादेवेति । एवकारेण न देवप्रवाहनित्यत्वे युक्त्यन्तरं गवेषणीयं, किन्तु यत् पूर्वपक्षिणा वेदनित्यत्वं सप्रमाणकमुक्तं, तत एव तदन्यथानुपपत्त्यैतत्

---

१. **'देवोपदेवादिषु पूर्वपूर्वापगमे पुन-'** – प.
२. **'-विसदृशं पूर्वपूर्वकल्प इव देवता-'** – प.
३. **'भविष्यतीति श्रुत्यन्तरार्थः'** – प.
४. **'नित्यत्वं भवति'** ह.

सिध्यतीति सूचयति । नित्यत्वादेवेत्युपलक्षणं, प्रामाण्यस्य साधितत्वेना-प्रामाण्याभावादेवेत्यपि अतःशब्दव्याख्यानं द्रष्टव्यम् । अन्यथा पूर्वपक्षी अप्रामाण्येनान्यथोपपत्तिं ब्रूयाद् देवप्रवाहस्य । युक्तमिति च सूत्रशेषोक्तिः । **'युक्तं'** वेदनित्यत्वान्यथानुपपत्त्याख्ययुक्तिसिद्धम् । चशब्दस्तु समुच्चेतव्य-युक्तीनां शब्दात् प्रत्यक्षादनुमानादित्यनेन दर्शितत्वात् तत्समुच्चयार्थ-कतयाऽर्थाद् व्याख्यातः । अत एव पूर्वसूत्रभाष्ये चशब्दः संयोजितः । अत्रापि भाष्ये चशब्देन च तद्वाच्यदेवतास्वरूपस्यैव नित्यत्वेनान्यथोपपत्तिः । अत एव **'सूर्याचन्द्रमसौ'** (महाना.५.७) **'यथैव'** इत्याद्युदाहृतश्रुतेरेव **'यमप्येति भुवनं साम्पराये'** (नृ.पू.२.५) **'यत् प्रयन्त्यभिसंविशन्ति'** (तै.३.१) इत्यादि बहुलं प्रलयश्रुतेश्च सूर्यादिदेवानामुत्पत्तिनाशावगमात्, अत एव स्वरूपनित्यत्वायोगेन प्रवाहरूपेणैव तेषां नित्यत्वावश्यम्भावादित्यादिटीकोक्तार्थः सर्वोऽपि सङ्गृहीतः ॥

सू – ॐ ॥ समाननामरूपत्वाच्चाऽवृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॥ ॐ ॥ ३० ॥

अतीतानागतानां देवानां समाननामरूपत्वात् प्राप्तपदानां मुक्त्याऽऽवृत्तावप्यविरोधः ।

ननु न देवानां प्रवाहनित्यत्वेनापि वेदप्रामाण्योपपत्तिः । तथा हि – किं पूर्वकल्पे मुक्ता एव देवा उत्तरकल्पे पुनरावर्तन्ते, तदन्ये वा । नाऽद्यः । मुक्तेरपुनरावृत्तित्वात् । न द्वितीयः । तथात्वे धर्मिभूतदेवानित्यत्व-हेतुकविरोधाभावेऽपि नामरूपादिधर्मवैचित्र्यकृतविरोधप्राप्तेः, वाचकवेदस्य प्रतिकल्पं पाठभेदाभावेनैकविधत्वात्, अन्यथा नित्यत्वव्याघातात् । वाच्य-देवानां च नानाविधनामरूपवत्त्वादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे – **समानेति** ॥ अत्रातीतपदं प्राचीनपरम् । अनागतपदं च तदन्यभविष्यद्वर्त-

मानपरम् । धर्मिप्रतियोग्युभयसमर्पकमेतत् । नाम इन्द्रादि, रूपम् आकृतिः । सूत्रानुसारादत्रापि चशब्दः संयोज्यः । समानधर्मकर्मवत्त्वाच्चेति तदर्थः । स्वपदेष्विति शेषः । मुक्त्याऽऽवृत्तावपीत्युक्तिः पूर्वपक्ष्याशङ्कितविरोधे हेतु-सूचनार्था ॥

यद्यपि तथाऽपीत्यर्थेऽपिशब्दः आवर्तते । शब्द इत्यस्ति । तथा चेत्थं योजना – **'प्राप्तपदानां'** प्राचीनानां देवानां **'मुक्त्या'** प्राप्तमुक्तित्वेन कारणेन पुनस्तेषामेव स्वपदेषु **'अवृत्तावपि'** असत्त्वेऽपि तदन्येषां तत्र सत्त्वेऽपि च **'अविरोधः'** [1]तद्वाचके एकविधेऽपि शब्दे वेदेऽप्रामाण्याख्यो विरोधः । कुतः ? वाच्यानामप्यतीतानागतानां देवानां परस्परं **'समाननामरूपत्वात्'** समाने एकविधे नामरूपे येषां ते तथोक्ताः, तेषां भावस्तत्त्वं तस्मादिति ॥

चन्द्रिकायां तु – सूत्रे भाष्ये च तत्त्वप्रदीपानुसासादावृत्ताविति[2] विच्छेदं भाष्ये मुक्त्यावृत्तावित्यस्यैकपद्यं चाऽश्रित्य एकस्य पदप्राप्तावन्यस्य मुक्तिः, पुनस्तस्य मुक्तौ पुनरन्यस्य पदप्राप्तिरिति क्रमेण मुक्तेरावृत्तावपीति वा, स्वस्व-पदस्याऽवृत्तावपीति वेति टीकानुक्तप्रकारद्वयेनाप्यावृत्तावित्यंशो व्याख्यातः ॥

'यथापूर्वम्' *(महाना. ५–७.)* **इति दर्शनात् ।**

ननु सर्वदेवानां समाननामरूपत्वे प्रमाणाभावादसिद्धो हेतुरित्यतः प्राप्तं दर्शनादित्यंशं व्याख्याति – **यथेति ॥ 'धाता यथापूर्वम्'** इति श्रुतेरित्यर्थः ॥

'अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः ॥
वेदशब्देभ्य एवाऽदौ निर्ममे स महेश्वरः ॥'इति स्मृतेश्च ॥३०॥

---

१. **'न तद्वाचके'** – प.

२. **'आवृत्तावपि'** – प.

नन्वेतच्छ्रुतेस्तत्तत्स्वरूपकल्पनानियमपरत्वमपि सम्भवतीति नानया समाननामरूपत्वनिश्चयो भवति । किं च देवप्रवाहस्य नित्यत्वे तेषां समाननामरूपत्वे वा न तद्वाचित्वेन नित्यवेदप्रामाण्योपपत्तिः, तद्वाचित्वस्यैवासम्भवात् । न ह्यपौरुषेयस्य वेदस्यैतावत्कालमयं देवो मयोक्तः, अतः परमेनं वक्ष्यामीति विमृश्य वृत्तिः सम्भवतीत्यतः प्राप्तः स्मृतेरित्यंश इत्याशयेन तां दर्शयति – **अनादीति** ॥ नित्यत्वोक्तेरुपचरितत्ववारणाय – अनादिनिधनेत्युक्तम् । अतो न पौनरुक्त्यम् । अत एव तत्त्वप्रदीपे अनादिनिधनत्वेन नित्या, न त्वनिधनत्वमात्रेणेत्युक्तम् । बहुकालीनत्वेन वेत्यपि द्रष्टव्यम् । वेदेष्वित्यनन्तरमुक्ता इति शेषः । निर्ममे इत्यस्याऽवृत्तिः । तथेति शेषः । तेनाप्येवशब्दस्यान्वयः ॥

तथा च **'आदौ'** सृष्टिकाले **'स्वयम्भुवा'** स्वतन्त्रेण महेश्वरेण विष्णुना **'अनादिनिधना नित्या'** आद्यन्तशून्यतयैव नित्या, न तूपचारेण बहुकालीनतामात्रेणानिधनत्वमात्रेण[१] नित्या । या **'वाक्'** वेदरूपा **'उत्सृष्टा'** उच्चारिता । **'तद्वेदशब्देभ्यः'** वेदगतेभ्यः तेभ्यः शब्देभ्य एव, नान्येभ्यः, **'सः'** महेश्वरो विष्णुः **'ऋषीणां'** ब्रह्मादिविबुधानां **'नामधेयानि निर्ममे'** तानेव शब्दान् तेषु सङ्केतितवान् प्रतिकल्पमयं शब्दोऽत्र शक्त इति ज्ञापितवान् । **'याश्च'** ऋषीणां देवानां, वेदेषूक्ताः दृश्यन्त इति दृष्टयो रूपाणि, ताश्च तानि च तथैव पूर्वकल्पीयरूपसादृश्येनैव निर्मम इति स्मृत्यर्थः ॥

चः समुच्चये । दर्शनात् स्मृतेरित्यनयोः समानरूपत्वादित्यनेनान्वयः । [२]आगमोपलक्षकं चैतत् । तथा च नासिद्धिरिति भावः ॥

---

१. **'अनिधनत्वमात्रभावा नित्या ।'** – प.

२. **'अवगमोपलक्षकम्'** – प.

अनेन – प्राचीनानां देवानां मुक्त्या पुनः स्वपदेष्ववृत्तावपि तदन्येषां तत्र वृत्तावपि न तद्वाचके एकविधेऽपि शब्देऽप्रामाण्याख्यो विरोधः । कुतः ? प्राचीनानां तदन्येषां चान्योन्यं[1] **'समाननामरूपत्वात्'** तद्योग्यकर्म-धर्मवत्त्वाच्च[2] । न च हेत्वसिद्धिः । **'दर्शनात्' 'यथापूर्वम्'** इति श्रुतेः, **'अनादिनिधना'** इति स्मृतेश्चेति सूत्रार्थ उक्तो भवति ॥

अत्र तत्त्वप्रदीपे प्रलये कस्यापि देवस्याभावेन तदा वेदस्य वाच्यहीनत्वरूपाप्रामाण्यमाशङ्क्य भगवन्मात्रविषयत्वेन तदुपपत्तिरिति समाधानमभिप्रेत्य **'शब्दे'** इत्यादिसूत्राणि भगवत्परतया व्याख्यातानि । तथा हि । न शब्दे कदाऽपि वाच्यहीनत्वकृतो विरोधः अप्रामाण्यम् । कुतः ? मुख्यवाच्यस्य विष्णोः सर्वदा विद्यमानत्वात् । कुत एतत् ? **'अत एव'** शब्दात् तेषां देवानां प्रभवनियमादिकर्तुरपीशस्य सदा सत्त्वावगमात् । प्रत्यक्षश्चासौ महताम् । कुतः ? **'अत एव' 'पुरुषमीहते'**[3] **'कवयो वयन्ति'** (महाना.१.३) इत्यादिश्रुतेरेवेतरेषामनुमानाच्च । यथा येन प्रकारेणेदानीं देवा भवन्ति तथाऽन्यदाऽपीत्यनुमानाच्च तदवगमः ॥

एवम् **'अत एव'** शब्दनित्यत्वादेव प्रवोढुर्नित्यत्वम्[4] । तथा विष्णोस्समाननामरूपत्वादन्येषां तदभावाच्च 'अविरोधः' न तस्य सर्वशब्दवाच्यत्वविरोधः । समानानि सदृशानि नामानि येषां रूपाणां तानि तथोक्तानि, तादृशानि रूपाणि यस्य स तथोक्तः तस्य भावस्तस्मात् । न हि विष्ण्वन्यरूपाणां सदृशनामरूपत्वं, शब्दप्रवृत्तिहेतुवैकल्यात् । न चात्र

---

१. **'वाऽन्योन्यं'– प.**
२. **'तत्तद्योग्यधर्मकर्मवत्त्वाच्च'। – प.**
३. **'पुरुषमीक्षते' – प.**
४. **'-देव देवप्रवाहनित्यत्वम्'। – प.**

मानाभावः, **'यथापूर्वम्'** इति दर्शनात् । यथापूर्वं पूर्णज्ञानः सर्वस्वतन्त्रः सर्वनामरूपस्थितस्तथैव स धाता सूर्यादीनकल्पयदिति श्रुतेः । अतः सूर्यादिक्लृप्तेः प्रागपि प्रलये शब्दप्रामाण्याविरोध इति सिद्धमिति । इदमेवाभिप्रेत्य टीकायां 'न च' इत्यादिना शङ्कोत्तरे दर्शिते । **'अतीतविषयत्वस्य च'** इति परिहारोत्तरं चाभिहितम् ॥

सू – ॐ ॥ मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॥ ॐ ॥ ३१ ॥

'वसूनामेवैको भूत्वा' *(छां.३.६.२)* **इत्यादिना प्राप्यफलत्वात् प्राप्तपदानां देवानां मध्वादिविद्यास्वनधिकारं जैमिनिर्मन्यते ॥ ३१ ॥**

ननु न देवानां वेदविद्याधिकारो युक्तः । तथा हि द्विविधा वेदविद्याः – मुक्तिफलार्थाः, तदितरफलार्था इति । मोक्षेतरफला अपि द्विविधाः । ब्रह्मकर्मविद्याभेदात् । तत्राऽद्या यथा – **मधुविद्या ॥** द्वितीया यथा – **अग्निष्टोमविद्या ॥** तत्र न तावद् देवानां मोक्षेतरफलकद्विविधविद्यास्वधिकारो युज्यते, तत्साध्यानां मोक्षेतरफलानां मध्ये केषाञ्चिद् योग्यानां प्राप्तत्वेनायोग्यानां च प्राप्तुमशक्यत्वेनार्थित्वाभावादिति जैमिनिमतावलम्बेनाऽक्षिपत्सूत्रमुपन्यस्य व्याचष्टे – **मध्वादिष्विति ॥**

प्रथमादिपदेन शिष्टवाक्यं, तथा **'देवो भूत्वा देवानप्येति'** (बृ.६.१.२) इति वाजसनेयवाक्यं, तथा **'स ऊर्जमुपगच्छति'** इति श्रुत्यन्तरवाक्यं, द्वितीयमधुविद्यान्तर्गतं '[१]**रुद्राणामेवैको भूत्वा**' (छां.३.७.२) इत्यादिकं च गृह्यते ।

१. -मधुविद्यान्तर्गत 'रुद्राणाम्' – प.

प्राप्यफलत्वाद् अप्राप्यफलत्वादित्युभयथा विच्छेदः । अस्योभयत्रान्वयः । वस्वादिपदानामिति शेषः । तत्राऽदिपदेन देवरुद्रादिपदानां ग्रहणम् ॥

यद्वा – प्राप्तपदानामित्यत्रत्यं पदानामित्येतद् बुद्ध्या विविच्यात्र धर्मित्वेन सम्बध्यते । प्राप्तपदानामिति बहुव्रीहिः, कर्मधारयश्च । तत्राऽद्यो हेतुगर्भविशेषणरूपः । द्वितीयस्योभयत्रान्वयः । देवानामिति सूत्रे अध्याहृतं पदं, प्रकरणलब्धं वा । मधुशब्दो **'मधु'** इत्युपक्रम्याऽम्नातप्रथमद्वितीयाद्यमृतविद्यापरः । अत्राऽदिशब्देन वस्वादिपदफलककर्मविद्या वाजसनेयोक्तवागादिविद्याश्च गृह्यन्ते । एतच्चाऽवर्तनीयम् । असम्भवादिति सौत्रो हेतुरत्रापि संयोज्यः । तदुपपादकोक्त्यैव तदुक्तिर्भवतीति तस्य साक्षादनुक्तिः॥

यद्वा – प्राप्तपदानामप्राप्यफलत्वादित्युक्त्यैव तस्योक्तत्वादसम्भवादिति न संयोज्यम् ॥ तथा चेत्थं भाष्ययोजना – मध्वादिविद्यासु **'असौ वा आदित्यो देवमधु'** इति प्रस्तुत्याऽम्नातेन **'स एतदेवामृतं वेद वसूनामेवैको भूत्वा अग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति'** इत्यादिवाक्ये **'पदानां'** वस्वादिपदानां **'प्राप्यफलत्वात्'** मध्वादिविद्यासूक्तोपासनाप्राप्यफलत्वश्रवणात्[१] **'प्राप्तपदानां च'** वस्वादिदेवानां प्राप्तस्वस्वपदत्वेन **'असम्भवात्'** तदर्थित्वासम्भवात् **'देवानां'** देवैः प्राप्तपदानां पुनस्तैः **'अप्राप्यफलत्वात्'** अप्रार्थ्यफलत्वादिति वा । द्वितीयविद्याद्यमृतविद्याफलानां रुद्रादिपदानां च वस्वादिदेवानाम् **'अप्राप्यफलत्वात्'** प्राप्तुमयोग्यफलत्वात् तत्राप्यर्थित्वासम्भवात्तेषां मध्वादिविद्यासु **'अनधिकारम् अधिकाराभावं जैमिनिर्मन्यते'** इति । जैमिनिग्रहणेन आप्ततमेन जैमिनिनैवं मतत्वाच्च न तेषामधिकार इति युक्त्यन्तरं सूच्यते ॥

---

१. **'-श्रवणाच्च'** – प.

अनेन – **'मध्वादिषु' 'असौ वा आदित्यो देवमधु'** इत्यादिमधुविद्यासु देवानाम् **'अनधिकारम्'** अधिकाराभावं जैमिनिर्मन्यते तस्माद्धेतोः **'असम्भवात्'** तैस्तद्विद्यासूक्तफलानां मध्ये केषाञ्चिद् योग्यानां प्राप्तत्वेन केषाञ्चित् प्राप्तुमयोग्यत्वेन तेषां तत्रार्थित्वासम्भवादिति आप्ततमो जैमिनिर्मन्यत इति सूत्रार्थ उक्तो भवति ॥

छान्दोग्ये हि – **'असौ वा आदित्यः'** इत्यनेन आदित्यस्य विष्णोः परमानन्दत्वेन मधुत्वमुक्त्वा **'स एतत्'** इत्यादिना मधुशब्दितस्य भगवत आदित्यमण्डलस्य पूर्वदक्षिणपश्चिमोत्तरोर्ध्वरश्मिषु स्थितानां प्रथमामृतादि-शब्दपञ्चकवाच्यवासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धनारायणाख्यपञ्चरूपाणां मध्ये प्राच्यादितत्तद्दिक्स्थितैः तत्तत्पदयोग्यैर्वसुरुद्रादित्यमरुत्साध्यपदोक्तऋजुरूप-पञ्चगणस्थैर्देवैः क्रमेण अग्निवाय्विन्द्रसोमविरिञ्चप्रधानकैरग्न्यादिमुखेनैकैको-पास्तौ कृतायां तदपरोक्षज्ञानजनिततत्प्रसादद्वारा वस्वादिपदप्राप्तिस्तत्तद्गण-स्थानां भवतीत्युच्यते ॥

तथा च **'यः'** अधिकारी **'एतद् अमृतं'** वासुदेवाख्यं रूपम् **'एवम्'** उक्तप्रकारेण **'वेद' 'स च वसूनामप्येको भूत्वा'** वसुभोग्यदेशकालाधिपो भूत्वा **'अग्निना मुखेन'** तत्प्राधान्येन तदुपदेशेनेति यावत् । **'एतदेवामृतं'** वासुदेवाख्यं **'दृष्ट्वा'** साक्षात्कृत्य **'तृप्यति'** मुक्तो भवतीत्यर्थः ॥

एवं **'यः'** देवत्वयोग्योऽधिकारी वाक्प्राणचक्षुःश्रोत्रमनोहृदयनामकं ब्रह्मोपास्ते स देवत्वमप्येति ततो **'देवो भूत्वा'** स्वोत्तमदेवेषु सायुज्यं प्राप्य देवान् श्वेतद्वीपगतभगवद्रूपविशेषान् चतुर्मुखब्रह्मणा सहाप्येति । सोऽधिकारी **'ऊर्जम्'** अन्नम् **'उपगच्छति'** यथेष्टं प्राप्नोतीति श्रुत्यन्तरार्थः ॥

सू – ॐ ॥ ज्योतिषि भावाच्च ॥ ॐ ॥ ३२ ॥

ज्योतिषि सर्वज्ञत्वे भावाच्च । आदित्यप्रकाशेऽन्तर्भाववत् तज्ज्ञाने सर्ववस्तूनामन्तर्भावात् । नित्यसिद्धत्वाच्च विद्यानाम्[१] ॥ ३२ ॥

ननु माऽस्तु मोक्षेतरफलविद्यास्वधिकारो देवानां, तथाऽपि **'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै.२.१.१) इत्यादिमोक्षार्थविद्यास्वधिकारो भविष्यति, तत्रार्थित्वसम्भवाद् इत्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे – **ज्योतिषीति ॥** ज्योतिषीति सूत्रपदानुवादः । तस्य व्याख्यानं – **सर्वज्ञत्व इति ॥** यद्यपि ज्ञाने इति व्याख्येयं, तथाऽपि विषयाविशेषितज्ञानस्यानिरूप्यत्वात्[२] यत्किञ्चिद्विषयके ज्ञाने विषयतया सर्वभावस्यासिद्धत्वात् तज्ज्ञापनाय सर्वज्ञत्व इति व्याख्यातम् । तेन सूत्रे वस्तूनामित्यन्तर्भावसम्बन्धिज्ञापकं पदमध्याहार्यमिति सूचितं भवति ॥

चः समुच्चये । अस्य हेतोरसम्भवादित्यनुवृत्तहेतुद्वारा मध्वादिष्वनधिकारं मन्यत इति पूर्वेणान्वयः । अनेन मध्वादिष्वित्यादिशब्देन मोक्षार्थविद्या अपि ग्राह्याः । ज्योतिश्शब्दश्च आवर्तनीयः, ज्योतिषीव ज्योतिषीति[३] । सप्तमी च चैत्ररथस्य[४]बुद्धौ शास्त्रार्थ इतिवद् युज्यत इति सूचितम् । कथं वस्तूनां ज्ञानेऽन्तर्भाव इत्यतः सर्वज्ञत्वे भावादिति स्वपदे वर्णयति – **आदित्य इति ॥** सर्ववस्तूनामादित्यप्रकाशेऽन्तर्भाववत् तद्गृहीतत्ववत् तज्ज्ञाने तदुपरीति प्रस्तुतदेवताकर्तृकज्ञाने सर्ववस्तूनाम् **'अन्तर्भावात्'** विषयीभूतत्वादित्यर्थः ॥ अभिप्रायं व्यनक्ति – **नित्येति ॥** देवानां [५]सार्वज्ञेन **'विद्यानां'** सर्वब्रह्मकर्मविद्यासाध्यज्ञानानां **'नित्यसिद्धत्वात्'**

---

१. **'सिद्धत्वाद् विद्यानाम्'** ह.

२. **'विषयाविशेषितस्यानिरूप्यत्वात्'** – प.

३. प. पाठे 'इति' शब्दो नास्ति।

४. **'चैत्रस्य बुद्धौ'** – प.

५. **'सर्वज्ञानाम्'** – प.

नियमेन प्राप्तत्वादित्यर्थः ॥

यद्वा – **'विद्यानां'** ज्ञानसाधनविद्यानां नित्यं नियमेन **'सिद्धत्वात्'** उपलब्धत्वादित्यर्थः । देवानां वेदद्रष्टृत्वादिति भावः । यद्वा – **'विद्यानां'** मोक्षतदितरफलसाधनज्ञानसाधनविद्योक्तार्थानां **'नित्यसिद्धत्वात्'** नियमेन तैर्ज्ञातत्वादित्यर्थः । तथा च न देवानामुभयविद्यासाध्यज्ञानेऽर्थिता सम्भवतीति भावः । अनयोरपि पञ्चम्यन्तयोः पूर्ववदन्वयः । न चास्य हेतोः पूर्वसूत्रोक्तासम्भवहेतूपपादकत्वात् कथमत्र चशब्द इति वाच्यम् । पूर्वं फलमुखेन अत्र च साधनमुखेनार्थित्वासम्भवस्याभिप्रेतत्वेनास्य हेतोर्द्वितीया-सम्भवोपपादकत्वेऽपि असम्भवसामान्ये उपपादकत्वेन[१] चशब्दोपपत्तेः ॥

यद्यपि भाष्ये **'ज्योतिषि'** इति सूत्रं किं देवानां मोक्षेतरफलार्थायाम् ? उत मोक्षफलार्थायां विद्यायामधिकार इति पक्षद्वयेऽपि साधनमुखेन दोषोक्तिपरतया प्रतीयते । टीकायां तु मोक्षार्थविद्यायामपि न देवाना-मधिकारः, तत्र फलेऽर्थितासत्त्वेऽपि तत्साधनविद्योपासनात्मकज्ञानेऽर्थित्वा-भावात्, विद्यायाश्च [२]ज्ञानार्थत्वात्, ज्ञानस्य च प्राप्तत्वादिति द्वितीयपक्षमात्रदोषोक्तिपरतया व्याख्यातम् । तथा च विसंवादो भवति ॥

तथाऽपि मोक्षेतरफलकविद्यास्वनधिकार इति प्राचीनपक्षे न केवलं मधुविद्याफले वसुत्वादौ प्राप्तत्वाद् देवानामर्थित्वाभावात् तद्विद्यायामधिकाराभावो दोषः । किन्तु वसुत्वादिफलसाधनज्ञानेऽप्यर्थित्वा-भावाद् अधिकाराभाव [३]इत्यसम्भवदोषे उपपादकान्तरमुक्तं भवतीति टीकायामुक्तत्वान्न विसंवादः । अत एव न चशब्दानुपपत्तिः ॥

---

१. **'उपपादकान्तरत्वेन'** – प.

२. **'ज्ञानेऽर्थित्वात्'** – प.

३. **'इत्यसम्भवदोषोपपादकान्तरम्'** – प.

प्राचीनपक्षविवक्षया तदुपपत्तेः । हेत्वन्तरेण एतत् साधयतीति सत्तर्कदीपावली च आद्यपक्षविवक्षया प्रवृत्ता । द्विविधविद्यासमुच्चये वा चशब्दः ॥

अनेन – न केवलं मोक्षेतरफलार्थं मध्वादिष्वनधिकारं मन्यते जैमिनिः। किन्तु आदिशब्देन वा आवृत्तज्योतिश्शब्देन वा गृहीतायां **'सत्यं ज्ञानम्'** इति मोक्षार्थविद्यायामपि । कुतः ? **'ज्योतिषीव'** आदित्यप्रकाशे इव **'ज्योतिषि'** सर्वविषयकदेवताज्ञाने सर्ववस्तूनां विषयतया **'भावात्'** मोक्षसाधनज्ञानस्य सिद्धत्वात् । अत एव न मोक्षे, तस्यापि सिद्धप्रायत्वादर्थित्वासम्भवात् ॥

न केवलं वस्वादिदेवानां फलेऽर्थित्वाभावान्मध्वादिष्वनधिकारं जैमिनिर्मन्यते, किन्तु **'ज्योतिषि'** वसुत्वादिफलसाधनज्ञानेऽप्यर्थित्वासम्भवात् । सोऽपि कुतः ? **'ज्योतिषि'** देवानां ज्ञाने **'भावात्'** सर्वेषां वस्तूनां विषयतयाऽन्तर्भावात् [१]फलसाधनज्ञानस्य सिद्धत्वादिति यावदिति वा सूत्रार्थ उक्तो भवति ॥

सू–ॐ ॥ भावं तु बादरायणोऽस्ति हि ॥ ॐ ॥३३॥

फलविशेषभावात् प्राप्तपदानामपि देवानां मध्वादिष्वप्यधिकारं बादरायणो मन्यते । अस्ति हि प्रकाशविशेषः ।

एवं देवैर्मोक्षेतरयोग्यफलानां प्राप्तत्वाद् अयोग्यानां प्राप्तुमशक्यत्वान्मोक्षस्यापि ब्रह्मज्ञानित्वेनार्थतो लब्धत्वादर्थित्वाभावेन तेषां कास्वपि विद्यास्वधिकाराभावे जैमिनिमतावलम्बिना समर्थिते पुनरधिकारं समर्थयत्सूत्रं पठित्वा व्याचष्टे – **भावमिति** ॥ फलविशेषभावादित्यनेन सूत्रे पूर्वस्माद् भावादित्यस्यानुवृत्तिः सूचिता ॥

---

१. 'तत्फलसाधन-' – प.

प्राप्तपदानामिति ॥ पद्यत इति पदं प्राप्यफलमात्रम् । अपीत्यनेन विशेषार्थोऽपि । तुशब्दोऽप्यर्थः । अपिश्च यद्यपितथाऽपीत्यर्थे इत्युक्तं भवति । देवानामिति सूत्रे शेषोक्तिः । मध्वादिष्वित्यनुवृत्तपदानुवादः । अत्राऽदिशब्देन मोक्षतदितरफलार्थाशेषब्रह्मकर्मविद्या गृह्यन्ते । **'अधिकारम्'** अधिकार-भावमिति । अनेन **'भावम्'** इत्यस्यार्थ उक्तः । मन्यत इति शेषोक्तिः । अस्तीत्यस्य कर्तृसापेक्षत्वात् तं दर्शयति – **प्रकाशविशेष इति ॥** ज्ञानातिशय इत्यर्थः । हिशब्दो यत इत्यर्थे । तथा चेत्थं योजना - बादरायणस्तु भगवान् देवानां मध्वाद्यशेषविद्यास्वधिकारभावं मन्यते । न च प्राप्तफल-त्वात्तत्रार्थित्वाभावो दोषः ॥

यद्यपि देवाः प्राप्तपदाः ब्रह्मज्ञानित्वात् सिद्धमोक्षतदितरफलाः प्राप्तुमशक्यायोग्यफलाश्च । तथाऽपि प्राप्तपदानामपि देवानां मध्वादि-विद्यासूक्तोपासनाकर्मकरणाभ्यां फलविशेषभावात् स्वस्वयोग्यस्य ज्ञानमात्रेण असाध्यस्य मोक्षफलेऽतिशयस्य भावात् सिद्धेरर्थित्वसम्भवात् । न च फलेऽतिशयस्य सिद्धत्वेन तत्रार्थित्वसम्भवेऽपि तत्साधनविद्यानां नित्य-सिद्धत्वाद् विद्याविचारस्य ज्ञानार्थत्वात् तत्रार्थित्वासम्भव इति वाच्यम् । **'हि'** यतो भगवदितरेषां निरुपचरितसार्वज्ञाभावाद् विद्याविचारेण **'प्रकाशविशेषः'** ज्ञानविशेषः **'अस्ति'** सम्भवतीति । अनेन सूत्रवृत्तिर्दर्शिता । अत्र बादरायणपदं पूजार्थम् ॥

'यावत् सेवा परे तत्त्वे तावत् सुखविशेषता ।
सम्भवाच्च प्रकाशस्य[१] परमेकमृते हरिम् ॥
तेषां सामर्थ्ययोगाच्च देवानामप्युपासनम् ।
सर्वं विधीयते नित्यं सर्वयज्ञादिकर्म च ॥ ' इति स्कान्दे ।

---

१. **'-च्चाप्रकाशस्य' ह.**

ननु तत्तद्विद्योक्तोपासनकर्मकरणाभ्यां तत्तद्विद्योक्तफलादन्यदपि फलं प्रकाशविशेषश्च देवानां भवतीत्येतत् कुतो ज्ञायत इत्याशङ्कां परिहर्तुमुक्तार्थे हिशब्दसूचितां स्मृतिं दर्शयति –**यावदिति** ॥ क्रियत इति शेषः। स्वार्थे तल्। भावभवित्रोरभेदविवक्षया वा। [1]सिद्ध्यत्यस्येति शेषः। चो हेतुसमुच्चये ॥

यद्वा – आद्यश्चः प्रकाशस्य चेति सम्बध्यते। फलसमुच्चायकश्चायम्, असम्भवसमुच्चये च। सम्भवादित्यावर्तते। तथा च **'परे तत्त्वे'** परमात्मस्वरूपे **'असौ वा आदित्यः'** (छां.३.१.१) इत्यादिनोक्ते तद्विषये **'देवानां'** देवैर्वस्वादिभिः **'यावत्'** यावदधिकं **'सेवा' 'एषा सेवा'** इत्युक्ता श्रवणादिरूपोपासना क्रियते **'तावत्'** तावदधिकं तेषां **'सुखविशेषता'** स्वर्गापवर्गादिसुखेऽतिशयः स्वस्वयोग्यो ज्ञानमात्रेण साध्यः सिद्ध्यति। यतोऽतः **'परं'** स्वतन्त्रं हरिमेकमृतेऽन्येषां **'प्रकाशस्यासम्भवात्'** निरुपचरितसार्वज्ञ्याभावात्। अत एव विद्याविचारेण साध्यस्य प्रकाशस्य ज्ञानविशेषस्य सम्भवात्, अत एवार्थित्वस्य सम्भवात् तेषां देवानां **'सामर्थ्ययोगात्'** सामर्थ्यसम्भवाच्च विद्वत्तासम्भवाच्चापि प्राप्तपदानामपि **'देवानां'** देवैः **'सर्वमुपासनं'** सर्वविद्योक्तोपासनं सर्वयज्ञादिकर्म च **'नित्यं'** नियमेन **'विधीयते'** श्रुतिषु कर्तव्यत्वेन बोध्यत इति योजना। चः समुच्चये ॥

अप्रकाशस्येति पाठे निरुपचरितसार्वज्ञ्याभावस्येत्यर्थः। तदा **प्रकाशस्य** चशब्देन ग्रहणम्। सम्भवादित्यस्य सिद्धत्वात् सत्त्वादित्यर्थद्वयम्। पाठद्वयेऽप्यन्येषामिति शेषः। एकशब्दो अवधारणार्थो विरिञ्चस्यापि वर्ज्यत्वनिवारकः। **स्कान्दे**, उक्तमिति शेषः। अतः फलविशेषभावादस्ति हि प्रकाशविशेष [2]इत्यनयोर्नासिद्धिरिति वाक्यशेषः ॥

---

१. **'सिद्ध्यति। अतोऽर्थित्वस्येति शेषः'।** – प.

२. **'इत्यनयोः श्रुतिषु कर्तव्यत्वेन नासिद्धिरिति भावशेषः'** – प.

उक्तफलानधिकारमात्रं जैमिनिमतमतो न तन्मतविरोधः[१]।

नन्वस्त्वेवमसम्भवादित्युक्तयुक्तिपराभवः । तथाऽपि देवानामधिकाराभ्युपगतावाप्ततमजैमिनिमतविरोध इत्यत आह – **उक्तेति** ॥ उक्तं च तत् फलं च, उक्तं फलं यस्येति च विग्रहः । तथा च तत्तद्विद्योक्तफलार्थं तत्फलकप्रागाप्तज्ञानार्थं च योऽयमधिकारस्तदभावमात्रं **'जैमिनिमतम्'** जैमिन्यभिमतमित्यर्थः । मात्रशब्देन फलान्तरार्थाधिकाराभावो[२] व्यावर्त्यते । किमतो यद्येवमित्यत आह – अत इति जैमिन्युक्तस्य सूत्रकारेणाप्यङ्गीकृतत्वात्, सूत्रकृदुक्तस्य च जैमिनिनाऽनिरस्तत्वान्न तयोर्विरोध इत्यर्थः ॥

'सर्वज्ञस्यैव कृष्णस्य त्वेकदेशविचिन्तितम् ।
स्वीकृत्य मुनयो ब्रूयुस्तन्मतं न विरुध्यते ॥

[३]**इति ब्राह्मे ॥ ३३ ॥**

॥ इति देवताधिकरणम् ॥ ८ ॥

ननु किमनयोर्मतयोर्विषयवैलक्षण्यकल्पनेन ? विरोध एव किं न स्यादित्यत आह – **सर्वज्ञस्येति** ॥ तुशब्दो विशेषार्थः । एवकारो भिन्नक्रमः । तथा च यस्मात् **'मुनयः'** जैमिन्याद्याः निरुपचरितसर्वज्ञस्य **'कृष्णस्य'** द्वैपायनस्य **'एकदेशविचिन्तितं'** विचिन्तितार्थैकदेशं तन्मतैकदेशमेव स्वीकृत्य तदेव ब्रूयुः, नान्यत् । तस्मात् **'तन्मतं'** तेषां कृष्णमुनीनां मतं परस्परं न विरुद्ध्यत इत्यर्थः । ब्राह्म इत्यनन्तरं उक्तमिति शेषः । अतो विषयवैलक्षण्यमेव कल्प्यं न मतविरोध इति भावः ॥ ८ ॥

॥ इति देवताधिकरणम् ॥

---

१. **'मतविरोधः'** ह.

२. **'फलेतरार्थाधिकाराभावो व्यावर्त्यते'**। – प. ३. **'इति च ब्राह्मे'** ह.

॥ ९. अथापशूद्राधिकरणम् ॥

(त्रैवर्णिकेतराणां वेदविद्याधिकारनिराकरणम्)

मनुष्याधिकारत्वादित्युक्तेऽविशेषाच्छूद्रस्यापि
'अह हारेत्वा शूद्र' *(छां.४.२.३.)*
इति पौत्रायणोक्तेरधिकार इति ।

॥ ९. अथ अपशूद्राधिकरणम् ॥

अत्राधिकरणे त्रिवर्णेतरस्य शूद्रस्य वेदोक्तब्रह्मविद्याधिकारो निराक्रियते । प्रासङ्गिकत्वान्नाध्यायादिसङ्गतिरन्वेषणीया [१]। श्रुत्यादिसङ्गतिं विषयादिकं च सूचयति – **मनुष्येति** ॥ निमित्तसप्तमीयम् । अधिकारोपयोगितयोक्ते मनुष्यत्वेऽविशेषादिति वा । न केवलं द्विजातीनां, किन्तु शूद्रस्यापीत्यपेर्थः । तथा च शूद्रस्यापि वेदविद्याधिकारः प्राप्नोति । कुतः ? **'मनुष्याधिकारत्वात्'** इत्यनेन मनुष्याणामधिकारस्योक्तत्वात् । अधिकारोपयोगितयोक्ते मनुष्यत्वे च शूद्रस्य द्विजातिभ्यः **'अविशेषात्'** विशेषाभावात् ॥

ननु न मनुष्यत्वं वेदविद्याधिकारोपयोगि, किन्तु विशिष्टबुद्ध्यादिमत्त्वमेवेत्यतोऽप्याह – **अविशेषादिति** ॥ शूद्रस्य विशिष्टबुद्ध्यादिमत्त्वेऽप्यन्येभ्यः **'अविशेषात्'** विशेषाभावादित्यर्थः ॥

[२]एवमविशेषाख्ययुक्तिमभिधाय शूद्रस्य वेदविद्याधिकारादर्शनात्, अनधिकार इत्यतो लिङ्गदर्शनमाह – **पौत्रायणोक्तेरिति** ॥ छान्दोग्ये पौत्रायणस्य वैदिकसंवर्गविद्याध्ययनोक्तेर्दर्शनादित्यर्थः । ननु पौत्रायणाख्य-

---

१. **'-रन्वेष्या'** – प.

२. **'एवमविशेषाख्यां युक्तिम् अभिधाय ननु शूद्रस्य'** – प.

पुरुषस्य शूद्रत्वमेव कुत इत्यतः तज्ज्ञापकमाह – **अह हारेत्वा शूद्रेति ॥ पौत्रायणोक्तेरिति ॥** पौत्रायणं प्रति रैक्कोक्तेस्तत्कर्तृकसम्बोधनादेवेत्यर्थः । नन्वधिकाराभावेऽपि पौत्रायणो वेदविद्यां विचारयामासेति किं न स्यादित्यतोऽप्याह – **पौत्रायणोक्तेरिति ॥** पौत्रायणं प्रति रैक्केण निस्पृहेण मुनिना संवर्गविद्योपदेशादित्यर्थः । अनधिकारिणं प्रति मुनेरुपदेशासम्भवात् ॥ पौत्रायणस्य अर्थाच्छ्रुतावधिकारोक्तेश्चेति वा योजना । अधिकार इत्यनन्तरमतो विरोध इत्यनुकृष्यते । तस्योक्त इत्यनेनान्वयः ॥

अनेनोक्तन्यायेन उक्तार्थे श्रुत्यादिप्रमाणविरोधाक्षेपात् पूर्वेणास्याऽक्षेपिकी सङ्गतिः, वेदविद्याधिकाराख्यो विषयः, सयुक्तिकपूर्वपक्षश्च दर्शितो भवति ॥

छान्दोग्ये चतुर्थाध्याये संवर्गप्रकरणे हीत्थमाख्यायिका – पौत्रायणो नाम राजा प्रासादाग्रे निशायां शयानोऽभूत् । तदा प्रासादोपरि हंसपक्षिणोऽगमन् । उपरिपततां परस्परं वार्तां कुर्वतां तेषां मध्ये द्वावग्रगामिनावास्ताम् । तत्रैक एकमुवाच । किमिति ? अरे पौत्रायणीयं तेजस्त्वं मा गमः । तत्सम्बन्धे तदीयं तेजस्त्वां दहेदिति । एवमुक्तः परो हंसः [१]कमित्याक्षेपवचनेन राजानमनादृत्य रैक्कमुनिमेव प्रशशंस । तच्छ्रुत्वा परितप्तमना राजा तल्पादुत्थितस्त्वरया स्वसारथिमाहूय रैक्कगवेषणायाऽदिदेश । स तत्र तत्र रैक्कमन्विष्यन् नाविदमिति प्रथममागतः । पुनस्तल्लक्षणोक्तिपूर्वकं [२] राज्ञा तन्मार्गणायाऽदिष्टः पुनरन्विष्य क्वचित् प्रदेशे रैक्कमवलोक्य पुना राजानं प्रत्येत्याऽह – रैक्कमविदमिति[३] यथावृत्तमवदत् । तदा राजा स्वसारथिवचनेन रैक्कमुनिस्थानं निश्चित्य तस्मात् तत्त्वं विविदिषुर्गुरुदक्षिणां गृहीत्वा तत्समीपं

१. 'किमित्याक्षेपवचनैः'– प.
२. 'तर्जनोक्तिपूर्वकं' – प.
३. 'अहं रैक्कमविदमिति' – प.

जगाम । अथ द्वारि शकटस्याधस्थात् स्थितं रैकं दृष्ट्वा सम्बोध्य[१] दक्षिणां निवेद्य मह्यं विद्यां ब्रूहीत्युवाच । तदा तं पौत्रायणं परो लोकविलक्षणो रैक्वः प्रत्याचख्यौ । किमिति ? अह हारेत्वा शूद्रेत्यादि । अत्र अहेति सम्बोधनं, हार इत्वेति भिन्नपदत्वे विसर्गलोपे[२] गुणे हारेत्वेति भवति । तथा च हे शूद्र हारः कण्ठमालाख्यं भूषणं इत्वा रथः । तत्त्वप्रदीपरीत्या शकटो वा । गोभिः सह तवास्त्वित्यर्थः । हारेत्वानावित्येकपदत्वपक्षे द्विवचनस्य एकवचनादेशो वा आकारादेशो वा कर्तव्यः । प्रत्येकं चास्तु इति क्रियासम्बन्धः ॥

अत आह –

सू – ॐ ॥ शुगस्य तदनादरश्रवणात्
तदाद्रवणात् सूच्यते हि ॥ ॐ ॥ ३४ ॥

नासौ पौत्रायणःशूद्रः, शुचाऽऽद्रवणमेव शूद्रत्वम्[३] ।

सिद्धान्तयत्सूत्रमवतारयति – **अत इति** ॥ अविशेषाख्ययुक्तेः श्रवणसूत्रे निराकरिष्यमाणत्वात्, पूर्वपक्ष्युक्तलिङ्गदर्शनस्यान्यथोपपत्तिप्रदर्शनाय प्रवृत्तस्य तदाद्रवणादित्यस्यान्वययोग्यार्थाकाङ्क्षोत्थापकं सूत्रस्य फलितार्थं दर्शयति – **नेति** ॥ **'असौ'** रैक्वेण सम्बोधितः पौत्रायणो **'न शूद्रः'** जात्या[४] शूद्रो न, किन्तु क्षत्रिय इत्यर्थः । तर्हि कथमस्य शूद्रेति सम्बोधितत्वं युज्यते रूढ्यभावादित्यतो योगादेवेत्याशयेन तच्छब्दप्रवृत्तिनिमित्तप्रदर्शकं तदाद्रवणादिति सूत्रांशं सावधारणं व्याचष्टे – **शुचेति** ॥ **'शुचा'** शोकेन[५] रैकं क्षत्तारं वा प्रत्याशुगमनमेव **'शूद्रत्वम्'** शूद्रेति सम्बोधने निमित्तं, न तु

१. 'तं सम्बोध्य' – प. २. 'विसर्गलोपेन' – प.
३. 'शूद्रशब्देनोक्तम्' ह. ४. 'चतुर्थजात्या' – प.
५. 'शोकेन दुःखेन रैकं क्षत्तारं प्रति वाऽऽशुगमनमेव' – प.

जातिरित्यर्थः । अनेन तदाद्रवणादित्यस्य सूत्रे शूद्रत्वमित्यध्याहृतेन शूद्रेति सम्बोधितत्वरूपार्थबोधकेन [१]पदेनान्वयः सूचितः । तथा च न सम्बोधनानुपपत्तिरिति नेदं शूद्रस्य वेदविद्याधिकारे लिङ्गमित्यतो न शूद्रस्य वेदविद्याधिकार इति नञावृत्त्या अन्वयः ॥ एवेत्यनेन अयं शूद्रशब्दः शुचा द्रवणाच्छूद्र इति नैरुक्त एव, न तु **'शुचेर्दश्च'** इत्युणादिसूत्रेण रप्रत्यये धातोश्च दीर्घे चकारस्य दकारादेशे च निष्पन्नो रूढ इत्युक्तं भवति ॥

पौत्रायण इत्यनेन बुद्धिस्थपरामर्शकेदंशब्दार्थः शुचेत्यनेन प्रागुक्तवाचिसौत्रद्वितीयतच्छब्दार्थः, त्वप्रत्ययेन निमित्तार्थकपञ्चम्यर्थश्च दर्शितः । सूत्रकारस्य सदा सर्वज्ञत्वेन शुगस्येत्युक्तिः[२] । भाष्ये **'सः'** इति श्रुत्यनुसारेणासाविति परोक्षेणोक्तिश्च युक्ता ॥

'कम्वर एनमेतत्सन्तम्' (छां.४.१.३) इत्यनादरश्रवणात् ।

कस्मान्निमित्तादस्य शोक इत्यस्योत्तरतया प्रवृत्तं शुगस्य तदनादरश्रवणादिति सूत्रखण्डं व्याचष्टे – **कम्वर** इति ॥ कं उ अरे इति पदच्छेदः । **'अरे'** हंस ! एतद्वचनं कमेनमुद्दिश्याऽत्थ **'सन्तं'** निर्दुष्टं **'सयुग्वानं'** सशकटं रैक्कमित्येवेत्यर्थः । उ इति निपातः, अस्य निन्दार्थः । अस्मिन् राज्ञि वक्तुमननुरूपमिदम्, एवं वक्तुं रैक्क एव योग्य इत्यर्थः । **'एतत्सन्तं'** निन्द्यं सन्तमात्थेत्यर्थः तत्त्वप्रदीपेऽभिहितः । **'एतत्सन्तम्'** अत्र सन्तमिति वा । इत्यनादरश्रवणादिति । अनादरो निन्दा । तथा च इत्येवंरूपस्य हंसकृतानादरबोधकवाक्यस्य हंसात् स्वानादरवाक्यस्य वा श्रवणादित्यर्थः । श्रवणादित्यनन्तरं प्राप्तयेति शेषः । अस्य शुचेत्यनेनान्वयः ॥

---

१. **'-र्थबोधनपदेना-'** – प.

२. **'सर्वज्ञत्वेन सूत्रेऽस्येत्युक्तिः'**। – प.

'स ह सञ्जिहान एव क्षत्तारमुवाच' *(छां.४.१.५)*

इति सूच्यते हि ॥ ३४ ॥

ननु श्रुतानादरस्यापि राज्ञः कुतः शोकोत्पत्तिर्ज्ञायते । न च प्रत्यक्षात् तन्निश्चयः । अनादरश्रवणरूपपरबुद्धेरप्रत्यक्षत्वेन ततः शोकोत्पत्तेरप्रत्यक्षत्वात्[1]। न च कारणानुमानात् कार्यानुमितिः । कारणस्य कार्याविनाभावाभावादित्यतः प्रवृत्तं **'सूच्यते हि'** इति सूत्रशेषं व्याचष्टे – **स हेति ॥** हेत्याश्चर्ये । **'सः'** श्रुतानादरः पौत्रायणः **'सञ्जिहान एव'** शयनीयादुत्तिष्ठन्नेव **'क्षत्तारं'** सारथिं प्रति रैकगवेषणायोवाचेति श्रुत्यर्थः । **इति सूच्यते हीति ॥** इत्येतद्वाक्यार्थान्यथानुपपत्त्या ज्ञातेन रैके व्यासक्तमनस्कत्वेन कार्येण तत्कारणं शुगस्य 'सूच्यते' ज्ञायत इत्यर्थः ॥

कारणस्य कार्याविनाभावाभावेऽपि कार्यस्य कारणाविनाभावस्यावश्यम्भावादिति भावः । अस्य तदनादरस्य श्रवणात् प्राप्तया शुचाऽऽद्रवणमेवेति पूर्वेणान्वयः । शोकेनाऽद्रवणाख्यनिमित्तपरिज्ञानं च रैकमुनेः सार्वज्ञ्यादुपपद्यते । तदुक्तं छान्दोग्यभाष्ये –

'राजा पौत्रायणः शोकाच्छूद्रेति मुनिनोदितः ।
प्राणविद्यामवाप्यास्मात् परं धर्ममवाप्तवान् ॥' इति ॥

'शोकात्' शोकेनाऽद्रवणादित्यर्थः । अथवा – शोकशब्दोपपदाद् आङ्पूर्वकाद् **'अत सातत्यगमने'** इत्यस्मात् किपि रूपमेतत् । तथात्वे यत इति शेषः । ननु सूत्रे तद्द्रवणादित्येतावता पूर्तौ आङ्प्रश्लेषः किमर्थ इति चेत्, न । श्रुतौ शुद्रेति वक्तव्यत्वेऽपि शोकाधिक्यज्ञापनार्थं शूद्रेति ऊकाररूपो यो दीर्घस्वरः श्रुतः तदर्थव्यक्त्यर्थत्वात् । न च शूग्द्रेति वक्तव्ये श्रुतौ शूद्रेत्युक्तिः

---

१. **'शोकोत्पत्तेरनुमानात् । न च कारणात् कार्यानुमितिः ।'** – प.

कथमिति वाच्यम् । **'तस्माद् रुग्द्रावणाद् रुद्रः'** इति श्रुतौ गकारस्य दकारादेशेन यथाप्रयोगस्तथोपपत्तेः । अत एव तत्त्वप्रदीपे तृतीयस्य तृतीयोऽतिशयार्थत्वादित्युक्तम्[१] । **'रुजं द्रावयते'** इति स्मृताविवोपपत्तेश्च ॥

अनेन – शुचा **'आद्रवणात्'** रैकं प्रति शीघ्रगमनादेव निमित्तादस्य पौत्रायणस्य शूद्रत्वं शूद्रेति सम्बोधितत्वम्, न तु वर्णावरत्वात् । शुक् च शोकश्चास्य तदनादरश्रवणादासीत् । तदिति श्रुत्युक्तपरामर्शः। क्रियाकर्तृभावः षष्ठ्यर्थः । तथा च **'तस्य अनादरश्रवणात्'** हंसकृतानादरश्रवणाद् इत्यर्थः । तत्त्वप्रदीपरीत्या तस्माद्धंसात् स्वानादरश्रवणादित्यर्थः[२] । मध्यमपदलोपी समास इति केचित् ॥

ननु श्रुतानादरस्यापि कुतः शोकोत्पत्तिर्ज्ञायते, परबुद्धेः शोकपदोक्तदुःखानुभवस्याप्रत्यक्षत्वादित्यत उक्तं – **सूच्यते हीति** ॥ 'हि' यस्मात् **'सह'** इति वाक्यार्थानुपपत्त्या ज्ञातेन तद्वचग्रमनस्कत्वाख्यकार्येण तत्कारणं शुगस्य **'सूच्यते'** ज्ञायते । तस्माद् अतो न शूद्रेति सम्बोधनं शूद्रस्य वेदाधिकारे लिङ्गमिति नैतद्बलाच्छूद्रस्य वेदविद्याधिकार इति भाव इति सूत्रार्थ उक्तो भवति ॥

सू – ॐ ॥ [३]क्षत्रियत्वावगतेश्चोत्तरत्र
चैत्ररथेन लिङ्गात् ॥ ॐ ॥ ३५ ॥

'अयमश्वतरी रथः' इति चित्ररथसम्बन्धित्वेन लिङ्गेन **पौत्रायणस्य क्षत्रियत्वावगतेश्च ।**

---

१. इदं वाक्यं प. पाठे नास्ति ।
२. '-श्रवणादिति वाऽर्थः' –प. ।
३. 'क्षत्रियत्वगतेः' ह.

'स ह सञ्जिहान एव क्षत्तारमुवाच' *(छां.४.१.५)*

इति सूच्यते हि ॥ ३४ ॥

ननु श्रुतानादरस्यापि राज्ञः कुतः शोकोत्पत्तिर्ज्ञायते । न च प्रत्यक्षात् तन्निश्चयः । अनादरश्रवणरूपपरबुद्धेरप्रत्यक्षत्वेन ततः शोकोत्पत्तेरप्रत्यक्षत्वात्[1]। न च कारणानुमानात् कार्यानुमितिः । कारणस्य कार्याविनाभावाभावादित्यतः प्रवृत्तं **'सूच्यते हि'** इति सूत्रशेषं व्याचष्टे – **स हेति ॥** हेत्याश्चर्ये । **'सः'** श्रुतानादरः पौत्रायणः **'सञ्जिहान एव'** शयनीयादुत्तिष्ठन्नेव **'क्षत्तारं'** सारथिं प्रति रैक्वगवेषणायोवाचेति श्रुत्यर्थः । **इति सूच्यते हीति ॥** इत्येतद्वाक्यार्थान्यथानुपपत्त्या ज्ञातेन रैक्वे व्यासक्तमनस्कत्वेन कार्येण तत्कारणं शुगस्य 'सूच्यते' ज्ञायत इत्यर्थः ॥

कारणस्य कार्याविनाभावाभावेऽपि कार्यस्य कारणाविनाभावस्यावश्यम्भावादिति भावः । अस्य तदनादरस्य श्रवणात् प्राप्तया शुचाऽऽद्रवणमेवेति पूर्वेणान्वयः । शोकेनाऽद्रवणाख्यनिमित्तपरिज्ञानं च रैक्वमुनेः सार्वज्ञ्यादुपपद्यते । तदुक्तं छान्दोग्यभाष्ये –

'राजा पौत्रायणः शोकाच्छूद्रेति मुनिनोदितः ।
प्राणविद्यामवाप्यास्मात् परं धर्ममवाप्तवान् ॥' इति ॥

'शोकात्' शोकेनाऽद्रवणादित्यर्थः । अथवा – शोकशब्दोपपदाद् आङ्पूर्वकाद् **'अत सातत्यगमने'** इत्यस्मात् किपि रूपमेतत् । तथात्वे यत इति शेषः । ननु सूत्रे तद्रवणादित्येतावता पूर्तौ आङ्प्रश्लेषः किमर्थ इति चेत्, न । श्रुतौ शुद्रेति वक्तव्यत्वेऽपि शोकाधिक्यज्ञापनार्थं शूद्रेति ऊकाररूपो यो दीर्घस्वरः श्रुतः तदर्थव्यक्त्यर्थत्वात् । न च शूग्द्रेति वक्तव्ये श्रुतौ शूद्रेत्युक्तिः

१. **'शोकोत्पत्तेरनुमानात् । न च कारणात् कार्यानुमितिः ।'** – प.

कथमिति वाच्यम् । **'तस्माद् रुग्द्रावणाद् रुद्रः'** इति श्रुतौ गकारस्य दकारादेशेन यथाप्रयोगस्तथोपपत्तेः । अत एव तत्त्वप्रदीपे तृतीयस्य तृतीयोऽतिशयार्थत्वादित्युक्तम्[१] । **'रुजं द्रावयते'** इति स्मृताविवोपपत्तेश्च ॥

अनेन – शुचा **'आद्रवणात्'** रैकं प्रति शीघ्रगमनादेव निमित्तादस्य पौत्रायणस्य शूद्रत्वं शूद्रेति सम्बोधितत्वम्, न तु वर्णावरत्वात् । शुक् च शोकश्चास्य तदनादरश्रवणादासीत् । तदिति श्रुत्युक्तपरामर्शः। क्रियाकर्तृभावः षष्ठ्यर्थः । तथा च **'तस्य अनादरश्रवणात्'** हंसकृतानादरश्रवणाद् इत्यर्थः । तत्त्वप्रदीपरीत्या तस्माद्धंसात् स्वानादरश्रवणादित्यर्थः[२] । मध्यमपदलोपी समास इति केचित् ॥

ननु श्रुतानादरस्यापि कुतः शोकोत्पत्तिर्ज्ञायते, परबुद्धेः शोकपदोक्तदुःखानुभवस्याप्रत्यक्षत्वादित्यत उक्तं – **सूच्यते हीति** ॥ 'हि' यस्मात् **'सह'** इति वाक्यार्थानुपपत्त्या ज्ञातेन तद्वच्यग्रमनस्कत्वाख्यकार्येण तत्कारणं शुगस्य **'सूच्यते'** ज्ञायते । तस्माद् अतो न शूद्रेति सम्बोधनं शूद्रस्य वेदाधिकारे लिङ्गमिति नैतद्बलाच्छूद्रस्य वेदविद्याधिकार इति भाव इति सूत्रार्थ उक्तो भवति ॥

सू – ॐ ॥ [३]क्षत्रियत्वावगतेश्चोत्तरत्र
चैत्ररथेन लिङ्गात् ॥ ॐ ॥ ३५ ॥

'अयमश्वतरी रथः' इति चित्ररथसम्बन्धित्वेन लिङ्गेन **पौत्रायणस्य क्षत्रियत्वावगतेश्च ।**

---

१. इदं वाक्यं प. पाठे नास्ति ।
२. '-श्रवणादिति वाऽर्थः' –प. ।
३. 'क्षत्रियत्वगतेः' ह.

ननु शूद्रशब्दोऽयं कुतो यौगिकोऽङ्गीक्रियते, रूढार्थ एव किं न स्यात् । योगरूढ्योर्मध्ये रूढेरेव प्राबल्यात् । तथा च पौत्रायणनिदर्शनेनैव शूद्रस्य वेद-विद्याधिकारसिद्धिरित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे – **क्षत्रियत्वेति ॥** अत्र **'अयम्'** इत्यतः प्राक् **'उत्तरत्र'** इति सौत्रपदं सम्बन्धनीयम् । श्रुतेनेति शेषः । तथा च उत्तरत्र रैकं प्रति पौत्रायणस्य आद्रवणात्, उत्तरत्र तत्प्रतिपादनानन्तरम् ॥

यद्वा, शूद्रशब्देन सम्बोधनाद् उत्तरत्र **'अयमश्वतरी रथः'** इति श्रुतेनेत्यर्थः । पौत्रायणेन दीयमानस्य रथस्य अन्यदीयत्वशङ्कानिरासाय सूत्रे चैत्ररथेनेति भावप्रधानपदं प्रयुक्तम् । अन्यथा चित्ररथेनेत्येवावक्ष्यत् । तत्र चित्रश्चासौ रथश्च चित्ररथः तस्यायं चैत्ररथ इति विग्रहमभिप्रेत्य प्रत्ययार्थं प्रदर्शयन् तद् व्याचष्टे – **चित्ररथसम्बन्धित्वेनेति ॥** स्वाभाविकचित्ररथ-सम्बन्धित्वेनेत्यर्थः । अत्र रथमात्रमेव लिङ्गं, चित्रपदं तु स्वरूपकथनार्थम् ॥ यद्वा –अपूर्वरथयोगेन क्षत्रियत्वसम्भावनार्थं तत्पदम् ॥अथवा यदा रथित्वेनैव क्षत्रियत्वस्य निश्चयः, तदा सुतरां चित्ररथित्वेनेति सूचनार्थं तत्पदम् ॥

यद्यपि **'अयमश्वतरीरथः'** इत्यत्र चित्ररथमात्रश्रवणेऽपि न तत्सम्बन्धोऽस्य श्रूयते । तथाऽपि तत्पूर्ववाक्ये **'हारेत्वा तवैव'** इति षष्ठ्या इत्वाशब्दार्थरथसम्बन्धो गम्यत इति तस्याश्च रथसम्बन्धे श्रुतिरूपत्वाद् युक्तमुक्तम् ॥ चित्रो रथो यस्येति चित्ररथस्तस्य भावः चैत्ररथस्तेनेति व्याख्यानं तु भावेऽणप्रत्ययस्य कल्प्यत्वात् श्रुतिभाष्यविरुद्धत्वाच्च अयुक्तम् ॥ नच चैत्ररथेनेति सम्बन्धोक्तिमात्रेण कथमन्यदीयत्वशङ्कानिरास इति वाच्यम् । स्वतः प्राप्ततदीयत्वे बाधकाभावे तदीयत्वस्यैव स्वाभाविकत्वसम्भवे नैमित्तिकग्रहणायोगात् । '[1]**स्वत्वाभावे धनायोगात्**' इत्यादिन्यायप्राप्तत्वात् ॥

---

१. **'स्वत्वाभावे चा...योगात् ।'** – प.

रथेन लिङ्गादित्यनयोः सामानाधिकरण्याय लिङ्गादिति पञ्चमीं व्यत्ययेन व्याचष्टे – **लिङ्गेनेति** ॥ पौत्रायणस्येत्येतद् अस्येत्यनुवृत्तपदस्य अर्थकथनम् । क्षत्रियत्वावगतेरित्यस्य शुचाऽऽद्रवणादेवास्य शूद्रत्वं न तु रूढ्येति पूर्वेणान्वयः । चशब्दो लिङ्गेन चेति सम्बध्यते । तेन '[1]**बहुदायी**' इत्यादिवाक्यशेषोक्तं लिङ्गं समुच्चीयते । लिङ्गस्य श्रुतितश्चरमत्वेनानेकत्वेन च प्राबल्यसूचनाय वा चशब्दः । एवं सूत्रेऽपि चशब्दो भिन्नक्रमः, उक्तप्रयोजनकश्च । एवं च रूढेरेव प्राबल्येऽप्यत्र श्रुतानेकलिङ्गरूपबाधकात् शूद्रशब्दस्य योगवृत्त्यङ्गीकार एव युक्त इति भावः ॥

'गर्दभादश्वायां जाता अश्वतर्यः' इति तत्त्वप्रदीपे । **'गर्दभीषु अश्वैर्जाता अश्वतर्यः'** इति व्यासतीर्थीये । तद्युक्तो रथः अश्वतरीरथः तव दक्षिणात्वेन वर्तत इत्यर्थः । रैकं प्रति पौत्रायणवाक्यमेतत् ॥

'रथस्त्वश्वतरीयुक्तश्चित्र इत्यभिधीयते ।' इति ब्राह्मे ।

ननु श्रुतावश्वतरीरथशब्दप्रयोगात् सूत्रेऽपि तथैव प्रयोक्तव्ये कथं सूत्रकृत् चित्ररथशब्दं प्रायुङ्क्तेत्याशङ्क्य उभयोरर्थैक्यान्न विसंवाद इत्याशयेन तत्राभिधानमाह – **रथ इति** ॥ तुशब्दो विशेषार्थोऽवधारणे वा । अश्वतरीयुक्त एवेति सम्बध्यते । अत्र रथ इति वास्तवविशेषोक्तिरेव, न तु रथत्वस्यापि शक्यकोटिप्रवेशः । तथा च सूत्रे रथत्वप्रकारकबोधाय रथशब्दप्रयोग इति न तद्वैयर्थ्यमिति ध्येयम् । इति ब्राह्मे उक्तत्वान्न श्रुतिसूत्रयोर्वैरूप्यमित्युपस्कारेणान्वयः ।

'यत्र वेदो रथस्तत्र न वेदो यत्र नो रथः ।'

इति ब्रह्मवैवर्ते ॥ ३५ ॥

---

१. 'वहुशायी' – प.

एवं साक्षादेव स्वाभाविकरथेन पौत्रायणस्य क्षत्रियत्वं प्रसाधितम् । स्वाभाविकरथित्वेऽप्यस्य वर्णावरत्वं किं न स्यादित्यप्रयोजकत्वमाशङ्क्य चैवम् – आगन्तुकस्यापि रथस्य वेदं विनाऽयोगात् **'वेदस्य च संस्कारेति वक्ष्यमाणन्यायेन शूद्रेऽयोगात्'** रथमात्रेण वेदानुमानद्वारा पौत्रायणस्य शूद्रत्वाभावसिद्धेरित्याशयेन रथेन वेदानुमाने व्यभिचारशङ्कापरिहाराय आगमेनोभयव्याप्तिं दर्शयति – **यत्रेति ॥ 'तत्र'** तत्रैवेत्यर्थः । तेन यत्र वह्निः तत्रैव धूम इत्यादाविव वेदस्य व्यापकतालाभः । अत एव व्यतिरेकप्रदर्शकांशे न वेद इति वेदाभावस्य प्रथममुक्तिः[१] ॥

स्मृतौ रथशब्देन आगन्तुकस्वाभाविकसाधारणरथमात्रस्य विवक्षितत्वात्, समव्याप्त्यभिप्रायेण वा यत्र वेद इत्युक्तिः । अत एव टीकायां **'रथस्य वेदाविनाभावात्'** इति रथस्य व्याप्यत्वमुक्त्वा **'वैदिकत्वमात्रे विद्यमानं रथित्वम्'** इत्यनेन तस्य व्यापकत्वमुक्तम् ॥ वस्तुतस्तु – यत्र रथस्तत्र वेद इति योजनायां नानुपपत्तिः । तथा च अनेन व्याप्तिनिश्चयान्न व्यभिचारशङ्केति यादृशतादृशरथमात्रेण वेदानुमानद्वारा शूद्रत्वाभावनिश्चयान्न पौत्रायणस्य वेदबाह्यवर्णावरत्वं शङ्क्यमिति भावः ॥

एतेन पूर्वपक्षिणा शूद्रेऽपि वेदाङ्गीकारान्न तेन शूद्रत्वाभावसाधनं युक्तमिति निरस्तं, तस्योत्तरसूत्रे निराकरिष्यमाणत्वात् । न च ब्राह्मणादिसाधारणरथित्वेनास्य वैदिकत्वनिश्चयेऽपि तद्वाराऽशूद्रत्वसिद्धावपि कथं क्षत्रियत्वनिश्चय इति वाच्यम् । रथित्वमात्रस्य वैदिकत्वव्याप्तत्वोक्त्या स्वाभाविकरथित्वस्य वैदिकविशेषक्षत्रियत्वव्याप्तत्वेनापि स्मृत्यभिप्रेतत्वात् । तस्य च कादाचित्करथवति ब्राह्मणादावभावात् तेन साक्षादेव क्षत्रियत्वनिश्चयोपपत्तिः । न च **'अपलायनं च शूद्रस्य'** इत्यनेन

---

१. **'पृथगुक्तिः'** – प.

प्राप्तयोद्धृत्वान्यथानुपपत्त्या शूद्रस्य रथित्वप्रतीतेस्तत्र व्यभिचार इति वाच्यम् । अपलायनेन योद्धृत्वस्य पदातितयोपपत्त्या रथित्वानाक्षेपकत्वात् । ब्रह्मवैवर्त इत्यस्य उक्तत्वादित्यध्याहारेण नासौ शूद्र इत्यनेनान्वयः । इति ज्ञायत इति शेषः ॥

अनेन – **'आद्रवणात्'** सम्बोधनाद्वा **'उत्तरत्र'** **'अयमश्वतरीरथः'** (छां.४.२.२.) इति श्रुतेन **'चैत्ररथेन लिङ्गात्'** लिङ्गेन स्वाभाविकरथेन लिङ्गेन [१]बहुदायित्वादिलिङ्गेन चास्य पौत्रायणस्य क्षत्रियत्वावगतेः । अस्माद् बाधकात् तदाद्रवणान्निमित्तादेवास्य शूद्रत्वम्, न तु जात्याऽसौ शूद्रः । तथा रथेन वेदनिश्चयाच्च नासौ शूद्र इति सूत्रार्थ उक्तो भवति ॥

सू – ॐ ॥ संस्कारपरामर्शात्
तदभावाभिलापाच्च ॥ ॐ ॥ ३६ ॥

'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत'
इत्यध्ययनार्थं[२] संस्कारपरामर्शात् ।

यदुक्तं रथित्वलिङ्गेन पौत्रायणस्य क्षत्रियत्वावगमात्, न तल्लिङ्गेन शूद्रस्य वेदाधिकारसिद्धिरिति । न तद्युक्तं – शूद्रस्यापि रथित्वसम्भवात् । न च रथस्य वेदव्याप्यत्वाच्छूद्रे च तदभावाद् रथस्याप्यभाव इति वाच्यम् । शूद्रेऽपि [३] वेदाधिकाराङ्गीकारादित्याशङ्कां परिहरत्सूत्रमुपन्यस्यति – **संस्कारेति** ॥ अत्र **'अष्टवर्षं ब्राह्मणमुपनयीत । तमध्यापयीत'** इति श्रुतौ ब्राह्मणस्यैवाध्ययने उपनयनापेक्षा, नान्येषामित्याशङ्कापरिहाराय प्रवृत्तं

---

१. 'बहुशायित्वादिना चास्य' – प.
२. 'इत्यध्ययनस्य' ह.
३. 'वेदाधिकारादित्याशङ्कां' –प.

संस्कारपरामर्शादित्यंशं व्याचष्टे – **अष्टवर्षमिति** ॥ उपनयीतेत्यनन्तरम् इत्युपनयनमुक्त्वेति शेषः । **'तम्'** उपनीतं माणवकमात्मन आचार्यकरण-कामोऽध्यापयीतेत्यर्थः । इतिशब्दानन्तरं श्रुताविति शेषः ॥

'अन्यार्थवचनं परामर्शः' इत्याशयेन परामर्शपदं व्याचष्टे – **अध्ययनार्थमिति** ॥ अध्ययनाङ्गतयेत्यर्थः । अध्यापनवाक्यस्यापि **'स्वाध्यायोऽध्येतव्यः'** (तै.आ.२.१५.१) इति श्रुत्यनुरोधेन जीविकार्थाध्ययन-विधिपरत्वादिति भावः । **'संस्कारपरामर्शात्'** उपनयनाख्यसंस्कारमात्र-वचनादित्यर्थः । तच्छब्देनेति शेषः । न तु ब्राह्मणपरामर्श इति मात्रशब्दार्थः । तथा च नोक्तशङ्कावकाश इति भावः ॥

केचित्तु – श्रुतिगतब्राह्मणशब्दोऽत्र ब्रह्माणनयोग्यत्रैवर्णिकपर इत्याहुः । तच्चिन्त्यम्, शङ्कासमाधाननानुगुणत्वात् । कुत एवं कल्प्यत इत्यतः स्मृतावप्युपनयनाख्यद्वितीयजन्मवत एव सारण्यकवेदाध्ययनविधानादि-त्याशयेन सूत्रे भाष्ये च **'वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना'** इति स्मृतिसमुच्चयार्थकश्चशब्दः प्रायोजि । सः परामर्शादित्यनेनान्वेति । परामर्शाच्चेत्यनन्तरम् अध्ययनस्य[1] संस्कारसापेक्षत्वावगमादिति शेषः ॥

'नाग्निर्न यज्ञो न क्रिया[2] न संस्कारो न व्रतानि शूद्रस्य' इति पैङ्गिश्रुतौ संस्काराभावाभिलापाच्च ।

[3]नन्वस्त्वध्ययनस्योपनयनसंस्कारसापेक्षत्वं, तथाऽपि न शूद्रस्य वेदाध्ययनाभावसिद्धिः । शूद्रस्यापि संस्कारसम्भवादित्यतः प्रवृत्तं

१. **'अध्ययनाख्यसंस्कार-'** – प.
२. **'न क्रिया'** इति हपाठे नास्ति ।
३. **'नन्वस्त्वध्ययनस्य संस्कारसापेक्षत्वम्'** – प.

'तदभावाभिलापात्' इति सूत्रखण्डं व्याचष्टे – **नाग्निरिति** ॥ **'अभिलापात्'** अभिधानादिति । अस्य सूत्रे अध्याहृतेन **'न शूद्रस्य वेदाधिकारो, न वा तदविनाभूतं रथित्वम्'** [१] इति साध्येनान्वयः । **'अग्निः'**, श्रौतः स्मार्तश्च । **'यज्ञः'** अग्निहोत्रादिः, दैवपित्र्यादियज्ञो वा । **'क्रिया'** सन्ध्यावन्दनादिरूपा, उत्तरक्रिया वा । संस्कार उपनयनादिः । **'व्रतानि'** कृच्छ्रचान्द्रायणादीनि ॥

[२]उत्तमस्त्रीणां तु न शूद्रवत् ।
'सपत्नीं मे पराधम' *(मन्त्रप्रश्न -१-१६)*
इत्यादिष्वधिकारदर्शनात् ।

नन्वेवं संस्काराभावेन वेदानधिकारश्चेदुत्तमस्त्रीणामपि तत्प्रसङ्गः । संस्काराभावेऽपि तासामधिकारे शूद्रस्यापि तत्प्राप्तिरित्यत आह –उत्तमेति ॥ तुशब्दो वेदद्रष्टृत्वाख्यविशेषद्योतकः । 'संस्काराभावेनाभावः' इत्याकृष्यते । अधिकारस्येति शेषः । उत्तमानां स्त्रिय इति विग्रहः, कर्मधारयो वा । तथा च शचीयमीऊर्वश्याद्युत्तमस्त्रीणां शूद्रवन्न संस्काराभावेन वेदविद्याधिकारस्याभावो वक्तव्यः । कुतः ? **'सपत्नीं मे पराधम'** (मन्त्रप्रश्न १.१६.) इत्यादिविद्यासु तासां तद्रष्टृत्वेनाधिकारदर्शनादिति योजना ॥

अत्र 'सपत्नीम्' इति प्रतीकग्रहणेन 'सपत्नीं मे पराधम पतिं मे केवलं कृधि[३] । उत्तराऽहमुत्तर उत्तरेदुत्तराभ्यः' इति समग्रवाक्यं गृह्यते । शचीवाक्यमिदम् । हे भगवन् 'मे सपत्नीं' मदन्यां मत्पतिपाणिगृहीतीं [४]

---

१. .'रथत्वम्' – प.
२. 'उत्तमानां तु स्त्रीणां' ह.
३. 'कुरु' – प.
४. 'गृहीतां' – प.

'पराधम' पराणुद । मम पतिं 'केवलं' मय्येवाऽसक्तं कुरु । 'अहमुत्तराभ्यः' सौन्दर्येणोत्कृष्टाभ्यः मदन्तराभ्यो वा स्त्रीभ्यः 'उत्तरा' उत्कृष्टा सती 'उत्तरेत्' प्रियोत्तमैव 'उत्तरे' सपत्नीक्लेशादुत्तरेयमिति श्रुत्यर्थः । आदिपदेन '[1]उदती पश्यवः सोम एकेभ्यः पर्वते', 'उदसौ सूर्यो अगात्' (ऋ.१०.१५९.१) इत्यादिदेवमातृयमीपौलोम्यादिदृष्टानां ग्रहणम् ।

संस्काराभावेनाभावस्तु सामान्येन ॥

तर्हि [2]संस्काराभावहेतोरुत्तमस्त्रीषु व्यभिचारः स्यादित्यत आह – **संस्कारेति** ॥ अभावो वेदाधिकारस्य । तुशब्दः पूर्वोक्तन्यायस्य सामान्यत्वाख्यविशेषद्योतकः । उक्त इति शेषः । तथा च संस्काराभावेन हेतुना यत्सूत्रे[3] वेदाधिकारस्य अभाव उक्तः सः **'सामान्येन'** सामान्यन्यायेन सापवादनियमाभिप्रायेणैव, न तु निरपवादनियमेन । अतो नापवादविषये व्यभिचार इत्यर्थः । सामान्यत्ववचनेन शूद्रप्रतिबन्दी मोचिता । तथा च संस्काराभावेन[4] वेदाधिकाराभाव इति सामान्यव्याप्तेः शच्यादिषु विद्याधिकारदर्शनाख्यापवादकेन भङ्गेऽपि न शूद्रादावपि तस्य भङ्गः कल्प्यः, तत्र वेदविद्याधिकारे विशेषप्रमाणाख्यापवादकाभावादिति भावः ॥

अस्ति च तासां संस्कारः –

'स्त्रीणां प्रदानकर्मैव यथोपनयनं तथा ।' *(व्यासस्मृतिः)*

इति स्मृतेः ॥ ३६ ॥

---

१. 'उदन्ती पश्यवः सोम एकेभ्यः पवते' – प.

२. 'संस्काराभावे हेतोः' – प.

३. 'यः सूत्रे' – प.

४. 'संस्काराभावे' – प.

एवं स्त्रीणां उपनयनाभावेऽपि पूर्वोक्तव्याप्तेः सामान्यत्वेनापवादसम्भवादस्ति वेदाधिकार इत्युक्तम् । अथोपनयनाख्यविध्यभावेऽपि तत्प्रतिनिधिसद्भावाच्चास्त्यधिकार इत्याह – **अस्ति चेति** ॥ चः अधिकारसमुच्चये । '[1]**तासां**' स्त्रीणां कुत एतदित्यत आह – **स्त्रीणामिति** ॥ पुंसामिति शेषः । तथाच पुंसां यथोपनयनं संस्कारः, तथा स्त्रीणां **'प्रदानकर्मैव'** विवाहक्रियैव संस्कार इति व्यासस्मृत्यर्थः । स्मृतेरित्यस्य तासामित्यनेनान्वयः । इति ज्ञायत इति शेषः ॥

तथा च उत्तमस्त्रीष्विह हेतूकृतस्य [2]विधिप्रतिनिधिसाधारणसंस्कारसामान्याभावस्याभावान्न व्यभिचार इति भावः । न च संस्कारमात्रस्य वेदाधिकारप्रयोजकत्वेऽधमस्त्रीणामपि तदापत्तिरिति वाच्यम् । निषेधाभावसहितस्यैव तस्य प्रयोजकत्वाभ्युपगमात् ।

नन्वेवमुत्तमस्त्रीणां संस्कारयुक्तत्वादेवाधिकारित्वमिति नोक्तन्यायभङ्ग इति वक्तुं शक्यत्वात्, किमर्थं तासु संस्काराभावमङ्गीकृत्य उक्तन्यायस्य सापवादत्ववचनमिति चेत्, न । प्रदानादिशून्यतिर्यगादीनामपि सङ्ग्रहार्थत्वात् । तेषामपि **'अयमग्ने जरिता'** (ऋ.१०.१४२.१) इत्यादिविद्याधिकारदर्शनेनापवादविषयत्वात् ।

अनेन – **'तमध्यापयीत'** इति तच्छब्देन पूर्वप्रकृतोपनयनाख्यसंस्कारमात्रस्य परामर्शाद् वेदः कृत्स्न इति स्मृतेश्चास्य शूद्रस्य तदभावाभिलापान्नाग्निरिति श्रुतौ संस्काराभावाभिधानान्न तस्य वेदाधिकार इति सूत्रार्थ उक्तो भवति ॥

---

१. **'सतां स्त्रीणां'** – प.

२. **'निधिप्रतिनिधि-'** प.

सू –ॐ ॥ तदभावनिर्धारणे च प्रवृत्तेः ॥ ॐ ॥३७॥

'नाहमेतद् वेद भो यद्गोत्रोऽहमस्मि' *(छां.४.४.)*
इति सत्यवचनेन सत्यकामस्य शूद्रत्वाभावनिर्धारणे हारिद्रुमतस्य 'नैतदब्राह्मणो विवक्तुमर्हति' *(छां.४.५.)*
इति तत्संस्कारे[1] प्रवृत्तेश्च ॥ ३७ ॥

ननु शूद्रे संस्काराभावेन वेदविद्याधिकाराभावोक्तिरनुपपन्ना । **'शूद्रं नोपनयीत'** इति निषेधाभावेन[2] तस्यापि संस्कारसम्भवात् । **'नाग्निर्न यज्ञः'** इति श्रुतौ तु शूद्रस्य संस्काराभाव एवोच्यते न त्वसौ न कार्य इति निषिध्यते । अतो न तद्विरोधोऽपीत्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे – **तदभावेति ॥ 'इति सत्यवचनेन'** वाङ्मनसयोरेकरूपयथार्थवचनेन तज्ज्ञापितेनाऽर्जवेनेति यावत् । **'सत्यकामस्य'** तदाख्यस्य ऋषेः एतच्च पूर्वत्रोत्तरत्र च सम्बध्यते । **'सत्यवचनेन सत्यकामस्य'** इत्यादिना सूत्रे तच्छब्दो व्यस्तोऽनेकविभक्तिकः[3] बुद्ध्या विविच्याऽवर्तते इत्युक्तं भवति ॥

शूद्रत्वाभावनिर्धारणे चेत्यस्य नैतदब्राह्मण इत्यनेन सम्बन्धः । चोऽवधारणे । श्रुतावब्राह्मणमात्रस्यानुपनयनाभिप्रायप्रतीतेस्तदनुसारेण ब्राह्मणत्वाभावेत्यनुक्त्वा शूद्रत्वाभावेति तदभावपदव्याख्यानेन श्रुतौ ब्राह्मणशब्दो ब्रह्माणनयोग्यत्रैवर्णिकपर इत्युक्तं भवति ॥

एतद्वाक्यस्य यद्ययमब्राह्मणः शूद्रः[4] स्यात् तर्ह्येतत् सत्यवचनम्

---

१. .'शूद्रत्वाभावनिर्धारणे' ह.
२. **'निषेधकाभावेन'** – प.
३. **'अनेकविभक्तिकत्वेन वुद्ध्या'** – प.
४. **'यद्ययं शूद्रः स्यात्'**– प.

आर्जववचनं वाङ्मनसयोरवैरूप्येण वचनं विवक्तुं नार्हेदिति विपक्षे तर्कोक्तिरूपतया, योऽब्राह्मणः स एवं वक्तुं नार्हति सत्यवचनहीन इति [१]व्यतिरेकव्याप्त्युक्तिरूपतया वा शूद्रत्वाभावनिर्णायकत्वम् । हरिद्रुमतोऽपत्यं हारिद्रुमतः गौतमः । तस्य प्रवृत्तेरिति । अस्य न तदभाव इत्यध्याहृतपदेनान्वयः ॥

तथा चेत्थं महावाक्ययोजना – सत्यकामस्य नाहमेतद् वेदेति सत्यवचनेन नैतदब्राह्मणो विवक्तुमर्हतीति व्यतिरेकव्याप्तिज्ञानेन बाधकतर्केण च शूद्रत्वाभावनिर्धारणे सत्येव तमनुमायैव तस्य सत्यकामस्योपनयनसंस्कारे **'हारिद्रुमतस्य'** गौतमस्य **'प्रवृत्तेः'** प्रवृत्तत्वात् न शूद्रस्य तदभावः संस्कारनिषेधाभाव इति । चो हेतुसमुच्चये ॥

अनेन – सूत्रे तदिति व्यस्तं लुप्तविभक्तिकं पदं समस्तं च तन्त्रेणोपात्तम् । चशब्दोऽवधारणे भिन्नक्रमेण, न केवलं शूद्रस्य संस्काराभावः श्रुतिमात्रात्, किन्तु संस्कारनिषेधज्ञापकलिङ्गाच्चेति समुच्चये च । नेत्यस्ति । तदभाव इत्यनुषज्यते । तथा च **'तस्य'** सत्यकामस्य **'तेन'** सत्यवचनेन मनोवाक्कायकर्मणाम् अवैपरीत्यमार्जवं तदेव सत्यत्वं तादृशवचनेन तेन ज्ञापितेन ऋजुत्वेनेति यावत् । **'नैतदब्राह्मणो विवक्तुमर्हति'** इति व्यतिरेकव्याप्तिं बाधकतर्कं[२] चोपन्यस्य **'तदभावनिर्धारणे च'** तस्य शूद्रत्वाभावनिर्णये सत्येव तदभावमनुमायैव **'समिधं [३]सोम्याऽहरोप त्वानेष्ये'** (छां.४.४.५) इति तस्मिन्नुपनयनसंस्कारे तस्य गौतमस्य प्रवृत्तेर्दर्शनाच्च न शूद्रस्य तदभावः संस्कारनिषेधाभावः । शूद्रस्य उपनयननिषेधाभावे कथमयं

१. 'वक्तुं नार्हतीति सत्यवचन इति व्यतिरेक-' – प.
२. 'व्यतिरेकव्याप्तिबोधकतर्कं' – प.
३. 'सोम्योपाहर' – र.

तदभावनिर्धारणे[१] सत्येव प्रवर्तेत, तेन ज्ञायते निषेधोऽस्तीति भाव इति सूत्रार्थ उक्तो भवति ।

छान्दोग्ये हीत्थमाख्यायिका – सत्यकामो नाम ऋषिः जबालाख्यां मातरमुपेत्योवाच । किमिति ? अहं वेदाध्ययनार्थम् आचार्यमुपगच्छेयं तत्राध्ययनस्योपनयनसंस्कारसापेक्षत्वाद् उपनयनं विना ते मां नाध्यापयेयुः, उपनयनं च गोत्राद्यवचने न कुर्युः, अतोऽहं किंगोत्रोऽस्मि तद् वदेति । एवमुक्ता जबाला स्वपुत्रं सत्यकाममब्रवीत् – हे तात ! त्वं यद्गोत्रोऽसीत्येतन्नाहं वेदेति । एवमुक्तः सत्यकामो गौतममुपेत्योवाच । किमिति ? हे भगवन् ! ब्रह्मचर्यार्थं त्वामुपेयमिति । एवमुक्तो गौतमः हे सोम्य ! त्वं किंगोत्रोऽसि ? तद् वदेत्युवाच । एवमुक्तः सत्यकामः पुनर्गौतमं प्रत्याह – नाहमेतद् वेदेति । भो भगवन् ! पूज्य गौतम अहं यद्गोत्रोऽस्मीत्येतद् वेद्यं **'न वेद'** न जानामीति । अथैवं सत्यकामस्य सत्यवचनेनाऽर्जवं[२] ज्ञात्वा पुनस्तं प्रत्युवाच । नैतदित्यादि ॥

अत्र ब्राह्मणशब्दो ब्रह्माणनयोग्यत्रैवर्णिकपरः । **'आर्जवं ब्राह्मणे साक्षात् शूद्रोऽनार्जवलक्षणः'** इति श्रुतिव्याख्यानरूपायां स्मृतौ ब्राह्मणप्रतियोगित्वेन शूद्रस्योपादानात् । तथा च **'एतत्'** आर्जवसंयुक्तवचनम् **'अब्राह्मणः'** त्रैवर्णिकेतरः शूद्रो **'विवक्तुं'** सर्वथा वक्तुं **'नार्हति'** न योग्यः । अतस्त्वमेवं वदन् ब्राह्मण एवासि, अतो हे सोम्य समिधमुपाहर त्वामुपनेष्य इति ॥

सू – ॐ ॥ श्रवणाध्ययनार्थप्रतिषेधात्
स्मृतेश्च ॥ ॐ ॥ ३८ ॥

---

१. **'निषेधो नास्तीति'** - प.

२. **'सत्यकामस्य वचने आर्जवं'** – प.

'श्रवणे त्रपुजतुभ्यां श्रोत्रपरिपूरणम् । अध्ययने जिह्वाच्छेदः ।
अर्थावधारणे हृदयविदारणम्' *(गौतमधर्म.१२.४.७)*

इति प्रतिषेधात् ।

नन्वविशेषादित्युक्तरीत्या शूद्रस्यापि विशिष्टबुद्ध्यादिमत्त्वेनाधिकारः सिद्ध्येत् । अन्यथा[1] तेन देवताद्यधिकारसिद्धिरपि न स्यादिति शङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे – **श्रवणेति** ॥ सूत्रे **'अर्थावधारणे'** इति श्रुत्यनुसारादर्थशब्दः तदवधारणपरः ॥

तथा च **'श्रवणे त्रपुजतुभ्याम्'** इति श्रुतौ शूद्रस्य वेदश्रवणाध्ययनार्थावधारणानां [2]प्रतिषिद्धत्वादित्यर्थः । अस्य न तदभाव इत्यनुषक्तसाध्येनान्वयः[3]। अध्ययननिषेधाभाव इति तदर्थः । तथा चानिषिद्धत्वे सति विशिष्टबुद्ध्यादिमत्त्वस्यैव वेदाधिकारप्रयोजकत्वेनाङ्गीकृतत्वात्, तस्य च शूद्रेऽभावान्न तस्य देवप्रतिबन्ध्या वेदाधिकारो वाच्य इति भावः । शूद्रेण वेदश्रवणे कृते सति द्रुताभ्यां त्रपुजतुभ्यां वङ्गलाक्षाभ्यां तत्कर्णविवरपरिपूरणं राजभटैः कार्यमिति श्रुत्यर्थः । शिष्टः सुगमः ॥

'नाग्निर्न यज्ञः शूद्रस्य तथैवाध्ययनं कुतः ।
केवलैव तु शुश्रूषा त्रिवर्णानां विधीयते ॥' इति स्मृतेश्च ।

श्रुतौ शूद्रेण श्रवणे कृते इत्यनुक्तेर्वर्णबाह्यविषयेयं श्रुतिः किं न स्यादित्याशङ्कानिवृत्त्यर्थं सूत्रे स्मृतेश्चेत्युक्तं, तां स्मृतिमुदाहरति – **नेति** ॥ यथा **'शूद्रस्य'** शूद्रेण नाग्निः सर्वथाऽऽधातव्यः । पञ्चविधो यज्ञोऽपि नानुष्ठेयः ।

---

१. प. पुस्तके 'अन्यथा' इति पदं नास्ति ।
२. 'प्रतिनिषिद्धत्वादित्यर्थः'– प.
३. 'अनुक्तसाध्येनान्वयः' –प.

तथाऽध्ययनं कुतः भवेत् ? न कुतोऽपि । तर्हि तेनानुष्ठेयं परलोकसाधनं किमिति पृच्छति – तु. **किन्त्विति** ॥ उत्तरमाह – **केवलैवेति** । भृतिरहितेत्यर्थः । त्रयश्च ते वर्णाश्च त्रिवर्णाः, तेषां ब्रह्मक्षत्रियवैश्यानामित्यर्थः । **'शुश्रूषा'** परिचर्यैवेति सम्बन्धः । **विधीयते** । कार्यत्वेनेति शेषः । **इति स्मृतेरित्यस्य** शूद्रस्यैवाध्ययननिषेधावगमान्न तदभाव इत्यध्याहृतेनान्वयः । तथा च स्पष्टस्मृतिबलाच्छ्रुतेरपि शूद्रविषयत्वमेवेति भावः ॥

विदुरादीनां तूत्पन्नज्ञानत्वात् कश्चिद् विशेषः[1] ॥ ३८ ॥

॥ इत्यपशूद्राधिकरणम् ॥ ९ ॥

ननु शूद्रस्य वेदार्थावधारणादेर्निषिद्धत्वे कथं विदुरादीनां वैदिकार्थावधारणमस्ति । एवं संस्काररहितानां वेदानधिकारे कथं क्षत्रियः संस्काररहितः कर्णः निखिलाः श्रुतीरधिजगौ । न च वाच्यमसावपवादविषय इति । अविहितोपनयनत्वे सति निषिद्धाध्ययनानां उत्तमस्त्रीतिर्यगादीनामेवापवादविषयत्वेन निषिद्धाध्ययनानां शूद्राणाम् अतद्विषयत्वादित्यत आह – **विदुरादीनामिति** ॥ आदिपदेन धर्मव्याधादयो गृह्यन्ते । तुशब्दो विशेषार्थः । तमेवाऽह –**उत्पन्नज्ञानत्वादिति** ॥ जन्मान्तर एव वेदात् परम्परयोत्पन्नमपरोक्षज्ञानं येषां ते तथोक्तास्तेषां भावस्तत्त्वम् । तस्मात् **'कश्चित्**[2]' असाधारणः इतरशूद्रादिभ्यो व्यावृत्तो विशेषः तेष्वस्तीत्यर्थः । यत इति शेषः ।

---

१. '-ज्ञानत्वाद् विशेषः' ह.

२. 'कश्चिद् वेदार्थावधारणनिषेधाविषयताप्रयोजक इतरशूद्रादिभ्यो व्यावर्तको विशेषस्तेष्वस्तीत्यर्थः । स चोत्पन्नापरोक्षज्ञानित्वकृतः विदुरादीनां शूद्रत्वेऽपि उत्पन्नापरोक्षज्ञानत्वेन "नाग्निः" इत्यादिनिषेधाविषयत्वादनिषिद्धाध्ययनानां तेषामप्यपवादविषयत्वमेवेति न तत्प्रतिबन्ध्या इतरशूद्राणां वेदाधिकारः शङ्क्य इति भावः ।' – प.

अतो न '**नाग्निः**' इत्यादिनिषेधविषयत्वं तेषां, किन्तु अपवादविषयत्वमेवेति न तत्प्रतिबन्धेतरशूद्राणां वेदाधिकारः शङ्क्य इति भावः । सूत्रार्थस्तु – शूद्रस्य श्रवणे '**त्रपुजतुभ्याम्**' इति वेदश्रवणाध्ययनार्थावधारणप्रतिषेधकश्रुतेः '**नाग्निर्न यज्ञः**' इति स्पष्टं शूद्रस्यैव वेदाध्ययननिषेधकस्मृतेश्च न तस्य तदभावो वेदाध्ययननिषेधाभाव इति ॥

॥ इत्यपशूद्राधिकरणम् ॥ ९ ॥

॥ १०. अथ कम्पनाधिकरणम् ॥

(भगवति वज्रशब्दसमन्वयः)

'यदिदं किञ्च जगत् सर्वं प्राण एजति निस्सृतम् ।
महद् भयं वज्रमुद्यतं य एतद् विदुरमृतास्ते भवन्ति ।'
(कठ.२.३.२) **इत्युद्यतवज्रज्ञानान्मोक्षः श्रूयत[1] इति ।**

॥ १०. अथ कम्पनाधिकरणम् ॥

अत्राधिकरणे वज्रनाम समन्वीयते । श्रुत्यादिसङ्गतिं विषयादिकं च सूचयति – **यदिदमिति** ॥ अत्र त्रैवर्णिकानां वेदाद् ब्रह्मज्ञानं मोक्षदमिति पूर्वोक्तमयुक्तम् । यतो **'यदिदम्'** इति श्रुतौ उद्यतवज्रज्ञानान्मोक्षः श्रूयत इति वाक्योपस्कारेण योजना ॥

अनेन पूर्वाधिकरणे त्रैवर्णिकानां वेदाद् ब्रह्मज्ञानं मोक्षदमिति यदभिप्रेतं तस्य चाऽनन्दमयाधिकरणे **'नेतरः'** इत्यनेनोक्तस्य मोक्षजनकज्ञानविषयत्वस्य विष्णोरन्यत्राऽक्षेपात् तेनास्याऽक्षेपिकी सङ्गतिरुक्ता भवति । वज्रशब्दो विषय इति सूचितम् ॥ वज्रश्रुतेः कुलिशे रूढिबलात् तथा **'उद्यतायुधदोर्दण्डाः'** इत्यादिस्मृतौ **'तेनेन्द्रो वज्रमुदयच्छत्'** इति श्रुतौ चाऽयुधे प्रसिद्धोद्यतत्वलिङ्गबलाच्चेन्द्रायुधमेवेदं वज्रमिति सयुक्तिकपूर्वपक्षः[2] सूचितः ॥

श्रुतौ प्राण इति सप्तम्यन्तं पदम् । स्थितमिति शेषः । प्राण इत्यस्य निमित्तसप्तमीत्वं वा विभक्तिविपरिणामं वाऽऽश्रित्य आवृत्त्या निस्सृत-मित्यनेनापि सम्बन्धः । यदित्यस्याऽवृत्तिरध्याहारो वा । यदिति श्रवणात् तदिति लभ्यते ॥

---

१. 'प्रतीयते' ह. २.'पूर्वपक्षोऽपि' - प.

तथा चायं सिद्धान्ते श्रुत्यर्थः – **'यत्किञ्च'** यत्किञ्चिद् दृष्टं श्रुतं यत् सर्वं जगत् **'प्राणे'** प्राणनान्निमित्तात् प्राणशब्दवाच्ये हरौ स्थितं प्राणान्निस्सृतं ततो जातं च तदितं सर्वं जगत् **'यस्मादेजति'** यत्प्रेरणया चेष्टते तन्महनीयत्वात् पूज्यत्वात् **'महत्'** भीषयतीति भयं दुष्टानां भयङ्करम् **'उद्यतं'** सर्वप्रयत्नवत् **'उद्यतत्वं च प्रयत्नवत्त्वम्'** उत्पूर्वस्य यमेस्तदर्थत्वात्, इति चन्द्रिकोक्तेः । यती प्रयत्न इत्यस्येदं रूपम्, उच्छब्द उत्कर्षवाचीत्यपि केचित् । **'वज्रं'** दोषवर्जनाद् अप्रियवर्जनाद् वा तच्छब्दवाच्यम् । एतद्ये **'विदुः'** अपरोक्षतो जानन्ति ते **'अमृताः'** मुक्ताः भवन्तीति ॥

यद्वा – **प्राण** इति प्रथमान्तं पदं, तथा च प्राणो मुख्यप्राणः । **इदं** दृष्टं किञ्चान्यच्छ्रुतं **सर्वं जगच्च** यस्मान्निस्सृतं यस्मादेजति च तदेतद्वज्रं ये विदुरित्यर्थः । अथवा – यदित्यस्याऽवृत्तिस्तत्र प्रथमस्य जगद्विशेषणत्वं, द्वितीयस्य[१] मुख्यप्राणपरत्वम्, तृतीयस्य वज्रपरत्वम् । स इति लभ्यते । तस्य प्रथमान्तप्राणपदेनान्वयः । तथा च **यत्किञ्चिज्जगत्सर्वं यद्यस्मान्निस्सृतं** स मुख्यप्राणः । यस्मा**देजति तद्वज्रं** ये विदुरित्यर्थः ॥

अत्र प्रथमव्याख्याने मुख्यप्राणस्य जगदन्तर्गतत्वेन भगवत्प्रेर्यत्वं द्वितीये जगत्साम्येन, तृतीये तु मुख्यप्राणस्यैव साक्षाद्भगवत्प्रेर्यत्वं जगतस्तु मुख्यप्राणप्रेर्यत्वमिति भेदः । पूर्वपक्षी तु इन्द्रायुधमेव वज्रपदेनोक्तम् । उद्यतत्वमुद्यमनकर्मत्वं तस्यैव लिङ्गमिति मन्यते ॥

अतोऽब्रवीत् –

सू – ॐ ॥ कम्पनात् ॥ ॐ ॥ ३९ ॥

'एजति' इति कम्पनवचनादुद्यतवज्रो भगवानेव[२] ।

---

१. 'द्वितीयस्य तु' प. २. 'भगवान्' ह.

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे – **अत इति ॥** [१]**'कम्पनवचनात्'** इत्येतद्रूपात् सर्वजगच्चेष्टकत्ववचनादित्यर्थः । यद्वा – कम्पनस्य मुख्यप्राणस्य एजतीति कम्पनवचनाच्चेष्टकत्वोक्तेरित्यर्थः । वचनादित्यनेन कम्पनपदं तद्वचनपरमित्युक्तं भवति । न च श्रुतौ वाक्यभेदाङ्गीकारे कम्पकत्वं वज्रे नोच्यत इति वाच्यम् । कम्पकत्वनिमित्तभयङ्करत्वस्य वज्रेऽभिधानाद् वाक्यभेदायोगात् । उद्यतवज्र इति सूत्रे शेषोक्तिः । समन्वयसूत्रादनुवृत्तस्य तदित्यस्योद्देश्यवज्रपदानुसारात् प्राणपदानुसाराद्वा भगवानिति व्याख्यानं कृतम् । सावधारणं चैतत् । तेन तुशब्दार्थो दर्शितः ॥

यद्यपि वज्रो भगवानेवेत्येतावदेव वक्तव्यं, न तूद्यत इति वज्रविशेषणमपि । तथाऽपि पूर्वपक्ष्युक्तोद्यतत्वलिङ्गस्य प्रयत्नवत्त्वरूपोद्यतत्वार्थतया सावकाशत्व-ज्ञापनाय उद्यतेत्युक्तम् ॥

'को ह्येवान्यात् कः प्राण्यात् ।
यदेष आकाश आनन्दो न स्यात्' *(तै.२.७)* **इति हि श्रुतिः ।**

ननु श्रुतिलिङ्गाभ्यां पूर्वपक्षिते कथं लिङ्गमात्रेण निर्णय इत्यतो लिङ्गस्य निरवकाशत्वादेवेत्याशयेन श्रुतेः प्रथमद्वितीयव्याख्यानानुसारेण वज्रे श्रुतस्य प्राणतदितरसाधारण्येन सामान्यतो जगच्चेष्टकत्वलिङ्गस्य विष्णोरन्यत्र निरवकाशत्वं श्रुत्या दर्शयति – **को हीति ॥** हिशब्दो हेतौ यत इत्यर्थे प्रसिद्धौ वा । अस्तीति शेषः । अतो लिङ्गस्य नान्यत्र सावकाशत्वं शङ्क्यमिति वाक्यशेषः ॥

'प्राणस्य प्राणमुत चक्षुषश्चक्षुः' *(बृ.६.४.१८)* **इति च ।**

यदा सामान्यतः सर्वजगच्चेष्टकत्वमेव विष्ण्वेकनिष्ठं तदा किमु वक्तव्यं श्रुतेः तृतीयव्याख्यानरीत्या वज्रे श्रुतस्य सर्वजगत्प्रवर्तकप्राणचेष्टकत्वलिङ्गस्य

---

१. **'इति कम्पनवचनात्' प.**

विष्ण्वेकनिष्ठत्वं जगच्चेष्टकत्वस्य सर्वथाऽन्यत्रायोगादिति भावेन तत्र श्रुतिं दर्शयति– **प्राणस्येति** ॥ चो यस्मादित्यर्थे । पूर्वश्रुतिसमुच्चये वा । श्रुतिरित्यनुषज्यते । उक्तलिङ्गस्यान्यत्र निरवकाशत्वं ज्ञापयतीति वाक्यशेषः ॥ यद्वा, यद् जगत्प्रवर्तकप्राणचेष्टकत्वादिलिङ्गं कम्पनादित्यनेनाभिसंहितं, तस्य विष्णुनिष्ठत्वासिद्धिपरिहाराय तत्र श्रुतिं प्रमाणयति – **प्राणस्येति** ॥ **'प्राणस्य'** सर्वचेष्टकमुख्यप्राणस्य **'प्राणं'** प्रकृष्टचेष्टकत्वरूपप्राणत्वप्रदम् **'उत'** तथा **'चक्षुषश्चक्षुः'** दर्शनकरणत्वरूपचक्षुष्त्वप्रदं परमात्मानं ये विदुस्ते ब्रह्म **'निचिक्युः'** प्राप्नुयुरिति वाजसनेयश्रुत्यर्थः ॥

'नभस्वतोऽपि सर्वाः स्युः चेष्टा भगवतो हरेः ।
किमुतान्यस्य जगतो यस्य चेष्टा नभस्वतः ॥'
इति च[1] स्कान्दे ।

श्रुतेः प्रथमव्याख्यायामपि क्रैमुत्यव्यक्तिकरणाय श्रुत्युक्तप्राणचेष्टकत्वं हेतूकृत्य प्रवृत्तां स्मृतिमाह – **नभस्वत इति** ॥ **'अपि'** जगत्प्रेरकस्यापि **'नभस्वतो'** वायोर्यदा सर्वाः चेष्टाः **'भगवतो'** ज्ञानादिगुणपूर्णाद्धरेर्भवन्ति । तदा किमुतान्यस्य प्रेर्यस्य वायुभिन्नस्य जगतश्चेष्टा हरेर्भवन्तीति वक्तव्यम् । कुत एतत् ? यतो यस्य जगतः चेष्टा नभस्वतो न भवन्त्यत इति वचनार्थः । **स्कान्द** इत्यनन्तरमुक्तमिति शेषः । अतोऽपि लिङ्गस्य नान्यत्रावकाश इति भावः ॥

'चक्रं चङ्क्रमणादेष वर्जनाद् [2]वज्रमुच्यते ।
खण्डनात् खड्ग एवैष हेतिनामा स्वयं हरिः ।'
[2]इति ब्रह्मवैवर्ते ॥ ३९ ॥

॥ इति कम्पनाधिकरणम् ॥ १० ॥

---

१. 'हि' ह.
२. 'वज्र उच्यते' ह.
३. 'इति हि ब्रह्मवैवर्ते' ह.

ननूद्यतत्वलिङ्गस्य विष्णौ सावकाशत्वेऽपि वज्रश्रुतेर्निरवकाशत्वात् स्वभावतः प्रबलत्वाच्च कथं निरवकाशेनापि सर्वचेष्टकत्वलिङ्गेन वज्रो विष्णुरेवेति निर्णय इत्यतः श्रुतेर्निरवकाशत्वस्यैवासिद्धेरित्याशयेन पूर्वपक्ष्यभिमतवज्रश्रुतेरपि विष्णाववकाशं स्मृत्या दर्शयति – **चक्रमिति ॥** **'एषः'** भगवान् **'चङ्क्रमणात्'** संसारे जीवपरिभ्रामकत्वाच्चक्रम् । यथोक्तं तत्त्वप्रदीपे – **चङ्क्रामयतीति चक्रमिति ॥** एवं **'वर्जनात्'** दैत्यैर्दूरादेव वर्ज्यते, न सन्मुखीक्रियत इति, सत्तर्कदीपावलीरीत्या दुष्टैर्वर्ज्यत्वात्, सर्वदोषवर्जनाद्वा वज्रमित्युच्यते । **'खण्डनात्'** दुष्टाङ्गच्छेदनाद् दमनाच्च खड्ग एष इत्यर्थः । एवशब्देन तदभेदो व्यावर्त्यते । ततः किम्, एष इति च कः इत्यत आह – **हेतीति ॥** एवं हरिः **'स्वयं'** साक्षाद् अन्यसम्बन्धमन्तरेण **'हेतिनामा'** हेतीनां चक्रादिसर्वायुधानां यानि नामानि मुख्यवाच्यतया तद्वानित्यर्थः ॥

हेतीति सामान्यग्रहणेन भाष्ये वज्रपदमन्यस्याप्युपलक्षकमित्युक्तं भवति । ब्रह्मवैवर्त इत्यनन्तरम् उक्तमिति शेषः । अतो न श्रुतिविरोधोऽपीति भावः । **'उच्यते हेतिनामा'** इत्यनेन वज्रादिशब्दानां विष्णौ विद्वद्रूढिरप्यस्तीति सूचितम् । तेन वर्जनादित्युक्तयोगस्य रूढेर्दौर्बल्याद् अयोग[1] इति निरस्तम् ॥

न चैवं काठकभाष्ये – वज्रवद् भयदं चेति वज्रशब्दस्य विष्णौ गौणत्वोक्तिविरोध इति वाच्यम् । तत्र तद्वाक्यस्य यथाकथञ्चिद् ब्रह्मपरत्वसिद्धिरित्यत्रैव तात्पर्यात् । ब्रह्मपरत्वस्य गौण्याऽपि सिद्धेः गौणत्वे तात्पर्याभावात् । अत्र तु समन्वयसूत्रप्रतिज्ञातमुख्यार्थत्वाय तात्पर्यतो योगरूढ्योरेवोक्तत्वात् । सूत्रार्थस्तु स्पष्टः ॥

॥ इति कम्पनाधिकरणम् ॥ १० ॥

---

१. **'अनिर्णय इति निरस्तम्'** – प.

॥ ११. अथ ज्योतिरधिकरणम् ॥

(हरौ ज्योतिःशब्दसमन्वयः)

हृदय आहितं ज्योतिः परमात्मेत्युक्तम् । तत्र - 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' *(बृ.६.३.७)* **इति । अत्र 'उभौ लोकावनु सञ्चरति'** *(बृ.६.३.७)* **इति वचनाज्जीव इति प्रतीयत इति ।**

॥ ११. अथ ज्योतिरधिकरणम् ॥

अत्राधिकरणे उभयत्र प्रसिद्धज्योतिर्नाम समन्वीयते । श्रुत्यादिसङ्गतिं विषयादिकं च दर्शयति – **हृदय इति** ॥ यद्धृदये **'आहितं'** निहितं ज्योतिः तच्छब्दवाच्यं स परमात्मेति ज्योतिर्नयेऽभिहितमित्यर्थः । ततः किमित्यत आह– **तत्रेति** ॥ ज्योतिर्विषय इत्यर्थः । इतिशब्दात् परं श्रूयत इति शेषः । ततोऽपि किमित्यत आह – **अत्रेति** ॥ एतद्वाक्य इत्यर्थः । श्रुतं ज्योतिरित्यनुषज्यते । तथा चात्र श्रुतं ज्योतिः तच्छब्दवाच्यो ज्ञानात्मको जीव एवेति प्रतीयते । कुतः ? **'स समानः सन्नुभौ लोकावनुसञ्चरति'** इति वचनाद् इत्यादिजीवलिङ्गाभिधायकवाक्यशेषादिति योजना ॥

अनेन **'हृद्यन्तर्ज्योतिः'** इति वाजसनेयवाक्योक्तज्योतिषो विष्णुत्वाक्षेपमुखेन पूर्वोक्तस्यापि तदाक्षेपात् तेनास्याऽक्षेपिकी[1] सङ्गतिरुक्ता भवति । वाजसनेयोक्तं ज्योतिर्विषयः, जीव एवेदं ज्योतिरिति पूर्वपक्षश्च सूचितः ॥

वाजसनेयके हि अयं पुरुषः 'किंज्योतिः' किंज्ञानसाधनः जीवस्य ज्ञानसाधनं किमिति जनकेन पृष्टो याज्ञवल्क्यः **'आदित्यज्योतिः**

१. 'सङ्गतिः प्रदर्शिता भवति' – प.

[1]**सम्राडिति होवाच'** (बृ.६.३.२) इत्यनेन हे **'सम्राट्'** सार्वभौम जनकराज ! आदित्याख्यज्ञानसाधनकोऽयं पुरुष इत्युवाच ॥

एवङ्क्रमेण प्रश्नोत्तराभ्यां जाग्रद्दशायामादित्यचन्द्राग्निवाचां मध्ये पूर्व-पूर्वास्तमये उत्तरोत्तरज्योतिष्ट्वं जीवस्याभिधाय पुनः सुप्तिस्वप्नयोरादित्यादिषु चतुर्ष्वस्तमितेषु **'किंज्योतिरयं पुरुषः'** (बृ.६.३.२.) इति जनकेन पृष्टो याज्ञवल्क्यः **'आत्मैवास्य ज्योतिर्भवति'** इति तयोर्जीवस्य स्वप्रकाश-परमात्मज्योतिष्ट्वमुक्त्वा पुनः **'कतमात्मा'** (बृ.६.३.७) इति ज्योतिष्ट्वेनोक्त आत्मा कतमः कीदृश इति पृष्टो **'योऽयम्'** इत्यनेन जीवदेहेन्द्रियादिविविक्तः परमात्मेत्युत्तरमाहेत्युक्तम् । यो **'विज्ञानमयः'** विज्ञानपूर्णः **'प्राणेषु'** इन्द्रियेषु **अन्तः** हृद्यन्तश्च नियन्तृत्वेन वर्तमानो **'ज्योतिः'** जीवस्य बुद्ध्यादिद्योतकः[2] **'पुरुषः'** पूर्णषड्गुणोऽस्ति । सोऽयमात्मेत्यर्थः ॥

तस्य महिमानमाह – **स इति** ॥ **'सः'** आत्मा परमात्मा **'समानः'** अविकारः सदैकरूपः सन् **'उभौ लोकौ'** भूलोकद्युलोकौ जाग्रत्सुषुप्ती वा प्रतिजीवमादाय तमनुसञ्चरतीत्यर्थः । पूर्वपक्षी तु, आत्मपदं स इति पदं च जीवपरम् उभयलोकसञ्चरणमपि कर्माधीनं विवक्षितं, तच्च लिङ्गं कर्मवशात् तस्यैवेति मन्यते ॥

अत उच्यते –

सू – ॐ ॥ ज्योतिर्दर्शनात् ॥ ॐ ॥४०॥

'विष्णुरेव ज्योतिर्विष्णुरेवाऽत्मा विष्णुरेव ब्रह्म

---

१. **'आदित्यः सम्राडिति'** – प.

२. **'बुद्ध्यादिप्रेरकः'** – प.

विष्णुरेव बलं विष्णुरेव यशो विष्णुरेवाऽनन्दः'
इति दर्शनाच्चतुर्वेदशिखायाम् । ज्योतिर्विष्णुरेव ।

सिद्धान्तयत्सूत्रमवतार्य दर्शनपदोक्तश्रुत्युदाहरणपूर्वकं व्याचष्टे – **अत इति ॥ 'विष्णुरेव ज्योतिः.. विष्णुरेवाऽनन्दः'** इति **चतुर्वेदशिखायामिति 'दर्शनात्'** विष्णुरेव मुख्यतो ज्योतिश्शब्दित इत्युक्तत्वात् **'ज्योतिः'** तच्छब्दवाच्यो विष्णुरेव, न जीव इत्यर्थः । **विष्णुरेवेत्यनेन** तत्त्वित्यनुवृत्तस्यार्थ उक्तः । श्रुत्यर्थस्तु स्पष्टः ॥

विशेषस्तु – **बलं** बलप्रदः । **'स वै बलं बलिनां चापरेषाम्'** (भाग.७) इति च भागवते । विष्णुरेव **यशः** । **'तस्य नाम महद्यशः'** (महाना.१.१०) इति श्रुतिरिति तत्त्वप्रदीपेऽभिहितम् । ब्रह्मादिशब्दवज्ज्योतिश्शब्दोऽपि विष्ण्वेकनिष्ठ इति ज्ञापनाय समग्रवाक्योदाहरणम् । अत एव श्रुतावेवकारः ॥

'प्राज्ञेनाऽत्मना अन्वारूढः उत्सर्जद् याति' *(बृ.६.३.३५)*
इति वचनात् तस्यापि [१]लोकसञ्चरणमस्त्येव ॥ ४० ॥

॥ इति ज्योतिरधिकरणम् ॥ ११ ॥

ज्योतिर्विष्णुश्चेत् तर्ह्युभयलोकसञ्चरणलिङ्गविरोध इति शङ्कामपि सौत्रदर्शनपदोक्तश्रुत्या परिहरति – **प्राज्ञेनेति ॥ 'इति वचनात्'** इति वाजसनेयश्रुतिवाक्यात् **'तस्यापि'** परमात्मनोऽपि लोकसञ्चरणमस्त्येवेत्यर्थः । न केवलं जीवस्येत्यपेरर्थः । न तदभाव इत्येवशब्दार्थः । तथा च लिङ्गं सावकाशमिति न तद्विरोध इति भावः ॥

शारीर आत्मा जीवो मरणकाले **'प्राज्ञेन'** प्रकर्षेण आसमन्ताद् ज्ञेन, प्रज्ञ

---

१. **'लोकचरणम्'** ह.

एव प्राज्ञः, तेन वा परमात्मना **'अन्वारूढः'** अधिष्ठितो जीवमारुह्य गच्छति भगवानिति बृहद्भाष्योक्तेः तद्वाहनभूतः **'उत्सर्जत्'** प्राक्तनदेहमुत्सृजन् देहान्तरं लोकान्तरं च **'याति'** गच्छतीति वाजसनेयश्रुत्यर्थः ॥

सूत्रार्थस्तु स्पष्टः ॥

॥ इति ज्योतिरधिकरणम् ॥ ११ ॥

॥ १२. अथाऽकाशाधिकरणम् ॥

(भगवत्याकाशशब्दसमन्वयः)

(१) सर्वाधारत्वं विष्णोरुक्तम् ।[१] तच्च 'आकाशो वै नाम नामरूपयोर्निर्वहिता'[२] *(छां.८.१४.१)* इत्यत्राऽकाशस्य प्रतीयते । वैनामेति प्रसिद्धोपदेशात् । प्रसिद्धाकाशश्चाङ्गीकर्तव्य इति ।

॥ १२. अथ आकाशाधिकरणम् ॥

अत्रोभयत्रप्रसिद्धमाकाशनाम ब्रह्मणि समन्वीयते । श्रुत्यादिसङ्गतिं विषयादिकं च दर्शयति – **सर्वाधारत्वमिति** ॥ द्युभ्वाद्यधिकरण इति शेषः । ततः किमित्यत आह – **तच्चेति** ॥ चोऽवधारणे । **'इत्यत्र'** इत्येवंरूपे छन्दोगवाक्य इत्यर्थः । अनेनात्रत्याकाशशब्दस्य विष्ण्वन्यत्वपरत्वोक्तिमुखेन पूर्वोक्तसर्वाधारत्वस्याप्यन्यनिष्ठत्वाक्षेपात् तेनास्याऽक्षेपिकी सङ्गतिरुक्ता भवति । छन्दोगश्रुत्युक्त आकाशाख्यो विषयश्च सूचितः ॥

सयुक्तिकं पूर्वपक्षं दर्शयति – **वैनामेति** ॥ स इति शेषः । चोऽवधारणे । तथा च छन्दोगश्रुत्युक्त आकाशः प्रसिद्धः साक्षिसिद्धोऽव्याकृताकाश एवाङ्गीकार्यः । कुतः ? आकाशपदेन वै नामेति निपातद्वयद्योतितप्रसिद्धिमदर्थस्योपदेशाद् उक्तत्वादित्यर्थः ॥

केचित्तु – **'सत्तर्कदीपावल्यां प्रसिद्धो भूताकाश एवाङ्गीकार्यः'** इति वचनाद् अवकाशस्यापि नामरूपवत्त्वादिति चन्द्रिकाकृदभिप्रेतं

---

१. 'तत्र' ह.

२. '"निर्वहिता ते यदन्तरा तद् ब्रह्म" इत्याकाशस्य' ह.

टीकापाठमाश्रित्याऽकाशशब्दप्रवृत्तिनिमित्तमवकाशत्वं भूते निरवधिकमिति सुधोक्तेरत्रावकाशशब्दितं भूतमेव पूर्वपक्षविषय इत्याहुः ॥

श्रुतौ वै,नामेति निपातद्वयं प्रसिद्धौ । **'नाम'** वाचकशब्दप्रपञ्चः रूपपदेन प्राकृतरूपान्तर्भावितार्थप्रपञ्चमात्रमुच्यते । तथा चाऽकाशो **'नामरूपयोः'** शब्दार्थप्रपञ्चयोः **'निर्वहिता'** निर्वोढा आश्रयः कर्ता चेत्यर्थः । **'ते'** निर्वाह्यतया प्रकृते नामरूपे **'अन्तरा'** भेदेन । यदिति नामरूपप्रपञ्चाद् भिन्नं यदस्तीति यावत् ॥

यद्वा – तच्छब्देन वाच्यप्रपञ्चान्तर्भूतं नीलादिरूपं वाचकं नाम च गृह्यते । तथा च **'ते'** नामरूपे **'अन्तरा'** विना तद्रहितमिति यावत् । साकल्येन नामवाच्यं प्राकृतरूपरहितं च यद् वर्तते तद् ब्रह्मेत्यर्थः । यद्वा – **'ते'** नामिरूपिणाम् **'अन्तरा'** भेदेन यदस्तीत्यर्थः । यथोक्तं तत्त्वप्रदीपे – नामि च रूपि च यन्न भवति तद्ब्रह्मेति ॥

अत उच्यते – सू –

ॐ ॥आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ॐ॥४१ ॥

'ते यदन्तरा तद् ब्रह्म' *(छां.८.१४.१)*
इत्यर्थान्तरत्वादिव्यपदेशादाकाशो हरिरेव ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे – **अत इति ॥ इत्यर्थान्तरत्वादिव्यपदेशादिति ॥** सूत्रे भाष्ये च पदार्थत्वबोधायार्थशब्दः । श्रुत्यनुसारादन्तरशब्दः । ताभ्यामिति शेषः । तथा च ताभ्यां नामरूपाभ्याम् अन्योऽर्थः अर्थान्तरं, यद्वा ताभ्यां विलक्षणः अर्थः अर्थान्तरः तस्य भावस्तत्त्वम् । नामरूपप्रपञ्चभिन्नत्वं वा प्राकृतनामरूपराहित्यं वा । नामरूपराहित्याख्यार्थान्तरत्वव्यपदेशादित्यर्थः । आदिपदेन ब्रह्मत्वं गृह्यते ॥

यद्वा – निरपेक्षयोरेव नामरूपराहित्ययोराकाशस्य ब्रह्मत्वसाधकत्वाद् अर्थान्तरपदेन रूपराहित्यम् आदिपदेन नामराहित्यं च गृह्यते । तथा च एवंरूपार्थान्तरत्वाद्युक्तेरित्यर्थः । **'आकाशः'** छान्दोग्ये श्रुतोऽयमाकाश-स्तच्छब्दवाच्यः । समन्वयसूत्रादनुवृत्तस्य तत्त्वित्यस्यार्थमाह – **हरिरेवेति ॥**

अनेन – अयमाकाशो हरिरेव । कुतः ? अस्य अर्थान्तरत्वादि-व्यपदेशात् **'ते यदन्तरा'** इति नामरूपराहित्याख्यविलक्षणार्थत्वोक्तेः, ब्रह्मत्वोक्तेश्चेति सूत्रार्थ उक्तो भवति ॥

'अवर्णम्', *(मु.उ.१-१-६)*
'यतो वाचो निवर्तन्ते' *(तै.२.४)*
इत्यादिश्रुतेस्तस्यैव हि[1] तल्लक्षणम् ।

आकाशे श्रुतेन नामरूपत्वादिलिङ्गेन कुतो विष्णुत्वनिश्चय इत्यतस्तस्य तन्निष्ठत्वादिति भावेन तत्र प्रमाणतयाऽऽथर्वणीं श्रुतिमाह – **अवर्णमिति ॥** प्राकृतशुक्लादिवर्णरहितं तद्भिन्नं वेत्यर्थः । यद्वा, अवर्णं न वर्ण्यं **'नापि वर्णात्मकम्'** इत्यर्थः । **'यतः'** इति श्रुतिः ॥

'यतो' ब्रह्मणो **'वाचो'** नामानि । **'निवर्तन्ते'** इत्यनामत्वोक्तिपरतया व्याख्येया । आदिशब्दात् **'अशब्दमस्पर्शमरूपम्'**(कठ.१.३.१५) इत्यादि-श्रुतिर्गृह्यते । **इत्यादिश्रुतेरित्यस्य** तस्य विष्णोरेतदरूपत्वादिकं लक्षण-मसाधारणधर्म इति ज्ञायत इत्यध्याहारेणान्वयः । **हि** यस्मात् तस्मान्न लिङ्गस्य व्यधिकरणासिद्धिरिति भावः ।तस्यैवेत्येवकारेण व्यभिचारशङ्काऽपि निरस्ता ॥

यद्यपि **'यतः'** इत्यनामत्वश्रुतिरेव प्रथममुदाहर्तव्या, **'ते यदन्तरा'** इति

---

१. 'तस्य हि' ह.

नामराहित्यस्यैव प्रथममुक्तत्वात् । न तु **'अवर्णम्'** इत्यरूपश्रुतिः । तथाऽपि वाचकस्य नाम्नो वाच्यापेक्षयाऽप्राधान्याद् वाच्यस्यैव प्रधानत्वाद् वाच्य-प्रपञ्चान्तर्गतरूपराहित्यश्रुतिरेव प्रथममुदाहृतेत्यदोषः ॥

'अनामा सोऽप्रसिद्धत्वादरूपो भूतवर्जनात् ।'

इति ब्राह्मे [१] ॥ ४१ ॥

॥ इत्याकाशाधिकरणम् ॥ १२ ॥

ननु हरेर्नामरूपराहित्यं नोपपद्यते, सर्वशब्दवाच्यत्वाद् [२] रुक्मवर्णादि-रूपवत्त्वाच्च । अन्यथेक्षतेः रूपोपन्यासाच्चेत्युक्तविरोधापातादित्यत आह – **अनामेति** ॥ **'सः'** हरिः **'अप्रसिद्धत्वात्'** साकल्येन स्वात्मनोऽन्येन शब्दादिनाऽप्रमितत्वान्निमित्तादनामेत्युच्यत इत्यर्थः ॥

न चैवमाकाशशब्दवाच्यस्य प्रसिद्धिबोधकनिपातद्वयविरोध इति वाच्यम् । निपातबोध्यप्रसिद्धेः विधेयभूतनिर्वोढृत्वान्वयित्वेन पूर्वपक्षि-रीत्योद्देश्याकाशान्वयित्वाभावात् । निर्वोढृत्वस्य च लोकप्रसिद्धत्वाभावेऽपि **'एको ह वै नारायण आसीन्न ब्रह्मा नेशानः'** इत्यादिश्रुतिप्रसिद्धत्वात् । तस्य चाप्रसिद्धत्वादित्यनेनानिषिद्धत्वात् । **'भूतवर्जनात्'** भौतिकदेहशून्यत्वात् तादृशरूपराहित्याद् वाऽरूप इत्यर्थः । **इति ब्राह्मे** इत्यस्योक्तत्वान्नोक्तविरोध इत्यध्याहृतेनान्वयः ॥

॥ इत्याकाशाधिकरणम् ॥ १२ ॥

---

१. **'इति हि ब्राह्मे'** ह.

२. 'रुग्मवर्णादिरूपवत्त्वात्' – प.

॥ १३. अथ सुषुप्त्यधिकरणम् ॥

(स्वप्नादिदर्शनं विष्णोरेव)

असङ्गत्वं परमात्मन उक्तम् । तच्च -

'स यत् तत्र किञ्चित् पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुषः' *(बृ.६.३.१५)* **इति[1] स्वप्नादिद्रष्टुः प्रतीयते ।**

॥ १३. अथ सुषुप्त्यधिकरणम् ॥

अत्राधिकरणे स्वप्नादिद्रष्टृत्वलिङ्गं ब्रह्मणि समन्वीयते । श्रुत्यादिसङ्गतिं विषयादिकं च सूचयति – **असङ्गत्वमिति** ॥ अक्षरनयोदाहृते **'अगन्धमरसम्'** इति वाजसनेयवाक्ये परमात्मनो असङ्गत्वमुक्तमित्यर्थः । ततः किमित्यत आह– **तच्चेति** ॥ चोऽवधारणे । इतीति एवंरूपे वाजसनेयवाक्य इत्यर्थः ॥

अनेन स्वप्नादिद्रष्टृत्वस्यान्यनिष्ठत्वाक्षेपमुखेन पूर्वोक्तासङ्गत्वस्याप्यन्यनिष्ठत्वाक्षेपात्, अक्षरनयेनास्याऽक्षेपिकी सङ्गतिः सूचिता । स्वप्नादिद्रष्टृत्वाख्यो विषयश्च सूचितः ॥

स च जीवः प्रसिद्धेरिति ।

ततः किमित्यतः सयुक्तिकं पूर्वपक्षयति – **स चेति** ॥ चोऽवधारणे । 'सः' स्वप्नादिद्रष्टा । जीव एव भवेत् । कुतः ? तद्द्रष्टृत्वस्य लोके जीव एव प्रसिद्धत्वादित्यर्थः । सिद्धान्ते श्रुतौ **'सः'** इति तच्छब्देन **'स वा एष एतस्मिन् सम्प्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्या द्रवति स्वप्नायैव'** (बृ.६.३.१५) इति पूर्ववाक्ये प्रकृतः परमात्मा परामृश्यते । वैशब्दः प्रसिद्धौ । सम्यक् प्रसीदति जीवोऽस्यामिति सम्प्रसादः सुप्तिः ॥

---

१. **'स्वापादिद्रष्टुः'** ह.

तथा च स परमात्मा **'सम्प्रसादे'** सुप्तौ **'रत्वा'** रमणं कृत्वा जीवगतं पुण्यं च पापं च दृष्ट्वैव न त्वनुभूय **'चरित्वा'** सञ्चरित्वा **'प्रतिन्यायम्'** अवस्थान्तरं प्रवर्तनीयमिति न्यायमनुसृत्य, यद्वा तत्तत्कर्मानुसृत्य **'प्रतियोनि'** प्रतिदेहं सर्वदेहेषु, यद्वा प्रतियोनि तत्तन्मार्गमनुसृत्य **'पुनः' 'स्वप्नायैव'** जीवस्य स्वप्नप्राप्तये एव **'आद्रवति'** कण्ठदेशमागच्छति । [1]'सः' परमात्मा 'तत्र' स्वप्नावस्थायां यत्किञ्चिदनिष्टं पश्यति 'तेन' तत्कृतपापफलेन दुःखेन 'अनन्वागतः' असंस्पृष्टो भवति । तत्र हेतुः – **असङ्ग इति ॥** हि यस्मादयं पुरुषः 'असङ्गः' [2]तत्कृतपापफलसंसर्गशून्यः प्रमितः, [3]तस्मादित्यर्थः । पूर्वपक्षी तु श्रौततच्छब्देन जीवं गृहीत्वा सर्वं वाक्यं जीवपरतया व्याख्याति ॥

अतो वक्ति –

सू – ॐ ॥ सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ॐ ॥ ४२ ॥

'प्राज्ञेनाऽत्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नाऽन्तरम्'

(बृ.६.३.२१)

'प्राज्ञेनाऽत्मनाऽन्वारूढ उत्सर्जद् याति' *(बृ.६.३.३५)*

इति भेदव्यपदेशान्न जीवः पर एवासङ्गः ॥

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे – **अत इति ॥** 'वक्ति' समाधत्ते । स्वप्नादिद्रष्टृत्वं तस्यैवेत्यत्रापि सम्बध्यते । तेन सूत्रे उद्देश्यविधेयप्रतिपत्त्यर्थम् अनुवृत्तावृत्तस्य तच्छब्दस्य विपरिणामः सूचितः । तच्छब्देन गृहीतस्यापि

१. 'तथा सः परमात्मा' – प.
२. 'तत्कृतपापेन संसर्गशून्यः' – प.
३. 'तस्मादिति श्रुत्यर्थः' – प.

समन्वेतव्यलिङ्गस्य स्पष्टप्रतिपत्त्यर्थं स्वशब्देन निर्देशः । इतिशब्दानन्तरं सुषुप्तीति सौत्रपदं संयोज्यम् । व्यपदेशादिति बुद्ध्या विविच्य पूर्वस्मादनुषक्तं पदम् । असङ्ग इत्यपि हेतुसूचनाय सूत्रेऽध्याहृतं पदम् । जीवः पर इत्यनेन सुषुप्त्युत्क्रान्तिपदं तत्प्रकरणलक्षकमपि जीवपरमात्मपरमपीत्युक्तं भवति । तथात्वे सुषुप्तिशब्दः कर्तरि क्तिन्नन्तः । उत्क्रान्तिशब्दः देहादुत्क्रामयितृपरः ॥

तथा चेत्थं योजना – स्वप्नादिद्रष्टृत्वं तस्य परमात्मन एव भवेत् न जीवस्य । कुतः ? यतोऽसावसङ्गः श्रुतः । न च स्वप्नादिद्रष्टुरसङ्गत्वश्रवणेऽपि कुतोऽयं विष्णुरिति वाच्यम् । यतोऽयमसङ्गः कर्माबद्धत्वात् परः परमात्मैव न जीवः । तथा च लिङ्गस्य निरवकाशत्वान्नाप्रयोजकत्वं शङ्क्यमिति भावः । न च जीवेऽपीश्वरभेदेनासङ्गत्वोक्तिः सम्भवतीति वाच्यम् । प्राज्ञेनेत्यादिसुषुप्त्युत्क्रान्तिप्रकरणद्वयगतवाक्ययोरसङ्गात् स्वप्नादिद्रष्टुरीश्वरात् जीवस्य भेदव्यपदेशादिति ॥

प्राज्ञेनेति श्रुत्युदाहरणेन सूत्रे सुषुप्तिपदं मोक्षस्यापि ग्राहकं, तेनायं भेदो व्यावहारिक इति शङ्कानिरासोऽपि भवति । सुषुप्त्युत्क्रान्तिपदेन च तत्प्रकरणं लक्ष्यत इत्युक्तं भवति । उत्क्रान्तिपदं च जीवस्य देहादुत्क्रमणरूपमरणवाचि । श्रुतौ प्राज्ञशब्दः स्वार्थिकाणन्तः ॥

तथा च **'प्राज्ञेन'** सर्वज्ञेन परमात्मना **'सम्परिष्वक्तः'** समाश्लिष्टः सुप्तो मुक्तश्च देहाद् बाह्यमान्तरं च किञ्चन विषयादिकं न वेदेति प्रथमवाक्यार्थः । द्वितीयार्थस्तु – प्राक्तनाधिकरणेऽभिहितः ॥

स्वप्नादिद्रष्टृत्वं च सर्वज्ञत्वात् तस्यैव युज्यते ॥ ४२ ॥

॥ इति सुषुप्त्यधिकरणम् ॥ १३ ॥

ननु कथमशरीरस्य स्वप्नादिदर्शनं युक्तं स्यादित्यत आह –

स्वप्नादीति ॥ चशब्दः समुच्चये । अप्यर्थे वा । आदिपदेन जीवगतावस्था गृह्यते । तथा च न केवलमसङ्गत्वं कर्माबद्धत्वात् परस्यैव युज्यते, किन्तु स्वप्नादिद्रष्टृत्वं च **'तस्यैव'** परमात्मन एव जीवादपि मुख्यतो युज्यते । अतस्तस्यैव तद्वचनं युज्यते न जीवस्य । कुतः ? तस्यैव **'सर्वज्ञत्वात्'** सत्याशेषार्थज्ञत्वात् स्वप्नपदार्थानां जीवगतावस्थायाश्च सत्यताया वक्ष्यमाणत्वादिति भावः । न चाशरीरत्वलिङ्गं बाधकं, यतोऽत्र तस्यैव चिच्छरीरकस्यैव स्वप्नादिद्रष्टृत्वमुच्यते । न च **'दृष्ट्वैव पुण्यं च पापं च'** (बृ.६.३.१५) इत्याद्ययोग इति वाच्यम् । यतोऽत्राऽदिपदगृहीतं पुण्यपापादिद्रष्टृत्वं लिङ्गान्तरं च तस्यैव युज्यते, अत इति योजना । तत्रोपपत्तिस्तु बृहद्भाष्यादवगन्तव्या ॥

अनेन – **'सुषुप्त्युत्क्रान्त्योः'**[1] **'प्राज्ञेन'** इति सुषुप्त्युत्क्रान्तिप्रकरणयोः सुषुप्त्युत्क्रान्त्योः सुषुप्तियुतत्वात् सुषुप्तिर्जीवः, उत्क्रामयितृत्वाद् उत्क्रान्तिरीश्वरः, तथा च जीवेश्वरयोः **'भेदेन'** भिन्नत्वेनैव **'व्यपदेशात्'** उक्तत्वान्न तयोरभेदः । अतो नेश्वराभेदेनापि जीवेऽसङ्गत्वोक्तिर्युज्यते । किन्तु तत्तु तस्यैवेश्वरस्यैव युज्यते । अत एव स्वप्नादिद्रष्टृत्वं च तस्यैव वक्तुं युज्यते, न जीवस्येति सूत्रार्थ उक्तो भवति ॥

॥ इति सुषुप्त्यधिकरणम् ॥ १३ ॥

---

१. 'सुप्तियुतत्वात्'–प.

॥ १४. अथ ब्राह्मणाधिकरणम् ॥

(श्रुत्युक्तो ब्राह्मणो विष्णुरेव न चतुर्मुखः)

'एष नित्यो महिमा ब्राह्मणस्य' *(बृ.६.४.२२)*
इति ब्राह्मणस्यापि नित्यमहिमा प्रतीयते । स च ब्राह्मणः-
'स वा एष महानज आत्मा' *(बृ.६.४.२४)*
इत्यजशब्दाद् विरिञ्च इति प्राप्तम् ।

॥ १४. अथ ब्राह्मणाधिकरणम् ॥

अत्राधिकरणे ब्राह्मणनाम समन्वीयते । श्रुत्यादिसङ्गतिं विषयादिकं च सूचयति – **एष इति ॥ इतीति ॥** वाजसनेयकोदाहृतऋङ्मन्त्र इत्यर्थः । न केवलं विष्णोः, अपि तु कस्यचिंद् ब्राह्मणस्यापीत्यपेरर्थः । इदं च यो जन्माद्यधिकरणेषु विष्णोरनन्यापेक्षया जगत्स्रष्टृत्वोक्त्याऽभिसंहितो नित्यमहिमा सः **'एषः'** इति वाक्ये ब्राह्मणस्यापि प्रतीयत इति यत्तच्छब्दाध्याहारेण योज्यम् ॥ अनेन पूर्वाभिसंहितनित्यमहिमत्वस्य विष्णोरन्यस्याप्याक्षेपाद् जन्माद्यधिकरणैः फलमुखेन अस्याऽक्षेपिकी सङ्गतिरुक्ता भवति । तथा ब्राह्मणाख्यविषयोऽपि सूचितः ॥ यद्वा – देवानामिति वाक्यं देवताधिकरणप्रतिपाद्यानुवादपरत्वेनापि व्याख्याय तेनास्याऽक्षेपिकी सङ्गतिरुक्ता द्रष्टव्या ॥

तथा हि **'तदुपरि'** इति सूत्रेण देवानां विरिञ्चाद्यमराणां विद्याकर्मणोः सकाशात् साध्या या[1] नित्यपदप्राप्तिरुक्ता, सा न युक्ता । कुतः ? यतः **'एषः'** इति वाक्ये ब्राह्मणपदोदितस्य विरिञ्चस्य नित्यमहिमा **'प्रतीयते'** प्रतिपाद्यत इति वाक्ययोजना ॥

---

१. 'अनित्यपदप्राप्तिः' – प.

श्रुतौ ब्रह्मणा वेदेनाण्यतेऽवगम्यत इति व्युत्पत्तिः । दीर्घव्यत्यासो विष्णोर्वेदगम्यत्वे जीवादाधिक्यज्ञापकः । तथा च ब्राह्मणस्य विष्णोरेषः पूर्वोक्तमहिमा नित्यः । कुतः ? यतोऽयं **'न कर्मणा वर्धते नो कनीयान्'** (बृ.६.४.२२.) शुभकर्मणा तत्फलेन सुखेन न वर्धते । पापकर्मणा तत्फलेन दुःखेन न ह्रसत इति श्रुत्यर्थः ॥

सयुक्तिकं पूर्वपक्षयति – **स इति** ॥ वाजसनेयश्रुत[1]इत्यर्थः । चशब्दोऽवधारणे । विरिञ्च एवेति सम्बध्यते । इत्यजशब्दादिति । इत्येवंरूपेषु पूर्वोत्तरवाक्येषु श्रुताजशब्दादित्यर्थः । **'स एषः'** परमात्मा **'महान्'** अपरिमितः **'अजः'** जन्मरहितश्चेति श्रुत्यर्थः । पूर्वपक्षी तु ब्राह्मणाजशब्दवाच्यं विरिञ्चिं मन्यते ॥

देवानां च विद्याकर्मणोः पदप्राप्तिः सूचिता तदुपर्यपीति ।

ननु कथं ब्राह्मणो विरिञ्चो भवेत् । तदुपरीति सूत्रे देवानां विद्याकर्मभ्यां पदप्राप्तेः समर्थितत्वेन ब्राह्मणे श्रुतनित्यमहिमत्वस्य विरिञ्चेऽसम्भवात् । सादिपदस्यानित्यत्वनियमाद् इत्यत आह – **देवानां चेति** ॥ चोऽवधारणे । इतीत्यनन्तरं सूत्र इति शेषः । तथा च तदुपरीति सूत्रे विरिञ्चेतरदेवानामेव विद्याकर्मणोः सकाशात् पदप्राप्तिः **'सूचिता'** समर्थिता । न तु विरिञ्चस्यापि । तस्येश्वररूपत्वेन देवकोट्यप्रविष्टत्वादतो विरिञ्चस्य नित्यमहिमत्वं युक्तमेवेति योजना ॥

अतो ब्रवीति –

सू– ॐ ॥ पत्यादिशब्देभ्यः ॥ ॐ ॥ ॥ ४३ ॥

---

१. 'वाजसनेये श्रुतः' – प.

'सर्वस्याधिपतिः सर्वस्येशानः . . स वा एष नेति नेति' *(बृ.६.४.२१)* इत्यादिशब्देभ्यो नित्यमहिमा[1] विष्णुरेव ॥

सिद्धान्तयत्सूत्रमवतारयति – **अत इति ॥** वाजसनेयके सर्ववशित्ववाचिशब्दस्यैवाऽदित्वात् सूत्रस्य तद्विसंवादमाशङ्क्य तत्परिहाराय सूत्रानुकूलतया सदृशशाखान्तरगतवाक्योदाहरणपूर्वकं सूत्रं व्याचष्टे – **सर्वस्येति ॥ 'सर्वस्य'** ब्रह्मरुद्रादेः सकाशाद् गुणैरधिकश्चासौ सर्वस्य पतिः पालकश्चेति सर्वाधिपतिः । **'सर्वस्य'** जगतः **'ईशानां'** ब्रह्मादीनामनः प्रेरक इति सर्वस्येशान इति श्रुत्यन्तरार्थः । सर्ववशिशब्दार्थस्तु **'सर्वमस्य वशे यस्माद्धरिः सर्ववशी ततः'** इति बृहद्भाष्यादवगन्तव्यः ॥

'स वा एषः' इति वाजसनेयश्रुतिः । **'सः'** प्राणशब्दोक्तः **'एषः'** समानशब्दाभिधेयः **'आत्मा'** परमात्मा **'इति न'** दृष्टवन्न **'इति न'** श्रुतवन्न, किन्तु दृष्टश्रुतविलक्षण इत्यर्थः । वैशब्दः प्रसिद्धौ । कुत इत्यतः **'आत्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्जतेऽसितो[2] न व्यथते न रिष्यति....स एष आत्माऽजरोऽमरोऽमृतोऽभयः'** (बृ.२.४.२४) इति वाक्यशेषः प्रवृत्तः । अत्रागृह्य इत्यादिरात्मन इति नेत्युक्तार्थे साकल्येनाग्राह्यत्वादिरूपहेतुसमर्पकः । न हीत्यादिस्तु तत्र प्रमाणाभावादिति हेतुसूचकः ॥

यद्यपि बृहद्भाष्ये **'इति न'** रमावन्न **'इति न'** ब्रह्मादिवन्न, बद्धवन्न, मुक्तवन्नेत्यन्यथा व्याख्यातम् । तथाऽप्यत्र **'स योऽतोऽश्रुतः'** (ऐ.आ.३.२.४) इति समाख्याश्रुत्यनुसारादेवं व्याख्यातमित्यदोषः । **इत्यादीति ॥** इत्यादौ श्रुताः ये सर्वाधिपत्यादिवाचकाः शब्दास्तेभ्य इत्यर्थः । आदिपदात् सर्ववशित्वादिवाचिशब्दसङ्ग्रहः ॥

---

१. 'नित्यमहिमः' ह. २. 'असतो' – प.

अनेन सौत्रादिशब्दो[1] न केवलं शाखान्तरोक्तसर्वेशानादिशब्दग्राहकः, किन्तु वाजसनेयोक्तसर्वविलक्षणत्वसर्ववशित्वादिशब्दग्राहकोऽपीत्युक्तं भवति ॥ एवं हेतुं व्याख्याय सूत्रे समन्वयसूत्रात् तत्त्वित्यनुवर्त्य विपरिणम्यमानेन तदित्यनेनान्वययोग्यमुद्देश्यसमर्पकं नित्यमहिमेति पदं चाध्याहृत्याऽहृत्य निष्कृष्टां प्रतिज्ञां दर्शयति –**नित्यमहिमेति** ॥ इदं च फलकथनरूपम् । शब्देभ्य इति हेत्वन्वययोग्यं साध्यं तु ब्राह्मण इत्यध्याहृतं द्रष्टव्यम् ॥

अनेन – अयं ब्राह्मणः तत्तु विष्णुरेव, न विरिञ्चः । कुतः ? **'पत्यादिशब्देभ्यः'** सर्वाधिपत्यादिवाचिसर्वाधिपत्यादिशब्देभ्योऽत्र श्रुतेभ्यः । तथा च नित्यमहिमाऽपि स एवेति सूत्रार्थ उक्तो भवति ॥

'उतामृतत्वस्येशानः । यदन्नेनातिरोहति' *(तै.आ.३.१२),*

ननु सर्वाधिपत्यादिवाचिशब्दसद्भावेऽपि कुतो ब्राह्मणस्य विष्णुत्वनिश्चय इत्यप्रयोजकत्वशङ्कावारणाय तत्र सर्वाधिपतित्वस्य विष्वेकनिष्ठत्वे तावच्छ्रुतिमाह – **उतेति** ॥ इदं च **'पुरुष एवेदं सर्वम्'** । **'यद्भूतं यच्च भव्यम्'** इति पूर्ववाक्येन सह व्याख्येयम् ॥

[2]तत्प्रकारस्तु – **'यद्भूतम्'** अतीतं **'भव्यं'** भविष्यद् वर्तमानं च तत्सर्वं **'पुरुष एव'** परमपुरुषाधीनमेव । कुतः ? यतो यस्मान्न केवलममुक्तसर्वाधिपतिः पुरुषः, किन्तु **'अमृतत्वस्योत'** मुक्तसमुदायस्यापि **'ईशानः'** अधिपतिः । **'विचित्रा हि तद्धितगतिः'** इति वचनात् समुदायार्थे त्वप्रत्ययः । तत्त्वप्रदीपे तु – भावभवित्रोरभेदव्यपदेशाद् भावे त्वप्रत्ययः । **'अमृतत्वस्य'** मोक्षस्य ईशान इति चेति अर्थान्तरं चोक्तम् । अत्र हेतुमाह – **यदिति** ॥ तृतीया द्वितीयार्थे । तथा च **'यत्'** यस्मात् **'अन्नेन'** अन्नं मर्त्यं संसारिसमूहम् **'अतिरोहति'**

---

१. 'अनेनात्राऽदिशब्दः' – प २. 'तदर्थस्तु' – प.

अतिशेते, तस्मादित्यर्थः । मुक्तावनधीनत्वे सर्वज्ञस्य बुद्धिमतः स्वाधीन-संसारिभ्यो मोक्षप्रदानायोगादिति भावः ॥

'सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति
प्रदिशा विधर्मणि', *(ऋ.१.१६४.३६)*

'स योऽतोऽश्रुतः' *(ऐ.आ. ३.२.४)*

इत्यादिश्रुतिभ्यस्तस्यैव हि ते शब्दाः ॥ ४३ ॥

॥ इति ब्राह्मणाधिकरणम् ॥ १४ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते
श्रीब्रह्मसूत्रभाष्ये प्रथमाध्यायस्य तृतीयः पादः ॥

इदानीं सर्वशब्दसम्बन्धिकेशानपदोक्तसर्वप्रेरकत्वे श्रुतिमाह – **सप्तेति ॥** अक्षरनये व्याख्यातेयं श्रुतिः ॥

नेति नेतीत्युक्तदृष्टश्रुतसर्वविलक्षणत्वेऽपि श्रुतिमुदाहरति – **स इति ॥** इयमपि सर्वत्राधिकरणे व्याख्याता ॥

इत्यादीत्यादिपदेन सर्ववशित्वादावप्येवमेव श्रुत्यन्तराण्युदाहर्तव्यानीति सूचयति । **'तस्यैव'** विष्णोरेव नान्यस्येत्येवार्थः । **'हि'** यस्मात् ते सर्वाधिपत्यादिशब्दा इत्यवगतास्तस्मान्नाप्रयोजकत्वं शङ्क्यमिति वाक्यशेषः ॥

॥ इति ब्राह्मणाधिकरणम् ॥ १४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणां
श्रीमद्रघुनाथतीर्थपूज्यपादानां शिष्येण
श्रीमज्जगन्नाथयतिना कृतायां श्रीमद्ब्रह्मसूत्रभाष्यदीपिकायां
प्रथमाध्यायस्य तृतीयः पादः ॥

॥ अथ प्रथमाध्याये चतुर्थः पादः ॥

॥ १.अथाऽनुमानिकाधिकरणम् ॥

(परमात्मनः श्रुत्युक्ताव्यक्तादिशब्दवाच्यत्वसमर्थनम्)

श्रुतिलिङ्गादिभिरन्यत्रैव प्रसिद्धानामपि शब्दानां सामस्त्येन विशेषहेतुभिर्विष्णावेव प्रवृत्तिं दर्शयत्यस्मिन् पादे –

॥ १. अथाऽनुमानिकाधिकरणम् ॥

एतत्पादप्रतिपाद्यं दर्शयति – **श्रुतीति** ॥ अन्यत्रैवेत्येवकारोऽत्रापि सम्बध्यते । श्रुतिलिङ्गादिभिरेव, न लोकप्रसिद्ध्येति । अनेन प्रथमद्वितीयपादप्रतिपाद्यादस्य भेदो दर्शितः । क्वचिदानन्दमयाद्यधिकरणेषु श्रुत्यादिभिरेवान्यत्रप्रसिद्धानां समन्वयकरणात् तद्व्यावर्तनाय बलवदित्यादावुपस्कार्यम् । एवकारो वा बलवत्त्वद्योतकः । तथा च पूर्वपादीयप्रतिपक्षश्रुत्याद्यपेक्षया एतत्पादीयश्रुत्यादीनां प्राबल्यान्न तेनास्य गतार्थतेति भावः ॥

अन्यत्र विष्णोरितरत्र प्रकृतिजीवादावेवेत्येवकारशिरस्कत्वोक्त्योभयत्र प्रसिद्धानां व्यावर्तनेन तृतीयपादप्रतिपाद्यादस्य भेदो दर्शितः ॥

प्रसिद्धानामिति ॥ रूढ्यादिनाऽन्यवाचकत्वेन प्रमितानामित्यर्थः । [1]न केवलं लोकप्रसिद्ध्या श्रुत्यादितो वाऽन्यत्र प्रसिद्धानामुभयत्रप्रसिद्धानां च विष्णौ समन्वयम्, किन्तु श्रुतिलिङ्गादिभिरन्यत्रैव प्रसिद्धानामपीत्यपेरर्थः । **शब्दानामिति** ॥ नामलिङ्गात्मकानामित्यर्थः । प्रकारान्तरेणास्य प्रथमपाद-

---

१. 'न केवलं लोकप्रसिद्धान्यत्रैवप्रसिद्धानामुभयत्र प्रसिद्धानां च विष्णौ समन्वयं दर्शयति । किन्तु' – प.

प्रतिपाद्याद् भेदं दर्शयति – **सामस्त्येनेति** ॥ इत्थम्भूतलक्षणे तृतीया । समन्वेतव्यत्वप्रकारं प्राप्तानां शब्दानाम् इदं विशेषणम् ॥

यद्वा – सामस्त्येनैव समन्वयं प्रतिपादयति, न त्वेकदेशेनेत्यर्थः । प्रकारे तृतीया । प्रकारप्रकारिणोरभेदविवक्षया इयमुक्तिः । तथा च त्रिपाद्यां स्रष्टृत्वादिगुणाभिधायकानाम् **'आत्मन आकाशः सम्भूतः'** इत्यादि-सृष्ट्यादिप्रकरणव्याख्येयानां सत्यज्ञानादिगुणवाचिशब्दानां तथा तत्सङ्गतानामन्नमयादिगुणिवाचकानां शब्दानां सृष्ट्यादिकर्तृत्वाभिधायिप्रकरणगताकाशेन्द्राग्निवज्रादिशब्दानां **'सदेव सौम्येदम्'** (छां.६.२.१) इत्यादि-सृष्टिप्रकरणगतशब्दानां च समन्वयोऽभिहितः । अत्र पुनः स्वरवर्णपदात्मनां समस्तशब्दानामित्यतोऽपि पूर्वपादेभ्योऽस्य भेद इति भावः ॥

ननु बलवच्छ्रुतिलिङ्गादिभिरन्यत्रैव प्रसिद्धानां कथं समन्वयः, असम्भवादित्यत आह - **विशेषेति** ॥ पूर्वपक्ष्युक्तलिङ्गादिभ्योऽपि प्रबलैर्हेतुभिरित्यर्थः । तथा च नासम्भव इति भावः । ननु समस्तशब्द-निरूपणादवैयर्थ्यमिति परिहारो न युक्तः, अंशे वैय्यर्थ्यापातादित्यतोऽप्याह - **विशेषेति** ॥ प्रागनुक्तहेतुभिरित्यर्थः । विष्णावेवेत्येवकारोऽन्यत्रप्रवृत्ति-निरासार्थः । **'प्रवृत्तिं'** समन्वयं **'दर्शयति'** वक्ति सूत्रकार इत्यर्थः ॥

सू - ॐ ॥ आनुमानिकमप्येकेषामिति चेन्न

शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ ॐ ॥ १ ॥

'तत्तु समन्वयात्' इति सर्वशब्दानां परमेश्वरे समन्वय उक्तः ।
तन्न युज्यते । यतः-
'अव्यक्तात् पुरुषः परः' *(कठ.१.३.११)*

इति साङ्ख्यानुमानपरिकल्पितं प्रधानमप्येकेषां शाखिनामुच्यत इति चेत् –

सङ्गत्यादिकमादावेव वाच्यमिति नियमाभावात् पश्चात् तद् दर्शयिष्यन् अन्यत्राप्येवमेवेत्यतिदेशायात्र प्रथमं सूत्रमेव पठति - **आनुमानिकमिति ॥** श्रुत्यादिसङ्गतिं विषयादिकं च सूचयन् सौत्रपूर्वपक्षांशं तावद् व्याचष्टे - **तत्त्विति ॥** इतीत्यनन्तरं सूत्र इति शेषः । **'समन्वयः'** मुख्यतः परमात्मपरत्वम् । **'तत्'** परमात्मपरत्वम् ॥

एवमध्याहार्यप्रतिज्ञांशं प्रदर्श्य कुतो न युज्यत इत्यतस्तत्र हेतुतया आनुमानिकमित्यादि योजयति - **यत इति ॥** हेतुत्वद्योतकोऽयं शब्दः । अव्यक्तशब्दघटितवाक्योदाहरणमुपलक्षणम् । अत एव सुधायामव्यक्तग्रहणमुपलक्षणमित्युक्तम् । तेन –

'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ॥' (कठ.२.२.७.)

इति कठानां वाक्यान्तरम्, **'जीवा एव तु दुःखिनः'** इति श्रुत्यन्तरवाक्यम्, **'कार्यकारणबद्धौ तौ'**, **'सोऽवरः'** इत्यादिकं च गृह्यते । **'इति'** श्रुतैः शब्दैरिति शेषः । इतिशब्द आद्यार्थकः ॥ तथा च एवमादिश्रुतैः शब्दैरित्यर्थः ॥

आनुमानिकमित्यस्य व्याख्या – **साङ्ख्येत्यादि ॥** महदादिकं स्वसदृशकारणजन्यं कार्यत्वाद् घटवद् इत्यादिसाङ्ख्योपन्यस्तानुमानसिद्धमित्यर्थः । **'प्रधानं'** प्रधानादि[1] । अपीति सौत्रपदानुवादः । एकेषामपीत्यन्वयनिवारणार्थोऽवधारणार्थोऽयं, जीवादिसमुच्चये वा । **'एकेषाम्'**[2]

---

१. **'प्रधानशब्दो जीवानामप्युपलक्षकः'** – प.

२. **'एकेषामिति'** – प.

अन्येषामिति । अस्य विशेष्यपदं शाखिनामिति । शाखा एषां सन्तीति शाखिनः, तेषां शाखासूच्यत इति सूत्रशेषोक्तिः ॥

तथा च यत् **'तत्तु समन्वयात्'** इत्युक्तं तन्न युज्यते । कुतः ? यतः[१] साङ्ख्यानुमानादिपरिकल्पितं प्रधानाद्येव एकेषां शाखिनां कठादीनां शाखासु **'अव्यक्तात् पुरुषः'** (कठ.१.३.११) इति श्रुतैरव्यक्तादिशब्दैरुच्यते, न विष्णुः । अव्यक्तादिशब्दानां प्रधानादावेव प्रसिद्धेरिति भाव इति योजना । अनेन समन्वयसूत्रोक्तस्य विष्णौ [२]सर्वशब्दसमन्वयस्येहाऽक्षेपात् तेनास्याऽक्षेपिकी सङ्गतिः, अव्यक्तजीवादिरूपो विषयः, प्रधानाद्येवेति पूर्वपक्षश्च दर्शितः[३] ॥

सिद्धान्ते श्रुत्यर्थस्तु – **'महतः'** महत्तत्त्वाभिमानिचतुर्मुखात् 'अव्यक्तम्' अव्यक्तशब्दितं ब्रह्म श्रीतत्त्वं च **'परम्'** उत्तमम् । तस्मादव्यक्ताच्छ्रियः पूर्णषड्गुणत्वात् पुरुषशब्दवाच्यो भगवान् परः । तस्माच्च **'परम्'** उत्तमं न किञ्चिदस्ति । **'अन्ये'** केचिद् देहिनः मृताः सन्तः **'शरीरत्वाय'** शरीरावयवत्वाय मनुष्यादियोनिं प्रपद्यन्ते । अन्ये केचित्[४] **'स्थाणुं'** वृक्षादिशरीरं **'अनुसंयन्ति'** प्राप्नुवन्तीति[५] । कुत एतेषामेतदुभयप्राप्तिरित्यत उक्तं – **यथेति** ॥ **'श्रुतं'** श्रवणं तत्तज्ज्ञानकर्मानुसारेण तत्तद्भावप्राप्तिस्तेषां तेषां भवतीति[६] । इदं च वाक्यं योनिस्थाणुप्राप्तिप्रतिपादनद्वारा बद्धत्वप्रतिपादकम् ॥

---

१. 'यतः' इति पदं प.पाठे नास्ति । २.'सर्वशब्दतात्पर्यस्य'– प.

३. 'सूचितः' – प. ४.'कैचित्तु' – प.

५. 'प्राप्नुवन्तीति ॥ एतदुभयनियमनाय तत्तच्छब्दवाच्यो भगवानपि तत्तद्रूपेण तत्तच्छरीरं प्रविशतीत्याशयः । कुतः' – प.

६. 'भवतीत्यभिप्रायः' – प.

न, तस्यैव पारतन्त्र्याच्छरीररूपकेऽव्यक्ते[1] विन्यस्तस्य परमात्मन एवाव्यक्तशब्देन गृहीतेः ।

सिद्धान्तांशं व्याचष्टे - **नेति** ॥ यत्सर्वशब्दानां[2] परमात्मपरत्वं न युज्यत इत्युक्तम्, तन्नेत्यर्थः । कुतो नेत्यतस्तत्र हेतुतया गृहीतेरिति पदं तत्सम्बन्धिद्वयोक्तिपूर्वकं योजयति – **तस्यैवेति** ॥ यस्मिन् समन्वयः प्रतिज्ञातस्तस्यैवेत्यर्थः । सूत्रेऽनुवृत्तस्य तत्त्वित्यस्य विपरिणामाभिप्रायेण प्रयुक्तं तस्यैवेति स्वपदं व्याख्याति – **परमात्मन इति** ॥ न तु प्रधानादेरित्येवार्थः । अव्यक्तशब्देनेत्युपलक्षणम् । अव्यक्तादिशब्दैः **'गृहीतेः'** ग्रहणाद् वाच्यत्वोपगमादित्यर्थः ॥

परमात्मन एवाव्यक्तादिशब्दैर्वाच्यत्वेन ग्रहणे को हेतुरित्यतस्तत्र हेतुत्वेन पूर्वपक्ष्युक्तहेतुविरुद्धपरनञ्सूचितार्थबोधकं परमात्मन एवाव्यक्तशब्द इति भाविवाक्यं यतो वाचक[3]इत्यनेकपदाध्याहारेण परमात्मन एवाव्यक्तशब्देन गृहीतेरित्यनेनापि संयोज्यम् । तत्प्रकारस्तु - यतः **'परमात्मन एव अव्यक्तशब्दो वाचकः'** परमात्मैवाव्यक्तादिशब्दमुख्यवाच्यो न प्रधानादिरिति यावत् । अतः परमात्मन एव अव्यक्तादिशब्दैर्वाच्यत्वेन ग्रहणादिति ॥

अनेन सूत्रे उक्तेरित्यनुक्त्वा गृहीतेरिति पुरुषव्यापारोक्तेः प्रयोजनमुक्तं भवति । परमात्मन एवाव्यक्तादिशब्दवाच्यत्वे कथं तर्हि प्रधानादावव्यक्तादिशब्दव्यवहारः । न च वाच्यं अवाचकत्वेऽप्यनभिज्ञानादिना तद्व्यवहार इति **'साक्षादप्यविरोधं जैमिनिः'** (ब्र.सू -१-२-२८) इति सूत्रोक्तरीत्या साक्षादित्यनेनोक्तमिति ॥

---

१. **'शरीररूपेऽव्यक्ते'** ह.

२. **'यत् सर्वदा शब्दानां'** – प.

३. **'इत्यनेन पदाध्याहारेण'** – प.

तथा सत्यवाचकत्वाविशेषेण घटादिशब्दानां पटादौ व्यवहारप्रसङ्गादित्याशङ्कापरिहारायोक्तम् - **सूत्रे शरीररूपकविन्यस्तेति ॥** तद्रथरूपकविन्यस्तशरीरगृहीतेरित्यपव्याख्यानिरासाय यथावद् व्याचष्टे - **'शरीररूपके अव्यक्ते'** प्रधानादौ 'विन्यस्तस्य' स्थितस्येति । तथा च परमात्मन एवाव्यक्तादिशब्दमुख्यवाच्यत्वेऽपि नाव्यक्तादौ तद्व्यवहारायोगः । कुतः ? अव्यक्तादौ परमात्मनो विन्यस्तत्वेन तत्सम्बन्धादेवाव्यक्तादावपि तच्छब्दप्रवृत्तेरिति सूत्रकाराभिप्राय इति भावः ॥

नन्वेतदयुक्तम्, ब्रह्मवत् प्रधानादेरपि मुख्यवाच्यत्वस्य वा प्रधानादिसम्बन्धादेव ब्रह्मणो वाच्यत्वमिति वैपरीत्यस्य वा वक्तुं शक्यत्वादित्यत उक्तम् - **सूत्रे शरीररूपेति ॥** तत्र तत्त्वप्रदीपरीत्या शरीरमेव रूपमस्येति वा, तद्विवरणात्मकचन्द्रिकारीत्या शरीरस्य रूपमिव रूपं धर्मो यस्येति वा विग्रहः । तथा च प्रसिद्धशरीरसम इत्यर्थः । साम्ये निमित्तमाह - **पारतन्त्र्यादिति ॥** पराधीनत्वादित्यर्थः । तथा च यथा[1] लोके शरीरं पुरुषतन्त्रं तथा परमात्मतन्त्रत्वेन धर्मेण प्रसिद्धशरीरादिसदृशं प्रधानादिकं भवति शरीररूपमिति भावः ॥

कप्रत्ययः कुत्सने ।

नन्वत्र सूत्रकारः पारतन्त्र्याभिप्रायेण प्रधानादेः परमात्मनः शरीररूपत्वमसूत्रयदिति कुतो ज्ञायते ? मुख्यशरीरत्वाभिप्रायेणैव रूपशब्दं प्रयुक्तवानिति [2]किं न स्यादित्याशङ्कावारणाय सूत्रकृत्प्रयुक्तं कप्रत्ययं रूपशब्दोक्त-

१. 'यथा प्रसिद्धजीवशरीरं पुरुषतन्त्रं तथाऽव्यक्तस्यापि परमात्माधीनत्वाद् भवति तच्छरीररूपमिति भावः ।' प.

२. 'रूपशब्दः प्रयुक्त इति किं' – प.

मुख्यशरीरत्वाभावे हेतुसमर्पकतया व्याचष्टे – **कप्रत्यय इति** ॥ 'कुत्सने' निन्दने । वाचकतयाऽस्तीति शेषः । अत एव पाणिनिरपि **'कुत्सने कः'** इत्याह । तथा च प्रधानादेर्जडत्वादिना कुत्सितत्वान्नेश्वरमुख्यशरीरत्वं, तस्य चिच्छरीरकत्वात्, किन्तु शरीरतुल्यत्वमेव । तदेव सूत्रकृतोऽभिप्रेतमिति ज्ञायते ॥

किञ्च – प्रधानादेः परमात्मशरीरत्वमेव सूत्रकृदभिप्रेतं चेत् शरीरविन्यस्तेत्येतावता पूर्तौ रूपपदवैय्यर्थ्यम् । जडाव्यक्तस्येश्वर-तादात्म्यायोगेन तस्य स्वरूपार्थत्वायोगात् । अतोऽप्युक्त एवाभिप्राय इति भावः । अनेन - रूपशब्दस्योक्तशङ्कापरिहारकत्वम् उक्ताभिप्रायज्ञापकत्वं चेति प्रयोजनद्वयमुक्तं भवति ॥

परमात्मन एवाव्यक्तशब्दस्तत्तन्त्रत्वेन तच्छरीररूपत्वा-दितरस्याप्यव्यक्तशब्दः [१] ।

एवं शरीररूपकविन्यस्तपदं व्याख्याय कथमनेनोक्तशङ्कापरिहार इत्यतः

'एवमेव हि शब्दानां प्रसिद्धिरपि लौकिकी ।

वाचकत्वं प्रधानस्य त्वितरस्य तदन्वयात् ॥'

इति गारुडवचनोक्तं सौत्रापिशब्दसूचितं तदभिप्रायमाह – **परमात्मन एवेति** ॥ परमात्मन इत्यनेन स्मृतिगतप्रधानशब्दो मुख्यार्थपरमात्मपर इत्युक्तं भवति । अव्यक्तशब्दो जीवादिशब्दोपलक्षकः । वाचक इति शेषः । इतरस्य तदन्वयादित्यनेनोक्ताभिप्रायमाह – **तत्तन्त्रत्वेनेति** ॥ परमात्माधीनत्वेन

---

१. 'इतरस्याव्यक्तशब्दः' ह.

तदधीनविकृतित्वेनेति वाऽर्थः । हेतौ तृतीया । तच्छरीररूपत्वादिति । तस्य परमात्मनः प्रसिद्धशरीररूपत्वेन शरीरत्वादित्यर्थः । **'इतरस्य'** परमात्मान्यस्य प्रधानादेः **'अव्यक्तशब्दः'** अव्यक्तादिशब्दः । अत्रापि पूर्ववच्छेषः ॥ यद्वा, पूर्वत्रात्र च वाचकत्वं षष्ठ्यर्थः । तथात्वे शेषं विनैवान्वयः । न केवलं परमात्मनः, किन्त्वितरस्यापीत्यपेरर्थः ॥

यद्यपि परमात्मन एव अव्यक्तशब्दो मुख्यवाचकः । तथाऽपि तत्तन्त्रत्वेन तच्छरीररूपत्वात् तत्सम्बन्धादमुख्यत इतरस्याप्यव्यक्तशब्दो वाचको[१] भवतीत्यर्थद्वयेऽपिशब्दः[२]॥

अनेन सौत्रापिशब्दस्याऽनुमानिकमप्युच्यत इति समुच्चयार्थत्वं यद्यपितथापीत्यर्थकत्वं चेत्यर्थान्तरं चोक्तं भवति । तत्तन्त्रत्वेनेत्यनेन अव्यक्तशब्द[३] इति पुनरुक्त्या च सूत्रे शरीररूपकस्येति वाच्ये विन्यस्तेत्यधिकोक्तिः ब्रह्मणो न केवलं तत्र सत्त्वमात्रम्, किन्तु नियामकतया सत्त्वमिति दर्शयितुम् । तेन स्वातन्त्र्यनिमित्तात् तस्यैव परममुख्यवाच्यतेत्युक्तं भवति ॥

तथा च इतरस्याप्यव्यक्तशब्द इति पुनर्वचनेन परमात्मन इवेतरस्य परममुख्योऽव्यक्तशब्दः, किन्तु ततः समाकृष्य सङ्केतित एव । अतो नोभयोः साम्यं वैपरीत्यं वा शङ्क्यमिति सूचितम् ॥

तर्ह्युभयोर्मुख्यवाच्यत्वे वाक्यभेद इति शङ्का तु शरीररूपकेन प्रधानेन विन्यस्तस्य विशेषितस्य विशिष्टस्य परमात्मनोऽव्यक्तादिशब्दैः गृहीतेर्वाच्यत्वाभ्युपगमादिति सौत्रपदस्यार्थान्तराभिप्रायकेण सूत्रे शरीररूपक-विन्यस्तोक्तेरित्यनुक्त्वा गृहीतेरिति पुंव्यापारोक्तेः प्रयोजनोक्तिपरेण

१. **'वाचकः'** इति पदं प. पाठे नास्ति ।

२. **'अर्थद्वयेऽप्यपिशब्दः'** – प. ३. **'अव्यक्तशब्दैरुच्यत इति पुनरुक्त्या'** – प.

प्रधानविशिष्टस्यैव परमात्मनः शब्दवाच्यत्वाभ्युपगमादिति टीकावाक्येनैव परिहृता ॥

'तुच्छ्येनाभ्वपिहितं यदासीत्' *(ऋ.१०.१२९.३)*

इति दर्शयति च।

ननु परमात्मन एवाव्यक्तादिशब्दाभिधेयत्वं, प्रधानादेस्तु तत्सम्बन्धादित्येतत् तदा युज्यते । यदि प्रधानादेः पारतन्त्र्यं परमात्मनस्तु स्वातन्त्र्यं, प्रधानादिविन्यस्तत्वं च भवेत्, तदेव कुतः सिद्धमित्यतस्तत्र प्रमाणकथनपरतया दर्शयतीति सूत्रांशं व्याचष्टे - **तुच्छ्येनेति** ॥ इति श्रुतिश्च दर्शयतीत्यन्वयः । चशब्दोऽयम् **'आत्मनि तिष्ठन्नात्मनोऽन्तरः'** (बृ. माध्यन्दिनशाखा.) इत्यादिवाजसनेयश्रुतिग्राही, यत इत्यर्थो वा । अस्यातः परमात्मनः एवेत्यादिना उक्तं युक्तमिति अध्याहारेणान्वयः ॥

'तुच्छ्येन' परमात्मापेक्षया गुणतोऽल्पेनास्वतन्त्रेण प्रधानेन आसमन्ताद् भूमत्वात् पूर्णत्वाद् आभु विभु यत्परमं ब्रह्म **'अपिहितम्'** आच्छादितमासीत् । तदेव **'तपसो'** ज्ञानस्य **'महिना'** महत्तया **'एकं'** प्रधानम् **'अजायत'** आसीदित्यर्थः ॥

अनेन प्रधानस्याल्पत्वरूपं पारतन्त्र्यम्, हरेस्तु नियामकत्वे सति तदाश्रयत्वप्रयुक्तनीचत्वायोग्यत्वरूपं स्वातन्त्र्यं प्रधाने स्थितत्वं चोक्तं भवति । यः **'आत्मनि'** जीवे तिष्ठन्निति । अनेन तु जीवस्यास्वातन्त्र्यं हरेस्तु स्वातन्त्र्यं जीवविन्यस्तत्वं चोक्तम् ॥

'अव्यक्तमचलं शान्तं निष्कलं[१] निष्क्रियं परम्।

---

१. **'निष्कळम्'** ह.

यो वेद हरिमात्मनं स भयादनुमुच्यते ॥'

इति पिप्पलादशाखायाम् ।

ननु परमात्मनोऽव्यक्तादिशब्दवाच्यत्वे सिद्धे भवेत् **'परमात्मन एवाव्यक्तादिशब्दवाच्यपरमात्मसम्बन्धात् तत्रापि तच्छब्दप्रवृत्तिः'** इति शङ्कासमाधानात्मकप्राचीनचिन्ता । तदेव कुत इत्यतः प्रवृत्ताभ्यां दर्शयतिचेति शब्दाभ्यां सूचिते श्रुतिस्मृती पठति – **अव्यक्तमिति ॥ 'यः'** अधिकारी ज्ञातुमशक्यत्वान्निमित्तादव्यक्तशब्दवाच्यम्, ईश्वरभावादचलम्, अचलेश्वरताकमिति यावत् । अचाल्यं वा । **'शान्तं'** निर्विकारम् । शस्य सुखस्य अन्तं सुखोत्कर्षसीमाभूमिं पूर्णसुखमिति वा, **'निष्कलम्'** निर्गताः कलाः यस्मात् तं षोडशकलारहितं, **'निष्क्रियम्'** अक्लिष्टकारिणम्, प्राकृतक्रियारहितं वा, प्रलये प्रचुरव्यापारहीनं वा, निष्क्रियते निर्णीयते इति निष्क्रियमिति वा, **'परम्'** उत्तमम्, **'आत्मानम्'** आदानादिकर्तारं हरिं वेद जानाति । सः [1]अनु ज्ञानानन्तरं **'भयात्'** संसारभयात् **'मुच्यते'** मुक्तो भवेदिति पिप्पलादर्षिदृष्टश्रुत्यर्थः । शाखायामित्यस्य पिप्पलाद [2]उक्तार्थं दर्शयतीत्यध्याहृतानुवृत्ताभ्यां वचनादित्यागामिनाऽन्वयः ॥

'अक्षरं ब्रह्म परमम्' इत्युक्त्वा

'अव्यक्तोऽक्षर इत्युक्तः (उच्यते)' *(गीता.८.२१)*

इति वचनाच्च ॥ १॥

गीतायाम् **इत्युक्त्वा वचनात्**[3] इत्यस्य **अक्षरं ब्रह्म** इति पूर्ववाक्येन यदक्षरं [4]तत् परमं ब्रह्मेति यस्याक्षरस्य परब्रह्मत्वमुक्तम्, तस्यैवाक्षरस्य

---

१. **'श्रोत्रज्ञानानन्तरं'** – प. २. **'उक्तोऽर्थः'** – प.

३. **'इत्युक्तेति वचनात्'** – प. ४. प.पाठे 'तत्' इति पदं नास्ति ।

अव्यक्तोऽक्षर इत्युक्तः इत्युत्तरवाक्येनाव्यक्तत्वोक्तेरित्यर्थः । अस्य परमात्मन एवाव्यक्तशब्द इति सिद्धमिति पूर्ववाक्येनान्वयः ॥

'अनेन जीवेन' इति छान्दोग्यवाक्यस्य **'जीवो विनयिता साक्षी'** इति सहस्रनामवाक्यस्य चोपलक्षकमेतत्[1] । तयोरपि दर्शयतिचेति शब्दाभ्यां सूचितत्वात्, **'अहं'** प्राणाधारकत्वान्निमित्ताज्जीवाख्येनानिरुद्धरूपेण **'इमाः'** तेजोबन्नाख्यास्तिस्रो देवता अनुप्रविश्य **'नामरूपे'** शब्दार्थप्रपञ्चौ **'व्याकरवाणि'** सम्यक् सृजानीत्यर्थः । विष्णुवाक्यमेतत् ॥

अनेन - यतः **'आनुमानिकमपि'** प्रधानाद्येव[2] **'एकेषां'** शाखिनां कठादीनां शाखासु **'अव्यक्तात् पुरुषः'** (कठ. १.३.११.) इति श्रुतैरव्यक्तादिशब्दैरुच्यते, न तु विष्णुः, अतो न **'तत्तु समन्वयात्'** इत्युक्तं युक्तमिति चेत्, न । [3]कुतः ? **'गृहीतेः'** परमात्मन एवाव्यक्तादिशब्द-वाच्यत्वाङ्गीकारात् ॥

परमात्मन एवाव्यक्तादिशब्दवाच्यत्वे कथं तर्हि प्रधानादौ तद्व्यवहारः । तदवाचकेन तद्व्यवहारेऽतिप्रसङ्गादित्यत उक्तम् - **शरीररूपकविन्यस्तेति** ॥ यथा प्रसिद्धशरीरं पुरुषतन्त्रं तथा परमात्मतन्त्रत्वेन निमित्तेन प्रसिद्धशरीरसमे प्रधानादौ विन्यस्तस्य स्थितस्य परमात्मनोऽव्यक्तादिशब्दैर्वाच्यत्वेनोप-गमादित्यर्थः । न चाव्यक्तस्य मुख्यशरीरत्वमेव किं न स्यादिति वाच्यम् । यतोऽव्यक्तं कप्रत्ययोक्तं कुत्सनार्हम्, न हि कुत्सनार्हं जडं चिच्छरीरिणो हरेर्मुख्यशरीरं भवति । प्रसिद्धदेहरूपत्वाच्चास्यामुख्यशरीरत्वम् ॥

---

१. 'उपलक्षणमेतत्' – प.

२. 'आनुमानिकं प्रधानादि' – प.

३. 'कुतः ? यतः परमात्मैवाव्यक्तादिशब्दवाच्यो न प्रधानादिरतो गृहीतेः'– प.

तथाच यद्यप्यव्यक्तादिशब्दाः परमात्मन्येव मुख्याः, तथाऽपि तैरानुमानिकमप्युच्यते[१] ऽमुख्यतः परमात्मसम्बन्धात् । न च साम्यं वैपरीत्यं वा शङ्क्यम् । परमात्मनोऽव्यक्तादौ विन्यस्तत्वेन नियामकतया वर्तमानत्वेन तस्य तत्तन्त्रत्वेनोभयोर्मुख्यवाच्यत्वस्य[२] विपर्ययस्य वाऽयोगात् ॥ न च परमात्मनः शरीररूपकविन्यस्तत्वादौ मानाभावः[३] । यतः **'तुच्छ्येन'** इति श्रुतिः **'य आत्मनि तिष्ठन्'** (माध्यन्दिनश्रुतिः) इत्यादि च तथा **'दर्शयति'** प्रतिपादयत्यतः ॥

न च परमात्मनोऽव्यक्तादिशब्दवाच्यत्वे सिद्धे भवेत् कथमन्यत्र व्यवहार इति चिन्ता । तदेव कुतः सिद्धमिति वाच्यम् । यतः **'अव्यक्तमचलम्'** (पिप्पलादशाखा) **'अव्यक्तोऽक्षरः'** इति श्रुतिस्मृती तथा दर्शयतः, अतः । न चोभयोर्मुख्यवाच्यत्वे वाक्यभेद इति वाच्यम् । शरीररूपके विन्यस्तस्य विशिष्टस्य परमात्मनो वाच्यत्वेन गृहीतेरभ्युपगमात् । तथा चान्वयभेदाभावान्न वाक्यभेद इति सूत्रार्थ उक्तो भवति ॥

सू - ॐ ॥ सूक्ष्मं तु तदर्हत्वात् ॥ ॐ ॥ २ ॥

नन्वस्त्वेवं श्रौतस्मार्तप्रयोगबलेनाव्यक्तादिशब्दानां भगवद्वाचित्वम् । तथाऽपि तत्र तेषां परममुख्यत्वं कुतः ? श्रुतिस्मृतिषु तत्र तत्प्रयोगस्या-मुख्यवाच्येऽपि केवलमुख्येऽपि सम्भवादित्याशङ्कां परिहरत्सूत्रमुपन्यस्यति – **सूक्ष्ममिति** ॥ अत्र तुशब्दोऽवधारणार्थः । तदिति व्यस्तं समासान्तर्गतं च । तत्र व्यस्तमव्यक्तरूपोद्देश्यसमर्पकम् ॥

---

१. 'उच्यते । मुख्यतः परमात्मसम्बन्धादिना च साम्यं वैपरीत्यं वा शङ्क्यम् ।'-प.

२. 'मुख्यवाच्यत्वस्य वा.' – प.

३. 'मानाभावात्' – प.

[1]**सूक्ष्ममेवाव्यक्तशब्देनोच्यते । तद्धयव्यक्ततामर्हति ।**

सूक्ष्ममिति च विधेयाभिधायीत्याशयेन सौत्रं प्रतिज्ञांशं[2] व्याचष्टे – **सूक्ष्ममेवेति** ॥ न तु रूढ्या प्रधानमित्येवार्थः ॥

नन्वव्यक्तत्वस्यैव अव्यक्तशब्दप्रवृत्तिनिमित्तत्वादव्यक्तमेवाव्यक्तशब्देनोच्यत इति वाच्ये कथमव्यक्तशब्देन सूक्ष्ममेवेत्युक्तिरित्यतः प्रवृत्तं तदर्हत्वादिति हेत्वंशं व्याचष्टे – **तद्धीति** ॥ यस्मात् तत् सूक्ष्मं परमाण्वाकाशादिरूपं वस्तु अव्यक्ततां, न व्यज्यत इति व्युत्पत्त्याऽव्यक्तशब्दप्रवृत्तिनिमित्तमव्यक्तत्वं प्राप्तुम् **'अर्हति'** योग्यं भवति । तस्माद् यदव्यक्तशब्देनोच्यते, तत् सूक्ष्ममेवेति युक्तमुक्तमित्यर्थः ॥

सूक्ष्मत्वं च मुख्यं तस्यैव ।

अस्तु सूक्ष्ममेवाव्यक्ततार्हत्वादव्यक्तशब्दवाच्यम् । तथाऽपि प्रकृते किमायातमित्यतः सूक्ष्मपदं भावप्रधानं कृत्वा समग्रं सूत्रं प्रकारान्तरेण व्याचष्टे - **सूक्ष्मत्वं चेति** ॥ चस्त्वर्थः, अव्यक्तत्वसमुच्चये च[3], जीवादिपदप्रवृत्तिनिमित्तप्राणधारकत्वादिसमुच्चये च[4] । तथा च यतस्तदव्यक्तशब्दप्रवृत्तिनिमित्ताव्यक्तत्वोपयोगिसूक्ष्मत्वं तु **'तस्य'** विष्णोरेवार्हं मुख्यमतिशयितमस्ति । अतस्तदव्यक्तत्वमपि तस्यैव मुख्यम् । अतोऽतिमुख्यनिमित्तत्वात् स एव परममुख्यतः तदव्यक्तं **'तत्पदेनोच्यते'** जीवादिशब्देनोच्यत इति सूत्रभाष्ययोः सम्बन्धः ॥

'यत्तत् सूक्ष्मं परमं वेदितव्यं नित्यं पदं वैष्णवं ह्यामनन्ति ।

---

१. 'सूक्ष्ममेव चाव्यक्तशब्देन' ह. २. 'सौत्रप्रतिज्ञांशं' – प.
३. 'चः' – प. ४. '-समुच्चये वा'– प.

यत्तल्लोका न विदुर्लोकसारं [१]विन्दन्त्येतत् कवयो योगनिष्ठाः'॥

इति च पिप्पलादशाखायाम् ।

कुतो विष्णोर्मुख्यसूक्ष्मत्वं, येन तस्य मुख्याव्यक्तत्वं स्यादित्यतस्तस्य [२] विष्णोर्मुख्यसूक्ष्मत्वस्य प्रमाणविषयतार्हत्वादेवेत्यपि सूत्रवृत्तिमभिप्रेत्य तत्सूचितां श्रुतिमाह – **यदिति** ॥ यत् **'लोकसारं'** लोकोत्तमं **'वैष्णवं पदं'** विष्णुस्वरूपं **'तत्परमं सूक्ष्मं'** मुख्यं सूक्ष्मं **'वेदितव्यम्'** ज्ञातव्यमिति **'आमनन्ति'** **'एषोऽणुरात्मा चेतसा वेदितव्यः'** (मुं.३.१.९) इत्याद्याथर्वणिकाः[३] पठन्ति । यच्च **'लोकाः'** पामराः न विदुः, **'तदेतत्'**[४] विष्णुस्वरूपं **'योगनिष्ठाः'** ब्रह्मणि मनोयोगनिष्ठाः उपायसिद्धाः **'कवयो'** ज्ञानिनो **'विन्दन्ति'** साक्षात्कुर्वन्ति इति **'हि'** प्रसिद्धमिति श्रुत्यर्थः । शाखायामित्यस्य यत उक्तमित्यध्याहारेण सूक्ष्मत्वं चेत्यनेनान्वयः ॥

एवं जीवादिशब्दप्रवृत्तिनिमित्तप्राणधारणादीनां भगवति मुख्यत्वे –

'स जीवनामा भगवान् प्राणधारणहेतुतः ।

उपचारेण जीवाख्या संसारिणि निगद्यते ॥'

इति गीतातात्पर्योदाहृतप्रमाणमन्यच्चोदाहर्तव्यम् ।

मुख्ये च विद्यमाने नामुख्यं युक्तम् ॥ २ ॥

नन्वस्तु विष्णौ[५] मुख्यमव्यक्तादिशब्दप्रवृत्तिनिमित्तं, तथाऽपि

---

१. **'विदन्त्येतत्'** ह.

२. **'तस्य विष्णोस्तस्य मुख्यसूक्ष्मत्वस्य'** – प.

३. **'आथर्वणकाः'** – प.

४. **'तदेव'**– प. ५. **'विष्णोः'** – प.

'**अव्यक्तात् पुरुषः**' इत्यादौ न तस्य वाच्यता, किन्त्वमुख्याव्यक्तत्वादिमत्प्रधानादेरेवे[१]त्यतस्तत्र पूर्वसूत्रे उक्तेरित्यनुक्त्वा गृहीतेरित्युक्त्या सूचितां युक्तिमाह – **मुख्ये चेति** ॥ चोऽवधारणे । मुख्यासम्भवे तु गौणग्रहणं युक्तमिति व्यतिरेकसूचको वा । तथा च '**मुख्ये**' विष्णौ मुख्यप्रवृत्तिनिमित्तवति विद्यमानेऽव्यक्तादिशब्दवाच्यतया सम्भवति सति तत्परित्यागेन '**अमुख्यम्**' अमुख्यप्रवृत्तिनिमित्तवत् प्रधानाद्येव वाच्यतया गृहीतुं न युक्तमित्यर्थः ॥

सू - ॐ ॥ तदधीनत्वादर्थवत् ॥ ॐ ॥ ३ ॥

तदधीनत्वाच्चाव्यक्तत्वादीनां
तस्यैवाव्यक्तत्वपरावरत्वादिकमर्थवत् ।

नन्वस्त्वेवं विष्णावेवाव्यक्तादिप्रातिपदिकानां मुख्यता । तथाऽपि '**अव्यक्तात् पुरुषः परः**' इत्यादावव्यक्तादिशब्दैर्न तस्या वाच्यत्वेन गृहीतिर्युक्ता । तथा सति '**महतः परमव्यक्तम्**' (कठ.१.३.११) इति महत्परत्वश्रुतेः तथा '**अव्यक्तात्**' इत्यवरत्वाक्षेपकावधित्ववाचिपञ्चमीश्रुतेः, तथा '**सोऽवरः**' इति साक्षादवरत्वश्रुतेः, तथा '**जीवा एव तु दुःखिनः**' '**कार्यकारणबद्धौ**' (मां.२.११) इति दुःखिबद्धत्वादिश्रुतीनां च '**निरनिष्टो निरवद्यः**' इत्यादिप्रमाणविरोधेन परमात्मन्यसम्भवदर्थकत्वात्[२] तासां नैरर्थ्यापातात् । अतो बाधकादव्यक्तादिशब्दैरमुख्यमपि प्रधानाद्येवावश्यं वाच्यतया ग्राह्यमित्याशङ्कां परिहरत्सूत्रं पठति - **तदधीनत्वादिति** ॥

'**दर्शयति च**' इत्यतश्चशब्दानुवृत्तिं, तत्त्वित्यस्य विपरिणतस्यानुवृत्तिं,

---

१. 'अमुख्याव्यक्तत्वादिमत् प्रधानाद्येवेत्यतः' – प.

२. 'असम्भवादनर्थकत्वात्' – प.

[१]तदित्यस्याऽवृत्तिं तस्मिन्नधीनं तदधीनं तत्स्वामिकं तस्याधीनमिति वा तस्य भावस्तत्त्वं तस्मादिति विग्रहं चाभिप्रेत्य व्याचष्टे - **तदधीनत्वादिति** ॥ चो निमित्तसमुच्चये । आदिशब्देन [२]परत्वपुरुषत्वावरत्वादीनां ग्रहणम् । सप्तम्यर्थे षष्ठी । एवकारोऽर्थवदित्यनेनापि सम्बध्यते । अव्यक्तत्वादिकं परावरत्वादिकमिति द्वितीयादिशब्दस्य प्रत्येकमन्वयः । अत्र प्रथमादिशब्देन गुणवाचिसर्वशब्दो गृह्यते । द्वितीयादिशब्देन दोषवाच्यशेषशब्दः ॥

यद्यपि दोषवाचकशब्देन एकस्यैव ग्रहणाद् गुणवाचकशब्देनाप्यव्यक्तशब्द एव ग्राह्यः, न परशब्दोऽपि गुणान्तरस्य दोषान्तरवदादिशब्देनैव ग्रहणसम्भवात् । तथाऽपि निरूपकत्वेनैव परशब्दग्रहणादविरोधः । अव्यक्तत्वादिकमित्यावर्तते । तत्र चैकं वाचकशब्दोपलक्षकम् । नान्यस्येत्येवशब्दार्थः । तथा च न केवलं [३] तेषामव्यक्तत्वपरत्वपुरुषत्वजीवत्वादीनां प्रकृतिजीवादिनिष्ठगुणापेक्षया निरवधिकानां तस्मिन्नतिसूक्ष्मत्वसर्वोत्तमत्वपुरुषत्वादिगुणोपेते[४] परमात्मनि सत्त्वादेव **'तदव्यक्तत्वादिकम्'** अव्यक्तत्वादिगुणवाचिशब्दजातम् **'अर्थवत्'** गुणिनि किञ्चिद् [५]गुणाभिधायकत्वेनाभिधेययुक्तम्, किं नामाव्यक्तस्थं तद्रूपम् । अव्यक्तस्याव्यक्तत्वं महतः परमत्वं

---

१. 'तदर्हत्वादित्यतः व्यस्तस्य तदित्यस्यानुवृत्तिं चाभिप्रेत्य व्याचष्टे तदधीनत्वादिति ॥' – प.

२. 'परत्वपुरुषावरत्वादीनां ग्रहणम् । तस्येति षष्ठी तस्मिन्नित्यर्थे । द्वितीयेनाऽदिशब्देन दुःखित्वादेः पुरुषत्वादेश्च ग्रहणम् । अव्यक्तत्वादिकमित्यावर्तते । तत्रैकं वाचकशब्दोपलक्षकम् ।' – प.

३. 'तेषां प्रकृतिजीवयोरव्यक्तत्वपरत्वपुरुषत्वजीवत्वादीनामीशापेक्षयाऽत्यल्पत्वाद् ईशे च तेषामाधिक्यादेव तस्मिन्नतिसूक्ष्मत्व' – प.

४. '-गुणोपेते ईशे वाच्ये सति तदव्यक्तत्वादिकम्' – प.

५. 'गुणाभिधायकत्वेन सार्थकम् । किं नाम' – प.

चाऽपादयतीति **'महतः परमव्यक्तम्'** इत्युच्यते । तदेव तस्याव्यक्तस्य पुरुषादवरत्वमापादयतीत्यवरशब्दार्थः । न तु स्वयमवरत्वादिति ॥

तत्त्वप्रदीपरीत्या तेषां प्रधानादिगतधर्माणां [1]तदधीनत्वादीशाधीनत्वाच्च न केवलं गुणवाचिशब्दजातमर्थवत्, किन्तु तत्प्रातिपदिकादिरूपं वा पञ्चमीविभक्त्यादिरूपं वाऽवरदुःखिबद्धत्वादिदोषवाच्येऽपि तस्मिन्नीश्वरे वाच्यतया गृहीते सत्येवार्थवदेव न निरर्थकम् । न च प्रवृत्तिनिमित्ताभावः । तदधीनत्वात् तेषाम् अन्यगतावरत्वादिधर्माणां परमात्माधीनत्वात् । स्वामितासम्बन्धेन तेषां तस्मिन् सत्त्वादस्यैव मुख्यनिमित्तत्वादेकेनापि शब्द-प्रवृत्तिनिमित्तेन शब्दस्यार्थवत्त्वोपपत्तेरिति योजना ॥

[2]अत्राव्यक्तत्वग्रहणेन अव्यक्तत्वपरावरत्वादिरूपगुणवाचिशब्देष्वन्यगत-प्रवृत्तिनिमित्तनियन्तृत्वं तदधिकरणत्वं चेति निमित्तद्वयम्, अवरदुःख-बद्धादिदोषवाचिशब्देषु तु प्रवृत्तिनिमित्तनियन्तृत्वरूपमेकमेव निमित्तमित्युक्तं भवति ॥

यद्यपि टीकायामत्राव्यक्तत्वग्रहणेनाव्यक्तशब्दस्य परमात्मनि द्वेधा वृत्तिरिति दर्शयति । अत एव भाष्ये तदधीनत्वाच्चेति चशब्द इत्यव्यक्त-शब्दमात्रे निमित्तद्वयमुक्तमिति भाति ॥

तथाऽपि सत्तर्कदीपावल्याम् अव्यक्तत्वपरत्वपुरुषत्वादीनामित्युक्तत्वात्, चन्द्रिकायामपि दुःख्यादिशब्दानां स्वातन्त्र्यादेवेशे प्रवृत्तिः, अव्यक्तादि-

---

१. 'प्रधानादिगताव्यक्तत्वपरत्वापरत्वादिधर्माणां तदधीनत्वाद् ईशाधीनत्वाच्च तदव्यक्तत्वादिधर्मजातं तस्यैवातस्तस्मिन्नेवाव्यक्तपरावरत्वादिगुणदोषो-भयवाचिशब्दजातमस्ति चेदर्थवदव्यक्तत्वादिप्रवृत्तिनिमित्ताभिधेयवदेव न निरर्थकमिति योजना ॥' –प.

२. 'अत्राव्यक्तत्वादिग्रहणेनाव्यक्तत्वपरत्वपुरुषत्वादिरूपगुणवाचिशब्देषु' – प.

शब्दानां तु आश्रयत्वादपीत्युक्तत्वादव्यक्तशब्दो गुणशब्दमात्रपरो व्याख्येयः ॥

केचित्तु – अवरयतीत्यादिव्युत्पत्त्युपपत्तेश्च इति टीकानुसारादवरादि-शब्देऽप्यवरयतीति कर्तृव्युत्पत्तिः तदधीनत्वेन निमित्तेन समुच्चितेति गुणदोषोभयवाचिष्वपि शब्देषु निमित्तद्वयमुक्तमित्याहुः । तन्न । अन्यगतशब्दप्रवृत्तिनिमित्तनियन्तर्यवरादिशब्दानां मुख्यत्वे बहुळप्रयोगाख्यमेकं हेतुमभिधाय व्युत्पत्त्यनुपपत्तिशङ्कापरिहाराय हेत्वन्तराभिधानार्थं प्रवृत्तटीका-वाक्यस्यावरादिशब्देषु निमित्तान्तरप्रदर्शकत्वाभावेनान्योक्तव्याख्यासाधक-त्वात् । कर्तृव्युत्पत्तिपक्षे पचाद्यजन्तानामवरादिशब्दानामवरयितृत्वादि-निमित्तकत्वेन तस्यान्यगतप्रवृत्तिनिमित्तप्रेरकत्वानतिरिक्ततया दोषाभिधायक-शब्देष्वैकस्यैव निमित्तस्य लाभाद् भगवत्यवरत्वादीनामव्यक्तत्वादिवत् कथमप्यवृत्तेर्दोषवाचिशब्देषूक्तनिमित्तद्वयासम्भवात् ॥

अनेन प्रधानादेरतिसूक्ष्मत्वाभावेऽपि नाव्यक्तादिशब्दामुख्यार्थत्वम्, अल्पपङ्कजेऽपि पद्मे पङ्कजशब्दस्यामुख्यत्वादर्शनादिति शङ्का च निरस्ता भवति । अव्यक्तादिगुणशब्दस्य परमात्मनि द्वेधा[1] प्रवृत्तिनिमित्तप्रदर्शनेन प्रधानादीनाममुख्यतायाम्[2] अन्याधीनप्रवृत्तिनिमित्तवत्त्वस्य हेतुत्वाभ्युप-गमेनाल्पप्रवृत्तिनिमित्तवत्त्वमात्रस्य तत्र हेतुत्वानभ्युपगमात् ॥

एतेन प्रवृत्तिनिमित्ताधिक्यस्य मुख्यताहेतुत्वेऽतिसहनवति पुंसि सिंहशब्दस्य,[3] सहनार्थात् सिचेः सहेर्वा कनि निष्पन्नस्य मुख्यता स्यादित्येतदपि चोद्यं निरस्तम् । प्रवृत्तिनिमित्तस्यान्याधीनत्वस्यापि मुख्यता-हेतुत्वेन तदतिशयमात्रस्य तत्राहेतुत्वात् ॥

---

१. 'द्वेधा वृत्तिप्रदर्शनेन' – प.

२. 'अन्याधीनप्रवृत्तिनिमित्तवत्त्वस्यापि'- प.

३. 'सिंहशब्दस्य मुख्यता स्यादित्येतदपि चोद्यं निरस्तम् ।' – प.

वस्तुतस्तु – पद्मत्वजातेः पङ्कजशब्दनिमित्तत्वेन विवक्षितत्वात् तस्याश्चाल्पपङ्कजादधिकपङ्कजेऽतिशयाभावात् । एवं सिंहत्वजातेः सिंहशब्द-प्रवृत्तिनिमित्तभूताया अतिशयस्य पुंस्यभावाच्च नोक्तातिप्रसङ्ग इति परिहारान्तरं चन्द्रिकोक्तं[1] द्रष्टव्यम् । **'मथनान्मिथिलो जातः सहनात् सिंह उच्यते'** इति बृहदैतरेयभाष्यवचनं त्वमुख्यार्थाभिधायकम् ॥

'यदधीनो गुणो यस्य [2]तद्गुणी सोऽभिधीयते ।
यथा जीवः परात्मेति यथा राजा जयीत्यपि ॥'
इति च स्कान्दे ॥ ३ ॥

ननु भवेदेतत्प्रधानादिगतशब्दप्रवृत्तिनिमित्तप्रेरकत्वेन ईश्वरस्यावरादि-शब्दवाच्यत्वम्, यद्यन्यगतशब्दप्रवृत्तिनिमित्तप्रेरकेऽसाववरादिशब्दो वर्तत इति सिद्ध्येत् । तदेव कुतः सिद्धमित्यतस्तत्र व्याप्तिवचनमुखेनानुमानमाह – **यदधीन** इति ॥ **'यस्य'** धर्मिणो वाचकस्य शब्दस्य प्रवृत्तिनिमित्ताख्यो **'गुणो'** **'यदधीनः'** पूर्ववद् विग्रहः । **'सः तद्गुणी'** तद्गुणवानित्युच्यते । तन्निमित्तकशब्देनाभिधीयत इति व्याप्तिवचनस्यार्थः । तत्र वैदिकलौकिकोभयविधं दृष्टान्तमाह - **यथेति** ॥ **'यथा परमात्मा'** विष्णुः **'अनेन जीवेन'** इत्यादौ जीवगतप्राणधारणाख्यजीवशब्दप्रवृत्तिनिमित्त-स्वातन्त्र्याज्जीवशब्देनोच्यते । यथा च भृत्यगतजयस्य जयिशब्दप्रयोगनिमित्तस्य राजाधीनत्वाद् राजा जयीत्युच्यत इत्यर्थः । अभिधीयत इत्यनेन अभिधाख्यवृत्त्यैवायं प्रयोगः, न त्वमुख्यवृत्त्येत्युक्तं भवति । दृष्टान्तद्वयसमुच्चयेऽपिशब्दः ॥

---

१. **'परिहारान्तरं चोक्तं द्रष्टव्यम् ।'** – प.
२. **'गुणोऽन्यस्य'** ह..

'तमेव मृत्युममृतं तात दैवतं सर्वात्मनाऽवैहि परं परायणम्' इति न्यायविवरणोदाहृतभागवतवचने **'यथाऽमृतत्वापादकत्वाद् ब्रह्मामृतमित्युच्यते, मृतिशीलत्वापादकत्वाच्च मृत्युः'** इति तत्त्वप्रदीपोक्तरीत्या दृष्टान्तसमुच्चये वा । **'यथा मृत्युशब्दो यमादौ मृत्युप्रेरके बहुलप्रयोगवान्, अत एवात्र मुख्यः'** इति टीकोक्तोदाहरणान्तरसमुच्चये वाऽपिशब्दः । चशब्दस्तु न केवलं स्कान्दवचनेऽभिहितत्वात् तन्नियामके तच्छब्दोऽस्तीति सिद्धचति, किन्तु **'स बद्धः'** इत्यादिश्रुतिसिद्धायाः अवरयतीत्यादिव्युत्पत्तेश्चेति समुच्चये ॥

अनेन - न केवलम् अव्यक्तत्वादिनिमित्ताधिक्यादेवाव्यक्तत्वादिगुणवाचिशब्दजातं परमात्मन्यर्थवत्, किं नाम ? अव्यक्तत्वादीनां **'तदधीनत्वात्'** ईशाधीनत्वाच्च तदव्यक्तत्वादिकं तस्यैव । अतस्तस्मिन्नेव तदव्यक्तत्वादिगुणदोषोभयवाचिशब्दजातमपि **'अर्थवत्'**[१] प्रवृत्तिनिमित्ताख्यार्थयुक्तम् । न निरर्थकमिति सूत्रार्थ उक्तो भवति ॥

सू – ॐ ॥ ज्ञेयत्वावचनाच्च ॥ ॐ ॥ ४ ॥

अन्यस्य न वाच्यत्वं युज्यते ॥ ४ ॥

एवं श्रौतस्मार्तप्रयोगप्रवृत्तिनिमित्तातिशयाभ्यां प्रथमद्वितीयोक्ताभ्यां परमात्मन्येवाव्यक्तादिशब्दानां [२]मुख्यत्वात्, बाधकाभावे च मुख्यार्थस्यैव ग्राह्यत्वात्, अवरत्वादिश्रुतिनैरर्थ्यबाधकस्य च तृतीये उद्धृतत्वान्मुख्यार्थः परमात्मैव **'अव्यक्तात् पुरुषः परः'** इत्यादावव्यक्तादिशब्दैरुच्यते, न प्रधानादीत्युक्तम् । तदेव युक्त्यन्तरेणोपपादयत्सूत्रमुपन्यस्य चशब्दस्यानेकहेतु-

---

१. **'अर्थवत् प्रवृत्तिनिमित्ताधिक्यार्थमुक्तं न निरर्थकमिति सूत्रार्थ उक्तो भवति।'** प.

२. **'मुख्यार्थत्वात्'** – प.

समुच्चयार्थत्वमभिप्रेत्य तच्छेषं प्रतिज्ञारूपं पूरयति – **ज्ञेयत्वेति ॥ 'अन्यस्य'** प्रधानादेरव्यक्तादिशब्दवाच्यत्वं न युज्यते, किन्तु विष्णोरेवेति योजना ॥

सूत्रार्थस्तु – विष्णोरेव मुमुक्षुज्ञेयत्वे,

'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ ।
अमृतस्यैष सेतुः ॥' (मुं.२.२.५)

इति वचनात् प्रधानादेस्तदभावान्मोक्षफलकवेदानां तद्धेतुज्ञानविषय-ब्रह्मज्ञापन एव प्रवृत्तत्वात्[१] प्रतिवाक्यं तत्परत्वस्य च **'आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते'** [२]इत्यादिवचनसिद्धत्वात् स्वतः प्राप्तमुख्यवृत्तित्यागे कारणाभावाच्च विष्णुरेवाव्यक्तादिशब्दवाच्यो, न प्रधानादिरिति ॥

सू- ॐ ॥ वदतीति चेन्न प्राज्ञो हि ॥ ॐ ॥ ५ ॥

'महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते' *(कठ.१.३.१५)*
इति ज्ञेयत्वं वदतीति चेत्

उक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्याऽक्षेपांशं तावद् व्याचष्टे - **वदतीति ॥** [३]नान्यस्येत्यनुवर्तते । तथा च **'अन्यस्य'** प्रधानस्य **'**[४]**न ज्ञेयत्वावचनं'** मोक्षार्थं ज्ञेयत्ववचनाभावः । कुतः ? यतः **'अनाद्यनन्तं महतः परं ध्रुवम्'** (कठ.१.३.१५) इति वचनं लिङ्गव्यत्ययेन **'तं' 'महतः परमव्यक्तम्'** इति पूर्ववाक्ये महत्तत्त्वात् [५]परत्वेनोक्तम् अव्यक्तमिति योजनायाम् [६]अन्यस्य मोक्षार्थं ज्ञेयत्वं वदत्यत इति वाक्ययोजना ॥

---

१. 'प्रकृतत्वात्' –प.
२. 'इति वचनसिद्धत्वात्' – प
३. 'अन्यस्येत्यनुवर्तते' – प.
४. 'न ज्ञेयत्ववचनम्' -प.
५. 'महत्तत्त्वात् तन्त्रत्वेनोक्तम्'– प.
६. 'अन्यदन्यस्य' – प.

ननु वदतेः[१] शाब्दप्रतीतिवाचित्वात् तत्र च शब्दस्य करणत्वात् कथं वदतीति व्यपदेशः ? इत्थम् – अवान्तरव्यापारवतो हि करणस्य कारकत्वम्[२], अन्यथाऽतिप्रसङ्गात् । तत्र स्वस्वक्रियां प्रति सर्वस्य प्राधान्येन कर्तृत्वात् करणेऽपि शब्दे तद्विवक्षया वदतीति व्यपदेशो[३] युज्यते ॥

न, प्राज्ञः परमात्मा हि तत्रोच्यते ।

'अणोरणीयान् महतो महीयान्' *(कठ.१.२.२०)*
इति तस्यैव हि[४] महतो महत्त्वम् ।

सर्वस्मात् परस्य[५] महतोऽपि परत्वं युज्यते ॥ ५ ॥

परिहारांशं व्याचष्टे – **नेति** ॥ नैतद्वाक्यबलेनान्यस्य मोक्षार्थं ज्ञेयत्वं मन्तव्यमित्यर्थः । कुत इत्यत आह – **प्राज्ञ इति** ॥ प्रज्ञ एव प्राज्ञः तस्य व्याख्या परमात्मेति । **'हि'** यतः **'तत्र'** वाक्ये परमात्मैवोच्यते, न प्रधानम् अतो नेति योजना ॥

ननु महतः परत्वलिङ्गात् प्रधानमत्रोच्यत इत्यत आह – **अणोरिति** ॥ **'हि'** यतः **'अणोः'** इति कठश्रुतौ **'तस्यैव'** प्रकृतपरमात्मन एव **'महतो'** महत्तत्त्वात् **'महत्त्वं'** परत्वमुच्यते, न त्वन्यस्य । अतो न लिङ्गादन्यत्रोच्यत इत्यध्याहारेण योजना । लिङ्गस्यान्यथासिद्धत्वादिति भावः ॥

---

१. 'वदतेश्च शाब्दप्रतीतिवाचकत्वात्' – प.
२. 'हि कारणस्य करणत्वम्,' – प.
३. 'वदतीति शब्दो युज्यते ।'– प.
४. 'तस्य हि' ह.
५. 'परमस्य' ह.

नन्वस्यां श्रुतौ भगवानणोः सूक्ष्मादपि सूक्ष्मः, महतोऽणुप्रतियोगिस्थूलात् स्थूल इति प्रतिपादनेन भगवतः सर्वस्थूलात् परत्वोक्तावपि न महत्तत्त्वपरत्वमुच्यते, अतो न [1]महत्परत्वलिङ्गं विष्णौ सावकाशमित्यत आह – **सर्वस्मादिति** ॥ इदं च हेतुगर्भं विशेषणम् । तस्येत्यनुषज्यते । अपिर्भिन्नक्रमो यद्यपीत्याद्यर्थेऽपि भवति कैमुत्ये च । **'सिद्ध्यति यतः'** इति शेषः । तथा चात्र तस्य विष्णोः सर्वस्मात् परत्वोक्तावपि **'महतो'** महत्तत्त्वात् परत्वमपि सिद्ध्यति ॥

न केवलं सर्वस्थूलत्वमित्यपेरर्थः । कस्मात् ? यतः सर्वस्मात् स्थूलात् परस्य महतः परत्वं कैमुत्येन युज्यत अत इति योजना । तथा चायं सिद्धान्ते कठवाक्यार्थः सम्पद्यते – अनाद्यनन्तमिति समस्तम् । अनादिरुत्पत्ति-शून्यश्चासावनन्तो गुणदेशतोऽपरिच्छिन्नश्चेति विग्रहः । तं **'महतः परं'** सर्वस्मात् स्थूलात् परम् । अत एव महत्तत्त्वादपि परं **'ध्रुवं'** नित्यं निर्विकारं वा । **'तम्'** अव्यक्ततत्त्वात् परत्वेन पूर्वप्रकृतं पुरुषाख्यं विष्णुं **'निचाय्य'** सम्पूज्य निशाम्य वा संसाराख्यमृत्युमुखात् प्रमुच्यतेऽधिकारीति ॥

सू - ॐ ॥ प्रकरणात् ॥ ॐ ॥ ६ ॥

'सोऽध्वनः पारमाप्नोति तद् विष्णोः परमं पदम्' *(कठ.१.३.९)*
इति तस्य ह्येतत् प्रकरणम् ॥ ६ ॥

ननु विशेषतो महत्परत्वस्य प्रधानलिङ्गस्य सर्वस्थूल-परत्वरूपामुख्यार्थतां स्वीकृत्यानाद्यनन्तादिवाक्यस्य विष्णुपरत्वग्रहणे कारणा-भावात् प्रधानमेवात्रोच्यत इत्याशङ्कां परिहरत्सूत्रमुपन्यस्य नञनुवृत्त्यभिप्रायेण व्याचष्टे - **प्रकरणादिति** ॥ इतीत्यनन्तरं श्रुतेरिति शेषः । हिशब्दो हेतौ ।

---

१. **'महत्तत्वपरत्वलिङ्गं'** – प.

एतत् **'अनाद्यनन्तम्'** इत्यादिवाक्यं **'तस्य'** विष्णोः **'प्रकरणं'** प्रकरणरूपमित्यवगतमिति शेषः । तथा च नात्र विष्णुग्रहणे कारणाभावः । कुतः ? हि यस्मात् तस्य प्रकरणमस्ति । न चैतत्प्रकरणस्य वैष्णवत्वासिद्धिः । **'हि'** यस्मादेतत् **'सोऽध्वनः'** इति कठश्रुतेस्तस्य प्रकरणमित्यवगतं [१]तस्मादिति योजना ॥

सूत्रयोजना तु – अस्य प्राज्ञप्रकरणत्वात् प्रकरणात् प्राज्ञ एवात्रोच्यते, नान्यदिति । सकलमिदमहं चेशायत्तमिति यो विजानाति स संसाराख्यस्य वर्त्मनो विश्रान्त्यवधिभूतं पारमाप्नोति, तत्पारं विष्णोः परमं पदं स्थानं क्षीराब्ध्यादौ मुक्तप्राप्यमिति श्रुत्यर्थः सत्तर्कदीपावल्यामुक्तः ॥

सू – ॐ ॥ त्रयाणामेव चैवमुपन्यासः

प्रश्नश्च ॥ ॐ ॥ ७ ॥

त्रयाणामेव पितृसौमनस्यस्वर्ग्याग्निपरमात्मनां प्रश्न उपन्यासश्च ।

हेत्वन्तरेणानाद्यनन्तादिवाक्येऽन्यस्यापि प्रतिपाद्यतां पराकुर्वत्सूत्र-मुपन्यस्य व्याचष्टे – **त्रयाणामेवेति** ॥ त्रयाणामेवेत्यनुवादः सौत्रैवंशब्दार्थप्रकारधर्मिप्रदर्शनार्थः । त्रयाणां मध्ये प्रधानमेकमस्त्विति शङ्कां [२]निरसितुं सूत्रे प्रयुक्तेन एवंशब्देन ज्ञापितं श्रुत्युक्तप्रकारत्रयं दर्शयति – **पितृसौमनस्येति** ॥ पितृसौमनस्यस्वर्ग्याग्निपरमात्मनां [३]त्रयाणामेवेत्यन्वयः, नान्यस्येत्येवशब्दार्थः । प्रश्न इति प्रथमान्तं निमित्तसप्तम्यन्तं च । तेन प्रश्ननिमित्तकतोपन्यासश्च सिद्ध्यति । चः प्रश्नोत्तरसमुच्चये, हेतुसमुच्चये वा ।

---

१. **'तस्मिन्निति'** – प.
२. **'निरासयितुं'** – प.
३. **'एतेषां त्रयाणामेव'** – प.

अनेन सौत्रं चशब्दद्वयं तन्त्रेणानूदितं भवति । यत इति शेषः । अस्यातोऽप्यत्र प्राज्ञ एवोच्यते, नान्यदिति प्रकृतसाध्येनान्वयः ॥

केचित्तु – सौत्राद्यचशब्दस्य यत इति हेत्वर्थत्वं द्वितीयस्य प्रकरणरूपहेतुसमुच्चयार्थत्वमाश्रित्य यत इति शेषो न कार्य इत्याहुः ॥

अनेन - न केवलमेतत्प्रकरणस्य वैष्णवत्वेनात्र प्रधानस्याप्रतिपाद्यता सिद्धा, किन्त्वेतत्प्रकरणघटितानेकप्रकरणात्मकस्थानरूपायामस्यामुपनिषद्यपि **'च'** यतः **'एवं त्रयाणां'** पितृसौमनस्यस्वर्ग्याग्निपरमात्मरूपाणां धर्मिणामेव **'उपन्यासः'** प्रतिवचनमस्ति, न त्वन्यस्य । **'अतश्च'** अतोऽपि । कुतः त्रयाणामेवोपन्यासः ? यतस्त्रयाणामेव प्रश्नोऽत इति सूत्रार्थ उक्तो भवति ॥

नन्वेवं हि काठकोक्ता आख्यायिका - गौतमगोत्रोत्पन्नस्यौद्दालिकेः नचिकेता नाम पुत्र आसीत् । तत्र पितरि निरर्थकगोदानपरे सति तन्निराचिकीर्षुर्नचिकेता नाम मम पिता मां वा दत्वाऽप्येवंविधाः गा न प्रयच्छत्विति भावेन मां कस्मै दास्यसीति पितरमप्राक्षीत् । तच्छ्रुत्वा क्रुद्धः पिता त्वां यमाय दास्यामि त्वं यमगृहं गच्छेत्यशपत् । एवं शप्तो नचिकेताः मृतो यमप्रवासकाले यमगृहं प्राप, तत्र त्रिरात्रं तत्पद्न्या पूजित उपवसन्नेवावसत् । अथ यम आगतस्तं नमस्कृत्यातिथिस्त्वं यस्मान्मे गृहे तिस्रो रात्रीरनश्नन्नवात्सीः। तस्मादस्य प्रतीकाराय मत्तः त्रीन् वरान् वृणीष्वेत्यब्रवीत् ॥

एवमुक्त ऋषिपुत्र आह – इदानीं मम पिता मह्यं क्रुद्ध आस्ते, तत्सौमनस्यं सौहार्दमपेक्षितं तद् देहीति भावेन **'शान्तसंवित् सुमनाः यथा स्यात्'** इति पितृसौमनस्यं वरं प्रथमं प्रार्थयित्वा अथाहं **'स्वर्ग्यं'** स्वर्गादनपेतं स्वर्गसाधनभूतम् **'अग्निम्'** अग्निष्टोमादिकर्माङ्गभूताग्निशब्दितेष्टकचितिस्थं तत्स्थितं विष्णुं वाऽध्येमि तत्त्वं कथयेति भावेन **'स त्वमग्निं स्वर्ग्यमध्येषि**

मृत्यो प्रब्रूहि' (कठ.१.१.१३.) इति स्वर्ग्याग्निविषये द्वितीयं वरमवृणोत् ॥

तथा मोक्षसाधनज्ञानविषयीभूतमृतमुक्तजीवनियामकपरमात्मस्वरूपं मयाऽवश्यं ज्ञेयं, तत् कथयेति भावेन **'येयं प्रेते विचिकित्सा मनुष्ये'** (कठ.१.१.२०) इति परमात्मविषये तृतीयं वरमवृणोत् । एवं नचिकेतसा प्रार्थितो यमो वरत्रयं ददानीति भावेन **'वीतमन्युस्त्वां ददृशिवान्'** इति पितृसौमनस्यविषये प्रत्यवोचत् । **'स्वर्ग्यमग्निं नचिकेतः प्रजानन्'** (कठ.१.१.१४) इति स्वर्ग्याग्निविषये द्वितीयं[1] प्रत्यवोचत् । **'देवैरत्रापि विचिकित्सितं किल'** (कठ.१.१.२२) इति परमात्मविषये तृतीयं प्रत्यवोचदिति ॥

'अविज्ञातप्रार्थनं च प्रश्न इत्यभिधीयते'
इति वचनान्न विरोधः ॥ ७ ॥

एवं चेत् पितृसौमनस्यं वरत्वेन प्रार्थ्यत एव न पृच्छ्यते । अतः प्रार्थनं कथं प्रश्न इत्यत आह – **अविज्ञातेति ॥** यत् [2]प्राप्स्यते न वेति अविज्ञातं सन्दिग्धं तस्य प्रार्थनमपि तस्य प्रश्न इति प्रामाणिकैरभिधीयत इत्यर्थः । **'इति वचनात्'** इत्यभिधानात् त्रयाणां प्रश्न इति प्रार्थनस्यापि प्रश्नत्वोक्तेः **'न विरोधः'** नानुपपत्तिरित्यर्थः ॥

सू - ॐ ॥ महद्वच्च ॥ ॐ ॥ ८ ॥

यथा महच्छब्दो महत्तत्वे प्रसिद्धोऽपि परममहत्त्वात् परमात्मन एव मुख्यः, एवमितरेऽपि ॥ ८ ॥

---

१. 'द्वितीयं वरं प्रत्यवोचत्' – प.
२. 'प्राप्स्यते तदेवेत्यविज्ञानं'–प.

यदुक्तमव्यक्तादिशब्दानां विष्णुरेव मुख्यवाच्य इति, तदयुक्तम्, तेषां प्रधानादावेव प्रसिद्धत्वात् । न चाव्यक्तादिशब्दप्रवृत्तिनिमित्तस्य भगवति मुख्यत्वेन तच्छब्दानां तत्रैव मुख्यत्वमुक्तमिति वाच्यम् । यत्र शब्दस्य प्रसिद्धिस्तत्र तस्य मुख्यता[1], यत्र च[2] यस्य मुख्यं प्रवृत्तिनिमित्तमस्ति तस्य मुख्यत्वमित्यस्यार्थस्यादृष्टचरत्वादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य [3]व्याचष्टे - **महद्वच्चेति** ॥ अत्र महच्छब्दस्य शब्दपरत्वं महत्तत्त्वपरत्वं प्रथमान्तात् सप्तम्यन्ताच्च[4] भवति ॥

चशब्दस्य यद्यपितथापीत्यर्थत्वं दार्ष्टान्तिकसमुच्चयार्थत्वं चाऽश्रित्य सूत्रं व्याचष्टे – **यथेति** ॥ न विरोध इत्यनुवर्तते । महत्त्वादित्युपलक्षणमव्यक्तत्वादेः । योजना तु – यथा **'महान्तं विभुमात्मानम्'** (कठ.१.२.२२) इति कठवल्लीश्रुतिस्थो महच्छब्दः यद्यपि महत्तत्वे प्रसिद्धः, तथाऽपि न प्रसिद्धिविरोधः । कुतः ? यतः परमात्मन एव परममहत्त्वाख्यमुख्यप्रवृत्तिनिमित्तवत्त्वात् तस्मिन् **'मुख्यः'** मुख्यवाचक इत्येवोपेयते । **'एवं'** तथा **'इतरे'** अव्यक्तादिशब्दाः यद्यप्यन्यत्र प्रसिद्धाः । तथाऽपि परमात्मन एव परमाव्यक्तत्वादिप्रवृत्तिनिमित्तवत्त्वात् तस्मिन् परममुख्य इति । स्पष्टः सूत्रार्थः ॥

सू - ॐ ॥ चमसवदविशेषात् ॥ ॐ ॥ ९ ॥

यथा चमसशब्दोऽन्यत्र प्रसिद्धोऽपि
'इदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः' *(बृ.४.२.३)*

---

१. 'तस्यामुख्यता' – प.
२. 'यत्र तस्य मुख्यं प्रवृत्तिनिमित्तमस्ति तत्र मुख्यत्वम्' – प.
३. 'सूत्रमुपन्यस्यति – महद्वच्चेति ॥'
४. 'सप्तम्यन्ताच्च वृत्तिं चशब्दस्य' – प.

इति श्रुतेः शिरोवाचकः, एवमव्यक्तादिशब्दाः सर्वेऽन्यत्र प्रसिद्धा अपि

'नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति'

(भाल्लवेयश्रुतिः) **इत्यादिश्रुतेः परमात्माभिधायका एव।**

अविशेषाच्छ्रुतेः ॥ ९ ॥

॥ इत्यानुमानिकाधिकरणम् ॥ १ ॥

ननु भवेदियमव्यक्तादिशब्दानां परमात्मनि परममुख्यत्वचिन्ता । यदि तेषां तत्र मुख्यत्वमेव सिद्धं भवेत् । न च तद्युक्तं, तेषामन्यत्रैव प्रसिद्धत्वात् । न च **'अव्यक्तमचलम्'** इत्यादिश्रौतस्मार्तप्रयोगबलात् तेषां तत्र शक्त्यवगमः । वृत्त्यन्तरेणापि प्रयोगोपपत्तेरित्याशङ्कां परिहरत्सूत्रमुपन्यस्यति - **चमसवदिति** ॥ अत्रापि पूर्ववच्छब्दपरत्वं प्रथमान्तात् सप्तम्यन्ताच्च [१]वतिं चशब्दानुवृत्तिं तस्य पूर्ववदर्थद्वयं श्रुतेरित्यध्याहारं चाभिप्रेत्य सूत्रं व्याचष्टे - **यथेति** ॥ **'अन्यत्र'** चतुष्कोणयज्ञपात्रे पुनः **'अन्यत्र'** प्रधानादौ अव्यक्तादिशब्दा इत्यनेन प्राचीनम् **'इतरे'** इति स्वपदं व्याख्यातम् । दृष्टान्तीभूतमहच्छब्दस्यापि सङ्ग्रहाय सर्व इत्युक्तिः । आदिशब्देन पुरुषादिशब्दानां ग्रहणम् । **'यो देवानाम्'** इत्यादि द्वितीयादिपदार्थः । तथा च यथा चमसशब्दो यद्यपि अन्यत्र प्रसिद्धः, तथाऽपि **'इदं तच्छिरः'** इत्यनुशासनरूपश्रुतेः शिरोवाचकोऽवगत एव । तथा सर्वेऽव्यक्तपुरुषादिशब्दा यद्यप्यन्यत्र प्रसिद्धाः, तथाऽपि **'नामानि'** इत्यादिश्रुतेः **'परमात्माभिधायकाः'** वाचका एव, न लाक्षणिका इत्यवगम्यत इति योजना ॥

ननु इदमित्यस्याभिधानरूपत्वेऽपि न **'नामानि'** (भाल्लवेयश्रुतिः)

---

१. 'वृत्तिं' – प.

यदुक्तमव्यक्तादिशब्दानां विष्णुरेव मुख्यवाच्य इति, तदयुक्तम्, तेषां प्रधानादावेव प्रसिद्धत्वात् । न चाव्यक्तादिशब्दप्रवृत्तिनिमित्तस्य भगवति मुख्यत्वेन तच्छब्दानां तत्रैव मुख्यत्वमुक्तमिति वाच्यम् । यत्र शब्दस्य प्रसिद्धिस्तत्र तस्य मुख्यता[१], यत्र च[२] यस्य मुख्यं प्रवृत्तिनिमित्तमस्ति तस्य मुख्यत्वमित्यस्यार्थस्यादृष्टचरत्वादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य [३]व्याचष्टे - **महद्वच्चेति** ॥ अत्र महच्छब्दस्य शब्दपरत्वं महत्तत्त्वपरत्वं प्रथमान्तात् सप्तम्यन्ताच्च[४]भवति ॥

चशब्दस्य यद्यपितथापीत्यर्थत्वं दार्ष्टान्तिकसमुच्चयार्थत्वं चाऽश्रित्य सूत्रं व्याचष्टे – **यथेति** ॥ न विरोध इत्यनुवर्तते । महत्त्वादित्युपलक्षणमव्यक्तत्वादेः । योजना तु – यथा **'महान्तं विभुमात्मानम्'** (कठ.१.२.२२) इति कठवल्लीश्रुतिस्थो महच्छब्दः यद्यपि महत्तत्वे प्रसिद्धः, तथाऽपि न प्रसिद्धिविरोधः । कुतः ? यतः परमात्मन एव परममहत्त्वाख्यमुख्यप्रवृत्तिनिमित्तवत्त्वात् तस्मिन् **'मुख्यः'** मुख्यवाचक इत्येवोपेयते । **'एवं'** तथा **'इतरे'** अव्यक्तादिशब्दाः यद्यप्यन्यत्र प्रसिद्धाः । तथाऽपि परमात्मन एव परमाव्यक्तत्वादिप्रवृत्तिनिमित्तवत्त्वात् तस्मिन् परममुख्य इति । स्पष्टः सूत्रार्थः ॥

सू - ॐ ॥ चमसवदविशेषात् ॥ ॐ ॥ ९ ॥

यथा चमसशब्दोऽन्यत्र प्रसिद्धोऽपि
'इदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः' *(बृ.४.२.३)*

---

१. 'तस्यामुख्यता' – प.
२. 'यत्र तस्य मुख्यं प्रवृत्तिनिमित्तमस्ति तत्र मुख्यत्वम्' – प.
३. 'सूत्रमुपन्यस्यति – महद्वच्चेति ॥'
४. 'सप्तम्यन्ताच्च वृत्तिं चशब्दस्य' – प.

इति श्रुतेः शिरोवाचकः, एवमव्यक्तादिशब्दाः सर्वेऽन्यत्र प्रसिद्धा अपि

'नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति' *(भाल्लवेयश्रुतिः)* **इत्यादिश्रुतेः परमात्माभिधायका एव। अविशेषाच्छ्रुतेः ॥ ९ ॥**

॥ इत्यानुमानिकाधिकरणम् ॥ १ ॥

ननु भवेदियमव्यक्तादिशब्दानां परमात्मनि परममुख्यत्वचिन्ता । यदि तेषां तत्र मुख्यत्वमेव सिद्धं भवेत् । न च तद्युक्तं, तेषामन्यत्रैव प्रसिद्धत्वात् । न च **'अव्यक्तमचलम्'** इत्यादिश्रौतस्मार्तप्रयोगबलात् तेषां तत्र शक्त्यवगमः । वृत्त्यन्तरेणापि प्रयोगोपपत्तेरित्याशङ्कां परिहरत्सूत्रमुपन्यस्यति - **चमसवदिति ॥** अत्रापि पूर्ववच्छब्दपरत्वं प्रथमान्तात् सप्तम्यन्ताच्च [१]वतिं चशब्दानुवृत्तिं तस्य पूर्ववदर्थद्वयं श्रुतेरित्यध्याहारं चाभिप्रेत्य सूत्रं व्याचष्टे - **यथेति ॥** **'अन्यत्र'** चतुष्कोणयज्ञपात्रे पुनः **'अन्यत्र'** प्रधानादौ अव्यक्तादिशब्दा इत्यनेन प्राचीनम् **'इतरे'** इति स्वपदं व्याख्यातम् । दृष्टान्तीभूतमहच्छब्दस्यापि सङ्ग्रहाय सर्व इत्युक्तिः । आदिशब्देन पुरुषादिशब्दानां ग्रहणम् । **'यो देवानाम्'** इत्यादि द्वितीयादिपदार्थः । तथा च यथा चमसशब्दो यद्यपि अन्यत्र प्रसिद्धः, तथाऽपि **'इदं तच्छिरः'** इत्यनुशासनरूपश्रुतेः शिरोवाचकोऽवगत एव । तथा सर्वेऽव्यक्तपुरुषादिशब्दा यद्यप्यन्यत्र प्रसिद्धाः, तथाऽपि **'नामानि'** इत्यादिश्रुतेः **'परमात्माभिधायकाः'** वाचका एव, न लाक्षणिका इत्यवगम्यत इति योजना ॥

नन्विदमित्यस्याभिधानरूपत्वेऽपि न **'नामानि'** (भाल्लवेयश्रुतिः)

---

१. **'वृत्तिं'** – प.

इत्यस्याभिधानरूपता । वृत्त्यन्तरेणापि एवंवचनसम्भवादित्याशङ्क्योत्तरत्वेन[१] प्रवृत्तमविशेषादिति सूत्रखण्डं व्याचष्टे – **अविशेषादिति ॥** श्रुतेरित्यावर्तते । तथाच **'नामानि'** इति श्रुतेः **'इदम्'** इति श्रुतेः सकाशाद् विशेषाभावादित्यर्थः । [२]अतस्तद्वदस्या अप्यनुशासनरूपत्वादनया परमात्मवाचित्वनिश्चयो भवत्येवेति भावः ।

बृहदारण्यके हि **'तदेष श्लोको भवति'** इति प्रतिज्ञाय **'अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन् यशो निहितं विश्वरूपम्'** इति मन्त्रमुदाहृत्य **'अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इति'** इति वाक्येन मन्त्रगतैकपादं प्रतीकं गृहीत्वा **'इदं तच्छिरः'** इति वाक्येन स मन्त्रो व्याख्यातः ॥

तत्प्रकारस्तु – **'अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः'** इति व्याख्येयमन्त्रे यद् वस्तूक्तम्, तदिदं प्रतीयमानं शिरः । कथं **'हि'** यस्मात् **'एषः'** शिरश्चमसस्तद्रूपः। ननु कथं शिरश्चमसः इत्यतस्तल्लक्षणयोगादित्याह - **अर्वाग्बिल इति ॥** 'बिलं' मुखादि । तथा चाधोभागस्थितमुखादिमानित्यर्थः । **'ऊर्ध्वबुध्नः'** बुध्नो वर्तुलकठिनाकारः, तथा चोपरिभागस्थितबुध्नाकारवानित्यर्थः । **'दक्षिणाऽन्नं वनुते यो न आत्मा'** (ऋ.१०.१०७.७) इत्यत्र यथा आत्मशब्दापेक्षयाऽन्ने पुल्लिङ्गयच्छब्दनिर्देशः, तद्वत् [३]शिरस्यपि चमसशब्दविवक्षया एष इति पुल्लिङ्गनिर्देशो युक्त इति । [४]**दक्षिणा'** लक्ष्मीः **'वनुते'** भजति । किमन्नमित्यत आह – **य इति ॥** **'नः'** अस्माकम् **'आत्मा'** अन्तर्यामीत्यर्थः ॥ सूत्रार्थस्तु स्पष्टः ॥

॥ इत्यानुमानिकाधिकरणम् ॥ १ ॥

---

१. 'आशङ्काकरत्वेन' – प.

२. 'अतस्तद्वचनस्यानुशासनरूपत्वाद्' – प.

३. 'तच्छिरस्यपि' – प. ४. 'तद्दक्षिणा'– प

॥ २. अथ ज्योतिरुपक्रमाधिकरणम् ॥

(भगवतः श्रुत्युक्तज्योतिष्टोमादिकर्माभिधायक-
शब्दवाच्यत्वं समर्थनम्)

'वसन्ते वसन्ते ज्योतिषा यजेत'
इत्यादिकर्माभिधायकस्य [१]कर्मक्रमादिविरोधान्न युज्यत इति ।

॥ २. अथ ज्योतिरुपक्रमाधिकरणम् ॥

अत्राधिकरणे कर्मतदङ्गेष्वेव प्रसिद्धानां ज्योतिष्टोमादिशब्दानां भगवति समन्वयः प्रतिपाद्यते । श्रुत्यादिसङ्गतिं विषयादिकं च सूचयति – **वसन्त इति ॥ 'तत्तु समन्वयात्'** इत्युक्तः सर्वशब्दानां परमेश्वरे समन्वय इति पूर्वाधिकरणवाक्यमत्रापि सम्बध्यते । आदिशब्द उभयान्वयी । कर्मेत्यादौ ग्राह्यम् । कर्माभिधायकस्येति हेतुगर्भम्[२]। तथा च **'तत्तु समन्वयात्'** इत्युक्तः परमेश्वरे सर्वशब्दानां[३] समन्वयो न युज्यते । यतः **'वसन्ते वसन्ते'** [४]इत्याद्याधायकवाक्यगतशब्दजातस्य समन्वयो न युज्यते । सोऽपि कुतः ? तस्य कर्माद्यभिधायकत्वेन प्रसिद्धत्वात् । तदतिक्रमेण समन्वये च कर्मतत्क्रमादेरभावाख्यविरोधप्रसङ्गात् । सोऽपि कुतः ? कर्माद्यभिधायकाभावाख्यविरोधात्[५] । तथा च विहितानुष्ठानलोपाख्यविरोधापातादिति योजना ॥

---

१. **'क्रमादिविरोधात्' ह**
२. **'कर्माभिधायकस्येति ॥ कर्मेत्यादौ ग्राह्यं हेतुगर्भम् ।'** – **प.**
३. **'सर्वशब्दानां परमेश्वरे' प.**
४. **'इत्यादिकर्माभिधायक-' प.**
५. **'कर्मादेरभिधायकाभावाख्यविरोधात्'– प.**

प्रथमादिशब्देन **'ज्योतिष्टोमेन'** इत्यादिफलवाक्यम् [१], **'वाजपेयेनेष्ट्वा बृहस्पतिसवने यजेत' 'वेदं कृत्वा वेदिं कुर्यात्'** इत्यादिक्रमवाक्यं कर्मणां तारतम्यबोधकम्, यद्वा – कर्मक्रमवाक्यं दीक्षणीयोपसदाद्यङ्गवाक्यं [२] च गृह्यते । द्वितीयादिशब्देन कालाधिकारिफलादिप्राधान्यादादौ कर्मग्रहः । तत्र वसन्तशब्दः कालविशेषवाची[३] । सुधारीत्या तत्रैव विधेस्तात्पर्यम् । ज्योतिश्शब्दो ज्योतिष्टोमशब्दश्च कर्मवाची । तत्राऽद्यः समस्तशब्दोपलक्षकः । तद्द्वारा ज्योतिर्नामकस्तोत्रसमूहवतो यागस्य लक्षितलक्षणया बोधकः । स्वयं तु शक्यार्थः ॥

वसन्तवाक्यस्य[४] ज्योतिष्टोमानुवादेन गुणविधायकत्वं तु गीताभाष्य-प्रमेयदीपकृद्भ्यां [५] नाङ्गीकृतम् । कर्मान्तरविधित्वमिति तयोराशयः[६] । अत एव प्रथमं तदेवोदाहृतम् । सूत्रे ज्योतिरित्येकदेशकीर्तनाद् भाष्येऽपि तादृशस्यैवोदाहरणम् । स्वर्गकामशब्दोऽधिकारिवाची, स्वर्गशब्दः फल-वाची[७]॥ अनेन समन्वयसूत्रोक्तसर्वशब्दसमन्वयाक्षेपात् तेनास्याऽक्षेपिकी सङ्गतिरुक्ता[८] ॥

ज्योतिष्टोमादिशब्दाख्यो विषयः, अन्यवाचीति पूर्वः पक्षः, अन्यत्र

---

१. 'इत्यादिवाक्यम्' – प.
२. कर्मक्रमवाक्यं 'समिधो यजति' इत्याद्यङ्गवाक्यं – प.
३. 'कालवाची' – प.
४. 'वसन्तशब्दस्य'– प.
५. 'तु प्रमेयदीपकृता' – प.
६. 'कर्मविधित्वमेवेति तस्याऽशयः । अतो भाष्ये तस्यैवोदाहरणम् । स्वर्गकामशब्दः'– प.
७. 'फलवाचीति ज्ञातव्यम्'। प.
८. 'सङ्गतिः सूचिता ।' प.

प्रसिद्धेर्विष्णुवाचित्वे कालकर्मादिविरोधाच्चेति युक्तिश्च सूचिता भवति ।

अत आह – सू –

ॐ ॥ ज्योतिरुपक्रमात्तु तथा
ह्यधीयत एके ॥ ॐ ॥१०॥

ज्योतिरादिकर्मवाचकत्वेन प्रसिद्धाभिधेयोऽपि स एव ।
'एष इमं लोकमभ्यार्चत्' इत्युपक्रम्य
'ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषाः एकैव
व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यात्' *(ऐ.आ. २.२.२)*
इति ह्यधीयत एके ॥ १० ॥

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे -**अत इति** ॥ वसन्तादिरादिपदार्थः । यद्यप्युदाहृतवाक्ये वसन्तशब्दस्य प्रथमं श्रुतत्वाद् वसन्त इति वक्तव्यम् । तथाऽपि ज्योतिश्शब्दस्य कर्मान्तरप्रकृतित्वफलकरणत्वादिना प्रधानभूत-ज्योतिष्टोमाख्यकर्मवाचित्वाज्ज्योतिरित्युक्तं सूत्रे, तदनुसारादत्रापि । एतच्चान्येषामप्युपलक्षकमिति भावेन ज्योतिरादीत्याह । ज्योतिरादीत्युभयान्वयी । ज्योतिरिति शब्दार्थयोर्ग्रहणम् । न केवलं सिद्धरूपदेवतातत्क्रमवाचकैः **'इन्द्रियेभ्यः पराः'** (कठ.१.३.१०) इत्यादिशब्दैः वाच्यो हरिः, किन्तु साध्यभूतकर्मतत्क्रमादिशब्दवाच्यश्चेत्यपिशब्दार्थः ॥

अनेन ज्योतिस्त्वित्यन्वितसौत्रतुशब्दोऽप्यर्थतया व्याख्यातः । समन्वय-सूत्रादनुवृत्तं विधेयसमर्पकं तदिति पदम् **'एषः'** इति श्रुत्यनुसारा-ल्लिङ्गविपरिणामेन स इति पठितं, तत एवानुवृत्तस्य तुशब्दस्यार्थ एवेति । तथा च ज्योतिष्टोमादिकर्मादिवाचित्वेन प्रसिद्धज्योतिरादिशब्दाभिधेयोऽपि **'स एव'** हरिरेवेति प्रतिज्ञार्थः ॥

प्रसिद्धेत्यनेन पूर्वपक्षयुक्तिः[१] सूचिता । इतिशब्दात् [२]परं तथाशब्दो योज्यः । हिर्हेतौ । तथा च **'हि'** यस्मात् **'एके'** शाखिनः श्रीमन्महैतरेयिनः **'ता वा एताः'** (ऐ.आ.२.२.२.११) इति **'तथा'** सर्वशब्दाभिधेयत्वेन **'तत्तु'** [३]हरिमेवाधीयते तस्मादिति हेत्वर्थः ॥

ननु शब्दानां विष्णुपरत्वे तत्र वृत्त्यभाव इत्यतः प्रवृत्तमुपक्रमादित्येतत् ल्यब्लोपनिमित्तपञ्चमीं मत्वा व्याचष्टे – **एष इति ॥** उपक्रम्येति सावधारणम्। तेन सौत्रतुशब्द एवार्थतयाऽपि व्याख्यातः । अत एवाऽह टीकाकृत् **'तुशब्दः एवार्थः'** इति । तत्त्वप्रदीपकृच्चाऽह - **प्रघट्टकोपक्रमादेवेति आरभ्येति च ॥** एतच्च परमेश्वरे शब्दानामज्ञरूढिमात्रापहारकविद्वद्रूढिसहितमहायोगं दर्शयितुमभिहितम् । अत एव उपक्रम्येत्युपलक्षणम् – **'तं यच्छतम्'** (ऐ.आ.२.२.१) इत्यादिना नामानि निरुच्य इत्यपि द्रष्टव्यम् । अस्य ह्यधीयत इत्यनेनान्वयः । तस्मान्न परमेश्वरे वृत्त्यभावदोष इति भावः ॥

'एषः' नारायणो देवः **'इमं लोकं'** ब्रह्मादिशरीरं पुरुषरूपेणान्तर्यामितया **'अभ्यार्चत्'** प्राविशदिति श्रुत्यर्थः । अन्यत् सर्वं पादान्त्यप्राणनये व्याकृतम् । सूत्रार्थस्तु – न केवलमव्यक्तादिशब्दवाच्यं, किन्तु **'ज्योतिस्तु'** ज्योतिरादि-शब्दवाच्यं तत्तु ब्रह्मैव, न त्वन्यज्ज्योतिष्टोमादि । कुतः ? **'हि'** यस्मात् **'एके'**

---

१. **'पूर्वपक्षेऽन्यत्रप्रसिद्धेः युक्तिः'** – प.

२. **'तेनापिर्यद्यपितथापीत्यर्थतयाऽपि योजनीयः । तेन सौत्रस्तु-शब्दोऽप्यर्थतयाऽपि व्याख्यातः । कुतो हरिरेवेत्यतः प्रवृत्तं यथेत्यादि-हेत्वंशं व्याचष्टे – ता वा इत्यादिना ॥ तत्त्विति विपरिणतमत्रापि सम्बध्यते । अध्याहृतेन हरिमित्यनेनैवार्थतुशब्दान्वय इति केचित् । इति शब्दात् ।'– प.**

३. **'हरिरेव'** – प.

शाखिनः **'ता वा एताः'** इति **'तथा'** सर्वशब्दवाच्यत्वेन **'तत्तु'** ब्रह्मैव **'अधीयते'** वदन्ति, तस्मात् । न च ब्रह्मणि वृत्त्यभाव इति वाच्यम् । **'हि'** यस्मात् **'उपक्रमात्' 'एष इमम्'** इत्युपक्रम्याधीतेन **'तं यच्छतम्'** इत्यादिना नामानि निरुच्य पुनः सर्ववेदप्रभृतयः समुद्रघोषान्ताः शब्दा नारायण एव विद्यादिति सतात्पर्यमैतरेयिनोऽधीयते, तस्मात् । तथा च परब्रह्मणि[1] सर्वशब्दानां च विद्वद्रूढिसहितमहायोगस्य उक्तत्वान्नोक्तदोष इति भाव इति ॥

सू - ॐ ॥ कल्पनोपदेशाच्च
मध्वादिवदविरोधः ॥ ॥ ॐ ॥ ११ ॥

मधुविद्यादिवत् सर्वशब्दार्थत्वेन परस्य कल्पनोपदेशाच्च
न[2] कर्मक्रमादिविरोधः ॥ ११ ॥

॥ इति ज्योतिरुपक्रमाधिकरणम् ॥ २ ॥

ननु कथं ज्योतिरादिशब्दवाच्यत्वं परमात्मनः सम्भवति । तथा सति कर्मक्रमादिविरोधापातात् । ज्योतिष्टोमादिशब्दानाम् अन्यपरत्वानभ्युपगमे परमात्मनि तेषां [3]व्युत्पत्त्यसम्भवाच्चेत्याशङ्कामपनुदत्सूत्रमुपन्यस्य व्याचष्टे - **कल्पनेति ॥ मधुविद्यादिवदिति** । मधुविद्यायां मध्वादिशब्दवदित्यर्थः । मधुविद्या तु – **'असौ वा आदित्यो देवमधु'** (छां.३.१.१) इत्याद्या ॥

अस्यां हि द्यारव्यरमातिरोवंशाश्रितान्तरिक्षाख्यवायुमध्वरूपस्थादित्य-मण्डलान्तर्गतस्य भगवतो वासुदेवादिपञ्चमूर्तेरग्र्यादिप्रधानवस्वादिसुरमधुकर-

१. **'अधीयते । अनेन परब्रह्मणि'** – प.
२. **'कल्पनोपदेशान्न'** ह.
३. **'व्युत्पत्तिसम्भवाच्च'** – प.

मुखसंस्पर्शेन पञ्चधाविभिन्नऋगादिसर्ववेदाख्यपुष्पोत्थयशस्तेजइन्द्रिय-वीर्यान्नाद्यात्मकमधुरसत्वमुच्यते ॥

आदिशब्देन[1] **'इदं तच्छिर एष ह्यर्वाग्बिलश्चमसः'** (बृ.४.२.३) इति शिरसश्चमसशब्दार्थत्वानुशासकश्रुतिर्गृह्यते । सर्वशब्दार्थत्वेनेत्यनेन सूत्रे पूर्वस्मात् तथाशब्दः संयोज्य इति सूचितम् । परस्येत्यनेन तदित्यस्य वि-परिणतस्यात्रानुषङ्गः सूचितः । चः समुच्चयेऽवधारणे च, स चोभयत्रान्वेतव्यः । तत्रावधारणार्थस्याबाधित्वेत्यध्याहृतपदेन सह हेतावन्वयः । समुच्चयार्थस्य तु साध्येन । अविरोध इत्यस्य विरोधाभाव इत्यर्थमुपेत्य कर्मादीत्यनेन विरोधिप्रतियोगी दर्शितः । आदिशब्दार्थस्तु प्रागेवोक्तः ॥

अनेन – न केवलं परमात्मनः सर्वशब्दवाच्यत्वे तथा ह्यधीयत इत्युक्तं साधकसद्भावमात्रम्, किन्तु वाचकशब्दाभावप्रयुक्तो यः कर्मक्रमादिविरोधः पूर्ववादिना बाधकत्वेनाभिहितः, सोऽपि न । कुतः ? तस्य परस्य **'कल्पनोपदेशाच्च'** कल्पना क्लृप्तिः । तथा च लोकतः क्लृप्तं तत्तद्वाचकत्वमबाधित्वैव लोकाक्लृप्तमहायोगवृत्तेः कल्पनया व्युत्पादनेन च परस्य विष्णोः तथा **'सर्वशब्दार्थत्वेन'** सर्वशब्दवाच्यत्वेन **'उपदेशात्' 'ता वा एताः'** इत्यादावुपदिष्टत्वात् । न चैवं सर्वाभेदापत्तिर्वैय्यर्थ्यं चेति वाच्यम् । कल्पनोपदेशात्परस्य विष्णोः सर्वशब्दार्थत्वेन कल्पनाया उपासनाया एव **'प्राण ऋचः'** इत्यादावुक्तत्वाद् अभेदस्यानभिधानात् ॥

यद्वा – **'कल्पनायैव'** तदर्थमेवोपदेशान्नाभेदो न च वैयर्थ्यं प्रसज्यते । अस्मिन् पक्षद्वये बुद्ध्या विविक्तेन कल्पनाशब्देन चशब्दार्थैवकारान्वयः । अथवा – कल्पनोपदेशादेवेश्वरे[2] शब्दानां महायोगवृत्तिः सिद्ध्यति, न तु तदर्थं हेत्वन्तरमन्वेषणीयमित्यध्याहारं विना यथाश्रुत एवार्थः । चशब्दस्य हेतावन्वयः ॥

---

१. **'आदिशब्दात्'** – प. २. **'एव चेश्वरे'** – प

अनेनेश्वरे शब्दानां सङ्केतमात्रं, न महायोग इति चोद्यं निरस्तम् । उपासना हि सर्वशब्दार्थगुणवत्त्वप्रकारिका । सा च शब्दानां सङ्केतमात्रे न युज्यते, अतो महायोगवृत्तिसिद्धिः । ननु अन्यत्रादृष्टमेतत् कथं कल्प्यत इत्यत उक्तम् - **मध्वादिवदिति** ॥ यथा खलु मधुविद्यायाम् **'असौ वा आदित्यो देवमधु'** इत्याद्यायां तु मधुयशस्तेजआदिपदार्थतया परमात्मन उपासनोपदेशेऽपि तदर्थं मध्वादिशब्दानां परमात्मवाचित्वेऽपि न लौकिक-क्षौद्रादेर्वाचकशब्दाभावेनाभावाख्यो विरोधः, यथा च **'इदं तच्छिरः'** इति श्रुतौ चमसशब्दवाच्यत्वेन शिरस उपदेशेऽपि न यज्ञपात्राभावाख्यो विरोधः[१] तथाऽत्रापि विरोधाभावः ॥

कुतः ? अन्यत्र क्षौद्रादौ रूढिमनिवार्यैव मध्वादिशब्दानां परमात्मतद्गुणवाचिताऽभ्युपगमात् । एवं सर्वशब्दवाच्यत्वे परमात्मनोऽ-भ्युपगतेऽपि न कर्मक्रमादिविरोधः । कुतः ? ज्योतिरादिशब्दानामन्यत्र केवलरूढ्यादिवृत्तिमभ्युपेत्य महायोगवृत्त्या ईश्वरवाचित्वाभ्युपगमादिति सूत्रार्थ उक्तो भवति ॥

॥ इति ज्योतिरुपक्रमाधिकरणम् ॥ २ ॥

---

१. 'विरोधस्तद्वत् । अत्रापि'– प.

॥ ३. अथ नसङ्ख्योपसङ्ग्रहाधिकरणम् ॥

(भगवतः पञ्चजनादिशब्दवाच्यत्वसमर्थनम्)

सू - ॐ ॥ न सङ्ख्योपसङ्ग्रहादपि
नानाभावादतिरेकाच्च ॥ ॐ ॥ १२ ॥

'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः' (बृ. ६.४.१७.)
इत्यादिषु बहुसङ्ख्योपसङ्ग्रहेऽपि न विरोधः ।

॥ ३. नसङ्ख्योपसङ्ग्रहाधिकरणम् ॥

अत्राधिकरणे प्रातिपदिकेन प्रत्ययमुखेन बहुत्वसङ्ख्याविशिष्ट-वस्तुवाचिनामाधाराधेयवाचिनां च शब्दानां समन्वयः क्रियते । अत्र **'तत्तु समन्वयात्'** इत्युक्तः सर्वशब्दसमन्वयो न युज्यते । कुतः ? विरोधात् - बहुत्वाधारत्वादिवाचिशब्दवाच्यत्वाभावात् । सोऽपि कुतः ? विरोधात् - बहुत्वसङ्ख्योपसङ्ग्रहविरोधात् । एकस्यैवाऽधाराधेयत्वविरोधाच्चेति पूर्वाधि-करणीयवाक्यसंयोजनेन शिष्याः सङ्गतिविषयादिकं ज्ञास्यन्तीति भावेन सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे **-नेति ॥** **'इत्यादिषु'** वाक्येषु **'[1]बहुसङ्ख्योप-सङ्ग्रहेऽपि'** बहुसङ्ख्याकानां वस्तूनां **'पञ्च'** इति प्रातिपदिकेन वा **'पञ्चजनाः'** इति बहुवचनान्तेन वा एकेन पदेनोपसङ्ग्रहेऽपि सङ्क्षिप्यवचनेऽपीत्यर्थः । निमित्तसप्तमीयम् ॥

अनेन सङ्ख्योपसङ्ग्रहादिति विरोधनिमित्तसमर्पकं पदं व्याख्यातं भवति । न केवलं सङ्ख्योपसङ्ग्रहात्, किन्तु एकस्मिन्ननुपपद्यमानस्य **'यस्मिन्'** इत्याद्याधाराधेयभावस्य वचनादपीति समुच्चयार्थोऽपिशब्दः पूर्वसूत्राद् बुद्ध्या

---

१. **'बहुत्वसङ्ख्योपसङ्ग्रहेऽपि'** – प.

विवेकेन विरोधपदाकर्षकोऽपि भवतीत्याशयेन विरोध इत्याह ॥ अनेन तस्येत्याकृष्यते । नेति [१] शेषः । तथा च **'यस्मिन्'** इत्यादौ बहुत्वाधारत्वादेः श्रवणाद् यस्तेन तस्य भगवतः पञ्चजनाकाशशब्दवाच्यत्वस्य **'विरोधः'** अनुपपत्तिः स नेति योजना ॥

अनेनापि पूर्वपक्षे युक्तिद्वयानुवादात् पञ्चजनादिशब्दवाच्या अन्ये षष्ठीनिर्दिष्टा एव, न द्वितीयानिर्दिष्टो विष्णुरिति सयुक्तिकपूर्वपक्षो दर्शितः । तस्य पञ्चजनादिशब्दवाच्यस्य **'न विरोधः'** नानुपपत्तिरित्यनेन सिद्धान्तप्रतिज्ञा च सूचिता ॥

तस्यैवाऽकाशादिषु नानाभावात्तदतिरिक्तस्वरूपत्वाच्च [२]॥१२॥

कुतो न विरोध इत्यतः प्रवृत्तं सौत्रं नानाभावादिति हेतुं व्याचष्टे - **तस्यैवेति [३]** ॥ एकस्यैवेत्यर्थः । परस्येति वर्तते । एवकारोऽप्यर्थकः । अनेन अपिः यद्यपीत्याद्यर्थतयाऽपि व्याख्येय इति सूचितम् । तथा च तस्यैकस्य स्वगतभेदशून्यस्यापि परस्य भगवतो **'नानाभावात्'** प्रतिशरीरं नानारूपत्वादित्यर्थः । तथा च रूपबाहुल्याद् बहुवचनोपपत्तिरिति भावः । न च प्रतिशरीरं परमात्मनो बहुरूपत्वमप्रामाणिकमित्याह - **आकाशादिष्विति** ॥ नियामकत्वेनेति शेषः । नानाभावादित्यत्रापि सम्बद्ध्यते । तथा च तत्तच्छरीरान्तर्गतेष्वाकाशप्राणादिपञ्चजनेषु नियम्येषु नियामकत्वेन स्थितस्य भगवतो नानाभावस्य न्यायप्राप्तत्वादित्यर्थः ॥

---

१. 'तेनेति शेषः' – प

२. स्वरूपवत्वाच्च - ह.

३. 'तस्यैवेति ॥ एवकारोऽभेदव्यवर्तकोऽनेनापिः यद्यपीत्याद्यर्थतयाऽपि व्याख्येय इति सूचितम् ।' – प.

अनेनैकस्मिन् बहुत्वसङ्ख्यानुपपत्तिः[1] परिहृता । अथ **'यस्मिन्'** इत्याधारस्य विष्णुत्वात्पञ्चजनानाम् आधेयानामविष्णुत्वमित्याशङ्कां परिहर्तुं प्रवृत्तम् अतिरेकाच्चेत्यंशं व्याख्याति – **तदिति** ॥ **'तस्य'** आधारभूतस्य शरीरनियामकभगवद्रूपस्य **'तेभ्यः'** आधेयभूताकाशादिगतषड्रूपेभ्यः **'अतिरिक्तत्वात्'** अधिकत्वात् पृथक्त्वाच्चेत्यर्थः । तच्छब्दासाहित्येन अतिरिक्त-स्वरूपत्वाच्चेति पाठे तस्येत्यनुषङ्गेण तस्य तादृशस्वरूपत्वादित्यर्थः । तथाच विष्णोरेकत्वेऽप्याधेयसङ्ख्याधिकशरीरनियामकेश्वररूपाश्रिताकाशप्राणादौ भगवतोऽवस्थितिमात्रेण तस्याऽधाराधेयभावो युज्यत इति न तदनुपपत्तिरिति भावः । सत्तर्कदीपावल्यां तु स्वाधेयत्वं लीलयेति भाव इत्युक्तम् । हेतोः समुच्चये चशब्दः ॥

वाजसनेयक उदाहृतोऽयं मन्त्रः –

'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः ।
तमेवं मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम् ॥'

इति । अत्र पञ्चपञ्चेति वीप्सा पञ्चानां जनानां सर्वशरीरेष्वनु-वृत्तिज्ञापनार्था । तथा च **'यस्मिन्'** सर्वशरीरगते परमात्मनि **'पञ्चजनाः'** प्रतिपुरुषं स्थितानां पञ्चानां प्राणादिजनानां जनयितृत्वान्निमित्तात् तत्तच्छब्द-वाच्याः तदाधाराः पञ्च भगवद्रूपविशेषाः **'प्रतिष्ठिताः'** तदाश्रिताः, तथा - आकाशाख्यो भगवान् तदाख्या प्रकृतिश्च यस्मिन्नाश्रिता, **'तं'** परमात्मानमहं **'मन्ये'** जानीयामित्यर्थः । मन्त्रद्रष्टृवाक्यमेतत् । किं तज्ज्ञानेनेत्यत उक्तं - **विद्वानिति** ॥ **'एवम्'** उक्तप्रकारेण सर्वशब्दवाच्यं **'तम् अमृतं'** परं ब्रह्म **'विद्वान्'** तत्त्वेनोपासीनः स्वयं चान्यैः **'अमृतो भवति'** मुक्तो भवतीत्यर्थः ॥ तमेवेति सावधारणपाठस्तु सत्तर्कदीपावलीविरुद्धः ॥

---

१. **'बहुसङ्ख्यानुपपत्तिः'** – प.

यद्यपि बृहदारण्यकभाष्ये -

'प्राणश्चक्षुस्तथैवान्नं मनश्श्रोत्रं च पञ्चमम् ।

मूलप्रकृतिसंयुक्तं तद्वतं प्रतिपूरुषम् ॥'

इत्यनेन षष्ठ्यन्तनिर्दिष्टानां नियम्यप्राणादीनामेव पञ्चजनशब्दवाच्यत्वम्, तथा तेषामाकाशाख्यमूलप्रकृतेश्च भगवदाश्रितत्वमुक्तम् । न तु भगवद्रूपाणां पञ्चजनशब्दवाच्यत्वम्, न वा स्वाश्रितत्वं भगवतः । तथाऽपि तत्र सर्वशब्द-समन्वयोक्तौ तात्पर्याभावाद् यथाकथञ्चिद्वाक्ययोजने तात्पर्यादमुख्यवाच्याभि-प्रायेण तत्र तथोक्तावप्यत्र बहुसङ्ख्यावाचिनाम् आधारादिवाचिनां च सर्वेषां शब्दानां समन्वये तात्पर्यात् तस्य च तच्छब्दमुख्यवाच्यतामन्तरेणायोगात् तदर्थं तेषामपि परममुख्यवृत्त्या भगवत्परत्वोक्तिरिति न विरोध इति ज्ञातव्यम् ॥

अनेन - **'सङ्ख्योपसङ्ग्रहात्'** **'यस्मिन्'** इत्यादौ बहुत्वसङ्ख्यानाम् उपसङ्ग्रहात् सङ्क्षेपेण बहुत्वसङ्ख्याविशिष्टवस्तुवचनात्, तथा **'यस्मिन्'** इत्याद्याधाराधेयभावश्रवणादपि प्राप्तो यो **'विरोधः'** भगवतस्तच्छब्दवाच्यत्वा-योगाख्यः स न । कुतः ? **'अपि'** एकस्यापि स्वगतभेदशून्यस्यापि परमात्मनः **'नानाभावात्'** अनेकरूपत्वात्, तथा **'अतिरेकात्'** आधाररूपस्याऽ-धेयरूपेभ्यः षड्भ्यः सङ्ख्येयेभ्योऽतिरिक्तत्वाच्चेति सूत्रार्थ उक्तो भवति ॥

पञ्च जनानाह[1] **–**

सू – ॐ ॥ प्राणादयो वाक्यशेषात् ॥ ॐ ॥ १३ ॥

ननु भवेदियं विष्णौ बहुत्वादिसम्भवविषयचिन्ता, यदि

---

१. **'पञ्च पञ्च जनानाह' ह.**

पञ्चजनादिशब्दवाच्यानां विष्णुत्वे भवेद् विशेषहेतुः । न चासावस्ति । **'सर्वे वेदाः'** (कठ.१.२.१५) इत्यादिश्रुत्यन्तराणां च साधारणत्वादतो बहुत्वादि-सम्भवेऽपि न पञ्चजनादिशब्दवाच्यो हरिरित्याशङ्कां परिहरत्सूत्रमवतारयति – **पञ्चेति** ॥ के ते पञ्चत्वाश्रयभगवद्रूपविशेषा इत्याशङ्कां मुखतो द्वितीयान्त-निर्दिष्टप्राणादिपञ्चजनोक्त्या परिहर्तुं, वाक्यशेषग्रहणेन पञ्चजनलिङ्गोक्त्याऽर्थात् पञ्चजनशब्दवाच्यानां द्वितीयानिर्दिष्टविष्ण्वन्यत्वशङ्कां च परिहर्तुं पञ्चजन-स्वरूपमाह सूत्रकार इत्यर्थः । श्रुत्यनुसारात् पञ्च पञ्चेति द्विरुक्तिः ॥

'प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य [1] श्रोत्रम्
अन्नस्यान्नं मनसो मनः' **इति वाक्यशेषात् ॥ १३ ॥**

अथ सूत्रं पठित्वा तत्र प्राणादय इति [2]विरोधपदान्वययोग्योद्देश्यपदस्य सम्बन्धभाष्येण प्रदर्शितत्वात्, तत एव प्रतिज्ञासिद्धेः, तत्र हेतुतयोक्तं वाक्यशेषमेव दर्शयति[3] – **प्राणस्येति** ॥ माध्यन्दिनानामयं वाक्यशेषः । व्याख्यातेयं कम्पनाधिकरणे ॥

अनेन सूत्रे पञ्चजना इति श्रौतपदद्वयस्य तत्त्वित्यस्य वाऽनुषङ्गेण प्राणादय इत्यस्याऽवृत्त्या विपरिणामेन च एते पञ्चजनास्तावत् प्राणादीनां **'प्राणादयः'** प्राणादिषु स्थित्वा प्राणादीनां प्राणत्वादिप्रदाः तत्प्रेरका-स्तन्नामकाश्च । कुतः ? **'प्राणस्य'** इति वाक्यशेषात् । **'ते च'** प्राणादीनां प्राणादयः **'त एव'** भगवद्रूपविशेषा एव, न त्वन्ये । न च विशेषहेत्वभावः । **'वाक्यशेषात्' 'स उ प्राणस्य प्राणः'** (केन.१.२) इति तलवकारवाक्यशेषात् । अतोऽत्र विष्णुलिङ्गत्वेन श्रुत्यन्तरसिद्धनिरवकाशप्राणादिप्राणत्वादिप्रदत्व-

---

१. **'उत श्रोत्रस्य'** ह. २. **'विधेयपदा-'** – प.
३. **'प्रदर्शयति'**– प.

रूपलिङ्गस्य श्रवणात्[१] स एव पञ्चजनशब्दवाच्यः, न षष्ठीनिर्दिष्टप्राणादय इति नोक्तसर्वशब्दसमन्वयविरोध इति सूत्रार्थ उक्तो भवति ॥

मुखतः प्रतीतः सूत्रार्थस्तु- एते पञ्चजनशब्दवाच्या भगवद्रूपविशेषास्तु प्राणादीनां प्राणादयः । द्वितीयान्तनिर्दिष्टप्राणादिप्राणत्वादिप्रदाः प्राणचक्षुश्श्रोत्रान्नमनोभिधा[२] ज्ञेया इति ।

सू– ॐ ॥ ज्योतिषैकेषामसत्यन्ने ॥ ॐ ॥ १४ ॥

'तद् देवा ज्योतिषां ज्योतिः' *(बृ.६.४.१६.काण्वपाठः)*
इत्यनेन काण्वानां पञ्चकम्[३] ॥ १४ ॥

॥ इति नसङ्ख्योपसङ्ग्रहाधिकरणम् ॥ ३ ॥

ननु माध्यन्दिनवाक्यशेषोक्तानां प्राणादिप्राणत्वादिप्रदानां विष्णुत्वेऽपि न पञ्चजनानां विष्णुत्वम् । कुतः ? काण्वानां वाक्यशेषे चतुर्णामेवोक्तत्वेन तस्य तद्वत **'यस्मिन्'** इति पूर्ववाक्यतो भिन्नार्थत्वात् । अत्रापि वाक्यशेषस्य **'यस्मिन्'** इत्यतो भिन्नार्थत्वावश्यम्भावादित्याशङ्कां परिहरत्सूत्रं पठित्वा श्रुत्युदाहरणपूर्वकमपेक्षितपदाध्याहारेण व्याचष्टे – **ज्योतिषेति ॥ इत्यनेनेति ॥** इति वाक्येनेत्यर्थः । एकेषामित्यस्य व्याख्यानं काण्वानामिति । शाखायामित्युक्तमिति शेषः । तथा च काण्वानां शाखायामपि तदित्यनेनोक्तेन ज्योतिषा सह पञ्चकमुक्तमिति योजना । अस्यातो न विरोध इति प्रथमसूत्रोक्तसाध्येनान्वयः ॥

---

१. **'-लिङ्गश्रवणात्'** – प.
२. **'प्राणचक्षुश्श्रोत्रान्नमयाभिधाः'**– प.
३. **'पञ्चत्वम्'** ह.

'यस्मादर्वाक् संवत्सरोऽहोभिः परिवर्तते ।
तद् देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् ॥' (बृ.६.४.१६)

इति काण्ववाक्यस्यायमर्थः – अहोभिः संवत्सरो यस्मादर्वाक् परिवर्तते । यस्मिन् स्वव्यापारमायुर्ह्रासादिकं कर्तुं न समर्थ इति यावत् । **'तज्ज्योतिषाम्'** आदित्यादीनां ज्योतिष्ट्वप्रदम् **'आयुः'** आयुःप्रदम् अचलम् **'अमृतं'** नित्यमुक्तं ब्रह्मस्वरूपं देवा उपासते । **'ह'** प्रसिद्धमिति ॥

सूत्रार्थस्तु – नैकेषां वाक्यशेषे चतुर्णामेवोक्त्या तस्य पूर्वतो भिन्नार्थत्वात् **'विरोधः'** एकवाक्यत्वाभावः । कुतः ? एकेषां माध्यन्दिनानां शाखायां पञ्चानामप्युक्तेः । नच काण्वशाखायाम् अनुक्तेस्तत्र वाक्यभेदोऽवश्यम्भावीति वाच्यम् । यतः **'एकेषां'** काण्वानां शाखायाम् **'अन्ने'** अन्नस्यान्नत्वप्रदातृरूपे तत्रैव **'असति'** अकथिते सत्यपि **'तद् देवाः'** इति किञ्चिद् दूरोक्तेन वाक्येन ज्योतिषाम् आदित्यादीनां ज्योतिष्ट्वप्रदेन ज्योतिराख्येन रूपेण सह पञ्चकमुक्तमिति ॥

अत्र शाखाद्वयेऽप्येकविधपञ्चकपरत्वाय ज्योतिरन्नशब्दयोरेकार्थत्वम्,[1] तयोर्भिन्नार्थत्वाय शाखाभेदेन पञ्चकद्वयं वेत्युक्तमुपपन्नमिति टीकोक्त-प्रमेयमनुसन्धेयम् ॥

॥ इति नसङ्ख्योपसङ्ग्रहाधिकरणम् ॥ ३ ॥

---

१. **'रेकार्थत्वम् । यतो भिन्नार्थत्वाय'** – प.

॥ ४. अथाऽकाशाधिकरणम् ॥

(परमात्मनः श्रुत्युक्ताकाशशब्दवाच्यत्वप्रतिपादनम्)

अवान्तरकारणत्वेनापि स एवोच्यत इति वक्ति -

सू - ॐ ॥ कारणत्वेन चाऽकाशादिषु
यथाव्यपदिष्टोक्तेः ॥ ॐ ॥ १५ ॥

॥ ४. अथाऽकाशाधिकरणम् ॥

अत्राधिकरणेऽवान्तरकारणवाच्याकाशादिशब्दसमन्वयः क्रियत इति शास्त्रादिसङ्गतिः । अत्रापि **'तत्तु समन्वयात्'** इत्युक्तः सर्वशब्दसमन्वयो न युज्यते । यतोऽवान्तरकारणवाच्याकाशादिशब्दैरन्यदेवोच्यते[1], न विष्णुः, तस्मिन् कार्यत्वस्य विरोधात्, स्वकार्यत्वस्य सुतरां विरुद्धत्वादिति पूर्वाधिकरणवाक्यसंयोजनेन श्रुत्यादिसङ्गतिं[2] विषयपूर्वपक्षादीन् शिष्या एव ज्ञास्यन्तीत्याशयेन सिद्धान्तयत्सूत्रमवतारयति – **अवान्तरेति** ॥ कार्यत्वे सति कारणत्वम् अवान्तरकारणत्वम्, अपिः समुच्चये । तच्छब्दैरिति शेषः । **'सः'** विष्णुः । न भूतादीनीत्येवशब्दार्थः । **'उच्यते'** मुख्यतः । तथा च न केवलं मूलकारणवाचकात्मशब्देनोच्यते, किन्त्ववान्तरकारणत्वेन **'तच्छब्दैः'** अवान्तरकारणवाचकाकाशादिशब्दैरपि स एवोच्यत इति सूत्रकारो वक्तीति योजना ॥

अवान्तरकारणत्वेनेत्यनेन सौत्रश्चशब्दः कार्यत्वसमुच्चयार्थतया अपीत्यनेन मूलकारणत्वसमुच्चयार्थतया च व्याख्यातः । न चाऽकाशादिशब्दैः

---

१. **'अन्यदेवतोच्यते'** – प.

२. **'श्रुत्यादिसङ्गतिविषयपूर्वपक्षान्'** – प.

कारणत्वादिप्रकारकबोधाभावादनुपपन्नमेतदिति वाच्यम् । सम्भूतशब्दसमानाधिकृताकाशादिशब्दैस्तथाऽवगमात्, तत्र पञ्चम्याः कारणत्वस्य सम्भूतप्रातिपदिकेन च कार्यत्वस्य चोपस्थितेः । यद्वा – **'अवान्तरकारणत्वेन'** तन्नियामकत्वेन स्वयम् अवान्तरकारणीभूत एव तच्छब्दैरुच्यत इत्यर्थः ॥

आकाशादिष्ववान्तरकारणत्वेन स एव स्थितः ।
यथाव्यपदिष्टस्यैव परस्य 'य आकाशे तिष्ठन्' *(बृ.५.७.१२)*
इत्यादिनाऽऽकाशादिषूक्तेः ॥ १५ ॥

॥ इत्याकाशाधिकरणम् ॥

सूत्रं व्याचष्टे – **आकाशादिष्विति** ॥ सूत्रे न केवलं कारणत्वेन, किन्तु कार्यत्वेन चेति चशब्दव्याख्यानमभिप्रेत्य तल्लब्धार्थमाह – **अवान्तरकारणत्वेनेति** ॥ **'सः'** विष्णुरिति । समन्वयसूत्रादनुवृत्ततच्छब्दस्य श्रुत्यनुसाराल्लिङ्गविपरिणामः कृतः ।[१]न त्वन्यदित्येवकारार्थः । टीकायां सम्बन्धभाष्ये **'तच्छब्दैरुच्यते'** इत्यत्र च **'स्थितः'** इति शेषोक्त्या सूत्रे स्थितः, तच्छब्दैः, उच्यते, इति पदत्रयमध्याहार्यमिति सूचितम् ॥

यद्यपि प्रतिज्ञासूत्रके[२] सम्बन्धभाष्ये **'अवान्तरकारणत्वेन सः'** इति पदद्वयस्य प्रयुक्तत्वात् तयोरेव **'आकाशादिषु स्थितः'** इति हेतुवाक्येऽन्वेतुं[३] शक्यत्वादाकाशादिषु स्थित इत्येव वक्तव्यम्[४] । अत एव टीकायां सम्बन्धभाष्योक्तां प्रतिज्ञां **'न केवलम्'** इत्यादिना विवृत्य न च

---

१. **'न त्वित्यारभ्य टीकायामित्यन्तो भागः प.मातृकासु नास्ति ।'**
२. **'प्रतिज्ञासूचिते'** – प.
३. **'अप्यन्वेतुं'** – प.
४. **'इत्येव हेतुवाक्यं योज्यम्'** – प.

कार्यकारणभावविरोध इत्यध्याहृतसाध्ये आकाशादिषु स्थितत्वादित्येव हेतुवाक्यं प्रदर्शितम् । तथाऽप्यवान्तरकारणत्वेनेत्यस्य हेतुसाध्ययोरुभयत्राप्यन्वयसूचनार्थं, स्थित इत्यस्यान्यविशेषणत्वशङ्कापरिहारार्थं च तत्पदयोः पुनरनुवादः कृतः ॥

तथा च न केवलं मूलकारणवाचिनाऽऽत्मपदेनैव विष्णुरुच्यते, किन्त्ववान्तरकारणत्वेन रूपेण तच्छब्दैरवान्तरकारणवाच्याकाशादिशब्दैरपि स एवोच्यते । न च तस्यावान्तरकारणत्वेन रूपेणोक्तौ कार्यत्वकारणत्वयोरापत्तिः, ते च विरुद्धे इति वाच्यम् । यत[१] आकाशादिष्ववान्तरकारणत्वेन रूपेण स एव स्थितः । आकाशाद्युत्पत्तावाकाशाद्यन्तर्गतस्य भगवतोऽभिव्यक्त्या वाय्वादिस्वरूपाभिव्यक्तिहेतुत्वेन च तस्य कार्यत्वकारणत्वयोरुपपत्तेर्न विरोध इति भावः । येन रूपेणाऽकाशादिषु[२] स्थितो विष्णुः स्थितः, तेन रूपेण तस्य तच्छब्दवाच्यतेति[३] ज्ञापनायोभयत्रावान्तरकारणत्वेनेत्युक्तिः[४]॥

अत्रापिपदपाठः प्रामादिकः ॥

नन्वाकाशादिषु विष्णोः स्थितत्वमसिद्धमित्यतस्तत्राऽकाशादिष्वित्यस्य बुद्ध्या विविक्तेनोक्तेरित्यनेनाप्यन्वयेन [५]लब्धहेतुमाह – **परस्येति** ॥ **'इत्यादिना'** वाजसनेयवाक्येनाऽकाशादिषु **'परस्य'** परमात्मनः **'उक्तेः'** सत्त्वोक्तेरित्यर्थः । परस्येत्यनेनानुवृत्ततच्छब्दस्य विभक्तिविपरिणामावृत्ती सूचिते । आदिशब्देन **'यो वायौ तिष्ठन्'** (बृ.५.७.७) इत्यादि, **'यमाकाशो न**

१. **'यत्र'** – प.
२. **'आकाशादिषु स्थितिः'** – प.
३. **'-वाच्यत्वमिति'** –प.
४. **'-कारणत्वेनोक्तिः सार्थकीति ज्ञातव्यम् । नन्वाकाशादिषु'** – प.
५. **'लब्धं हेतुम्'** – प.

वेद' (बृ.५.७.१२) इत्यादि च गृह्यते ॥

ननु श्रुतावप्याकाशस्थो विष्णुरिति कुत इत्यतस्तत्र **'यथाव्यपदिष्ट'** इत्यंशस्य **'आकाशादिषूक्तेः'** इत्याभ्यां संयोजनेन [१]लब्धं हेतुमाह – **यथा-व्यपदिष्टस्येति** ॥ व्यपदिष्टप्रकारमनतिक्रान्तो यथाव्यपदिष्ट इति विग्रहः । ततः षष्ठीतत्पुरुष इत्याशयेन षष्ठीप्रयोगः ॥

यद्वा – [२]श्रुत्यन्तरव्यपदिष्टानुरूपं यथाव्यपदिष्टमिति निपातनात् सादृश्येऽव्ययीभावः । तथा चैतरेये **'स योऽतोऽश्रुतः'** इत्यादौ परमात्मा **'यथा'** येन प्रकारेण **'व्यपदिष्टः'** श्रुतः तादृशस्यैव तस्य परस्य **'यमाकाशो न वेद'** इत्यादिना वाक्येनाऽकाशादिषूक्तत्वादित्यर्थः ।अनेनाऽकाशादिष्विति सौत्रो हेतुराकाङ्क्षाक्रमेण यथायोग्यमपेक्षितपदावृत्त्या योजनीय इत्युक्तं भवति ॥

सूत्रार्थस्तु – न केवलं मूलकारणवाचकात्मशब्देनैव,[३] किन्तु **'कारणत्वेन च'** अवान्तरकारणत्वेनेति यावत् । तेन रूपेण सम्भूतशब्द-समानाधिकृतैस्तच्छब्दैराकाशादिशब्दैरपि स विष्णुरेवोच्यते, न भूतादीनि । कुतः ? **'उक्तेः' 'नामानि'** इत्यादिश्रुतेरेव । न च कार्यकारणभावविरोधः[४]। यत आकाशादिषु अवान्तरकारणत्वेन स एव स्थितः, आकाशाद्युत्पत्तौ तत्स्थितस्य भगवतोऽप्यभिव्यक्तिरूपोत्पत्त्यवश्यम्भावात् कार्यत्वस्य, पूर्वस्य[५] उत्तराभिव्यक्तिहेतुत्वेन कारणत्वस्य चोपपन्नत्वादिति भावः ॥

---

१. **'लब्धहेतुम्'** – प.
२. **'श्रुत्यन्तरे व्यपदिष्टानुरूपो यथाव्यपदिष्ट इति'** – प.
३. **'मूलकारणवाच्यात्मशब्देन, किन्तु कार्यत्वेन कारणत्वेन वाऽवान्तर-कारणत्वेनेति'** – प.
४. **'कार्यकारणविरोधः'** – प.
५. **'पूर्वस्मात्'** – प.

न चाऽकाशादिगतत्वासिद्धिः । **'यः'** इति श्रुतौ आकाशादिषु तस्य परस्योक्तत्वात् । न च तत्रापि विष्णुः कुत इति वाच्यम् । **'यथाव्यपदिष्टोक्तेः'** **'स योऽतः'** (ऐ.आ.३.२.४) इत्यादिश्रुत्यन्तरे विष्णुः यथा येन प्रकारेण **'व्यपदिष्टः'** अभिहितः तेनैवाविदितत्वादिना[1] प्रकारेणोपेतस्य तस्येहाऽकाशादिषु '[2]**यमाकाशो न वेद**' इत्यादिनोक्तेरिति ॥

॥ इत्याकाशाधिकरणम् ॥ ४ ॥

---

१. 'अविदितत्वादित्यादिना' – प.

२. 'यथाऽऽकाशो न वेद'– प.

॥ ५. अथ समाकर्षाधिकरणम् ॥

(वस्तुतः सर्वशब्दानां भगवन्मात्रवाचकत्वेऽपि
जगति समाकर्षाद् व्यवहारः)

सर्वशब्दानां परमात्मवाचकत्वे[१] कथमन्यत्र व्यवहार इति ।

अतोऽब्रवीत् -

सू – ॐ ॥ समाकर्षात् ॥ ॐ ॥ १६ ॥

॥ ५. अथ समाकर्षाधिकरणम् ॥

अत्राधिकरणे विष्णौ प्रकारान्तरेण पूर्वोक्तसर्वशब्दसमन्वयासम्भवमाशङ्क्य परिहियते । यद्यपीदं सूत्राष्टकं पूर्वाधिकरणशेषतया व्याख्यातुं युक्तम्,तत्त्वप्रदीपे [२]तथा व्याख्यानात्, भाष्येऽपि पृथक् समन्वेतव्यशब्दान्तरानुक्तेश्च । तथाऽप्यस्य पृथङ्न्यायसूचकत्वेन [३]टीकायामधिकरणान्तरत्वेनैव तद् व्याख्यातम् । अत एव पूर्वतन्त्रे **'हेतुदर्शनाच्च'** (पू. मी.१.३.४) इति सूत्रं विरोधाधिकरणशेषभूतमपि पृथङ्न्यायसूचकत्वादधिकरणान्तरत्वेनापि व्याख्यातम् ॥

श्रुत्यादिसङ्गतिप्रदर्शनाय सूत्रमवतारयति – **सर्वेति ॥ 'तत्तु समन्वयात्'** इत्युक्तरीत्या सर्वशब्दानां मुख्यतः परमात्मैकवाचित्वे कथं ततोऽन्यत्र जगति शब्दप्रयोगरूपो वा [४]हानादिरूपो वा व्यवहारो युज्यते, न कथमपीत्यर्थः ॥

---

१. **'परमवाचकत्वे' ह.**
२. **'तथैव व्याख्यातत्वात्' – प.**
३. **'टीकारीत्याऽधिकरणान्तरत्वेन तद् व्याख्येयम् । अत एव'– प.**
४. **'आदानादिरूपो व्यवहारः'– प.**

तथा च तल्लोपप्रसङ्गात्, तस्य चानिष्टत्वात्, परमात्मैव मुख्यतः सर्वशब्दवाच्य इत्यवधारणानुपपत्तिरिति भावः[१] ॥

परमात्मवाचिनः शब्दा अन्यत्र समाकृष्य व्यवहियन्ते । ॥

जगद्वाचित्वाय समाकर्षाज्जगद्वाचित्वादित्यागामिपदान्वयाभिप्रायेण सूत्रं व्याचष्टे – **परमात्मेति** ॥ **'अन्यत्र'** जगति । समाकृष्येत्यनेन सूत्रे पञ्चमी ल्यब्लोपनिमित्तेति सूचितम् । व्यवहियन्त इत्यनन्तरं यत इति शेषः । अस्यातो न विरोध इति अनुवृत्तसाध्येनान्वयः । व्यवहियन्त इत्यनेनान्यत्र समाकर्षे प्रयोजनमुक्तं भवति ॥

अनेन – न सर्वशब्दानां परमात्मवाचित्वेऽप्यन्यत्र व्यवहारविरोधः । कुतः ? तत्रापि रूढ्यादेरङ्गीकारादिति शेषः । तथा सत्युभयोर्मुख्यवाच्यत्वेन [२]साम्यलक्षणविरोधः प्राप्त इति न वाच्यम् । उभयत्रान्योन्यनिरपेक्ष-वृत्त्यभावात् । सोऽपि कुतः ? जगद्वाचित्वाय **'समाकर्षात्'** जगद्वाचित्वात् । यतः स्वतो मुख्यवृत्त्या परमात्मैकवाचिनः शब्दा अन्यत्र व्यवहियन्ते, अत-स्तदर्थं परमात्मसम्बन्धात् समाकृष्य ततस्तान् सङ्गृह्य तेषाम् अन्यत्र रूढत्वेन सङ्केतितत्वात् परममुख्यवृत्तिभिन्नकेवलमुख्यवृत्तियुक्तत्वेनाङ्गीकृतत्वाद् इति सूत्रयोजना सूचिता भवति ॥

'परस्य वाचकाः शब्दाः समाकृष्येतरेष्वपि ।
व्यवहियन्ते सततं लोकवेदानुसारतः ॥' इति पाद्मे [३]॥१६ ॥

कुत एतन्मुख्यवृत्तौ द्वैविध्यं कल्प्यते,

---

१. **'इत्यभिप्रायः'** – प.
२. **'सामान्यलक्षण-'** – प.
३. **'इति हि पाद्मे'** ह.

उभयत्राक्षादिशब्दवदन्योन्यनिरपेक्षतयैव कुतो न शब्दवृत्तिरङ्गीक्रियत इत्यतः स्मृतेरेवेत्याह – **परस्येति** ॥ सततं वाचका इति सम्बन्धः । अपिः समुच्चये । परमात्मशब्दत्वाविशेषादग्न्यादिशब्दानाम् उदकादौ प्रयोगापत्तिरित्यत आह – **लोकेति** ॥ [1]हानादिसूक्तादिरूपलौकिकवैदिकव्यवहारसिद्ध्यनुसारत इत्यर्थः । तथा च **'सततम्'** अनादिकालतोऽविच्छेदेन स्वभावतः **'परस्य'** परमात्मनो **'वाचकाः'** वाचकतया स्थिताः सर्वे शब्दाः **'समाकृष्य'** परमात्मसम्बन्धात् ततः सङ्गृह्य लौकिकवैदिकव्यवहारसिद्धिमनुसृत्य तदर्थम् **'इतरेषु'** पदार्थेष्वपि वैदिकैः व्यवह्रियन्ते [2]केवलरूढत्वेनाङ्गीक्रियन्त इति स्मृत्यर्थः । पाद्म इत्यनन्तरम् उक्तत्वादिति शेषः । अस्योभयत्र नान्योन्यनिरपेक्षैव शब्दवृत्तिरित्यवतारिकालब्धसाध्येनान्वयः ॥

तर्हि कथं तेषां शब्दानां जगति प्रसिद्धिः –

शङ्कते – **तर्हीति** ॥ परमात्मवाचिन इत्याद्यत्रापि सम्बध्यते । यदीति लभ्यते । तथा च यदि मुख्यतः [3]परमात्मवाचिनः शब्दाः ततोऽन्यत्र समाकृष्य प्रयुज्यन्ते, तर्हि तेषां मुख्यार्थे परमात्मन्येव[4] वाचकत्वप्रसिद्धिः स्यात् । तथाच तेषां शब्दानां कथममुख्यार्थे जगति वाचकत्वप्रसिद्धिः स्यात् । न कथमपीत्यर्थः । तथा च प्रसिद्ध्यन्यथानुपपत्त्याऽन्यस्यैव मुख्यवाच्यत्वं कल्प्यमिति भावः । प्रसिद्धिरित्यनन्तरं **'स्यादित्यत आह'** इति शेषः ॥

सू – ॐ ॥ जगद्वाचित्वात् ॥ ॐ ॥ १७ ॥

१. 'अग्न्यादिसूक्तादि' – प.
२. 'न केवलं रूढित्वेना-' – प.
३. 'परमात्मैकवाचिनः'– प.
४. 'मुख्यार्थपरमात्मन्येव' – प

[1]**जगति व्यवहारो लोकस्य । न तु परमात्मनि तथा अतो जगति प्रसिद्धिः शब्दानाम् ॥ १७ ॥**

एतच्छङ्कापरिहारत्वेन सूत्रं पठित्वा व्याचष्टे – **जगदिति ॥** व्यवहारपदं शब्दप्रयोगस्य करणव्युत्पत्त्या शब्दशक्तिग्रहस्य च वाचकम् । अनेन जगद्वाचित्वादित्यस्य आवृत्तिः सूचिता । तुशब्दोऽवधारणे । तथाशब्द उपमायाम् । अत इत्युक्तेर्यत इति लभ्यते । जगति प्रसिद्धिरिति शेषोक्त्या साध्यं सूचितम् । जगद्वाचित्वमित्यस्यार्थान्तरं चैतत् । तथा च यतो[2] बालानां चित्रलिखितसिंहादाविव **'लोकस्य'** लोकानामनवगतमुख्यार्थानां जनानां जगति व्यवहारो बहुलः शब्दप्रयोगोऽस्ति, न तथा परमात्मनि । अतो **'जगद्वाचित्वं'** जगत्येव व्यवहारः[3] व्युत्पत्तिः, न परमात्मनि । यत एवमतः शब्दानां **'जगद्वाचित्वं'** जगति वाचकत्वप्रसिद्धिः जगद्वाचित्वव्यवहारो युज्यत इति योजना ॥

सू - ॐ ॥ जीवमुख्यप्राणलिङ्गादिति चेत्
तद् व्याख्यातम् ॥ ॐ ॥ १८ ॥

तदधीनत्वात् तच्छब्दवाच्यत्वमित्युक्तं
तज्जीवमुख्यप्राणयोर्लिङ्गम् ।
'अस्य यदैकां शाखां जीवो जहात्यथ सा शुष्यति[4]
(छां.६.११.२)
'वायुना हि सर्वे लोका नेनीयन्ते' इत्यादिश्रुतिभ्य इति चेत्,

---

१. 'जगति हि व्यवहारः' ह.
२. 'तथा च यथा बालानां' – प.
३. 'व्यवहारोऽप्युपपन्नः, न परमात्मनि'– प.
४. 'अथ यो जीवो जहाति सा शुष्यति' ह.

विष्णोरेव मुख्यतः शब्दार्थत्वमाक्षिप्य समादधत्सूत्रमुपन्यस्याऽक्षेपांशं तावद् व्याचष्टे – **जीवेति** ॥ सर्वेषामित्यनुवर्तते । तच्छब्दवाच्यत्वमित्यावर्तते । तत् लिङ्गमित्यन्वयः । [1]जीवमुख्यप्राणयोरिति षष्ठीसप्तम्यौ तन्त्रेणोपात्ते । आदिशब्देन **'वायुना वै गौतम सूत्रेण प्रबद्धः'** (बृ.५.७.२) इत्यादिकं गृह्यते । तथा च सर्वेषां **'तदधीनत्वात्'** परमात्माधीनत्वात् तस्यैव मुख्यतस्तच्छब्दवाच्यत्वमिति **'तदधीनत्वात्'** इति सूत्रे विष्णोरव्यक्तादिशब्दवाच्यत्वे यत् सर्वस्य तदधीनत्वाख्यं निमित्तमुक्तम्, **'तल्लिङ्गं'** तन्निमित्तं यतो जीवमुख्यप्राणयोरस्ति, अतो जीवमुख्यप्राणयोरपि मुख्यतस्तच्छब्दवाच्यत्वं स्यात् । न च तयोस्तस्यासिद्धिः । यतः **'अस्य'** इत्यादिश्रुतिभ्यो जीवमुख्यप्राणयोस्तल्लिङ्गमवगम्यतेऽत इति योजना । **'जीवः'** अनिरुद्धाख्यः परमात्मा **'अस्य'** जीववृक्षस्य यदैकां शाखां **'जहाति'** त्यजति । **'अथ'** तदा **'सा'** शाखा शुष्यतीति छन्दोगश्रुत्यर्थः ॥

'वायुना' मुख्यप्राणेन **'सर्वे लोकाः'** जनाः **'नेनीयन्ते'** स्वस्वकर्मसु भृशम् अतिशयेन प्रेर्यन्ते । ऊर्ध्वं लोकं वा भृशं नीयन्ते इति श्रुत्यन्तरस्यार्थः ॥ पूर्वपक्षी त्वाद्या श्रुतिः पृथिव्याद्यभिमानिजीवपरा । द्वितीया तु मुख्यप्राणपरेत्याह । आदिशब्दोपात्तश्रुत्यपेक्षया बहुवचनम् ।

न । उपासात्रैविध्यादिति व्याख्यातम्[2] ॥ १८ ॥

नञोऽध्याहारेण परिहारांशं व्याख्याति – **नेति** ॥ नोक्तलिङ्गेन तयोर्मुख्यतस्तच्छब्दवाच्यत्वं कल्प्यमित्यर्थः । कुतो नेत्यतस्तत्र हेतुतया यतस्तदुक्तमित्येतद् व्याचष्टे – **उपासेति** ॥ इतीति त्रिवारोक्त्या सूत्रे

१. **'जीवमुख्यप्राणलिङ्गयोरिति'** – प.

२. **'व्याख्यातत्वात्'** ह.

इतिशब्द आवर्तनीय इति सूचितम् । अत एव टीकायां **'यद्यत्'** इति गीता-स्मृतिग्राहकतयाऽपीतिशब्दो योजितः । विपरिणतम् **'इत्यादि'** इत्येतदत्रापि संयोज्यम् । तथा च **'उपासात्रैविध्यात्'** इत्यनेन सूत्रखण्डेनान्य-लिङ्गाभिधायकत्वेन प्रतीयमानानामित्यादिश्रुतीनां तदन्तर्यामिभगवत्सम्बन्धि-तया व्याख्यातत्वादित्यर्थः ॥

यद्वा – नेत्येतदपि [१]पूर्वसूत्रान्तर्गतमेव, नत्वध्याहृतम् । तथात्वेऽस्येति शेषः । तथा च **'नोपासात्रैविध्यात्'** इत्यनेन **'अस्य'** चोद्यस्य सहेतुकं प्रत्याख्यातत्वादित्यर्थः । अस्य **'नेदं चोद्यं युक्तम्'** इत्यावृत्तसाध्येनान्वयः । तथा च तन्न्यायेन तल्लिङ्गवतोऽन्तर्यामिण एव मुख्यवाच्यत्वं भवेदिति भावः । अनेन – **'अस्य'** इत्यादिश्रुतिभ्योऽवगतात् **'जीवमुख्यप्राणलिङ्गात्'** सर्वस्य तदधीनत्वाख्यान्निमित्ताज्जीवमुख्यप्राणयोरपि तत्तच्छब्दमुख्यवाच्यत्वं स्यादिति चेत्, न । कुतः ? यतः [२]**उपासात्रैविध्यात्'** इत्यनेन तत्तल्लिङ्गा-भिधायि श्रुतिजातं **'व्याख्यातम्'** अन्तर्यामिभगवद्विषयतया व्याकृतम्,

'यद्यद् विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा ।

तत्तदेवावगच्छ त्वं मम तेजोंशसम्भवम् ॥' *(भ.गी. १०, ४१)*

इति स्मृत्या च **'व्याख्यातम्'** तत् लिङ्गजातं भगवत्सम्बन्धितया स्पष्टमभिहितम्, अत इति सूत्रार्थ उक्तो भवति ॥

सू - ॐ ॥ अन्यार्थं तु जैमिनिः
प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ ॐ ॥ १९ ॥

---

१. 'पूर्वसूत्रांशान्तर्गतमेव' – प.

२. 'कुत एतत् ? उपासात्रैविध्यात्' – प.

यदुक्तं सर्वशब्दा अन्यत्र समाकृष्य व्यवह्रियन्त इति, न तद्युक्तम् । लौकिकानां शब्दानाम् अन्यत्र व्यवहारार्थं समाकर्षेऽपि वैदिकानां कर्मादौ समाकर्षे वाचकतया सङ्ग्रहे प्रयोजनाभावात् । न च कर्मदेवतादिसिद्धिरेव प्रयोजनम् । वेदानां जीवमोक्षार्थमेव प्रवृत्तत्वेन काम्यफलार्थमप्रवृत्तेः । मोक्षस्य च वेदानुक्तानन्तगुणवद्भगवत्सर्वोत्कर्षज्ञानादेव सिद्धेः, अन्यज्ञानस्य व्यर्थत्वात् । अतो वैदिकानां शब्दानां मुमुक्षुं प्रत्यन्यत्र समाकर्षस्य निष्फलत्वान्मुख्यत एवान्यवाचकत्वं तेषामौत्पत्तिकमित्याशङ्कां परिहरत्सूत्र-मुपन्यस्य व्याचष्टे – **अन्यार्थमिति ॥**

परमात्मज्ञानार्थं कर्मादिकमपि वदतीति[1] जैमिनिः ।

परमात्मेत्यनेनान्यपदं जगदन्येश्वरपरम् । तेन तज्ज्ञानं ग्राह्यमिति सूचितम् ॥ सूत्रे जगद्वाचित्वमिति विपरिणतपदानुवृत्तिमभिप्रेत्य तत् तात्पर्यतो व्याचष्टे – **कर्मादिकमिति ॥** '**कर्म**' ज्योतिष्टोमादि । रमाऽजशङ्करा-दिकमादिपदार्थः । वदति वेद इति जैमिनिर्मन्यत इति शेषः । न केवलं परमात्मानम्, किन्तु कर्मादिकमपीति समुच्चयेऽपिशब्दः । [2]अनेन तुशब्दोऽप्यर्थतया व्याख्यातः ॥

'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ।
तस्मै स होवाच द्वे विद्ये वेदितव्ये' *(मुं. १.१३.४.)*

ननु वेदोदितकर्मादिज्ञानस्य परमात्मज्ञानार्थत्वं कुतो ज्ञायत इत्यतः प्रवृत्तं प्रश्नेति सूत्रपदं द्विवचनगर्भद्वन्द्वसमासरूपमनेकप्रश्नप्रतिवचनसूचकमित्याशयेन तान्युदाहरति – **कस्मिन्निति ॥** '**कस्मिन्**' इति चाऽथर्वणे श्रुतम् ॥ अस्यार्थः हे '**भगवः**' भगवन् '**नु**' इदानीं '**सर्वमिदं**' कर्मादिकं कस्मिन् विज्ञाते विज्ञातं

१. "वदन्तीति' ह.
२. अनेन तुशब्दो व्याकृतः' – प.

भवति कर्मादिज्ञानमात्रस्य निष्फलत्वाद् विज्ञातस्य कर्मादेः फलं कस्मिन् ज्ञाते सति भवतीति प्रश्नाशयः । श्रुतिगतेतिशब्दस्य इति प्रकारेण शौनकेनाङ्गिरसं प्रति प्रश्ने कृत इत्यर्थः । एवम्पृष्टोऽङ्गिराः अपरविद्यया सर्वं कर्मादि विज्ञातं भवति । विज्ञातं च परविद्याविषयपरमात्मज्ञानेन सफलं भवतीत्युत्तरं **'तदेतत्'** इत्यादिनाऽभिधास्यन् तदुपोद्घातत्वेन द्विविधा विद्या प्रथमं सर्वैर्ज्ञातव्येत्याशयेन प्रत्यवोचदित्याह – **तस्मा इति ॥** शौनकायेत्यर्थः । **'सः'** अङ्गिराः । हेति हर्षे । प्रमाणप्रसिद्धौ वा ॥

'कथं नु भगव आदेशो भवतीति ।
यथा सोम्यैकेनमृत्पिण्डेन' *(छां.६.१.३,४)*
इत्यादि प्रश्नव्याख्यानाभ्याम् ।

छान्दोग्ये हि **'येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातं भवति'** इति वाक्येन **'येन'** परमात्मना ज्ञातेन यस्मिन् परमात्मनि ज्ञाते सति **'अविज्ञातं'** कर्मादिकमपि विज्ञातं भवति, तज्ज्ञानफलावाप्तेः । एवं येन परेण यस्मिन् परमात्मन्यविज्ञाते सति ज्ञातमपि कर्मादिकमविज्ञातं भवति, तत्फलानवाप्तेः । तस्माद् यस्मिन् ज्ञात एव ज्ञातं तत् सफलं भवति । परमात्मज्ञानादौ सति अन्यदज्ञाताद्यपि ज्ञातादिवद् भवतीति वा । तमादेशं भगवन्तमप्राक्ष्यः **'उत'** किं प्रायो नाप्राक्ष्यः ? इत्युद्दालकेनोक्तः श्वेतकेतुर्गूढाभिसन्धिस्तं पृच्छति – **कथमिति ॥**

हे **'भगवः'** भगवन् ! पूज्योद्दालक ! यस्मिन् परमात्मनि ज्ञात एव सर्वं कर्मादिकं ज्ञातमपि सफलं स्यान्नान्यथा, **'स आदेशः'** तद्विषय उपदेशः **'कथं'** केन प्रकारेणोपपन्नो **'भवति'** स्यात् । तं प्रकारम् अहं **'नु'** इदानीं कथं विजानीयामित्यर्थः । अत्रापीतिशब्दः श्रुतिस्थ एव प्रश्नसमाप्तिद्योतकः ॥

इति पृष्टः पितोद्दालकः पुत्राशयं जानमानः स्वाशयोद्घाटनेन तं प्रति-वक्ति – **यथेति** ॥ हे **'सोम्य'** भक्तिज्ञानादिलक्षणसोमार्ह **'यथैकेन मृत्पिण्डेन'** ज्ञातेन तत्सादृश्यनिमित्तादज्ञातमपि **'सर्वं मृण्मयं'** घटादिकं **'विज्ञातं स्यात्'** ज्ञातफलं भवति । विशेषज्ञानाख्यफलवद्भवतीति यावत् । कथम् ? मृत्त्व-गन्धवद्द्रव्यत्वादिना मृत्पिण्डसादृश्याख्यप्रकारविशेषज्ञानात् । एवं परमात्मनि ज्ञाते सर्वं कर्मादि ज्ञातफलं भवति तत्सदृशत्वेन विशेषज्ञानादित्यर्थः ॥

अस्याभिप्रायस्तु – यथा घटादिव्युत्पन्नमृदादिशब्दैः पुम्भिः मृत्पिण्डादौ मृदादिशब्दार्थत्वेन विज्ञाते पुनर्घटादिसर्वमृण्मयादि मृत्पिण्डादिसदृशत्वेन विशेषेण ज्ञातं स्यात्, एवं जडजीवादिव्युत्पन्नसच्चिदादिशब्दैः पुम्भिर्ब्रह्मणि सच्चिदादिशब्दमुख्यार्थत्वेन विज्ञाते पुनः जडजीवात्मकं जगद् ब्रह्मात्यल्प-सदृशत्वेन विशेषेण ज्ञायते, न त्वतिसदृशत्वेनेति सत्तर्कदीपावली-वाक्यादवगन्तव्यः । अनेनैकविज्ञानेन सर्वविज्ञानं सादृश्याख्य-प्रकारेणोपपन्नमित्युक्तं भवति ॥

यद्यपि - **'यथा मृत्पिण्डविज्ञानात् सादृश्यादेव मृण्मयाः ।**
विज्ञायन्ते तथा विष्णोः सादृश्याज्जगदेव च ॥
अत्यल्पेऽपि हि विज्ञाते सदृशे तादृशं बहु ।
विज्ञायते .....॥'

इति छान्दोग्यभाष्ये, तथा **'येनाश्रुतं श्रुतं भवति'** इत्येतत् प्राधान्य-सादृश्याभ्यामित्येतत् कुत इति चेद् एवं सादृश्यादेकगोज्ञानाद् गवान्तर-ज्ञानमुदाहर्तव्यमिति तत्त्वोद्योतटीकायाम्, यथैकस्यां स्त्रीव्यक्तौ स्त्रीशब्द-वाच्यत्वेन रूपेण ज्ञातायां स्तनकेशवती स्त्री स्यादित्युक्तसादृश्यादन्याऽपि स्त्रीव्यक्तिर्विनैवोपदेशेन यथा ज्ञायते, तथा भगवति सत्यत्वेन ज्ञाते प्रामाणिकत्वसादृश्याज्जगदपि यथा ज्ञायते, ज्ञानानन्दरूपेण ज्ञाते चेतनत्व-

सादृश्याज्जीवा अपि तथा ज्ञायन्त इति विष्णुतत्त्वनिर्णयटीकायां च सादृश्यस्यैकविज्ञानेन सर्वविज्ञाने निमित्तता प्रतीयते, न तु प्रकारता । तथा गन्धवद्द्रव्यत्वादिनैकमृत्पिण्डविज्ञानाद् गन्धवद्द्रव्यत्वादिना सादृश्यात् सर्वे मृण्मया ज्ञायन्ते तथेति व्यासतीर्थीयेऽपि निमित्ततैव प्रतीयते ॥

तथाऽपि तं प्रकारं कथमहं जानीयामिति टीकायां मृत्पिण्डादि-दृष्टान्तत्रयं सादृश्यविषयमिति, सुधायां चोक्तरीत्या प्रकारभूतस्यापि निमित्तत्वसम्भवान्न तेषां विरोधः शङ्क्यः । अत एव –

'यथा चैकैकमृत्पिण्डज्ञानादेः सदृशत्वतः ।
मृण्मयं तदकार्यं च ज्ञातं मृदिति वै भवेत् [१]॥'

इति गीतातात्पर्यनिर्णये निमित्तता प्रकारता चोक्ता ॥

न चानेनान्यज्ञानस्य परमात्मज्ञानार्थत्वं कथमुक्तमिति वाच्यम् । यतस्तत्प्रकारश्चन्द्रिकायाम् – एकविज्ञानेन सर्वविज्ञाने श्रुत्युक्तो मृत्पिण्ड-मृण्मयादिदृष्टान्तस्तु यथाऽनेकमृण्मयज्ञानं तत्कारणत्वेन मृत्पिण्डस्य ज्ञानार्थं चेत् सफलम् । कुतः ? एतावता मृत्पिण्डेन एतावन्मृन्मयं भवतीति विशेषज्ञानाद् अपेक्षितमृन्मयसम्पादनसम्भवात्, न तु स्वरूपेण । एवं [२]कर्मदेवतादिविज्ञानमपि तदाश्रयत्वतत्कारणत्वतन्नियन्तृत्वादिप्रकारै-र्भगवज्ज्ञानार्थं चेत् सफलम्, नान्यथेत्यभिप्रायेणेत्यनेनोक्तः । तथा मुमुक्षुणा [३]भगवत्सृष्टमेवैतत् कर्मादीत्यादिरूपेणैव ज्ञातव्यमिति विष्णुतत्त्वनिर्णयटीकायां चोक्तः ॥

---

१. 'मृदिति वै तदा ॥' – प.
२. 'कर्मादिदेवताविज्ञानमपि'– प.
३. 'भगवत्सृष्टं तत्कर्मादी-' – प.

अत्र यद्यपि सत्तर्कदीपावल्यां तत्त्वप्रदीपे च, आदिश्यत इत्यादेशः परमात्मेति व्युत्पत्तिमाश्रित्य **'कथं नु भगवः स आदेशो भवति'** (छां.६.१.३) इति प्रश्नोऽपि **'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवति'** इति प्राधान्येनोक्त आदेशस्तच्छब्देन परामृश्यत इत्युक्त्वा सर्वान् वेदानधीतवानेव केवलं, न त्वादेशं तन्मुख्यादेशं सकलकल्याणगुणाकरं तं पृष्टवान् प्रायो यतः स्तब्धोऽसि । यस्मिन् श्रुते मते ज्ञाते विज्ञातेऽन्यदश्रुतममतमविज्ञातमपि तदधीनत्वेन श्रुतं मतं विज्ञातं दृश्यमानमतिनीचत्वेन विज्ञायमानं त्वदादिकमित्युक्तः[१] श्वेतकेतुः पितरं पृच्छति– **कथं न्विति** ॥ इत्यवतार्य कर्मादिषु वेदैकदेशैरुच्यमानेषु आ समन्तात् स एव सर्ववेदादेश्यो भवतीति कथं केन प्रकारेण जानीयामिति श्रुत्यर्थोक्तेः, तथा **'प्रायो नारायणं देवं नैव त्वं पृष्टवानसि'** इति गीतातात्पर्योदाहृतश्रुतौ, आदिश्यत इत्यादेशो नारायण इति न्यायदीपिकायां च क्रियाकर्मपरत्वोक्तेः, टीकायां चाऽदेशशब्दस्योपदेशार्थत्वमाश्रित्य यस्मिन् परमात्मनीत्यादिना येनाश्रुतमित्यन्वयव्यतिरेकोक्त्या लब्धार्थमनूद्य अत्र यच्छब्देन उक्तप्रधानपरमात्मपरामर्शिप्रश्नवाक्यस्थतच्छब्दस्य तद्वाक्यस्थादेशशब्दसामानाधिकरण्याय तद्विषयकतयाऽर्थाभिधानाद् विरोधो भाति[२] ॥

तथाऽपि उभयोः तात्पर्यत एकार्थत्वादविरोधः । इत्यादीत्यादिशब्देन **'सर्वं मृन्मयं विज्ञातं स्याद् यथा सोम्यैकेन लोहमणिना'** इत्यादिवाक्यं गृह्यते । इत्यादिप्रश्नव्याख्यानाभ्यामित्यस्य **'द्वे विद्ये वेदितव्ये'** (मुं.१.१.४) इत्यादिप्रश्नव्याख्यानाभ्यां **'यथा सोम्यैकेन'** इत्यादिप्रश्नव्याख्यानाभ्यामित्युभयत्रान्वयः । तत्र पूर्वान्वितादिशब्देन **'इति ह स्म यद् ब्रह्मविदो**

१. **'त्वदादिकं तमित्युक्तः'** – प.
२. **'विरोधो भवति'** – प.

वदन्ति' (मुं.१.१.४) इत्यादिकं गृह्यते । अनेन सौत्रप्रश्नव्याख्यान-शब्दावनेकप्रश्नप्रतिवचनपराविति सूचितं भवति ॥

एवमपि चैके पठन्ति 'यस्तन्न वेद किमृचा करिष्यति'

(ऋ.१.१६४.३९) **इति ॥ १९ ॥**

अपि च, न केवलमर्थात्मकात् प्रश्नव्याख्यानरूपाल्लिङ्गादेवमन्यज्ञानस्य[1] परमात्मज्ञानार्थत्वसिद्धिः, किन्तु स्पष्टं मुखतोऽप्येवमेके ऋग्यजुश्शाखिनः पठन्तीति प्रतिपादयन्तम् '[2]**अपि चैवमेके**' इति सूत्रखण्डं व्याचष्टे – **एवमिति ॥** अपीति निपातः साधकान्तरसमुच्चये । अन्यज्ञानस्य परमात्मज्ञानार्थत्वप्रकारस्याव्यवहितप्रकृतस्यैवंशब्देन परामर्श इति सूचनाय सूत्रापेक्षया व्यत्यासेनानुवादः कृतः । पठन्तीति शेषोक्तिः । तथा च न केवलमर्थादेव सिद्ध्यति, किन्तु **'अपि'** मुखतोऽप्येवमेके शाखिनः पठन्तीत्यर्थः ॥

चशब्दोऽन्यसमुच्चायकः । उक्तं हि तत्त्वप्रदीपे – चकारादेतदुपसंहर्तव्यम् । एतदर्थम् सृष्ट्यादिकमप्यधीयते **'सप्तार्धगर्भाः'** (ऋ.१.१३४.३६)इत्यादीति । **'एतदर्थम्'** अन्यज्ञानस्य परमात्मज्ञानार्थत्वोपपादकप्राधान्यज्ञानार्थमित्यर्थः । केचित्तु अपि चेति टीकानुसारात् सूत्रभाष्ययोरपिचेत्यखण्डो निपात इत्याहुः ॥

काऽसावेकैः पठिता श्रुतिरित्यतस्तामुदाहरति – **य इति ॥** इति पठन्तीति सम्बन्धः । अतोऽप्युक्तं युक्तमिति वाक्यशेषेणास्यान्वयः ॥ ब्रह्मयज्ञफलं महदुक्त्वेदमुच्यते –

'ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।

---

१. 'लिङ्गादेवान्यज्ञानस्य' – प.

२. 'अपि च' इति सूत्र- प.

यस्तं न वेद किमृचा करिष्यति य इत् तद् विदुस्त इमे समासते ॥'

इति । अक्षर इति तादर्थ्ये सप्तमी । सर्वे वदन्तीति शेषः । ऋच इत्यशेषवेदोपलक्षकम् । अक्षर इति विषयेण विषयि ज्ञानमुपलक्ष्यते । तथा च तदक्षरं विष्ण्वाख्यं ब्रह्म यः सर्ववेदमुख्यार्थत्वेन न वेद, किन्तु इतरामरसाधारणमेव वेद, सः **'ऋचा'** कर्मादिपरैर्वेदैर्ब्रह्मयज्ञादिरूपेणाधीतैः किं करिष्यति ? न किमपीति भावः[१] । अधीतैरित्युपलक्षणम् । अध्यापितैरधिगतार्थैर्नियमितार्थैरनुष्ठितार्थैरनुष्ठापितार्थैर्वेति तत्त्वप्रदीपोक्तमपि ग्राह्यम् । कुतः ? केवलमितरविषयैरधीतैर्वेदैः प्रयोजनाभावो यतः ॥

सर्वाः **'ऋचः'** ब्राह्मणेतिहासादिसहिताः सर्वे वेदाः **'परमे'** सर्वोत्तमे **'व्योमन्'** व्योम्नि व्याप्तेऽच्छेद्यत्वादिना व्योमनिभे वा चतुर्विधनाशराहित्यात् **'अक्षरे'** विष्णौ तज्ज्ञानार्थमेव सर्वं कर्मदेवतादिकं वदन्ति । तद्वेदनमेव हि तत्प्रयोजनमुत्कृष्टफलत्वादिति भावः । एतदपि कुतः ? यस्मात् **'यस्मिन्'** ब्रह्मणि **'विश्वे'** सर्वे देवाः **'अधिनिषेदुः'** तदाधारा वर्तन्ते । एवं व्यतिरेकं सहेतुकमुक्त्वाऽन्वयमाह – **य इति ॥** इत् एव येत्वेव पुनरेवमुक्तप्रकारेण **'तत्'** अक्षरं **'विदुः'** जानन्ति **'त इमे'** प्रकृता देवाः **'समासते'** सम्यगासते सङ्कल्पमात्रसिद्धयथेष्टभोगाः सन्तः परमात्मानं प्रविशन्तीत्यर्थः ॥

सूत्रे तुशब्दोऽप्यर्थः । जगद्वाचित्वमिति समाकर्षादिति चानुवर्तते[२]। शब्दानामिति शेषः । तथा च वैदिकशब्दानां न केवलं परमात्मवाचित्वम्, अपि तु जगद्वाचित्वमपि । न च तेन मुमुक्षोः प्रयोजनाभावः । यतः समाकर्षेण वेदानां कर्मादिजगद्वाचित्वं [३]तज्ज्ञानद्वाराऽन्यार्थं परमात्मज्ञानार्थं भवतीति जैमिनिराचार्यो मन्यते ॥

---

१. **'किमपीत्यर्थः ।'** – प.

२. **'चानुकृष्यते'** – प. ३.**'तज्ज्ञानत्वात्'**– प.

न च कर्मादिज्ञानस्य परमात्मज्ञानार्थत्वासिद्धिः । **'कस्मिन्नु भगवः ... द्वे विद्ये'** (मुं.१.१.३,४) **'कथं नु भगवो...यथा सोम्य'** इत्यादिप्रश्नव्याख्यानरूपलिङ्गाभ्यां तत्सिद्धेः । अपि चैवमन्यज्ञानस्य परमात्मज्ञानार्थत्वमेके शाखिनः स्पष्टं मुखतः पठन्ति **'यस्तं न वेद'** इत्यतोऽपीति सूत्रार्थः ॥

सू - ॐ ॥ वाक्यान्वयात् ॥ ॐ ॥ २० ॥

वाक्यस्याप्येवमन्वयो युज्यते पृथक् पृथक्
स्थितस्यापि परमात्मना ॥ २० ॥

न परमात्मज्ञानार्थं कर्मादिकं वेदेन वक्तव्यम् । अन्यदनुक्त्वा वेदेन परमात्ममात्रकथनेऽपि तज्ज्ञानसम्भवात् । न च व्युत्पत्त्यनुपपत्तिः । ज्योतिष्टोमादिशब्दानां विष्णौ रूढेरभावात् । योगस्य च ज्योतिष्टोमेनेति पदावयवानामप्यन्यपरत्वानभ्युपगमेऽयोगादिति वाच्यम् । खण्डपदमात्रस्यान्यवाचकत्वाभ्युपगमात् । [1]तथा चान्यकथने प्रयोजनाभावान्न तत्र समाकर्षो युक्त इत्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे – **वाक्यान्वयादिति** ॥ अप्येवमिति पूर्वसूत्रादनुवृत्ते पदे । न केवलं पदानामित्यपेरर्थः । अन्यस्यापि वाच्यत्वाभ्युपगम एवेत्येवंशब्दार्थः । **'अन्वयः'** संसर्गः । युज्यत इत्यनेन अन्वयपदं तद्योगोपलक्षकमित्युक्तं भवति ॥

अन्यावचने कुतो न वाक्यान्वयो युज्यत इत्यतः वाक्यान्वयस्वरूपं विशदयति – **पृथक् पृथगिति** ॥ स्वार्थेषु वाचकतया स्थितस्येत्यर्थः । वाक्यस्येत्यस्य विशेषणमेतत् । अपिः यद्यपि तथापीत्यर्थे । परमात्मनेत्यस्यान्वयपदेनान्वयः । अन्यपरवाक्यस्येश्वरान्वयं विना मुमुक्षुं प्रति

---

१. **'तथाऽन्यकथने'** – प.

नैराकाङ्क्ष्यलक्षणपर्यवसानस्य असम्भवेन सोऽप्यावश्यक इति भावः । यत इति विशेषणस्य हेतुवाक्यस्य शब्दानाम् अन्यार्थं समाकर्षाज्जगद्वाचित्वं युक्तमेवेति प्रकृतसाध्येनान्वयः ॥

अनेन – वैदिकशब्दानामन्यार्थं जगद्वाचित्वं युक्तमेव । कुतः ? एवं सत्यन्यस्यापि वाच्यत्वाभ्युपगमे न केवलं स्वरवर्णपदानां ब्रह्मकाण्डस्य च, किन्तु पृथक्पृथगर्थेषु स्वस्वार्थेषु वाचकतया स्थितस्यान्यपरत्वेन सिद्धस्यापि कर्मदेवतादिवेदभागरूपवाक्यस्यापि परमात्मनाऽन्वयात् । प्रयाजादिवाक्यस्यावान्तरवाक्यस्यैव सतो दर्शपूर्णमासवाक्यैकवाक्यतावत् कर्मादाववान्तरवाक्यस्यैव सतः परमात्मपरवाक्यैकवाक्यतारूपान्वययोगादन्ततस्तत्परत्वोपपत्तेः । अन्यथा तदयोगात् । अतो वाक्यान्वयात् तमपेक्ष्य तत्सिद्ध्यर्थं शब्दानामन्यवाचित्वं युक्तमेवेति सूत्रार्थ उक्तो भवति ॥

विस्तृतश्चायं पृथक्स्थितस्यापि वेदस्य परमात्मनोऽन्वयप्रकारो विष्णुतत्त्वनिर्णयटीकायां सुधायां च ॥

[१]अथानेनैषां वेदवाक्यानां योजनां सूचयति । यो हि सात्त्विकप्रकृतिर्लोकप्रवादात् कार्यत्वादिलिङ्गानुसन्धानाद्वा स्वतनुभवनादेः कर्तारं सामान्यतो जानन् स्नेहमाहात्म्यज्ञानाभ्यां तद्विशेषज्ञानार्थमुत्कण्ठितमानसस्तत्संस्कारवशाच्चान्यदगणयन् प्रवर्तते । तं प्रत्याप्तो बन्धुरिवायं वेदस्तत्स्वरूपं स्वप्रधानमेव प्रतिपादयति **'विज्ञानमानन्दं ब्रह्म'** (बृ.उ.३.९.२८) इत्यादिः[२] । ततो वाक्यार्थज्ञानाद् [३]अवाप्तपरमानन्दस्तत्साक्षात्कारं कामयते । तं प्रति तदुपासना विधीयते । सा च प्रक्षीणान्तःकरणमलस्यैव सम्भवतीति तदर्थं कर्मविधयः प्रवर्तन्ते । इत्येवं समस्तो वेदः परमेश्वरस्वरूपज्ञापन एव पर्यवसितः ॥

---

१. 'तथा चानेनैषां' – प.

२. 'इत्यादि'– प.

३.'अप्राप्तपरमानन्दः' – प

अथवा – शरीरेन्द्रियान्तःकरणादिसन्निधानेन स्वात्मनो विविधदुःखं पश्यन्निष्कण्टकं च सुखमलभमानोऽयं संशेते किमिदं दुःखादिकं शरीरादिसम्बन्धनिमित्तमेव, उत स्वाभाविकमिति । तं प्रति वेदः प्रवर्तते **'अतत्त्वमसि'** इत्यादिः[१] । [२]निर्दुःखानन्दस्वभावः स एव, न त्वमसि, किन्त्वीश्वराधीनाविद्याद्युपस्थापितशरीरादिनिमित्तेनान्यथारूपेणोपेत[३] इति । [४]अथ पुनरसौ जिज्ञासते केनोपायेनाहमिदमस्वाभाविकं रूपं हित्वा स्वरूपेणावस्थितः स्यामिति । तं प्रति परमेश्वर एव प्रसन्नस्तदुपाय इति तत्स्वरूपं निरूप्यते वेदेन । ततः कथमसौ प्रसीदतीत्यपेक्षायां तत्साक्षात्कारः तदर्थं श्रवणादिकं, तदङ्गतया कर्मादिकं च विधीयते – इत्येवं समस्तस्यापि वेदस्य परमेश्वरस्वरूप एव पर्यवसानमिति ॥

सत्तर्कदीपावलीरीत्या भाष्यस्य योजनान्तरं तु – एवमपि ईळे आयाहीत्यादीनामर्थान्तरपरत्वेऽप्यग्निवाय्वादिशब्दानां यदा भगवद्वाचित्वं तदा पृथक्स्थितस्यैव **'अग्निमीळे'** **'वायवायाहि'** इत्यादिवाक्यस्यापि परमात्मनाऽन्वयो युज्यते, न केवलं पदाक्षरादेः । यदा तु तेषाम् अग्निवाय्वादिवाचित्वं[५] तदा पृथक्स्थितस्यैव वाक्यस्यापि परमात्मनाऽन्वयो युज्यत इति । अस्मिन् पक्षे अपृथक्पृथगिति भाष्ये पदच्छेदः ॥

तत्त्वप्रदीपरीत्या योजनान्तरम् - एवमन्यस्यापि वाच्यत्वाङ्गीकारे यद्यपि पदानामेकैकशो नान्वयः परमात्मना । तथाऽपि वाक्यस्यान्वयो युज्यते ।

---

१. 'इत्यादि' – प.
२. 'परमात्मैव निर्दुःखानन्द-' प.
३. 'अन्यरूपेणोपेतः' – प.
४. 'अतः पुनरसौ' – प.
५. 'अग्निवाय्वादिपरत्वं' – प.

पृथक्पृथक्स्थितस्यापि [१]स्वं स्वमवान्तरार्थमुक्त्वा स्थितस्य[२] परिपूर्णस्याप्यपूर्णफलत्वान्मिश्रफलत्वाच्चापरकर्मोत्पत्त्यादिना[३] पारतन्त्र्याद् देवादिप्रपञ्चोऽप्यप्रधानः । तस्मात् सर्वतः परत्वेनाऽत्मविज्ञानं कर्तव्यमिति वाक्यान्वय इति । अस्मिन् पक्ष अपिशब्दौ यद्यपितथापीत्यर्थौ ॥

न च परमात्मज्ञानस्यैव प्रयोजनत्वात् तस्य च पदवृत्त्यैव सम्भवात् किं वाक्यान्वयेनापीति वाच्यम् । तस्योत्तमाधिकारिव्यतिरिक्ताधिकारिणः[४] प्रति सार्थकत्वात् । अन्यथाऽन्यत्र समाकर्षेण वाक्यान्वयं विना प्रतिपदं प्रत्यक्षरं च वेदानां ब्रह्ममात्रपरत्वे **'कश्छन्दसाम्'** (ऋ.१०.११४.९) इति श्रुतेः पदसमन्वयेऽनधिकारिणामुत्तमेतराधिकारिणां वेदाद् ब्रह्मज्ञानस्यैवासम्भवेन तज्जिज्ञासायां विमुखत्वप्रसङ्गात् ॥

सू - ॐ ॥ प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ ॐ॥ २१ ॥

'नान्यः पन्था अयनाय विद्यते' *(तै.आ.३.१२.७)*
इति प्रतिज्ञासिद्धेर्लिङ्गत्वेन कर्मादिकमुच्यत इत्याश्मरथ्यः ।
यस्मादेवमनित्यफलमन्यत् तस्मान्नान्यः पन्था इति ॥ २१ ॥

यदन्यवचनस्यापि परमात्मज्ञानार्थत्वमुक्तं तत् केन प्रकारेणेत्याकाङ्क्षायां तत्प्रदर्शनाय सूत्रमुपन्यस्य व्याचष्टे – **प्रतिज्ञेति ॥** सिद्धेरिति पञ्चमी । वेदेन मन्यत इति शेषः । इतिशब्दोऽध्याहार्य इति सूचनाय इतीत्युक्तिः । तथा च **'नान्यः पन्थाः'** इत्यनेन प्रतिज्ञातस्य ज्ञानमेव मोक्षसाधनं नान्यदित्यर्थस्य

१. **'स्वस्वमवान्तरार्थम्'** – प.
२. **'पृथक् परिपूर्णस्य'** – प.
३. **'अपरं कर्मोत्पत्त्यादिना'** – प.
४. **'-धिकारिणं'** – प.

'सिद्धेः' सिद्धिमपेक्ष्य तदर्थं तत्र **'लिङ्गत्वेन'** कुतो ज्ञानमेव मोक्षसाधनं नान्यदित्याकाङ्क्षायां हेतुत्वेन सविस्तरं सपरिकरं कर्मादिकमुच्यते वेदेनेत्याश्मरथ्याचार्यो मन्यत इति योजना ॥

कर्मादिकमुच्यते इत्यनेनात्रापि जगद्वाचित्वमनुषञ्जनीयमिति सूचितम् । कथमुक्तप्रतिज्ञायां कर्मादिवचनं हेतुरित्यत आह – **यस्मादिति** ॥ एवमित्यनेन सूत्रे **'अपि चैवम्'** इत्यतः श्रुत्युक्तप्रकारपरामर्शकम्[१] एवमिति पदमनुवर्तनीयमिति सूचितम् । तथा च यस्मादेवम् **'अमृतो वाव सोमपो भवति यावदिन्द्रो यावन्मनुः'** इत्याद्युक्तप्रकारेण अन्यत् कर्माद्यनित्यफलं विनाशि दुःखसम्भिन्नफलकं तस्मान्न तन्मोक्षसाधनम्, मोक्षस्य दुःखासम्भिन्ननित्यसुखरूपत्वात् । यत एवमतोऽपरोक्षज्ञानान्नान्यः पन्थाः मोक्षायेति प्रतिज्ञासिद्धेर्लिङ्गत्वेन वेदेन कर्मादिकमुच्यत इति एवंशब्दावृत्त्या योजना । न चानेन न प्रकारो दर्शित इति वाच्यम् । क्षुद्रफलार्थिनं प्रति तत्तत्फलाय तत्तत्कर्म विदधतोऽपि कर्मादिवाक्यस्य मुमुक्षुं प्रति कर्मणां क्षुद्रफलकत्वात् तद्धानेनाक्षुद्रफलकं ज्ञानमेवोपादेयमिति वैराग्यजनकत्वेन प्रकारेण परमात्मज्ञानार्थत्वमित्युक्त्या प्रकारस्य दर्शितत्वात् ॥

अनेन – यस्मादेवं श्रुत्युक्तप्रकारेणान्यत् कर्माद्येवमनित्यफलमिति सिद्धम्, तस्मान्न तन्मोक्षसाधनम्, तस्य नित्यपुमर्थरूपत्वात् । यत एवमतो मोक्षस्य ज्ञानान्नान्यः[२] पन्था इत्येवं रूपेण कर्मादिवचनं मुमुक्षुं प्रति वैराग्यजननद्वारा नान्यः पन्था इति प्रतिज्ञातार्थसिद्धेर्लिङ्गं हेतुरित्येवं प्रकारेण वेदानां कर्मादिजगद्वाचित्वमित्याश्मरथ्याचार्यो मन्यत इति सूत्रार्थ उक्तो भवति ॥

'नान्यः पन्थाः' (तै.आ.३.१२.७) इति श्रुतिस्तु जिज्ञासानये व्याख्याता ॥

---

१. **'-प्रकारप्रदर्शकम्'**–प. २.**'न ज्ञानादन्यः'**– प.

सू – ॐ ॥ उत्क्रमिष्यत

एवम्भावादित्यौडुलोमिः ॥ ॐ ॥ २२ ॥

उत्क्रमिष्यतो मुमुक्षोः कर्मादिना भाव्यं साधनसाधनत्वेन ।
अतस्तद् वक्तीत्यौडुलोमिर्मन्यते ॥ २२ ॥

प्रकारान्तरेण कर्मादिवचनस्य भगवज्ज्ञानोपयोगं प्रदर्शयत्सूत्रमुपन्यस्य व्याचष्टे – [1]**उत्क्रमिष्यत इति ॥** कर्तरि षष्ठ्यन्तपदमनूद्य तस्य तत्त्वप्रदीपरीत्या एष्यदुत्क्रमणस्य तदिच्छादशायाम् अभावाल्लक्षणया संसारादुत्क्रमणेच्छोरित्यर्थ इत्यभिप्रायेण मुमुक्षोरित्याह । ज्ञानाद् बन्धमोक्षमिच्छत इति तदर्थः । यद्वा मुमुक्षोरिति विशेष्यपदेनाध्याहृतेन संसारादुत्क्रमिष्यत इति विशेषणपदस्य तात्पर्यार्थमाह । सूत्रे कर्मादिरित्यध्याहाराभिप्रायेण भावादित्येतद् व्याचष्टे - **कर्मादिनेति ॥** भाव्यमित्यनन्तरं यत इति शेषः ॥

सौत्रैवंशब्दार्थमाह - **साधनसाधनत्वेनेति ॥** मोक्षस्य साधनं ज्ञानं, [2]तत्साधनत्वेनान्तःकरणशुद्धिद्वारा तदुत्पत्तावुपयोगित्वेनेत्यर्थः । अस्य, भाव्यमित्यनेन सम्बन्धः । सूत्रे जगद्वाचित्वमित्यस्यानुषङ्गमभिप्रेत्याऽह – **अत इति ॥** मुमुक्षुणा ज्ञानसाधनत्वेन कर्मादिरप्यवश्यं सम्पाद्यत्वादित्यर्थः । तत् कर्मादिकं वक्ति वेदः परमात्मज्ञानार्थमिति वर्तते ।[3]अनेन सूत्रेऽन्यार्थमित्यस्यानुवृत्तिः सूचिता । न च कर्मादेः फलश्रुतिविरोधः, तस्याः कर्मणि रुचिजननार्थत्वात् । **'रोचनार्थं फलश्रुतिः'** इत्यादेरिति भावः ॥

---

१. **'उत्क्रमिष्यत इति ॥ उत्क्रमिष्यत इति कर्तरि'– प.**
२. **'तत्साधनेनान्तःकरण-' – प.**
३. **'तेन सूत्रे नार्थम्' – प.**

अनेन – **'उत्क्रमिष्यतः'** मुमुक्षोः **'एवं'** ज्ञानस्येव कर्मादिरप्यन्तःकरणशुद्धिद्वारा मोक्षसाधनभगवज्ज्ञानसाधनत्वेन निमित्तेन **'भावात्'** सम्पाद्यत्वाद् वेदानां कर्मादिवाचित्वम्[१] । एवं मोक्षसाधनसाधनत्वेन प्रकारेणान्यार्थं परमात्मज्ञानार्थमित्यौडुलोमिराचार्यो मन्यत इति सूत्रार्थ उक्तो भवति ॥

सू – ॐ ॥ अवस्थितेरिति काशकृत्स्नः ॥ ॐ ॥ २३ ॥

सर्वं परमात्मन्यवस्थितमिति वक्तुं तद्वचनमिति काशकृत्स्नः ।

प्रकारान्तरेण कर्मादिवचनस्य ब्रह्मज्ञानोपयोगित्वं प्रदर्शयत्सूत्रमुपन्यस्य व्याचष्टे - **अवस्थितेरिति** ॥ सर्वं परमात्मनीत्यनेन सूत्रे सर्वस्य जगतः परमात्मनीति पदद्वयाध्याहारः सूचितः । इति वक्तुमित्यनेनान्यार्थमित्यस्यानुवृत्तिः सूचिता । **'एष सेतुर्विधरणः'** (बृ.६.४.२२) इत्यादाविति शेषः । **'तद्वचनं'** कर्मादिर्वचनमित्यनेन सूत्रे जगद्वाचित्वमित्यस्यानुषङ्गः सूचितः । इतिशब्दस्य द्विर्ग्रहणमावृत्तिं सूचयति । काशकृत्स्न इत्यनन्तरं मन्यत इति शेषः॥

अनेन - **'एष सेतुर्विधरणः'** इत्यादौ सर्वस्य परमात्मनि **'अवस्थितेः'** अवस्थित्युक्तेः तस्याश्च सर्वाधारत्वेन ज्ञातव्यमिति ज्ञानार्थत्वाद् अस्य चाऽधेयज्ञानं विनाऽयोगात् तदर्थं वेदेन कर्मादिकमुच्यत इति साक्षादेव कथं ब्रह्म ज्ञातव्यमिति ज्ञान्यपेक्षितस्वेतरसर्वाधारत्वरूपप्रकारसमर्पकत्वेन वेदानां कर्मादिजगद्वाचित्वमन्यार्थं परमात्मज्ञानार्थमिति काशकृत्स्नाचार्यो मन्यत इति सूत्रार्थ उक्तो भवति ॥

---

१. **'कर्मादिजगद्वाचित्वम्'** – प.

'कृष्णद्वैपायनमतादेकदेशविदः परे ।
वदन्ति ते[१] यथाप्रज्ञं न विरोधः कथञ्चन ॥' इति पाद्मे ॥२३॥

॥ इति समाकर्षाधिकरणम् ॥ ५ ॥

एवं जैमिन्यादिमतान्युपन्यस्य स्वमतं किं नोच्यते सूत्रकारेण । एतेषामेव स्वमतत्वे जैमिन्यादिग्रहणवैयर्थ्यम् । विरुद्धानां च नैकमतत्वम् । एकस्यैव वेदस्यानेकाभिप्रायताऽयोगात् । अविरोधे च मतभेदायोग इत्यत आह – **कृष्णेति** ॥ ल्यब्लोपनिमित्ता पञ्चमी । व्यासमतमपेक्ष्येति । यद्वा - सप्तम्यर्थे पञ्चमी । तथा च व्यासाभिमतार्थैकदेशज्ञानिन इत्यर्थः ॥

योजना तु ये परेऽन्ये जैमिन्याद्या यस्मात् **'यथाप्रज्ञं'** यथामति कृष्णद्वैपायनमतैकदेशविद एव, न तदनभिमतार्थविदः । यन्मतानां भगवन्मतत्वमेवेति यावत् । तस्माद् व्यासशिष्या इति यान् वदन्ति, तेषां कथञ्चन परस्परं कृष्णद्वैपायनज्ञातार्थैर्वा तात्पर्यतो वा विरोधो नास्तीति । न चैतेषां भगवन्मतत्वे जैमिन्यादिग्रहणवैयर्थ्यमिति वाच्यम् । शिष्यप्रसिद्ध्यर्थत्वात् । कथञ्चन न विरोध इत्यनेनानेकेषाम् एकाधिकारिकत्वं विरुद्धमिति शङ्का निरस्ता ॥

'विज्ञातं तैर्जगादात्र तारतम्यं नृणां वदन्' इत्यनुव्याख्याने, नृणामल्पाधिकारिणामवस्थातारतम्यं वदन्निति सुधायां चोक्तरीत्या जैमिनिमतस्य वाक्यसमन्वयार्थत्वात् तन्मात्रयोग्यपदसमन्वयायोग्यमन्दाधिकारिविषयत्वम्, तत्राप्याश्मरथ्यमतस्य, [२]वैराग्यसम्पत्तिप्राक्कालीनस्वर्गाद्यर्थित्वावस्थाविशिष्टाधिकारिविषयत्वम्, औडुलोमिमतस्य तु

१. 'वदन्त्येते' ह.
२. 'वैराग्यसम्पत्तिप्रागवस्थाविशिष्टाधिकारिविषयत्वम्' -प.

[१]ज्ञानसम्पत्तिप्राक्कालीनजिज्ञासुत्वावस्थाविशिष्टाधिकारिविषयत्वं काशकृत्स्न-मतस्य तु ज्ञानसम्पत्त्यवस्थाविशिष्टाधिकारिविषयत्वमिति मतानामनेकाधिकारिकत्वात् ॥

॥ इति समाकर्षाधिकरणम् ॥ ५ ॥

१. 'ज्ञानसम्पत्त्यवस्थाविशिष्टाधिकारिविषयत्वम्' – प.

॥ ६. अथ प्रकृत्यधिकरणम् ॥

(प्रकृत्यादिस्त्रीलिङ्गशब्दैः परमात्मन एव वाच्यत्वसमर्थनम्)

स्त्रीशब्दा अपि तस्मिन्नेवेत्याह –

सू – ॐ ॥ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ ॐ ॥ २४ ॥

॥ ६. अथ प्रकृत्यधिकरणम् ॥

अत्राधिकरणे स्त्रीशब्दानां समन्वयः क्रियते । सिद्धान्तयत्सूत्रमवतारयति- **स्त्रीशब्दा इति** ॥ न प्रकृत्यादिस्त्रीलिङ्गशब्दवाच्यो हरिः । कुतः ? तत्र स्त्रीलिङ्गायोगादिति पूर्वपक्षं प्रतिक्षेप्तुं स्त्रीशब्दा अपि तस्मिन् परमात्मन्येव वर्तन्त इति साधयति सूत्रकार इत्यर्थः । स्त्रीशब्दा इति सामान्योक्त्या सौत्रप्रकृतिशब्दोऽन्यस्याप्युपलक्षक इति सूचितम् । **'तत्तु समन्वयात्'** इति सर्वशब्दानामित्यानुमानिकाधिकरणवाक्यमत्रापि सम्बध्यते ॥

तथा च **'तत्तु समन्वयात्'** इत्यत्र समन्वेतव्यत्वेनोक्तानां सर्वशब्दानां मध्ये ये कामादितरत्रेत्यत्रापरममुख्यवृत्त्या श्रीतत्त्वपरत्वमाश्रित्य तद्विषये भाष्योदाहृतवत्सश्रुतौ **'या प्राणेन संविशत्यदितिर्देवतामयी'** (कठ.२.१.७) इति काठके, अन्यत्र च श्रुताः स्त्रीलिङ्गशब्दास्तेऽपि तस्मिन्नेव परममुख्यवृत्त्या वाचकतया [१]सन्तीति योजना ॥

न केवलमानन्दमयेन्द्रवरुणसूर्याग्न्याकाशप्राणादिपुल्लिङ्गशब्दाः, नापि ब्रह्माक्षरज्योतिरादिनपुंसकशब्दा इत्यपिशब्दार्थः ॥

---

१. **'सन्तीति साधयति सूत्रकार इत्यर्थः ।' – प.**

अनेन सङ्गतिविषयादिकं[१] दर्शितम् । **'तस्मिन्नेव'**[२] न प्रकृत्यादावित्यवधारणान्वयेन न प्रकृत्यादिस्त्रीलिङ्गशब्दवाच्यो हरिः [३]तत्र स्त्रीलिङ्गायोगात्, किन्तु प्रकृत्यादय एवेति सयुक्तिकपूर्वपक्षोऽपि सूचितः ॥

सर्वमिच्छाधीनं यस्याः सा सर्वेच्छा ।जडप्रकृतिव्यावर्तनायाविकृतिरिति । श्रुत्यक्षरार्थस्तु [४]तृतीये कामाधिकरणटीकायामभिहितः । **'एषा ह्येव'** (वत्सश्रुतिः) इति श्रुतेः पाठान्तरम् । अत एव गीताभाष्ये **'एषा ह्येव प्रकृतिः'** इति [५]वाक्यमुदाहृतम् । **'या देवतामयी'** देवतोत्तमा **'अदितिः'** तच्छब्दवाच्या भगवत्तनुः[६] **'प्राणेन'** मुख्यवायुना **'सं'** सह 'विशति[७]' तिष्ठति **'एतद्वैतत्'** यत् त्वयापृष्टमित्यर्थः । नचिकेतसं प्रति यमवाक्यमेतत् ॥

'हन्तैतमेव पुरुषं सर्वाणि नामान्यभिवदन्ति यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रमभिविशन्त्येवमेवैतानि नामानि सर्वाणि पुरुषमभिविशन्ति' इति प्रतिज्ञादृष्टान्तानुपरोधात् प्रकृतिशब्दवाच्योऽपि स एव ॥ २४ ॥

सूत्रे तदनुकूलप्रतिज्ञादृष्टान्तयोरभिधानादित्यभिप्रेतहेतो[८]रप्रयोजकत्व-शङ्कावारणाय विपक्षे हेतूच्छित्तिरूपबाधकोपन्यासाय प्रवृत्तं प्रतिज्ञेत्याद्यंशं क्रमनियमाभावसूचनाय प्रथमं व्याचष्टे – **हन्तेति** ॥ हन्तेत्यास्वादने । **'पुरुषं'** पूर्णप्रवृत्तिनिमित्तकम् **'इमं'** प्रकृतमेव परमात्मानं **'सर्वाणि नामानि'** सर्वशब्दाः **'अभि'** परममुख्यतो वदन्तीति प्रतिज्ञातार्थः । अत्र दृष्टान्तमाह – **यथेति** ॥

---

१. **'सङ्गतिविषयसंशयादिकं च'** – प.

२.**'तस्मिन्नेव न प्रकृत्यादौ, तस्मिन् युज्यन्त्येवेति वाऽवधारणान्वयेन न'**– प.

३.**'तस्य स्त्रीलिङ्गात्'**– प. ४.**'तृतीयटीकायाम्'**– प

५.**'वाक्यान्तरम्'** – प. ६.**'-वाच्यभगवत्तनुः'**– प.

७.**'-वायुना सह संविशति'**– प. ८.**'इत्यभिप्रेत्य हेतोः'** – प.

॥ ६. अथ प्रकृत्यधिकरणम् ॥

(प्रकृत्यादिस्त्रीलिङ्गशब्दैः परमात्मन एव वाच्यत्वसमर्थनम्)

स्त्रीशब्दा अपि तस्मिन्नेवेत्याह –

सू – ॐ ॥ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ ॐ ॥ २४ ॥

॥ ६. अथ प्रकृत्यधिकरणम् ॥

अत्राधिकरणे स्त्रीशब्दानां समन्वयः क्रियते । सिद्धान्तयत्सूत्रमवतारयति- **स्त्रीशब्दा इति** ॥ न प्रकृत्यादिस्त्रीलिङ्गशब्दवाच्यो हरिः । कुतः ? तत्र स्त्रीलिङ्गायोगादिति पूर्वपक्षं प्रतिक्षेप्तुं स्त्रीशब्दा अपि तस्मिन् परमात्मन्येव वर्तन्त इति साधयति सूत्रकार इत्यर्थः । स्त्रीशब्दा इति सामान्योक्त्या सौत्रप्रकृतिशब्दोऽन्यस्याप्युपलक्षक इति सूचितम् । **'तत्तु समन्वयात्'** इति सर्वशब्दानामित्यानुमानिकाधिकरणवाक्यमत्रापि सम्बध्यते ॥

तथा च **'तत्तु समन्वयात्'** इत्यत्र समन्वेतव्यत्वेनोक्तानां सर्वशब्दानां मध्ये ये कामादितरत्रेत्यत्रापरममुख्यवृत्त्या श्रीतत्त्वपरत्वमाश्रित्य तद्विषये भाष्योदाहृतवत्सश्रुतौ **'या प्राणेन संविशत्यदितिर्देवतामयी'** (कठ.२.१.७) इति काठके, अन्यत्र च श्रुताः स्त्रीलिङ्गशब्दास्तेऽपि तस्मिन्नेव परममुख्यवृत्त्या वाचकतया [1]सन्तीति योजना ॥

न केवलमानन्दमयेन्द्रवरुणसूर्याग्न्याकाशप्राणादिपुल्लिङ्गशब्दाः, नापि ब्रह्माक्षरज्योतिरादिनपुंसकशब्दा इत्यपिशब्दार्थः ॥

---

१. **'सन्तीति साधयति सूत्रकार इत्यर्थः ।' – प.**

अनेन सङ्गतिविषयादिकं[१] दर्शितम् । **'तस्मिन्नेव'**[२] न प्रकृत्यादावित्यवधारणान्वयेन न प्रकृत्यादिस्त्रीलिङ्गशब्दवाच्यो हरिः [३]तत्र स्त्रीलिङ्गायोगात्, किन्तु प्रकृत्यादय एवेति सयुक्तिकपूर्वपक्षोऽपि सूचितः ॥

सर्वमिच्छाधीनं यस्याः सा सर्वेच्छा ।जडप्रकृतिव्यावर्तनायाविकृतिरिति । श्रुत्यक्षरार्थस्तु [४]तृतीये कामाधिकरणटीकायामभिहितः । **'एषा ह्येव'** (वत्सश्रुतिः) इति श्रुतेः पाठान्तरम् । अत एव गीताभाष्ये **'एषा ह्येव प्रकृतिः'** इति [५]वाक्यमुदाहृतम् । **'या देवतामयी'** देवतोत्तमा **'अदितिः'** तच्छब्दवाच्या भगवत्तनुः[६] **'प्राणेन'** मुख्यवायुना **'सं'** सह 'विशति[७]' तिष्ठति **'एतद्वैतत्'** यत् त्वयापृष्टमित्यर्थः । नचिकेतसं प्रति यमवाक्यमेतत् ॥

'हन्तैतमेव पुरुषं सर्वाणि नामान्यभिवदन्ति यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रमभिविशन्त्येवमेवैतानि नामानि सर्वाणि पुरुषमभिविशन्ति' इति प्रतिज्ञादृष्टान्तानुपरोधात् प्रकृतिशब्दवाच्योऽपि स एव ॥ २४ ॥

सूत्रे तदनुकूलप्रतिज्ञादृष्टान्तयोरभिधानादित्यभिप्रेतहेतो[८]रप्रयोजकत्व-शङ्कावारणाय विपक्षे हेतूच्छित्तिरूपबाधकोपन्यासाय प्रवृत्तं प्रतिज्ञेत्याद्यंशं क्रमनियमाभावसूचनाय प्रथमं व्याचष्टे – **हन्तेति** ॥ हन्तेत्यास्वादने । **'पुरुषं'** पूर्णप्रवृत्तिनिमित्तकम् **'इमं'** प्रकृतमेव परमात्मानं **'सर्वाणि नामानि'** सर्वशब्दाः **'अभि'** परममुख्यतो वदन्तीति प्रतिज्ञातार्थः । अत्र दृष्टान्तमाह – **यथेति** ॥

---

१. 'सङ्गतिविषयसंशयादिकं च' – प.

२.'तस्मिन्नेव न प्रकृत्यादौ, तस्मिन् युज्यन्त्येवेति वाऽवधारणान्वयेन न'– प.

३.'तस्य स्त्रीलिङ्गात्'– प. ४.'तृतीयटीकायाम्'– प

५.'वाक्यान्तरम्' – प. ६.'-वाच्यभगवत्तनुः'– प.

७.'-वायुना सह संविशति'– प. ८.'इत्यभिप्रेत्य हेतोः' – प.

'स्यन्दमानाः' प्रस्रवन्त्यः समुद्रः अयनं यासां तास्तथोक्ताः **'समुद्रमभिविशन्ति'** तदाभिमुख्येन गतास्तं प्रविशन्तीत्यर्थः । उक्तप्रकारं दार्ष्टान्तिकेऽप्यतिदिशति – **एवमेवेति ॥ 'एतानि'** प्रमितानि सर्वाणि नामानि **'एवं'** नदीवत् स्यन्दमानानि मध्ये स्थिरचरव्यवहारान् घटयन्त्यपि पुरुषैकायतनस्वप्रवृत्तिनिमित्तधर्माण्यन्ततस्तमेव **'पुरुषं'** परमात्मानम् **'अभि'** सर्वतोऽभिमुखतो[१] विशन्ति वाचकतयेत्यर्थः । **इतीति ॥** एवंरूपयोः प्रतिज्ञादृष्टान्तयोः **'अनुपरोधात्'** अनुपहतेरित्यर्थः ॥

एवं सतीत्यादावुपस्कार्यम् । प्रकृत्यादिस्त्रीशब्दवाच्यत्वाङ्गीकार इति तदर्थः । श्रुतितात्पर्यविषयीभूतसर्वशब्दवाच्यत्वस्य प्रकृत्यादिकतिपयशब्द-वाच्यत्वाभावेऽप्ययोगेनान्यथा तदुपरोधः स्यादिति भावः । इदानीं प्रकृतिश्चेति प्रतिज्ञाभागं व्याचष्टे – **प्रकृतीति ॥** [२]अत्रापि प्रकृतिपदमन्योपलक्षकम् । प्रकृतेः लक्ष्म्याः स्त्रीषु प्रधानत्वात् तन्नामग्रहणम् । तथा च प्रकृत्यादिस्त्रीशब्दवाच्योऽपीत्यर्थः[३] । अपिः न केवलं पुल्लिङ्गपुरुषात्मादि-शब्दवाच्यो हरिः, किन्तु प्रकृत्युपलक्षितस्त्रीलिङ्गशब्दवाच्योऽपीति समुच्चये ॥

अनेन[४] सौत्रचशब्दो व्याकृतः । न केवलं प्रकृतिशब्देनैव वाच्य इत्युच्यते, किन्तु स्त्रीशब्दानां सर्वेषामपि वाच्य एवेति तत्त्वप्रदीपरीत्या स्त्रीलिङ्गशब्दान्तरसमुच्चये वाऽपिशब्दः । अपिना एकत्र [५]स्त्रीत्वपुंस्त्वयो-र्विरोध इत्यपि न । प्रमाणद्वययोरप्युपपत्तेरिति चशब्दस्य [६]शङ्कानिरासाख्य-प्रयोजनमपि सूचितम् ॥

---

१. **'सर्वतो मुख्यतो'** – प. २.**'अत्र प्रकृतिपदम्'** – प.
३. **'स्त्रीशब्दवाच्योऽपीति भावः'** – प.
४. **'अनेनेति पूर्वेण चापिना सौत्रचकारो व्याकृतः'** – प.
५. **'स्त्रीपुंस्त्वयोः'** – प. ६.**'शङ्कानिरसनाख्यप्रयोजनमपि'**– प.

स हरिरेवेत्यनेन समन्वयसूत्रात् तत्त्वित्येतच्छ्रौतपुरुषपदानुसाराल्लिङ्गविपरिणामेनेहानुवर्तनीयमिति सूचितम् । एवकारस्तु यदाऽपिः टीकाकाररीत्या पुल्लिङ्गशब्दसमुच्चायकः, तदा विशेष्यसङ्गतोऽन्यव्यावर्तकः । यदा तु तत्त्वप्रदीपरीत्या न केवलं प्रकृतिशब्दवाच्य एव सः, किन्तु सर्वेषां[1] स्त्रीशब्दानामिति स्त्रीलिङ्गान्तरसमुच्चायकः, तदा विशेषणसङ्गतो वाच्यत्वायोगव्यवच्छेदकः । वस्तुतस्तु स्त्रीशब्दवाच्यश्चेति टीकागतचशब्दादपि[2] तत्त्वप्रदीपानुसारादेवार्थो व्याख्येयः । अत एव टीकायां न प्रकृत्यादिशब्दवाच्यो हरिरिति पूर्वपक्षप्रतिज्ञोक्तिः । स्पष्टः सूत्रार्थः ॥

सू - ॐ ॥ अभिध्योपदेशाच्च ॥ ॐ ॥ २५ ॥

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।' *(श्वे.४.१०.)*
'महामायेत्यविद्येति नियंतिर्मोहिनीति च[3] ।
प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त कथ्यते ॥'
इति वचनात् तदभिध्यैव प्रकृतिशब्देनोच्यते ।

एवं सामान्यप्रमाणेन प्रकृत्यादिशब्दवाच्यतां हरेः प्रतिपाद्येदानीम् अशेषस्त्रीशब्दोपलक्षकप्रकृतिशब्दवाच्यत्व[4] एव विशिष्य प्रमाणं प्रतिपादयत्सूत्रमुपन्यस्य व्याचष्टे – **अभिध्येति** ॥ विशिष्यप्रमाणाख्ययुक्तिसमुच्चये[5] चशब्दः ॥ सूत्रस्याभिध्यायाः प्रकृतित्वोपदेशात् परमेश्वरत्वोपदेशाच्चेति वृत्तिमाश्रित्योपदेशपदोक्तप्रमाणमाह[6] – **मायामिति** ॥

---

१. 'किन्त्वपि सर्वेषामपि वाच्य इति स्त्रीलिङ्गान्तरसमुच्चायकः ।' – प.
२.'मोहनीति च' ह. ३. 'टीकागतचशब्दोऽपि' – प.
४. '-वाच्यतायामेव' – प. ५. 'विशेषप्रमाणस्य युक्तिसमुच्चये'– प.
६.'उपदेशे परोक्तप्रमाणमाह' – प.

वचनादित्युभयान्वयि । तथा च **'महेश्वरम्'** इति श्रुतिवचनात् **'कथ्यते'** इति स्मृतिवचनाच्चेत्यर्थः ॥

सूत्रे प्रकृतिश्चेत्यनुवृत्तिम् अभिध्येति बुद्ध्या विवेकं चशब्दस्यावधारणार्थत्वं चाऽश्रित्य आहत्य लब्धां प्रतिज्ञां दर्शयति – **तदभिध्यैवेति ॥** तस्येश्वरस्याभिध्यैव इच्छैव प्रकृतिपदेनोच्यते नान्यत् । एवं या प्रकृतिपदेनात्रोच्यते सा तदभिध्यैव नान्यस्येत्यर्थः । **'प्रकृतिं'** प्रकृतिपदवाच्यम् । [१]तुशब्दौ मायामायिनोरुद्देश्यत्वरूपविशेषद्योतकौ[२] । तेन या प्रकृतिः सा माया मिथ्येति परव्याख्या[३] निरस्ता ।

ननु श्रुतौ मायाया एव प्रकृतिशब्दवाच्यत्वं ज्ञायते, नेच्छाया इत्यतो महामायेति पूर्वार्धोदाहरणम् । चशब्दस्समुच्चये । उच्यत इत्यनेनोपचार-निवृत्तिः । श्रुतिस्मृत्योरनुशासनरूपत्वात् । अत एव तयोर्विद्याऽत्र कथ्यते इति चोक्तिः । हे अनन्त ! तव इच्छैव महामायेत्यादिशब्दैरुच्यत इत्यर्थः । नियतिः प्रकृतिरित्यत्रापि इति शब्दोऽन्वेतव्यः । अत एवानेकवारोक्तिः ।

'सोऽभिध्या स जूतिः स प्रज्ञा स आनन्दः' इति श्रुतेरभिध्या च स्वरूपमेव ।

ननु इच्छायाः प्रकृतिशब्दवाच्यत्वोक्तावपि[४] कथं परमात्मनस्तत्प्राप्तिरित्यत आह – **स इति ॥** **'सः'** परमात्मा **'जूतिः'** प्रेरणा **'सर्वप्रेरकरूपत्वाज्जूतिरित्यभिधीयते'** इत्यैतरेयभाष्योक्तेः । चशब्दो हेत्वर्थे । [५]तुशब्दार्थो वा । तथा च इति श्रुतेरभिध्या ब्रह्मस्वरूपमेव न भिन्नेति

१. **'तुशब्दद्वयं'** – प.
२. **'-द्योतकम्'** – प.
३. **'परकृतव्याख्या'**– प.
४. **'-वपि कुतः परमात्मनः'**– प.
५. **'तुशब्दार्थे'** – प

ज्ञायते । अतो नोक्तशङ्काऽवकाश इत्यध्याहारेण वाक्ययोजना । अभिध्या च स्वरूपमेवेत्यनेनाभिध्यायाः स्वरूपत्वोपदेशादित्यपि सूत्रवृत्तिर्दर्शिता । न च श्रुतौ ब्रह्मण एवाभिध्यादिरूपत्वमुच्यते [१], नाभिध्यायास्तत्स्वरूपत्वमिति वाच्यम् । [२]समानवित्तिवेद्यतया श्रुतौ व्यतिरेकेणान्वयेन वा तस्याप्युक्त-प्रायत्वात् ॥

अनेन – अभिध्यायाः प्रकृतित्वोपदेशात् सा प्रकृतिस्तच्छब्दवाच्या । एवं तस्याः पारमेश्वरत्वोपदेशात् सा तस्यैव । एवं ब्रह्मणोऽभिध्यात्वोपदेशात् सिद्धादभिध्याया ब्रह्मत्वोपदेशादभिध्या तत्तु ब्रह्मैव । तथा च न केवलं पूर्वोक्तसामान्यहेतोः, किन्तु प्रकृतिशब्द-वाच्येच्छात्मकत्वोक्तेश्च प्रकृतिः ब्रह्मैवेति सूत्रार्थ उक्तो भवति ॥

'ध्यायति ध्यानरूपोऽसौ सुखी सुखमतीव च ।
परमैश्वर्ययोगेन विरुद्धार्थतयेष्यते ॥' इति ब्रह्माण्डे ॥ २५ ॥

ननु नेच्छा [३]भगवत्स्वरूपं, मायिनमितीनिप्रत्ययेन तवेति षष्ट्या च भेदसाधकसम्बन्धोक्तेरित्यत आह – **ध्यायतीति** ॥ चः समुच्चयेऽवधारणे च । अतीवेति निपातसमुदायः । तथा च ध्यानरूपोऽपि भगवान् ध्यायतीति ध्यानकर्तृतयोच्यते । एवम् **'असौ'** हरिः **'अतीव'** अत्यन्तं सुखरूप एव **'स आनन्दः'** इति श्रुतौ सुखरूपत्वेनोक्त एव सुखीत्युच्यते श्रुतिस्मृतिष्वित्यर्थः ॥

[४]अनेन भेदाभेदः कदाचिद् दुःखस्वरूपत्वं वा निरस्तम् । चशब्देन सोऽभिध्येति मायारूपत्वेनोक्तो मायिनमित्यादौ मायीत्युच्यत इति प्रकृतं समुच्चिनोति ॥

---

१. 'अभिध्यादिस्वरूपत्वम्' – प. २. 'समानवित्तिवेद्यतायाः' – प.
३. 'भगवद्रूपम्' – प. ४. 'अनेन नेशभेदः' – ।

न चैतदत्र विरुद्धम्, ऐश्वर्ययोगादित्याह - [१]**परमेति** ॥ **योगः** उपायः । **'विरुद्धार्थतया'** विरुद्धधर्मोपेततया[२] एकस्मिन् ब्रह्मणि विरुद्धत्वेन [३]प्रतीतसुखत्वसुखित्वाद्यर्थप्रत्यायकशब्दवाच्यतयेति यावत् । **'इष्यते'** प्रामाणिकैरित्यर्थः[४] । ब्रह्माण्डपुराणे[५] इत्यस्योक्तत्वान्न विरोध इत्यध्याहृतवाक्येनान्वयः ॥

सू - ॐ ॥ साक्षाच्चोभयाम्नायात् ॥ ॐ ॥ २६ ॥

'एष स्त्येष पुरुष एष प्रकृतिरेष आत्मैष ब्रह्मैष लोक एष आलोको योऽसौ हरिरादिरनादिरनन्तोऽन्तः परमः पराद् विश्वरूपः' इति पैङ्गिश्रुतौ साक्षादेव प्रकृतिपुरुषत्वाम्नानात् ॥ २६ ॥

ननूक्तप्रमाणैः सामान्येनेच्छाद्वारा वा प्रकृतिशब्दवाच्यत्वप्राप्तावपि न साक्षादीश्वरस्य तद्वाच्यत्वप्राप्तिरित्याशङ्कां विशेषप्रमाणोक्त्या परिहरत्सूत्र-मुपन्यस्य व्याचष्टे - **साक्षादिति** ॥ साधारण्येन विना इच्छाद्वारमन्तरेण चेत्यर्थः । एवशब्देन सौत्रचशब्दोऽवधारणार्थतया व्याख्यातः । **'प्रकृति-पुरुषत्वाम्नानात्'** स्त्रीपुल्लिङ्गशब्दवाच्यत्वाभिधानात् । तस्येति विपरिणामे-नान्वयः । अनेनोभयशब्दो व्याकृतः ॥

यद्यपि प्रकृतित्वाम्नानादित्येव वाच्यम्, न तूभयेति । पुरुषत्वे

---

१. **'परमेश्वरेति'** – प.

२.**'विरुद्धधर्मतया एकस्मिन् धर्मिणि'** – प.

३.**'प्रतीतसुखित्वदुःखित्वाद्यर्थप्रत्यायकत्वशब्दवाच्यतयेति'** – प.

४.**'प्रामाणिकैरिति शेषः'** – प.

५.**'ब्रह्माण्डे पुराणे'** – प.

विवादाभावात् । तथाऽप्याद्यसूत्रे चशब्देन तस्य समुच्चितत्वादेवमुक्तम् । आम्नानादित्यस्य प्रकृतिः[१] स एवेति प्रधानसाध्येनान्वयः ॥

'एषः' परमात्मा[२] सततं रमणात् स्त्रीशब्दवाच्यः । यथोक्तं तत्त्वप्रदीपे सततं रमणात् स्त्रीति । '[३]**एवमेव पुरुषः**' आत्मा तच्छब्दवाच्यः । **'एष प्रकृतिः'** तच्छब्दवाच्यः[४] । सूत्रे साक्षादित्युक्तासाधारण्यज्ञापनायैव[५] प्रकृतिरिति विशिष्योदाहरणम् । **'एष ब्रह्म'** स्त्रीपुंदोषराहित्यात्तदुपलक्षिताशेषनपुंसकशब्दवाच्यः । श्रुतावात्मा पुरुष इति, स्त्री प्रकृतिरिति शब्दद्वयोपादानमशेषस्त्रीलिङ्गशब्दसङ्ग्रहार्थम् ॥

हरेः विरुद्धानेकशब्दवाच्यत्वे निमित्तमाह[६] - **लोक इत्यादिना ॥ 'लोकः'** आधारः । प्रकृत्यादेरिति शेषः । **'आलोकः'** प्रकाशरूपः । [७]एषः क इत्यपेक्षायाम् आह - **योऽसौ हरिरिति ॥ 'आदिः'** कारणं जगज्जन्मादेरिति शेषः । स्त्र्यादौ विश्वस्मिन् रूपाण्यस्य स्त्र्यादिविश्वस्य[८] रूपमिव रूपमस्येति वा विश्वरूपः ॥

अनेन हरेस्तच्छब्दवाच्यत्वे सामान्यतस्तत्तदाधारत्वतत्तत्स्थितत्वतत्तत्प्रकाशकत्वतत्तत्कारणत्वतत्तदाकारत्वतत्तन्नियामकत्वादीनि निमित्तानि,

---

१. .'प्रकृतिश्च' – प.

२. 'परमात्मा स्त्री अशेषस्त्रीलिङ्गशब्दवाच्यः । तत्वप्रदीपरीत्या सततरमणात् स्त्रीति वा ।' – प.

३. 'एवमेष पुरुषः' – प.

४. '-वाच्यः,आत्मा सर्वपुल्लिङ्गशब्दवाच्यः' – प.

५. '-ज्ञापनायैष प्रकृतिरिति पुनर्विशिष्योदाहरणम् ।' – प.

६. 'असाधारणनिमित्तमाह'– प. ७.'एष इति क इत्य-' – प.

८. 'स्त्र्यादिविश्वं' – प.

रूपबहुल्याच्च विरुद्धानेकशब्दवाच्यत्वोपपत्तिरित्युक्तं भवति । तर्ह्याधारभूतवस्तूत्पत्तिनाशाभ्याम् अस्याप्युत्पत्तिनाशौ स्यातामित्यत आह – **अनादिरित्यादि** ॥ अनाद्यनन्तपदाभ्यामुत्पत्तिनाशराहित्यमुच्यते[१]। अत्र हेतुः – परात् । प्रकृत्यादेः परम इति । **'अन्तः'** अन्तकः । यद्वा, प्रकृत्यादेरन्तस्स्थित इत्यर्थः[२] ॥

यद्वा – स्त्रीपुरुषपदयोः, [३]प्रकृत्यात्मपदयोर्लोकालोकपदयोराद्यनादिपदयोरनन्तान्तपदयोः स्त्रीपुरुषजडचेतनज्ञानाज्ञानरूपत्वोत्पत्त्यनुत्पत्तिनाशानाशरूपविरुद्धार्थकयोरपि हरिरेव वाच्यः । अत एव ब्रह्मेति श्रुत्यर्थः ॥

सूत्रार्थस्तु – साक्षाच्चाऽद्यसूत्रोक्तं सामान्यरूपं द्वितीयसूत्रोक्तं प्रकृतिशब्दवाच्येच्छात्मकत्वरूपं वा द्वारमनपेक्ष्य साक्षादेवोभयस्य प्रकृत्यादिस्त्रीशब्दवाच्यत्वस्य पुरुषादिपुल्लिङ्गवाच्यत्वस्य चाऽम्नानात् **'एषः'** इति श्रुतावुक्तत्वात् प्रकृतिश्च स एवेति नेश्वरस्य प्रकृत्यादिशब्दवाच्यत्वाभावः शङ्क्य इति ॥

सू – ॐ ॥ आत्मकृतेः परिणामात् ॥ ॐ ॥ २७ ॥

प्रकर्षेण करोतीति प्रकृतिरिति योगाच्च ।

नन्वेवं[४]स्त्रीशब्दवाच्यत्वोपलक्षकप्रकृतिशब्दवाच्यत्वस्य हरेः श्रुत्युक्तत्वेऽपि कथं तद् युज्यते, तत्र तस्य प्रवृत्तौ निमित्ताभावात् । न हि सङ्केतमात्रं सिद्धान्तिभिरभ्युपगम्यत इत्याशङ्कां परिहरत्सूत्रं पठित्वा तत्फलितं

---

१. 'उच्यते । अतोऽन्तकः । यद्वा' – प

२. 'इत्यर्थः । अत्र हेतुः परात् । प्रकृत्यादेः पर इति । यद्वा,' – प.

३. 'प्रकृत्यात्मपरयोः' – प. ४.'स्त्रीशब्दमात्रोपलक्षक-' –प.

तावदाह - **आत्मेति** ॥ प्रकर्षेण करोतीति प्रकृतिरिति **'योगात्'** महायोगान्निरतिशयप्रवृत्तिनिमित्तवत्त्वाच्च प्रकृतिः विष्णुरित्यर्थः । न केवलं श्रुतावाम्नानाद् बहुलप्रयोगाख्यरूढिमात्रादिति चशब्दार्थः ॥

यद्वा - योगस्यैव भावान्न विष्णोः प्रकृतिशब्दवाच्यत्वे निमित्ताभाव इत्यवधारणार्थश्चकारः[१] । यद्यपि प्रकृष्टा कृतिर्यस्येत्येव [२]विग्रहः प्रदर्शनीयो न[३] प्रकर्षेण करोतीति । तथात्वे प्रकर्तेति वा प्रकृदिति वा प्रकारुरिति[४] वा वृत्तिः स्यात् । तथा करणविषय एव प्रकृष्टत्वान्वयः स्यान्न तु कृतौ । अत एव टीकायां प्रकृष्टा कृतिः यस्येत्येव विग्रहः प्रदर्शितः । तथाऽपि तस्यैव फलितोक्तिरित्यदोषः । अत्र प्रकर्षेण करोतीति विग्रहे प्रकृतिरिति वृत्तिवाक्यं प्रदर्शितम्, न तूद्देश्यार्पकं तत्, तस्य प्रकृतिश्चेत्यनेनैव प्राप्तेः ॥

प्रकृतावनुप्रविश्य तां परिणाम्य[५]तत्परिणामनियामकतया तत्र स्थित्वाऽऽत्मनो बहुधाकरणात् ।

एवं फलितार्थमभिधाय कथं प्रकृष्टेश्वरस्य[६] कृतिरित्यतः सूत्रं व्याचष्टे– **प्रकृताविति** ॥ अनेन परिणामकत्वोपयुक्तं तत्पूर्वभाविव्यापारमाह[७] । **अनुप्रविश्येति** । **'अनु'** अनुकूलतया **'तां'** प्रकृतिं परिणाम्येति । अनेन सूत्रे परिणामादिति[८] ल्यब्लोपनिमित्ता पञ्चमी । परिणाम्यात्मकृतेरित्यन्वयः । ल्यपा च परिणामस्याऽऽत्मकरणात् पूर्वभावितोच्यत[९] इत्युक्तं भवति ॥

---

१. '-त्यवधारणार्थमेवकारः' – प. २.'यस्येति विग्रहः' – प.
३ 'न तु' – प. ४.'प्रकार इति वा' – प.
५ 'तत्परिणामेषु स्थित्वा' ह. ६.'प्रकृष्टेश्वरस्य प्रकृतिरि' – प.
७. '–माह । नन्वनुकूलतायां प्रकृतिं परिणाम्येत्यनेन सूत्रे' – प.
८. 'विपरिणामादिति'– प.
९. 'पूर्वभाविता लभ्यत इत्युक्तं' – प.

तथा चेत्थं योजना– प्रकृतेः स्वतः परिणामासामर्थ्यात् तत्परिणामानुकूलतया प्रकृतौ प्रविश्य तां **'परिणाम्य'** स्वयमविकार एव तस्यां महदादिरूपेण विकारं विधाय अथ तत्परिणामकत्वेन प्रकृतिपरिणाम-महदादिप्रेरकत्वेन **'तत्र'** तत्परिणामेषु महदादिषु **'स्थित्वा'** स्थित्यर्थमिति यावत् । **'आत्मनः'** स्वस्य रूपेण **'बहुधाकरणात्'** व्यक्तीकरणाद् भवतीश्वरकृतिः प्रकृष्टा । अतः[१] प्रकर्षेण करोतीति योगाच्च प्रकृतिर्विष्णुरिति । अनेन प्रधानस्य स्वस्य च बहुधाकरणमेव प्रकृष्टकरणमिति प्रकृतिशब्दनिमित्तं प्रदर्शितं भवति ॥

'अथ हैष आत्मा प्रकृतिमनुप्रविश्याऽत्मानं बहुधा
चकार तस्मात् प्रकृतिस्तस्मात् प्रकृतिरित्याचक्षते'
इति भाल्लवेयश्रुतिः ।

अनाश्वासपरिहाराय स्वोक्तसूत्रार्थे श्रुतिस्मृती चाऽह – **अथेति ॥** प्रमेयान्तरारम्भार्थोऽथशब्दः । हिशब्दः प्रमाणप्रसिद्धौ । तथा **चैषः** परमात्मा यस्मात् प्रकृतेः स्वतः परिणामासामर्थ्यात् परिणामानुकूलतया[२] **प्रकृतिं प्रविश्य** तां परिणाम्य तत्परिणामप्रेरकत्वेन तत्र स्थित्यर्थ**मात्मानं** रूपेण[३] **बहुधा चकार** । **तस्माद्बहुधाकरणात् 'प्रकृतिः'** तच्छब्दवाच्यः । **'तस्मात्'** प्रकृतिवाच्यत्वादेनं **प्रकृतिरित्याचक्षते** ज्ञानिन इति श्रुत्यर्थः ॥
श्रुतिरित्यनन्तरमुक्तार्थे प्रमाणमिति शेषः ॥

'अविकारोऽपि परमः प्रकृतिं तु विकारिणीम् ।

---

१. **'अतः'** इति पदं प. पुस्तके नास्ति ।
२. **'तत्परिणामानुकूलतया'** – प.
३. **'रूपेण'** इति पदं प. पुस्तके नास्ति ।

अनुप्रविश्य गोविन्दः प्रकृतिश्चाभिधीयते ॥' इति नारदीये ॥

स्मृतौ यद्यपितथापीत्यर्थेऽपिः । तुशब्दो विशेषार्थः । **'अनु'** अनुकूलतयाऽत्मानं बहुधा चकारेति शेषः । तथा च यद्यपि गोविन्दः **'परमोऽविकारः'** अत्यन्तं निर्विकारः, मायायाः प्रकृतेः पर इति वा[१] । तथाऽपि **'चः'** यतः विकारानुकूलतयोपचयाख्यविकारयुक्तां **'प्रकृतिं'** प्रधानं प्रविश्य तां परिणाम्य तत्परिणाममहदादिप्रेरकत्वेन तत्र स्थित्यर्थमात्मानमपि बहुधा चकार । [२]अतः प्रकृतिस्तच्छब्दवाच्यः । यत एवमतोऽयं कविभिः प्रकृतिरित्यभिधीयत इति स्मृत्यर्थः ॥

न केवलं पुरुष इति वा चशब्दार्थः । गोविन्द इत्यनेनाविकारत्वे[३] **'निर्विकारोऽक्षरः शुद्धः'** इति वेदप्रतिपाद्यत्वाख्यहेतुरुच्यते । नारदीय इत्यनन्तरम् उक्तमिति शेषः ॥ स्पष्टः सूत्रार्थः ॥

न चान्यत्कल्प्यम्, अप्रामाणिकत्वात्[४] ॥ २७ ॥

[५]अपव्याख्यां दूषयति - **न चेति ॥** चस्त्वर्थः । **'अन्यत्'** ब्रह्मणो जगदुपादानत्वं[६] न कल्प्यम्, [७]प्रकृतिश्चेत्यादिसूत्रार्थतयेति शेषः । कुत इत्यत आह - **अप्रामाणिकत्वादिति ॥** तस्येति शेषः । [८]नञस्तद्विरुद्धतदभावार्थत्वं, प्रमाणेन सिद्धं तदविरुद्धं च प्रामाणिकम्, तद्भिन्नमप्रामाणिकं, तस्य भावस्तत्त्वं तस्मात् ॥

---

१. 'पर इति पृथग् विशेषणम् ।' – प.
२. 'ततः प्रकृति-' – प
३. '-विकारित्वे' – प.
४. 'अप्रमाणत्वात्' ह.
५. 'अपव्याख्यानं दूषयति' – प.
६. '–पादानत्वं तु न' – प.
७. 'प्रकृतिश्चेति' – प
८. 'बहुव्रीहौ नञः पुनः तदभावतद्विरुद्धार्थत्वं' – प.

तथा च तस्य ब्रह्मणो जगदुपादानत्वस्य प्रमाणशून्यत्वात्, **'अविकारः'** इत्यादिप्रमाणविरुद्धत्वात् [१]समन्वयप्रतिपादकप्रमाणाध्यायासङ्गतत्वाच्चेत्यर्थः ॥

सू - ॐ ॥ योनिश्च हि गीयते ॥ ॐ ॥ २८ ॥

अव्यवधानेनोत्पत्तिद्वारत्वं च प्रकृतित्वम् ।

तच्चास्यैव हि गीयते[२]

'यद् भूतयोनिं परिपश्यन्ति धीराः' (मुं.१.१.६) इति ।

[३]ननु तथाऽपि न प्रकृतिशब्दवाच्यत्वं परमात्मनो युज्यते, तच्छब्दस्य स्त्रीलिङ्गत्वात् परमात्मनश्च पुंस्त्वेन तत्र[४] स्त्रीलिङ्गाभावात् । न केवलं लिङ्गानुपपत्तिमात्रम्, किन्तु श्रौतप्रकृतिशब्दोपलक्षितस्त्रीशब्दमात्रे[५] प्रकृत्यर्थानुपपत्तिरपि, तच्छब्दप्रवृत्तौ[६] निमित्ताभावादिति शङ्कां[७] परिहरत्सूत्रमुपन्यस्य व्याचष्टे - **योनिश्चेति ॥ 'अव्यवधानेन'** [८]स्त्र्यादिव्यवधानमन्तरेणापत्योत्पत्तिद्वारत्वं तद्वत्त्वम् । स्वदेहादेवापत्योत्पादकत्वमिति यावत् ॥

---

१. 'समन्वयप्रतिपादकप्रथमाध्याया-' प.

२. 'अस्यैव गीयते' ह.

३. 'ननु न तथापि प्रकृति-' – प ४ 'तत्र' इति पदं प.पुस्तके नास्ति ।

५ '-पलक्षिते स्त्रीशब्दे' – प. ६.'तच्छब्दवृत्तौ' – प.

७. 'आशङ्कां' – प.

८. 'स्त्र्यादिव्यवधानमन्तरेण, स्वदेहादेवेत्यर्थः । द्वारत्वं मुखत्वम् । कारणत्वमिति यावत् । अपत्येत्यादौ संयोज्यम् । द्वारत्वमित्यन्तेन योनित्वं निरुक्तम् । प्रकृतित्वं प्रकृत्यादिस्त्रीलिङ्गशब्दप्रवृत्तिनिमित्तम् ।' – प.

यद्यपि 'योनिर्भार्या तथा स्थानं योनिः कारणमेव च' इति गीतातात्पर्यनिर्णयोदाहृताभिधानाद् योनिशब्दो गुह्यस्थानेऽव्यवधानेनापत्योत्पादनद्वारे रूढः । यथा **'योनेः शरीरम्'** इत्यत्र तद्वत्यां भार्यायां निरूढलाक्षणिकः । तथा **'मम योनिर्महद् ब्रह्म'** इत्यत्र । तथा च नैव निर्वक्तुं शक्यम् । तथाऽप्युदाहृतस्थलेऽप्युक्तनिरुक्तिसम्भवात्, प्रकृतानुगुण्याय श्रुतिसूत्रप्रयोगानुसारेण च महायोगविद्बद्बूढिभ्यां ब्रह्मणि प्रवृत्तिं दर्शयितुमेवं निरुक्तम् ॥

मार्गप्रतीहारपर्यायद्वारशब्दप्रयोगे विष्णोरपत्यनिर्गमनावधित्वरूपापादानत्वमेव न तूपादानत्वमिति सूचितम् । प्रकृतित्वं प्रकृत्यादिस्त्रीशब्दप्रवृत्तिनिमित्तम् । न केवलमात्मकृतेरित्यत्रोक्तं प्रकृष्टकरणमेव प्रकृतिशब्दप्रवृत्तिनिमित्तम्[१], किन्तु [२] निरुक्तयोनित्वमपीति समुच्चये [३]चशब्दः। ततः किमित्यत आह – **तच्चेति** ॥ चस्त्वर्थः[४] ॥

यद्वा – चशब्दः प्रमाणान्तरोक्तस्त्रीरूपत्वाख्यनिमित्तसमुच्चायकः । **'तस्य'** परमात्मन[५] इत्यनुवृत्ततच्छब्दार्थोक्तिः । न त्वन्यस्येत्येवार्थः । **'हि'** यतः **'गीयते'** प्रतिपाद्यते मुख्यतः[६], अतः प्रकृतिश्च स एवेत्यन्वयः । **'भूतयोनिं'**

---

१. 'प्रकृतित्वम्' – प.
२. 'किन्तु द्वारत्वरूपं योनित्वमपि' – प.
३. 'चशब्दः । हेरर्थे वा चशब्दः ।'– प.
४. 'चस्त्वर्थः । तस्येत्यनुवृत्ततच्छब्दस्य विपरिणामाभिप्रायेणाऽह । तथा च निरुक्तयोनित्वरूपं निमित्तं त्वित्यर्थः । यद्वा' – प.
५. 'परमात्मन एव । हि यतः ।' – प.
६. 'मुख्यत इति शेषः । इति गीयत इत्यन्वयः । न त्वन्यस्येत्येवार्थः । अतस्तस्य प्रकृतित्वं तदुपलक्षितस्त्रीलिङ्गशब्दवाच्यत्वं युज्यत एव न तदयोग इत्यावृत्त्याऽन्वयः ।' – प.

प्रलये स्वोदरे निवेशितस्य ब्रह्मादिप्राणिजातस्य **'योनिं'** स्वदेहादेवोत्पादकं सूक्ष्मदेहकर्तारं यं[1] **'धीराः'** ज्ञानिनः परिपश्यन्ति, तददृश्यत्वादिगुणकमिति मुण्डकश्रुत्यर्थः ॥

भूतानामाकाशादीनां ब्रह्मादीनां वा केषाञ्चित् स्त्रीव्यवधानेन विनोत्पादनाद् भूतयोनिरित्यर्थ इति प्राञ्चः ॥

'व्यवधानेन सूतिस्तु पुंस्त्वं विद्वद्भिरुच्यते ।
सूतिरव्यवधानेन प्रकृतित्वमिति स्थितिः[2] ॥
उभयात्मकसूतित्वाद् वासुदेवः परः पुमान् ।
प्रकृतिः पुरुषश्चेति शब्दैरेकोऽभिधीयते ॥'

इति ब्रह्माण्डे ॥ २८ ॥

॥ इति प्रकृत्यधिकरणम् ॥ ६ ॥

अव्यवधानेनोत्पत्तिद्वारत्वं[3] प्रकृत्यादिस्त्रीलिङ्गशब्दप्रयोगे निमित्तमिति कुतः ? कुतश्च तन्निमित्तं स्त्रीलिङ्गशब्दवाच्यत्वं विष्णोर्ज्ञायत इत्याशङ्कां परिहर्तुं सूत्रार्थे स्मृतिं चाऽह – **व्यवधानेनेति** ॥ **'सूतिः'** सूतिकर्तृत्वम् । तुशब्दः प्रकृतित्वं त्वित्यन्वेति । तथा च स्त्र्यादिव्यवधानेनापत्योत्पादकत्वं **'पुंस्त्वं'** पुल्लिङ्गशब्दप्रवृत्तिनिमित्तं **'प्रकृतित्वं'** तच्छब्दोपलक्षिताशेषस्त्रीलिङ्ग-शब्दप्रवृत्तिनिमित्तं त्वव्यवधानेन सूतिकर्तृत्वमिति प्रवृत्तिनिमित्तस्थिति-र्विद्वद्भिरुच्यत इत्यर्थः ॥

---

१. **'यत्'** – प.
२. **'स्त्रीत्वमाहुर्मनीषिणः'** ह.।
३. **'-त्पत्तिकर्तृत्वं'** – प

'स्त्रीत्वमाहुर्मनीषिणः' इति पाठे वाक्यभेदेनान्वयः । उभयत्रेति-शब्दाध्याहारश्च कर्तव्यः । ततः किं प्रकृत इत्यत आह – **उभयेति ॥** उभय-विधप्रसूतिकर्तृत्वादित्यर्थः । शब्दसमुच्चये च इत्यावर्तते । तत्रैक आद्यर्थे ॥

ननु सूतिकर्तृत्वमेवासिद्धम् । सुतरामुभयात्मकसूतित्वमित्यतो - **वासुदेव** इत्याह ॥ अनेन -

'वानात् सूतेर्देवनाद् वासुदेवो
वासाद् द्युतेश्छादनात् क्रीडया च ।
बलादसुत्वाद् दातृतो वर्तनाच्च
तं वासुदेवं प्रवदन्ति वेदाः ॥'

इति निरुक्तसूचनात् सूतिकर्तृत्वसिद्धिः ॥

ननु कथमेक एव हरिः प्रकृतिः पुरुष इत्यादिभिरनेकैर्विरुद्धशब्दैरभिधीयते, लोके काप्यदर्शनादित्यत आह - **पर इति ॥ 'परः'** लोकविलक्षणः पुमान् यत इति । यद्वा एक एवाभिधीयत इत्युक्ते हरेर्मुख्यतः सर्वशब्दवाच्यत्वे परः पुमानिति हेतुरुच्यते, यतः पूर्णपुरुषः ॥

इति ब्रह्माण्ड इत्यस्य तत्रत्यस्यानुषङ्गेणोक्तमित्यध्याहृतेनान्वयः । न च भगवतः स्त्रीरूपत्वादपि तच्छब्दवाच्यत्वमित्ययुक्तम्, **'नैनं वाचा स्त्रियं ब्रुवन्'** इति निषेधविरोधादिति वाच्यम् । तस्य केवलस्य लौकिकस्य वा स्त्रीत्वस्य ज्ञेयतानिषेधपरत्वात् । अन्यथा **'नैनमस्त्रीपुमान्'** इत्युत्तरवाक्यविरोधात् ॥

अनेन – **'हि'** यतो **'यद् भूतयोनिम्'** (मुं. १.१.६.) इति श्रुतौ स्मृतौ च स विष्णुर्योनिः स्वदेहादेवोत्पादको गीयते । योनिशब्दस्याव्यवधानेनोत्पत्ति-स्थानार्थत्वाद् योनित्वस्यैव स्त्रीशब्दप्रवृत्तिनिमित्तत्वात् । यतश्च प्रमाणान्तरे स्त्रीरूपश्च **'गीयते'** प्रतिपाद्यतेऽतः ॥

न केवलं प्रकृष्टकरणनिमित्तात् प्रकृतिप्रातिपदिकवाच्य एव सः, किन्त्वव्यवधानेनोत्पत्तिद्वारत्वरूपयोनित्वनिमित्तात् स्त्रीरूपत्वाच्च स्त्रीलिङ्ग-शब्दाभिधेयोऽपीति न तस्मिन् स्त्रीलिङ्गप्रयोगायोगः । न वा प्रकृति-शब्दोपलक्षितस्त्र्यादिशब्दान्तरे प्रकृत्यर्थानुपपत्तिरिति सूत्रार्थ उक्तो भवति[1] ॥

॥ इति प्रकृत्यधिकरणम् ॥ ६ ॥

---

१. इतः परं प.पुस्तकपत्राणि नोपलब्धानि ।

॥ ७. अथ एतेन सर्वेव्याख्याताधिकरणम् ॥

(भगवतो निषेधादिवाचकशब्दबोध्यत्वप्रतिपादनम्)

सू –

ॐ ॥ एतेन सर्वे व्याख्याता व्याख्याताः ॥ ॐ ॥२९ ॥

एतेन सर्वे शून्यादिशब्दा अपि व्याख्याताः । 'एष ह्येव शून्य एष ह्येव तुच्छ एष ह्येवाभाव एष ह्येवाव्यक्तोऽदृश्योऽचिन्त्यो निर्गुणश्च' इति महोपनिषदि[१] ।

॥ ७. अथैतेन सर्वे व्याख्याताधिकरणम् ॥

अत्राधिकरणे निषेध्यनिषेधार्थाः शब्दाः समन्वीयन्ते । यद्यपि भाष्ये विषयवाक्यं नोदाहृतम् । तथाऽप्यसदादिशब्दघटितवाक्यान्तरमुदाहर्तव्यमिति चन्द्रिकोक्तेः, टीकारीत्या **'असदेव'** इत्यादिवाक्यं विषयः । अस्य सिद्धान्ते सर्वथाऽन्यपरत्वाभावेऽपि शङ्काविषयत्वमात्रेणोदाहरणं युक्तम् ॥

अत्रापि **'तत्तु समन्वयात्'** इति सर्वशब्दानां परमात्मनि समन्वय उक्तः । तन्न युज्यते । कुतः ? यतस्तदसदादिशब्दवाच्यत्वं न युज्यत इत्यत आह, इत्याद्याधिकरणवाक्यसंयोजनेन सङ्गतिविषयपूर्वपक्षान् शिष्याः ज्ञास्यन्ती-त्यभिप्रेत्य सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे – **एतेनेति** ॥ सर्व-समन्वयस्यात्राकरणात् सर्वपदं सङ्कुचद्वृत्तितया व्याख्याति – **सर्व इति** ॥ पूर्वस्मादत्र चोऽनुवर्तनीय इत्याशयेनापीति प्रयुक्तवान् । न केवलं पूर्वसमन्विताः, किन्त्ववशिष्टाः शून्यादिशब्दा अपीत्यर्थः ॥

---

१. 'इति हि महोपनिषदि' ह.

नन्वसदादिशब्दानां निषेधमुखवेद्यवस्तुवाचित्वात् कथं परमात्मनस्तद्वाच्यत्वमित्यत आह - **एष ह्येवेति** ॥ अत्र **'एष ह्येवासन्'** इत्यप्यादावुपस्कार्यम् । अदृश्य इति छ इत्यस्यार्थः । तुदित्यपि ग्राह्यम् । **'अचिन्त्यः'** अभाव्यो **'निर्गुणः'** उपादानशून्योऽप्राकृतो विनाशशून्यश्चेत्यभावशब्दार्थकथनम् । हिशब्दः प्रसिद्धौ । चस्त्वर्थो यत इत्यर्थे । तथा च **'हि'** यतः **'एषः'** भगवान् दुर्जनैरव्यक्तोऽदृश्यश्च तुच्चाचिन्त्यश्च निर्गुणोऽतः स एव मुख्यतोऽसन् तुच्छोऽभावश्चेत्युच्यत इत्यर्थः ॥

यद्वा – शून्यशब्दस्य शून्यादीत्यादिपदोपात्तानां च शब्दानामिह हरौ रूढिप्रदर्शनपरेयं समग्रा श्रुतिः । महोपनिषदीत्यस्यासदादिशब्दाः दुर्जनाव्यक्तत्वादिना निमित्तेन रूढ्या वा ब्रह्मवाचितया व्याख्याता इत्यन्वयः ॥

'शमूनं कुरुते विष्णुरदृश्यः सन् परः स्वयम् ।
तस्माच्छून्य इति[1] प्रोक्तस्तोदनात्तुच्छ उच्यते ॥
नैष भावयितुं योग्यः केनचित् पुरुषोत्तमः ।
अतोऽभावं वदन्त्येनं नाश्यत्वान्नाश इत्यपि ॥

'एष ह्येव' (महोपनिषत्) इत्यनेनैव शून्यादिशब्दानां रूढेर्दर्शितत्वादिदानीं योगवृत्तिमपि स्मृत्या दर्शयति – **शमूनमिति** ॥ यस्माद् विष्णुः **'परः सन्नेव'** सर्वोत्तमत्वेन पूर्णसुखत्वेन च सन्नेव **'शम्'** अन्यसुखं स्वयम् **'ऊनं'** स्वसुखादल्पं करोति, तस्माच्छून्य इति प्रोक्त इत्यर्थः ॥

सन्नेवेत्यनेनासत्त्वाच्छून्यशब्दार्थ इत्याशङ्का परिहृता । सन्नेवादृश्य इत्यस्योत्तरत्रान्वयः । तुच्छ इत्यावर्तते । तत्रैकं द्विखण्डम् । अन्यदखण्डम् ।

---

१. **'शून्यमिति' ह.**

तथा च यतस्तोदनाद् दुःखकर्तृत्वात् तुत्, छः छन्नः सन्नेव दुर्जनैरदृश्यो न त्वसत्त्वादतस्तुच्छ उच्यत इत्यर्थः ॥

सत्तर्कदीपावल्यां तु – लोकेऽभीष्टं वस्तु नष्टमदृश्यं वा, तद्भृतः शमूनं कुरुते, तुदते च तं शमनुभवन्तम् । न च तद्भावयितुं योग्यं सुखाय, नापि तेनोपभोग्यम् । विष्णुस्तु न नष्टः, किन्तु स्वयं परः सन्नेव सर्वदा सर्वत्र सर्वोत्तमत्वेन सन्नेव दुर्जनादृश्य एव तच्छमूनं करोति, तुदते च तम् । भावयितुमयोग्यस्तेनानुपभोग्यश्च । यथा रमाऽजशङ्करादिभिरित्युक्तम् ॥

अस्मिन् पक्षे यतः छः नित्यमदृश्य एव तुत् दुःखयत्यन्यान् दुर्जनान्, अतोऽदृश्यत्वे सति तोदनात् तुच्छ उच्यत इति । छशब्दार्थस्यादृश्यत्वस्य विशेषणतया पूर्वमन्वयः । पक्षद्वयेऽप्येकानेकपदत्वं समानम् । ऐकपद्ये तुच्चासौ छश्चेति विग्रहः । यतः **'एषः'** विष्णुः कारणतयाऽऽनन्त्येन च पुरुषोत्तमः, अतो न केनचित् **'भावयितुम्'** उत्पादयितुं साकल्येन चिन्तयितुं वा योग्यः । यत एवं अत एनमभावं वदन्ति कवय इत्यर्थः । अश भोजन इत्यतः अश्यमिति रूपं, तस्य भाव अश्यत्वं, तस्य नञा सम्बन्धे नाश्यत्वादित्यस्याभक्ष्यत्वादित्यर्थः ॥

सत्तर्कदीपावलीरीत्या तु – नाकमितिवन्नाशं परमसुखं यापयतीति नाश इत्यर्थः । उच्यत इत्यनुषज्यते । न केवलमभाव इत्यादिरूपेणेत्यपेरर्थः ॥

सर्वस्य तदधीनत्वात् तत्तच्छब्दाभिधेयता ।
अन्येषां व्यवहारार्थमिष्यते व्यवहर्तृभिः ॥' इति महाकौर्मे[१] ॥

निषेधमुखवेद्यवस्तुवाचिशब्दानां निषेध्यनिषेधवाचित्वेन द्विरूपत्वात् तत्र स्मृतौ निषेध्यासद्वाचिशून्यादिशब्दानामेव योगवृत्तिकथनात्, तदन्येष्व-

१. **'इति कौर्मे' ह.**

व्यक्तादिषु निषेधरूपाभाववाचिनिर्गुणादिशब्देषु च तदकथनान्न तेषां हरौ वृत्तिः स्यादित्याशङ्क्योभयसाधारणं निमित्तमाह – **सर्वस्येति ॥**

एतच्चासद्वाचिशब्देष्वभाववाचिशब्देषु च सम्बध्यते । अत एव टीकायामुभयत्रेत्युक्तिः । सुधायां च निषेधनं निषेधोऽभावः । निषिध्यत इति निषेधोऽसन् तदुभयार्थाः शब्दा इत्युक्तम् । तथा च **'सर्वस्य'** असच्छून्यादिशब्दप्रवृत्तिनिमित्तस्य स्वगतस्य परगतस्य वा **'तदधीनत्वात्'** भगवत्स्वामिकत्वात् तत्तच्छब्दवाच्यता तस्यैव हरेः सर्वशब्दाभिधेयता । अत एव असच्छून्यतुच्छाभावनाशादिशब्दपरममुख्यार्थता भगवतः । अन्येषां तु तदधीनेनैव तत्तत्प्रवृत्तिनिमित्तेन हानादिव्यवहारार्थं व्यवहर्तृभिः तत्तच्छब्दप्रयोक्तृभिस्तन्मुख्यवाच्याभिज्ञैस्तत्तच्छब्दार्थता **'इष्यते'** अभ्युपगम्यत इत्यर्थः ॥

यद्वा - सर्वस्येत्येतत् **'शमूनं कुरुते'** इत्याद्युक्तहेतूपपादकत्वेन पूर्वत्र तत्तच्छब्दाभिधेयतेत्युक्तसाध्यसाधकत्वेनोत्तरत्र च सम्बध्यते । अत एव सत्तर्कदीपावल्यां स्वगतस्य परगतस्य वा शब्दप्रवृत्तिनिमित्तस्य भगवदधीनत्वादित्युक्तम् । द्रष्टुर्भावयितुर्भक्षकस्य चेश्वराधीनत्वेन स्वगताना-मदृश्यत्वाभावत्वनाशत्वादीनां तदधीनत्वं सिद्धम् । परगतनिषेध्यत्व-शून्यत्वाभावत्वादीनां त्वीशायत्तत्वं सुप्रसिद्धमेवेत्याशयः । महाकौर्मे इत्यस्य श्रूयमाणा इत्यध्याहारेण महोपनिषदि, अन्यत्र च श्रूयमाणाः शून्यादिशब्दाः **'शमूनं कुरुते'** इत्यादियोगेन स्वातन्त्र्यनिमित्तेन च विष्णुपरतया महाकौर्मे व्याख्याता इत्यन्वयः ॥

एतेन तदधीनत्वाद्युक्तयुक्तिसमुदायेन ।

सूत्रेऽवयवप्रयोगानियमाभिप्रायेण प्रथमं प्रयुक्तस्य हेतुपदस्यानुवादमात्रस्याप्रकृतत्वादेकवचनार्थस्याविवक्षितत्वाच्चैतेनेत्यनूदित-

पदपरामृष्टमेव हेतुं दर्शयति - **एतेनेति** ॥ तस्मिन्नधीनं तदधीनं तत्स्वामिकं, यद्वा – तस्याधीनं तदधीनं तस्य भावस्तदधीनत्वं तदधीनत्वादिरूपा या युक्तयस्तत्समुदायेनेत्यर्थः । आदिपदेन **'महद्वच्च'**, **'चमसवदविशेषात्'** **'ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके'** 'प्रतिज्ञादृष्टान्तानुपरोधात्' इत्यादिकं गृह्यते ॥

'अवधारणार्थं सर्वस्याप्युक्तस्याऽध्यायमूलतः ।
द्विरुक्तिं कुर्वते प्राज्ञा अध्यायान्ते विनिर्णये ॥'

इति वाराहसंहितायाम् ॥[१]॥

इति एतेन सर्वेव्याख्याताधिकरणम् ॥ ७ ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये प्रथमाध्यायस्य चतुर्थः पादः ॥

॥ प्रथमाध्यायः समाप्तः ॥

ननु सूत्रेऽल्पाक्षरत्वविरोधिनी द्विरुक्तिः किमर्थेत्यत आह - **अवधारणार्थमिति** ॥ **'आध्यायमूलतः'** अध्यायादिमारभ्यान्तपर्यन्तमुक्तस्य सर्वस्यार्थस्यावधारणार्थमेवेति निर्णयायान्ते द्विरुक्तिं कुर्वते ज्ञानिन इत्यर्थः । भारतादिषु द्विरुक्तेरकरणादाह – **विनिर्णय इति** ॥ विशिष्टो निर्णयो यस्मात् तस्मिन् विनिर्णायकग्रन्थ इत्यर्थः । तथा च तेषां निर्णेतव्यत्वेन निर्णायकत्वाभावान्नोक्तनियमभङ्ग इति भावः । संहितायाम्

---

१. 'इति वाराहे' ह.

इत्यस्योक्तत्वादित्यध्याहारेण न द्विरुक्तिवैय्यर्थ्यम्, न चान्यरीत्या अध्यायसमाप्तिद्योतनार्थ इत्युपस्कृतसाध्येनान्वयः ॥

अनेन - **'एतेन'** पूर्वोक्ततदधीनत्वादिहेतुनैव **'सर्वे'** शून्यादिशब्दाः **'तत्तु'** तस्मिन् ब्रह्मण्येव तद्विषया एवेति **'व्याख्याताः'** प्रतिपादिता इति सूत्रार्थ उक्तो भवति ॥

॥ इति एतेन सर्वेव्याख्याताधिकरणम् ॥ ७ ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणां श्रीमद्रघुनाथतीर्थपूज्यपादानां शिष्येण श्रीमज्जगन्नाथयतिना कृतायां श्रीमद्ब्रह्मसूत्रभाष्यदीपिकायां प्रथमाध्यायस्य चतुर्थः पादः ॥

॥ समन्वयाध्यायः समाप्तः ॥ १ ॥

॥ ॐ ॥

॥ श्रीः ॥

श्रीजगन्नाथयतिकृता

सूत्रदीपिका

श्रीमद्धनुमद्भीममध्यान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

॥ श्रीगुरुभ्यो नमः ॥

॥ हरिः ॐ ॥

कृष्णं रामं नारसिंहं व्यासं नत्वा गुरूनपि ।
जगन्नाथाख्ययतिना क्रियते सूत्रदीपिका ॥

॥ प्रथमाध्यायस्य प्रथमः पादः ॥

॥ जिज्ञासाधिकरणम् ॥ १ ॥

१. ॐ ॐ अथातो ब्रह्मजिज्ञासा ॐ

अथ अध्ययनशमदमादिरूपाधिकारसम्पत्त्यनन्तरम् । **अतः** मोक्षाख्यप्रयोजनस्य सत्त्वाद् विष्णोः प्रसादाद् वा । **ओं** गुणपूर्णस्य **ब्रह्मणो** विष्णोः **जिज्ञासा** श्रवणादिरूपा कर्तव्येत्यर्थः ॥ १ ॥

॥ जन्माधिकरणम् ॥ २ ॥

२. ॐ जन्माद्यस्य यतः ॐ

अस्य प्रमितजीवजडात्मकप्रपञ्चस्य **यतः** यस्माद् **जन्मादि** सृष्ट्याद्यष्टकम् । भवतीति श्रुतं तदेव ब्रह्म नान्यदित्यर्थः ॥ १ ॥

॥ शास्त्रयोनित्वाधिकरणम् ॥ ३ ॥

३. ॐ शास्त्रयोनित्वात् ॐ

नानुमानतः रुद्रादेर्जगत्कारणत्वं कल्पनीयम्। कुतः **शास्त्रयोनित्वात्,** शास्त्रम् ऋगादिरूपं योनिः ज्ञप्तिकारणं यस्य तच्छास्त्रयोनि। तस्य भावः शास्त्रयोनित्वम्, तस्मात् जगत्कारणं ब्रह्म। शास्त्रैकसमधिगम्यत्वादित्यर्थः ॥ १ ॥

॥ समन्वयाधिकरणम् ॥ ४ ॥

४. ॐ तत्तु समन्वयात् ॐ

तुशब्द एवार्थे। **तदेव** विष्ण्वाख्यं ब्रह्मैव सं मुख्यतः सर्वशास्त्रयोनि न रुद्रादिः। कुतः? **समन्वयात्** समीचीनोपक्रमादितात्पर्यलिङ्गादित्यर्थः ॥१॥

॥ ईक्षत्यधिकरणम् ॥ ५ ॥

५. ॐ ईक्षतेर्नाशब्दम् ॐ

तद् ब्रह्म। **अशब्दं न,** शब्दावाच्यं न, किन्तु वाच्यमेव। कुतः? **ईक्षतेः**। ईक्षतिर्ज्ञानम् तद्विषयत्वादित्यर्थः ॥ १ ॥

६. ॐ गौणश्चेन्नात्मशब्दात् ॐ

गौणः सत्त्वादिगुणबद्धो जीव एव। 'स एतस्मात्'[१] इति ईक्षतिश्रुत्युक्त इति **चेन्न**। कुतः? **आत्मशब्दात्**। ईक्षणीयवस्तुनि आत्मानं पश्येदित्यात्मशब्दश्रवणादित्यर्थः ॥ २ ॥

७. ॐ तन्निष्ठस्य मोक्षोपदेशात् ॐ

तन्निष्ठस्य परमात्मज्ञानिनः। **मोक्षोपदेशात्** 'यस्यानुवित्तः'[२] इत्यादौ मोक्षस्य श्रुतत्वात्। आत्मशब्दमुख्यवाच्यो न जीव इत्यर्थः ॥ ३ ॥

---

१. **'स एतस्माज्जी**वघनात् परात् परं पुरिशयं पुरुषमीक्षते' (प्र.५.५)

२. **'यस्यानुवित्तः** प्रतिबुद्ध आत्मा अस्मिन् सन्दोहे गहने प्रविष्टः।
स विश्वकृत् स हि सर्वस्य कर्ता तस्य लोकः स उ लोक एव' (बृ.उ.६–४–१३.)

८. ॐ हेयत्वावचनाच्च ॐ

हेयत्वावचनाद् ब्रह्मणो मोक्षार्थं प्राधान्येनाज्ञेयत्वरूपहेयत्वस्याप्रतिपादनात् प्रत्युत 'जानथेति' अहेयत्ववचनाच्च न गौणः आत्मशब्दवाच्यः। किन्तु निर्गुणो विष्णुरेवेत्यर्थः ॥ ४ ॥

९. ॐ स्वाप्ययात् ॐ

स्वस्य स्वस्मिन् **अप्ययात्** अप्ययपदोक्तलयवचनात्। आत्मानं विलापयतीति श्रुत्युक्तो निर्गुण एव न गौणः। अत एव चासौ शब्दवाच्य इत्यर्थः ॥ ५ ॥

१०. ॐ गतिसामान्यात् ॐ

गतेर्नानाशाखाजन्यज्ञानस्य। सामान्यात् एकरूपत्वश्रवणात्। न विष्णोरन्यः कारणत्वेन शाखान्तरप्रतिपाद्य इत्यर्थः ॥ ६ ॥

११. ॐ श्रुतत्वाच्च ॐ

'एको देवः'[१] इति श्रुत्युक्तत्वाच्च न शब्दवाच्यं ब्रह्मेत्यर्थः ॥ ७ ॥

॥ आनन्दमयाधिकरणम् ॥ ६ ॥

१२. ॐ आनन्दमयोऽभ्यासात् ॐ

आनन्दमयादिशब्दवाच्यो विष्णुरेव न प्रकृत्यादिः। कुतः? **अभ्यासात्** प्रतिप्रकरणमानन्दमयादौ ब्रह्मशब्दश्रवणादित्यर्थः ॥ १ ॥

१३. ॐ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॐ

विकारशब्दात् विकारार्थकमयट्शब्दाद् आनन्दमयादिर्विष्णुर्नेति **चेन्न**। कुतः? **प्राचुर्यात्** मयट्शब्दस्य प्राचुर्यपदोक्तपूर्णत्वाभिधायकत्वादित्यर्थः ॥ २ ॥

---

१. **'एको देवः** सर्वभूतेषु गुढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षस्सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च' (श्वे.६–११)

१४. ॐ तद्धेतुव्यपदेशाच्च ॐ

चः समुच्चये । **तस्य** आनन्दमयस्य विष्णुत्वे लोकचेष्टकत्वाख्यहेतोर्व्यपदेशात् । 'को ह्येवान्यात्'[१] इति श्रुतौ उक्तत्वाच्च आनन्दमयो विष्णुरेवेत्यर्थः ॥ ३ ॥

१५. ॐ मान्त्रवर्णिकमेव च गीयते ॐ

यतो **मान्त्रवर्णिकं** 'सत्यं ज्ञानमनन्तं ब्रह्म' इति मन्त्रवर्णोक्तं ब्रह्म **गीयते** आनन्दमयादिशब्दैः प्रतिपाद्यते । अत आनन्दमयादिशब्दवाच्यं ब्रह्मैवेत्यर्थः ॥ ४ ॥

१६. ॐ नेतरोऽनुपपत्तेः ॐ

इतरः चतुर्मुखादिः । **न** । कुतः? **अनुपपत्तेः** 'ब्रह्मविदाप्नोति परम्'[२] इति मोक्षजनकज्ञानविषयत्वायोगादित्यर्थः ॥ ५ ॥

१७. ॐ भेदव्यपदेशाच्च ॐ

चतुर्मुखादेरानन्दमयस्य **भेदकधर्मोक्तेश्च** नाऽनन्दमय इतर इत्यर्थः ॥ ६ ॥

१८. ॐ कामाच्च नानुमानापेक्षा ॐ

अद्वैतश्रुत्यनुकूलानुमानस्याभावात् केवलानुमानस्य च **कामात्** इच्छामनुसृत्य प्रवृत्तत्वा**न्नानुमानापेक्षा** अतीन्द्रियार्थविषये शुष्कानुमानापेक्षा न कार्येत्यर्थः ॥ ७ ॥

१९. ॐ अस्मिन्नस्य च तद्योगं शास्ति ॐ

युक्तिसमुच्चये चशब्दः । यतः **अस्मिन्** आनन्दमयप्रकरणे मोक्षेऽप्यस्य जीवस्य । **तद्योगं** आनन्दमयादिना योगं सम्बन्धम् । **शास्ति** श्रुतिः प्रतिपादयति । अतोऽपि आनन्दमयादिः ब्रह्मैव, न देहादिरित्यर्थः ॥ ८ ॥

---

१. **'को ह्येवान्यात्** कः प्राण्यात्। यदेष आकाश आनन्दो न स्यात्' (तै.२–७)

२. (तैत्तरीय.३.२.१)

॥ अन्तःस्थत्वाधिकरणम् ॥ ७ ॥

२०. ॐ अन्तस्तद्धर्मोपदेशात् ॐ

अन्तः 'अन्तः प्रविष्टम्'[१] इति हृदयान्तः श्रुतं ब्रह्मैव न इन्द्रादिः । कुतः? तद्धर्मोपदेशात् तस्मिन्नन्तः श्रुते क्षीराब्धिमध्यवर्तित्व, प्रलयोदधिस्थितत्व, ब्रह्माण्डवीर्यत्वादिरूपविष्णुधर्माणाम् 'अन्तः समुद्रे'[२] इत्यादौ श्रुतत्वादित्यर्थः ॥ १ ॥

२१. ॐ भेदव्यपदेशाच्चान्यः ॐ

न केवलमन्तस्थो विष्णुः किन्तु इन्द्रादिभ्योऽन्यश्च । कुतः? **भेदव्यपदेशात्** तस्य तदन्तर्यामित्वतत्प्रेरकत्वादिरूपभेदकधर्मश्रवणादित्यर्थः ॥ २ ॥

॥ आकाशाधिकरणम् ॥ ८ ॥

२२. ॐ आकाशस्तल्लिङ्गात् ॐ

आकाशः आकाशशब्दवाच्यः विष्णुरेव, न प्रसिद्धाकाशः । कुतः? **तल्लिङ्गात्** [३]छन्दोगश्रुत्युक्ताकाशे परोवरीयस्त्वादिरूपविष्णुलिङ्गस्य श्रवणादित्यर्थः ॥१॥

॥ प्राणाधिकरणम् ॥ ९ ॥

२३. ॐ अत एव प्राणः ॐ

'तद्वै त्वं प्राणो अभवः'[४] इत्युक्तः **प्राणो** विष्णुरेव नान्यः । कुतः? **अत एव** 'श्रीश्च ते'[५] इति श्रीपतित्वलिङ्गादेव इत्यर्थः ॥ १ ॥

---

१. '**अन्तःप्रविष्टं** कर्तारमेतम्। अन्तश्चन्द्रमसि मनसा चरन्तम्। सहैव सन्तं न विजानन्ति देवाः' (तै.आ.३-११)

२. '**अन्तःसमुद्रे** मनसा चरन्तम्। ब्रह्मान्वविन्दद्दशहोतारमर्णे' (तै.३.११.१)

३. 'अस्य लोकस्य का गतिरित्याकाश इति होवाच' , 'स एष परोवरीयानुद्गीथः स एषोऽनन्तः' (छां.१–९.)

४. '**तद्वै त्वं प्राणो अभवः** महान् भोगः प्रजापतेः । भुजः करिष्यमाणः यद्देवान् प्राणयो नव' (तै.आ.३.१४)

५. '**श्रीश्च ते** लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे' (तै.आ.३.१३.)

॥ ज्योतिरधिकरणम् ॥ १० ॥

२४. ॐ ज्योतिश्चरणाभिधानात् ॐ

ज्योतिः ज्योतिशब्दवाच्यं ब्रह्मैव नत्वन्यत्। कुतः? **चरणाभिधानात्** कर्णादीनां विचरणाभिधानात्। 'वि मे कर्णा'[१] इति ज्योतिषः साकल्येन कर्णादि-विदूरत्वश्रवणादित्यर्थः ॥ १ ॥

॥ छन्दोभिधानाधिकरणम् ॥ ११ ॥

२५. ॐ छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथाहि दर्शनम् ॐ

छन्दोभिधानात् । ननु छन्दोगश्रुतिस्थगायत्रीपदेन चतुर्विंशत्यक्षरात्मक-छन्दसः प्रतिपादनात् गायत्रीशब्दवाच्यो विष्णुर्नेति चेन्न। कुतः? **तथाहि दर्शनम्**। हि यस्मात् **तथा** गानत्राणकर्तृत्वनिमित्तेन दर्शनं विष्णोः गायत्री-शब्दवाच्यत्वप्रतिपादिका 'गायति त्रायति च'[२] इति श्रुतिरस्ति। तस्मात् व्यर्थं गायत्रीपदेन विष्णोरभिधानमित्यत उक्तं तथेत्यादि। **तथा चेतोर्पण-निगदात्** विष्णोः **तथा** गायत्र्यादिशब्दप्रवृत्तिनिमित्तवत्त्वेन **चेतसि अर्पणाय** उपासनाय। **निगदात्** श्रुतौ प्रतिपादनादित्यर्थः। तथा च न वैयर्थ्यमिति भावः ॥ १ ॥

२६. ॐ भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॐ

एवमित्यस्याऽवृत्तिः। एवं गायत्रीशब्दवाच्यं ब्रह्मेत्येवमेव युक्तम्। कुतः? एवं भूतादिपादव्यपदेशोपपत्तेः। 'पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि'[३] इत्येवंरूपभूतामृतांशवत्त्वोक्तेश्च तस्य च विष्णावे**वोपपत्तेः** अन्यत्र अनुपपत्तेश्चेत्यर्थः ॥ २ ॥

---

१. **'वि मे कर्णा** पतयतो विचक्षुर्वी३दं ज्योतिर्हृदय आहितं यत्।
वि मे मनश्चरति दूर आधीः किं स्विद्वक्ष्यामि किमु नू मनिष्ये' (ऋ.६–९–६.)

२. (छां.३–१२.१.) ३.(छां.३–१२.६.)

२७. ॐ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॐ

उपदेशभेदात् गायत्रीज्योतिषोः द्युस्थत्व 'त्रिपादस्यामृतं दिवि'[१] दिवः परत्व 'परो दिवः'[२] रूपविरुद्धधर्मबोधकश्रुतिभेदा**न्नेति चेत्** तद्वयं विष्ण्वाख्यमेकं वस्तु न किन्तु भिन्नमेवेति **चेन्न** । कुतः? **उभयस्मिन्** श्रुतिवाक्येऽपि एकस्य प्रतिपाद्यत्वेऽपि **अविरोधात्** । त्रिसप्तलोकविवक्षया विरोधाभावादित्यर्थः ॥ ३ ॥

॥ पादान्त्यप्राणाधिकरणम् ॥ १२ ॥

२८.ॐ प्राणस्तथाऽनुगमात् ॐ

तथा 'तद्वै त्वं'[३] इति तैत्तिरीयोक्तप्राणवत् 'ता वा एताः'[४] इति ऐतरेयोक्त**प्राणोऽपि** विष्णुरेव । कुतः? **अनुगमात्** । देवतोपास्यत्वादिविष्णुलिङ्गब्रह्मशब्दानां असकृच्छ्रवणादित्यर्थः ॥ १ ॥

२९. ॐ न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ॐ

द्वितीयार्थे षष्ठी । **वक्तुः** बृहतीसहस्रवक्तारं विश्वामित्रं प्रति इन्द्रेणाऽ**त्मोपदेशात्** । आत्मनः स्वस्य प्राणतयोपदेशाद् इन्द्र एवायं प्राणः **न** विष्णुरिति चेत् । नेति शेषः । तस्याऽवृत्तिः । अनुगमादित्यनुवर्तते । तथाच प्रागुक्तानुगमहेतोः नेन्द्रः प्राणः । तथा सत्युपदेशविरोध इत्यपि न । कुतः? यस्मात् अस्मिन् प्रकरणे भगवतः **अध्यात्मसम्बन्धभूमा** इन्द्रविश्वामित्रादिरूपबहुदेहसम्बन्धः उक्तोऽस्ति तस्मादित्यर्थः । **यद्वा** हि यस्मात् अस्मिन्निन्द्रे । **अध्यात्मसम्बन्धभूमा** । अधि अधिकस्याऽत्मनः सम्बन्धस्याऽवेशस्य भूमा बाहुल्यं विद्यते तस्मादित्यर्थः ॥ २ ॥

---

१. (छां.३.१२.६.) २. (छां.३–१३.७.) ३. (तै.आ.३–१४.४.)

४. **'ता वा एताः** शीर्षञ्छ्रियः श्रिताश्चक्षुः श्रोत्रं मनो वाक् प्राणः' (ऐ.आ.२.१.४)

३०. ॐ शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॐ

तुशब्द एवार्थे । **वामदेववत्** यथा अन्तर्यामिविवक्षया वामदेवर्षिः 'अहं मनुरभवं' इति स्वस्य मनुसूर्यादैक्यमाह तद्वत् । **शास्त्रदृष्ट्या** शास्ति सर्वमिति शास्त्रमन्तर्यामी तद्दृष्ट्या तद्विवक्षयैव**उपदेशः** प्राणोऽहमिति व्यपदेशः । नत्वैक्येनेत्यर्थः ॥ ३ ॥

३१. ॐ जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रित-त्वादिह तद्योगात् ॐ

जीवमुख्यप्राणलिङ्गात् शतायुष्ट्वादिजीवलिङ्गानां इन्द्रियदेवैः संवादादि-रूपमुख्यप्राणलिङ्गानां च श्रवणात् 'तावन्ति शतसंवत्सरस्य'[१], 'ता अहिंसन्ता–'[२] इति प्राणो अन्य एव न विष्णुरिति चेन्न । कुतः? **अनुग-मात्** । न च लिङ्गविरोधः । तल्लिङ्गानां अन्तर्यामिविषयत्वोपपत्तेः इत्यादि-कमध्याहार्यम् । किमर्थमन्तर्यामिकथनमित्यत उक्तम्– **उपासात्रैविध्या-दिति** । अन्तर्बहिःसर्वगतभेदेन ब्रह्मोपासनस्य त्रिविधत्वात् । इह प्रकरणे । तत्त्रैविध्यस्य **आश्रितत्वात्** उक्तत्वात् **तद्योगात्** तेषां अधिकारिणां त्रिविधोपासनायोग्यत्वादित्यर्थः । तथा च तत्तच्छब्दैस्तत्तदधिकारि-भेदेनोपासनार्थं अन्तर्यामिकथनं युक्तमिति भावः ॥ ४ ॥

इति श्रीजगन्नाथयतिकृतायां सूत्रदीपिकायां
प्रथमाध्यायस्य प्रथमः पाद ॥ १ ॥ १ ॥

—०—

१. **'तावन्ति शतसंवत्सरस्याहां** सहस्राणि भवन्ति' (ऐ.आ.२–२–४.)

२. **'ता अहिंसन्ताहमुक्थमहमुक्थमस्मि'** (ऐ.आ.२-१-४.)

प्रथमाध्यायस्य द्वितीयः पादः

॥ सर्वगतत्वाधिकरणम् ॥ १ ॥

१ ॐ सर्वत्र प्रसिद्धोपदेशात् ॐ

तत्त्विति वर्तते । **सर्वत्र** पृथिव्यादिषु उच्यमानं वस्तु तत्तु नारायणाख्यं ब्रह्मैव न त्वन्यत् । कुतः? **प्रसिद्धोपदेशात्** 'एतमेव ब्रह्म'[१] इति सर्वगते वस्तुनि नारायणवाचित्वेन श्रुत्यादिप्रसिद्धब्रह्मशब्दश्रवणादित्यर्थः ॥ १ ॥

२. ॐ विवक्षितगुणोपपत्तेश्च ॐ

चः समुच्चयेऽवधारणे वा । सर्वगते । श्रुत्येति शेषः । तथाच **विवक्षितानामितः** परं सर्वगते श्रुत्या तन्निष्ठतया वक्तुं योग्यानां वक्ष्यमाणानां वा अश्रुतत्वादि-गुणानां विष्णोरेव योग्यत्वेन तस्मिन्नेवोपपत्तेः अन्यत्रानुपपत्तेश्च विष्णुरेव सर्वगत इत्यर्थः ॥ ३ ॥

३. ॐ अनुपपत्तेस्तु न शारीरः ॐ

तुशब्द एवार्थे । **शारीरो जीवः** । आदित्यो वा । **न** सर्वगतः । कुतः? **अनुपपत्तेः** एकस्य जीवस्य सर्वशरीरस्थत्वायोगादित्यर्थः ॥ ३ ॥

४. ॐ कर्मकर्तृव्यपदेशाच्च ॐ

सर्वगते वस्तुनि 'आत्मानम्'[२] इति **कर्मत्वस्य** जीवे च शंसतीति तद्विरुद्ध-**कर्तृत्वस्य** व्यपदेशादुक्तत्वाच्च न जीवः सर्वगत इत्यर्थः ॥ ४ ॥

---

१. **'एतमेव ब्रह्म** इत्याचक्षते' (ऐ.आ.३–२–३–१२.)

२. **'आत्मानं** परस्मै शंसति' (ऐ.आ. ३–२–३)

५. ॐ शब्दविशेषात् ॐ

'एतमेव ब्रह्म'[१] इति वाक्ये ब्रह्मशब्दस्यावधारणार्थकैवशब्दाख्यविशेषणवत्त्वात् ब्रह्मशब्दो न जीवपर इत्यर्थः ॥ ५ ॥

६. ॐ स्मृतेश्च ॐ

चः समुच्चये । न केवलं श्रुत्युक्तत्वात् ब्रह्मशब्दो न जीवपर इति किन्तु 'अहमात्मा गुडाकेश'[२] इत्यादिस्मृतिसद्भावाच्च ब्रह्मशब्दो न जीवपर इत्यर्थः ॥ ६ ॥

७. ॐ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॐ

अर्भकौकस्त्वात् 'सर्वेषु भूतेषु'[३] इति सर्वगतवस्तुनः सर्वप्राणिहृदयाकाशरूपाल्पस्थानत्वकथनात् । **तद्व्यपदेशात्** । तस्य जीवस्य तच्छ्रुतिलिङ्गादिना व्यपदेशात् । उक्तत्वाच्च । **नेति चेत्** ब्रह्मैव सर्वगतमित्युक्तं नेति **चेन्न** । कुतः तेषां विष्णावेवोपपत्तिरिति शेषः । न च वैयर्थ्यम् । **एवं निचाय्यत्वात्** । एवमर्भकौकस्त्वादिरूपेण विष्णोरेवोपास्यत्वात् । तथाच न वैयर्थ्यमिति भावः । श्रुतिलिङ्गादीनां ब्रह्मपरत्वेन न तद्विरोध इति भावः । व्याप्तस्य विष्णोः कथमल्पस्थानस्थितिरित्यत उक्तं **व्योमवच्चेति** । यथाऽऽकाशस्य व्याप्तस्यापि गृहाद्येकदेशावस्थितिः तद्वद् विष्णोरपीत्यर्थः ॥ ७ ॥

८. ॐ सम्भोगप्राप्तिरितिचेन्न वैशेष्यात् ॐ

यतो ब्रह्मणः व्योमवत् सर्वजीवशरीरस्थत्वे **सम्भोगप्राप्तिः** समानभोगप्राप्तिरित्यतो बाधकान्न ब्रह्म सर्वगतमिति **चेन्न** । कुतः **वैशेष्यात्** विष्णोः

---

१. 'एतमेव ब्रह्म इत्याचक्षते' (ऐ.आ.३.२.३.१२.)

२. **'अहमात्मा गुडाकेश** सर्वभूताशयस्थितः' (भ.गीता.१०.२०), 'गामाविश्य च भूतानि धारयाम्यहमोजसा' (१५.१३) ३.(ऐ.आ.३–२–२–१२)

सामर्थ्यविशेषवत्त्वादित्यर्थः । तथा च न तस्य जीवसमानभोगप्राप्तिरिति भावः ॥ ८ ॥

॥ अत्तृत्वाधिकरणम् ॥ २ ॥

९. ॐ अत्ता चराचरग्रहणात् ॐ

अत्ता 'सर्वं वा अत्ति'[१] इत्युक्तसर्वात्ता विष्णुरेव न त्वदितिः । कुतः? **चराचरग्रहणात्** चराचरस्य चेतनाचेतनात्मकप्रपञ्चस्य 'सर्वम्' इति श्रुतौ अद्यतयोक्तत्वादित्यर्थः ॥ १ ॥

१०. ॐ प्रकरणाच्च ॐ

'नैवेह किञ्चन' इति विष्णु**प्रकरणबलाच्च** विष्णुरेव अत्तेत्यर्थः ॥ २ ॥

॥ गुहाधिकरणम् ॥ ३ ॥

११. ॐ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॐ

तत्त्विति वचनविपरिणामेनानुवर्तते । **आत्मानौ** आदेयं मातीति व्युत्पत्त्या 'ऋतं पिबन्तौ'[२] इति श्रुतिस्थपिबच्छब्दोदितशुभकर्मफलभोक्तारौ आत्मान्तरात्माख्यविष्णुरूपे एव नतु जीवेश्वरौ । कुतः? **हि** यस्मात् तौ **गुहां प्रविष्टौ** हृदयगुहां प्रविष्टौ तस्मादित्यर्थः । हिशब्देन हृदयगुहास्थितत्वलिङ्गस्य 'यो वेद'[३] इति श्रुतिप्रसिद्धिं सूचयति । द्विरूपतया शरीरहृदयगुहास्थितत्वे प्रमाणमाह– **तद्दर्शनादिति** । तस्य हरेः द्विरूपतया शरीरहृदयगुहास्थितत्वस्य तस्य 'घर्मा समन्ता'[४] इति श्रुतावुक्तत्वादित्यर्थः ॥ १ ॥

---

१. 'स यद्यदेवासृजत तत्तदत्तुमध्रियत **सर्वं वा अत्ती**ति तददितेरदितित्वम्' (बृ.३.२.५)

२. '**ऋतं पिबन्तौ** सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे ।
छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिनाचिकेताः' (कठ.१३–१)

३. '**यो वेद** निहितं गुहायाम्' (तै.उ.२–१)

४. '**घर्मा समन्ता** त्रिवृतं व्यापतुस्तयोर्जुष्टिं मातरिश्वा जगाम' (ऋ.१०–११४–१)

१२. ॐ विशेषणाच्च ॐ

चः युक्तिसमुच्चये। 'यः सेतुः'[१] इति एकवचनेन **विशेषणात्** एक एव पाता स च सेतुत्वब्रह्मत्वादिना विशेषितत्वात् विष्णुरेव न जीव इत्यर्थः ॥ २ ॥

॥ अन्तराधिकरणम् ॥ ४ ॥

१३. ॐ अन्तर उपपत्तेः ॐ

'य एषोऽन्तरक्षिणि'[२] इति श्रुत्युक्तोऽन्तरः चक्षुरन्तःस्थितो विष्णुरेव न त्वग्निः। कुतः? **उपपत्तेः एतदमृतत्वब्रह्मशब्दादीनां** अन्तरे श्रवणात्। तेषां च विष्णावेवोपपत्तेरित्यर्थः ॥ १ ॥

१४. ॐ स्थानादिव्यपदेशाच्च ॐ

ब्रह्मस्थानभूताक्षिशक्तेः तदधिष्ठातृब्रह्मशक्तेश्च। **व्यपदेशात्** 'सर्पिर्वा उदकं वा सिञ्चति'[३] इत्युक्तत्वाच्चक्षुरन्तःस्थो विष्णुरेवेत्यर्थः ॥ २ ॥

१५. ॐ सुखविशिष्टाभिधानादेव च ॐ

चः समुच्चये। **सुखविशिष्टाभिधानात्**। 'कं ब्रह्म'[४] इत्यादि प्रकरणे विशिष्ट-सुखस्य पूर्णसुखस्याभिधानादेव चक्षुरन्तरो विष्णुरेव किमु 'खं ब्रह्म' इति पूर्णज्ञानादपीत्यर्थः ॥ ३ ॥

१६. ॐ श्रुतोपनिषत्कगत्यभिधानाच्च ॐ

श्रुतोपनिषदां श्रुतमतध्यातैतद्विद्यानां पुंसाम्। **केन** वायुना। कयोः कार्यपर-ब्रह्मणोः। **गतेः** प्राप्तेः। 'स एनान् ब्रह्म गमयति'[५] इति श्रुता**वभिधानाच्च** चक्षुरन्तरो विष्णुरेवेत्यर्थः ॥ ४ ॥

---

१. 'य: **सेतुरीजा**नानामक्षरं ब्रह्म यत्परम्' (कठ.१–३–२)
२. '**य एषोऽन्तरक्षिणि** पुरुषो दृश्यते' (छा.४.१५)
३. 'तद्यदस्मिन् **सर्पिर्वोदकं वा सिञ्चति** वर्त्मनी एव गच्छति' (छां.४–१५–१)
४. 'प्राणो ब्रह्म **कं ब्रह्म** खं ब्रह्म' (छां.४–१०) ५.(छां.४–१५)

१७. ॐ अनवस्थितेरसम्भवाच्च नेतरः ॐ

इतरः अग्निः । चक्षुरन्तरो **न** किन्तु विष्णुरेव । कुतः **अनवस्थितेः** जीवस्याग्नेर्जीवान्तरनियामकत्वे तस्यापि जीवत्वाविशेषात् तस्यापि नियामकान्तराभ्युपगमे तस्याप्येवमित्यन**वस्थानात्** । अग्न्यादिजीवस्य जीवान्तरनियामकत्वा**सम्भवाच्चे**त्यर्थः ॥ ५ ॥

॥ अन्तर्याम्यधिकरणम् ॥ ५ ॥

१८. ॐ अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॐ

'एष आत्माऽन्तर्यामी'[१] इति श्रुत्युक्तोऽ**न्तर्यामी** विष्णुरेव न प्रधानादिः । कुतः ? **अधिदैवादिषु** अधिदैवाध्यात्माधिभूतादिप्रकरणेषु । **तद्धर्मव्यपदेशात्** तस्मिन् अन्तर्यामिणि । तस्य 'यं पृथिवी न वेद'[१] इति श्रुतौ उक्तस्याविदितत्वादिब्रह्मधर्मस्य व्यपदेशाद् उक्तत्वादित्यर्थः ॥ १ ॥

१९. ॐ न च स्मार्तमतद्धर्माभिलापात् ॐ

चः समुच्चये । **स्मार्तं** कापिलस्मृत्युक्तम् । प्रधानं जीवश्च अन्तर्यामी **न** । कुतः? **अतद्धर्माभिलापात्** तद्धर्माणां प्रधानजीवधर्माणां त्रिगुणत्वसंसारित्वादीनाम् । अनभिलापात् अनुक्तत्वादित्यर्थः ॥ २ ॥

२०. ॐ शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॐ

चः नञोऽनुकर्षणार्थः । **हि** यस्मात् । **उभये** माध्यन्दिनाः काण्वाश्च 'आत्मनोऽन्तरः'[२], 'विज्ञानादन्तरः'[३] इति एवं जीवं अन्तर्यामिणः सकाशाद् भिन्नत्वेनाधीयते पठन्ति । तस्माच्छारीरो जीवश्च नान्तर्यामीत्यर्थः ॥ ३ ॥

---

१. 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः' (बृ.५–७–३)

२. 'य आत्मनि तिष्ठन्**नात्मनोऽन्तरो** यमात्मा न वेद यस्याऽत्मा शरीरं य आत्मानमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः' (बृ.माध्यन्दिनपाठः)

३. 'यो विज्ञाने तिष्ठन् **विज्ञानादन्तरो** यं विज्ञानं न वेद यस्य विज्ञानं शरीरम्' (बृ.५–७.२२)

॥ अदृश्यत्वाधिकरणम् ॥ ६ ॥

२१. ॐ अदृश्यत्वादिगुणको धर्मोक्तेः ॐ

अदृश्यत्वादिगुणकः 'यत्तदद्रेश्यम्'[१] इति श्रुत्युक्तादृश्यत्वादिधर्मविशिष्टाक्षरशब्दवाच्यो विष्णुरेव न प्रकृत्यादिः । कुतः? **धर्मोक्तेः** ऋगादिपरविद्याविषयत्वरूपविष्णुधर्मस्य 'यया'[२] इति श्रुत्युक्तत्वादित्यर्थः ॥ १ ॥

२२. ॐ विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॐ

चः समुच्चये । **इतरौ** प्रकृतिद्वयम् । विरिञ्चरुद्रौ च **नादृश्यत्वादिगुणकौ** । कुतः? **विशेषणभेदव्यपदेशाभ्याम्** । प्रतिज्ञाद्वये क्रमेणैकैकहेत्वन्वयः । सार्वज्ञादिविशेषणात् । 'तस्मादेतत्'[३] इति अदृश्यत्वादिगुणकाक्षराद् विरिञ्चरुद्रयोर्भेदोक्तेश्चेत्यर्थः ॥ २ ॥

२३. ॐ रूपोपन्यासाच्च ॐ

'यदा पश्यः पश्यते'[४] इति विष्ण्वसाधारणस्वर्णरूपप्रतिपादनाच्चादृश्यत्वादिगुणको विष्णुरेवेत्यर्थः ॥ ३ ॥

॥ वैश्वानराधिकरणम् ॥ ७ ॥

२४. ॐ वैश्वानरः साधारणशब्दविशेषात् ॐ

वैश्वानरः 'यस्त्वेतम्'[५] इत्यादि वाक्यगतवैश्वानरादिशब्दवाच्यो विष्णुरेव न त्वग्निः । कुतः? साधारणशब्दविशेषात् अग्निविष्ण्वोः साधारणस्य वैश्वा-

---

१. '**यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्।**
नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः' (मुं.१.–१.६)

२. 'अथ परा **यया** तदक्षरमधिगम्यते' (मुं.१–१–५)

३. '**तस्मादेतद्** ब्रह्म नाम रूपमन्नं च जायते' (मुं.१–१–९)

४. '**यदा पश्यः** पश्यते रुग्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्' (मुं.३.१.३)

५. '**यस्त्वेतमेवं** प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते' (छां.५.१८.१)

नरशब्दस्य 'आत्मानं वैश्वानरं' इति श्रुतावात्मशब्देन विशेषितत्वादित्यर्थः ॥ १ ॥

२५. ॐ स्मर्यमाणमनुमानं स्यादिति ॐ

इति **स्मर्यमाणं** 'अहं वैश्वानरो भूत्वा'[1] इति स्मृत्युक्तं विष्णोर्वैश्वानरत्वं, **अनुमानं** वैश्वानरविद्यायाः गीतोक्तभगवत्परत्वस्यानुमापकं स्याद् भवेदित्यर्थः ॥ २ ॥

२६. ॐ शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात् पुरुषविधमपि चैनमधीयते ॐ

युक्तिसमुच्चये चशब्दः । **शब्दादिभ्यः** अग्निशब्दहोमाधिकरणत्वलिङ्गादित्यर्थः । **अन्तःप्रतिष्ठानात्** पाचकत्वेन शरीरान्तरावस्थानाच्च वैश्वानरो न विष्णुः, किन्तु अग्निरेवेति **चेन्न**। कुतः? तथा **दृष्ट्युपदेशात्** तथा अग्न्यादिनामलिङ्गकर्मवत्त्वेन दृष्ट्युपदेशाद् उपासनोपदेशादित्यर्थः । तथाच अग्न्यादिश्रुतिलिङ्गानां विष्णौ सवकाशत्वान्न तद्विरोध इति भावः । किञ्चात्रोक्तात्मत्वब्रह्मत्वादीनां अग्न्यादा**वसम्भवाच्च** वैश्वानरो विष्णुरेव । **अपिच** यतः छन्दोगाः एनं वैश्वानरं **पुरुषविधं** पुरुषसूक्तप्रतिपाद्यनारायणसमानगुणकमे**वाधीयते**ऽभिदधति । अतोऽपि विष्णुरेवेत्यर्थः । चशब्देन पुरुषसूक्तस्य विष्णुपरत्वं बहुप्रमाणसिद्धमिति सूचितम् ॥ ३ ॥

२७. ॐ अत एव न देवता भूतं च ॐ

देवता अग्न्यादिरूपा । **भूतं** तदभिमन्यमानतेजोभूतं च वैश्वानरशब्दवाच्यं **न** । कुतः? अत एव निरवकाशात्मशब्दादिहेतोरेवेत्यर्थः ॥ ४ ॥

२८. ॐ साक्षादप्यविरोधं जैमिनिः ॐ

---

१. 'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुविधम्' (भ.गीता.१५–१४)

॥ अदृश्यत्वाधिकरणम् ॥ ६ ॥

२१. ॐ अदृश्यत्वादिगुणको धर्मोक्तेः ॐ

अदृश्यत्वादिगुणकः 'यत्तदद्रेश्यम्'[१] इति श्रुत्युक्तादृश्यत्वादिधर्मविशिष्टाक्षरशब्दवाच्यो विष्णुरेव न प्रकृत्यादिः । कुतः? **धर्मोक्तेः** ऋगादिपरविद्याविषयत्वरूपविष्णुधर्मस्य 'यया'[२] इति श्रुत्युक्तत्वादित्यर्थः ॥ १ ॥

२२. ॐ विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॐ

चः समुच्चये । **इतरौ** प्रकृतिद्वयम् । विरिञ्चरुद्रौ च **नादृश्यत्वादिगुणकौ** । कुतः? **विशेषणभेदव्यपदेशाभ्याम्** । प्रतिज्ञाद्वये क्रमेणैकैकहेत्वन्वयः । सार्वज्ञादिविशेषणात् । 'तस्मादेतत्'[३] इति अदृश्यत्वादिगुणकाक्षराद् विरिञ्चरुद्रयोर्भेदोक्तेश्चेत्यर्थः ॥ २ ॥

२३. ॐ रूपोपन्यासाच्च ॐ

'यदा पश्यः पश्यते'[४] इति विष्ण्वसाधारणस्वर्णरूपप्रतिपादनाच्चादृश्यत्वादिगुणको विष्णुरेवेत्यर्थः ॥ ३ ॥

॥ वैश्वानराधिकरणम् ॥ ७ ॥

२४. ॐ वैश्वानरः साधारणशब्दविशेषात् ॐ

वैश्वानरः 'यस्त्वेतम्'[५] इत्यादि वाक्यगतवैश्वानरादिशब्दवाच्यो विष्णुरेव न त्वग्निः । कुतः? साधारणशब्दविशेषात् अग्राविष्ण्वोः साधारणस्य वैश्वा-

---

१. '**यत्तदद्रेश्यम**ग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्।
नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः' (मुं.१.–१.६)

२. 'अथ परा **यया** तदक्षरमधिगम्यते' (मुं.१–१–५)

३. '**तस्मादेतद्** ब्रह्म नाम रूपमन्नं च जायते' (मुं.१–१–९)

४. '**यदा पश्यः** पश्यते रुग्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्' (मुं.३.१.३)

५. '**यस्त्वेतमेवं** प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते' (छां.५.१८.१)

नरशब्दस्य 'आत्मानं वैश्वानरं' इति श्रुतावात्मशब्देन विशेषितत्वादित्यर्थः ॥ १ ॥

२५. ॐ स्मर्यमाणमनुमानं स्यादिति ॐ

इति **स्मर्यमाणं** 'अहं वैश्वानरो भूत्वा'[1] इति स्मृत्युक्तं विष्णोर्वैश्वानरत्वं, **अनुमानं** वैश्वानरविद्यायाः गीतोक्तभगवत्परत्वस्यानुमापकं स्याद् भवेदित्यर्थः ॥ २ ॥

२६. ॐ शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात् पुरुषविधमपि चैनमधीयते ॐ

युक्तिसमुच्चये चशब्दः । **शब्दादिभ्यः** अग्निशब्दहोमाधिकरणत्वलिङ्गादित्यर्थः । **अन्तःप्रतिष्ठानात्** पाचकत्वेन शरीरान्तरावस्थानाच्च वैश्वानरो न विष्णुः, किन्तु अग्निरेवेति **चेन्न** । कुतः? तथा **दृष्ट्युपदेशात्** तथा अग्न्यादिनामलिङ्गकर्मवत्त्वेन दृष्ट्युपदेशाद् उपासनोपदेशादित्यर्थः । तथाच अग्न्यादिश्रुतिलिङ्गानां विष्णौ सवकाशत्वान्न तद्विरोध इति भावः । किञ्चात्रोक्तात्मत्वब्रह्मत्वादीनां अग्न्यादा**वसम्भवाच्च** वैश्वानरो विष्णुरेव । **अपिच** यतः छन्दोगाः एनं वैश्वानरं **पुरुषविधं** पुरुषसूक्तप्रतिपाद्यनारायणसमानगुणकमे**वाधीयते**ऽभिदधति । अतोऽपि विष्णुरेवेत्यर्थः । चशब्देन पुरुषसूक्तस्य विष्णुपरत्वं बहुप्रमाणसिद्धमिति सूचितम् ॥ ३ ॥

२७. ॐ अत एव न देवता भूतं च ॐ

देवता अग्न्यादिरूपा । **भूतं** तदभिमन्यमानतेजोभूतं च वैश्वानरशब्दवाच्यं **न** । कुतः? अत एव निरवकाशात्मशब्दादिहेतोरेवेत्यर्थः ॥ ४ ॥

२८. ॐ साक्षादप्यविरोधं जैमिनिः ॐ

---

१. 'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुविधग्' (भ.गीता.१५–१४)

साक्षात् मुख्यवृत्त्या । अपि ब्रह्मणोऽग्न्यादिशब्दवाच्यत्वेऽपि अविरोधं अज्ञानादिनिमित्तान्तरेण अग्न्यादौ तत्तच्छब्दविरोधाभावं जैमिनिराचार्यो वक्तीत्यर्थः ॥ ५ ॥

२९. ॐ अभिव्यक्तेरित्याश्मरथ्यः ॐ

अभिव्यक्तेः अग्न्यादिषु ब्रह्मोपास्तौ कृतायां तेषु ब्रह्मणोऽ**भिव्यक्तेः** । तन्निमित्तोऽग्न्यादिसूक्तनियम इति **आश्मरथ्या**चार्यो मन्यत इत्यर्थः ॥ ६ ॥

३०. ॐ अनुस्मृतेर्बादरिः ॐ

अनुस्मृतेः तत्तत्सूक्ताद्युपासकैरग्न्यादिष्वेव ब्रह्मणोऽ**नुस्मृतेः** अनुसन्धाना-द्धेतोरग्न्यादिसूक्तव्यवस्थेति **बादरि**र्वक्तीत्यर्थः ॥ ७ ॥

३१. ॐ सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॐ

हि यस्मात् । 'तं यथा'[१] इति हि प्रसिद्धा श्रुतिः **तथा दर्शयति** यथा जैमिनि-मतं तथा प्रतिपादयति । तस्मा**ज्जैमिनिः** स्वोक्त्यनुकूलश्रुत्यनुसारेण । **सम्पत्तेः** अग्न्यादिसूक्तोपासकानामग्न्यादिप्राप्तिहेतोस्तद्विवक्षया सूक्तादिनियम **इत्या**हेत्यर्थः ॥ ८ ॥

३२. ॐ आमनन्ति चैनमस्मिन् ॐ

चः शङ्कानिवर्तकः । यस्मात् **एनं** विष्णुम् । अग्न्यादा**वामनन्ति** तत्स्थतया 'योऽग्नौ तिष्ठन्'[२] इत्याद्याः श्रुतयः प्रतिपादयन्ति । तस्मात् कथमग्न्यादिषु विष्णूपास्त्या अग्न्यादिप्राप्तिर्भवतीति शङ्का निवृत्ता । कुतः? अग्न्यादिपदेन तत्स्थभगवत्प्राप्तेरेवाभिप्रेतत्वादित्यर्थः ॥ ९ ॥

इति श्रीजगन्नाथयतिकृतायां सूत्रदीपिकायां
प्रथमाध्यायस्य द्वितीयः पादः ॥ १ ॥ २ ॥

---

१. 'तं **यथा** यथोपासते तदेव भवति' २. (बृ.५–७–५)

प्रथमाध्यायस्य तृतीयः पादः

॥ द्युभ्वाधिकरणम् ॥ १ ॥

१. ॐ द्युभ्वाद्यायतनं स्वशब्दात् ॐ

द्युभ्वाद्यायतनं 'यस्मिन्'[१] इति वाक्योक्तस्वर्गभूम्यादिसर्वाश्रयो विष्णुरेव न त्वन्यः । कुतः? **स्वशब्दात्** स्वेतिशब्दः स्वशब्दः स्वशब्दगृहीतब्रह्म-वाचकात्मशब्दादित्यर्थः ॥ १ ॥

२. ॐ मुक्तोपसृप्यव्यपदेशात् ॐ

द्युभ्वाद्यायतनं न विष्णोरन्यः किन्तु विष्णुरेव । कुतः? **मुक्तोपसृप्यव्य-देशात्** । भावप्रधानोऽयम् । द्युभ्वाद्यायतनस्य वस्तुनो '**अमृतस्यैष सेतुः**' इति मुक्तप्राप्यत्ववचनात् तस्य चान्यत्रायोगादित्यर्थः ॥ २ ॥

३. ॐ नानुमानमतच्छब्दात् ॐ

अनुमानं आनुमानमिति वा । अनुमानसिद्धप्रामाण्ययुतपाशुपताद्यागमैः सर्वाश्रयतया कल्पितं रुद्रप्रधानादिकं द्युभ्वाद्ययतनं **न** । कुतः? **अतच्छब्दात्** भस्मधरोग्रत्वादितच्छ्रुतिलिङ्गाद्यभावादित्यर्थः ॥ ३ ॥

४. ॐ प्राणभृच्च ॐ

जीवोऽप्यत एव न द्युभ्वाद्यायतनमित्यर्थः ॥ ४ ॥

५. ॐ भेदव्यपदेशात् ॐ

---

१. '**यस्मिन् द्यौः** पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः । तमेवैकं जानथ आत्मानम्'

(मुं.२–२–५)

'अन्यमीशम्'[१] इति जीवेशयोर्भेदोक्तेः न तयोरैक्यमित्यर्थः ॥ ५ ॥

६. ॐ प्रकरणात् ॐ

'अनश्नन्नन्यो'[२] इत्यादेर्विष्णु**प्रकरणत्वात्** । अत्र जीवस्य विष्णुभेद एवोच्यते । नत्वन्यस्माद् भेद इत्यर्थः ॥ ६ ॥

७. ॐ स्थित्यदनाभ्याञ्च ॐ

ईशजीवयोः 'द्वा सुपर्णा–'[२] इत्यादिवाक्योक्तं कर्मफलानुपजीवन**स्थिति-तदुपजीवन**रूपहेतुभ्यां न च तयोरैक्यं वाच्यमित्यर्थः ॥ ७ ॥

॥ भूमाधिकरणम् ॥ २ ॥

८. ॐ भूमा सम्प्रसादादध्युपदेशात् ॐ

भूमा 'यो वै भूमा'[३] इति श्रुतौ भूमशब्दोक्तपूर्णो विष्णुरेव । कुतः? **सम्प्रसादात्** भूम्नस्तत्सुखमित्यनेन सम्प्रसादशब्दितपूर्णसुखरूपत्वाभिधानात् । किञ्च **अध्युपदेशात्** नामादेरपि तदुपरि नामादिदेवतोत्तमत्वेन भूम्नोऽभिधानाच्चेत्यर्थः ॥ १ ॥

९. ॐ धर्मोपपत्तेश्च ॐ

'स एवाधस्तात्'[४] इत्यादिना भूम्नि सर्वगतत्वादि**धर्म**श्रवणात् । तस्य च विष्णोरे**वोपपत्तेः** विष्णुरेव भूमेत्यर्थः ॥ २ ॥

॥ अक्षराधिकरणम् ॥ ३ ॥

१०. ॐ अक्षरमम्बरान्तधृतेः ॐ

---

१. 'जुष्टं यदा पश्यत्य**न्यमीशम**स्य महिमानम्' (मु.३.१.२)

२. '**द्वा सुपर्णा** सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्य**नश्नन्नन्यो** अभिचाकशीति' (मुं.३–१–१)

३. '**यो वै भूमा** तत्सुखम्' (छां.७–२३)

४. '**स एवाधस्तात्स** उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेदं सर्वम्' (छां.७.२५.१)

अक्षरं 'तद्धा एतत्' इत्यक्षरशब्दवाच्यं ब्रह्मैव न चित्प्रकृतिः । कुतः? **अम्बरान्तधृतेः** अस्मिन्नक्षरे 'एतस्मिन् खल्वक्षरे'[१] इत्याकाशान्त-पदार्थधारकत्वश्रवणादित्यर्थः ॥ १ ॥

११. ॐ सा च प्रशासनात् ॐ

चो यतः । **सा** अम्बरान्तधृतिः । **प्रशासनात्** विष्णोराज्ञामात्रादेव भवतीति 'एतस्य वा'[२] इति श्रुतावुक्ता । अतोऽपि ब्रह्मैवाक्षरशब्दवाच्यम् । न चेतन-प्रकृतिरित्यर्थः ॥ २ ॥

१२. ॐ अन्यभावव्यावृत्तेश्च ॐ

अन्यभावानां विष्ण्वन्यवस्तुस्वभावानां स्थूलत्वादीनां 'अस्थूलमनणु'[३] इति श्रुतावक्षरे **व्यावृत्तेर**भावस्य कथनाच्च ब्रह्मैवाक्षरमित्यर्थः ॥ ३ ॥

॥ सदधिकरणम् ॥ ४ ॥

१३. ॐ ईक्षतिकर्मव्यपदेशात् सः ॐ

'सदेव' इत्यादि'[४] प्रकरणस्थितसदादिशब्दवाच्यः विष्णुरेव न प्रधानम् । कुतः? **ईक्षतिकर्मव्यपदेशात्** 'तदैक्षत'[५] इति चेतननिष्ठैक्षतेतिशब्दोपलक्षित-दर्शनाख्यक्रियाभिधानादित्यर्थः ॥ १ ॥

---

१. '**एतस्मिन् खल्वक्षरे** गार्ग्याकाश ओतश्च प्रोतश्च' (बृ.५–८–११)

२. '**एतस्य वा अक्षरस्य** प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' (बृ.५–८–९)

३. '**अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमरसम-गन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणमसुखममात्रमनन्तरमबाह्यं न तदश्नाति किञ्चन न तदश्नाति कश्चन' (बृ.५–८–८)

४. '**सदेव** सोम्येदमग्र आसीत्' (छां.६–२–१)

५. (छां.६–२–३)

॥ दहराधिकरणम् ॥ ५ ॥

१४. ॐ दहर उत्तरेभ्यः ॐ

दहरे 'दहरं पुण्डरीकं वेश्म'[१] इति वाक्योक्तहृत्पद्मस्थाल्पाकाशे स्थितो विष्णुरेव न तु जीवादिः । कुतः? **उत्तरेभ्यः** 'य आत्माऽपहतपाप्मा'[२] इत्याद्युत्तरवाक्योक्तनिर्गतपाप्मत्वादिधर्मेभ्य इत्यर्थः ॥ १ ॥

१५. ॐ गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गञ्च ॐ

गतिशब्दाभ्यां 'अहरहर्गच्छन्त्य एतं ब्रह्मलोकम्'[३] इति वाक्ये श्रुताभ्यां सुप्त-प्राप्यत्वब्रह्मशब्दाभ्यां हेतुभ्यां दहरपद्मस्थं ब्रह्मैव । किञ्च यतः 'अरश्च'[४] इति श्रुतौ **तथा** सुप्तप्राप्यत्ववत् । **हि** विष्णुनिष्ठत्वेन प्रसिद्धं लिङ्गं अरण्याख्य-सुधासमुद्राश्रयलोकवत्त्वरूपज्ञापकम् । हृत्पद्मस्थे दृष्टमुक्तम् । अतोऽपि दहरपद्मस्थो विष्णुरेवेत्यर्थः ॥ २ ॥

१६. ॐ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॐ

धृतेः 'स एष सेतुर्विधृतिः'[५] इति हृत्पद्मस्थस्य सर्वाधारत्वश्रवणाच्च विष्णुरेव हृत्पद्मस्थः । किञ्च छान्दोग्ये हृत्पद्मस्थनिष्ठतयोक्तस्य **महिम्नः** सर्वेश्वरत्वादे**रस्मिन्** 'एष सर्वेश्वरः' इति वाजसनेयकवाक्ये । उपलब्धेः । श्रवणात् । तत्समाख्यानादपि विष्णुरेव हृत्पद्मस्थः । ननु समाख्यानादपि कुतो विष्णुरेवेत्यत उक्तम् । अस्येत्यादि । **अस्य** विष्णुमहिम्नः । अस्मिन् वाजसनेयकवाक्ये श्रवणादेवेत्यर्थः ॥ ३ ॥

---

१. 'अथ यदिदमस्मिन् ब्रह्मपुरे **दहरं पुण्डरीकं** वेश्म दहरोऽस्मिन्नन्तर आकाशः....किं तदत्र विद्यते' (छां.८.१.२)

२. '**य आत्माऽपहतपाप्मा** विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः सत्यकामस्सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छां.८–३)

३. 'अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति' (छां. ८–३–१)

४. '**अरश्च ह वै** ण्यश्चार्णवौ ब्रह्मलोके' (छां. ८–५–३) ५. (छां. ८–४)

१७. ॐ प्रसिद्धेश्च ॐ

'दहरं विपाप्मम्'[१] इति श्रुतौ विष्णोः हृत्पद्मस्थत्व**प्रसिद्धेश्च** स एव हृत्पद्मस्थ इत्यर्थः ॥ ४ ॥

१८. ॐ इतरपरामर्शात् स इति चेन्नासम्भवात् ॐ

इतरपरामर्शात् 'स्वेन रूपेणाभिनिष्पद्यते'[२] इत्युक्तस्य जीवस्य हृत्पद्मस्थात्मतया 'एष आत्मा'[३] इत्येतच्छब्देन **परामर्शात्** ग्रहणात्। जीव एव हृत्पद्मस्थ **इति चेन्न** । कुतः? **असम्भवात्** हृत्पद्मस्थनिष्ठतया श्रुतानामपहतपाप्मत्वादिगुणानां जीवे स्वातन्त्र्येणासम्भवादित्यर्थः ॥ ५ ॥

१९. ॐ उत्तराच्चेदाविर्भूतस्वरूपस्तु ॐ

तुशब्द एवार्थे। नेति शेषः। तथाच **उत्तरात्** 'स तत्र पर्येति'[४] इत्युत्तरवाक्यात्। जीवस्य सत्यकामत्वादिप्रतीतेः। तत एव विशोकत्वादेः सम्भवात्। स एव हृत्पद्मस्थ इति **चेन्न**। कुतः? यतस्तद्वाक्ये 'स्वेन' इत्युत्तरवाक्यबलात् **आविर्भूतस्वरूपो** मुक्त एव प्रतिपाद्यः। न जीवमात्रम्। मुक्तश्च न स्वतोऽपहतपाप्मत्वादिगुणकः। अतो न तस्यापि हृत्पद्मस्थत्वमित्यर्थः ॥ ६ ॥

२०. ॐ अन्यार्थश्च परामर्शः ॐ

चः एवार्थे। **परामर्शः** 'एष आत्मा' इति वाक्यगतैतच्छब्दः **अन्यार्थः**। 'परञ्ज्योतिः' इत्युक्तपरमात्मार्थ एव न जीवार्थ इत्यर्थः ॥ ७ ॥

---

१. '**दहरं विपाप्मं** परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम्' (महाना.१०–७)

२. 'परं ज्योतिरुपसम्पद्य **स्वेन रूपेणाभिनिष्पद्यते**' (छां. ८–१२–३)

३. '**एष आत्मेति** होवाच' (छां. ४–१५–१)

४. '**स तत्र पर्येति** जक्षन् क्रीडन् रममाणः' (छां. ८–१२–३)

२१. ॐ अल्पश्रुतेरिति चेत्तदुक्तम् ॐ

अल्पश्रुतेः 'दहरः'[१] इत्यल्पस्थानस्थितत्वोक्तेः । जीव एव हृत्पद्मस्थ **इति चेत्** । नेति शेषः । कुतः? यतस्**तदुक्तं** तत्तु अल्पस्थानस्थितत्वं उक्तं निचाय्यत्वादेवमित्यत्र व्याप्तस्यापि विष्णोः उपासनार्थमुच्यत इत्युक्तं 'आत्माऽन्तर्हृदये' इति श्रुत्युक्तं च अत इत्यर्थः ॥ ८ ॥

॥ अनुकृत्यधिकरणम् ॥ ६ ॥

२२. ॐ अनुकृतेस्तस्य च ॐ

चः समुच्चये । **तस्ये**ति श्रुतिप्रतीकग्रहणम् । **अनुकृतिर**नुक्रिया । तथाच 'कथं नु तद्विजानीयाम्'[२] इति ज्ञानार्थं प्रार्थितत्वरूपानुकूल्येन गृह्यमाणं ब्रह्मैव । कुतः? **अनुकृतेः** 'तमेव भान्तमनुभाति सर्वम्'[३] इति वाक्यशेषे सूर्यादीनां भगवत्क्रियानुसारिप्रकाशाख्यक्रियाकर्तृत्वश्रवणात् । 'तस्य भासा सर्वमिदं विभाति'[४] इति जगतः परमात्मप्रभाप्रकाश्यत्वश्रुतेश्चेत्यर्थः ॥ १ ॥

२३. ॐ अपि स्मर्यते ॐ

न केवलं हेतुकृतानुकृत्यादेर्विष्णुधर्मत्वं श्रूयते किन्तु कृष्णादिभिः 'यदादित्यगतं तेजो'[५] इत्यादि स्मृत्यादिषूच्यत इत्यर्थः ॥ २ ॥

॥ वामनाधिकरणम् ॥ ७ ॥

२४. ॐ शब्दादेव प्रमितः ॐ

---

१. '**दहरो**ऽस्मिन्नन्तर आकाशस्तस्मिन् यदन्तः' (छां.८–१–१)

२. (कठ.२–२–१४) ३. (कठ.२–२–१५)

४. (कठ.२–२–१५)

५. '**यदादित्यगतं तेजो** जगद्भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्' (भ.गीता.१५.१२)

विष्णुरेव 'ईशानो भूतभव्यस्य'[१] इति ईशानशब्दवाच्यत्वेन प्रमितः। तत्वतो निश्चितः। न तु वायुः। कुतः? **शब्दादेव** 'मध्ये वामनम्'[२] इति निरवकाश-वामनश्रुतेरेवेत्यर्थः ॥ १ ॥

२५. ॐ हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॐ

तुशब्द एवार्थे। अपिशब्दार्थे च। तथाच सर्वगतस्यापि विष्णोः अङ्गुष्ठ-मात्रत्वोक्तिः **हृद्यपेक्षया** अङ्गुष्ठपरिमितहृद्याकाशापेक्षयैव। न तावता विष्णोः परिच्छिन्नत्वं ज्ञेयमित्यर्थः। ननु पश्वादीनामङ्गुष्ठाभावात् कथं तन्मात्रत्ववचनं सर्वाधिकारिकमित्यत उक्तम्। **मनुष्याधिकारत्वादिति**। तथा चैतद् विद्योपासनस्य मनुष्याधिकारिकत्वात्। तान् प्रत्येतद्विद्याप्रवृत्तिसम्भवात्। पश्वादीनामङ्गुष्ठाभावेऽपि न दोष इति भावः ॥

॥ देवताधिकरणम् ॥ ८ ॥

२६. ॐ तदुपर्यपि बादरायणः सम्भवात् ॐ

तदुपर्यपि देवत्वयोग्यमनुष्याणां न केवलं मनुष्यत्वदशायां किन्तु देवादित्व-प्राप्त्यनन्तरमपि वेदविद्याधिकारोऽस्ति। कुतः? **सम्भवात्** तेषामप्यधिकार-प्रयोजकविशिष्टबुध्यादेर्योगादिति **बादरायणो** भगवान् वक्तीत्यर्थः ॥ १ ॥

२७. ॐ विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॐ

देवादीनां सादित्वे **कर्मणि** पूर्वकल्पे प्रवृत्तयज्ञादिकर्मणि विषये। **विरोधः** उद्देश्याभावनिमित्तवैयर्थ्याख्यविरोधः। स्यादिति **चेन्न**। कुतः **अनेकप्रतिपत्तेः** अनेकेषां योग्यमनुष्याणां देवतापदप्राप्तेर्दर्शनात्। 'यत्र पूर्वे'[३] इति श्रुता-वुक्तत्वादित्यर्थः ॥ २ ॥

---

१. (कठ.२–१–१२)

२. 'ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति। **मध्ये वामनमासीनं** विश्वे देवा उपासते' (कठ.२.२.३)

३. 'ते ह नाकं महिमानस्सचन्ते। **यत्र पूर्वे** साध्यास्सन्ति देवाः' (तै.आ.३–१२)

२८. ॐ शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् ॐ

विरोध इति वर्तते । देवानामाद्यन्तवत्त्वे **शब्दे** वेदे अप्रामाण्याख्यविरोधः स्यान्नित्यत्वेन श्रुतिसिद्धवेदवाचाम् । कदाचिद् वाच्यहीनत्वादिति भाव **इति चेन्न** । अतः 'धाता यथा' इति वेदवाक्यात् । तथा **प्रत्यक्षानुमानाभ्याम्** । महतां प्रत्यक्षात् । देवानां प्रवाहतः उत्पत्तिसाधकलिङ्गाच्च । प्रभवात् प्रतिकल्पम् । नियमेन प्रभवशब्दितोत्पत्त्यवगमाच्च उक्तं युक्तमिति भावः ॥३॥

२९. ॐ अत एव च नित्यत्वम् ॐ

अत एव पूर्वपक्ष्युक्तवेदनित्यत्वादेव तदन्यथाऽनुपपत्त्याऽपि तद्वाच्यदेवप्रवाहस्य नित्यत्वं सिध्यतीत्यर्थः ॥ ४ ॥

३०. ॐ समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॐ

अवृत्तावपि पूर्वकल्पे मुक्तानां देवानां पुनः स्वपदेषु असत्त्वेऽपि । अविरोधः तत्प्रतिपादकैकविधवेदाप्रामाण्याख्यविरोधो नास्ति । कुतः? **समाननामरूपत्वात्** एतत्कल्पोत्पन्नानामपि देवानां प्राचीनतुल्यनामरूपत्वात् । तथा च प्रतिपाद्यस्याप्येकविधत्वात् न तद्बोधकवेदाप्रामाण्यमिति भावः । एकविधत्वमेव कुत इत्यत उक्तम् । **दर्शनात् स्मृतेश्चेति** । 'यथा पूर्वम्'[१] इति श्रुतेः । अनादिनिधनेति स्मृतेश्चेत्यर्थः ॥ ५ ॥

३१. ॐ मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॐ

मध्वादिषु 'असौ वा आदित्यो देवमधु'[२] इत्याद्युक्तमध्वादिविद्यासु । **अनधिकारं** देवानामधिकाराभावम् । **जैमिनिरा**चार्यो मन्यते । कुतः? **असम्भवात्** तेषामर्थित्वतत्पदयोग्यत्वाद्ययोगादित्यर्थः ॥ ६ ॥

---

१. 'सूर्याचन्द्रमसौ धाता **यथापूर्वम**कल्पयत्' (महाना.५–७)

२. (छां.३–१–१)

३२. ॐ ज्योतिषि भावाच्च ॐ

ज्योतिषि देवानां ज्ञाने भावात् सर्ववस्तूनां विषयतयाऽन्तर्भूतत्वात्। सिद्ध-ज्ञानानां देवानां न ज्ञानार्थिता युज्यत इति न मोक्षविद्यास्वप्यधिकार इत्यर्थः ॥ ७ ॥

३३. ॐ भावं तु बादरायणोऽस्ति हि ॐ

हि यस्मात्। देवानामप्यस्ति विद्यासाध्यापूर्वप्रकाशविशेषो मोक्षफले अतिशय-श्चास्ति। तस्माद्भावं देवानामधिकारसद्भावं **बादरायणः** मन्यत इत्यर्थः। जैमिनिमतं तु देवानां प्राप्तज्ञानफलार्थमनधिकाराभिप्रायमित्यवधेयम् ॥ ८ ॥

॥ अपशूद्राधिकरणम् ॥ ९ ॥

३४. ॐ शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि ॐ

अस्य पौत्रायणाख्यस्य राज्ञः **तदनादरश्रवणात्** हंसकृतस्य 'कम्वर एनम्'[१] इत्यनादरस्य श्रवणान्निमित्तात्। शुक् शोकः। तथाऽपि कुतः शोकः? इत्यत उक्तम्। सूच्यते हीति। हि यस्मात्। 'स ह सञ्जिहान एव'[२] इत्युत्तरवाक्येन सूच्यते तथा ज्ञायते। तस्माच्छोकः अस्मादेव निमित्तात्। राजा रैकेण ऋषिणा शूद्रेति सम्बोधितः। न तु वर्णावरत्वाभिप्रायेणेत्यर्थः। तथाच नैतज्ज्ञापकबलेन शूद्रस्य वेदविद्याधिकारो मन्तव्य इति भावः ॥ १ ॥

३५. ॐ क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॐ

चः लिङ्गान्तरसमुच्चये। **उत्तरत्र** हि 'अश्वतरीरथः'[३] इत्युत्तरवाक्ये। श्रुतेनेति शेषः। **चैत्ररथेन** चित्रशब्दादश्वतरीयुक्तरथसम्बन्धित्वरूपेण **लिङ्गात्**। लिङ्गेन च ज्ञापकेन चास्य **क्षत्रियत्वावगतेश्च**। क्षत्रियत्वज्ञानात्। न पौत्रायणः शूद्र इत्यर्थः ॥ २ ॥

---

१. 'कम्वर एनमेतत्सन्तम्' (छां.४–१–३)

२. 'स ह सञ्जिहान एव क्षत्तारमुवाच' (छां.४–१–५)

३. (छां. ४–२–२)

२८. ॐ शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् ॐ

विरोध इति वर्तते । देवानामाद्यन्तवत्त्वे **शब्दे** वेदे अप्रामाण्याख्यविरोधः स्यान्नित्यत्वेन श्रुतिसिद्धवेदवाचाम् । कदाचिद् वाच्यहीनत्वादिति भाव **इति चेन्न** । अतः 'धाता यथा' इति वेदवाक्यात् । तथा **प्रत्यक्षानुमानाभ्याम्** । महतां प्रत्यक्षात् । देवानां प्रवाहतः उत्पत्तिसाधकलिङ्गाच्च । प्रभवात् प्रतिकल्पम् । नियमेन प्रभवशब्दितोत्पत्त्यवगमाच्च उक्तं युक्तमिति भावः ॥३॥

२९. ॐ अत एव च नित्यत्वम् ॐ

अत एव पूर्वपक्ष्युक्तवेदनित्यत्वादेव तदन्यथाऽनुपपत्त्याऽपि तद्वाच्यदेवप्रवाहस्य नित्यत्वं सिध्यतीत्यर्थः ॥ ४ ॥

३०. ॐ समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॐ

अवृत्तावपि पूर्वकल्पे मुक्तानां देवानां पुनः स्वपदेषु असत्त्वेऽपि । अविरोधः तत्प्रतिपादकैकविधवेदाप्रामाण्याख्यविरोधो नास्ति । कुतः? **समाननामरूपत्वात्** एतत्कल्पोत्पन्नानामपि देवानां प्राचीनतुल्यनामरूपत्वात् । तथा च प्रतिपाद्यस्याप्येकविधत्वात् न तद्बोधकवेदाप्रामाण्यमिति भावः । एकविधत्वमेव कुत इत्यत उक्तम् । **दर्शनात् स्मृतेश्चेति** । 'यथा पूर्वम्'[१] इति श्रुतेः । अनादिनिधनेति स्मृतेश्चेत्यर्थः ॥ ५ ॥

३१. ॐ मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॐ

मध्वादिषु 'असौ वा आदित्यो देवमधु'[२] इत्याद्युक्तमध्वादिविद्यासु । **अनधिकारं** देवानामधिकाराभावम् । **जैमिनिरा**चार्यो मन्यते । कुतः? **असम्भवात्** तेषामर्थित्वतत्पदयोग्यत्वाद्ययोगादित्यर्थः ॥ ६ ॥

---

१. 'सूर्याचन्द्रमसौ धाता **यथापूर्वम**कल्पयत्' (महाना.५–७)

२. (छां.३–१–१)

३२. ॐ ज्योतिषि भावाच्च ॐ

ज्योतिषि देवानां ज्ञाने भावात् सर्ववस्तूनां विषयतयाऽन्तर्भूतत्वात्। सिद्ध-ज्ञानानां देवानां न ज्ञानार्थिता युज्यत इति न मोक्षविद्यास्वप्यधिकार इत्यर्थः ॥ ७ ॥

३३. ॐ भावं तु बादरायणोऽस्ति हि ॐ

हि यस्मात्। देवानामप्यस्ति विद्यासाध्यापूर्वप्रकाशविशेषो मोक्षफले अतिशय-श्चास्ति। तस्माद्भावं देवानामधिकारसद्भावं **बादरायणः** मन्यत इत्यर्थः। जैमिनिमतं तु देवानां प्राप्तज्ञानफलार्थमनधिकाराभिप्रायमित्यवधेयम् ॥ ८ ॥

॥ अपशूद्राधिकरणम् ॥ ९ ॥

३४. ॐ शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि ॐ

अस्य पौत्रायणाख्यस्य राज्ञः **तदनादरश्रवणात्** हंसकृतस्य 'कम्वर एनम्'[१] इत्यनादरस्य श्रवणान्निमित्तात्। शुक् शोकः। तथाऽपि कुतः शोकः? इत्यत उक्तम्। सूच्यते हीति। हि यस्मात्। 'स ह सञ्जिहान एव'[२] इत्युत्तरवाक्येन सूच्यते तथा ज्ञायते। तस्माच्छोकः अस्मादेव निमित्तात्। राजा रैक्केण ऋषिणा शूद्रेति सम्बोधितः। न तु वर्णावरत्वाभिप्रायेणेत्यर्थः। तथाच नैतज्ज्ञापकबलेन शूद्रस्य वेदविद्याधिकारो मन्तव्य इति भावः ॥ १ ॥

३५. ॐ क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॐ

चः लिङ्गान्तरसमुच्चये। **उत्तरत्र** हि 'अश्वतरीरथः'[३] इत्युत्तरवाक्ये। श्रुतेनेति शेषः। **चैत्ररथेन** चित्रशब्दादश्वतरीयुक्तरथसम्बन्धित्वरूपेण **लिङ्गात्**। लिङ्गेन च ज्ञापकेन चास्य **क्षत्रियत्वावगतेश्च**। क्षत्रियत्वज्ञानात्। न पौत्रायणः शूद्र इत्यर्थः ॥ २ ॥

---

१. **'कम्वर एनमेतत्सन्तम्'** (छां.४–१–३)

२. **'स ह सञ्जिहान एव क्षत्तारमुवाच'** (छां.४–१–५)

३. (छां. ४–२–२)

३६. ॐ संस्कारपरामर्शात्तदभावाभिलापाच्च ॐ

साध्यसमुच्चये **च**शब्दः । **संस्कारपरामर्शात्** 'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत' इत्येतच्छब्देन उपनयनाख्यसंस्कारयुक्तस्य वचनात् । **तदभावाभिलापात्** शूद्रस्य 'नाग्निर्न यज्ञः'[१] इति (पैङ्गिश्रुतौ) संस्काराभावाभिधानात् न तस्य वेदविद्याधिकार इत्यर्थः ॥ ३ ॥

३७. ॐ तदभावनिर्धारणे च प्रवृत्तेः ॐ

चोऽवधारणे । **तदभावनिर्धारणे** सत्यकामाख्यपुरुषस्य शूद्रत्वाभावनिश्चये सत्येव । प्रवृत्तेर्गौतमस्य तदुपनयने प्रवृत्तत्वात् । अस्माज्ज्ञापकान्न शूद्रस्य संस्कारो युज्यत इत्यर्थः ॥ ४ ॥

३८. ॐ श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च ॐ

श्रवणाध्ययनार्थप्रतिषेधात् शूद्रस्य वेदश्रवणतदध्ययनतदर्थावधारणानां 'श्रवणे त्रपुजतुभ्यां श्रोत्रपरिपूर्णम्'[२] इति प्रतिषिद्धत्वात् । स्मृतेः 'नाग्निर्न यज्ञः शूद्रस्य'[३] इति निषेधकस्मृतेश्च न तस्य वेदविद्याधिकार इत्यर्थः ॥ ५ ॥

॥ कम्पनाधिकरणम् ॥ १० ॥

३९. ॐ कम्पनात् ॐ

'महद्भयं वज्रम्'[४] इति वज्रशब्दवाच्यो विष्णुरेव नत्विन्द्रायुधम् । कुतः? **कम्पनात्** 'सर्वमेजति'[४] इति कम्पनशब्दितसर्वचेष्टकत्वलिङ्गश्रवणादित्यर्थः ॥ १ ॥

---

१. '**नाग्निर्न यज्ञ**र्न क्रिया न संस्कारो न व्रतानि शूद्रस्य'

२. '–अध्ययने जिह्वाच्छेदः । अर्थावधारणे हृदयविदारणम्' (गौतमधर्म. १२–४–७)

३. '**नाग्निर्न यज्ञः शूद्रस्य** तथैवाध्ययनं कुतः ।
केवलैव तु शुश्रूषा त्रिवर्णानां विधीयते ॥

४. 'यदिदं किञ्च जगत् सर्वं प्राण एजति निःसृतम् ।
महद् भयं वज्रमुद्यतं य एतद् विदुरमृतास्ते भवन्ति' (कठ.२.३.२)

॥ ज्योतिरधिकरणम् ॥ १ ॥

४०. ॐ ज्योतिर्दर्शनात् ॐ

'योऽयमन्तर्ज्योतिः'[१] इति **ज्योतिः**शब्दवाच्यो विष्णुरेव न जीवः । कुतः? **दर्शनात्** 'विष्णुरेव ज्योतिः'[२] इति श्रुतेरित्यर्थः ॥ १ ॥

॥ आकाशाधिकरणम् ॥ १२ ॥

४१. ॐ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॐ

'आकाशो ह वै नाम' इति श्रुत्युक्ता**काशो** विष्णुरेव । न त्वव्याकृताकाशः । कुतः? **अर्थान्तरत्वादिव्यपदेशात्** । 'ते यदन्तरा'[३] इति वाक्ये विष्णोर्नामरूपराहित्याख्यविलक्षणार्थत्वस्य आदिशब्दगृहीतब्रह्मत्वामृतत्वयोश्च उक्तत्वादित्यर्थः ॥ १ ॥

॥ सुषुप्त्यधिकरणम् ॥ १३ ॥

४२. ॐ सुषुप्त्युत्क्रान्त्योर्भेदेन ॐ

'स यत्तत्र किञ्चित् पश्यति'[४] इति श्रुत्युक्तस्वप्नादिद्रष्टा परमात्मैव । न जीवः । कुतः 'असङ्गो ह्ययं पुरुषः' इत्युक्तासङ्गत्वलिङ्गादिति हेतुर्बहिरेवाध्याहार्यः । नन्वीश्वराभेदेन जीवेऽप्यसङ्गत्वोक्तिः सम्भवतीत्यत उक्तम् । सुषुप्तीत्यादि । तथा च **सुषुप्त्युत्क्रान्त्योः** 'प्राज्ञेनात्मना सम्परिष्वक्तः'[५] इति

---

१. 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' (बृ.६–३–७)

२. '**विष्णुरेव ज्योतिर्विष्णुरेवात्मा विष्णुरेव ब्रह्म विष्णुरेव बलं विष्णुरेव यशो विष्णुरेवानन्दः**' (चतुर्वेदशिखा.)

३. '**ते यदन्तरा ब्रह्म**' (छां.८–१४–१)

४. '**स यत्तत्र किञ्चित् पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुषः**' (बृ.६–३–१५)

५. '**प्राज्ञेनात्मना सम्परिष्वक्तो** न बाह्यं किञ्चन वेद नान्तरम्' (बृ.६–३–२१)

'प्राज्ञेनात्मनाऽन्वारूढः'[१] इति च सुषुप्त्युत्क्रान्तिप्रकरणयोः । **भेदेन** जीवेशयोर्भिन्नत्वेनोक्तेः । न तयोरैक्यमित्यर्थः ॥ १ ॥

॥ ब्राह्मणाधिकरणम् ॥ १४ ॥

४३. ॐ पत्यादिशब्देभ्यः ॐ

'एष नित्यो महिमा ब्राह्मणस्य'[२] इति श्रुत्युक्तब्राह्मणो विष्णुरेव । न विरिञ्चः । कुतः? **पत्यादिशब्देभ्यः** सर्वस्याधिपतिरित्यादिसर्वाधिपत्यादिवाचिश्रुतिभ्यः[३] इत्यर्थः ॥ १ ॥

इति श्रीजगन्नाथयतिकृतायां सूत्रदीपिकायां
प्रथमाध्यायस्य तृतीयः पादः ॥ १ ॥ ३ ॥

॥ ॐ ॥

---

१. '**प्राज्ञेनात्मनाऽन्वारूढः** उत्सर्जयाति' (बृ.६–३–३५) २. (बृ.६–४–२२)

३. '**सर्वस्याधिपतिः** सर्वस्येशानः स वा एष नेति नेति' (बृ. ६–४–२१), 'उतामृतत्वस्येशानः। यदन्नेनातिरोहति' (तै.आ.३.१२), 'सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि' (ऋ.१.१६४.३६), 'स योऽतोऽश्रुतः' (ऐ.आ.३.२.४)

प्रथमाध्यायस्य चतुर्थः पादः

॥ आनुमानिकाधिकरणम् ॥ १ ॥

१. ॐ आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्त-गृहीतेर्दर्शयति च ॐ

अपिरेवार्थे। चः स्मृतिसमुच्चये। तथाच यतः **आनुमानिकं** साङ्ख्यानुमानकल्पितं प्रधानाद्येव । **एकेषां** शाखिनां शाखासु स्थितैः 'अव्यक्तात् पुरुषः'[१] इत्यादिवाक्यगताव्यक्तादिशब्दैरुच्यते । अतो न विष्णोः सर्वशब्दवाच्यत्वं युज्यत **इति चेन्न** । यतः विष्णुरेवाव्यक्तादिशब्दवाच्यः । न प्रधानादिः । तत्कुतः? यतः 'अव्यक्तम्'[२] इति श्रुतिः 'अव्यक्तोऽक्षरः'[३] इति स्मृतिश्च । **दर्शयति** विष्णोरेवाव्यक्तादिशब्दवाच्यत्वं प्रतिपादयति। अत इत्यर्थः। कथं तर्ह्यन्यत्राव्यक्तादिशब्दव्यवहार इत्यत उक्तम्। शरीररूपकेत्यादि। कप्रत्ययः कुत्सने। तथा च **शरीररूपकविन्यस्तगृहीतेः** यथा शरीरं पुरुषतन्त्रम्, तथा परमात्मतन्त्रत्वेन निमित्तेन शरीरसमे कुत्सितत्वात् । वस्तुतः अशरीरे प्रधानादौ । विन्यस्तस्य स्थितस्य परमात्मन एवाव्यक्तादिशब्दैः गृहीतेः ग्रहणात् । तथाच परमात्मसम्बन्धादेवान्यत्र प्रकृत्यादावव्यक्तादि-शब्दवाच्यत्वव्यवहार इत्यर्थः ॥ १ ॥

---

१. (कठ.१–३–११)

२. '**अव्यक्तमचलं शान्तं** निष्कलं निष्क्रियं परम्।
यो वेद हरिमात्मानं स भयादनुमुच्यते' (पिप्पलादशाखा.)

३. (भ.गी.८–२१)

२. ॐ सूक्ष्मं तु तदर्हत्वात् ॐ

यतः **सूक्ष्मं** तु सूक्ष्ममेवाव्यक्तशब्दवाच्यम्। कुतः? **तदर्हत्वात्** तस्य सूक्ष्मस्य अव्यक्तशब्दप्रवृत्तिनिमित्तयोग्यत्वात्। तत्र च सूक्ष्मत्वं विष्णोरेव। अतस्तस्यैवाव्यक्तशब्दवाच्यत्वमित्यर्थः ॥ २ ॥

३. ॐ तदधीनत्वादर्थवत् ॐ

दर्शयति चेत्यत्रत्यश्चशब्दोऽनुवर्तते। परमात्मन्येव परावरदुःखिबद्धत्वादिवाचिशब्दजातम्। **अर्थवत्** प्रवृत्तिनिमित्तरूपार्थवत्। न व्यर्थम्। कुतः? **तदधीनत्वात्** तेषां प्रधानादिगतपरावरत्वादिधर्माणां भगवदधीनत्वात्। तथा चान्यगतप्रवृत्तिनिमित्तस्वामित्वेन निमित्तेनापि भगवति परावरादिशब्दप्रयोगो युक्त एवेत्यर्थः ॥ ३ ॥

४. ॐ ज्ञेयत्वावचनाच्च ॐ

'तमेवैकं जानथ'[१] इति विष्णोरेव मोक्षार्थं **ज्ञेयत्ववचनात्**। अन्येषां तदवचनात्। प्रत्युत विमुञ्चथेति हेयत्वावचनात्। अत्रत्याव्यक्तादिशब्दैर्विष्णुरेव वाच्य इत्यर्थः ॥ ४ ॥

५. ॐ वदतीति चेन्न प्राज्ञो हि ॐ

ननु अनाद्यनन्तमिति काठकवाक्यम्। **वदति** प्रधानं प्रतिपाद्यते। इति तस्यापि ज्ञेयत्वमस्तीति चेन्न। कुतः? **हि** यतः। **प्राज्ञः** प्राज्ञशब्दितः परमात्मैव तत्र प्रतिपाद्यते न प्रधानम्। अतो न तस्य ज्ञेयत्वं मन्तव्यमित्यर्थः ॥ ५ ॥

६. ॐ प्रकरणात् ॐ

वैष्णवरूपाणां त्रयाणां **प्रकरणबलाच्च** प्राज्ञ एवात्र प्रतिपाद्य इत्यर्थः ॥६॥

---

१. (मुं.२–२–५)

७. ॐ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॐ

युक्तिसमुच्चये चो यत इत्यर्थे च। एवशब्दः प्रकारत्रैविध्यपरामर्शकः। तथाच यतः एवं **त्रयाणामेव** पितृसौमनस्यस्वर्ग्याग्निपरमात्मरूपाणां त्रयाणामेव। तद्विषयक एव प्रश्नः नचिकेतऋषिणा यमं प्रति कृतः। तेषामे**वोपन्यासः** प्रतिवचनं चात्र प्रकरणे दृश्यते। अतो नात्र प्रधानं प्रतिपाद्यमित्यर्थः ॥ ७ ॥

८. ॐ महद्वच्च ॐ

चः दार्ष्टान्तिकसमुच्चये। 'महान्तं विभुमात्मानम्'[१] इत्यादिवाक्यगतमहच्छब्दस्य यथा विष्णुपरत्वमेव न महत्तत्वपरत्वं तद्वदव्यक्तादिशब्दस्यापीत्यर्थः ॥८॥

९. ॐ चमसवदविशेषात् ॐ

चमसवत् यथा यज्ञपात्रे प्रसिद्धस्यापि चमसशब्दस्य 'इदं तच्छिरः'[२] इति श्रुतिबलेन शिरोवाचकता तद्वदव्यक्तादिशब्दस्य प्रधानादौ प्रसिद्धत्वेऽपि विष्णुवाचकत्वमेव। कुतः? 'नामानि' इति श्रुतेः। ननु तथापि कुतो विष्णुवाचकत्वम्? इत्यत उक्तम्– **अविशेषादि**ति। 'नामानि सर्वाणि' इति श्रुतेः 'इदं' इति श्रुत्या विशेषाभावादित्यर्थः ॥ ९ ॥

॥ ज्योतिरुपक्रमाधिकरणम् ॥ २ ॥

१०. ॐ ज्योतिरुपक्रमात्तु तथाह्यधीयत एके ॐ

तुशब्द एवार्थे। **ज्योतिः** 'ज्योतिषा यजेत' इत्यादिवाक्योक्तज्योतिरादिशब्दवाच्यं ब्रह्मैव न ज्योतिष्टोमादि। कुतः? **हि** यस्मा**देके** शाखिनः। **उपक्रमात्** 'एष इमम्' इत्युपक्रम्य **तथा** सर्वशब्दाभिधेयत्वेन हरिमेव 'ता वा एताः'[३] इत्यत्राधीयते पठन्ति तस्मादित्यर्थः ॥ १ ॥

---

१. (कठ.१–२–२२) २. 'इदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः' (बृ.४–२–३)

३. **'ता वा एताः** सर्वा ऋचः सर्वे वेदास्सर्वे घोषाः एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यात्' (ऐ.आ.२–२–२)

११. ॐ कल्पनोपदेशाच्च मध्वादिवदविरोधः ॐ

च एवार्थे । समुच्चये वा । तथा च **मध्वादिवत्** यथा मधुविद्यादिगतमध्वादि-शब्दानां विष्णुवाचित्वेऽप्यविरोधः न लौकिकक्षौद्रादिवाचकशब्दाभावेन तदभावाख्यविरोधः । तथा परमात्मनः सर्वशब्दवाच्यत्वेऽभ्युपगतेऽपि न कर्माद्यभावविरोधः । कुतः? शब्दानामन्यत्र योगरूढिवृत्ती अभ्युपगम्यैवेश्वरे महायोगवृत्त्यङ्गीकारादित्यध्याहारः । तदपि कुतः? **कल्पनोपदेशात्** 'प्राण ऋचः'इति सर्वशब्दवाच्यत्वस्य विष्णोः कल्पनाशब्दितोपासनार्थमुक्तत्वात् । तस्य च सर्वशब्दार्थमुख्यगुणवत्त्वरूपमहायोगवृत्तिं विनाऽयोगादित्यर्थः ॥२॥

॥ न सङ्ख्योपसङ्ग्रहाधिकरणम् ॥ ३ ॥

१२. ॐ न सङ्ख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च ॐ

सङ्ख्योपसङ्ग्रहात् 'यस्मिन् पञ्च पञ्चजना'[१] इति बहुत्वसङ्ख्यावचनात् । अपि यस्मिन्नित्याधाराधेयभावनिर्देशादपि । विष्णोः पञ्चजनादिशब्दवाच्यत्वे विरोधो **नास्ति** । कुतः **नानाभावात्** भगवतः बहुरूपाणां सत्त्वात् । **अतिरेकाच्च** यस्मिन्नित्युक्ताधाररूपस्य पञ्चजना इत्युक्ताधेयरूपस्य सविशेषाभिन्नत्वा-च्चेत्यर्थः ॥ १ ॥

१३. ॐ प्राणादयो वाक्यशेषात् ॐ

भगवद्रूपत्वेनोक्ताः पञ्चजनास्तु **प्राणादेः प्राणादयः** द्वितीयानिर्दिष्ट-घ्राणचक्षुःश्रोत्रान्नमनोभिधाः ज्ञेयाः । कुतः? **वाक्यशेषात्** ते च भगवद्रूप-विशेषा एव । कुतः? विष्णोरन्यत्रासम्भावितप्राणप्राणप्रदत्वादिप्रतिपादकं 'प्राणस्य प्राणम्'[२] इत्यादि वाक्यशेषादित्यर्थः ॥ २ ॥

---

१. **'यस्मिन् पञ्च पञ्चजना** आकाशश्च प्रतिष्ठितः' (बृ.६–४–११७)

२. **'प्राणस्य प्राण**मुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मनः'
(छां.६–४–१८)

१४. ॐ ज्योतिषैकेषामसत्यन्ने ॐ

एकेषां कण्वादीनां शाखायाम्। अन्ने अन्नाख्यभगवद्रूपे। असति अनुक्तेऽपि। ज्योतिषा तदाख्यभगवद्रूपेण पञ्चत्वसङ्ख्यापूर्तिर्ज्ञातव्येत्यर्थः ॥ ३ ॥

॥ आकाशाधिकरणम् ॥ ४ ॥

१५. ॐ कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॐ

'आत्मनः आकाशः सम्भूतः आकाशाद् वायुः'[१] इत्यादौ कार्यत्वे सति कारणत्वरूपावान्तरकारणवाचकाकाशादिशब्दैराकाशादिषु स्थितो विष्णुरेव। कारणत्वेन चशब्दात् कार्यत्वेन चोच्यते न भूतम्। कुतः **यथाव्यपदिष्टत्वोक्तेः** 'स योऽतोऽश्रुतः'[२] इत्यादौ विष्णुर्यथा यादृशेनाविदितत्वादिरूपेण व्यपदिष्टः उक्तः। तद्रूपयुक्तस्यैवाकाशादिषु 'यमाकाशो न वेद'[३] इत्यादिवाक्येनोक्तत्वादित्यर्थः ॥ १ ॥

॥ समाकर्षाधिकरणम् ॥ ५ ॥

१६. ॐ समाकर्षात् ॐ

स्वतो मुख्यवृत्त्या परमात्मवाचिनः शब्दान्। ततः समाकृष्यान्यत्र वाचकत्वशक्त्यङ्गीकारात्। नान्यत्र व्यवहारलोपप्रसङ्ग इत्यर्थः ॥ १ ॥

१७. ॐ जगद्वाचित्वात् ॐ

लोकव्यवहाराच्छब्दानां **जगद्वाचित्वज्ञानात्** तेषां तत्र प्रसिद्धिर्युक्तेत्यर्थः ॥ २ ॥

१८. ॐ जीवमुख्यप्राणलिङ्गादिति चेत्तद्व्याख्यातम् ॐ

---

१. (तै.२–१–२)
२. (ऐ.आ.३–२–४)
३. (बृ.५–७–१२)

'अस्य यदैकां शाखां जीवो जहाति'[१] इति 'वायुना हि लोका नेनीयन्ते' इति वाक्ये च। **जीवमुख्यप्राणलिङ्गात्** जीवमुख्यप्राणलिङ्गयोः श्रवणात्। तयोरपि तत्तच्छब्दमुख्यवाच्यता स्यादिति चेन्न। कुतः? यस्मात् **तद्वाक्य**जातं तत्तदन्तर्यामिपरतया व्याकृतं तस्मादित्यर्थः ॥ ३ ॥

१९. ॐ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॐ

तुशब्द एवार्थे। एतेन विष्णोरन्यत्र शब्दान् समाकृष्य कर्मादिप्रतिपादनमपि युक्तमेव। कुतः? यस्मात् **अन्यार्थं** परमात्मज्ञानार्थमेव। तत्कुत इति चेत्। **प्रश्नव्याख्यानाभ्यां** कस्मिन्निति शौनकप्रश्नात् 'द्वे विद्ये'[२] इति आङ्गिरसो वचनात् तथा कस्मिन्विति शौनकप्रश्नात् तथा कथं न्विति श्वेतकेतुप्रश्नात् 'यथा सौम्य–'[३] इत्युद्दालकवचनाच्च इति **जैमिनि**राचार्यो मन्यते। किञ्च **एके** शाखिनः स्पष्टं 'यस्तं न वेद'[४] इत्यन्यज्ञानस्य परमात्मज्ञानार्थतां पठन्ति तस्मादपीत्यर्थः ॥ ४ ॥

२० ॐ वाक्यान्वयात् ॐ

ब्रह्मणि वाक्यसमन्वयमपेक्ष्य वेदेन कर्मादिकमपि प्रतिपादनीयमित्यर्थः ॥५॥

२१. ॐ प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॐ

वेदेन कर्मादिप्रतिपादनम्। यतः **प्रतिज्ञासिद्धेः**। लिङ्गं ज्ञानमेव मोक्षहेतुः नान्यदित्येवं रूपायाः 'नान्यः पन्थाः'[५] इति प्रतिज्ञातार्थसिद्धेः साधकम्। अतस्तदुपयोगित्वेन तत्प्रतिपादनं युक्तमित्या**श्मरथ्याचार्यो** मन्यत इत्यर्थः ॥ ६ ॥

---

१. '**अस्य यदैकां शाखां जीवो जहाति** अथ सा शुष्यति' (छां.६–११–२)

२. 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति। तस्मै स होवाच **द्वे विद्ये वेदितव्ये**' (मुं.१–१२–४)

३. 'कथं नु भगवस्स आदेशो भवतीति। **यथा सोम्यै**केन मृत्पिण्डेन' (छां.६.१.३.४)

४. '**यस्तं न वेद** किमृचा करिष्यति' (ऋ.१–१६४–३९)

५. '**नान्यः पन्थाः** अयनाय विद्यते' (तै.आ.३–१–१२–७)

२२. ॐ उत्क्रमिष्यत एवं भावादित्यौडुलोमिः ॐ

उत्क्रमिष्यतः ज्ञानान्मोक्षमिच्छतोऽधिकारिणः । एवं ज्ञानसाधनतया । **भावात्** कर्मादेरप्यनुष्ठेयत्वान्मोक्षार्थज्ञानसाधनत्वेन वेदेन कर्मादिप्रतिपादनं युक्तमेवेति **औडुलोमिरा**चार्यो मन्यत इत्यर्थः ॥ ७ ॥

२३. ॐ अवस्थितेरिति काशकृत्स्नः ॐ

सर्वाधारे भगवति कर्मादीनां **अवस्थितेः** अवस्थानात् । भगवतः कर्माद्याधारत्वज्ञानायाधेयभूतकर्मादिस्वरूपं वेदेन प्रतिपाद्यत **इति काशकृत्स्ना**चार्यो मन्यत इत्यर्थः । अनेकाधिकारिकत्वान्मतानां न विरोध इति ध्येयम् ॥८॥

॥ प्रकृत्यधिकरणम् ॥ ६ ॥

२४. ॐ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॐ

ईश्वरः न केवलं पुल्लिङ्गाभिधेयः किन्तु **प्रकृतिः** । सैषा प्रकृतिरित्याद्युक्तप्रकृत्यादिस्त्रीलिङ्गशब्दवाच्यश्च भवति । कुतः? एवं सत्येव **प्रतिज्ञादृष्टान्तानुपरोधात्** हन्तैतमिति प्रतिज्ञायाः यथेति नदीसमुद्रदृष्टान्तस्य चानुपरोधात् अविरोधात् । अन्यथा तद्विरोधः स्यादित्यर्थः ॥ १ ॥

२५. ॐ अभिध्योपदेशाच्च ॐ

अभिध्यायाः ईश्वरेच्छायाः । **उपदेशात्** 'मायान्तु'[१] इति श्रुतौ प्रकृतिशब्दवाच्यत्वोक्तेश्च इच्छाभिन्नेश्वरस्यापि तच्छब्दवाच्यत्वाच्चेत्यर्थः ॥ २ ॥

२६. ॐ साक्षाच्चोभयाम्नानात् ॐ

---

१. '**मायां** तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' (श्वे. ४–१०)

चः अवधारणे । **साक्षात्** द्वारमन्तरेणैव । **उभयाम्नानात्** 'एषस्त्येष पुरुषः'[१] इति वाक्येन प्रकृतिपुरुषोभयशब्दवाच्यत्वाभिधानात् ईश्वरस्य प्रकृत्यादि-शब्दवाच्यत्वमावश्यकमित्यर्थः ॥ ३ ॥

२७. ॐ आत्मकृतेः परिणामात् ॐ

प्रकृति**परिणामं** विधाय तत्प्रेरणाय । **आत्मकृतेः** स्वस्य बहुधाकरणात् प्रकृति-शब्दवाच्यो विष्णुरेवेत्यर्थः ॥ ४ ॥

२८. ॐ योनिश्च हि गीयते ॐ

हि यस्मात् । ईश्वरः 'यद्भूतयोनिम्'[२] इति श्रुत्या **योनिः** स्वदेहादेवापत्योत्पादकश्च **गीयते** प्रतिपाद्यते । तस्मात् प्रकृत्यादिस्त्रीलिङ्गशब्दवाच्य इत्यर्थः ॥ ५ ॥

॥ एतेन सर्वे व्याख्याताधिकरणम् ॥ ७ ॥

२९. ॐ एतेन सर्वे व्याख्याता व्याख्याताः ॐ

एतेन पूर्वोक्तहेतुनैव । **सर्वे** शून्यादिशब्दाः । **व्याख्याताः** मुख्यतो भगवद्वाचिन एवेत्यर्थः । एतदध्यायादिमारभ्यान्तमुक्तस्यार्थस्य इत्थमेवेत्यवधारणार्थ-मध्यायान्ते द्विरुक्तिः ॥ १ ॥

इति श्रीजगन्नाथयतिकृतायां सूत्रदीपिकायां
प्रथमाध्यायस्य चतुर्थः पादः ॥ १ ॥ ४ ॥

॥ इति प्रथमाध्यायः समाप्तः ॥

—०—

---

१. '**एषस्त्येष पुरुष** एष प्रकृतिरेष आत्मैष ब्रह्मैष लोक एष आलोको योऽसौ हरिरादिरनादिरनन्तोऽ-न्तः परमः पराद् विश्वरूपः' (पैङ्गिश्रुतिः)

२. '**यद्भूतयोनिं** परिपश्यन्ति धीराः' (मुं.१.१.६)

परिशिष्टम् – १

॥ ब्रह्मसूत्रानुक्रमणिका ॥

सं.	सूत्राणि	सू.सं.	पा.	अधि.	पृ.सं.
		॥ अ ॥			
१.	अत एव च नित्यत्वम्	२९	३	८	४४०
२.	अत एव न देवता भूतं च	२७	२	७	३१०
३.	अत एव प्राणः	२३	१	९	१६३
४.	अत्ता चराचरग्रहणात्	०९	२	२	२२३
५.	अथातो ब्रह्मजिज्ञासा	०१	१	१	१९
६.	अदृश्यत्वादिगुणको धर्मोक्तेः	२१	२	६	२८२
७.	अनवस्थितेरसम्भवाच्च नेतरः	१७	२	४	२६५
८.	अनुकृतेस्तस्य च	२२	३	६	३९८
९.	अनुपपत्तेस्तु न शारीरः	०३	२	१	२०९
१०.	अनुस्मृतेर्बादरिः	३०	२	७	३१४
११.	अन्यभावव्यावृत्तेश्च	१२	३	३	३५५
१२.	अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके	१९	४	५	५४९
१३.	अन्यार्थश्च परामर्शः	२०	३	५	३९१
१४.	अन्तर उपपत्तेः	१३	२	४	२५१
१५.	अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्	१८	२	५	२७१
१६.	अन्तस्तद्धर्मोपदेशात्	२०	१	७	१५२
१७.	अपि स्मर्यते	२३	३	६	४०५
१८.	अभिध्योपदेशाच्च	२५	४	६	५६९
१९.	अभिव्यक्तेरित्याश्मरथ्यः	२९	२	७	३१३
२०.	अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च	०७	२	१	२१४

सं	सूत्राणि	सू.सं.	पा.	अधि.	पृ.सं.
२१.	अल्पश्रुतेरिति चेत् तदुक्तम्	२१	३	५	३९३
२२.	अवस्थितेरिति काशकृत्स्नः	२३	४	५	५६३
२३.	अस्मिन्नस्य च तद्योगं शास्ति	१९	१	६	१४८
२४.	अक्षरमम्बरान्तधृतेः	१०	३	३	३४९
	॥ आ ॥				
२५.	आकाशस्तल्लिङ्गात्	२२	१	८	१५९
२६.	आकाशोऽर्थान्तरत्वादिव्यपदेशात्	४१	३	१२	४८४
२७.	आत्मकृतेः परिणामात्	२७	४	६	५७४
२८.	आनन्दमयोऽभ्यासात्	१२	१	६	१०८
२९.	आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च	०१	४	१	४९७
३०.	आमनन्ति चैनमस्मिन्	३२	२	७	३१७
	॥ इ ॥				
३१.	इतरपरामर्शात् स इति चेन्नासम्भवात्	१८	३	५	३८५
	॥ ई ॥				
३२.	ईक्षतिकर्मव्यपदेशात् सः	१३	३	४	३६२
३३.	ईक्षतेर्नाशब्दम्	०५	१	५	८६
	॥ उ ॥				
३४.	उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः	२२	४	५	५६२
३५.	उत्तराच्चेदाविर्भूतस्वरूपस्तु	१९	३	५	३८७
३६.	उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्य-विरोधात्	२७	१	११	१८१

सं. सूत्राणि	सू.सं.	पा.	अधि.	पृ.सं.
॥ ए ॥				
३७. एतेन सर्वे व्याख्याता व्याख्याताः	२९	४	७	५८३
॥ क ॥				
३८.कम्पनात्	३९	३	१०	४७५
३९.कर्मकर्तृव्यपदेशाच्च	०४	२	०१	२१०
४०.कल्पनोपदेशाच्च मध्वादिवदविरोधः	११	४	०२	५२९
४१.कामाच्च नानुमानापेक्षा	१८	१	०६	१४५
४२.कारणत्वेन चाऽकाशादिषु यथाव्यपदिष्टोक्तेः	१५	४	०४	५३९
४३.क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्	३५	३	०९	४५९
॥ ग ॥				
४४. गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च	१५	३	०५	३७५
४५. गतिसामान्यात्	१०	१	०५	१०३
४६. गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्	११	२	०३	२३२
४७. गौणश्चेन्नाऽत्मशब्दात्	०६	१	०५	९१
॥ च ॥				
४८. चमसवदविशेषात्	०९	४	०१	५२२
॥ छ ॥				
४९. छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात् तथा हि दर्शनम्	२५	१	११	१७०
॥ ज ॥				
५०. जगद्वाचित्वात्	१७	४	०५	५४६

सं.	सूत्राणि	सू.सं.	पा.	अधि.	पृ.सं.
५१.	जन्माद्यस्य यतः	०२	१	२	६१
५२.	जीवमुख्यप्राणलिङ्गादिति चेत् तद् व्याख्यातम्	१८	४	५	५४७
५३.	जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्	३१	१	१२	१९४
५४.	ज्ञेयत्वावचनाच्च	०४	४	०१	५१५
५५.	ज्योतिर्दर्शनात्	४०	३	११	४८०
५६.	ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके	१०	४	०२	५२७
५७.	ज्योतिश्चरणाभिधानात्	२४	१	१०	१६८
५८.	ज्योतिषि भावाच्च	३२	३	०८	४४७
५९.	ज्योतिषैकेषामसत्यन्ने	१४	४	०३	५३७
	॥ त ॥				
६०.	तत्तु समन्वयात्	०४	१	०४	७८
६१.	तदधीनत्वादर्थवत्	०३	४	०१	५१०
६२.	तदभावनिर्धारणे च प्रवृत्तेः	३७	३	०९	४६८
६३.	तदुपर्यपि बादरायणः सम्भवात्	२६	३	०८	४२५
६४.	तद्धेतुव्यपदेशाच्च	१४	१	०६	१२३
६५.	तन्निष्ठस्य मोक्षोपदेशात्	०७	१	०५	९४
६६.	त्रयाणामेव चैवमुपन्यासः प्रश्नश्च	०७	४	०१	५१९
	॥ द ॥				
६७.	दहर उत्तरेभ्यः	१४	३	०५	३७१
६८.	द्युभ्वाद्यायतनं स्वशब्दात्	०१	३	०१	३२२

सं. सूत्राणि	सू.सं.	पा.	अधि.	पृ.सं.
॥ ध ॥				
६९. धर्मोपपत्तेश्च	०९	३	०२	३४४
७०. धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः	१६	३	०५	३७९
॥ न ॥				
७१. न च स्मार्तमतद्धर्माभिलापात्	१९	२	०५	२७३
७२. न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन्	२९	१	१२	१८९
७३. न सङ्ख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च	१२	४	०३	५३२
७४. नाऽनुमानमतच्छब्दात्	०३	३	०१	३२६
७५. नेतरोऽनुपपत्तेः	१६	१	०६	१३१
॥ प ॥				
७६. पत्यादिशब्देभ्यः	४३	३	१४	४९२
७७. प्रकरणाच्च	१०	२	०२	२२५
७८. प्रकरणात्	०६	३	०१	३३७
७९. प्रकरणात्	०६	४	०१	५१८
८०. प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्	२४	४	०६	५६६
८१. प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः	२१	४	०५	५६०
८२. प्रसिद्धेश्च	१७	३	०५	३८३
८३. प्राणभृच्च	०४	३	०१	३३४
८४. प्राणस्तथाऽनुगमात्	२८	१	१२	१८५
८५. प्राणादयो वाक्यशेषात्	१३	४	०३	५३५

सं.	सूत्राणि	सू.सं.	पा.	अधि.	पृ.सं.
	॥ भ ॥				
८६.	भावं तु बादरायणोऽस्ति हि	३३	३	०८	४५०
८७.	भूतादिपादव्यपदेशोपपत्तेश्चैवम्	२६	१	११	१७६
८८.	भूमा सम्प्रसादादध्युपदेशात्	०८	३	०२	३४१
८९.	भेदव्यपदेशात्	०५	३	०१	३३६
९०.	भेदव्यपदेशाच्च	१७	१	०६	१३२
९१.	भेदव्यपदेशाच्चान्यः	२१	१	०७	१५६
	॥ म ॥				
९२.	मध्वादिष्वसम्भवादनधिकारं जैमिनिः	३१	३	०८	४४५
९३.	महद्वच्च	०८	४	०१	५२१
९४.	मान्त्रवर्णिकमेव च गीयते	१५	१	०६	१२४
९५.	मुक्तोपसृप्यव्यपदेशात्	०२	३	०१	३२४
	॥ य ॥				
९६.	योनिश्च हि गीयते	२८	४	०६	५७८
	॥ र ॥				
९७.	रूपोपन्यासाच्च	२३	२	०६	२९०
	॥ व ॥				
९८.	वदतीति चेन्न प्राज्ञो हि	०५	४	०१	५१६
९९.	वाक्यान्वयात्	२०	४	०५	५५७
१००.	विकारशब्दान्नेति चेन्न प्राचुर्यात्	१३	१	०६	११७

सं.	सूत्राणि	सू.सं.	पा.	अधि.	पृ.सं.
१०१.	विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्	२७	३	०८	४२९
१०३.	विवक्षितगुणोपपत्तेश्च	०२	२	०१	२०६
१०४.	विशेषणभेदव्यपदेशाभ्यां च नेतरौ	२२	२	०६	२८७
१०५.	विशेषणाच्च	१२	२	०३	२३९
१०६.	वैश्वानरः साधारणशब्दविशेषात्	२४	२	०७	२९५
	॥ श ॥				
१०७.	शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्	२८	३	०८	४३२
१०८.	शब्दविशेषात्	०५	२	०१	२११
१०९.	शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात् पुरुषविधमपि चैनमधीयते	२६	२	०७	२९७
११०.	शब्दादेव प्रमितः	२४	३	०७	४१२
१११.	शारीरश्चोभयेऽपि हि भेदेनैनमधीयते	२०	२	०५	२७५
११२.	शास्त्रदृष्ट्या तूपदेशो वामदेववत्	३०	१	१२	१९१
११३.	शास्त्रयोनित्वात्	०३	१	०३	६७
११४.	शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि	३४	३	०९	४५६
११५.	श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च	३८	३	०९	४७०
११६.	श्रुतत्वाच्च	११	१	०५	१०४
११७.	श्रुतोपनिषत्कगत्यभिधानाच्च	१६	२	०४	२६१
	॥ स ॥				
११८.	समाकर्षात्	१६	४	०५	५४४

सं.	सूत्राणि	सू.सं.	पा.	अधि.	पृ.सं.
११९.	समाननामरूपत्वाच्चाऽवृत्तावप्य-विरोधो दर्शनात् स्मृतेश्च	३०	३	०८	४४१
१२०.	सर्वत्र प्रसिद्धोपदेशात्	०१	२	०१	२०१
१२१.	सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति	३१	२	०७	३१५
१२२.	सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्	०८	२	०१	२१८
१२३.	संस्कारपरामर्शात् तदभावाभिलापाच्च	३६	३	०९	४६३
१२४.	सा च प्रशासनात्	११	३	०३	३५२
१२५.	साक्षाच्चोभयाम्नायात्	२६	४	०६	५७२
१२६.	साक्षादप्यविरोधं जैमिनिः	२८	२	०७	३११
१२७.	सुखविशिष्टाभिधानादेव च	१५	२	०४	२५८
१२८.	सुषुप्त्युत्क्रान्त्योर्भेदेन	४२	३	१३	४८८
१२९.	सूक्ष्मं तु तदर्हत्वात्	०२	४	०१	५०७
१३०.	स्थानादिव्यपदेशाच्च	१४	२	०४	२५५
१३१.	स्थित्यदनाभ्यां च	०७	३	०१	३३७
१३२.	स्मर्यमाणमनुमानं स्यादिति	२५	२	०७	२९६
१३३.	स्मृतेश्च	०६	२	०१	२१३
१३४.	स्वाप्ययात्	०९	१	०५	९९

॥ ह ॥

१३५.	हृद्यपेक्षया तु मनुष्याधिकारत्वात्	२५	३	०७	४१७
१३६.	हेयत्वावचनाच्च	०८	१	०५	९८

****

परिशिष्टम् – २

द्वैतविशिष्टाद्वैताद्वैतदर्शनानुसारेणाधिकरणसूत्रसङ्ख्यासूचिका

अथ प्रथमाध्यायस्य प्रथमः पादः

माध्वभाष्ये		रामानुजभाष्ये		शाङ्करभाष्ये	
अधिकरणानि	सू.सं	अधिकरणानि	सू.सं	अधिकरणानि	सू.सं
१. जिज्ञासाधिकरणम्	१	१. जिज्ञासाधिकरणम्	१	१. जिज्ञासाधिकरणम्	१
२. जन्माधिकरणम्	१	२. जन्माधिकरणम्	१	२. जन्माधिकरणम्	१
३. शास्त्रयोनित्वाधिकरणम्	१	३. शास्त्रयोनित्वाधिकरणम्	१	३. शास्त्रयोनित्वाधिकरणम्	१
४. समन्वयाधिकरणम्	१	४. समन्वयाधिकरणम्	१	४. समन्वयाधिकरणम्	१
५. ईक्षत्यधिकरणम्	७	५. ईक्षत्यधिकरणम्	८	५. ईक्षत्यधिकरणम्	७
६. आनन्दमयाधिकरणम्	८	६. आनन्दमयाधिकरणम्	८	६. आनन्दमयाधिकरणम्	८
७. अन्तःस्थत्वाधिकरणम्	२	७. अन्तरधिकरणम्	२	७. अन्तरधिकरणम्	२

८. आकाशाधिकरणम्	१	८. आकाशाधिकरणम्	१	८. आकाशाधिकरणम्	१
९. प्राणाधिकरणम्	१	९. प्राणाधिकरणम्	१	८. प्राणाधिकरणम्	१
१०. ज्योतिरधिकरणम्	१	१०.ज्योतिरधिकरणम्	४	१०.ज्योतिश्चरणाधिकरणम्	४
११. छन्दोऽभिधानाधिकरणम्	३	११.इन्द्रप्राणाधिकरणम्	४	११. प्रतर्दनाधिकरणम्	४
१२. पादान्त्यप्राणाधिकरणम्	४				
आहत्य सूत्राणि	३१		३२		३१

अथ द्वितीयः पादः

माध्वभाष्ये		रामानुजभाष्ये		शाङ्करभाष्ये	
अधिकरणानि	**सू.सं**	**अधिकरणानि**	**सू.सं**	**अधिकरणानि**	**सू.सं**
१. सर्वगतत्वाधिकरणम्	८	१. सर्वत्र प्रसिद्ध्यधिकरणम्	८	१. सर्वत्र प्रसिद्ध्यधिकरणम्	८
२. अत्तृत्वाधिकरणम्	२	२. अत्त्रधिकरणम्	४	२. अत्त्रधिकरणम्	२
३. गुहाधिकरणम्	२	३. अन्तराधिकरणम्	६	३. गुहाधिकरणम्	२

४. अन्तराधिकरणम्	५	४. अन्तर्याम्यधिकरणम्	३	४. अन्तराधिकरणम्	५
५. अन्तर्याम्यधिकरणम्	३	५. अदृश्यत्वादिगुणकाधिकरणम्	३	५. अन्तर्याम्यधिकरणम्	३
६. अदृश्यत्वाधिकरणम्	३	६. वैश्वानराधिकरणम्	९	६. अदृश्यत्वाधिकरणम्	३
७. वैश्वानराधिकरणम्	९			७. वैश्वानराधिकरणम्	९
आहत्य सूत्राणि	३२		३३		३२

अथ तृतीयः पादः

माध्वभाष्ये		रामानुजभाष्ये		शाङ्करभाष्ये	
अधिकरणानि	सू.सं	अधिकरणानि	सू.सं	अधिकरणानि	सू.सं
१. द्युभ्वाद्यधिकरणम्	७	१. द्युभ्वाद्यधिकरणम्	६	१. द्युभ्वाधिकरणम्	७
२. भूमाधिकरणम्	२	२. भूमाधिकरणम्	२	२. भूमाधिकरणम्	२
३. अक्षराधिकरणम्	३	३. अक्षराधिकरणम्	३	३. अक्षराधिकरणम्	३

४.सदधिकरणम्	१	४. ईक्षतिकर्माधिकरणम्	१	४. ईक्षतिकर्माधिकरणम्	१
५. दहराधिकरणम्	८	५. दहराधिकरणम्	१०	५. दहराधिकरणम्	८
६. अनुकृत्यधिकरणम्	२	६. प्रमिताधिकरणम्	२	६. अनुकृत्यधिकरणम्	२
७. वामनाधिकरणम्	२	७. देवताधिकरणम्	५	७. प्रमिताधिकरणम्	२
८. देवताधिकरणम्	८	८. मध्वधिकरणम्	३	८. देवताधिकरणम्	८
९. अपशूद्राधिकरणम्	५	९. अपशूद्राधिकरणम्	७	९. अपशूद्राधिकरणम्	५
१०.कम्पनाधिकरणम्	१	१०. प्रमिताधिकरणशेषः	२	१०.कम्पनाधिकरणम्	१
११.ज्योतिरधिकरणम्	१	११. अर्थान्तरत्वादि-		११.ज्योतिरधिकरणम्	१
		व्यपदेशाधिकरणम्	३	१२.अर्थान्तरत्वादि-	
१२.आकाशाधिकरणम्	१			व्यपदेशाधिकरणम्	१
१३. सुषुप्त्यधिकरणम्	१			१३.सुषुप्त्युत्क्रान्त्यधिकरणम्	२
१४. ब्राह्मणाधिकरणम्	१				
आहत्य सूत्राणि	४३		४४		४३

अथ चतुर्थः पादः

माध्वभाष्ये		रामानुजभाष्ये		शाङ्करभाष्ये	
अधिकरणानि	सू.सं	अधिकरणानि	सू.सं	अधिकरणानि	सू.सं
१. आनुमानिकाधिकरणम्	९	१. आनुमानिकाधिकरणम्	७	१. आनुमानिकाधिकरणम्	७
२. ज्योतिरुपक्रमाधिकरणम्	२	२. चमसाधिकरणम्	३	२. चमसाधिकरणम्	३
३. नसङ्ख्चोपसङ्ग्रहाधिकरणम्	३	३. सङ्ख्चोपसङ्ग्रहाधिकरणम्	३	३. नसङ्ख्चोपसङ्ग्रहाधिकरणम्	३
४. आकाशाधिकरणम्	१	४.कारणत्वाधिकरणम्	२	४. कारणत्वाधिकरणम्	२
५. समाकर्षाधिकरणम्	८	५. जगद्वाचित्वाधिकरणम्	३	५. जगद्वाचित्वाधिकरणम्	३
६. प्रकृत्यधिकरणम्	५	६. वाक्यान्वयाधिकरणम्	४	६. वाक्यान्वयाधिकरणम्	४
७. एतेनसर्वेव्याख्याताधिकरणम्	१	७. प्रकृत्यधिकरणम्	६	७. प्रकृत्यधिकरणम्	५
		८. सर्वव्याख्यानाधिकरणम्	१	८. सर्वव्याख्यानाधिकरणम्	१
आहत्य सूत्राणि	२९		२९		२८

परिशिष्टम् – ३

श्रीविजयीन्द्रतीर्थकृतब्रह्मसूत्रन्यायसङ्ग्रहः

(प्रथमाध्यायस्य प्रथमपादादिचतुर्थपादान्तो भागः)

श्रीशं श्रीमध्वमौनीन्द्रानानम्याखिलसद्गुरून्।
कृत्स्नर्थं क्रियते ब्रह्मसूत्रेषु न्यायसङ्ग्रहः ॥ १ ॥

जीवान्यद् ब्रह्म जिज्ञास्यं सृष्ट्याद्यष्टविधायि यत्।
शास्त्रैकगम्यं तद् ब्रह्मोपक्रमादिसमन्वयात् ॥ २ ॥

नावाच्यमीक्षणीयत्वाद् ब्रह्मानन्दमयादिकम्।
अन्तस्स्थमब्धिचारादेराकाशोऽनन्ततादितः ॥ ३ ॥

प्राणः श्रीलक्ष्म्यधीशत्वाज्ज्योतिः कर्णादिदूरतः।
गायत्री त्राणगानादेः प्राणो देहरथादितः ॥ ४ ॥

द्वादशाद्याद्याङ्घ्रिनयास्तद्वितीये तु सप्त ते।
सर्वगो(त्र) ब्रह्मशब्दादेरत्ता सर्वादनाद्धरिः ॥ ५ ॥

ऋतं पिबन्तौ हृत्स्थत्वादमृतत्वादितोऽन्तरः।
अन्तर्याम्यन्तरादेः सोऽदृश्यादिः परविद्यतः ॥ ६ ॥

वैश्वानरश्चात्मशब्दाद् द्युभ्वादेराश्रयोऽप्यतः।
भूमा पूर्णसुखादेरक्षरमम्बरपूर्वधृत् ॥ ७ ॥

सदीक्षितृत्वाद् हृत्खस्थो हतपाप्मत्वपूर्वकैः।
कथञ्चित्त्वानुकूल्येन ग्राह्यं सर्वप्रकाशनात् ॥ ८ ॥

ईशानो वामनश्रुत्या देवा विद्याधिकारिणः।
नासंस्कारादितः शूद्राः कम्पनाद्वज्रमीश्वरः ॥ ९ ॥

ज्योतिस्सावधृतिश्रुत्याऽऽकाशो नामाद्यभावतः।
स्वप्नादिदृगसङ्गत्वाद् ब्राह्मणः पतिपूर्वतः॥ १०॥

नयाश्चतुर्दशाऽऽद्यस्य तृतीये षट् तदुत्तरे।
अव्यक्तं तत्स्वतन्त्रत्वाज्ज्योतिस्ता वा इति श्रुतेः॥ ११॥

रूपनानात्वतः पञ्चावान्तरं कारणं च सः।
प्रकृतिश्च प्रतिज्ञादेः शून्यादिश्चोक्तहेतुतः॥ १२॥

आद्याध्यायगता न्यायाः धीगाः (३९) सूत्राणि मालयाः। (१३५)।

जिज्ञास्ये जीवभेदायानन्तसद्गुणलक्षणम्॥ १३॥

ब्रह्मेत्युक्तं तत्प्रसिद्ध्यै जन्माद्यस्येति सूत्रितम्।
अनतिव्याप्तये तस्य शास्त्रयोनित्वमीरितम्॥ १४॥

तल्लक्षणद्वयोपेते मुख्याऽशेषागमार्थता।
समोक्तोपक्रमादिस्तद्धेतुस्तुर्ये प्रतिश्रुतः॥ १५॥

समर्थसिद्ध्यै वाच्यत्वगतिसाम्ये निरूपिते।
पञ्चमेऽथ प्रतिज्ञातसमन्वयसमर्थनम्॥ १६॥

शब्दश्चतुर्विधास्तत्रान्यत्रान्यत्रैव चोभयोः।
प्रसिद्धा इति ते सर्वे नामलिङ्गात्मना द्विधा॥ १७॥

तत्रप्रसिद्धो विष्ण्वैकनिष्ठो विष्ण्वादिगीर्यथा।
तदेकनिष्ठतासिद्धेर्न कार्यस्तत्समन्वयः॥ १८॥

यत्राऽन्यवृत्तिरेकैव समन्वयविरोधिनी।
उभयत्र प्रसिद्धं तदक्षरादिवचो यथा॥ १९॥

ब्रह्मावृत्त्यन्यवृत्ती द्वे विरोधिन्यौ समन्वये ।
यत्राऽन्यत्र प्रसिद्धं तदिन्द्राकाशादिगीर्यथा ।। २० ।।

उक्तद्वयं ब्रह्मवृत्तौ बाधकं च त्रयं यदा ।
अन्यत्रैव प्रसिद्धं तद्दुःखिबद्धादिगीर्यथा ।। २१ ।।

आपातरूढिरहितधर्मद्वारा च धर्मिगम् ।
लिङ्गमन्यत् ततो नामान्तर्यामीन्द्रादिगीर्यथा ।। २२ ।।

अन्यत्रैव प्रसिद्धानां दुःशकावगतित्वतः ।
सर्वाधिकारवैधुर्याच्चान्त्याङ्गौ तत्समन्वयः ।। २३ ।।

अन्येष्वपि महामल्लभीरुभङ्गनयात्कृतः ।
आद्येऽन्यत्र प्रसिद्धानां नाम्नां तत्रापि मुख्यतः ।। २४ ।।

अमुख्यत्वादन्यगतलिङ्गानां तु द्वितीयगः ।
उभयत्र प्रसिद्धानां नामलिङ्गात्मनामपि ।। २५ ।।

समन्वयस्तृतीयेऽङ्गौ कृतोऽत्रैव प्रसङ्गतः ।
देवशूद्राधिकारैतदभावौ तु विचारितौ ।। २६ ।।

छन्दोभिधसमाकर्षौ द्वावन्तर्ग(र्गु)णकौ नयौ ।। २७ ।।

इति श्रीब्रह्मसूत्रन्यायसङ्ग्रहे विजयीन्द्रयतिविरचिते प्रथमोऽध्यायः ।। १ ।।

*****

परिशिष्टम् - ४

श्रीधीरेन्द्रयतिविरचितः विषयवाक्यसङ्ग्रहः

अथ प्रथमाध्यायः

प्रथमः पादः

श्रीमदानन्दतीर्थार्यहृदयाम्भोजवासिनः।
श्रीरामकृष्णव्यासश्रीहयास्यान् प्रणमाम्यहम्॥ १॥

श्रीमध्वतन्त्रव्याख्याकृज्जयराजार्यपूर्वकान्।
श्रीराघवेन्द्रवादीन्द्रवसुधेन्द्रान् नतोऽस्म्यहम्॥ २॥

श्रीव्यासो ब्रह्ममीमांसां चक्रे सूत्रगणात्मिकाम्।
सा चतुर्लक्षणी तत्र चत्वारः प्रतिलक्षणम्॥ ३॥

पादाः प्रसिद्धा द्वाविंशत्यधिकद्विशतं नयाः।
तत्र सर्वाधिकरणेषु भाष्यटीकास्फुटान्यपि॥ ४॥

वक्ष्ये विषयवाक्यानि तदुक्त्या ज्ञापितान्यहम्।
विजिज्ञासस्वेति वाक्यं जिज्ञासानयगं स्मृतम्॥ ५॥

जन्माधिकरणस्योक्तं तद् ब्रह्मेति तदुत्तरम्।
यतो वेत्यादि तत्पूर्वं शास्त्रयोनिनयस्य च॥ ६॥

समन्वयस्यौपनिषदः पुरुष इत्यादिकस्तथा।
नावेदविच्चेति वाक्यद्वयं विषयदर्शकम्॥ ७॥

नामानि सर्वाणि यमाविशन्तीत्यादिकं तथा।
इहेक्षतिनये गम्यं टीकादौ विषयोक्तितः॥ ८॥

अन्तरात्माऽऽनन्दमय इत्यानन्दमये नये ।
उपलक्षणयाऽऽनन्दमयशब्द उदाहृतः ॥ ९ ॥

अन्तःप्रविष्टं कर्तारमित्यन्तःस्थनयस्य तु ।
आकाश इति होवाचेत्याकाशाख्यनयस्य तु ॥ १० ॥

तद्वै त्वं प्राणोऽभव इति प्राणनयस्य हि ।
आद्यज्योतिर्नयस्येदं ज्योतिरित्युदितं वचः ॥ ११ ॥

गायत्री वा इदं सर्वं गायत्र्यधिकृतेरपि ।
चक्षुः श्रोत्रं मनः प्राण इति प्राणनयेऽन्तिमे ॥ १२ ॥

॥ इति प्रथमाध्यायस्य प्रथमः पादः ॥

द्वितीयः पादः

सर्वभूतेष्वेतमिति वाक् सर्वत्रप्रसिद्धके ।
सर्वं वा अत्तीति वाक्यमत्ताधिकरणस्य तु ॥ १ ॥

ऋतं पिबन्तावित्याद्यं गुहाधिकरणीयकम् ।
यः एषोऽन्तरक्षिणीति त्वन्तर्नयगतं वचः ॥ २ ॥

एष त आत्माऽन्तर्यामीत्यन्तर्यामिनयस्य हि ।
अदृश्यत्वनये यत्तदद्रेश्यमिति भाषितम् ॥ ३ ॥

यस्त्वेतमेव प्रादेशमात्रमित्यादिकं वचः ।
वैश्वानरनयस्यैतद्विषयप्रतिपादकम् ॥ ४ ॥

॥ इति प्रथमाध्यायस्य द्वितीयः पादः ॥

तृतीयः पादः

यस्मिन् द्यौः पृथिवीत्येतद् द्युभ्वाद्यायतने नये ।
यो वै भूमेति यद्वाक्यं भूमाधिकरणस्य तु ॥ १ ॥

एतद्वैतदक्षरं गार्गीत्यन्तरनयस्य च ।
सदेव सौम्येति यद्वाक्यं सन्नये विषयार्पकम् ॥ २ ॥

दहरं पुण्हरीकं वेश्मेत्याद्यं दहरे नये ।
तदेतदिति मन्यन्त इत्याद्यनुकृतौ नये ॥ ३ ॥

अङ्गुष्ठमात्रमित्यादि शब्दादेवेति सन्नये ।
विश्वे देवा इति वचो देवतानयगं मतम् ॥ ४ ॥

पठेद्वेदानिति वचो ह्यपि शूद्रनये मतम् ।
महद्भयं वज्रमिति वाक्यं कम्पनसन्नये ॥ ५ ॥

प्राणे ह्यन्तरिति ज्योतिर्दर्शनके नये ।
आकाशोऽर्थान्तरत्वादि ह्याकाशे च प्रसिद्धवाक् ॥ ६ ॥

स यत्तत्रेत्यादि वाक्यमसङ्गत्वनयस्य हि ।
महिमा ब्राह्मणस्येति वचः पत्यादिशब्दके ॥ ७ ॥

॥ इति प्रथमाध्यायस्य तृतीयः पादः ॥

चतुर्थः पादः

महतः परमव्यक्तमिति वागानुमानिके ।
वसन्ते ज्योतिषेत्यादिनये ज्योतिरुपक्रमे ॥ १ ॥

सङ्ख्योपसङ्ग्रहनये पञ्च पञ्चजना इति ।
आकाशाद्वायुरित्येतत्कार्यकारणसन्नये ॥ २ ॥

सर्वे वेदा इति वचो समाकर्षनयस्य तु ।
सैषा प्रकृतिरित्याद्यं वाक्यं तु प्रकृतौ नये ।। ३ ।।

एतेन सर्वे व्याख्याता इत्यध्यायान्तिमे नये ।
असदेवेति तुच्छेनेत्याद्यं विषयदर्शकम् ।। ४ ।।

।। इति श्रीधीरेन्द्रयतिकृते विषयवाक्यसङ्ग्रहे प्रथमाध्यायस्य चतुर्थः पादः ।।

परिशिष्टम् – ५

श्री सुधीन्द्रतीर्थविरचिता श्रीमद्ब्रह्मसूत्राधिकरणरत्नमाला

।। प्रथमाध्यायः ।।

१. अन्यत्रप्रसिद्धनामपादः

ज्ञानार्थमर्थितः श्रीशो ब्रह्मरुद्रादिभिः सुरैः ।
व्यासो भूत्वा समुत्सन्नान् व्यञ्जयन् व्यभजच्छ्रुतीः ।।

तदर्थसन्निर्णयाय शास्त्रं शारीरकाह्वयम् ।
चक्रे चतुर्लक्षणेतं कलाचरणसंयुतम् ।।

शतद्वयेन विंशत्या द्वाभ्यामपि समन्वितम् ।
नयानि (नयानां) भूषणैः सूत्रैः संयुतं भगवान् प्रभुः ।।

तत्र शास्त्रारम्भणीयत्वोपयुक्ततया नये ।
प्रथमे शास्त्रजिज्ञासाकार्यतामाह शास्त्रकृत् (।। १ ।।)

द्वितीये तु विचार्यस्य हरेर्लक्षणमब्रवीत् (।। २ ।।)

तदतिव्याप्तिनिर्हृत्यै मानमाह तृतीयके (।। ३ ।।)

ततः पुनरतिव्याप्तिनिरासायैव मापतेः ॥
कारणत्वेन शास्त्रैकयोनित्वं समसीषधत् (॥ ४ ॥)

संशब्दप्रोक्तवाच्यत्वं सर्वशास्त्रप्रमाणताम् ।
अपीक्षतिनये प्राह पञ्चाधिकरणीति हि (॥ ५ ॥)

ततस्त्वध्यायशेषस्थ (स्तु) प्रतिज्ञातसमन्वयम् ।
प्रवृत्तः संस्पष्टयितुं तत्राऽऽनन्दमये नये ॥
अन्यत्रगानां नाम्नां तु गुणिसामान्यवाचिनाम् ।
गुणसंवाचकानां च हरावाह समन्वयम् (॥ ६ ॥)
ततोऽन्तःस्थत्वसल्लिङ्गद्वारा विष्णौ समन्वयम् ।
अधिदैवगतेन्द्रादिसर्वनाम्नां ततः परम् (॥ ७ ॥)

अधिभूतगताकाशपूर्वनामततेस्ततः (॥ ८ ॥)

अध्यात्मगप्राणपूर्वनाम्नामाह समन्वयम् ।
दशमे सूक्तगाशेषज्योतिरादिपदावलेः ।
समन्वयं हरावाह (॥ १० ॥)

एकादशे नु नयेऽब्रवीत् ॥
अधिवेदगगायत्रीपूर्वनामततेर्हरौ ॥

समन्वयम् (॥ ११ ॥) द्वादशेऽन्यप्रापकैर्बहुभिर्नये ॥
लिङ्गैर्युतानां नाम्नां तु हरावाह समन्वयम् (॥ १२ ॥)
इति प्रथमपादेऽस्मिन्नया द्वादश कीर्तिताः ॥

२. ॥ अन्यत्रप्रसिद्धलिङ्गपादः ॥

अथाऽन्यत्रगलिङ्गानामाह विष्णौ समन्वयम् ।
पादे द्वितीये तत्राऽऽद्ये नये भावात्मकस्य तु ।
सर्वत्रावस्थितत्वस्य लिङ्गस्याऽऽह समन्वयम् (॥ १ ॥)

सर्वसंहर्तृत्वरूपक्रियालिङ्गसमन्वयम् ।
नये द्वितीये प्रोवाच (॥ २ ॥) तृतीये तु नयेऽब्रवीत् ॥
सत्कर्मफलभोक्तृत्वक्रियालिङ्गसमन्वयम् (॥ ३ ॥)

चक्षुरन्तःस्थितत्वाख्यभावयुक्तस्य तत्परे ।
रतिक्रियात्मलिङ्गस्य नये प्राह समन्वयम् (॥ ४ ॥)
पञ्चमेऽन्तस्स्थितत्वाख्यभावयुक्तस्य माधवे ।
नियन्तृत्वक्रियारूपलिङ्गस्याऽह समन्वयम् (॥ ५ ॥)

षष्ठेऽभावात्मलिङ्गस्य हरौ प्राह समन्वयम् (॥ ६ ॥)

बहुलिङ्गसमायुक्ता या हि वैश्वानरश्रुतिः ।
तस्याः समन्वयं प्राह हरावन्त्ये हि सूत्रकृत् (॥ ७ ॥)
इति सप्त नयाः पादे द्वितीयेऽस्मिन् प्रकीर्तिताः ॥

३. ॥ उभयत्रप्रसिद्धलिङ्गनामपादः ॥

उभयत्रप्रसिद्धानां लिङ्गनाम्नां समन्वयम् ।
शब्दानामाह पादेऽस्मिन् हरौ तत्राऽदितो नये ॥
सर्वाश्रयत्वलिङ्गस्य (॥ १ ॥)

भूमनाम्नो द्वितीयके ।
समन्वयं हरावाह (॥ २ ॥)

तृतीये त्वक्षरश्रुतेः (॥ ३ ॥)

तुर्ये समन्वयं प्राह सृष्टिस्थानगसच्छुतेः (॥ ४ ॥)

हृत्पद्मस्थत्वलिङ्गस्य तदन्तरनये हरौ (॥ ५ ॥)

आनुकूल्येन यद् गृह्यमाणत्वं तस्य केशवे ।
षष्ठे नये तु लिङ्गस्यावदद् व्यासः समन्वयम् (॥ ६ ॥)

सप्तमे त्वीशाननाम्नो हरावाह समन्वयम् (॥ ७ ॥)

वेदविद्यासु देवानामधिकारोऽस्ति सर्वशः ॥
इत्यष्टमे नये प्राह प्रसङ्गादेव सूत्रकृत् ॥ ८ ॥

नवमे तदभावं च शूद्राणामाह सूत्रकृत् ॥ ९ ॥

दशमे वज्रनाम्नस्तु हरावाह समन्वयम् ॥ १० ॥

एकादशनये प्राह ज्योतिर्नाम्नः समन्वयम् ॥ ११ ॥

तदुत्तरनये प्राहाऽऽकाशनाम्नः समन्वयम् ॥ १२ ॥

त्रयोदशे तु स्वप्नादिद्रष्टृत्वस्य समन्वयम् ॥

लिङ्गस्य (॥ १३ ॥) भगवानाह चरमे ब्रह्मणः श्रुतेः (॥ १४ ॥)

इत्थं चतुर्दश नयाः पादे प्रोक्तास्तृतीयके ॥

४. ॥ अन्यत्रैवप्रसिद्धलिङ्गनामपादः ॥

अन्यत्रैव प्रसिद्धानाम् (॥ १ ॥) द्विविधानां समन्वयम् ।
शब्दानां भगवानाह विष्णौ पादे चतुर्थके ॥
ऐश्वर्यरोधिदुःखित्वाद्यर्थशब्दसमन्वयम् ॥
भगवान् सूत्रकृत् तत्र प्राह प्रथमके नये (॥ २ ॥)

द्वितीये सर्वशब्दानां पदवर्णादिरूपतः ।
समन्वयं हरावाह (॥ ३ ॥)तृतीये तु नये हरिः ॥

बहुत्ववाचिशब्दानां चतुर्थे सूत्रकृन्नये ॥
अवान्तरं कारणत्वं यल्लिङ्गं तस्य वाऽब्रवीत् ॥
तादृशाकाशादिनाम्नामथवाऽऽह समन्वयम् (॥ ४ ॥)

न्यायभेदेन सर्वेषां शब्दानामाह पञ्चमे (॥ ५ ॥)

पुनः समन्वयं विष्णौ षष्ठे स्त्रीलिङ्गिनामपि (॥ ६ ॥)

निषेधवाचिनां नाम्नां सप्तमे तु समन्वयम् (॥ ७ ॥)

आह तुर्ये तु चरणे नयाः सप्त प्रकीर्तिताः ॥
अनन्तशब्दवाच्यत्वात्सिद्धोऽनन्तगुणो हरिः ॥

॥ इति प्रथमोऽध्यायः ॥

परिशिष्टम् – ६

ब्रह्मसूत्रभाष्योदाहृतप्रमाणवचनानां वर्णानुक्रमसूचिका

प्रमाणवचनानि	पृष्ठसङ्ख्या
॥ अ ॥	
अग्नौ क्रियावतां (ब्राह्मम्)	१९९
अजस्य नाभावध्येकम् (ऋ.सं.१०.८२.६)	५१
अजस्य नाभाविति यस्य (स्कान्दपुराणम्)	५२
अजायमानो बहुधा (तै.आ.३.१३.१)	३३५,३६४
अणोरणीयान् महतः (कठ.उ. १.२.२०)	५१७
अथ द्वे वाव विद्ये (मु.उ..१.१.५)	२८४
अथ यदतः परो दिवः (छां. उ. ३-१३-७)	१७१
अथ यदिदमस्मिन् ब्रह्मपुरे (छां.उ.८-१-२)	३६६
अथ हेममात्मनं	३०२
अथ हैष आत्मा (भाल्लवेयश्रुतिः)	५७६
अथातः शब्दपूर्वाणि (गारुडम्)	२२
अदृश्येऽनात्म्येऽनिलयने (तै.उ.२.७)	१३२,१५०
अदृष्टं द्रष्टृश्रुतं (बृ.उ. ५.८.११)	३४६
अद्यतेऽत्ति च (तै.उ. २.२)	११९
अध्ययनमात्रवतः (ब्र.सू. ३.४.१२)	३३
अनन्तो भगवान् ब्रह्म (ब्राह्मम्)	१६२
अनन्योऽप्यन्यशब्देन (ब्रह्माण्डम्)	१३०
अनात्तत्वादनात्मानः	३०३
अनादिनिधना नित्या	४४२

अनामा सोऽप्रसिद्धत्वात् (ब्राह्मम्) ४८६
अनिलयनेऽभयं प्रतिष्ठां (तै.उ. २.७) १४८
अन्तः प्रविष्टं कर्तारमेतम् (तै.आ. ३.११) १५०
अन्तरादित्ये मनसा (तै.आ. ३-११) १५६
अन्तर्यामिणमीशेशम् (महाकौर्मम्) २५४
अन्तस्समुद्रे मनसा चरन्तम् (तै.आ. ३-११-१) १५२
अन्त्यजा अपि ये भक्ताः (व्योमसंहिता) ३७
अपरं त्वक्षरं या सा (स्कान्दम्) २८८
अप्रसिद्धेरवाच्यं तत् (गारुडम्) ९०
अमृतस्यैष सेतुः (मुं. उ. २.२.५) ३२४
अयमग्निर्वैश्वानरः (बृ.उ. ७-९-१) २९७
अयमश्वतरीरथः ४५९
अयमात्मा ब्रह्म (मा.उ. १-२)(बृ.उ.४.५.१९) ९६
अरश्च वै ण्यश्च सुधासमुद्रौ ३७७
अरश्च ह वै ण्यश्च (छां.उ. ८-५-३) ३७६
अल्पाक्षरमसन्दिग्धं (स्कान्दम्) १२
अवचनेनैव प्रोवाच (बाष्कलश्रुतिः) ८५
अवधारणार्थं सर्वस्या - (वाराहसंहिता) ५८७
अवर्णम् (मु. उ. १.१.६) ४८५
अविकारः सदा शुद्धः ३६१
अविकारोऽपि परमः (नारदीयपुराणे) ५७६
अविज्ञातप्रार्थनं च (अभिधानम्) ५२१
अव्यक्तमचलं शान्तं (पिप्पलादशाखा) ५०४
अव्यक्तात् पुरुषः परः (कठ. १-३-११) ४९७
अव्यक्तोऽक्षर उच्यते (भ.गी. ८-२१) ५०५

अशब्दमस्पर्शमरूपमव्ययम् (कठ. उ. १-३-१५) ८४
अष्टवर्षं ब्राह्मणमुपनयीत ४६३
असर्वः सर्व इत्यपि (तुरश्रुतिः) १३५
असर्वः सर्व इवाऽत्मैव १३८
अस्थूलमनणु (बृ.उ. ५-८-८) ३५५
अस्थूलोऽनणुरमध्यमो ३५७
अस्थूलोऽनणुरूपोऽसौ (ब्राह्मम्) ३५८
अस्य यदैकां शाखां (छां.उ.६-११-२) ५४७
अस्य लोकस्य का गतिः (छां.उ.१.९) १५९
अहमात्मा गुडाकेश (भ.गी. १०-२०) २१३
अहरहर्गच्छन्त्यः (छां.उ. ८-३-२) ३७५
अह हारे त्वा शूद्र (छां.उ. ४-२-३) ४५४
अहं तत्तेजो रश्मीत् (चतुर्वेदशिखा) १५५,४०३
अहं ब्रह्मास्मि (बृ.उ. ३-४-१०) १३४
अहं मनुरभवं सूर्यश्च (ऋ. सं.४-२३-१) १९४
अहं वैश्वानरो भूत्वा (भ.गी. १५.१४) २९६
अहं सोममाहनसम् (ऋ.सं.१०-१२५-२) ३४६
अक्षरं ब्रह्म परमं (भ.गी. ८-३) ५०५
अक्षरात् परतः परः (मुं. २-१-२) २८१
अक्षरात् सम्भवतीह विश्वम् (मुं.उ. १-१-७) २८२

॥ आ ॥

आकाशो वै नामरूपयोः (छां.उ. ८.१४.१) ४८३
आत्मन्येवाऽत्मानं पश्येत् (बृ.उ. ६-४-२३) ८६
आत्मब्रह्मादयः शब्दाः (ब्रह्मवैवर्तम्) ३२३

आत्मानं परस्मै शंसति (तै.आ. ३.२.३) २१०
आत्मान्तरात्मेति हरिः (बृहत्संहिता) २३४
आत्मा वा अरे द्रष्टव्यः श्रोतव्यः (बृ.उ.६-५-६) ४२
आत्मा हि परमः (भाल्लवेयश्रुतिः) २४२
आनन्दो ब्रह्मेति व्यजानात् (तै.उ. ३-६) २५९

॥ इ ॥

इदं तच्छिर एषः (बृ.उ. ४-२-३) ५२२
इदं हि विश्वं भगवानिव (भागवतम्-१-५-२०) १३५
इन्द्रस्याऽत्मा निहितः पञ्च होता (तै.आ. ३-११) १५६
इन्द्रो राजा (तै.आ. ३-११-६) १५०

॥ उ + ऊ ॥

उतामृतत्वस्येशानः (तै.आ.३-१२) ४९४
उत्क्रान्तप्राणान् (छां.उ. ७-१५-३) ३४०
उत्पत्तिस्थितिसंहाराः (स्कान्दम्) ६२
उपक्रमोपसंहारौ (बृहत्संहिता) ७९
उभे अस्मिन् द्यावापृथिवी (छां.उ.८-१-३) ३६६
उभौ लोकौ (बृ.उ. ६-३-७) ४७९
ऊर्ध्वं प्राणमुन्नमयति (कठ. उ. ५-३) ४०८

॥ ऋ ॥

ऋग्यजुः सामाथर्वाश्च (स्कान्दम्) ७४
ऋतं पिबन्तौ सुकृतस्य (कठ. उ. १-३-१) २३०
ऋते नारायणादीनि (स्कान्दम्) ३३३

॥ ए ॥

एकः पुरस्ताद् (घृतसूक्तम्) २२५

एकः शास्ता न द्वितीयः (भारतम् - सभा) ३५४

एको देवः सर्वभूतेषु गूढः (श्वेता.उ. ६-११) १०४

एको नारायणः २९१

एतदमृतम् (छां.उ. ४-१५-१) २६९

एतद्धस्म वै तद्विद्वान् आह (ऐ.आ. २-१-८) १९६

एतमानन्दमयमात्मानम् (तै.उ. २.८) १४८,३२४

एतमेव ब्रह्मेत्याचक्षते (ऐ.आ. ३-२-३-१२) ११५,२११

एतस्मिन् खल्वक्षरे गार्गि(बृ.उ. ५-८-११) ३४९,३८२

एतस्य वा अक्षरस्य (बृ.उ. ५.८-९) ३५२,३८२

एवमेवैष प्राणः (प्रश्न - ३-४) ४०९

एष आत्मेति होवाच (छां.उ. ४-१५-१) ३८६

एष इमं लोकं (ऐ.आ. २-२-२) ५२७

एष उ एव ब्रह्मैष (इन्द्रद्युम्नशाखा) २१२

एष नित्यो महिमा (बृ.उ. ६-४-२२) ४९१

एष भूताधिपतिः (बृ.उ. ६-४-२१) ३८०

एष म आत्मा अन्तर्हृदये (छां.उ. ३-१४-३) ३९४

एष मोहं सृजाम्याशु (वाराहपुराणम्) ५६,५९

एष सेतुः विधृतिः (छां.उ.८-४-१) ३७९

एष स्त्री एष (पैङ्गिश्रुतिः) ५७२

एष ह्येव शून्यः (महोपनिषत्) ५८३

॥ ओ + औ ॥

ओङ्कारश्चाथशब्दश्च (गारुडम्) २३
औपनिषदः पुरुषः ६२

॥ क ॥

कथं नु भगवः (छां.उ.६-१-३) ५५१
कम्वर एनमेतत् (छां.उ. ४-१-३) ४५७
कर्मणा त्वधमः प्रोक्तः (नारदीयम्) ४२
कस्मिन्नु भगवो (मुं. उ. १-१३-४) ५५०
कुविदङ्ग (ऋ.सं. ७-९१-१) ४०९
कूटस्थोऽक्षर उच्यते (भ.गी. १५-१६) २२३,२८३
कृष्णद्वैपायन- (पाद्मे) ५६४
केषाञ्चित् सर्वगत्वेन (ब्राह्मम्) १९८
को न आत्मा (छां.उ. ५-११-१) ३०४
को ह्येवान्यात् कः (तै.उ. २.७) १२३,१५८,४७६

॥ ग + घ ॥

गामाविश्य च भूतानि (गीता. १५-१३) २१३
गायति त्रायति च (छां.उ. ३-१२-१) १७३
गायत्री वा इदं सर्वं (छां.उ. ३-१२-१) १७१
घर्मा समन्ता त्रिवृतं (ऋ.सं. १०-११४-१) २३२

॥ च + ज ॥

चक्रं चङ्क्रमणात् (ब्रह्मवैवर्तम्) ४७७
चतुर्भिः साकं नवतिं च (ऋ.सं. १-१५५-६) ६४,३५४

चतुर्मुखः शतानन्दः (ब्राह्मम्) ३३४
चन्द्रमा मनसो जातः (तै.आ. ३-१२) ३०५
चेतनस्तु द्विधा प्रोक्तः (पाद्मम्) ९७
जुष्टं यदा पश्यत्यन्यमीशम् (मुं.उ.३-१-२) १३८,२९०,३३६,

॥ त ॥

तं देवाः प्राणयन्त (तै.आ.२-१-५) १८५
तं यथा यथोपासते ३१५
तत्कर्म हरितोषं यत् २८४
तत्तन्नाम्नोच्यते विष्णुः (पाद्मम्) १९३
तत्त्वमसि (छां.उ. ६.८) १३४
तत्रापि दहं गगनं विशोकः (म.ना.उ. १०-७) ३८३
तदयं प्राणोऽधि-(तै.आ. २-३-८) १८५
तदेव ब्रह्म परमं कवीनाम् (म. ना.उ. १-६) ११५,२०५
तदेवर्तं तदु सत्यमाहः (म.ना. उ.१-६) ४६
तद्देवाः ज्योतिषां ज्योतिः (काण्वपाठः – बृ.उ.६.४.१६) ५३७
तद्यथा पुष्करपलाशे (छां.उ. ४-१४) २४८
तद्यदस्मिन् सर्पिर्वोदकं वा (छां. उ. ४-१५) २५५
तद् यद् भक्तं (छां.उ. ५-१९-१) २९८
तद्वै त्वं प्राणो अभवः (तै.आ. ३-१४) १६३,४१५
तन्नो विष्णुः (म.ना. उ. ३-१६) ४८
तमुत्क्रामन्तं प्राणः (बृ.उ. ६-४-२) ३४३
तमेवं विद्वान् अमृत इह भवति (तै.आ. ३-१२) ४१,१३१,२८४
तमेव भान्तमनुभाति सर्वं (कठ.उ. ५-१५) ३९८
तमेवैकं जानथ आत्मानम् (मुं.उ.२.२.५) ९८,३२२

तस्मादेतद् ब्रह्म (मुं. उ. १-१-९) २८७
तस्मिन् काले महाराज (स्कान्दम्) १८०
तस्य भासा (कठ.५-१५) ३९८
तस्यान्ते सुषिरं सूक्ष्मम् (म.ना. उ. ११) ३७०
तस्यैतस्यासावादित्यः (ऐ.आ.३-२-३) २०१
तावन्ति शतसंवत्सरस्याह्नां (ऐ.आ.२-२-४) १९४
ता वा एताः शीर्षन् (ऐ.आ. २-१-४) १८४
ता वा एताः सर्वाः (ऐ.आ. २-२-२) ५२७
तावानस्य महिमा (छां.उ. ३-१२-६) १७६
तुच्छ्येनाभ्वपिहितम् (ऋ.सं.१०-१२९-३) ५०४
ते यदन्तरा (छां.उ. ८-१४-१) ४८४
ते ये शतं प्रजापतेरानन्दाः (तै. उ. २-८) १३२
तेषां सुखं शाश्वतं (कठ.उ. ५-१२) ३९६
ते ह नाकं महिमानः सचन्त (तै.आ.३-१२) ४३०
त्रिपादस्यामृतं दिवि (छां.उ. ३-१२-६)
(ऋ.सं. १०-९०-३) १८१,२५२

॥ द + ध ॥

दत्तं दुर्वाससं सोमम् (भाग. -३-१-१५) ९६
दहरः (छां.उ. ८-१-१) ३९३
देवानाꣳ हृदयं (तै.आ. ३-११) १४२
द्वा सुपर्णा सयुजा (मुण्ड.उ.३-१-१) ३३७
द्वे वाव ब्रह्मणो रूपे (तलवकारब्राह्मणम्) ९३
द्वे विद्ये वेदितव्ये (मुण्ड.उ. १-१-४) ३३७
ध्यायति ध्यानरूपोऽसौ (ब्रह्माण्डपु.) ५७१

॥ न ॥

न केवलं मे भवतश्च राजन् (भाग. ७-८-८)	३५४
न तदीदृगिति ज्ञेयं	८९
न तद्भासयते सूर्यः (भ.गी. १५-६)	४०५
न तु नारायणादीनां (वामनम्)	३३३
न ते विष्णो जायमानो (ऋ.सं. ७-९९-२)	२०८,२७२
नभस्वतोऽपि सर्वाः (स्कान्दे)	४७७
नाग्निर्न यज्ञो न (पैङ्गिश्रुतिः)	४६४
नाग्निर्न यज्ञः शूद्रस्य	४७१
नान्यः पन्था अयनाय (तै.आ. ३-१२-७)	५६०
नान्यदतोऽस्ति द्रष्टृ (बृ.उ. ५-८-११)	३६३
नान्योऽतोऽस्ति द्रष्टा (बृ.उ.५-७-२३)	३६३
नामानि विश्वा अभि (भाल्लवेयश्रुतिः)	४९
नामानि सर्वाणि यमाविशन्ति (भाल्लवेयश्रुतिः)	१३५,१६२,५२३
नारायणं महाज्ञेयं (म.ना.उ.११)	३२४
नारायणाद् विनिष्पन्नं (स्कान्दवचनम्)	८
नाविशेषात् (ब्र.सू. ३-४-१३)	३०
नावेदविन्मनुते तं बृहन्तं (तै.ब्रा.३-१२-९)	६८
नाहं न च शिवोऽन्ये च (ब्रह्मवैवर्तम्)	५९
नाहमेतद् वेद (छां. उ. ४.४)	४६८
नित्यतीर्णाशनायादिः (पाद्मम्)	३७३
नेहाऽसीत् किञ्चनाप्यादौ (ब्रह्मवैवर्तम्)	२२८
नैतदब्राह्मणो विवक्तुमर्हति (छां.उ. ४-५)	४६८
नैतदिच्छन्ति (मोक्षधर्मेषु)	१४१
नैषा तर्केण मतिरापनेया (कठ.उ. २.९)	१४७

॥ प ॥

पतिं विश्वस्याऽत्मेश्वरम् (म.ना.उ. ११)	३८२
परं ज्योतिरुपसम्पद्य (छां.उ. ८-१२-३)	३८५
परस्य वाचकाः शब्दाः (पाद्मम्)	५४५
परमं यो महद् ब्रह्म (महाभारतम्)	२०५
परीक्ष्य लोकान् (मुं.उ. १-२-१२)	३४
परो दिवः (छां.उ. ३-१३-७)	१८१
परो दिवा पर एना (ऋ.सं. १०-८२-५)	५२
परो मात्रया तन्वा वृधान (ऋ.सं. ७-९९-१)	६४,१६१,१६८
पूर्णमदः पूर्णमिदं (बृ.उ. ५-१-१)	९९
पूर्वोत्तराविरोधेन (कौर्मम्)	७०
पृथग्वक्तुं गुणास्तस्य (ब्राह्मम्)	२३९
पृथिव्यादिप्रकृत्यन्तम् (स्कान्दम्)	३५२
प्राण ऋच इत्येव विद्यात् (ऐ.आ. २-२-२)	१८५
प्राणस्य प्राणमुत (बृ.उ. ६-४-१८)	४७६,५३६
प्राणस्त्वं प्राणस्सर्वाणि भूतानि (ऐ.आ. २-२-३)	१८९
प्राणानां ग्रन्थिरसि (म. ना. उ. ३५)	३२०
प्राणेश्वरः कृत्तिवासाः (घृतस्.)	३२०
प्राणो ब्रह्म कं ब्रह्म (छां.उ.४-१०)	२५८
प्राणो वा अहमस्म्यृषे (ऐ. आ. २-२-३)	१८९
प्राणो वा आशाया भूयान् (छां.उ. ७-२३)	३३९
प्राज्ञेनाऽत्मनाऽन्वारूढः (बृ.उ. ६-३-३५)	४८१,४८८
प्राज्ञेनाऽत्मना सम्परिष्वक्तः (बृ.उ. ६-३-२१)	४८८
प्रियो हि ज्ञानिनोऽत्यर्थं (भ.गी. ७-१७)	४१

॥ ब ॥

बहुनाऽत्र किमुक्तेन (आदित्यपुराणम्)	३२५
बहु स्यां प्रजायेय (छां.उ. ६-२-३)	३६१
ब्रह्म ततममपश्यत् (तै.आ. २-४-३)	२०१
ब्रह्म पुच्छं प्रतिष्ठा (तै.उ. २-५-२)	१०८
ब्रह्मविदाप्नोति परम् (तै.उ. २.१)	१२४,३२४
ब्रह्मशब्दः परे विष्णौ	११६
ब्रह्मेति परमात्मेति (भाग-१-२-११)	९६,११६
ब्रह्मैव सन् (बृ.उ. ६-४)	१४२

॥ भ ॥

भर्ता सन् म्रियमाणः (तै.आ.३.१४)	३५०
भेददृष्ट्याऽभिमानेन (भागवतम् -३३-१२)	१३६

॥ म ॥

मन्दमध्योत्तमत्वेन (भागवततन्त्रम्)	२९
मम योनिर्महद् ब्रह्म (भ.गी.१४-३)	११३
मम योनिरप्सु (ऋ.सं. १०-१२५-७)	५३
महतः परं ध्रुवं (कठ. १-३-१५)	५१६
महामायेत्यविद्येति	५६९
महिदासाभिधो जज्ञे (ब्रह्माण्डम्)	१९७
मायां तु प्रकृतिं (श्वे.उ. ४-१०)	५६९
मां विधत्तेऽभिधत्ते मां (भाग. ११-२१-४३)	८१
मुक्तानां परमा गतिः (विष्णुसहस्रनामसु)	३२४

मुक्तिर्हित्वाऽन्यथारूपं (भागवतम्-२.१०.६) १४४
मूर्धैव सुतेजाश्चक्षुः (छां.उ. ५-१८-२) ३०५

॥ य ॥

य आकाशे (बृ.उ.५-७-१२) ५४०
य आत्मनि तिष्ठन् (बृ.उ. माध्यन्दिनपाठः) २७५
य आत्मा अपहतपाप्मा (छां.उ.८-७-३) ३७१
य उ त्रिधातु पृथिवीमुत (ऋ.सं.१-१५४-५) ६३,३५०
य एष आदित्ये पुरुषः (छां. उ. ४-११०) २४५
य एष एतस्मिन्नग्नौ (बृ.उ. ४-५-३) ३१७
य एषोऽन्तरक्षिणि पुरुषो (छा.उ. ४-१५) २४६
यं कामये तं तमुग्रम् (ऋ.सं.१०-१२५-५) ५३
यं पृथिवी न वेद (बृ.उ. ५-७-३) २७१
यः पृथिव्यां तिष्ठन् (बृ.उ. ५-७-३) २६८
यः सर्वज्ञः स सर्ववित् (मुं.उ.११.९.) २८७
यः सेतुरीजानानां (क.उ. १-३-२) २३९
यज्ञेन यज्ञमयजन्त (तै.आ. ३-१२) १७९
यज्ञो विष्णुर्देवता (श्रुत्यन्तरम्) १७९
यतो वा इमानि (तै.उ. ३-१) ६३
यतो वाचो निवर्तन्ते (तै.उ. २-४-२२) ८४,४८५
यत्तत् सूक्ष्मं (पिप्पलादशाखा) ५०८
यत्तदद्रेश्यमग्राह्यम् (मुं.उ. १-१-६) २७९
यत्स्थानत्वादिदं चक्षुः (वामनपुराणम्) २५७
यत्र वेदो रथस्तत्र (ब्रह्मवैवर्तम्) ४६१

यत्रानवसरोऽन्यत्र (बृहत्संहिता) ४०
यथाकामाऽनुमा (स्कान्दपुराणम्) १४६
यथा हि पौरुषं सूक्तं (बृहत्संहिता) ३०८
यथेश्वरश्च जीवश्च (स्कान्दम्) २४२
यथेश्वरस्य जीवस्य (पाद्मपुराणम्) २४२
यथैव नियमः काले ४३७
यथैव पौरुषं सूक्तं (ब्राह्मम्) ३०६
यथोर्णनाभिः (मुं. उ. १-१-७) २८१
यदधीनो गुणो यस्य (स्कान्दम्) ५१४
यदादित्यगतं तेजः (भ.गी.१५-१२) ४०५
यदा पश्यः पश्यते (मुं.उ. ३-१-३) २९०
यदिदं किञ्च जगत्सर्वम् (कठः उ. २-३-२) ४७४
यद् भूतयोनिं परिपश्यन्ति (मु.उ.१.१.६) ५७८
यद् वाचाऽनभ्युदितं (के.उ. १) ८५
यमन्तःसमुद्रे कवयो (म. ना.उ. १-३) ४६
यमेवैष वृणुते (कठ. २.२३) ३५,४१
यस्तन्न वेद (ऋ.सं.१-१६४-३९) ५५५
यस्त्वेतमेवं प्रादेशमात्रं (छां.उ.५-१८-१) २९४
यस्माद् यज्ञायते (नारदीयम्) ३०८
यस्मिन् द्यौः पृथिवी (मुं.उ. २२-५) ३२०
यस्मिन्निदं सञ्च विचैधि (म.ना.३-१-२) ३५१
यस्मिन् पञ्च पञ्च (बृ.उ. ६-४-१७) ५३२
यस्य देवे परा भक्तिः (श्वेता.उ. ६-२३) ३६
यस्य पृथिवी शरीरम् (बृ.उ. ५-७-३) २६९
यस्याण्डकोशं शुष्ममाहुः (तै.आ.३-११-४) १५२

मुक्तिर्हित्वाऽन्यथारूपं (भागवतम्-२.१०.६) १४४
मूर्धैव सुतेजाश्चक्षुः (छां.उ. ५-१८-२) ३०५

॥ य ॥

य आकाशे (बृ.उ.५-७-१२) ५४०
य आत्मनि तिष्ठन् (बृ.उ. माध्यन्दिनपाठः) २७५
य आत्मा अपहतपाप्मा (छां.उ.८-७-३) ३७१
य उ त्रिधातु पृथिवीमुत (ऋ.सं.१-१५४-५) ६३,३५०
य एष आदित्ये पुरुषः (छां. उ. ४-११०) २४५
य एष एतस्मिन्नग्नौ (बृ.उ. ४-५-३) ३१७
य एषोऽन्तरक्षिणि पुरुषो (छा.उ. ४-१५) २४६
यं कामये तं तमुग्रम् (ऋ.सं.१०-१२५-५) ५३
यं पृथिवी न वेद (बृ.उ. ५-७-३) २७१
यः पृथिव्यां तिष्ठन् (बृ.उ. ५-७-३) २६८
यः सर्वज्ञः स सर्ववित् (मुं.उ.११.९.) २८७
यः सेतुरीजानानां (क.उ. १-३-२) २३९
यज्ञेन यज्ञमयजन्त (तै.आ. ३-१२) १७९
यज्ञो विष्णुर्देवता (श्रुत्यन्तरम्) १७९
यतो वा इमानि (तै.उ. ३-१) ६३
यतो वाचो निवर्तन्ते (तै.उ. २-४-२२) ८४,४८५
यत्तत् सूक्ष्मं (पिप्पलादशाखा) ५०८
यत्तदद्रेश्यमग्राह्यम् (मुं.उ. १-१-६) २७९
यत्स्थानत्वादिदं चक्षुः (वामनपुराणम्) २५७
यत्र वेदो रथस्तत्र (ब्रह्मवैवर्तम्) ४६१

यत्रानवसरोऽन्यत्र (बृहत्संहिता) ४०
यथाकामाऽनुमा (स्कान्दपुराणम्) १४६
यथा हि पौरुषं सूक्तं (बृहत्संहिता) ३०८
यथेश्वरश्च जीवश्च (स्कान्दम्) २४२
यथेश्वरस्य जीवस्य (पाद्मपुराणम्) २४२
यथैव नियमः काले ४३७
यथैव पौरुषं सूक्तं (ब्राह्मम्) ३०६
यथोर्णनाभिः (मुं. उ. १-१-७) २८१
यदधीनो गुणो यस्य (स्कान्दम्) ५१४
यदादित्यगतं तेजः (भ.गी.१५-१२) ४०५
यदा पश्यः पश्यते (मुं.उ. ३-१-३) २९०
यदिदं किञ्च जगत्सर्वम् (कठ. उ. २-३-२) ४७४
यद् भूतयोनिं परिपश्यन्ति (मु.उ.१.१.६) ५७८
यद् वाचाऽनभ्युदितं (के.उ. १) ८५
यमन्तःसमुद्रे कवयो (म. ना.उ. १-३) ४६
यमेवैष वृणुते (कठ. २.२३) ३५,४१
यस्तन्न वेद (ऋ.सं.१-१६४-३९) ५५५
यस्त्वेतमेवं प्रादेशमात्रं (छां.उ.५-१८-१) २९४
यस्माद् यज्ञायते (नारदीयम्) ३०८
यस्मिन् द्यौः पृथिवी (मुं.उ. २२-५) ३२०
यस्मिन्निदं सञ्च विचैधि (म.ना.३-१-२) ३५१
यस्मिन् पञ्च पञ्च (बृ.उ. ६-४-१७) ५३२
यस्य देवे परा भक्तिः (श्वेता.उ. ६-२३) ३६
यस्य पृथिवी शरीरम् (बृ.उ. ५-७-३) २६९
यस्याण्डकोशं शुष्ममाहुः (तै.आ.३-११-४) १५२

यस्यानुवित्तः प्रतिबुद्ध आत्मा (बृ.उ. ६-४-१३) ९४
यावत्सेवा परे तत्त्वे (स्कान्दम्) ४५१
येनेदमन्नं (बृ.उ. ७-९-१) २९८
येऽन्नं ब्रह्मोपासते (तै.उ. २.२) १२१
यो गुणैः सर्वतो हीनः (वामनम्) ९२
योऽग्नौ तिष्ठन् (बृ.उ. ५-७-५) ३१७
यो देवानां नामधा एक एव (ऋ.सं.१०.८२.३) ५०
यो नः पिता जनिता (ऋ.सं.१०-८२-३) ६६
योऽयं मध्यमः प्राणः (बृ.उ. ३.५.२१) ४०९
योऽयं विज्ञानमयः (बृ.उ. ६-३-७) ४७९
यो विज्ञाने तिष्ठन् (बृ.उ. ५-७-२२) २७५
यो वेद निहितं गुहायां (तै.उ. २.१) १६६,२३६
यो वै भूमा तत्सुखम् (छां ७-२३) ३३९
योऽशनायापिपासे (बृ.उ. ५-५) ३७२
यो हृच्छयस्तमहम् ३१०

॥ र + ल ॥

रथस्त्वश्वतरीयुक्तः (ब्राह्मम्) ४६१
रुजं द्रावयते (ब्रह्माण्डपुराणम्) ३३०
रेतो धातुर्वटकणिका (मोक्षधर्मवचनम्) ७२
लक्षणं परमानन्दः (ब्रह्मवैवर्तम्) २६०

॥ व ॥

वसन्ते वसन्ते (श्रुतिः) ५२५
वसूनामेवैको भूत्वा (छां.उ. ३-६-२) ४४५

वाचा विरूप नित्यया (ऋ.सं.८-६४-६) ४३२
वायुना हि सर्वे(श्रुतिः) ५४७
वायोरात्मानं कवयः (तै.आ. ३-११) १५६
वासुदेवात् परः को नु २०५
वासुदेवात्मकं ब्रह्म ११६
विज्ञानमानन्दं (बृ.उ. ५-९-२८) २५९
विज्ञाय प्रज्ञां कुर्वीत (बृ.उ. ६-४-२१) ८६
विद्याऽऽत्मनि भिदाबोधः (भाग. स्क.११-१९-३९) १३६
विमे कर्णा पतयतः (ऋ.सं. ६-९-६) १६६
विष्णुमेवाऽनयन् देवाः (स्कान्दम्) १८६
विष्णुरेव ज्योतिः (चतुर्वेदशिखाश्रुतिः) ४८०
विष्णोर्नु कं वीर्याणि प्रवोचं (ऋ.सं.१-१५४-१) १६१
वेदे रामायणे चैव (हरिवंशेषु) ५५
वेदैश्च सर्वैरहमेव वेद्यः (भ.गी.१५-१५) ८८
वैश्वानरमृत आजातम् (ऋ.सं.६-७-१) २९७
वैश्वानरे तद्धुतं भवति (छां.उ. ५-२४-४) २९७
व्यवधानेन सूतिस्तु (ब्रह्माण्डम्) ५८०
व्यासचित्तस्थिताकाशाद् (स्कान्दम्) ३१३

॥ श ॥

शमूनं कुरुते (महाकौर्मम्) ५८४
शान्तो दान्त उपरतस्तितिक्षुः (बृ.उ.६-४-२३) ३३
शिरो नारायणः पक्षः (बृहत्संहिता) १२६
शीर्यते नित्यमेवास्मात् २७७
शुभं पिबत्यसौ नित्यं (पाद्मपुराणम्) २३५

श्रवणे त्रपुजतुभ्यां (गौतमधर्मसूत्रम्) ४७१
श्रीश्च ते लक्ष्मीश्च पत्न्यौ (तै.आ. ३-१३) १६४
श्रुतिर्लिङ्गं समाख्या च (स्कान्दपुराणम्) ४१३
श्रुतिसाहाय्यरहितं (महाकौर्मम्) ६९
श्वपचादपि कष्टत्वं (स्कान्दपुराणम्) ५८

॥ स ॥

स आत्मन आत्मानमुद्धृत्य ९९
स ईशः सोऽसपत्नः (चतुर्वेदशिखा) २५६
स एतमेव पुरुषं ब्रह्म (ऐ.आ. २-४-३) १९६
स एतमेव सीमानं (ऐ.आ. २-४-३) १९६
स एतस्माज्जीवघनात् (प्र.उ. ५.५) ८६
स एनान् ब्रह्म गमयति (छां.उ. ४-१५) २६१
स एष परोवरीयान् उद्गीथः (छां.उ.१-९) १५९
स एष सर्वेभ्यः पाप्मभ्यः (छां.उ.१-६-७) ३७२
स एषोऽन्तश्चरते (मुं.उ. २-२-६) ३२०
स एषोऽसुः स (ऐ.आ. २-१-५) १८५
संविच्छास्त्रं परं पदम् (भाग.) १९२
स तत्र पर्येति जक्षन् (छां.उ.८-१२-३) ३८७
सता सोम्य (छा.उ. ६-७-१) ३७६
सत्यकामः परो नास्ति (स्कान्दम्) ३७४
सत्यं ज्ञानमनन्तं (तै.उ. २.१) १२४
सत्य आत्मा सत्यो जीवः (पैङ्गिश्रुतिः) २४०
सदेव सोम्येदमग्रे (छां.उ.६-२-१) ३६०
स देवो बहुधा भूत्वा १००

सपत्नीं मे पराधम (मन्त्रप्रश्नम् १-१६) ४६५
सप्त युञ्जन्ति (तै.आ.३-११-८) १५०
सप्तार्धगर्भा (ऋ.सं. १-१६४-३६) ३५३,४९५
समुद्रेऽन्तः कवयो विचक्षते (तै.आ.३-११-११) १५२
स य एतमेवमात्मानं (महोपनिषत्) ३०३
स यत् तत्र किञ्चित् (बृ.उ. ६-३-१५) ४८७
स यद्यदेवासृजत (बृ.उ. ३-२-५) २२१
स यश्चायं पुरुषे (तै.उ. २-८) १३२
स यश्चायमशरीरः (ऐ.आ. ३-२-४) २०४
स योऽतोऽश्रुतः (ऐ. आ. ३-२-४) २०६,२७२,४९५
सर्वच्छन्दोऽभिधो ह्येषः (वामनम्) १७५
सर्वज्ञस्यैव कृष्णस्य (ब्राह्मम्) ४५३
सर्वज्ञाल्पज्ञताभेदात् (गारुडम्) २१९
सर्वत्र शक्यते कर्तुम् (वाराहपुराणम्) ७१
सर्वस्याधिपतिः (बृ.उ. ६-४-२१) ४९३
सर्वान्तर्यामिको विष्णुः १४०
सर्वेन्द्रियमयो विष्णुः (स्कान्दम्) २१६
सर्वे वेदाः यत्पदमामनन्ति (कठ.उ. २-१५) ८८
सर्वे वेदाः युक्तयः (पैङ्गिश्रुतिः) १०३
सर्वेशो विष्णुरेवैकः (स्कान्दम्) ३८३
स वा एष (तै.उ. २.२) १२०
स वा एष महानज (बृ.उ. ६-४-२४) ४९१
स शिरः स दक्षिणः (चतुर्वेदशिखा) १२५
स सविता स वायुः (चतुर्वेदशिखा) २०८

स ह सञ्जिहान एव (छां.उ. ४-१-५) ४५८
सहस्रशीर्षं देवं (म.ना.उ.११) ३४२
सहस्रशीर्षाः पुरुषः (चतुर्वेदशिखा) ३०७
स हि सर्वाधिपतिः ३८२
साङ्ख्यं योगः पाशुपतं (मोक्षधर्मवचनम्) ७५
सुवर्णं कोशं रजसा परीवृतं (तै.आ.३-११) १७७
सूर्याचन्द्रमसौ धाता (म.ना.उ. ५.७) ४३७
सोऽध्वनः पारमाप्नोति (कठ. १-३-९) ५१८
सोऽन्तकः स रुद्रः ३२९
सोऽभिध्याय शरीरात् (व्यासस्मृतिः) १५४
सोऽभिध्या स जूतिः ५७०
सोऽश्नुते सर्वान् कामान् (तै.उ.२-१) १४८
स्रष्टा पाता तथैवात्ता (स्कान्दम्) २२४
स्त्रीणां प्रदानकर्मैव (व्यासस्मृतिः) ४६६

॥ ह ॥

हन्तैतमेव पुरुषं ५६७
हृदयं गार्हपत्यो मनः (छां.उ. ५-१८-२) २९७

*****